उच्चतर माध्यमिक पाठ्यक्रम

संस्कृत व्याकरण-३४६

पुस्तक-१

विद्याधनं सर्वधनप्रधानम्

राष्ट्रीय मुक्त विद्यालयी शिक्षा संस्थान

(शिक्षा मंत्रालय, भारत सरकार के अधीन एक स्वायत्त संस्थान)

ए-२४-२५, संस्थागत क्षेत्र, सेक्टर-६२, नोएडा-२०१३०९ (उत्तरप्रदेश)

वेबसाइट - www.nios.ac.in, टोल फ्री नंबर-१८००१८०९३९३

NIOS SENIOR SECONDARY - SANSKRIT VYAKARANA (346)

Complete Textbook (31 Lessons)

Table of Contents

1. Lesson 1 3
2. Lesson 2 31
3. Lesson 3 53
4. Lesson 4 75
5. Lesson 5 97
6. Lesson 6 115
7. Lesson 7 132
8. Lesson 8 151
9. Lesson 9 171
10. Lesson 10 180
11. Lesson 11 193
12. B 208
13. Lesson 13 227
14. Lesson 14 243
15. Lesson 15 264
16. Lesson 16 286
17. Lesson 17 309
18. Lesson 18 331
19. Lesson 19 346
20. Lesson 20 360
21. Lesson 21 385
22. Lesson 22 407
23. Lesson 23 432
24. Lesson 24 459
25. Lesson 25 479
26. Lesson 26 496
27. Lesson 27 513
28. Lesson 28 530
29. Lesson 29 546
30. Lesson 30 566
31. Lesson 31 584

346sk01

१

केवलसमासः अव्ययीभावसमासः च

प्रस्तावना

"समसनं समासः" इति समासस्य सामान्यलक्षणम्। एकीभवनार्थे विद्यमानात् सम्पूर्वकाद् असुधातोः "भावे" इत्यनेन सूत्रेण घञ्प्रत्यये समासशब्दो निष्पन्नः। समसनं नाम बहूनां पदानां मेलनेन एकपदीभवनम्। पठितुमिच्छति इत्यर्थे पिपठिषतीत्यादौ सन्नन्ते एकपदीभवनं भवति। तर्हि अत्रापि समासः इत्यापत्तिः। तद्वारणाय "पाणिनीयसङ्केतसम्बन्धेन समासपदवत्त्वम्" इति समासस्य लक्षणं करणीयम्। "सह सुपा" इत्यादिभिः सूत्रैः विहिताः समासपदवाच्या भवन्तु इति सङ्केतः पाणिनिना कृतः। एवमत्र तात्पर्यं यत् पाणिनिना सूत्रैः येषां समाससंज्ञा कृता ते एव समासपदबोध्याः।

समासः पदविधिषु अन्यतमः। तत्र च यानि पदानि भवन्ति तानि "समर्थः पदविधिः" इति सूत्रबलात् समर्थानि भवन्ति। सामर्थ्यं च द्विविधम् एकार्थीभावसामर्थ्यं व्यपेक्षासामर्थ्यं चेति भेदात्। समासे एकार्थीभावसामर्थ्यम् इति सिद्धान्तः।

तस्य समासस्य भेदविषये बहूनां विप्रतिपत्तिरस्ति। सामान्यतया पञ्च भेदाः - केवलसमासः, अव्ययीभावः, तत्पुरुषः द्वन्द्वो बहुव्रीहिश्चेति। समासभेदविषये अन्तिमे पाठे विस्तरशः आलोचनं करिष्यते। अस्मिन् पाठे केवलसमासस्य अव्ययीभावसमासस्य विवरणं भवति। अतस्तयोः स्वरूपं वर्ण्यते।

केवलसमासः - अव्ययीभावः तत्पुरुषः बहुव्रीहिः द्वन्द्वः इत्येताः समासस्य विशेषसंज्ञाः सन्ति। एताभिः विशेषसंज्ञाभिः विनिर्मुक्तः यः समासः स एव केवलसमासः सुप्सुपा समासः इति वा अभिधीयते।

अव्ययीभावः - प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः। पूर्वपदस्यार्थः पूर्वपदार्थः। पूर्वपदार्थः प्रधानं यस्य स पूर्वपदार्थप्रधानः। यथा अधिहरि भक्तिः अस्ति इत्यत्र अधिहरि इति अव्ययीभावसमासः अस्ति। तत्र अधि इति पूर्वपदमस्ति। तदर्थः अधिकरणम्। हरि इति उत्तरपदम्। तस्य अर्थः विष्णुः इति। अधिहरि इति समस्तपदस्य च हर्यधिकरणम् इत्यर्थः। वाक्यस्य च हर्यधिकरणिका भक्तिः इत्यर्थः। एवञ्च इदं सुस्पष्टं यत् अधिहरि इति पदे विद्यमानस्य अधि इति पूर्वपदस्यार्थस्य प्राधान्यम् अस्ति।

अस्मिन् पाठे क्रमशः केवलसमासस्य अव्ययीभावसमासस्य च सूत्राणि आलोच्यन्ते।

समासविधायकसूत्रार्थलेखनावसरे बहुत्र समस्यते इति पदस्य प्रयोगः अस्ति। समस्यते इति पदस्यार्थो भवति समाससंज्ञं भवति इति। यथा - "सह सुपा" इति सूत्रस्य "सुबन्तं सुबन्तेन सह

समस्यते" इत्यर्थः। एतस्य तात्पर्यं भवति "सुबन्तं सुबन्तेन सह समाससंज्ञं भवति" इति। एवमेव अन्यत्र अवधेयम्।

व्याकरणाध्यनकाले कुत्र अवधानं देयम् -

बहुत्र शास्त्रेषु मूलस्य कण्ठपाठः नापि आवश्यकः स्यात्। परन्तु व्याकरणस्य रूपाणि साधनीयानि चेत् सूत्रोल्लेखपुरःसरं रूपाणि साध्यन्ते। सूत्रं हि लक्षणम् उच्यते। तत् लक्षणं यस्य शब्दस्वरूपस्य संस्कारं करोति तत् शब्दस्वरूपं तस्य लक्ष्यम् उच्यते। अतः व्याकरणस्य छात्रेण लक्षणं तल्लक्ष्यं च सुष्ठु बोध्यम्। लक्षणस्य अर्थं जानाति चेदेव लक्ष्यस्य संस्कारं कर्तुं प्रभवति। अतः लक्षणम् अर्थः लक्ष्यम् एतत् त्रितयम् निष्ठया ज्ञेयमेव। अयमेव व्याकरणाध्ययनस्य पन्थाः। स एव खलु वैद्यः यो रोगं जानाति, औषधं च जानाति, औषधस्य प्रयोगं च जानाति। एषु एकमपि न जानाति चेत् कीदृशः स वैद्यः। एवमेव स एव खलु वैयाकरणः यः लक्षणं जानाति, अर्थं जानाति, लक्ष्यं च जानाति, लक्षणेन लक्ष्यस्य संस्कारं च करोतीति।

उद्देश्यानि

इमं पाठं पठित्वा भवान्/भवती -

- समासे किंविधं सामर्थ्यमपेक्षते इति जानीयात्।
- केवलसमासविधानं केन भवति इति जानीयात्।
- अव्ययीभावसमासविधायकानि सूत्राणि कानि इति जानीयात्।
- अव्ययीभावसमासे समासान्ताः प्रत्ययाः के इति जानीयात्।

[१.१] समर्थः पदविधिः॥ (२.१.१)

सूत्रार्थः - पदसम्बन्धि यत् कार्यं तद् एकार्थीभावसामर्थ्यवत्पदाश्रितं भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं परिभाषासूत्रम्। सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र समर्थः इति प्रथमैकवचनान्तं पदम्। पदविधिः इति प्रथमैकवचनान्तं पदम्। विधीयते इति विधिः कार्यम्। विपूर्वकाद् डुधाञ् धारणपोषणयोः इति धातोः "उपसर्गे घोः किः" इत्यनेन सूत्रेण कर्मणि किप्रत्यये विधिशब्दो निष्पन्नः। पदानां विधिः पदविधिः इति षष्ठीतत्पुरुषसमासः। तेन अस्य पदस्य पदसम्बन्धी विधिः इत्यर्थः। समर्थः इति पदमत्र समर्थाश्रिते लाक्षणिकम्। तेन सूत्रार्थो भवति - पदसम्बन्धी विधिः समार्थाश्रितो भवति। समर्थाश्रितः इत्यस्य अर्थो हि सामर्थ्यवन्ति यानि पदानि, तानि पदानि आश्रित्य प्रवर्तमानः।

तत्र सामर्थ्यं द्विविधम् - एकार्थीभावरूपं व्यपेक्षाभावरूपं चेति। समासादिपदविधिषु तु एकार्थीभावसामर्थ्यम् एव स्वीक्रियते इति सिद्धान्तः। तेन इदम् आगतं यत् समासादिपदविधिः एकार्थीभावरूपसामर्थ्यवन्ति यानि पदानि तानि आश्रित्य प्रवर्तते।

एकार्थीभावसामर्थ्यं च प्रक्रियादशायां प्रत्येकम् अर्थवत्त्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकता। यथा राजपुरुषः इत्यादौ समन्वयः प्रस्तूयते।

राज्ञः पुरुषः इति वाक्यम् अस्ति। अत्र राजपदस्य राजन् इत्यर्थः। तदुत्तरस्य ङस्-प्रत्ययस्य सम्बन्धः इत्यर्थः। पुरुषशब्दस्य पुरुषः इत्यर्थः। तदुत्तरः सु-प्रत्ययः स्वार्थिकः अस्ति। एवं समेषां पदार्थानां मेलनेन राजसम्बन्धी पुरुषः इत्यर्थः भवति। एतेन इदं सुस्पष्टं यद् वाक्ये प्रत्येकं पदानां स्वकीयः अर्थः अस्ति। षष्ठी इति सूत्रेण अत्र समासः क्रियते, समासश्च अलौकिकविग्रहवाक्ये भवति। एवञ्च राजन् ङस् पुरुष सु इति अलौकिकं विग्रहवाक्यं भवति। किन्तु समासः एकार्थीभावरूपे सामर्थ्ये एव भवति। अतः अस्माभिः अलौकिकविग्रहवाक्ये एकार्थीभावरूपं सामर्थ्यं स्वीक्रियते। स्वीकृते च एकार्थीभावरूपे सामर्थ्ये राजन् ङस् पुरुष सु इति समुदायः समुदायशक्त्या एव राजसम्बन्धी पुरुषः इति विशिष्टार्थं बोधयति। पदानां पृथक् पृथक् अर्थस्य उपस्थितिः न भवति। अतः राजन् ङस् पुरुष सु इत्यत्र समुदायशक्त्या विशिष्टार्थप्रतिपादकत्वात् अस्ति एकार्थीभावरूपं सामर्थ्यम्।

परिभाषासूत्रं प्रदीपवद् भवति। यथा प्रदीपः एकदेशस्थः सन् सर्वं गृहम् अभिज्वालयति। एवमेव परिभाषासूत्रम् एकत्र स्थितमपि सम्पूर्णायाम् अष्टाध्याय्यां प्रवर्तते। एवञ्च यत्र यत्र पदसम्बन्धि कार्यं तत्र तत्र तत्कार्यं समर्थपदम् आश्रित्य एव भविष्यति इति सूत्रसारः।

अत्रेदं बोध्यम् - समासः तयोः पदयोः मध्ये एव भवति ययोः पदयोः अर्थयोः मध्ये परस्परं सम्बन्धः भवति। यथा राज्ञः पुरुषः इत्यादौ राजपुरुषपदयोः अर्थयोः मध्ये परस्परं सम्बन्धः अस्ति। अतः अत्र समासः भवति। तेन राजपुरुषः इति प्रयोगः सिध्यति। ययोः अर्थयोः मध्ये परस्परं सम्बन्धः न भवति तद्वाचकपदयोः मध्ये समासः न भवति। यथा पुत्रः राज्ञः पुरुषः देवदत्तस्य इत्यत्र राज्ञः पुत्रेण सम्बन्धः अस्ति, पुरुषस्य च देवदत्तेन सह सम्बन्धः अस्ति। राजपुरुषयोः मध्ये तु सम्बन्धः नास्ति। अतः अत्र राजपुरुषयोः समासः न भवति। इत्येव अनेन सूत्रेण बोध्यते।

समासस्य फलत्रयम् ऐकपद्यम् ऐकस्वर्यम् एकार्थीभावश्चेति। समस्तं पदम् एकपदं भवति। अतः तस्य ऐकपद्यम्। समासे एक एव उदात्तः स्वरः भवति। अतः तस्य ऐकस्वर्यं भवति। अत्र उदात्तः एव स्वरः मुख्यः। समासे व्यपेक्षाभावसामर्थ्यं नास्तीति उक्तमेव। समासे एकार्थीभावः अस्ति। इदं फलत्रयं लाघवम् उच्यते। समासशब्दस्य लाघवं संक्षेपः इत्यपि अर्थः अस्ति। यत्र समासे एकाधिकानि पदानि सन्ति तत्र प्रायः समेषां पदानाम् अन्ते एका एव विभक्तिः दृश्यते, अन्याः विभक्तयो लुप्यन्ते। अतः विभक्तीनाम् अल्पीयस्त्वात् लाघवं भवति एव।

शब्दाबली - समासप्रकरणे बाहुल्येन प्रयुक्तानां केषाञ्चित् पारिभाषिक-शब्दानां परिचयः अधस्तात् दीयते -

क) **वृत्तिः** - समासः एकाधिकानां पदानां भवति। एतानि पदानि समासस्य अवयवाः सन्ति। तत्र प्रत्येकं पदानां स्वकीयः कश्चिद् अर्थः भवति। अवयवभूतानाम् पदानाम् अर्थेभ्यः परः भिन्नः अर्थः अभिधीयते प्रतिपाद्यते येन तत् परार्थाभिधानम्। अत्र अभिधानम् इति करणे ल्युट्। परार्थः येन प्रतिपाद्यते सा वृत्तिः। परार्थे वर्तते सा परार्थवृत्तिः। राज्ञः पुरुषः इत्युदाहरणे द्वयोः पदयोः पृथक् अर्थः

अस्ति। परन्तु तयोः समासे कृते कश्चित् राजसम्बन्धी पुरुषः इति विशिष्टः अर्थः अभिधीयते, प्रतिपाद्यते। विशिष्टः अर्थः कस्यापि एकस्य पदस्य नास्ति। अतः अयं विशिष्टः अर्थः समासावयवपदानाम् अर्थेभ्यः परः भिन्नः। समासः परार्थाभिधानम्। अतः वृत्तिः।

संस्कृतव्याकरणे पञ्च वृत्तयः सन्ति - कृदन्तवृत्तिः, तद्धितान्तवृत्तिः, समासवृत्तिः, एकशेषवृत्तिः, सनाद्यन्तधातुवृत्तिः इति भेदात्।

ख) **विग्रहः** - वृत्त्यर्थावबोधकं वाक्यं विग्रहः। वृत्तेः अर्थस्य बोधनाय यत् पदसमुदायात्मकं वाक्यम् प्रयुज्यते स विग्रहः कथ्यते। स च विग्रहः लौकिकालौकिकभेदेन द्विविधः।

ग) **लौकिकविग्रहः** - राजपुरुषः इति समासः वृत्तिः। तस्य राज्ञः पुरुषः इति यो विग्रहः लौकितसंस्कृतभाषायां व्यवहर्तुं योग्यः स लौकिकविग्रहः कथ्यते।

घ) **अलौकिकविग्रहः** - व्याकरणप्रक्रियासौकर्याय राजपुरुषः इति वृत्तेः राजन् ङस् पुरुष सु इति प्रकृतेः विभक्तिप्रत्ययसहितं प्रकटनम् अलौकिकविग्रहः कथ्यते। अस्य लोके प्रयोगो न भवति। केवलं प्रक्रियायाम्।

स्वपदविग्रहः अस्वपदविग्रहः इति भेदेनापि विग्रहः द्विविधः।

ङ) **स्वपदविग्रहः** - समासस्य पदात्मकान् अवयवान् आदाय कृतः विग्रहः स्वपदविग्रहः। स्वस्य पदानि प्रयुज्य कृतः विग्रहः इति यावत्। यथा राजपुरुषः इति समासस्य अवयवौ राजन् पुरुष इति द्वौ। तौ प्रयुज्य विग्रहः यथा राज्ञः पुरुषः इति। अतः अयं स्वपदविग्रहः। यत्र समासः विकल्पेन विधीयते तत्र लौकिकः स्वपदविग्रहः सम्भवति। यत्र नित्यसमासः भवति तत्र लौकिकः स्वपदविग्रहः न भवति। अलौकिकः विग्रहः सदा स्वपदविग्रहः एव भवति।jj

च) **अस्वपदविग्रहः** - समासस्य पदात्मकान् अवयवान् अनादाय कृतः विग्रहः अस्वपदविग्रहः। स्वस्य पदानि प्रयुज्य विग्रहः कृतः नास्ति स अस्वपदविग्रहः इति यावत्। यथा उपरामम् इति अव्ययीभावसमासे समासस्य अवयवौ उप राम इति द्वौ। तयोः उप इति पदं त्यक्त्वा तदर्थकम् अपरं समीपम् इति पदं प्रयुज्य विग्रहः यथा रामस्य समीपम् इति। अतः अयम् अस्वपदविग्रहः। नित्यसमासस्य लौकिकः अस्वपदविग्रहः भवति। अलौकिकविग्रहस्तु कदापि न अस्वपदविग्रहः।

[१.२] प्राक्कडारात् समासः॥ (२.१.३)

सूत्रार्थः - "कडाराः कर्मधारये" इत्यस्मात् सूत्रात् प्राक् समासः इत्यधिकारः अस्ति।

सूत्रव्याख्या - इदमधिकारसूत्रम्। सूत्रेऽस्मिन् पदत्रयं वर्तते। तत्र प्राक् इति पूर्वार्थवाचकम् अव्ययपदम्। कडारात् इति पञ्चम्येकवचनान्तं पदम्। समासः इति प्रथमैकवचनान्तं पदम्। अत्र प्राक् इति पदं द्विः आवर्तते। सूत्रे कडारपदेन "कडाराः कर्मधारये" (२.२.३८) इति सूत्रस्य ग्रहणम्। तेन "कडाराः कर्मधारये" इत्यस्मात् सूत्रात् पूर्वं समासः इति पदं प्राक् इति पदं च अधिक्रियेते इति सूत्रार्थो भवति। अर्थात् अष्टाध्याय्यां प्राक् कडारात् समासः इत्यतः आरभ्य कडाराः कर्मधारये इत्यस्मात् सूत्रात् पूर्वं विद्यमानसूत्रेषु समासः इति पदं प्राक् इति पदं च गच्छतः।

प्राक् इत्यस्य आवर्तितस्य फलमेकसंज्ञाधिकारेऽपि समाससंज्ञया सह अव्ययीभावादिसंज्ञानां समावेशः।

पाठगतप्रश्नाः-१

१. समर्थः पदविधिः" इति सूत्रं कीदृशं सूत्रम्।

२. सूत्रे समर्थः इति पदस्य कः अर्थः।

३. पदविधिः नाम किम्।

४. "समर्थः पदविधिः" इति सूत्रस्य कः अर्थः।

५. वृत्तिलक्षणं किम्।

६. वृत्तेः कति भेदाः।

७. विग्रहलक्षणं किम्।

८. विग्रहस्य कति भेदाः।

९. "प्राक्कडारात्समासः" इति सूत्रं कीदृशं सूत्रम्।

१०. प्राक्कडारात् समासः इति सूत्रे कडारपदेन कस्य ग्रहणम्।

[१.३] सह सुपा॥ (२.१.४)

सूत्रार्थः - सुबन्तं सुबन्तेन सह समस्यते।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन समाससंज्ञा विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। तत्र सह इत्यव्ययपदम्। सुपा इति तृतीयैकवचनान्तं पदम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इति पदम् अनुवर्तते। "प्राक्कडारात्समासः" इति सूत्रात् समासः इति पदम् अधिक्रियते। "प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणम्" इति परिभाषया सुप् इति प्रत्ययबोधकस्य प्रत्याहारस्य ग्रहणात् तत्र तदन्तविधिः। तेन सुप् इत्यस्य सुबन्तम् इत्यर्थः, सुपा इत्यस्य च सुबन्तेन इत्यर्थः। एवं सूत्रार्थो भवति - "सुबन्तं सुबन्तेन सह समस्यते" इति। एतस्य तात्पर्यं तावत् सुबन्तं सुबन्तेन सह समाससंज्ञं भवति। अत्रेदमपि बोध्यं यत् अनेन सूत्रेण विधीयमाना समाससंज्ञा तयोः सुबन्तयोः भवति ययोः मध्ये एकार्थीभावसामर्थ्यम् अस्ति।

उदाहरणम् - भूतपूर्वः इत्यादिकम् अस्य सूत्रस्य उदाहरणम्। पूर्वं भूतः इति लौकिकविग्रहः। पूर्व अम् भूत सु इत्यलौकिकविग्रहः। पूर्व अम् इति सुबन्तं भूत सु इत्यनेन सुबन्तेन सह प्रकृतसूत्रेण समाससंज्ञां लभते। तेन पूर्व अम् भूत सु इति समुदायः समाससंज्ञकः। ततश्च प्रक्रियाकार्ये भूतपूर्वः इति रूपम्।

[१.४] प्रथमानिर्दिष्टं समास उपसर्जनम्॥ (१.२.४३)

सूत्रार्थः - समासविधायकशास्त्रे यत् प्रथमान्तं तद्बोध्यम् उपसर्जनसंज्ञं भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते।सूत्रेऽस्मिन् पदत्रयम् अस्ति। तत्र प्रथमानिर्दिष्टं समासे उपसर्जनम् इति पदच्छेदः। प्रथमानिर्दिष्टमिति प्रथमैकवचनान्तं पदम्। समासे इति सप्तम्येकवचनान्तं पदम्। उपसर्जनम् इति प्रथमैकवचनान्तं पदम्। अत्र प्रथमानिर्दिष्टं समासे इति संज्ञिदलम् उपसर्जनम् इति च संज्ञापदम्। प्रथमया निर्दिष्टं प्रथमानिर्दिष्टम् इति तृतीयातत्पुरुषसमासः। प्रथमानिर्दिष्टं नाम प्रथमान्तपदबोध्यम्। समासे इत्यस्य च समासविधायकसूत्रे इत्यर्थः। एवं सूत्रार्थः समायाति - "समासविधायकसूत्रे यत् प्रथमान्तं तद्बोध्यम् उपसर्जनसंज्ञं भवति" इति। अर्थात् समासविधायके सूत्रे यत् प्रथमान्तं पदं तद्बोध्यः अर्थः लक्ष्ये उपसर्जनसंज्ञः भवति।

उदाहरणम् - कृष्ण अम् श्रित सु इति अलौकिकविग्रहे "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रेण समाससंज्ञा विधीयते। अस्मिंश्च सूत्रे द्वितीया इति प्रथमान्तम् पदम्। तस्य अर्थः द्वितीयान्तम् इति। तच्च प्रकृते लक्ष्ये कृष्ण अम् इति अस्ति। अतः तस्य अनेन सूत्रेण उपसर्जनसंज्ञा भवति।

पूर्व अम् भूत सु इत्यत्र च सह सुपा इत्यनेन समाससंज्ञा कृता अस्ति। समासविधायकं सूत्रं सह सुपा इति। अत्र च सुप् इति पदम् अनुवर्तितम् अस्ति, तच्च प्रथमान्तम् अस्ति। तद्बोध्यं च पूर्व अम् इत्यपि अस्ति, भूत सु इत्यपि अस्ति। अतः उभयोरपि उपसर्जनसंज्ञा प्राप्ता।

[१.५] उपसर्जनं पूर्वम्॥ (२.२.३०)

सूत्रार्थः - समासे उपसर्जनसंज्ञकं पूर्वं प्रयोज्यम्।

सूत्रव्याख्या - इदं विधिसूत्रम्। सूत्रेऽस्मिन् द्वे पदे स्तः। तत्र उपसर्जनम् इति पूर्वम् इति च पदद्वयं प्रथमैकवचनान्तम्। "प्राक्कडारात्समासः" इति सूत्रात् समासः इति पदम् अधिक्रियते। तस्य च प्रथमान्तस्य सप्तम्यन्तत्वेन विपरिणामः भवति। एवं समासे उपसर्जनं पूर्वम् इति पदयोजना। समासे उपसर्जनसंज्ञकं पूर्वं प्रयोज्यम् इति सूत्रस्यार्थः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं यथा "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रम्। कृष्णं श्रितः इति लौकिकविग्रहे कृष्ण अम् श्रित सु इत्यलौकिकविग्रहे द्वितीया इति पदस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य कृष्ण अम् इत्यस्य "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन उपसर्जनसंज्ञा भवति। ततः प्रकृतसूत्रेण समासे उपसर्जनसंज्ञकस्य कृष्ण अम् इत्यस्य पूर्वनिपातः भवति। प्रक्रियाकार्ये च कृष्णश्रितः इति रूपं सिध्यति।

अत्र च पूर्व अम् भूत सु इति स्थिते समासविधायकशास्त्रे "सह सुपा" इत्यत्र उभयस्य सुबन्तत्वेन निर्देशाद् उभयोः उपसर्जनसंज्ञायाम् उभयोः पूर्वनिपातः प्राप्तः। परन्तु भगवतः पाणिनेः सूत्रं विद्यते "भूतपूर्वे चरट्" इति। तत्र भूतशब्दस्य पूर्वं प्रयोगः दृश्यते। अतः तदनुरोधेन भूतशब्दस्यैव पूर्वं

प्रयोगः क्रियते, न तु पूर्व इति शब्दस्य। ततः भूत सु पूर्व अम् इति स्थिते सुब्लुग्विधानाय सूत्रमिदं प्रवृत्तम्
-

पाठगतप्रश्नाः-२

११. "सह सुपा" इत्यनेन सूत्रेण कीदृशः समासो भवति।

१२. "सह सुपा" इत्यस्य सूत्रस्य कः अर्थः।

१३. "सह सुपा" इत्यस्य सूत्रस्य किम् उदाहरणम्।

१४. "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रेण किं भवति।

१५. समासपदेन "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रे कस्य ग्रहणम्।

१६. "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रस्यार्थः कः।

१७. प्रथमानिर्दिष्टमिति पदस्य कः अर्थः।

१८. "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रे संज्ञासंज्ञिनिर्णयं कुरुत।

१९. "उपसर्जनं पूर्वम्" इति सूत्रेण किं भवति।

२०. "उपसर्जनं पूर्वम्" इति सूत्रस्य कः अर्थः।

२१. "उपसर्जनं पूर्वम्" इति सूत्रस्य एकम् उदाहरणं देयम्।

[१.६] सुपो धातुप्रातिपदिकयोः॥ (२.४.७१)

सूत्रार्थः - धातोः प्रातिपदिकस्य च अवयवस्य सुपः लुक् भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण सुपः लुक् विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र सुपः इति षष्ठ्येकवचनान्तं पदं, धातुप्रातिपदिकयोः इति षष्ठीद्विवचनान्तं पदम्। धातुश्च प्रातिपदिकं च धातुप्रातिपदिके, तयोः धातुप्रातिपदिकयोः इति इतरेतरयोगद्वन्द्वसमासः। "ण्यक्षत्रियार्षञितो यूनि लुगणिञोः" इति सूत्रात् लुक् (१/१) इति पदम् अत्र अनुवर्तते। एवं प्रस्तुतस्य सूत्रस्यार्थः - "धातोः प्रातिपदिकस्य च अवयवस्य सुपः लुक् भवति" इति।

"प्रत्ययस्य लुक्श्लुलुपः" इति सूत्रानुसारेण प्रत्ययस्यादर्शनं लुक्-संज्ञं भवति।

उदाहरणम् - अस्य सूत्रस्य धात्ववयवस्य लुकि उदाहरणं भवति पुत्रीयति इति। आत्मनः पुत्रम् इच्छति इति विग्रहे "सुप आत्मनः क्यच्" इत्यनेन सूत्रेण पुत्र अम् इति द्वितीयान्तात् क्यचि पुत्र अम् क्यच् इति जाते, पुत्र अम् क्यच् इति समुदायस्य क्यजन्तत्वेन "सनाद्यन्ता धातवः" इत्यनेन धातुसंज्ञा भवति। अत्र पुत्र अम् क्यच् इति समुदायः धातुसंज्ञकः। तस्य अवयवः अम् सुप् अस्ति। तस्य अनेन प्रकृतसूत्रेण लुक् भवति। ततः प्रक्रियाकार्ये पुत्रीयति इति रूपं सिध्यति।

प्रातिपदिकावयवस्य लुकि उदाहरणं भूतपूर्वः इति। भूत अम् पूर्व सु इति स्थिते "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकसंज्ञा भवति। ततः प्रकृतसूत्रेण प्रातिपदिकावयवस्य सुपः सोः अमश्च लुक् भवति। ततः प्रक्रियाकार्ये भूतपूर्वः इति रूपं निष्पद्यते।

(१.६.१) इवेन समासो विभक्त्यलोपश्च॥ (वार्तिकम्)

वार्तिकार्थः - इवेति शब्देन सह सुबन्तं समाससंज्ञं भवति। समासावयवविभक्तेः लोपो न भवति।

वार्तिकव्याख्या - इदं वार्तिकं केवलसमासविधायकम्। अस्मिन् वार्तिके पदचतुष्टयं विलसति। इवेन समासः विभक्त्यलोपः च इति पदच्छेदः। अत्र इवेनेति तृतीयैकवचनान्तं पदम्। समासः विभक्त्यलोपः इति पदद्वयं प्रथमैकवचनान्तम्। चेत्यव्ययपदम्। न लोपः अलोपः इति नञ्तत्पुरुषसमासः। विभक्तेः अलोपः विभक्त्यलोपः इति षष्ठीतत्पुरुषसमासः। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इति पदम् अनुवर्तते। "प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्" इति परिभाषया सुप् इति प्रत्ययबोधकस्य प्रत्याहारस्य ग्रहणात् तत्र तदन्तविधिः। तेन सुबन्तम् इति लभ्यते। एवम् इवेन सह सुबन्तं समासः विभक्त्यलोपश्च इति पदयोजना। अत्र वार्तिकार्थो भवति - "इवेति शब्देन सह सुबन्तं समाससंज्ञं भवति। समासावयवविभक्तेश्च लोपो न भवति" इति।

उदाहरणम् - अस्य वार्तिकस्योदाहरणं वागर्थाविव इति। वाक् च अर्थश्च इति वागर्थौ इति इतरेतरयोगद्वन्द्वसमासः। वागर्थौ इव इति लौकिकविग्रहे वागर्थ औ इव इत्यलौकिकविग्रहे प्रकृतवार्तिकेन इवशब्देन सह वागर्थ औ इति सुबन्तं समाससंज्ञं भवति। समासे सति वागर्थ औ इत्यस्य सुबन्तम् इति प्रथमान्तपदबोध्यत्वात् "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रेण उपसर्जनसंज्ञा भवति। ततश्च "उपसर्जनं पूर्वम्" इति सूत्रेण तस्य पूर्वं प्रयोगः भवति। तेन वागर्थ औ इव इति स्थितिः जायते। ततश्च समासस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञा भवति। प्रातिपदिकसंज्ञायां सत्यां "सुपो धातुप्रातिपदिकयोः" इत्यनेन प्राप्तस्य लुकः निषेधः "विभक्त्यलोपश्च" इति वार्तिकांशात् जायते। एवं वागर्थ औ इवेति स्थिते "वृद्धिरेचि" इत्यनेन सूत्रेण अकारस्य औकारस्य च स्थाने वृद्धौ औकारे, "एचोऽयवायावः" इत्यनेन सूत्रेण औकारस्यावादेशे प्रक्रियाकार्ये सर्वसंयोगे वागर्थाविव इति रूपं निष्पद्यते।

पाठगतप्रश्नाः-३

२२. "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण किं भवति।

२३. "सुपो धातुप्रातिपदिकयोः" इति सूत्रस्य कः अर्थः।

२४. धातुप्रातिपदिकयोः इत्यत्र का विभक्तिः कश्च समासः।

२५. भूतपूर्व इत्यत्र भूतशब्दस्य कथं पूर्वनिपातः।

२६. "सुपो धातुप्रातिपदिकयोः" इति सूत्रस्य किमुदाहरणम्।

२७. "इवेन समासो विभक्त्यलोपश्च" इत्यस्य वार्तिकस्यार्थः कः।

२८. "इवेन समासो विभक्त्यलोपश्च" इत्यस्य वार्तिकस्य किमुदाहरणम्।

[१.७] अव्ययीभावः॥ (२.१.५)

सूत्रार्थः - "तत्पुरुषः" (२.१.२२) इत्यस्मात् सूत्रात् प्राक् अव्ययीभावः इत्यधिकारः।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदम् अधिकारसूत्रम्। संज्ञाधिकारोऽयम्। अस्मिन् सूत्रे अव्ययीभावः इति प्रथमैकवचनान्तम् पदम्। "तत्पुरुषः" इत्यस्मात् सूत्रात् प्राक् अव्ययीभावः इति पदम् अधिक्रियते। अर्थाद् एतस्मात् सूत्राद् उत्तरं "तत्पुरुषः" इत्यस्मात् सूत्रात् प्राक् विद्यमानेषु सूत्रेषु अव्ययीभावः इति पदम् अनुवर्तते, व्याप्नोति। प्रतिसूत्रम् उपतिष्ठते इति भावः। ततश्च तेन तेन सूत्रेण विहितस्य समासस्य अव्ययीभावसंज्ञा भवति। अतः अयं संज्ञाधिकारः।

[१.८] अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावात्ययाऽसम्प्रति-शब्दप्रादुर्भाव- पश्चाद्-यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्याऽन्तवचनेषु॥ (२.१.६)

सूत्रार्थः - विभक्त्यर्थादिषु वर्तमानम् अव्ययं सुबन्तेन सह नित्यं समस्यते।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण अव्ययीभावसमासः विधीयते। अस्मिन् सूत्रे पदद्वयं विद्यते। तत्र अव्ययम् इति प्रथमैकवचनान्तं पदम्। विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावाऽत्ययाऽसम्प्रति-शब्दप्रादुर्भाव-पश्चाद्यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्याऽन्तवचनेषु इति सप्तमीबहुवचनान्तं पदम्। वचधातोः कर्मणि ल्युटि वचनशब्दो निष्पन्नः। तेन उच्यते असौ वचनः इति तस्यार्थः वाच्यः इति यावत्। विभक्तिश्च समीपञ्च समृद्धिश्च व्यृद्धिश्च अर्थाभावश्च अत्ययश्च असम्प्रति च शब्दप्रादुर्भावश्च पश्चाच्च यथा च आनुपूर्व्यं च यौगपद्यं च सादृश्यं च सम्पत्तिश्च साकल्यञ्च अन्तश्च इति विग्रहे इतरेतरयोगद्वन्द्वसमासे विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावाऽत्ययाऽसम्प्रति-शब्दप्रादुर्भाव-पश्चाद्यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्याऽन्ताः इति शब्दो निष्पन्नः। ते च वचनाश्च इति विग्रहे कर्मधारयसमासे कृते विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावाऽत्ययाऽसम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्याऽन्तवचनाः इति शब्दः निष्पद्यते। अस्यैव सप्तमीबहुवचनान्तं रूपं सूत्रे वर्तते। "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति न्यायाद् वचनशब्दस्य विभक्तिप्रभृतिभिः प्रत्येकं सम्बन्धः भवति।

विभक्तिपदेनात्र अधिकरणकारकस्य ग्रहणम्। समीपं नाम नैकट्यम्। समृद्धिः नाम उन्नतिः। विगता ऋद्धिः व्यृद्धिः ऋद्धेरभावः इत्यर्थः। अर्थस्य वस्तुनः अभावः अर्थाभावः। अत्ययो ध्वंसः। सम्प्रति न युज्यते इत्यसम्प्रति। शब्दप्रादुर्भावः नाम शब्दस्य नाम्नः प्रादुर्भावः प्रसिद्धिः। यथाशब्दस्य योग्यता-वीप्सा-पदार्थानतिवृत्ति-सादृश्यानि इति एते चत्वारः अर्थाः। पदस्यार्थः पदार्थः। न अतिवृत्तिः

अनतिवृत्तिः। अनतिक्रम इत्यर्थः। पदार्थस्यानतिवृत्तिः इति पदार्थानतिवृत्तिः। पदार्थस्यानुल्लङ्घनम् इत्यर्थः। यथार्थः सादृश्यं नाम तुल्यता। अनुपूर्वम् अनुक्रमः, तस्य भाव आनुपूर्व्यम्। पूर्वतायाः क्रम इत्यर्थः। यौगपद्यम् एककालता। यथार्थत्वेन सादृश्यार्थस्य ग्रहणात् पुनः सादृश्यं सूत्रे किमर्थम् इति प्रश्नः समुदेति। अत्रोत्तरं तावत् सादृश्यस्य गौणत्वे अपि समासविधानाय सूत्रे पुनः सादृश्यग्रहणम्। ऋद्धेराधिक्यं समृद्धिः, सम्पत्तिः नाम अनुरूप आत्मभावः। अर्थात् योग्यः स्वोचितभावः सम्पत्तिः इत्यनेनोच्यते। साकल्यं नाम सम्पूर्णता। अन्तः नाम समाप्तिः।

अस्मिन् सूत्रे "सुबामन्त्रिते पराङ्गवत्स्वरे" इति सूत्रात् सुप्, "सह सुपा" इति सम्पूर्णं सूत्रम् च अनुवर्तते। समासः अव्ययीभावः च इति पदद्वयमधिकृतम्। सुप् इति पदस्य तदन्तविधिना सुबन्तम् इति लभ्यते। सुपा इत्यस्य तदन्तविधिना च सुबन्तेन इति लभ्येत। समर्थः पदविधिः इति सूत्रात् समर्थः इति पदम् आयाति। तच्च तृतीयान्तत्वेन विपरिणमते। तेन समर्थेन इति भवति। एवं "विभक्त्यादिषु अर्थेषु वर्तमानम् अव्ययं सुबन्तं समर्थेन सुबन्तेन सह समाससंज्ञं भवति। स च समासः अव्ययीभावसंज्ञकः भवति" इति सूत्रस्यार्थः समायाति। अर्थात् १) विभक्त्यर्थवाचकम् अव्ययं सुबन्तं समर्थेन सुबन्तेन सह समाससंज्ञं भवति। स च समासः अव्ययीभावसंज्ञकः भवति। एवं२) समीपार्थकम् अव्ययं सुबन्तं समर्थेन सुबन्तेन सह समाससंज्ञं भवति। स च समासः अव्ययीभावसंज्ञकः भवति। एवं क्रमेण अन्येषाम् अपि भवति - ३) समृद्ध्यर्थकं ४) वृद्ध्यर्थकम् ५) अर्थाभावार्थकम् ६) अत्ययार्थकम् ७) असम्प्रत्यर्थकम् ८) शब्दप्रादुर्भावार्थकं ९) पश्चादर्थकं १०) यथार्थकम् ११) आनपूर्व्यर्थकम् १२) यौगपद्यार्थकं १३) सादृश्यार्थकं १४) सम्पत्त्यर्थकं १५) साकल्यार्थकम् १६) अन्तार्थकम् – अव्ययं सुबन्तं समर्थेन सुबन्तेन सह समाससंज्ञं भवति। स च समासः अव्ययीभावसंज्ञकः भवति। एवञ्च सूत्रपठितार्थानां वाचकानाम् अव्ययानाम् समर्थेन सुबन्तेन सह समासः भवति इति फलितार्थः।

अवधेयम् - सामान्यतः सूत्रोक्तस्वारस्येन समासविधायकसूत्रस्य अर्थप्रकटनाय – सुबन्तम् सुबन्तेन समाससंज्ञं भवति इति वाक्यं लेख्यम्। तथापि अस्य तात्पर्यं गृहीत्वा बहुषु स्थलेषु - सुबन्तं सुबन्तेन समस्यते। सुबन्तस्य सुबन्तेन समासः भवति। इत्यादिरूपेणापि प्रकट्यते।

अत्रेदं बोध्यम् - अस्मिन् सूत्रे अव्ययम् इति प्रथमान्तं पदमस्ति। अतः अनेन सूत्रेण यत्र समासः क्रियते तत्र अव्ययम् इति प्रथमान्तबोध्यस्य अव्ययस्य उपसर्जनसंज्ञा भवति, तस्य च पूर्वप्रयोगः भवति। अव्ययीभावसमासस्य अव्ययीभावश्च इति सूत्रेण अव्ययसंज्ञा भवति।

अनेन सूत्रेण विधीयमानः समासः नित्यः अस्ति। नित्यसमासस्य प्रायः लौकिकविग्रहः न भवति। अथवा अस्वपदलौकिकविग्रहः भवति। अत एव अविग्रहः अस्वपदविग्रहो वा भवति नित्यसमासः। तत्र नास्ति विग्रहो यस्य सः अविग्रहः। समासस्यार्थबोधकं वाक्यं विग्रहः कथ्यते। एवं यस्य समासस्य विग्रहो नास्ति सः अविग्रहः नित्यसमासः। नास्ति स्वपदैः विग्रहो यस्य सः अस्वपदविग्रहः। अर्थाद् यस्य समासस्य सर्वैः समस्यमानपदैः विग्रहो न क्रियते अपि तु समस्यमानपदसमानार्थकेन अन्येन पदेन क्रियते, सः अपि नित्यसमासः। अनेन सूत्रेण विधीयमानः अव्ययीभावः अस्वपदविग्रहो नित्यसमासः। एवञ्च अस्य सूत्रस्य उदाहरणानाम् अस्वपदविग्रहः एव क्रियते।

उदाहरणम् - अस्य सूत्रस्योदाहरणानि अधः प्रदीयन्ते -

अधिहरि - विभक्त्यर्थवाचकम् अव्ययं सुबन्तं समर्थेन सुबन्तेन सह समाससंज्ञं भवति। स च समासः अव्ययीभावसंज्ञकः भवति – इत्यंशस्य उदारहणम् अस्ति अधिहरि इति।

अधिहरि इत्यस्य हरौ इति लौकिकविग्रहः। हरि ङि अधि इत्यलौकिकविग्रहः अस्ति। अत्र अधि इत्यव्ययं सप्तमीविभक्तेः अर्थस्य अधिकरणस्य वाचकम् अस्ति। तस्मात् अधि इत्यव्ययं विभक्त्यर्थवाचकम् अस्ति। एवञ्च हरि ङि अधि इति अलौकिकविग्रहे विभक्त्यर्थवाचकम् अधि इत्यव्ययं सुबन्तं समर्थेन हरि ङि इति सुबन्तेन सह समाससंज्ञं भवति। स च समासः अव्ययीभावसंज्ञः भवति। ततः समासविधायकसूत्रे अव्ययम् इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य अधि इत्यस्य "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन उपसर्जनसंज्ञा भवति। "उपसर्जनं पूर्वम्" इत्यनेन च तस्य पूर्वनिपातः भवति। तेन अधि हरि ङि इति स्थितिः जायते। ततः समासत्वात् "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन प्रातिपदिकावयवस्य सुपः ङेः लुक् भवति। तेन अधिहरि इति रूपं जायते। ततः "एकदेशविकृतमनन्यवद्" इति परिभाषया अधि हरि ङि इत्यत्र या प्रातिपदिकसंज्ञा सा अधिहरि इत्यत्र अव्याहता। तत् प्रातिपदिकत्वम् आदाय "स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्" इति सूत्रेण क्रमेण स्वादयः विभक्तयः प्राप्नुवन्ति। तत्र प्रथमैकवचने सुप्रत्यये अधिहरि सु इति स्थिते अधिहरि इत्यस्य "अव्ययीभावश्च" इति सूत्रेण अव्ययसंज्ञायां सत्याम् "अव्ययादाप्सुपः" इति सूत्रेण सोः लुकि अधिहरि इति रूपं सिध्यति। एवमेव अधिहरि इत्यस्मात् परं द्वितीयादिविभक्तीनाम् अपि "अव्ययादाप्सुपः" इत्यनेन लुक् भवति। अतः सर्वासु विभक्तिषु अधिहरि इत्येव रूपं भवति।

पाठगतप्रश्नाः-४

२९. "अव्ययीभावः" इति सूत्रं किंप्रकारकम्।

३०. "अव्ययीभावः" इत्यधिकारः कियत्पर्यन्तम्।

३१. "अव्ययं विभक्ति" इत्यादिसूत्रस्यार्थः कः।

३२. "अव्ययं विभक्ति" इत्यादिसूत्रे विभक्तिपदं किं बोधयति।

३३. "अव्ययं विभक्ति" इत्यादिसूत्रे वचनशब्दस्य प्रत्येकं कथमन्वयः।

३४. समृद्धि-सम्पत्त्योः को भेदः।

३५. पदार्थानतिवृत्तिः नाम किम्।

३६. यथार्थत्वेन एव सिद्धे पुनः सूत्रे सादृश्यग्रहणं किमर्थम्।

अत्र विभक्तौ अन्यदुदाहरणं भवति अधिगोपम् इति। तथाहि गाः पातीति विग्रहे गोपाशब्दो निष्पन्नः। गोपि इति लौकिकविग्रहे गोपा ङि अधि इत्यलौकिकविग्रहे समाससंज्ञायाम्

उपसर्जनस्य पूर्वनिपाते प्रातिपदिकत्वात् सुपः ङेर्लुकि प्रक्रियाकार्ये अधिगोपा इति निष्पन्नः। तदा विशेषकार्यसाधनाय सूत्रम् उक्तम्-

[१.९] अव्ययीभावश्च॥ (२.४.१८)

सूत्रार्थः - अव्ययीभावसमाससंज्ञकः शब्दः नपुंसकं भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधायकम्। अनेन अव्ययीभावसमासस्य नपुंसकत्वं विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र अव्ययीभावः च इति पदच्छेदः। अव्ययीभावः इति प्रथमैकवचनान्तं पदम्। चेत्यव्ययपदम्। चकारेण "स नपुंसकम्" इत्यस्मात् सूत्रात् नपुंसकम् इति पदं गृह्यते। एवम् - "अव्ययीभावसमाससंज्ञकः शब्दः नपुंसकं भवति" इति सूत्रार्थः।

उदाहरणम् - अधिगोपा इति स्थिते अव्ययीभावसमाससंज्ञकस्य अस्य प्रकृतसूत्रेण नपुंसकसंज्ञायां "ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यनेन आकारस्य ह्रस्वत्वे अधिगोप इति निष्पद्यते। तस्य प्रातिपदिकत्वात् ततः प्रथमैकवचने सौ अधिगोप सु इति जाते "अव्ययीभावश्च" इत्यनेन अव्ययीभावस्य अव्ययसंज्ञायाम् "अव्ययादाप्सुपः" इत्यनेन सोर्लुकि प्राप्ते -

[१.१०] नाव्ययीभावादतोऽम्त्वपञ्चम्याः॥ (२.४.८३)

सूत्रार्थः - अदन्ताद् अव्ययीभावात् सुपः न लुक्, तस्य पञ्चमीं विना अमादेशश्च भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण अमादेशो विधीयते। न अव्ययीभावाद् अतः अम् तु अपञ्चम्याः इति पदच्छेदः। अत्र नेति निषेधपरकम् अव्ययपदम्। अव्ययीभावादिति पञ्चम्येकवचनान्तं पदम्। अतः इत्यपि पञ्चम्येकवचनान्तं पदम्। अम् इति प्रथमैकवचनान्तं पदम्। तु इत्यव्ययपदम्। अपञ्चम्याः इति षष्ठ्येकवचनान्तं पदम्। न पञ्चमी अपञ्चमी इति नञ्तत्पुरुषसमासः। अत्र अतः इति पदम् अव्ययीभावाद् इत्यस्य विशेषणम्। विशेषणस्य तदन्तविधौ अदन्ताद् अव्ययीभावाद् इति भवति। अस्मिन् सूत्रे "अव्ययादाप्सुपः" इत्यस्मात् सूत्रात् सुपः इति षष्ठ्यन्तं पदं "ण्यक्षत्रियार्षञितो यूनि लुगणिञोः" इत्यस्मात् सूत्रात् लुक् इति प्रथमैकवचनान्तम् अनुवर्तते। अत्र सूत्रे अतः अव्ययीभावात् सुपो न लुक् इत्येकं वाक्यम् अम् तु अपञ्चम्याः इत्यपरं वाक्यम्। अतः अव्ययीभावात् सुपो न लुक् इति वाक्यस्यार्थो भवति अदन्ताद् अव्ययीभावात् सुपः लुक् न भवतीति। अम् तु अपञ्चम्याः इत्यन्यस्य वाक्यस्यार्थो भवति पञ्चम्याः तु अम् न भवति। एवं च अदन्ताद् अव्ययीभावात् परस्य सुपः लुक् न भवति किन्तु अमादेशो भवति, पञ्चम्यास्तु लुग् भवति अमादेशश्च न भवतीति स्थितिः। एवं सूत्रार्थो भवति - "अदन्ताद् अव्ययीभावात्सुपो न लुक्, तस्य तु पञ्चमीं विना अमादेशश्च भवति" इति।

उदाहरणम् - अधिगोप सु इति जाते "अव्ययीभावश्च" इत्यनेन अव्ययीभावस्य अव्ययसंज्ञायाम् "अव्ययादाप्सुपः" इत्यनेन सोर्लुकि प्राप्ते अदन्तत्वाद् अव्ययीभावसंज्ञकत्वाद् अधिगोपशब्दस्य ततः

परस्य सोः अमादेशे अधिगोप अम् इति जाते "अमि पूर्वः " इत्यनेन अकारद्वयस्य स्थाने पूर्वरूपे एकादेशे अकारे अधिगोपम् इति रूपं सिध्यति।

पाठगतप्रश्नाः-५

३७. "अव्ययीभावश्च" इति सूत्रेण किं विधीयते।

३८. "अव्ययीभावश्च" इति सूत्रस्यार्थः कः।

३९. "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इति सूत्रं किंप्रकारकम्।

४०. "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इति सूत्रेण किं विधीयते।

४१. "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इति सूत्रस्यार्थः कः।

[१.११] तृतीयासप्तम्योर्बहुलम्॥ (२.४.८४)

सूत्रार्थः - अदन्ताद् अव्ययीभावात् तृतीयासप्तम्योः बहुलम् अमादेशः भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। तृतीयासप्तम्योः बहुलम् अमादेशविधानाय इदं सूत्रं प्रवृत्तम्। पदद्वयात्मके अस्मिन् सूत्रे तृतीयासप्तम्योः इति षष्ठीद्विवचनान्तं पदम्। तृतीया च सप्तमी च तृतीयासप्तम्योः इति इतरेतरयोगद्वन्द्वः। बहुलम् इति प्रथमैकवचनान्तं पदम्। पूर्वस्मात् सूत्रात् अतः अव्ययीभावाद् अम् इति पदत्रयमनुवर्तते। एवञ्च "अदन्ताद् अव्ययीभावात् तृतीयासप्तम्योः बहुलम् अमादेशः भवति" इति सूत्रार्थः फलति।

पूर्वसूत्रेण प्राप्तस्य नित्यस्य अमादेशस्य अनेन सूत्रेण बाहुल्येन विधीयते। अत्र बहुलग्रहणात् तृतीयायां सप्तम्यां च क्वचिद् अमादेशो भवति क्वचिच्च न भवति।

उदाहरणम् - समीपार्थे अव्ययीभावसमासस्य उदाहरणम् उपकृष्णम् इति। कृष्णस्य समीपम् इति लौकिकविग्रहे कृष्ण ङस् उप इत्यलौकिकविग्रहे "अव्ययं विभक्ती"त्यादिना सूत्रेण समीपार्थे विद्यमानम् उपेत्यव्ययं कृष्ण ङस् इति समर्थेन सुबन्तेन सह अव्ययीभावसमाससंज्ञं भवति। ततः अव्ययमित्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य उपेत्यस्य उपसर्जनसंज्ञायां तस्य पूर्वनिपाते, उप कृष्ण ङस् इति भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकत्वात् सुपः ङसो लुकि उपकृष्ण इति सिध्यति। एकदेशविकृतन्यायेन तस्य प्रातिपदिकत्वात् ततः प्रथमैकवचने सौ उपकृष्ण सु इति जाते, "अव्ययीभावश्च" इत्यनेन समासस्य अव्ययसंज्ञायाम्, "अव्ययादाप्सुपः" इत्यनेन सुब्लुकि प्राप्ते तं प्रबाध्य "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इत्यनेन सूत्रेण सोरमादेशे "अमि पूर्वः" इत्यनेन अकारद्वयस्य स्थाने पूर्वरूपे एकादेशे उपकृष्णम् इति प्रयोगः सिध्यति।

तत्र उपकृष्णशब्दात् तृतीयैकवचनविवक्षायां टाप्रत्यये उपकृष्ण टा इति स्थिते सुब्लुकं प्राप्तं प्रबाध्य "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इत्यनेन सूत्रेण टाप्रत्ययस्य नित्यः अमादेशः प्राप्नोति। तं

प्रबाध्य "तृतीयासप्तम्योर्बहुलम्" इत्यनेन प्रस्तुतसूत्रेण बाहुलकाद् अमादेशो भवति। अम्पक्षे पूर्ववत् प्रक्रियाकार्ये उपकृष्णम् इति रूपम्। अमभावपक्षे च टाप्रत्ययस्य "टाङसिङसामिनात्स्याः" इत्यनेन सूत्रेण इनादेशे उपकृष्ण इन इति जाते आद् गुणः इति सूत्रेण अकारस्य इकारस्य च स्थाने गुणे एकारे उपकृष्णेन इति रूपम्। एवमेव सप्तम्याम् उपकृष्णम् उपकृष्णे इति रूपद्वयम्।

समृद्ध्यर्थे अव्ययीभावसमासस्योदाहरणं भवति सुमद्रम् इति। मद्राणां समृद्धिः इति लौकिकविग्रहे मद्र आम् सु इत्यलौकिकविग्रहे "अव्ययं विभक्ती"त्यादि- सूत्रेण समृद्ध्यर्थे विद्यमानं सु इत्यव्ययं मद्र आम् इत्यनेन समर्थेन सुबन्तेन सह अव्ययीभावसमाससंज्ञं भवति। ततः उपसर्जनसंज्ञकस्य सु इत्यस्याव्ययस्य पूर्वनिपाते सु मद्र आम् इति भवति। ततः समासस्य प्रातिपदिकत्वात् तदवयवस्य सुपः आमः लुकि निष्पन्नात् प्रातिपदिकात् सुमद्र इत्यस्मात् प्रथमैकवचने सौ सुमद्र सु इति जाते, "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इत्यनेन सोरमि अकारद्वयस्य स्थाने पूर्वरूपे सुमद्रम् इति निष्पन्नम्। बहुलग्रहणसामर्थ्यात् अत्र सप्तम्यां नित्यः अमादेशो भवति। तेन सुमद्रम् इत्येव रूपम्। न तु सुमद्रे इति।

व्यृद्ध्यर्थे अव्ययीभावसमासस्योदाहरणं भवति दुर्यवनम् इति। यवनानां व्यृद्धिः इति लौकिकविग्रहः यवन आम् दुर् इत्यलौकिकविग्रहश्च।

अर्थाभावार्थे अव्ययीभावसमासस्योदाहरणं भवति निर्मक्षिकम् इति। मक्षिकाणाम् अभावः इति लौकिकविग्रहः मक्षिका आम् निर् इत्यलौकिकविग्रहश्च।

अत्ययार्थे अव्ययीभावसमासस्योदाहरणं भवति अतिहिमम् इति। हिमस्यात्ययः इति लौकिकविग्रहः हिम ङस् अति इत्यलौकिकविग्रहश्च।

असम्प्रत्यर्थे अव्ययीभावसमासस्योदाहरणं भवति अतिनिद्रम् इति। निद्रा सम्प्रति न युज्यते इति लौकिकविग्रहः निद्रा ङस् अति इत्यलौकिकविग्रहः।

शब्दप्रादुर्भावार्थे अव्ययीभावसमासस्योदाहरणं भवति इतिहरि इति। हरिशब्दस्य प्रकाशः इति लौकिकविग्रहः हरि ङस् इति इत्यलौकिकविग्रहश्च।

पश्चादर्थे अव्ययीभावसमासस्योदाहरणं भवति अनुविष्णु इति। विष्णोः पश्चाद् इति लौकिकविग्रहः विष्णु ङस् अनु इत्यलौकिकविग्रहश्च।

योग्यतारूपे यथार्थे अव्ययीभावसमासस्योदाहरणं भवति अनुरूपम् इति। रूपस्य योग्यम् इति लौकिकविग्रहः रूप ङस् अनु इत्यलौकिकविग्रहश्च।

वीप्सारूपे यथार्थे अव्ययीभावसमासस्योदाहरणं भवति प्रत्यर्थम् इति। अर्थम् अर्थम् प्रति इति लौकिकविग्रहः अर्थ अम् प्रति इत्यलौकिकविग्रहश्च।

पदार्थानतिवृत्तिरूपे यथार्थे अव्ययीभावसमासस्योदाहरणं भवति यथाशक्ति इति। शक्तिम् अनतिक्रम्य इति लौकिकविग्रहः शक्ति अम् यथा इत्यलौकिकविग्रहश्च।

सादृश्यरूपे यथार्थे अव्ययीभावसमासस्योदाहरणं भवति सहरि इति। हरेः सादृश्यम् इति लौकिकविग्रहे हरि ङस् सह इत्यलौकिकविग्रहे "अव्ययं विभक्ती"त्यादिसूत्रेण सादृश्यार्थे विद्यमानं सह

इत्यव्ययं हरि ङस् इत्यनेन समर्थेन सुबन्तेन सह अव्ययीभावसमाससंज्ञं भवति। ततः उपसर्जनसंज्ञकस्य सह इत्यस्य पूर्वनिपाते सह हरि ङस् इति जाते, समासस्य प्रातिपदिकत्वात् तदवयवस्य सुपः ङसः लुकि सहहरि इति निष्पद्यते। ततः सहेत्यस्य सादेशविधायकं सूत्रम्- (अग्रिमसूत्रं द्रष्टव्यम्।)

पाठगतप्रश्नाः-६

४२. "तृतीयासप्तम्योर्बहुलम्" इति सूत्रं किंप्रकारकम्।

४३. "तृतीयासप्तम्योर्बहुलम्" इति सूत्रेण किं विधीयते।

४४. तृतीयासप्तम्योर्बहुलम् इति सूत्रस्यार्थः कः।

४५. समीपार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

४६. समृद्ध्यर्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

४७. व्यृद्ध्यर्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

४८. अर्थाभावार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

४९. अत्ययार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

५०. असम्प्रत्यर्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

५१. शब्दप्रादुर्भावार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

५२. पश्चादर्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

५३. यथार्थे अव्ययीभावसमासस्योदाहरणं लिखत।

५४. वीप्सार्थे अव्ययीभावसमासस्योदाहरणं लिखत।

५५. पदार्थानतिवृत्तौ अव्ययीभावसमासस्योदाहरणं लिखत।

[१.१२] अव्ययीभावे चाकाले॥ (६.३.८०)

सूत्रार्थः - सहशब्दस्य सादेशः भवति अव्ययीभावे, कालविशेषवाचके उत्तरपदे परे न भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण सहशब्दस्य सादेशो विधीयते। पदत्रयात्मके अस्मिन् सूत्रे अव्ययीभावे इति सप्तम्येकवचनान्तं पदम्। चेत्यव्ययपदम्। अकाले इति सप्तम्येकवचनान्तं पदम्। "सहस्य सः संज्ञायाम्" इत्यस्मात् सूत्रात् सहस्येति षष्ठ्यन्तं पदं सः इति प्रथमान्तं पदं च अनुवर्तते। "अलुगुत्तरपदे" इत्यस्मात् सूत्राद् उत्तरपदे इति पदमनुवर्तते।न काले अकाले इति नञ्तत्पुरुषसमासः। कालशब्देनात्र कालविशेषवाचकानां पूर्वाह्णप्रभृतीनां ग्रहणम्। एवं "सहशब्दस्य सादेशः भवति अव्ययीभावे, कालविशेषवाचके उत्तरपदे परे न भवती"ति सूत्रार्थः।

उदाहरणम् - सहहरि इति स्थिते प्रकृतसूत्रेण सहशब्दस्य स्थाने सादेशे निष्पन्नात् सहरि इत्यस्मात् प्रातिपदिकात्सौ अव्ययत्वात्समासस्य "अव्ययादाप्सुपः" इत्यनेन सुब्लुकि सहरि इति पदं निष्पन्नम्। सचक्रम्, ससखि, साग्नि इत्यादिकमेतस्य सूत्रस्योदाहरणम्।

आनुपूर्व्यार्थे अव्ययीभावसमासस्योदाहरणं भवति अनुज्येष्ठम् इति। ज्येष्ठस्य आनुपूर्व्येण इति लौकिकविग्रहः ज्येष्ठ ङस् अनु इत्यलौकिकविग्रहः।

यौगपद्यार्थे अव्ययीभावसमासस्योदाहरणं भवति सचक्रम् इति। चक्रेण युगपद् इति लौकिकविग्रहः चक्र टा सह इत्यलौकिकविग्रहः। सहचक्र इति स्थिते "अव्ययीभावे चाकाले" इत्यनेन प्रस्तुतसूत्रेण सहशब्दस्य सादेशे निष्पन्नात् प्रातिपदिकात् सचक्र इत्यस्मात् प्रथमैकवचने प्रक्रियाकार्ये सचक्रम् इति रूपम्।

सादृश्यार्थे अव्ययीभावसमासस्योदाहरणं भवति ससखि इति। सख्या सदृशः इति लौकिकविग्रहः सखि टा सह इत्यलौकिकविग्रहश्च। अत्रापि प्रस्तुतसूत्रेण सहशब्दस्य सादेशः।

सम्पत्त्यर्थे अव्ययीभावसमासस्योदाहरणं भवति सक्षत्रम् इति। क्षत्राणां सम्पत्तिः इति लौकिकविग्रहः क्षत्र आम् सह इत्यलौकिकविग्रहश्च। अत्रापि प्रस्तुतसूत्रेण सहशब्दस्य सादेशः।

साकल्यार्थे अव्ययीभावसमासस्योदाहरणं भवति सतृणम् इति। तृणमपि अपरित्यज्य इति लौकिकविग्रहः तृण टा सह इत्यलौकिकविग्रहः। अत्रापि प्रस्तुतसूत्रेण सहशब्दस्य सादेशः।

अन्तार्थे अव्ययीभावसमासस्योदाहरणं भवति साग्नि इति। अग्निग्रन्थपर्यन्तम् इति लौकिकविग्रहः अग्नि टा सह इत्यलौकिकविग्रहश्च। अत्रापि प्रस्तुतसूत्रेण सहशब्दस्य सादेशः।

पाठगतप्रश्नाः-७

५६. "अव्ययीभावे चाकाले" इति सूत्रेण किं विधीयते।

५७. "अव्ययीभावे चाकाले" इति सूत्रस्यार्थः कः।

५८. "अव्ययीभावे चाकाले" इति सूत्रस्य किम् उदाहरणम्।

५९. आनुपूर्व्यार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

६०. यौगपद्यार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

६१. सादृश्यार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

६२. सम्पत्त्यर्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

६३. अन्तार्थे अव्ययीभावसमासस्य किम् उदाहरणम्।

[१.१३] यावदवधारणे॥ (२.१.८)

सूत्रार्थः - अवधारणे अर्थे यावदित्यव्ययं सुबन्तेन समर्थेन सह समाससंज्ञं भवति, स च समासः अव्ययीभावसंज्ञः भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण अव्ययीभावसमासो विधीयते। पदद्वयात्मके अस्मिन् सूत्रे यावदित्यव्ययपदम् अवधारणे इति च सप्तम्येकवचनान्तं पदम्। अवधारणं नाम इयत्तापरिच्छेदः। अस्मिन् सूत्रे "समर्थः पदविधिः" इत्यस्मात् समर्थः इत्यधिक्रियते। "सह सुपा" इति सूत्रमनुवर्तते। समर्थस्य विशेषणत्वात् तदन्तविधौ सुबन्तेनेति भवति। समासः इति अव्ययीभावः इति चाधिकृतम्। एवम् "अवधारणे अर्थे यावदित्यव्ययं सुबन्तेन समर्थेन सह समाससंज्ञं भवति, स च समासः अव्ययीभावसंज्ञः भवती"ति सूत्रार्थः। अस्मिन् सूत्रे विग्रहवाक्ये यावदिति तद्धितान्तस्योपयोगो भवति समासे तु यावत् इत्यव्ययस्येति विशेषः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति यावच्छ्लोकम् इति। यावन्तः श्लोकाः इति लौकिकविग्रहे यावत् श्लोक जस् इत्यलौकिकविग्रहे प्रकृतसूत्रेण अवधारणार्थे विद्यमानस्य यावत् इत्यव्ययं श्लोक जस् इत्यनेन समर्थेन सुबन्तेन सह अव्ययीभावसमाससंज्ञं भवति। ततः "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन समासविधायकसूत्रे प्रथमानिर्दिष्टस्य यावदित्यस्य उपसर्जनसंज्ञायां तस्य पूर्वनिपाते यावत् श्लोक जस् इति जाते, समासस्य प्रातिपदिकत्वात् तदवयवस्य सुपः जस्प्रत्ययस्य लुकि यावत् श्लोक इति जाते चुत्वे छत्वे च निष्पन्नात् प्रातिपदिकात् यावच्छ्लोक इत्यस्मात् प्रथमैकवचने सौ सोरमि प्रक्रियाकार्ये यावच्छ्लोकम् इति रूपं निष्पन्नम्।

[१.१४] सुप्प्रतिना मात्रार्थे॥ (२.१.९)

सूत्रार्थः - मात्रार्थे विद्यमानेन प्रतिना सह समर्थं सुबन्तम् अव्ययीभावसमाससंज्ञं भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण अव्ययीभावसमासो विधीयते। पदत्रयात्मके अस्मिन् सूत्रे सुप् इति प्रथमान्तं प्रतिना इति तृतीयान्तं मात्रार्थे इति च सप्तम्यन्तं पदम्। मात्रार्थो नाम लेशः। अस्मिन् सूत्रे "समर्थः पदविधिः" इत्यस्मात् समर्थः इत्यधिक्रियते। "सह सुपा" इति सूत्रमनुवर्तते। समासः इति अव्ययीभावः इति च पदद्वयमधिकृतम्। एवं "मात्रार्थे विद्यमानेन प्रतिना सह समर्थं सुबन्तम् अव्ययीभावसमाससंज्ञं भवति" इति सूत्रार्थः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति शाकप्रति इति। शाकस्य लेशः इति लौकिकविग्रहे शाक ङस् प्रति इत्यलौकिकविग्रहे प्रकृतसूत्रेण मात्रार्थे विद्यमानस्य प्रति इत्यव्ययेन सह शाक ङस् इत्यनेन समर्थं सुबन्तम् अव्ययीभावसमाससंज्ञं भवति। ततः "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन समासविधायकसूत्रे सुबित्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य शाक ङस् इत्यस्य उपसर्जनसंज्ञायां तस्य पूर्वनिपाते शाक ङस् प्रति इति जाते, समासस्य प्रातिपदिकत्वात् तदवयवस्य सुपः ङस्प्रत्ययस्य लुकि निष्पन्नात् प्रातिपदिकात् शाकप्रति इत्यस्मात् प्रथमैकवचने सौ, अव्ययत्वात् सोर्लुकि शाकप्रति इति रूपं निष्पन्नम्।

[१.१५] संख्या वंश्येन॥ (२.१.१९)

सूत्रार्थः - वंश्यवाचकेन सुबन्तेन सह संख्यावाचकं सुबन्तं विकल्पेन समाससंज्ञं भवति, स च अव्ययीभावसंज्ञकः भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण अव्ययीभावसमासो विधीयते। पदद्वयात्मके अस्मिन् सूत्रे संख्या इति प्रथमान्तं वंश्येन इति तृतीयान्तं पदम्। समासः अव्ययीभावः च इति पदद्वयमधिकृतम्। "सह सुपा" इत्यस्मात् सह सुपा इति पदद्वयमनुवर्तते। "विभाषा" इति सूत्रमधिक्रियते। विभाषा नाम विकल्पः। एवं "वंश्यवाचकेन सुबन्तेन सह संख्यावाचकं सुबन्तं विकल्पेन समाससंज्ञं भवति, स च अव्ययीभावसंज्ञकः भवति" इति सूत्रार्थः। वंश्यो नाम वंशे भवः। वंशो द्विविधः- विद्यया जन्मना च। जन्मना वंशः पुत्रादिपरम्परा इति प्रसिद्धः। विद्यया तु वंशः गुरुपरम्परा "स हि विद्यातस्तं जनयति। तच्छ्रेष्ठं जन्म। शरीरमेव मातापितरौ जनयतः" इत्यापस्तम्बवचनात्।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति त्रिमुनि इति। त्रयः मुनयः इति लौकिकविग्रहे त्रि जस् मुनि जस् इत्यलौकिकविग्रहे प्रकृतसूत्रेण संख्यावाचकं त्रि जस् इति सुबन्तं मुनि जस् इत्यनेन सुबन्तेन सह अव्ययीभावसमाससज्ञं भवति। ततः "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन समासविधायकसूत्रे संख्येत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य त्रि जस् इत्यस्य उपसर्जनसंज्ञायां तस्य पूर्वनिपाते त्रि जस् मुनि जस् इति भवति। ततः समासस्य प्रातिपदिकत्वात् तदवयवस्य सुपः जस्प्रत्ययद्वयस्य लुकि त्रिमुनि इति भवति। ततः प्रातिपदिकात् प्रथमैकवचने सौ, अव्ययत्वात् सोर्लुकि त्रिमुनि इति रूपं निष्पन्नम्। एतदुदाहरणं विद्यया वंश्येन सहाव्ययीभावसमासस्य भवति। एवमेव जन्मना वंश्येन सह अव्ययीभावसमासस्य उदाहरणम् एकविंशतिभारद्वाजम् इति।

पाठगतप्रश्नाः-८

६४. "यावदवधारणे" इति सूत्रस्यार्थः कः।

६५. "यावदवधारणे" इति सूत्रस्य किम् उदाहरणम्।

६६. "सुप्प्रतिना मात्रार्थे" इति सूत्रस्यार्थः कः।

६७. "सुप्प्रतिना मात्रार्थे" इति सूत्रस्य किम् उदाहरणम्।

६८. "संख्या वंश्येन" इति सूत्रस्यार्थः कः।

६९. "संख्या वंश्येन" इति सूत्रस्य किम् उदाहरणम्।

७०. वंशः कतिविधः।

[१.१६] नदीभिश्च॥ (२.१.२०)

सूत्रार्थः - नदीविशेषवाचकेन सुबन्तेन सह संख्यावाचकं सुबन्तं विकल्पेन अव्ययीभावसमाससंज्ञं भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण अव्ययीभावसमासो विधीयते। पदद्वयात्मके अस्मिन् सूत्रे नदीभिः इति तृतीयाबहुवचनान्तं पदम्। च इत्यव्ययपदम्। चकारेण पूर्वस्मात् सूत्रात् संख्या अनुकृष्यते। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इति पदमनुवर्तते। "सह सुपा" इति सम्पूर्णं सूत्रमनुवर्तते। "प्राक्कडारात्समासः", "अव्ययीभावः", "विभाषा" इति सूत्रत्रयमधिकृतम्। नदीभिः इति बहुवचनग्रहणात् नदीसंज्ञकस्य गौर्यादेः शब्दस्य नदीशब्दस्य चात्र न ग्रहणम् अपि तु नदीविशेषस्य गङ्गादेर्ग्रहणम्। एवं "नदीविशेषवाचकेन सुबन्तेन सह संख्यावाचकं सुबन्तं विकल्पेन अव्ययीभावसमाससंज्ञं भवति" इति सूत्रार्थः।

"समाहारे चायमिष्यते" इति सूत्रस्थं वार्तिकम्। चकारः अत्रावधारणे। "समाहारार्थे एवानेन सूत्रेणाव्ययीभावसमासो भवति" इति वार्तिकार्थः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति पञ्चगङ्गम् इति। पञ्चानां गङ्गानां समाहारः इति लौकिकविग्रहे पञ्चन् आम् गङ्गा आम् इत्यलौकिकविग्रहे प्रकृतसूत्रेण संख्यार्थे विद्यमानं पञ्चन् आम् इति सुबन्तं नदीवाचकेन गङ्गा आम् इत्यनेन सुबन्तेन सह अव्ययीभावसमाससंज्ञं भवति। ततः समासविधायकसूत्रे अनुकृष्टस्य संख्या इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य पञ्चन् आम् इत्यस्य उपसर्जनसंज्ञायां तस्य पूर्वनिपाते पञ्चन् आम् गङ्गा आम् इति भवति। समासस्य प्रातिपदिकत्वात् तदवयवस्य सुपः आम्प्रत्ययद्वयस्य "सुपो धातुप्रातिपदिकयोः" इत्यनेन सूत्रेण लुकि पञ्चन् गङ्गा इति भवति। ततः लुप्तस्य सुपः "प्रत्ययलोपे प्रत्ययलक्षणम्" इत्यनेन सूत्रेण प्रत्ययलक्षणेन "न लोपः प्रातिपदिकान्तस्य" इत्यनेन पञ्चन् इत्यस्य पदान्तस्य नकारस्य लोपे पञ्चगङ्गा इति शब्दः निष्पद्यते। ततः नपुंसकत्वात् आकारस्य "ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यनेन ह्रस्वत्वे निष्पन्नात् पञ्चगङ्ग इत्यस्मात् प्रातिपदिकात् प्रथमैकवचने सौ, सोरमि प्रक्रियाकार्ये पञ्चगङ्गमिति रूपम्। एवमेव द्वयोः यमुनयोः समाहारः इति विग्रहे द्वियमुनम् इति रूपं निष्पद्यते।

[१.१७] तद्धिताः॥ (४.१.७६)

सूत्रार्थः - पञ्चमाध्यायपरिसमाप्तिपर्यन्तं तद्धिताधिकारः।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदम् अधिकारसूत्रम्। अनेन तद्धिताधिकारः विधीयते। पञ्चमाध्यायपरिसमाप्तिपर्यन्तम् एतस्य सूत्रस्याधिकारः। तेन एतस्मात् सूत्रात् परं पञ्चमाध्यायपरिसमाप्तिं यावद् विद्यमानैः सूत्रैः विहितानां प्रत्ययानां तद्धितसंज्ञा भवति।

[१.१८] समासान्ताः॥ (५.४.६८)

सूत्रार्थः - पञ्चमाध्यायस्य चतुर्थपादस्य परिसमाप्तिपर्यन्तं समासान्ताधिकारः।

सूत्रव्याख्या - इदम् अधिकारसूत्रम्। अनेन समासान्ताधिकारः विधीयते।पञ्चमाध्यायस्य चतुर्थपादस्य परिसमाप्तिपर्यन्तम् एतस्य सूत्रस्याधिकारः। तेन एतस्मात् सूत्रात् परं पञ्चमाध्यायपरिसमाप्तिं यावद् विद्यमानैः सूत्रैः विहितानां कार्याणां समासान्तसंज्ञा भवति।

[१.१९] अव्ययीभावे शरत्प्रभृतिभ्यः॥ (५.४.१०७)

सूत्रार्थः - अव्ययीभावसमासे शरदादिभ्यः प्रातिपदिकेभ्यः परः समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। समासान्तस्य टच्प्रत्ययस्य विधानाय इदं सूत्रं प्रवृत्तम्। अस्मिन् सूत्रे पदद्वयं विद्यते। तत्र अव्ययीभावे इति सप्तम्येकवचनान्तं शरत्प्रभृतिभ्यः इति पञ्चमीबहुवचनान्तं पदम्। "तद्धिताः", "समासान्ताः", "प्रत्ययः", "परश्च", "ङ्याप्प्रातिपदिकात्" इति सूत्रपञ्चकस्य अत्र अधिकारः। शरत् प्रभृतिः येषां ते शरत्प्रभृतयः, तेभ्यः शरत्प्रभृतिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिसमासः। "राजाहःसखिभ्यष्टच्" इत्यस्मात् सूत्रात् टच् इति प्रथमान्तम् अनुवर्तते। एवम् "अव्ययीभावसमासे शरदादिभ्यः प्रातिपदिकेभ्यः परः समासान्तः तद्धितसंज्ञकः टच्प्रत्ययः भवति" इति सूत्रार्थः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति उपशरदम् इति। शरदः समीपमिति लौकिकविग्रहे शरद् ङस् उप इत्यलौकिकविग्रहे "अव्ययं विभक्ती"त्यादिना सूत्रेण अव्ययीभावसमासे उपशरद् इति शब्दः निष्पद्यते। तदा शरदादिगणे शरद्-शब्दः पठितः। अतः उपशरद् इति अव्ययीभावसंज्ञकात् प्रस्तुतसूत्रेण समासान्तः टच्प्रत्ययः भवति। टचः टकारस्य "चुटू" इत्यनेन चकारस्य च "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे उपशरद् अ इति भवति। ततः सर्वसंयोगे निष्पन्नाद् उपशरद इत्यस्मात् प्रातिपदिकात् सौ सोरमि प्रक्रियाकार्ये उपशरदम् इति रूपम्। एवमेव प्रतिविपाशम् उपजरसम् इत्यादीनि रूपाणि सिध्यन्ति।

पाठगतप्रश्नाः-९

७१. "नदीभिश्च" इति सूत्रस्यार्थः कः।

७२. "नदीभिश्च" इति सूत्रस्य किम् उदाहरणम्।

७३. समाहारार्थे एव "नदीभिश्च" इत्येनन सूत्रेण समासः कथम्।

७४. "तद्धिताः" इति सूत्रस्याधिकारः कियत्पर्यन्तम्।

७५. "समासान्ताः" इति सूत्रस्याधिकारः कियत्पर्यन्तम्।

७६. "अव्ययीभावे शरत्प्रभृतिभ्यः" इत्यस्य सूत्रस्य कः अर्थः।

७७. "अव्ययीभावे शरत्प्रभृतिभ्यः" इत्यत्र शरत्प्रभृतिभ्यः इत्यत्र कः समासः।

७८. "अव्ययीभावे शरत्प्रभृतिभ्यः" इत्यस्य सूत्रस्य किम् उदाहरणम्।

[१.२०] अनश्च॥ (५.४.१०८)

सूत्रार्थः - अन्नन्ताद् अव्ययीभावात् समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। समासान्तटच्प्रत्ययस्य विधानाय इदं प्रवृत्तम्। अस्मिन् सूत्रे पदद्वयं विद्यते। तत्र अनः इति पञ्चम्येकवचनान्तं च इत्ययपदं च। अव्ययीभावे शरत्प्रभृतिभ्यः इत्यतः स्वीकृतस्य अव्ययीभावे इत्यस्य विभक्तिविपरिणामेन अव्ययीभावाद् इति भवति। अव्ययीभावाद् इत्यस्य विशेषणत्वाद् अनः तदन्तविधौ अन्नन्ताद् इति भवति। "तद्धिताः", "समासान्ताः", "प्रत्ययः", "परश्च", "ङ्याप्प्रातिपदिकात्" इति सूत्रपञ्चकस्य अत्र अधिकारः। "राजाहःसखिभ्यष्टच्" इत्यस्मात् सूत्रात् टच् इति प्रथमान्तम् अनुवर्तते। एवम् "अन्नन्ताद् अव्ययीभावात् परः समासान्तः तद्धितसंज्ञकः टच्प्रत्ययः भवति" इति सूत्रार्थः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति उपराजम् इति। राज्ञः समीपमिति लौकिकविग्रहे राजन् ङस् उप इत्यलौकिकविग्रहे "अव्ययं विभक्ती"त्यादिना सूत्रेण अव्ययीभावसमासे उपराजन् इति शब्दः निष्पद्यते। तदा उपराजन् इत्यस्मात् अन्नन्ताद् अव्ययीभावात् प्रस्तुतसूत्रेण समासान्तः टच्प्रत्ययः भवति। टचः टकारस्य "चुटू" इत्यनेन चकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे उपराजन् अ इति स्थिते उपराजन् इत्यस्य टेः लोपाय सूत्रं प्रवर्तते -

[१.२१] नस्तद्धिते॥ (६.४.१४४)

सूत्रार्थः - नान्तस्य भसंज्ञकस्य टेः लोपः भवति तद्धिते परे।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। उपराजन् अ इति स्थिते नान्तस्य उपराजन् इत्यस्य टिलोपविधानाय इदं सूत्रं प्रवृत्तम्। अस्मिन् सूत्रे पदद्वयं विद्यते। तत्र नः इति षष्ठ्येकवचनान्तं तद्धिते इति च सप्तमेकवचनान्तं पदम्। "भस्य" इति सूत्रम् अधिकृतम्। "टेः" इति सूत्रात् टेः इति षष्ठ्यन्तं पदमनुवर्तते। "अल्लोपोऽनः" इत्यस्मात् सूत्रात् लोपः इति प्रथमान्तं पदमनुवर्तते। नः इति पदं भस्य विशेषणम्। अतस्तदन्तविधौ नकारान्तस्येति भवति। "नकारान्तस्य भसंज्ञकस्य टेः लोपः भवति तद्धिते परे" इति सूत्रार्थः।

उदाहरणम् - अव्ययीभावसमासे उपराजन् अ इति स्थिते तद्धिते टचि प्रत्यये परे "यचि भम्" इत्यनेन भसंज्ञा भवति। ततः प्रस्तुतसूत्रेण भसंज्ञकस्य उपराजन् इति शब्दस्य टेः अनः लोपे उपराज् अ इति जाते सर्वसंयोगे निष्पन्नाद् उपराजशब्दात् सौ, सोरमि प्रक्रियाकार्ये उपराजम् इति रूपं निष्पन्नम्।

[१.२२] नपुंसकादन्यतरस्याम्॥ (५.४.१०९)

सूत्रार्थः - नपुंसकाद् अन्नन्ताद् अव्ययीभावात् परः समासान्तः तद्धितसंज्ञकः टच्प्रत्ययः विकल्पेन भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। विकल्पेन समासान्तटज्विधानाय प्रवृत्तमिदम्। अस्मिन् सूत्रे पदद्वयं विद्यते। तत्र नपुंसकाद् इति पञ्चम्येकवचनान्तम् अन्यतरस्याम् इति च विकल्पार्थकम् अव्ययपदम्। "अनश्च" इति सूत्रात् अनः इति "अव्ययीभावे शरत्प्रभृतिभ्यः" इत्यतः च अव्ययीभावे इति पदमनुवर्तते। अव्ययीभावे इत्यस्य विभक्तिविपरिणामेन अव्ययीभावाद् इति भवति। अव्ययीभावाद् इत्यस्य विशेषणत्वाद् अनः तदन्तविधौ अन्नन्ताद् इति भवति। "राजाहःसखिभ्यष्टच्" इत्यस्मात् सूत्रात् टच् इति प्रथमान्तम् अनुवर्तते। "तद्धिताः", "समासान्ताः", "प्रत्ययः", "परश्च", "ङ्याप्प्रातिपदिकात्" इति सूत्रपञ्चकस्य अत्र अधिकारः। एवम् "नपुंसकाद् अन्नन्ताद् अव्ययीभावात् परः समासान्तः तद्धितसंज्ञकः टच्प्रत्ययः विकल्पेन भवति" इति सूत्रार्थः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति उपचर्मम् इति। चर्मणः समीपमिति लौकिकविग्रहे चर्मन् ङस् उप इत्यलौकिकविग्रहे "अव्ययं विभक्ती"त्यादिना सूत्रेण अव्ययीभावसमासे उपचर्मन् इति शब्दः निष्पद्यते। उपचर्मन् इति अव्ययीभावसमासस्य अन्नन्तत्वात् नपुंसके विद्यमानत्वाच्च अनेन सूत्रेण विकल्पेन समासान्तः टच्प्रत्ययः भवति। टच्पक्षे उपचर्मन् अ इति स्थिते "नस्तद्धिते" इति सूत्रेण तद्धिते टचि प्रत्यये परे "यचि भम्" इत्यनेन भसंज्ञकस्य उपचर्मन् इति शब्दस्य टेः अनः लोपे सर्वसंयोगे उपचर्मशब्दो निष्पद्यते। ततः उपचर्मशब्दात् सौ सोरमि प्रक्रियाकार्ये उपचर्मम् इति रूपं निष्पन्नम्। टजभावपक्षे उपचर्मन् इति प्रातिपदिकात् सौ सोर्लुकि "न लोपः प्रातिपदिकान्तस्य" इत्यनेन नलोपे उपचर्म इति रूपं निष्पद्यते।

[१.२३] झयः॥ (५.४.१११)

सूत्रार्थः - झयन्ताद् अव्ययीभावात् परः समासान्तः तद्धितः टच् विकल्पेन भवति।।

सूत्रव्याख्या - पाणिनिप्रणीतेषु षड्विधेषु सूत्रेषु इदं विधिसूत्रम्। विकल्पेन समासान्तटच्प्रत्ययविधायकमिदम्। अस्मिन् सूत्रे झयः इति पञ्चम्येकवचनान्तं पदम्। "अव्ययीभावे शरत्प्रभृतिभ्यः" इत्यतः च अव्ययीभावे इति पदमनुवर्तते। अव्ययीभावे इत्यस्य विभक्तिविपरिणामेन अव्ययीभावाद् इति भवति। अव्ययीभावाद् इत्यस्य विशेषणत्वाद् झयः तदन्तविधौ झयन्ताद् इति भवति। "नपुंसकादन्यतरस्याम्" इति सूत्राद् अन्यतरस्याम् इति पदमनुवर्तते। "राजाहःसखिभ्यष्टच्" इत्यस्मात् सूत्रात् टच् इति प्रथमान्तम् अनुवर्तते। "तद्धिताः", "समासान्ताः", "प्रत्ययः", "परश्च" इति सूत्रचतुष्कस्य अत्र अधिकारः। एवं "झयन्ताद् अव्ययीभावात् परः समासान्तः तद्धितः टच्प्रत्ययः विकल्पेन भवति" इति सूत्रार्थः।

उदाहरणम् - अस्य सूत्रस्योदाहरणं भवति उपसमिधम् इति। समिधः समीपमिति लौकिकविग्रहे समिध् ङस् उप इत्यलौकिकविग्रहे "अव्ययं विभक्ती"त्यादिना सूत्रेण अव्ययीभावसमासे उपसमिध् इति

शब्दः निष्पद्यते। उपसमिध् इति अव्ययीभावसमासस्य धकारस्य झय्त्वात् झयन्ताद् प्रस्तुतसूत्रेण विकल्पेन तस्मात् समासान्तः टच्प्रत्ययः भवति। टच्पक्षे उपसमिध् अ इति स्थिते सौ प्रक्रियाकार्ये उपसमिधम् इति रूपम्। टजभावपक्षे उपसमिध् इति प्रातिपदिकात् सौ उपसमित् इति रूपम्।

पाठगतप्रश्नाः-१०

७९. "अनश्च" इत्यस्य सूत्रस्य कः अर्थः।

८०. "अनश्च" इत्यस्य सूत्रस्य किम् उदाहरणम्।

८१. "नस्तद्धिते" इत्यस्य सूत्रस्य कः अर्थः।

८२. "नस्तद्धिते" इत्यस्य सूत्रस्य किम् उदाहरणम्।

८३. "नपुंसकादन्यतरस्याम्" इत्यस्य सूत्रस्य कः अर्थः।

८४. "नपुंसकादन्यतरस्याम्" इत्यस्य सूत्रस्य किम् उदाहरणम्।

८५. झयः इति सूत्रस्य कः अर्थः।

८६. "झयः" इत्यस्य सूत्रस्य किम् उदाहरणम्।

पाठसारः

पदविधिषु अन्यतमः भवति समासः। तस्य समासस्य लक्षणं तावत् "पाणिनीयसङ्केतसम्बन्धेन समासपदवत्त्वम्" इति। समासे च यानि समस्यमानानि पदानि तानि "समर्थः पदविधिः" इति सूत्रबलात् समर्थानि भवन्ति। सामर्थ्यं च हि समासे एकार्थीभावरूपम् इति सिद्धान्तः।

तस्य समासस्य भेदविषये बहूनां विप्रतिपत्तिरस्ति। सामान्यतया पञ्च भेदाः- केवलसमासः, अव्ययीभावः, तत्पुरुषः द्वन्द्वो बहुव्रीहिश्चेति। तेषु अस्मिन् पाठे केवलसमासस्य अव्ययीभावसमासस्य च विवरणं कृतम्।

अव्ययीभावः तत्पुरुषः बहुव्रीहिः द्वन्द्वः इत्यादिविशेषसंज्ञाविनिर्मुक्तः समासो भवति केवलसमासः। अव्ययीभावश्च प्रायेण पूर्वपदार्थप्रधानो भवति। अत्र "समर्थः पदविधिः" इति सूत्रवर्णनावसरे वृत्तिविग्रहादिपारिभाषिकानां शब्दानां विवेचनं कृतम्। ततः समासाधिकारः कियत्पर्यन्तम् इति बोधकं "प्राक्कडारात्समासः" इति सूत्रं प्रस्तुतम्। तत्सूत्रसामर्थ्यात् "कडाराः कर्मधारये" इत्यतः प्राक् पर्यन्तं समासाधिकारः। परं "सह सुपा" इति सूत्रस्य "इवेन सह समासो विभक्त्यलोपश्च" इति वार्तिकस्य केवलसमासविधायकस्य प्रतिपादनं जातम्। तत्र प्रसङ्गतः उपसर्जनसंज्ञाविधायकं "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रं पूर्वनिपातविधायकं च "उपसर्जनं पूर्वम्" इति सूत्रं प्रस्तुतम्।

ततः समासस्य प्रातिपदिकसंज्ञकस्य अवयवभूतस्य सुपो लोपविधायकं "सुपो धातुप्रातिपदिकयोः" इति सूत्रं व्याख्यातम्।

अव्ययीभावसमासस्य अधिकारं बोधयति "अव्ययीभावः" इति सूत्रम्। ततः "अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावाऽत्ययाऽसम्प्रति-शब्दप्रादुर्भाव- पश्चाद्-यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्याऽन्तवचनेषु" इति सूत्रस्य अव्ययीभावसमाससंज्ञकस्य व्याख्यानावसरे बहूनि अव्ययीभावकार्यविधायकानि सूत्राणि व्याख्यातानि। तत्र "अव्ययीभावश्च" इत्यव्ययीभावस्य नपुंसकत्वविधायकम्। गोपि इति विग्रहे अधिगोप इति स्थिते अदन्ताद् अव्ययीभावात्परस्य सोरमादेशविधायकं "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" "तृतीयासप्तम्योर्बहुलम्" इति सूत्रद्वयं व्याख्यातम्।

ततः हरेः सादृश्यम् इति लौकिकविग्रहे सहहरि इति स्थिते सहस्य सादेशविधायकम् "अव्ययीभावे चाकाले" इति सूत्रं प्रस्तुतम्। ततः अव्ययीभावसमासविधायकानि "यावदवधारणे", "सुप्प्रतिना मात्रार्थे", "संख्या वंश्येन", "नदीभिश्च" इत्येतानि चत्वारि सूत्राणि अस्मिन् पाठे प्रस्तुतानि। ततः "तद्धिताः" "समासान्ताः" इत्यधिकारद्वयस्य वर्णनं विहितम्। "अव्ययीभावे शरत्प्रभृतिभ्यः", "अनश्च" इति अव्ययीभावसमासान्तस्य टच्प्रत्ययस्य विधायकं सूत्रद्वयं व्याख्यातम्। ततः उपराजम् इत्यादौ टिलोपाय "नस्तद्धिते" इति सूत्रं व्याख्यातम्। तस्मात्परं टचो विकल्पेन विधायकं "नपुंसकादन्यतरस्याम्" "झयः" इति सूत्रद्वयं प्रस्तुतम्। एवम् अस्मिन् पाठे केवलसमासस्य अव्ययीभावसमासस्य विधायकानि तत्सम्बन्धिकार्यविधायकानि च सूत्राणि प्रतिपादितानि।

पाठान्तप्रश्नाः

१. "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रं व्याख्यात।

२. "अव्ययं विभक्ति" इत्यादिसूत्रं व्याख्यात।

३. उपकृष्णम् इति रूपं साधयत।

४. अधिहरि इति रूपं साधयत।

५. यथाशक्ति इति रूपं साधयत।

६. "संख्या वंश्येन" इति सूत्रं व्याख्यात।

७. "अव्ययीभावे चाकाले" इति सूत्रं व्याख्यात।

८. "अव्ययीभावे शरत्प्रभृतिभ्यः" इति सूत्रं व्याख्यात।

९. उपशरदम् इति रूपं साधयत।

१०. उपसमिधम् इति रूपं साधयत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. परिभाषासूत्रम्।

२. समर्थाश्रितः।

३. पदसम्बन्धी विधिः।

४. पदसम्बन्धी यो विधिः सः समर्थाश्रितो भवति।

५. परार्थाभिधानं वृत्तिः।

६. पञ्च।

७. वृत्त्यर्थावबोधकं वाक्यं विग्रहः।

८. विग्रहस्य द्वौ भेदौ।

९. अधिकारसूत्रम्।

१०. "कडाराः कर्मधारये" (२.२.३८) इति सूत्रस्य ग्रहणम्।

उत्तराणि-२

११. द्वयोः सुबन्तयोः समासः भवति।

१२. सुबन्तं सुबन्तेन सह समस्यते इति।

१३. भूतपूर्वः।

१४. उपसर्जनसंज्ञा ।

१५. समासविधायकसूत्रस्य ग्रहणम्।

१६. "समासविधायकसूत्रे यत् प्रथमान्तं तद्बोध्यम् उपसर्जनसंज्ञं भवति" इति।

१७. प्रथमानिर्दिष्टं नाम प्रथमान्तपदबोध्यम्।

१८. प्रथमानिर्दिष्टं समासे इति संज्ञिदलम्, उपसर्जनम् इति च संज्ञापदम्।

१९. उपसर्जनसंज्ञकस्य पूर्वनिपातः भवति।

२०. समासे उपसर्जनसंज्ञकं पूर्वं प्रयोज्यम् इति सूत्रस्यार्थः।

२१. कृष्णश्रितः इति।

उत्तराणि-३

२२. लुक् भवति।

२३. धातोः प्रातिपदिकस्य च अवयवस्य सुपः लुक् भवति।

२४. धातुप्रातिपदिकयोः इति षष्ठीविभक्तिः अस्ति। इतरेतरयोगद्वन्द्वः अस्ति।

२५. भूतपूर्वे चरडिति निर्देशात्।

२६. भूतपूर्वः।

२७. इवेति शब्देन सह सुबन्तं समाससंज्ञं भवति। समासावयवविभक्तेः लोपो न भवति।

२८. वागर्थाविव।

उत्तराणि-४

२९. अधिकारसूत्रम्।

३०. तत्पुरुषः इत्यस्मात् सूत्रात् प्राक् अव्ययीभावः इत्यधिकारः।

३१. विभक्त्यर्थादिषु वर्तमानम् अव्ययं सुबन्तेन सह नित्यं समस्यते।

३२. विभक्तिपदम् अधिकरणकारकं बोधयति।

३३. "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति न्यायाद् वचनशब्दस्य विभक्तिप्रभृतिभिः प्रत्येकं सम्बन्धः भवति।

३४. ऋद्धेराधिक्यं समृद्धिः, सम्पत्तिः नाम अनुरूप आत्मभावः।

३५. पदार्थस्यानुल्लङ्घनम्।

३६. सादृश्यस्य गौणत्वे अपि समासविधानाय सूत्रे पुनः सादृश्यग्रहणम्।

उत्तराणि-५

३७. नपुंसकत्वं विधीयते।

३८. अव्ययीभावसमाससंज्ञकः शब्दः नपुंसकं भवति।

३९. विधिसूत्रम्।

४०. अमादेशः।

४१. अदन्ताद् अव्ययीभावात् सुपः न लुक्, तस्य पञ्चमीं विना अमादेशश्च भवति।

उत्तराणि-६

४२. विधिसूत्रम्।

४३. अमादेशः।

४४. अदन्ताद् अव्ययीभावात् तृतीयासप्तम्योः बहुलम् अमादेशः भवति।

४५. उपकृष्णम्।

४६. सुमद्रम्।

४७. दुर्यवनम्।

४८. निर्मक्षिकम्।

४९. अतिहिमम्।

५०. अतिनिद्रम्।

५१. इतिहरि।

५२. अनुविष्णु।

५३. अनुरूपम्।

५४. प्रत्यर्थम्।

५५. यथाशक्ति।

उत्तराणि-७

५६. सहशब्दस्य सादेशो विधीयते।

५७. सहशब्दस्य सादेशः भवति अव्ययीभावे, कालविशेषवाचके उत्तरपदे परे न भवति।

५८. सहरि।

५९. अनुज्येष्ठम्।

६०. सचक्रम्।

६१. ससखि।

६२. सक्षत्रम्।

६३. साग्नि।

उत्तराणि-८

६४. अवधारणे अर्थे यावदित्यव्ययं सुबन्तेन समर्थेन सह समाससंज्ञं भवति, स च समासः अव्ययीभावसंज्ञः भवति।

६५. यावच्छ्लोकम्।

६६. मात्रार्थे विद्यमानेन प्रतिना सह समर्थं सुबन्तम् अव्ययीभावसमाससंज्ञं भवति।

६७. शाकप्रति।

६८. वंश्यवाचकेन सुबन्तेन सह संख्यावाचकं सुबन्तं विकल्पेन समाससंज्ञं भवति, स च अव्ययीभावसंज्ञकः भवति।

६९. त्रिमुनि।

७०. द्विविधः।

उत्तराणि-९

७१. नदीविशेषवाचकेन सुबन्तेन सह संख्यावाचकं सुबन्तं विकल्पेन अव्ययीभावसमाससंज्ञं भवति।

७२. पञ्चगङ्गम्।

७३. "समाहारे चायमिष्यते" इति सूत्रस्थवार्तिकबलेन।

७४. पञ्चमाध्यायसमाप्तिपर्यन्तम्।

७५. पञ्चमाध्यायस्य चतुर्थपादस्य परिसमाप्तिपर्यन्तम् एतस्य सूत्रस्याधिकारः।

७६. अव्ययीभावसमासे शरदादिभ्यः प्रातिपदिकेभ्यः परः समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

७७. तद्गुणसंविज्ञानबहुव्रीहिः।

७८. उपशरदम्।

उत्तराणि-१०

७९. अन्नन्ताद् अव्ययीभावात् समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

८०. उपराजम्।

८१. नान्तस्य भसंज्ञकस्य टेः लोपः भवति तद्धिते परे।

८२. उपराजन्।

८३. नपुंसकाद् अन्नन्ताद् अव्ययीभावात् परः समासान्तः तद्धितसंज्ञकः टच्प्रत्ययः विकल्पेन भवति।

८४. उपचर्मम्।

८५. झयन्ताद् अव्ययीभावात् परः समासान्तः तद्धितः टच् विकल्पेन भवति।

८६. उपसमिधम्।

।। इति प्रथमः पाठः ।।

346sk02

२

तत्पुरुषसमासः - द्वितीयादितत्पुरुषसमासः

प्रस्तावना

अव्ययीभावसमासात्परं तत्पुरुषः उपस्थाप्यते। "तत्पुरुषः" इत्यधिकृत्य अयं समासः प्रवर्तते। प्रायेण उत्तरपदार्थप्रधानः अयं समासः। उत्तरपदस्यार्थः उत्तरपदार्थः। उत्तरपदार्थः प्रधानः यस्मिन् स उत्तरपदार्थप्रधानः। यथा राज्ञः पुरुषः इति विग्रहे राजपुरुषः इति। अत्र समस्यमानयोः पदयोः उत्तरपदस्य पुरुषपदस्यार्थ एव प्रधानः। यथा राजपुरुषमानय इत्युच्यते चेत् पुरुषरूपार्थस्य आनयनम् इष्टं न तु राजन्पदार्थस्य राज्ञः। एवं सामान्यतया उत्तरपदार्थप्राधान्यं तत्पुरुषसमासे दृश्यते।

अयं च तत्पुरुषसमासः समानाधिकरणः व्यधिकरणः चेति द्विधा विभक्त इति वक्तुं शक्यते। समानम् अधिकरणं ययोस्ते समानाधिकरणे। समानविभक्तिके पदे इति। समानाधिकरणे अस्य स्तः इति समानाधिकरणः इति अर्शआदित्वादच्प्रत्ययः। एवमेव व्यधिकरणे नाम असमानविभक्तिके पदे। व्यधिकरणे अस्य स्तः इति व्यधिकरणः इति अर्शआदित्वादच्प्रत्ययः। अर्थाद् यस्मिन् तत्पुरुषे समस्यमानानि पदानि समानविभक्तिकानि न सन्ति। अस्मिन् पाठे आदौ तत्पुरुषाधिकारस्य वर्णनमस्ति। ततः विशेषप्रयोजनसाधनाय द्विगुसमासस्य तत्पुरुषसंज्ञा वर्णिता। ततः व्यधिकरणतत्पुरुषसमासविधायकानां द्वितीया श्रितातीतेत्यादीनां सूत्राणामालोचनम् अत्र भवति।

उद्देश्यानि

इमं पाठं पठित्वा भवान्/भवती -

- तत्पुरुषाधिकारपरिधिं जानीयात्।
- द्विगोः तत्पुरुषसंज्ञा भवति इति जानीयात्।
- व्यधिकरणतत्पुरुषविधायकानि सूत्राणि जानीयात्।
- षष्ठीसमासनिषेधकानि सूत्राणि जानीयात्।

[२.१] तत्पुरुषः॥ (२.१.२२)

सूत्रार्थः - "शेषो बहुव्रीहिः" इत्यस्मात् सूत्रात् पूर्वपर्यन्तं तत्पुरुषाधिकारः।

सूत्रव्याख्या - इदम् अधिकारसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासाधिकारः विधीयते। सूत्रेऽस्मिन् तत्पुरुषः इति पदं प्रथमैकवचनान्तम्। "प्राक्कडारात्समासः" इत्यधिक्रियते अत्र। तत्पुरुषसमासस्याधिकारः अनेन सूत्रेण विधीयते। अयमधिकारः "शेषो बहुव्रीहिः" (२.२.२३) इत्यस्मात् सूत्रात्प्राक्पर्यन्तम्। एवं "तत्पुरुषः" इत्यस्मात् सूत्रात् "शेषो बहुव्रीहिः" (२.२.२३) इत्यतः प्राग् सूत्रैः यः समासः विधीयते स तत्पुरुषसंज्ञको भवति।

[२.२] द्विगुश्च॥ (२.१.२३)

सूत्रार्थः - द्विगुरपि तत्पुरुषसंज्ञकः भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण द्विगुसमासस्य तत्पुरुषसंज्ञा विधीयते। सूत्रेऽस्मिन् द्विगुः इति पदं प्रथमैकवचनान्तं, चेत्यव्ययपदम्। "तत्पुरुषः" इति पूर्वसूत्राद् अधिकृतम्। तत्पुरुषः इति संज्ञापदं द्विगुरिति संज्ञिपदम्। एवं सूत्रार्थः भवति - "द्विगुरपि तत्पुरुषसंज्ञः भवति" इति।

इतः अग्रे "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन सूत्रेण तत्पुरुषाधिकारे समासत्रयस्य विधानम् अभवत्। त्रिषु च समासेषु यस्मिन् समासे पूर्वपदं संख्यावाचकं भवति तस्य समासस्य "संख्यापूर्वो द्विगुः" इत्यनेन सूत्रेण द्विगुसंज्ञा विधीयते। "आकडारादेका संज्ञा" इति एकसंज्ञाधिकाराद् अन्यथा तत्पुरुषस्य बाधको भवति द्विगुः। परन्तु द्विगोः तत्पुरुषसंज्ञा अभीष्टा, अतः विशेषेण सूत्रेण तत्पुरुषसंज्ञाया विधानं कृतम्। तेन पञ्चानां राजानां समाहारः इति विग्रहे पञ्चराजन् इत्यत्र तत्पुरुषसमासान्तस्य "राजाहःसखिभ्यष्टच्" इति टचः प्रवृत्तिर्भवति। ततः प्रक्रियाकार्ये पञ्चराजम् इति निष्पद्यते।

[२.३] द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः॥ (२.१.२४)

सूत्रार्थः - द्वितीयान्तं सुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण द्वितीयातत्पुरुषसमासो भवति। सूत्रेऽस्मिन् द्वितीया इति प्रथमैकवचनान्तं श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति तृतीयाबहुवचनान्तं पदम्। श्रितश्च अतीतश्च पतितश्च गतश्च अत्यस्तश्च प्राप्तश्च आपन्नश्च श्रितातीतपतितगतात्यस्तप्राप्तापन्नाः, तैः इति इतरेतरयोगद्वन्द्वसमासः। "सह सुपा" इत्यस्मात् सूत्रात् सुपा इत्यस्यानुवृत्तिः भवति। तस्य च श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यस्य विशेषणत्वाद् वचनविपरिणामेन तदन्तविधौ सुबन्तैः इति लभ्यते। अत्र शङ्का समुदेति यत् श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यस्य सुबन्तैः इत्यस्य च कथं सामानाधिकरण्यमिति। यतो हि श्रितादीनां सुबन्तत्वं नास्ति। येषां च सुबन्तत्वं तेषां श्रितादित्वं नास्ति। अतःश्रितादीनां शब्दानां तत्प्रकृतिके लक्षणा। अर्थात् श्रितादयः प्रकृतयः येषां ते श्रितादिप्रकृतिकाः अत्र श्रितादिपदेन गृह्यन्ते। श्रितादिभिः सुबन्तैः इत्यस्य श्रितादिप्रकृतिकैः सुबन्तैः इत्यर्थः।

"प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" "विभाषा" इति सूत्रचतुष्टयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे " इत्यस्मात् सुप् इति पदमनुवर्तते। ततः तदन्तविधौ सुबन्तम् इति। सुबन्तम् इत्यस्य विशेषणत्वाद् द्वितीया इत्यस्य तदन्तविधौ द्वितीयान्तं सुबन्तम् इति भवति। एवं सूत्रार्थः समायाति - "द्वितीयान्तं सुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

अत्र द्वितीयान्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः द्वितीयातत्पुरुषः इत्यभिधीयते।

उदाहरणम् - एतस्य सूत्रस्योदाहरणं भवति कृष्णश्रितः इति। कृष्णं श्रितः इति लौकिकविग्रहे कृष्ण अम् श्रित सु इत्यलौकिकविग्रहे प्रस्तुतसूत्रेण द्वितीयान्तं कृष्ण अम् इति सुबन्तं श्रित सु इति श्रितप्रकृतिकेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे द्वितीया इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य कृष्ण अम् इत्यस्य "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेनोपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्यनेन पूर्वनिपाते कृष्ण अम् श्रित सु इति भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सूत्रेण प्रातिपदिकावयवस्य सुपः अमः सोश्च लुकि कृष्णश्रित इति भवति। "एकदेशविकृतमनन्यवत्" इति न्यायेन कृष्णश्रितशब्दस्य प्रातिपदिकत्वस्याक्षयात् ततः प्रथमैकवचनविवक्षायां सौ कृष्णश्रित सु इति भवति। सोः उकारस्य "उपदेशेजनुनासिक इत्" इत्यनेन सूत्रेण इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे कृष्णश्रित स् इति भवति। ततः "सुप्तिङन्तं पदम्" इत्यनेन समुदायस्य पदसंज्ञायां "ससजुषो रुः" इत्यनेन सस्य रुत्वे, "खरवसानयोर्विसर्जनीयः" इत्यनेन सूत्रेण पदान्तस्य रेफस्य विसर्गादेशे कृष्णश्रितः इति रूपं सिध्यति।

एवमेव दुःखम् अतीतः दुःखातीतः, नरकं पतितः नरकपतितः, ग्रामं गतः ग्रामगतः, ग्राममत्यस्तः ग्रामात्यस्तः, ग्रामं प्राप्तः ग्रामप्राप्तः, संशयम् आपन्नः संशयापन्नः इत्यादिकम् एतस्य सूत्रस्योदाहरणम्।

पाठगतप्रश्नाः-१

१. "तत्पुरुषः" इत्यधिकारः कियत्पर्यन्तम्।

२. द्विगुश्च" इति सूत्रस्यार्थः कः।

३. द्विगुसमासस्य तत्पुरुषसंज्ञाविधाने किं प्रयोजनम्।

४. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रेण किं विधीयते।

५. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रस्यार्थः कः।

६. श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इत्यत्र कः समासः, कश्च विग्रहः।

७. श्रितादिशब्दानां कस्मिन् लक्षणा।

८. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

[२.४] तृतीया तत्कृतार्थेन गुणवचनेन॥ (२.१.३०)

सूत्रार्थः - तृतीयान्तं सुबन्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रावतरणम् - इदं विधिसूत्रम्। अनेन सूत्रेण तृतीयातत्पुरुषसमासो भवति।

सूत्रव्याख्या - सूत्रेऽस्मिन् तृतीया तत्कृत अर्थेन गुणवचनेन इति पदच्छेदः। तृतीया इति प्रथमैकवचनान्तं पदम्। तत्कृत इति लुप्ततृतीयान्तं पदम्। अर्थेन गुणवचनेनेति पदद्वयं तृतीयैकवचनान्तम्। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे " इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तमिति भवति। सुबन्तस्य विशेषणत्वात् तृतीया इत्यस्य तदन्तविधौ तृतीयान्तमिति लभ्यते।

"छन्दोवत्सूत्राणि भवन्ति" इति भाष्यवचनात् "सुपां सुलुक्" इत्यादिना सूत्रेण तृतीयैकवचनस्य लुकि तत्कृत इति रूपम्। तत्कृतेनेत्यर्थः। तेन कृतं तत्कृतम्, तेनेति तृतीयातत्पुरुषः। तत्कृतपदस्य तृतीयान्तार्थाकृत इत्यर्थः। गुणमुक्तवान् इति विग्रहे "कृत्यल्युटो बहुलम्" इत्यत्र बहुलग्रहणात् कर्त्रर्थे भूतकाले ल्युटि गुणवचनशब्दो निष्पद्यते। ये शब्दाः पूर्वं गुणवाचकाः आसन् इदानीं द्रव्यवाचकास्ते एव गुणवचनशब्देन गृह्यन्ते। यथा श्वेतशब्दस्य गुणवाचकस्य गुणगुणिनोरभेदोपचारात् श्वेतगुणविशिष्टपदार्थः इत्यर्थः स्वीक्रियते। अथवा तस्मान्मतुपि "गुणवचनेभ्यो मतुपो लुगिष्टः" इति वार्तिकेन मतुपः लुकि श्वेतशब्दस्य श्वेतगुणविशिष्टपदार्थवाचकत्वम् अस्ति। एवं च श्वेतशब्दः गुणवचनः। तत्कृत इत्यस्य गुणवचनेन इत्यत्रान्वयः। एवमत्रार्थः तृतीयान्तार्थकृतेन गुणवचनेन इति। अर्थेनेत्यस्य अर्थप्रकृतिकेन सुबन्तेनेत्यर्थः। अस्य सूत्रस्यार्थः- "तृतीयान्तं सुबन्तं तृतीयान्तार्थकृत-गुणवचनेन अर्थशब्देन च सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

अत्र तृतीयान्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः तृतीयातत्पुरुषः इत्यभिधीयते।

उदाहरणम् - तृतीयान्तस्य तृतीयान्तार्थगुणवचनेन सह समासे एतस्य सूत्रस्योदाहरणं भवति शङ्कुलाखण्डः इति। अत्र खण्डशब्दः खण्डनगुणबोधको भूत्वा ततः खण्डनगुणविशिष्टस्यांशस्य बोधकः। शङ्कुलया खण्डः इति लौकिकविग्रहे शङ्कुला टा खण्ड सु इत्यलौकिकविग्रहे प्रस्तुतसूत्रेण तृतीयान्तं शङ्कुला टा इति सुबन्तं खण्ड सु इति तृतीयान्तार्थगुणवचनेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे तृतीया इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य शङ्कुला टा इत्यस्योपसर्जनत्वात् पूर्वनिपाते शङ्कुला टा खण्ड सु इति भवति। ततः समासस्य प्रातिपदिकत्वात् प्रातिपदिकावयवस्य सुपः टाप्रत्ययस्य सोश्च लुकि शङ्कुलाखण्ड इति शब्दो निष्पद्यते। तस्य प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सौ शङ्कुलाखण्डः इति रूपम्।

अर्थप्रकृतिकेन सुबन्तेन सह तृतीयान्तस्य समासे उदाहरणं भवति धान्येनार्थो धान्यार्थः इति।

[२.५] कर्तृकरणे कृता बहुलम्॥ (२.१.३२)

सूत्रार्थः - कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तं कृदन्तेन सह बहुलं तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तृतीयातत्पुरुषसमासो भवति। पदत्रयात्मके सूत्रेऽस्मिन् कर्तृकरणे इति सप्तम्येकवचनान्तम्, कृता इति तृतीयैकवचनान्तम् बहुलम् इति प्रथमैकवचनान्तं पदम्। तृतीया तत्कृतार्थेन गुणवचनेन इत्यस्मात् सूत्रात् तृतीया इति प्रथमान्तम् अनुवर्तते। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। कर्ता च करणं च कर्तृकरणम्, तस्मिन् कर्तृकरणे इति समाहारद्वन्द्वः। तृतीयेत्यस्य सुबन्तम् इत्यस्य विशेषणत्वात् तदन्तविधौ तृतीयान्तं सुबन्तमिति लभ्यते। कर्तृकरणे इत्यस्य तृतीयान्तं सुबन्तमित्यनेनान्वयः। तेन कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तमित्यर्थः। सुपा इत्यत्र तदन्तविधौ सुबन्तेनेति। सुबन्तेनेत्यस्य विशेषणत्वात् कृता इत्यस्य तदन्तविधौ कृदन्तेन सुबन्तेनेति लभ्यते। कृदन्तस्य सुबन्तत्वाभावात् कृदन्तशब्देन कृदन्तप्रकृतिकस्य ग्रहणम्। एवं कृदन्तप्रकृतिकेन सुबन्तेनेति तात्पर्यम्। "कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तं कृदन्तेन सह बहुलं तत्पुरुषसमाससंज्ञं भवति" इति सूत्रार्थः।

सूत्रे बहुलग्रहणं कृतम्। बहुलशब्दस्य अर्थः-

"क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति।।" इति।

अतः कर्तरि करणे च या तृतीया तदन्तमपि क्वचिन्न समस्यते। क्वचित्तु विभक्त्यन्तरमपि समस्यते।

"कृद्ग्रहणे गतिकारकपूर्वपदस्यापि ग्रहणम्" इति परिभाषायाः अस्मिन् सूत्रे उपयोगः अस्ति। "कृदन्तस्य ग्रहणे गतिपूर्वस्य कारकपूर्वस्यापि कृदन्तस्य ग्रहणं भवति" इति परिभाषार्थः। सूत्रे कृता इत्यनेन कृदन्तग्रहणादत्र प्रसङ्गतः गतिपूर्वस्यापि कृदन्तस्यापि ग्रहणं भवति।

उदाहरणम् - कर्तरि तृतीयान्तस्य कृदन्तेन समासस्योदाहरणं हरित्रातः। त्रातशब्दः कृदन्तः, हरिश्चात्र तृतीयान्तः कर्ता। हरिणा त्रातः इति लौकिकविग्रहे हरि टा त्रात सु इत्यलौकिकविग्रहे प्रकृतसूत्रेण कर्तरि विद्यमानं हरि टा इति सुबन्तं त्रात सु इति सुबन्तेन सह तत्पुरुषसंज्ञं भवति। ततः प्रक्रियाकार्ये निष्पन्नात् हरित्रातशब्दात् प्रथमैकवचने सौ हरित्रातः इति रूपम्। करणे समासस्योदाहरणं भवति नखैर्भिन्नः नखभिन्नः इति। भेदनक्रियायां नखाः करणानि, भिन्नशब्दश्च कृदन्तः।

बहुलग्रहणात् समासाभावस्योदाहरणं यथा दात्रेण लूनवान् इत्यादि। विभक्त्यन्तरमपि समस्यते इत्यस्योदाहरणं यथा पादहारकः इत्यादि। ह्रियते इति हारकः, बाहुलकात् कर्मणि ण्वुल्। पादाभ्यामिति अपादानपञ्चम्यन्तस्य समासः।

गतिपूर्वकस्य ग्रहणे नखनिर्भिन्नः इत्युदाहरणम्। अत्र निर्भिन्नः इत्यत्र निर् इति गतिसंज्ञकः। एवं निर्भिन्नः इति गतिपूर्वकेन कृदन्तेन सह नखैः इति करणे तृतीयान्तं वार्तिकसाहाय्येन प्रस्तुतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। तेन नखनिर्भिन्नः इति रूपम्।

पाठगतप्रश्नाः-२

९. "तृतीया तत्कृतार्थेन गुणवचनेन" इति सूत्रस्यार्थः कः।

१०. तत्कृत इत्यस्यार्थः कः।

११. गुणवचनपदेन कस्य ग्रहणम्।

१२. "तृतीया तत्कृतार्थेन गुणवचनेन" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

१३. "कर्तृकरणे कृता बहुलम्" इति सूत्रस्यार्थः कः।

१४. बहुलग्रहणस्य किं फलम्।

१५. "कृद्ग्रहणे गतिकारकपूर्वपदस्यापि ग्रहणम्" इति परिभाषाया अर्थः कः।।

१६. "कर्तृकरणे कृता बहुलम्" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

[२.६] चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥ (२.१.३६)

सूत्रार्थः - चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थबलिहितसुखरक्षितैः सह चतुर्थ्यन्तं सुबन्तं विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण चतुर्थीतत्पुरुषसमासो भवति। सूत्रमिदं पदद्वयात्मकम्। तत्र चतुर्थी इति प्रथमैकवचनान्तं तथा तदर्थार्थबलिहितसुखरक्षितैः इति तृतीयाबहुवचनान्तं पदम्। समासः, सुप्, सह सुपा, विभाषा, तत्पुरुषश्चेत्येतानि पदानि पूर्वतोऽधिकृतानि। तदर्थञ्च अर्थश्च बलिश्च हितञ्च सुखञ्च रक्षितञ्च तदर्थार्थबलिहितसुखरक्षितानि तैः तदर्थार्थबलिहितसुखरक्षितैः इति इतरेतरद्वन्दः। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया चतुर्थीत्यत्र तदन्तविधौ चतुर्थ्यन्तं सुबन्तम् इति भवति।

सूत्रे तदंशेन चतुर्थ्यन्तं परामृश्यते। तेन तदर्थ इत्युक्ते चतुर्थ्यन्तार्थ इति गम्यते। किञ्च, चतुर्थ्यन्तस्य शब्दस्वरूपतया तेन कस्यचिद्वस्तुनः परामर्शाभावात् लक्षणया चतुर्थ्यन्तेन तद्वाच्यं तदेव गृह्यते। तस्मात् "चतुर्थ्यन्तवाच्यं यत् तद्वाचिना अर्थादिसुबन्तैश्च चतुर्थ्यन्तं सुबन्तं विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इत्यर्थो लभ्यते।

अत्र चतुर्थ्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः चतुर्थीतत्पुरुषः इत्यभिधीयते।

एतस्य सूत्रस्य व्याख्यानावसरे "अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति वार्त्तिकं प्रवर्तते। "अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासः समासे च विशेष्यलिङ्गता च भवति" इति वार्तिकस्यास्यार्थः। अनेन वार्तिकेन अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासो विधीयते, अन्यथा विभाषाधिकारात् अर्थेन समासे विकल्पापत्तिः स्यात्। तत्रेदमप्यवधेयं यदर्थेन समस्यमानस्य शब्दस्वरूपस्य विशेषणात्मकत्वात् प्रधानीभूतस्य विशेष्यस्य स्वलिङ्गतेष्टा। अन्यथा अर्थशब्दस्य नित्यपुंस्त्वात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन सर्वत्रैव पुंस्त्वमेव स्यात्।

उदाहरणम् - तदर्थस्योदाहरणं यथा यूपदारु इति। यूपाय दारु इति लौकिकविग्रहे यूप ङे दारु सु इत्यलौकिकविग्रहे प्रस्तुतसूत्रेण चतुर्थ्यन्तं यूप ङे इति सुबन्तं दारु सु इति तदर्थेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे चतुर्थी इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य यूप ङे इत्यस्योपसर्जनत्वात् पूर्वनिपाते यूप ङे दारु सु इति भवति। ततः समासस्य प्रातिपदिकत्वात् प्रातिपदिकावयवस्य सुपः ङेप्रत्ययस्य सोश्च लुकि यूपदारु इति शब्दो निष्पद्यते। तस्य प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सौ यूपदारु इति रूपम्।

ननु रन्धनाय स्थाली इत्यत्रापि तदर्थसत्त्वात् तेन चतुर्थ्यन्तस्य सुबन्तस्य समासोऽस्तु इति शङ्का। अत्र समाधानमुच्यते यत् सूत्रे तदर्थशब्देन यत्र प्रकृतिविकृतिभावस्तत्रैव समासस्यास्य प्रसक्तिर्नान्यत्र।

अर्थशब्देन सह समासे तावद् द्विजायायं द्विजार्थः सूपः, द्विजार्था यवागूः, द्विजार्थं पयश्चेति तदुदाहरणानि। एवमेव भूतबलिः गोहितं गोसुखं गोरक्षितमित्यादीन्यपि सूत्रस्यास्योदाहरणानि भवन्ति।

[२.७] पञ्चमी भयेन॥ (२.१.३७)

सूत्रार्थः - पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमास-संज्ञं भवति।

सूत्रव्याख्या - इदं सूत्रं विधायकम्। अनेन सूत्रेण पञ्चमीतत्पुरुषसमासो विधीयते।

सूत्रमिदं पदद्वयात्मकम्। तत्र पञ्चमी इति प्रथमैकवचनान्तं तथा भयेन इति तृतीयैकवचनान्तं पदम्। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया तदन्तविधौ पञ्चमी इत्यनेन पञ्चम्यन्तं सुबन्तं ग्राह्यम्। भयशब्दस्य सुबन्तत्वाभावाद् भयप्रकृतिके लक्षणा। एवं "पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति सूत्रार्थः।

अत्र पञ्चम्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः पञ्चमीतत्पुरुषः इत्यभिधीयते।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा चोरभयम् इति। चोराद् भयम् इति लौकिकविग्रहे चोर ङसि भय सु इत्यलौकिकविग्रहे प्रकृतसूत्रेण भयप्रकृतिकेन सुबन्तेन भय सु इत्यनेन सह चोर ङसि इति पञ्चम्यन्तं सुबन्तं तत्पुरुषसमाससंज्ञं भवति। ततः पञ्चम्यन्तस्य पूर्वनिपाते चोर ङसि भय सु इति स्थिते, प्रातिपदिकत्वात् सुब्लुकि निष्पन्नात् चोरभयशब्दात् सौ प्रक्रियाकार्ये चोरभयम् इति रूपं निष्पन्नम्।

पाठगतप्रश्नाः-३

१७. "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति सूत्रस्यार्थः कः।

१८. तदर्थशब्देन कस्य ग्रहणम्।

१९. "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

२०. "अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति वार्तिकस्यार्थः कः।

२१. "पञ्चमी भयेन" इति सूत्रस्यार्थः कः।

२२. "पञ्चमी भयेन" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

[२.८] स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन॥ (२.१.३९)

सूत्रार्थः - स्तोकान्तिकदूरार्थवाचकानि कृच्छ्रशब्दप्रकृतिकं च पञ्चम्यन्तं सुबन्तं क्तान्तप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पञ्चमीतत्पुरुषसमासो विधीयते। सूत्रमिदं पदद्वयात्मकम्। तत्र स्तोकान्तिकदूरार्थकृच्छ्राणि इति प्रथमाबहुवचनान्तं तथा क्तेन इति तृतीयैकवचनान्तं पदम्। "प्राक्कडारात्समासः", "तत्पुरुषः", "विभाषा" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति भवति। "पञ्चमी भयेन" इत्यस्मात् सूत्रादनुवृत्तस्य पञ्चमीत्यस्य "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया तदन्तविधौ पञ्चम्यन्तं सुबन्तम् इत्यर्थः भवति। स्तोकान्तिकदूराणि अर्था येषां ते स्तोकान्तिकदूरार्थाः इति बहुव्रीहिः। स्तोकान्तिकदूरार्थाः च कृच्छ्रञ्च स्तोकान्तिकदूरार्थकृच्छ्राणि इति इतरेतरयोगद्वन्द्वः। क्तेन इत्यस्य तदन्तविधौ तत्प्रकृतिके लक्षणया क्तान्तप्रकृतिकेन इत्यर्थः। एवं सूत्रार्थः समायाति "स्तोकान्तिकदूरार्थवाचकानि कृच्छ्रशब्दप्रकृतिकं च पञ्चम्यन्तं सुबन्तं क्तान्तप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा स्तोकान्मुक्तः इति। एवमेव अल्पान्मुक्तः अन्तिकादागतः दूरादागतः कृच्छ्रादागतः इत्यादीन्यस्य सूत्रस्योदाहरणानि। स्तोकान्मुक्तः इत्यत्र स्तोकान्मुक्तः इति लौकिकविग्रहे स्तोक ङसि मुक्त सु इत्यलौकिकविग्रहे स्तोक ङसि इति पञ्चम्यन्तं सुबन्तं मुक्त सु इति क्तान्तप्रकृतिकेन सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः पञ्चम्यन्तस्य

प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य स्तोक ङसि इत्यस्य "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन उपसर्जनत्वात् पूर्वनिपातो भवति। ततः स्तोक ङसि मुक्त सु इति समासस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः ङसेः सोश्च लुकि प्राप्ते पञ्चम्याः अलुग्विधायकं सूत्रं प्रवृत्तम् -

[२.९] पञ्चम्याः स्तोकादिभ्यः॥ (६.३.२)

सूत्रार्थः - स्तोकान्तिकदूरार्थवाचकेभ्यः कृच्छ्रशब्दाच्च विहितायाः पञ्चम्याः उत्तरपदे परे लुक् न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण अलुक् विधीयते। अलुक् नाम लुक् न भवति इति। सूत्रमिदं पदद्वयात्मकम्। तत्र पञ्चम्याः इति षष्ठ्येकवचनान्तं स्तोकादिभ्यः इति पञ्चमीबहुवचनान्तं पदम्। "अलुगुत्तरपदे" इत्यस्मात् सूत्राद् अलुग् उत्तरपदे इति पदद्वयमनुवर्तते। स्तोकादिशब्देन पूर्वसूत्रोक्तानां स्तोकान्तिकदूरार्थकृच्छ्राणां ग्रहणम्। एवं सूत्रार्थः समायाति "स्तोकान्तिकदूरार्थवाचकेभ्यः कृच्छ्रशब्दाच्च विहिता या पञ्चमी तस्याः उत्तरपदे परे लुक् न भवति" इति।

उदाहरणम् - स्तोकान्मुक्तः इत्यत्रोदाहरणम्। स्तोक ङसि मुक्त सु इति समासस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः ङसेः सोश्च लुक् प्राप्नोति। तदा प्रस्तुतसूत्रेण पञ्चम्याः ङसेः अलुग् विधीयते। सोश्च "सुपो धातुप्रातिपदिकयोः" इत्यनेन लुकि सर्वसंयोगे स्तोकान्मुक्त इति शब्दो निष्पद्यते। ततः सौ प्रक्रियाकार्ये स्तोकान्मुक्तः इति रूपम्।

[२.१०] षष्ठी॥ (२.२.८)

सूत्रार्थः - षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह विकल्पेन समस्यते स च तत्पुरुषसमाससंज्ञः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासो विधीयते। सूत्रमिदम् एकपदात्मकम्। तत्र षष्ठी इति प्रथमैकवचनान्तं पदम्। "समर्थः पदविधिः", "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि पूर्वतोऽधिकृतानि। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया षष्ठी इत्यनेन षष्ठ्यन्तं सुबन्तमिति लभ्यते। एवं "षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति सूत्रार्थः समायाति।

अत्र षष्ठ्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः षष्ठीतत्पुरुषः इत्यभिधीयते।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा राजपुरुषः इति। राज्ञः पुरुष इति लौकिकविग्रहे राजन् ङस् पुरुष सु इत्यलौकिकविग्रहे राजन् ङस् इति षष्ठ्यन्तं सुबन्तं पुरुष सु इति समर्थेन सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः षष्ठ्यन्तस्य राजन् ङस् इत्यस्य उपसर्जनत्वात् पूर्वनिपाते राजन् ङस् पुरुष सु इति भवति। समुदायस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः ङसः सोश्च लुकि राजन् पुरुष इति भवति। तदा "न लोपः प्रातिपदिकान्तस्य" इत्यनेन सूत्रेण

राजन्-शब्दस्य नकारस्य लोपे प्रक्रियाकार्ये निष्पन्नात् राजपुरुषशब्दात् सौ प्रक्रियाकार्ये राजपुरुषः इति रूपम्।

पाठगतप्रश्नाः-४

२३. "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति सूत्रस्यार्थः कः।

२४. "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

२५. स्तोकान्मुक्तः इत्यादौ पञ्चमीविभक्तेः अलुक् कथम्।

२६. "पञ्चम्याः स्तोकादिभ्यः" इति सूत्रस्यार्थः कः।

२७. "षष्ठी" इति सूत्रस्यार्थः कः।

२८. "षष्ठी" इति सूत्रस्य सविग्रहम् एकमुदाहरणं देयम्।

प्रसङ्गतः षष्ठीतत्पुरुषनिषेधकानि सूत्राणि वर्ण्यन्ते -

[२.११] न निर्धारणे॥ (२.२.१०)

सूत्रार्थः - निर्धारणे षष्ठ्यन्तं सुबन्तं न समस्यते।

सूत्रव्याख्या - पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अस्मिन् सूत्रे निर्धारणे इति सप्तम्यन्तं पदं, नेति निषेधबोधकम् अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इति सूत्रात् षष्ठी इति पदमनुवर्तते। निर्धारणे विधीयमाना या षष्ठी तादृशषष्ठ्यन्तस्य सुबन्तस्य सुबन्तेन सह "षष्ठी" इत्यनेन षष्ठीतत्पुरुषसमासः प्राप्नोति। स समासः अनेन निषिध्यते। अतः सूत्रस्यास्य अर्थो भवति - "निर्धारणे या षष्ठी तदन्तं सुबन्तं न समस्यते" इति।

निर्धारणं नाम जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणम् इति। यथा नृणां द्विजः श्रेष्ठः इत्यत्र "यतश्च निर्धारणम्" इत्यनेन नृणामित्यत्र निर्धारणे षष्ठी विहिता। अत्र नृसमुदायात् श्रेष्ठत्वधर्मेण द्विजस्य पृथक्करणं जातम्। यस्मात् पृथक्करणं तत्र षष्ठी।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा नृणां द्विजः श्रेष्ठः इति। "यतश्च निर्धारणम्" इत्यनेन नृणामित्यत्र निर्धारणे षष्ठी विहिता। ततः षष्ठी इत्यनेन सूत्रेण नृणामिति षष्ठ्यन्तस्य सुबन्तस्य द्विजः इति सुबन्तेन समासे प्राप्ते प्रकृतसूत्रेण निर्धारणषष्ठ्यन्तत्वात् नृणाम् इति पदस्य तेन सह समासनिषेधो भवति।

(२.११.१) प्रतिपदविधाना षष्ठी न समस्यते (वार्तिकम्)

वार्तिकार्थः - प्रतिपदविधाना या षष्ठी तदन्तं सुबन्तं न समस्यते।

वार्तिकव्याख्या - इदं वार्तिकं षष्ठीसमासनिषेधप्रसङ्गे विराजते। अनेन वार्तिकेन षष्ठीतत्पुरुषसमासनिषेधो विधीयते। वार्तिकमिदं पदचतुष्टयात्मकम्। अत्र प्रतिपदविधाना षष्ठी इति पदद्वयं प्रथमैकवचनान्तम्। नेति निषेधबोधकमव्ययम्। समस्यते इति क्रियापदम्। पदं पदं प्रति इति प्रतिपदम् इति वीप्सायामव्ययीभावः। "षष्ठी शेषे" इति शेषलक्षणां षष्ठीं वर्जयित्वा सर्वापि षष्ठी प्रतिपदविधाना इति महाभाष्याद्याकरग्रन्थाद् ज्ञायते। एवं प्रतिपदविधानषष्ठ्यन्तस्य षष्ठी इत्यनेन समासे प्राप्ते प्रोक्तवार्तिकेन तन्निषिध्यते।

उदाहरणम् - वार्तिकस्यास्योदाहरणं सर्पिषो ज्ञानम् इति। सर्पिषः इत्यत्र "ज्ञोऽविदर्थस्य करणे" इत्यनेन षष्ठी विहिता। सा च षष्ठी प्रतिपदविधाना षष्ठी भवति। अतः सर्पिषः इति षष्ठ्यन्तस्य सुबन्तस्य ज्ञानम् इत्यनेन सुबन्तेन सह "षष्ठी" इत्यनेन सूत्रेण समासे प्राप्ते सर्पिषः इत्यस्य प्रतिपदविधानषष्ठ्यन्तत्वात् प्रोक्तवार्तिकेन समासनिषेधो भवति।

पाठगतप्रश्नाः-५

२९. "न निर्धारणे" इति सूत्रस्यार्थः कः।

३०. नृणां द्विजः श्रेष्ठः इत्यत्र कथं न षष्ठीसमासः।

३१. निर्धारणं नाम किम्।

३२. "प्रतिपदविधाना षष्ठी न समस्यते" इति वार्तिकस्यार्थः कः।

३३. प्रतिपदविधाना षष्ठी का।

३४. सर्पिषो ज्ञानम् इत्यत्र कथं न समासः।

[२.१२] पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन॥ (२.२.११)

सूत्रार्थः - पूरणाद्यर्थैः सदादिभिश्च षष्ठ्यन्तं सुबन्तं समाससंज्ञं न भवति। (समासो न भवति।)

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुष-समासनिषेधो विधीयते। सूत्रमिदं एकपदात्मकम्। अत्र पूरणगुणसुहितार्थसदव्ययतव्य-समानाधिकरणेन इति तृतीयैकवचनान्तं पदम्। पूरणश्च, गुणश्च, सुहितं च पूरणगुणसुहितानि इति इतरेतरयोगद्वन्द्वसमासः। तानि अर्था येषां ते पूरणगुणसुहितार्थाः इति बहुव्रीहिसमासः। पूरणगुणसुहितार्थाश्च सच्च अव्ययं च तव्यश्च समानाधिकरणञ्च इति पूरणगुणसुहितार्थसदव्ययसमानाधिकरणम्, पूरणगुणसुहितार्थसदव्ययसमानाधिकरणेन इति समाहारद्वन्द्वः।

पूरणार्थशब्देन पुरणार्थकप्रत्ययान्तानां शब्दानां ग्रहणम्। गुणार्थशब्देन प्रधानत्वेन उपसर्जनत्वेन च गुणवाची यः शब्दः तस्य ग्रहणम्। सुहितार्थो नाम तृप्त्यर्थकः। सत् इति पदेन तौ सत् इति सूत्रेण सत्संज्ञकौ यौ शतृशानच्प्रत्ययौ तदन्तानां बोधः। अव्ययपदेनात्र सत्तव्येति पूर्वोत्तरयोः साहचर्यात् कृदन्तानां क्त्वातोसुन्कसुन्नन्तानां ग्रहणम्, तेषां क्त्वातोसुन्कसुनः इत्यनेनाव्ययसंज्ञाविधानात्। तेन तस्य उपरि तदुपरि इत्यादौ समासः दुर्वारः। तव्यस्य प्रत्ययत्वात् तदन्तानां बोधो भवति। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्मात् नेति पदमनुवर्तते। सूत्रस्यास्यार्थो भवति - "षष्ठ्यन्तं सुबन्तं पूरणाद्यर्थैः सदादिभिश्च न समस्यते" इति। अर्थात् "पूरणाद्यर्थैः सदादिभिश्च षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणानि क्रमशः प्रस्तूयन्ते।

पूरणार्थेन निषेधे सतां षष्ठः इत्याद्युदाहरणम्। षण्णां पूरणः इत्यर्थे "तस्य पूरणे डट्" इत्यनेन डटि "षट्कतिकतिपयचतुरां थुक्" इत्यनेन थुकि च षष्ठः इति रूपम्। अत्र सताम् इति षष्ठ्यन्तस्य पूरणार्थकषष्ठशब्देन "षष्ठी" इत्यनेन षष्ठीसमासे प्राप्ते तन्निषेधः प्रकृतसूत्रेण विधीयते।

गुणेन निषेधे काकस्य काष्ण्यम् इत्याद्युदाहरणम्। कृष्णशब्दात् भावे ष्यञि काष्ण्यशब्दो निष्पन्नः। अतः काष्ण्यम् इत्यस्य गुणवाचकत्वात् तेन सह काकस्य इति षष्ठ्यन्तस्य "षष्ठी" इत्यनेन षष्ठीसमासे प्रकृतसूत्रेण स निषिध्यते। गुणेन यो निषेधो विहितः सोऽनित्यः "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रे संज्ञायाः गुणभूतप्रमाणत्वशब्देन सह समासदर्शनात्। निषेधस्य अनित्यत्वात् अर्थस्य गौरवम् अर्थगौरवम्, बुद्धेः मान्द्यं बुद्धिमान्द्यम् इत्यादिषु नायं निषेधः।

सुहितार्थेन निषेधे फलानां सुहितः इत्यादिकमुदाहरणम्। अत्र षष्ठ्यन्तस्य फलशब्दस्य सुहितशब्देन सह प्राप्तस्य षष्ठीसमासस्य प्रकृतसूत्रेण निषेधो विधीयते।

सदन्तेन निषेधे द्विजस्य कुर्वन् कुर्वाणो वा इत्याद्युदाहरणम्। कृधातोः शतरि शानचि च यथाक्रमं कुर्वन् कुर्वाणः चेति रूपद्वयम्। अत्र षष्ठ्यन्तस्य द्विजशब्दस्य कुर्वन् इत्यनेन कुर्वाणः इत्यनेन वा योगे प्राप्तः षष्ठीसमासः अनेन निषिध्यते।

अव्ययेन निषेधे ब्राह्मणस्य कृत्वा इत्यादिकमत्रोदाहरणम् । कृत्वा इत्यस्य अव्ययसंज्ञकत्वात् ब्राह्मणस्येति षष्ठ्यन्तेन प्राप्तः षष्ठीसमासः अनेन निषिध्यते।

तव्यप्रत्ययान्तेन निषेधे ब्राह्मणस्य कर्तव्यम् इत्याद्यत्रोदाहरणम्। कृधातोः तव्यत्तव्यानीयरः इत्यनेन तव्यप्रत्यये कर्तव्यम् इति रूपम्। षष्ठ्यन्तस्य ब्राह्मणस्येति सुबन्तस्य तव्यप्रत्ययान्तेन कर्तव्यम् इत्यनेन प्राप्तः षष्ठीसमासः अनेन निषिध्यते। तव्यत्प्रत्ययान्तेन योगे तु समासो भवत्येव। स्वस्य कर्तव्यम् इति विग्रहे स्वकर्तव्यम् इति षष्ठीसमासः। तव्यति कृते कृदुत्तरपदप्रकृतिस्वरेण प्रकृतिस्वरः, तव्ये तु नेति फलभेदः।

समानाधिकरणेन निषेधे तक्षकस्य सर्पस्य इत्याद्युदाहरणम्। अत्र तक्षकस्येति षष्ठ्यन्तस्य सुबन्तस्य षष्ठ्यन्तेन सर्पस्येति सुबन्तेन प्राप्तः षष्ठीसमासः समानाधिकरणत्वात् प्रकृतसूत्रेण निषिध्यते। अत्र "विशेषणं विशेष्येण बहुलम्" इत्यनेन प्राप्तः कर्मधारयसमासः बहुलग्रहणसामर्थ्यात् न भवति।

पाठगतप्रश्नाः-६

३५. "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन" इति सूत्रस्यार्थः कः।

३६. गुणशब्देन षष्ठीसमासनिषेधः अनित्यः कथम्।

३७. पूरणार्थेन षष्ठीसमासनिषेधे किमुदाहरणम्।

३८. सदन्तेन षष्ठीसमासनिषेधे किमुदाहरणम्।

३९. अव्ययेन षष्ठीसमासनिषेधे किमुदाहरणम्।

४०. स्वकर्तव्यम् इत्यत्र कथं समासः।

[२.१३] क्तेन च पूजायाम्॥ (२.२.१२)

सूत्रार्थः - "मतिबुद्धिपूजार्थेभ्यश्च" इत्यनेन विहितः यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदत्रयात्मकम्। अस्मिन् सूत्रे क्तेन इति तृतीयैकवचनान्तं पदम्। चेत्यव्ययपदम्। पूजायामिति सप्तम्येकवचनान्तं पदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्मात् नेति पदमनुवर्तते। अत्र पूजायां क्तेन न षष्ठीसमासः इत्यन्वयः। पूजाग्रहणं मतिबुद्धिपूजार्थेभ्यश्च इति सूत्रोपलक्षणम्। एवं सूत्रार्थो भवति - "मतिबुद्धिपूजार्थेभ्यश्च इत्यनेन विहितः यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा राज्ञां मतः इति। मतः इत्यत्र "मतिबुद्धिपूजार्थेभ्यश्च" इत्यनेन वर्तमाने क्तः विहितः। अतः वर्तमानार्थकस्य क्तस्य योगे "क्तस्य च वर्तमाने" इत्यनेन राजन्शब्दात् षष्ठीविभक्तौ राज्ञाम् इति रूपम्। अत्र षष्ठ्यन्तस्य राज्ञाम् इत्यस्य सुबन्तस्य मतः इति सुबन्तेन सह प्राप्तः षष्ठीसमासः प्रकृतसूत्रेण निषिध्यते। राज्ञाम् इष्यमाणः इत्यर्थः। एवमेव राज्ञां बुद्धः राज्ञां पूजितः इत्यादौ न समासः।

ननु राजमतः, राजबुद्धः, राजपूजितः इत्यादिषु कथं समासः इति चेदुच्यते अत्र राजभिः पूजितः इति विग्रहे भूते क्तान्तेन सह तृतीयान्तस्य समासः। तृतीयासमासत्वात् नेदं सूत्रं समासं बाधते।

[२.१४] अधिकरणवाचिना च॥ (२.२.१३)

सूत्रार्थः - अधिरकरणवाची यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र अधिकरणवाचिना इति तृतीयैकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्मात् नेति "क्तेन च पूजायाम्" इत्यस्माच्च क्तेन इति पदं चानुवर्तते। एवं सूत्रार्थो भवति - "अधिकरणवाची यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं तावत् इदमेषामासितम् इत्यादिकम्। आसितम् इत्यत्र "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" इति अधिकरणे क्तः। अत्र "अधिकरणवाचिनश्च" इत्यनेन अधिकरणवाचिक्तान्तेन योगे एषाम् इत्यत्र षष्ठीविभक्तिः। अत्र एषाम् इत्यस्य षष्ठ्यन्तस्य आसितम् इति क्तप्रत्ययान्तेन योगे प्राप्तः षष्ठीसमासः प्रस्तुतसूत्रेण निषिध्यते।

[२.१५] कर्मणि च॥ (२.२.१४)

सूत्रार्थः - "उभयप्राप्तौ कर्मणि" इत्यनेन विहिता या षष्ठी तदन्तस्य सुबन्तस्य सुबन्तेन समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र कर्मणि इति सप्तम्येकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्माच्च नेति पदमनुवर्तते। चेति इतिपर्यायः। अतः कर्मणि इति सप्तम्येकवचनमुच्चार्य या षष्ठी तदन्तस्य सुबन्तेन सह समासो न इति सूत्रार्थः प्रतीयते। एवं सूत्रार्थो भवति - "उभयप्राप्तौ कर्मणि" इत्यनेन विहिता या षष्ठी तदन्तस्य सुबन्तस्य सुबन्तेन समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं तावत् आश्चर्यो गवां दोहोऽगोपेन इत्यादिकम्। गवाम् इत्यत्र कर्तरि कर्मणि च षष्ठ्यां प्राप्तायाम् "उभयप्राप्तौ कर्मणि" इत्यनेन कर्मणि एव षष्ठी। अतः गवाम् इति षष्ठ्यन्तस्य दोहः इति सुबन्तेन सह प्राप्तः षष्ठीसमासः प्रस्तूतसूत्रेण निषिध्यते।

पाठगतप्रश्नाः-७

४१. "क्तेन च पूजायाम्" इति सूत्रस्यार्थः कः।

४२. सूत्रे पूजाग्रहणं किमर्थम्।

४३. क्तेन च पूजायाम्" इति सूत्रस्य उदाहरणम् एकं देयम्।

४४. "अधिकरणवाचिना च" इति सूत्रस्यार्थः कः।

४५. "अधिकरणवाचिना च" इति सूत्रस्य उदाहरणम् एकं देयम्।

४६. "कर्मणि च" इति सूत्रस्यार्थः कः।

४७. "कर्मणि च" इति सूत्रस्य उदाहरणम् एकं देयम्।

[२.१६] तृजकाभ्यां कर्तरि॥ (२.२.१५)

सूत्रार्थः - कर्त्रर्थकौ यौ तृजकौ प्रत्ययौ तदन्तेन सुबन्तेन सह षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र तृजकाभ्यामिति तृतीयाद्विवचनान्तं कर्तरि इति सप्तम्येकवचनान्तं पदम्। अत्र कर्तरि इति तृजकयोरेव विशेषणं, न तु अनुवृत्तषष्ठ्याः। तृच्प्रत्ययान्ताः ण्वुल्प्रत्ययान्ताश्च तृजकेत्यंशेन स्वीक्रियन्ते। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्माच्च नेति पदमनुवर्तते। एवं सूत्रार्थो भवति - "कर्त्रर्थकौ यौ तृजकौ प्रत्ययौ तदन्तेन सुबन्तेन सह षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति" इति।

उदाहरणम् - सूत्रस्यास्य तृजन्तेन निषेधे तावत् अपां स्रष्टा इत्यादिकम् उदाहरणम्। सृज्धातोः "ण्वुल्तृचौ" इत्यनेन तृचि स्रष्टा इति रूपम्। स्रष्टा इत्यनेन योगे षष्ठ्यन्तस्य अपाम् इत्यस्य प्राप्तः षष्ठीसमासः प्रस्तुतसूत्रेण निषिध्यते।

एवं ण्वुल्प्रत्ययान्तस्य निषेधे ओदनस्य पाचकः इत्यादिकमुदाहरणम्। अत्र पच्धातोः "ण्वुल्तृचौ" इत्यनेन कर्तरि ण्वुलि अकादेशे पाचकः इति रूपम्। पाचकः इत्यनेन योगे ओदनस्य इति षष्ठ्यन्तस्य प्राप्तः षष्ठीसमासः प्रस्तुतसूत्रेण निषिध्यते।

[२.१७] कर्तरि च॥ (२.२.१६)

सूत्रार्थः - कर्तरि या षष्ठी तदन्तस्य ण्वुल्प्रत्ययान्तेन सह समासो न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासनिषेधो विधीयते।सूत्रमिदं पदद्वयात्मकम्। अत्र कर्तरि इति सप्तम्येकवचनान्तं पदम्। चेति अव्ययपदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अधिक्रियन्ते। "षष्ठी" इत्यस्मात् षष्ठी इति पदं "न निर्धारणे" इत्यस्माच्च नेति पदमनुवर्तते। "तृजकाभ्यां कर्तरि" इत्यतः अकेनेत्यंशः अनुवर्तते। तस्य ण्वुल्प्रत्ययान्तेन इत्यर्थः। अत्र कर्तरि इति पदं षष्ठी इति अनुवृत्तपदेन सह अन्वेति। एवं सूत्रार्थो भवति - "कर्तरि या षष्ठी तदन्तस्य सुबन्तस्य ण्वुल्प्रत्ययान्तेन सह समासो न भवति" इति।

उदाहरणम् - भवतः शायिका इत्यादिकम् अस्य सूत्रस्योदाहरणम्। शीधातोः ण्वुल्, अकादेशे टापि प्रक्रियाकार्ये शायिका इति रूपम्। तेन योगे "कर्तृकर्मणोः कृति" इति सूत्रेण भवतः इत्यत्र कर्तरि षष्ठी। अत्र अकस्य कर्त्रर्थकत्वाभावात् "तृजकाभ्यां कर्तरि" इति सूत्रं न प्रवर्तते। ततः भवतः इत्यनेन

षष्ठ्यन्तेन शायिका इत्यस्य ण्वुल्प्रत्ययान्तस्य षष्ठीतत्पुरुषसमासे प्राप्ते प्रस्तुतसूत्रेण भवतः इत्यत्र षष्ठ्याः कर्तरि विधानात् षष्ठीसमासनिषेधो भवति।

[२.१८] पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे॥ (२.२.१)

सूत्रार्थः - यदा अवयवी एकत्वविशिष्टः तदा अवयविना सह पूर्वादीनां सुबन्तानां विकल्पेन तत्पुरुषसमासो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। "षष्ठी" इत्यनेन प्राप्तस्य समासस्यापवादभूतम् इदं सूत्रम्। सूत्रमिदं पदत्रयात्मकम्। अत्र पूर्वापराधरोत्तरम् इति प्रथमैकवचनान्तम्, एकदेशिना इति तृतीयैकवचनान्तम् एकाधिकरणे इति च सप्तम्येकवचनान्तं पदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि अधिक्रियन्ते। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इत्यनुवर्तते। पूर्वापराधरोत्तरमित्यस्य विशेषणत्वात् सुप् इत्यस्य तदन्तविधौ पूर्वापराधरोत्तरं सुबन्तम् इति भवति। पूर्वञ्च परञ्च अधरञ्च उत्तरञ्च इति विग्रहे समाहारद्वन्द्वे पुर्वापराधरोत्तरम् इति। एकदेशः अवयवः यस्यास्ति सः एकदेशी इति एकदेशशब्दाद् इनिप्रत्ययः। एकदेशी नाम अवयवी। एकदेशिना नाम अवयविना इति। एकं च तदधिकरणं च एकाधिकरणम्, तस्मिन् एकाधिकरणे इति कर्मधारयसमासः। एकं नाम एकत्वसंख्याविशिष्टम् इति। अधिकरणशब्दश्चात्र द्रव्यपरकः। एकाधिकरणे इत्यस्य सम्बन्धः एकदेशिना इति पदेन सह वर्तते। एवं च सूत्रार्थः - "यदा अवयवी एकत्वविशिष्टः तदा अवयविना सह पूर्वादीनां सुबन्तानां विकल्पेन तत्पुरुषसमासो भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा पूर्वकायः इति। पूर्वं कायस्येति लौकिकविग्रहे पूर्व सु काय ङस् इत्यलौकिकविग्रहे "षष्ठी" इत्यनेन षष्ठीतत्पुरुषसमासे प्राप्ते तं प्रबाध्य प्रकृतसूत्रेण काय ङस् इति एकत्वसंख्याविशिष्टेन अवयविवाचकेन सुबन्तेन पूर्व सु इति सुबन्तं प्रोक्तसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः सूत्रे प्रथमानिर्दिष्टत्वात् पूर्व सु इति सुबन्तस्य उपसर्जनसंज्ञायां पूर्वनिपाते पूर्व सु काय ङस् इति भवति। ततः सुब्लुकि निष्पन्नात् पूर्वकायशब्दात् सौ प्रक्रियाकार्ये पूर्वकायः इति रूपम्। अपरकायः अधरकायः इत्यादीन्येतस्य सूत्रस्योदाहरणानि।

पाठगतप्रश्नाः-८

४८. "तृजकाभ्यां कर्तरि" इति सूत्रस्यार्थः कः।

४९. "तृजकाभ्यां कर्तरि" इति सूत्रस्य तृचा निषेधे किम् उदाहरणम्।

५०. "तृजकाभ्यां कर्तरि" इति सूत्रस्य अका निषेधे किम् उदाहरणम्।

५१. "कर्तरि च" इति सूत्रस्यार्थः कः।

५२. "कर्तरि च" इति सूत्रस्य उदाहरणम् एकं देयम्।

५३. "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति सूत्रस्यार्थः कः।

५४. "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति सूत्रस्य उदाहरणम् एकं देयम्।

[२.१९] अर्धं नपुंसकम्॥ (२.२.२)

सूत्रार्थः - समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः अर्धशब्दः अवयविना सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति, एकत्वसंख्याविशिष्टः चेद् अवयवी।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। "षष्ठी" इत्यनेन प्राप्तस्य समासस्यापवादभूतम् इदं सूत्रम्। सूत्रमिदं पदद्वयात्मकम्। अत्र अर्धम् नपुंसकम् इति पदद्वयं प्रथमैकवचनान्तम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि अधिक्रियन्ते। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इति "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इत्यस्माच्च एकदेशिना एकाधिकरणे इति पदद्वयमनुवर्तते। समांशवाचिनः नित्यनपुंसकलिङ्गे विद्यमानस्यैव अर्धशब्दस्यात्र ग्रहणम्। एवं च सूत्रार्थः भवति - "समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः अर्धशब्दः एकत्वसंख्या-विशिष्टेन द्रव्यवाचकेन अवयविना सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा अर्धपिप्पली इति। अर्धं पिप्पल्याः इति लौकिकविग्रहे अर्ध सु पिप्पली ङस् इत्यलौकिकविग्रहे "षष्ठी" इत्यनेन षष्ठीतत्पुरुषसमासे प्राप्ते तं प्रबाध्य प्रकृतसूत्रेण पिप्पली ङस् इति एकत्वसंख्याविशिष्टेन अवयविवाचकेन सुबन्तेन सह अर्ध सु इति समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः तत्पुरुषसमाससंज्ञो भवति। ततः अर्ध सु इत्यस्य प्रथमानिर्दिष्टत्वाद् उपसर्जनसंज्ञायां पूर्वनिपाते सुब्लुकि निष्पन्नात् अर्धपिप्पली इत्यस्मात् सौ प्रक्रियाकार्ये अर्धपिप्पली इति रूपम्।

[२.२०] सप्तमी शौण्डैः॥ (२.१.४०)

सूत्रार्थः - सप्तम्यन्तं सुबन्तं शौण्डादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण सप्तमी-तत्पुरुषसमासो विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र सप्तमी इति प्रथमैकवचनान्तं शौण्डैः इति च तृतीयाबहुवचनान्तं पदम्। अत्र "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इत्येतानि अधिक्रियन्ते। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इत्यनुवर्तते। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति परिभाषया सप्तमीत्यत्र तदन्तविधौ सप्तम्यन्तं सुबन्तम् इति लभ्यते। शौण्डशब्दे बहुवचननिर्देशाद् गणपाठाच्च शौण्डशब्दः शौण्डादिगणे विद्यमानानां शौण्डादीनां बोधकः। शौण्डादीनां तत्प्रकृतिके लक्षणा। एवं च सूत्रार्थः- "सप्तम्यन्तं सुबन्तं शौण्डादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति" इति।

अत्र सप्तम्यन्तं समर्थेन सुबन्तेन समस्यते। स च तत्पुरुषसमासः। अतः अयं समासः सप्तमीतत्पुरुषः इत्यभिधीयते।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा अक्षशौण्डः इति। अक्षेषु शौण्डः इति लौकिकविग्रहे अक्ष सुप् शौण्ड सु इत्यलौकिकविग्रहे अक्ष सुप् इति सप्तम्यन्तं सुबन्तं शौण्ड सु इत्यनेन शौण्डप्रकृतिकेन सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकशास्त्रे सप्तमी इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य अक्ष सुप् इत्यस्य उपसर्जनसंज्ञायां पूर्वनिपाते अक्ष सुप् शौण्ड सु इति भवति। ततः समासस्य प्रातिपदिकसंज्ञायां सुपः सोश्च लुकि सर्वसंयोगे अक्षशौण्ड इति निष्पद्यते। तस्मात्प्रथमैकवचने सौ प्रक्रियाकार्ये अक्षशौण्डः इति रूपम्।

पाठगतप्रश्नाः-९

५५. "अर्धं नपुंसकम्" इति सूत्रस्यार्थः कः।

५६. "अर्धं नपुंसकम्" इति सूत्रस्य उदाहरणम् एकं देयम्।

५७. "सप्तमी शौण्डैः" इति सूत्रस्यार्थः कः।

५८. "सप्तमी शौण्डैः" इति सूत्रस्य उदाहरणम् एकं देयम्।

पाठसारः

समासभेदेषु तृतीयः तत्पुरुषसमासः अस्मिन् पाठे प्रतिपादितः। "तत्पुरुषः" इत्यधिकृत्य अयं समासः प्रवर्तते। प्रायेण उत्तरपदार्थप्रधानः अयं समासः। अयं च तत्पुरुषसमासः समानाधिकरणः व्यधिकरणः चेति द्विधा विभक्त इति वक्तुं शक्यते। तत्र व्यधिकरणतत्पुरुषविधायकानां सूत्राणाम् अस्मिन् पाठे सन्निवेशः। व्यधिकरणे पदे इत्यस्य अर्थो हि असमानविभक्तिके पदे इति। व्यधिकरणे अस्य स्तः इति व्यधिकरणः इति अर्शआदित्वादच्प्रत्ययः। एवं यस्मिन् तत्पुरुषे समस्यमानानि पदानि समानविभक्तिकानि न सन्ति स व्यधिकरणः तत्पुरुषः। विशेषप्रयोजनसाधनाय द्विगुसमासस्य "द्विगुश्च" इत्यनेनन तत्पुरुषसंज्ञा अत्र वर्णिता। व्यधिकरणतत्पुरुषः पुनः द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषश्चेति षड्विधः। "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति द्वितीयातत्पुरुषस्य, "तृतीया तत्कृतार्थेन गुणवचनेन" इति "कर्तृकरणे कृता बहुलम्" इति च तृतीयातत्पुरुषस्य, "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति चतुर्थीतत्पुरुषस्य, "पञ्चमी भयेन" इति "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति च पञ्चमीतत्पुरुषस्य, "षष्ठी" इति षष्ठीतत्पुरुषस्य "सप्तमी शौण्डैः" इति सप्तमीतत्पुरुषस्य च विधायकानि सूत्राणि व्याख्यातानि। पञ्चमीसमासावसरे "पञ्चम्याः स्तोकादिभ्यः" इति पञ्चम्या अलुग्विधायकं सूत्रं व्याख्यातम्।

"पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे", "अर्धं नपुंसकम्" इति षष्ठीसमासापवादभूतं समासविधायकं सूत्रद्वयं व्याख्यातम्। तत्र च "अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति वार्त्तिकं व्याख्यातम्। षष्ठीसमासनिषेधकानि "न निर्धारणे", "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन", "क्तेन च पूजायाम्", "अधिकरणवाचिना च", "कर्मणि च", "तृजकाभ्यां कर्तरि", "कर्तरि च" इत्येतानि सप्त सूत्राणि "प्रतिपदविधाना षष्ठी न समस्यते" इति वार्तिकं च व्याख्यातम्। एवं व्यधिकरणतत्पुरुषसमासः अस्मिन् पाठे प्रतिपादितः।

पाठान्तप्रश्नाः

१. "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रं व्याख्यात।

२. "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति सूत्रं व्याख्यात।

३. "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन" इति सूत्रं व्याख्यात।

४. "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति सूत्रं व्याख्यात।

५. "सप्तमी शौण्डैः" इति सूत्रं व्याख्यात।

६. कृष्णश्रितः इति रूपं साधयत।

७. यूपदारु इति रूपं साधयत।

८. अर्धपिप्पली इति रूपं साधयत।

९. अक्षशौण्डः इति रूपं साधयत।

१०. षष्ठीसमासनिषेधकानि सूत्राणि कानि, अर्थोदाहरणैः सह तानि व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. "शेषो बहुव्रीहिः" (२.२.२३) इत्यस्मात् सूत्रात्प्राक्पर्यन्तम्।

२. द्विगुरपि तत्पुरुषसंज्ञकः भवति।

३. समासान्तप्रत्ययविधानम्।

४. द्वितीयातत्पुरुषसमासः।

५. द्वितीयान्तं सुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

६. इतरेतरयोगद्वन्द्वसमासः। श्रितश्च अतीतश्च पतितश्च गतश्च अत्यस्तश्च प्राप्तश्च आपन्नश्च श्रितातीतपतितगतात्यस्तप्राप्तापन्नाः, तैः श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति विग्रहः।

७. श्रितादीनां शब्दानां तत्प्रकृतिके लक्षणा।

८. कृष्णं श्रितः इति विग्रहे कृष्णश्रितः इति उदाहरणम्।

उत्तराणि-२

९. तृतीयान्तं सुबन्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

१०. तृतीयान्तार्थाकृत इत्यर्थः।

११. ये शब्दाः पूर्वं गुणवाचकाः आसन् इदानीं द्रव्यवाचकास्ते एव गुणवचनशब्देन गृह्यन्ते।

१२. शङ्कुलया खण्डः इति विग्रहे शङ्कुलाखण्डः।

१३. कर्तरि करणे च विद्यमानं तृतीयान्तं सुबन्तं कृदन्तेन सह बहुलं तत्पुरुषसमाससंज्ञं भवति।

१४. दात्रेण लूनवान् इत्यादौ समासः न।

१५. कृदन्तस्य ग्रहणे गतिपूर्वस्य कारकपूर्वस्यापि कृदन्तस्य ग्रहणं भवति इति परिभाषार्थः।

१६. हरिणा त्रातः हरित्रातः इति।

उत्तराणि-३

१७. चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थबलिहितसुखरक्षितैः सह चतुर्थ्यन्तं सुबन्तं विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

१८. प्रकृतिविकृतिभावस्य ग्रहणम्।

१९. यूपाय दारु इति विग्रहे यूपदारु इति उदाहरणम्।

२०. अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासः समासे च विशेष्यलिङ्गता भवति" इति वार्तिकस्यास्यार्थः।

२१. पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमास-संज्ञं भवति इति सूत्रार्थः।

उत्तराणि-४

२२. चोराद् भयम् इति विग्रहे चोरभयम् इति एकम् उदाहरणम्।

२३. स्तोकान्तिकदूरार्थवाचकानि कृच्छ्रशब्दप्रकृतिकं च पञ्चम्यन्तं सुबन्तं क्तान्तप्रकृतिकेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

२४. स्तोकात् मुक्तः इति विग्रहे समासे स्तोकान्मुक्तः इति एकम् उदाहरणम्।

२५. पञ्चम्याः स्तोकादिभ्यः इति सूत्रेण।

२६. स्तोकान्तिकदूरार्थवाचकेभ्यः कृच्छ्रशब्दाच्च विहितायाः पञ्चम्याः उत्तरपदे परे लुक् न भवति इति सूत्रार्थः।

२७. षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह विकल्पेन समस्यते स च तत्पुरुषससंज्ञः भवति।

२८. राज्ञः पुरुषः इति विग्रहे राजपुरुषः।

उत्तराणि-५

२९. निर्धारणे षष्ठ्यन्तं सुबन्तं न समस्यते।

३०. न निर्धारणे इति सूत्रेण निषेधात् नात्र षष्ठीसमासः।

३१. जातिगुणक्रियासंज्ञाभिः समुदायाद् एकदेशस्य पृथक्करणं निर्धारणम्।

३२. प्रतिपदविधाना या षष्ठी तदन्तं सुबन्तं न समस्यते।

३३. "षष्ठी शेषे" इति शेषलक्षणां षष्ठीं वर्जयित्वा सर्वापि षष्ठी प्रतिपदविधाना इति महाभाष्याद्याकरग्रन्थाद् ज्ञायते।

३४. प्रतिपदविधाना षष्ठी न समस्यते इति षष्ठीसमासनिषेधात् नात्र षष्ठीसमासः।

उत्तराणि-६

३५. पूरणाद्यर्थैः सदादिभिश्च षष्ठ्यन्तं सुबन्तं समाससंज्ञं न भवति। (समासो न भवति।)

३६. "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रे संज्ञायाः गुणभूतप्रमाणत्वशब्देन सह समासदर्शनात्।

३७. षण्णां पूरणः इति।

३८. द्विजस्य कुर्वन् कुर्वाणो वा।

३९. ब्राह्मणस्य कृत्वा।

४०. तव्यत्-प्रत्ययेन योगात् समासः।

उत्तराणि-७

४१. "मतिबुद्धिपूजार्थेभ्यश्च" इत्यनेन विहितः यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

४२. पूजाग्रहणं मतिबुद्धिपूजार्थेभ्यश्च इति सूत्रोपलक्षणम्।

४३. राज्ञां मतः इति।

४४. अधिरकरणवाची यः क्तप्रत्ययः, तदन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति

४५. इदमेषाम् आसीतम् इति।

४६. "उभयप्राप्तौ कर्मणि" इत्यनेन विहिता या षष्ठी तदन्तस्य सुबन्तस्य सुबन्तेन समासो न भवति।

४७. आश्चर्यो गवां दोहो अगोपेन इति।

उत्तराणि-८

४८. कर्त्रर्थकौ यौ तृजकौ प्रत्ययौ तदन्तेन सुबन्तेन सह षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति।

४९. अपां स्रष्टा इति।

५०. ओदनस्य पाचकः इति।

५१. कर्तरि या षष्ठी तदन्तस्य ण्वुल्प्रत्ययान्तेन सह समासो न भवति।

५२. भवतः शायिका इति।

५३. यदा अवयवी एकत्वविशिष्टः तदा अवयविना सह पूर्वादीनां सुबन्तानां विकल्पेन तत्पुरुषसमासो भवति।

५४. पूर्वकायः।

उत्तराणि-९

५५. समांशवाची नित्यं नपुंसकलिङ्गे विद्यमानः अर्धशब्दः अवयविना सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति, एकत्वसंख्याविशिष्टः चेद् अवयवी।

५६. अर्धपिप्पली इति।

५७. सप्तम्यन्तं सुबन्तं शौण्डादिप्रकृतिकैः सुबन्तैः सह विकल्पेन तत्पुरषसमाससंज्ञं भवति इति सूत्रार्थः।

५८. अक्षशौण्डः।

॥इति द्वितीयः पाठः॥

346sk03

३

तत्पुरुषसमासः - तद्धितार्थादितत्पुरुषसमासः

प्रस्तावना

व्यधिकरणतत्पुरुषस्यालोचनात् परम् अस्मिन् पाठे आदौ द्विगुसमासस्य वर्णनं क्रियते। द्विगुसमासेन आनुषङ्गिकतया "दिक्संख्ये संज्ञायाम्" "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रद्वयं प्रस्तूयते। ततः समानाधिकरणस्य तत्पुरुषस्य वर्णनमत्र विधीयते। यस्मिन् तत्पुरुषे समस्यमानपदानि समानविभक्तिकानि भवन्ति स समानाधिकरणः तत्पुरुषः। समानाधिकरणतत्पुरुषस्य "तत्पुरुषः समानाधिकरणः कर्मधारयः" इत्यनेन कर्मधारयसंज्ञा भवति। ततः नञ्समासस्य वर्णनम् अस्मिन् पाठे अस्ति।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- दिक्पूर्वपदं संख्यापूर्वपदसमासं च जानीयात्।
- समानाधिकरणतत्पुरुषविधायकानि सूत्राणि जानीयात्।
- उपमितसमासं पठिष्यति।
- नञ्समासं जानीयात्।
- ससूत्रं समासान् ज्ञात्वा स्वयं समासं कर्तुं प्रभवेत्।
- साहित्याद्यध्ययनकाले पाठे स्थितानां समस्तपदानां समासं बोद्धुं निर्णेतुं च प्रभवेत्।

[३.१] दिक्संख्ये संज्ञायाम्॥ (२.१.५०)

सूत्रार्थः - दिशावाचकं संख्यावाचकं च सुबन्तं समानाधिकरणेन सुबन्तेन सह संज्ञायां गम्यमानायामेव तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं नियमसूत्रम्। अनेन सूत्रेण संज्ञायामेव दिशासंख्यावाचकयोः सुबन्तेन सह समानाधिकरणतत्पुरुषसमासः इति नियम्यते। सूत्रमिदं पदद्वयात्मकम्। अत्र दिक्संख्ये इति

प्रथमाद्विवचनान्तं संज्ञायामिति च सप्तम्येकवचनान्तं पदम्। दिक् च संख्या च दिक्संख्ये इति इतरेतरयोगद्वन्द्वः। "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इत्यस्मात् पूर्वस्मात् सूत्रात् समानाधिकरणेन इत्यनुवर्तते। समानाधिकरणेनेत्यस्य पदस्य द्वितीयाध्यायस्य प्रथमपादसमाप्तिं यावदधिकारः। समानम् एकम् अधिकरणं वाच्यं यस्य तत् समानाधिकरणम्, तेनेति बहुव्रीहिसमासः। एकार्थवृत्तित्वमिति फलितम्। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे " इत्यस्मात् सुप् इति पदमनुवर्तते। समानाधिकरणेन इत्यस्य विशेषणत्वात् सुपा इत्यत्र तदन्तविधिना सुबन्तेन समानाधिकरणेन इति भवति। एवं च सूत्रार्थः भवति - "दिशावाचकं संख्यावाचकं च सुबन्तं समानाधिकरणेन सुबन्तेन सह संज्ञायां गम्यमानायामेव तत्पुरुषसमाससंज्ञं भवति" इति।

"विशेषणं विशेष्येण बहुलम्" इत्यनेन सूत्रेणैव समासे सिद्धे एतत्सूत्रारम्भः किमर्थम् इति चेदुच्यते एतत्सूत्रं संज्ञायामेव समास इति नियमाय। अत एवोक्तं दीक्षितेन – "संज्ञायामेवेति नियमार्थं सूत्रम्" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा पूर्वेषुकामशमी इति। पूर्वा चासौ इषुकामशमी च इति लौकिकविग्रहे पूर्वा सु इषुकामी सु इत्यलौकिकविग्रहे पूर्वा सु इति दिग्वाचकं सुबन्तं इषुकामशमी सु इति सुबन्तेन सह प्रस्तुतसूत्रेण देशविशेषसंज्ञायां गम्यमानायां तत्पुरुषसमाससंज्ञं भवति। ततः "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन समासविधायकसूत्रे दिक् इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य पूर्वा सु इत्यस्य दिग्वाचकस्य उपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्यनेन तस्य पूर्वनिपातो भवति। ततः "कृत्तद्धितसमासाश्च" इति सूत्रेण पूर्वा सु इषुकामशमी सु इति समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सूत्रेण सुपः सुद्वयस्य लुकि पूर्वा इषुकामशमी इति भवति। "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति वार्तिकेन पूर्वा इति सर्वनाम्नः पुंवद्भावे पूर्व इति भवति। ततः पूर्व इषुकामशमी इति भवति। ततः "आद् गुणः" इति सूत्रेण पूर्वशब्दस्य वकारोत्तरस्य अकारस्य इषुकामशमीत्यस्य इकारस्य च स्थाने गुणे एकादेशे एकारे सर्वसंयोगे पूर्वेषुकामशमी इति निष्पद्यते। पूर्वेषुकामशमी इत्यस्य प्रातिपदिकत्वाक्षत्या ततः सौ प्रक्रियाकार्ये पूर्वेषुकामशमी इति रूपम्।

एवमेव सप्त ऋषयः इति स्थिते समासो भवति संज्ञायाम्। सप्तर्षयः इति मरीच्यत्रिप्रभृतीनां सप्तानामृषीणां संज्ञा।

पाठगतप्रश्नाः १

१. "दिक्संख्ये संज्ञायाम्" इति सूत्रस्य उदाहरणम् एकं देयम्। इति सूत्रं किम्प्रकारकम्।

२. "दिक्संख्ये संज्ञायाम्" इति सूत्रस्यार्थः कः।

३. "दिक्संख्ये संज्ञायाम्" इति सूत्रस्य दिग्वाचकेन समासे किमुदाहरणम्।

४. "दिक्संख्ये संज्ञायाम्" इति सूत्रस्य संख्यावाचकेन समासे किमुदाहरणम्।

[३.२] तद्धितार्थोत्तरपदसमाहारे च॥ (२.१.५१)

सूत्रार्थः - तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिशावाचकं संख्यावाचकं च सुबन्तं समानाधिकरणेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण विकल्पेन तत्पुरुषसमासो विधीयते।सूत्रमिदं पदद्वयात्मकम्। तद्धितार्थोत्तरपदसमाहारे इति सप्तम्येकवचनान्तं पदम्। चेत्यव्ययपदम्।तद्धितार्थश्च उत्तरपदञ्च समाहारश्च इति तद्धितार्थोत्तरपदसमाहारं, तस्मिन् इति समाहारद्वन्द्वः। तद्धितार्थे उत्तरपदे समाहारे च इत्यर्थः। एकापि सप्तमी अत्र विषयभेदात् भिद्यते। तद्धितार्थे इत्यत्र वैषयिकाधिकरणे सप्तमी। अतः तद्धितार्थे विषये इति अर्थः पर्यवस्यति। तद्धितार्थे भविष्यत्तद्धितजन्यज्ञानविषये सतीति यावत्। उत्तरपदे इत्यत्र परसप्तमी, तेन उत्तरपदे परतः इत्यर्थो गम्यते। समाहारे इत्यत्र च वाच्याधिकरणे सप्तमी। तेन समाहारे वाच्ये इत्यर्थः प्राप्यते।

"प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इति सूत्रचतुष्टयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे " इत्यस्मात् सुप् इति पदमनुवर्तते। "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इत्यस्मात् सूत्रात् समानाधिकरणेन इति "दिक्संख्ये संज्ञायाम्" इति सूत्राच्च दिक्संख्ये इत्यनुवर्तते। एवं च सूत्रार्थः भवति - "तद्धितप्रत्ययार्थे विषये, उत्तरपदे च परे, समाहारे च वाच्ये दिशावाचि तथा संख्यावाचि सुबन्तं समानाधिकरणेन सुबन्तेन सह वा समस्यते, स तत्पुरुषसंज्ञको भवति" इति।

एवं समासविधायकसूत्रस्यास्य पञ्चधा समासविधायकत्वं सम्भवति -

क) तद्धितार्थे विषये दिशावाचिसुबन्तं समानाधिकरणेन सुबन्तेन,

ख) तद्धितार्थे विषये संख्यावाचि सुबन्तं समानाधिकरणेन सुबन्तेन,

ग) उत्तरपदे च परतः दिशावाचि सुबन्तं समानाधिकरणेन सुबन्तेन,

घ) उत्तरपदे च परतः संख्यावाचि सुबन्तं समानाधिकरणेन सुबन्तेन,

ङ) समाहारे च वाच्ये संख्यावाचि सुबन्तं समानाधिकरणेन सुबन्तेन सह वा समस्यते, स तत्पुरुषः समास इति।

उदाहरणम् - सूत्रस्यास्योदाहरणान्यधः प्रस्तूयन्ते। तत्रे तद्धितार्थे विषये दिक्समासस्योदाहरणं यथा पौर्वशाल इति। तथाहि पूर्वस्यां शालायां भव इति लौकिकविग्रहे पूर्वा ङि शाला ङि इत्यलौकिकविग्रहे प्रकृतसूत्रेण पूर्वा ङि इति दिग्वाचकं सुबन्तं प्रस्तुतेन सूत्रेण "दिक्पूर्वपदादसंज्ञायां ञः" इति भवार्थे तद्धितार्थे विषये शाला ङि इति समानाधिकरणेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे अनुवृत्ते दिक्संख्ये इत्यत्र दिक्पदस्य प्रथमानिर्दिष्टत्वात् दिग्बोध्यस्य पूर्वा ङि इति पदस्य उपसर्जनसंज्ञा भवति। ततः तस्य पूर्वनिपाते पूर्वा ङि शाला ङि इति स्थिते समुदायस्य समासत्वेन प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपोः ङ्योः लुकि पूर्वा शाला इति

भवति। तदा पूर्वाशब्दस्य "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इत्यनेन वार्तिकेन पुंवद्भावे निष्पन्नात् पूर्वशालाशब्दात् "दिक्पूर्वपदादसंज्ञायां ञः" इति सूत्रेण ञप्रत्यये अनुबन्धलोपे पूर्वशाला अ इति भवति। ततः "तद्धितेष्वाचामादेः" इत्यनेन पूर्वशालाशब्दस्य आद्यचः ऊकारस्य वृद्धौ औकारे पौर्वशाला इत्यस्य भसंज्ञायां "यस्येति च" इति सूत्रेण भसंज्ञकस्य आकारस्य लोपे पौर्वशाल् अ इति जाते सर्वसंयोगे निष्पन्नस्य पौर्वशालशब्दस्य प्रातिपदिकत्वात् सौ विभक्तिकार्ये पौर्वशालः इति रूपं सिद्धम्।

तद्धितार्थे विषये संख्यातत्पुरुषसमासस्योदाहरणं यथा षाण्मातुर इति। उत्तरपदे परतः दिक्समासस्योदाहरणं पञ्चगवधनः इति। उत्तरपदे परतो दिशावाचकेन सह समासस्योदाहरणं भवति पूर्वशालप्रियः इति। समाहारे वाच्ये संख्यातत्पुरुषस्योदाहरणं यथा पञ्चगवमिति।

पाठगतप्रश्नाः-२

५. "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रं किम्प्रकारकम्।

६. "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रस्यार्थः कः।

७. "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रस्य तद्धितार्थे विषये किमुदाहरणम्।

८. "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रस्य उत्तरपदे परे किमुदाहरणम्।

९. "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रस्य समाहारे वाच्ये किमुदाहरणम्।

[३.३] दिक्पूर्वपदादसंज्ञायां ञः॥ (४.२.१०७)

सूत्रार्थः - दिशावाचकं पूर्वपदं यस्य तस्मात् प्रातिपदिकाद् शैषिके भवाद्यर्थे असंज्ञायां गम्यमानायां तद्धितः ञप्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण असंज्ञायां गम्यमानायां तद्धितः ञप्रत्ययो विधीयते। अत्र पूर्वशाला इति स्थिते भवार्थे ञप्रत्ययविधानाय इदं सूत्रं प्रवृत्तम्। सूत्रमिदं पदत्रयात्मकम्। अत्र दिक्पूर्वपदाद् असंज्ञायां ञः इति पदच्छेदः। दिक्पूर्वपदाद् इति पञ्चम्येकवचनान्तम् असंज्ञायाम् इति सप्तम्येकवचनान्तं ञः इति प्रथमैकवचनान्तं पदम्। दिक् दिग्वाचकं पूर्वपदं यस्य तद् दिक्पूर्वपदं तस्मादिति बहुव्रीहिः समासः। "प्रत्ययः", "परश्च", "ङ्याप्प्रातिपदिकात्", "तद्धिताः" इति सूत्रचतुष्टयमधिकृतम्। "शेषे" इत्यस्मात् सूत्रात् शेषे इति पदमनुवर्तते। एवं च सूत्रार्थः भवति - "दिशावाचकं पूर्वपदं यस्य तस्मात् प्रातिपदिकाद् शैषिके भवाद्यर्थे असंज्ञायां गम्यमानायां तद्धितः ञप्रत्ययो भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा पौर्वशालः इति। पूर्वस्यां शालायां भवः इति विग्रहे प्रक्रियाकार्ये पूर्वशाला इति स्थिते पूर्वशब्दस्य दिग्वाचकत्वात् पूर्वशाला इत्यस्य दिक्पूर्वपदत्वात् ततः

भवार्थे प्रकृतसूत्रेण ञप्रत्ययो भवति। ञप्रत्ययस्य ञकारस्य "चुटू" इत्यनेनेत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे पूर्वशाला अ इति भवति। तदा तद्धिते परे आदिवृद्धये सूत्रं प्रवृत्तम् -

[३.४] तद्धितेष्वचामादेः॥ (७.२.११७)

सूत्रार्थः - ञिति णिति च तद्धिते परे अचाम् आदेः अचो वृद्धिः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण असंज्ञायां गम्यमानायां तद्धितः ञप्रत्ययो विधीयते। सूत्रमिदं पदत्रयात्मकम्। अत्र तद्धितेषु अचाम् आदेः इति पदच्छेदः। "अचो ञ्णिति" इत्यस्मात् सूत्राद् अचः ञ्णिति इति पदद्वयमनुवर्तते। "मृजेर्वृद्धिः" इत्यस्मात् सूत्राद् वृद्धिः इति पदम् अनुवर्तते। "अङ्गस्य" इति सूत्रम् अधिकृतम्। ञ् च ण् च ञ्णौ, ञ्णौ इतौ यस्य स ञ्णित्, तस्मिन् इति इतरेतरद्वन्द्वगर्भबहुव्रीहिसमासः। ञ्णिति इत्यनेन तद्धितेषु इत्यस्य अन्वयात् तस्य एकवचनान्तत्वं भवति। अचाम् इति निर्धारणे षष्ठी। एवं च सूत्रार्थः भवति - "ञिति णिति च तद्धिते परे अचाम् आदेः अचो वृद्धिः भवति।" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं यथा पौर्वशालः इति। पूर्वस्यां शालायां भवः इति विग्रहे प्रक्रियाकार्ये निष्पन्नात् दिक्पूर्वपदात् पूर्वशाला इत्यस्मात् प्रातिपदिकात् "दिक्पूर्वपदादसंज्ञायां ञः" इत्यनेन ञप्रत्यये अनुबन्धलोपे पूर्वशाला अ इति भवति। तदा प्रकृतसूत्रेण तद्धिते ञिति ञप्रत्यये परे पूर्वशालाशब्दस्य आद्यचः ऊकारस्य वृद्धौ औकारे पौर्वशाला अ इति भवति। ततः पौर्वशाला इत्यस्य "यचि भम्" इत्यनेन भसंज्ञायां "यस्येति च" इति सूत्रेण भसंज्ञकस्य आकारस्य लोपे पौर्वशाल् अ इति जाते सर्वसंयोगे निष्पन्नस्य पौर्वशालशब्दस्य प्रातिपदिकत्वात् ततः सौ विभक्तिकार्ये पौर्वशालः इति रूपं सिद्धम्।

पञ्च गावः धनं यस्य इति लौकिकविग्रहे पञ्चन् जस् गो जस् धन सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इत्यनेन बहुव्रीहिसमासे समुदायस्य समासत्वात् प्रातिपदिकसंज्ञायां सुपां लुकि पञ्चन् गो धन इति भवति। अत्रे धनशब्दे उत्तरपदे परतः "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रेण बहुव्रीहिगर्भे संख्यावाचिपञ्चन्शब्दस्य समानाधिकरणेन गोपदेन साकं विकल्पेन अवान्तरतत्पुरुषसमासे प्राप्ते "द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्" इत्यनेन नित्ये समासे पञ्चन् इत्यस्य उपसर्जनत्वात्पूर्वनिपाते नकारस्य "न लोपः प्रातिपदिकान्तस्य" इत्यनेन लोपे पञ्च गो धन इति स्थिते समासान्तविधायकं सूत्रं प्रवर्तते -

[३.५] गोरतद्धितलुकि॥ (५.४.९२)

सूत्रार्थः - गोशब्दान्तात् तत्पुरुषात् समासान्तः टच्प्रत्ययो भवति न तद्धितलुकि।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः टच्प्रत्ययो विधीयते।सूत्रमिदं पदद्वयात्मकम्। अत्र गोः इति पञ्चम्येकवचनान्तम् अतद्धितलुकि इति सप्तम्येकवचनान्तं च पदम्। न तद्धितलुकि अतद्धितलुकि इति नञ्समासः। "तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः" इत्यस्मात् सूत्रात् तत्पुरुषस्येति पदम् अनुवर्तते। तच्च पदं पञ्चम्यां विपरिणतं गोः इत्यनेन विशिष्यते। ततः तदन्तविधिना

गोऽन्ताद् इति समायाति। "राजाहःसखिभ्यष्टच्" इत्यस्मात् सूत्रात् टच् इत्यनुवर्तते। "समासान्तः" इत्यधिक्रियते। एवमर्थः समायाति - "गोशब्दान्तात् तत्पुरुषात् समासान्तः टच्प्रत्ययो भवति न तु तद्धितलुकि" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं पञ्चगवधनः इति। "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन समासे प्रक्रियाकार्ये पञ्च गो धन इति स्थिते प्रस्तुतेन सूत्रेण गोशब्दान्तात् पञ्चगो इत्यस्मात् समासान्तः टच्प्रत्ययो भवति। टचः टस्य "चुटू" इत्यनेन टकारस्य च "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे पञ्च गो अ धन इति स्थिते "एचोऽयवायावः" इत्यनेन गोशब्दावयवस्य ओकारस्य अवादेशे सर्वसंयोगे निष्पन्नात् पञ्चगवधनशब्दात् प्रक्रियाकार्ये सौ पञ्चगवधनः इति रूपम्।

पाठगतप्रश्नाः-३

१०. "दिक्पूर्वपदादसंज्ञायां ञः" इति सूत्रस्यार्थः कः।

११. पौर्वशालः इत्यत्र कस्मिन्नर्थे कः तद्धितप्रत्ययः।

१२. "तद्धितेष्वचामादेः " इति सूत्रस्यार्थः कः।

१३. पौर्वशालः इत्यत्र केन सूत्रेण कथं च वृद्धिः।

१४. "गोरतद्धितलुकि" इति सूत्रस्यार्थः कः।

१५. पञ्चगवधनः इत्यत्र टच्प्रत्ययः केन सूत्रेण कथं च।

समाहारे वाच्ये एतत्प्रकरणोपकारकाणि सूत्राणि वर्ण्यन्ते -

[३.६] तत्पुरुषः समानाधिकरणः कर्मधारयः॥ (१.२.४२)

सूत्रार्थः - समानाधिकरणः तत्पुरुषसमासः कर्मधारयसंज्ञको भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण समानाधिकरणस्य तत्पुरुषस्य कर्मधारयसंज्ञा विधीयते। सूत्रमिदं पदत्रयात्मकम्। अत्र तत्पुरुषः समानाधिकरणः कर्मधारयः इति पदत्रयं प्रथमैकवचनान्तम्। समानम् एकम् अधिकरणं वाच्यं ययोः ते समानाधिकरणे पदे इति बहुव्रीहिः। समानाधिकरणे नाम समानविभक्तिके। समानाधिकरणे पदे स्तः अस्येति विग्रहे "अर्शआदिभ्योऽच्" इत्यनेन सूत्रेण मत्वर्थे अर्शआदित्वाद् अचि समानाधिकरणः इति निष्पन्नः। समानाधिकरणः नाम समानाधिकरणपदकः। एवम् अस्य सूत्रस्यार्थः समायाति - "समानाधिकरणपदकः तत्पुरुषसमासः कर्मधारयसंज्ञको भवति" इति।

कर्मधारयसंज्ञायां सत्यां कृष्णा चतुर्दशी इति विग्रहे "पुंवत्कर्मधारयजातीयदेशीयेषु" इत्यनेन सूत्रेण पूर्वपदस्य कृष्णापदस्य कर्मधारयसमासे पुंवद्भावे प्रक्रियाकार्ये कृष्णचतुर्दशी इति रूपं सिध्यति।

कर्मधारयसंज्ञकस्य तत्पुरुषसंज्ञा अप्यभीष्टा। अत एव "आकडारादेका संज्ञा" इति सूत्रस्याधिकारे अस्य सूत्रस्य पाठो न विहितः।

[३.७] पुंवत्कर्मधारयजातीयदेशीयेषु॥ (६.३.४२)

सूत्रार्थः - भाषितपुंस्कात्पर ऊङोऽभावो यस्मिन् तथाभूतस्य स्त्रीलिङ्गकस्य पूर्वपदस्य कर्मधारये जातीयदेशीययोश्च परतः पुंवाचकस्येव रूपं भवति।

सूत्रव्याख्या - इदम् अतिदेशसूत्रम्। अनेन सूत्रेण पुंवद्भावस्यातिदेशो भवति। सूत्रे अस्मिन् पदद्वयं पुंवत् कर्मधारयजातीयदेशीयेषु चेति। पुंवत् इति वतिप्रत्ययान्तम् अव्ययम्, कर्मधारयजातीयदेशीयेषु इति च सप्तमीबहुवचनान्तं पदम्। कर्मधारयश्च जातीयश्च देशीयश्च कर्मधारयजातीयदेशीयास्तेषु कर्मधारयजातीयदेशीयेषु इति इतरेतरद्वन्द्वसमासः। अत्र विषयभेदात् सप्तम्या अपि भेदः। कर्मधारये इत्यत्र अधिकरणसप्तमी, जातीयदेशीयेषु इत्यत्र परसप्तमी। अत्र "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रात् स्त्रियाः भाषितपुंस्कादनूङ् चेति पदद्वयम् अनुवर्तते। अत्र भाषितपुंस्कादनूङ् इति लुप्तषष्ठ्येकवचनान्तं समस्तं पदं स्त्रियाः इत्यस्य विशेषणम्।अत्र निपातनात् पञ्चम्याः अलुक् षष्ठ्याश्च लुक्। भाषितः पुमान् यस्मिन् सः भाषितपुंस्कः इति बहुव्रीहिसमासः, तस्मात् भाषितपुंस्काद् इति। ऊङोऽभावः अनूङ् इति अव्ययीभावः। भाषितपुंस्काद् अनूङ् यस्यां सा भाषितपुंस्कादनूङ्, तस्याः भाषितपुंस्कादनूङ् इति। अतः सूत्रस्यास्यार्थस्तावत् - "भाषितपुंस्कात्पर ऊङोऽभावो यस्मिन् तथाभूतस्य स्त्रीलिङ्गकस्य पूर्वपदस्य कर्मधारये जातीयदेशीययोश्च परतः पुंवाचकस्येव रूपं भवति" इति।

उदाहरणम् - अत्रोदाहरणं तावत् कृष्णचतुर्दशी इति। कृष्णा चासौ चतुर्दशी च इति लौकिकविग्रहे कृष्णा सु चतुर्दशी सु इत्यलौकिकविग्रहे "विशेषणं विशेष्येण बहुलम्" इत्यनेन तत्पुरुषसमासे, कृष्णा सु इत्यस्य पूर्वनिपाते प्रातिपदिकसंज्ञायां ततः सुब्लुकि कृष्णा चतुर्दशी इति भवति। कृष्णाचतुर्दशी इति समानाधिकरणस्य तत्पुरुषस्य "तत्पुरुषः समानाधिकरणः कर्मधारयः" इत्यनेन कर्मधारयसंज्ञा भवति। ततः अत्र कृष्णा इत्यस्य पुंलिङ्गे अपि समानार्थे प्रयोगाद् भाषितपुंस्कत्वात् ततः ऊङः अभावाद् प्रस्तुतसूत्रेण पुंवद्भावे कृष्णचतुर्दशी इति भवति। ततः कृष्णचतुर्दशीशब्दस्वरूपस्य एकदेशविकृतन्यायेन समासत्वाक्षत्या ततः सौ विभक्तिकार्ये कृष्णचतुर्दशी इति रूपम्। जातीयर्-प्रत्यये परे पाचकजातीया इति, देशीयर्-प्रत्यये परे च पुंवद्भावस्य पाचकदेशीया इत्युदाहरणम्।

[३.८] संख्यापूर्वो द्विगुः॥ (२.१.५२)

सूत्रार्थः - तद्धितार्थोत्तरपदसमाहारे च इत्यस्मिन् सूत्रे उक्तः त्रिविधः संख्यापूर्वः समासो द्विगुसंज्ञो भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण संख्यापूर्वस्य तत्पुरुषस्य द्विगुसंज्ञा विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र संख्यापूर्वः द्विगुः इति पदद्वयं प्रथमैकवचनान्तम्। संख्या पूर्वः पूर्वावयवः

यस्य स संख्यापूर्वः इति बहुव्रीहिसमासः। "तद्धितार्थोत्तरपदसमाहारे च" इत्यत्रोक्तः त्रिविधः संख्यापूर्वपदः समासः अत्र संख्यापूर्वशब्देन गृह्यते। एतस्य सूत्रस्य अर्थो भवति - "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन तद्धितार्थे विषये, उत्तरपदे परे समाहारे च वाच्ये यः संख्यापूर्वपदः समासः भवति स द्विगुसंज्ञको भवति" इति।

उदाहरणम् - सूत्रस्यास्य तद्धितार्थे विषये पञ्चकलापः इति, उत्तरपदे परतः पञ्चगवधनः इति, समाहारे च वाच्ये पञ्चगवम् इत्युदाहरणं भवति। तथाहि पञ्चानां गवां समाहारः इति लौकिकविग्रहे पञ्चन् आम् गो आम् इत्यलौकिकविग्रहे "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन समासे प्रक्रियाकार्ये निष्पन्नात् गोशब्दान्तात् पञ्चगोशब्दात् "गोरतद्धितलुकि" इति सूत्रेण टच्प्रत्यये पञ्चगो अ इति भवति। ततः "एचोऽयवायावः" इति सूत्रेण गकारोत्तरस्य ओकारस्य अवादेशे पञ्चगव इति भवति। "तत्पुरुषः समानाधिकरणः कर्मधारयः" इत्यनेन कर्मधारयसंज्ञायां प्रकृतसूत्रेण पञ्चन् इति संख्यापूर्वत्वाद् पञ्चगव इत्यस्य द्विगुसमासः भवति। ततः द्विगुसमासे विशेषकार्यबोधनाय सूत्रं प्रवृत्तम् -

[३.९] द्विगुरेकवचनम्॥ (२.४.१)

सूत्रार्थः - दिग्वर्थः समाहारः एकवद् भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण एकवद्भावः विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र द्विगुः एकवचनम् इति पदद्वयं प्रथमैकवचनान्तम्। "समाहारग्रहणं कर्तव्यम्" इति वार्तिकबलात् सूत्रे समाहारः इति पदम् आगच्छति। वक्तीति विग्रहे "कृत्यल्युटो बहुलम्" इत्यनेन बाहुलकात् कर्तरि ल्युटि नपुंसकत्वे वचनम् इति निष्पन्नम्। एकस्य वचनम् एकवचनम् इति षष्ठीतत्पुरुषसमासः। एकस्य अर्थस्य प्रतिपादकः इत्यर्थः। "समाहारार्थे यः द्विगुः भवति स एकवचनं भवति" इति सूत्रार्थः।

उदाहरणम् - तथाहि पञ्चानां गवां समाहारः इति लौकिकविग्रहे पञ्चन् आम् गो आम् इत्यलौकिकविग्रहे "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन समासे प्रक्रियाकार्ये निष्पन्नस्य पञ्चगवशब्दस्य "संख्यापूर्वो द्विगुः" इत्यनेन द्विगुसमासे प्रस्तुतसूत्रेण एकवद्भावः विधीयते। ततः सूत्रं प्रवृत्तम्-

[३.१०] स नपुंसकम्॥ (२.४.१७)

सूत्रार्थः - समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण नपुंसकत्वं विधीयते। सूत्रमिदं पदद्वयात्मकम्। अत्र स नपुंसकम् इति पदद्वयं प्रथमैकवचनान्तम्। अत्र सः इति पदेन समाहारार्थे द्विगोः समाहारद्वन्द्वस्य च ग्रहणम्। एवं "समाहारे द्विगुः द्वन्द्वश्च नपुंसकं भवति" इति सूत्रार्थः।

द्विगुसमासस्य तत्पुरुषभेदत्वात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन प्राप्तायाः द्विगोः द्वन्द्वस्य च परवल्लिङ्गताया अपवादभूतं सूत्रमिदम्।

उदाहरणम् - पञ्चगवम् इत्युदाहरणम्। तथाहि पञ्चानां गवां समाहारः इति लौकिकविग्रहे पञ्चन् आम् गो आम् इत्यलौकिकविग्रहे "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन समासे प्रक्रियाकार्ये निष्पन्नस्य

पञ्चगवशब्दस्य "संख्यापूर्वो द्विगुः" इत्यनेन द्विगुसमासो भवति। ततः एकवद्भावे प्रकृतसूत्रेण तस्य नपुंसकलिङ्गत्वं विधीयते। तेन पञ्चगवशब्दात् नपुंसके सौ सोरमि प्रक्रियाकार्ये पञ्चगवम् इति रूपं निष्पद्यते। समाहारद्वन्द्वे अस्य सूत्रस्योदाहरणं पाणिपादम् इति।

पाठगतप्रश्नाः-४

१६. "तत्पुरुषः समानाधिकरणः कर्मधारयः" इति सूत्रस्यार्थः कः।

१७. "पुंवत्कर्मधारयजातीयदेशीयेषु" इति सूत्रस्यार्थः कः।

१८. "पुंवत्कर्मधारयजातीयदेशीयेषु" इति सूत्रस्योदाहरणमेकं देयम्।

१९. "संख्यापूर्वो द्विगुः" इति सूत्रस्यार्थः कः।

२०. "द्विगुरेकवचनम्" इति सूत्रस्यार्थः कः।

२१. "स नपुंसकम्" इति सूत्रस्यार्थः कः।

२२. द्विगौ एकवद्भावस्योदाहरणमेकं देयम्।

[३.११] विशेषणं विशेष्येण बहुलम्॥ (२.१.५७)

सूत्रार्थः - भेदकं भेद्येन समानाधिकरणेन सह बहुलं समस्यते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण विशेषणविशेष्यसमासो विधीयते। पदत्रयात्मके अस्मिन् सूत्रे विशेषणमिति प्रथमैकवचनान्तं, विशेष्येण इति तृतीयैकवचनान्तं, बहुलम् इति प्रथमैकवचनान्तं च पदम्। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इत्यस्मात् सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। विशिष्यते अनेनेति विशेषणम्, अन्यस्मात् व्यावर्तकं भेदकम्। यद् भिद्यते तद् व्यावर्त्यं भेद्यं विशेष्यम् इति। अतः सूत्रस्यास्यार्थस्तावत् "भेदकं समानाधिकरणेन भेद्येन बहुलं समस्यते, स च तत्पुरुषसंज्ञो भवति" इति।

"तत्पुरुषः समानाधिकरणः कर्मधारयः" इति सूत्रबलात् अयं समासः कर्मधारयसंज्ञकोऽपि भवति। वाग्रहणेनैव सिद्धे सूत्रे बहुलग्रहणात् सर्वोपाधिव्यभिचारः। तेन कृष्णसर्पः इत्यादौ नित्यसमासः। रामो जामदग्न्यः इत्यादौ तु समासः न भवति।

उदाहरणम् - नीलोत्पलम् इत्याद्यत्रोदाहरणम्। नीलं च तदुत्पलम् इति लौकिकविग्रहे नील सु उत्पल सु इत्यलौकिकविग्रहे विशेषणवाचकं नील सु इति सुबन्तं समानाधिकरणेन विशेष्येण उत्पल सु इत्यनेन सुबन्तेन प्रस्तुतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकसूत्रे विशेषणम् इत्यस्य प्रथमानिर्देशात् तद्बोध्यस्य नील सु इति पदस्य उपसर्जनत्वेन पूर्वनिपाते नील सु उत्पल सु इति भवति। ततः समुदायस्य समासत्वेन प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुद्वयस्य लुकि

नील उत्पल इति भवति। ततः "आद् गुणः" इति सूत्रेण अकारस्य उकारस्य च स्थाने एकारे एकादेशे निष्पन्नस्य नीलोत्पलशब्दस्य एकदेशविकृतन्यायेन प्रातिपदिकत्वात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति सूत्रेण नपुंसके लिङ्गे वर्तमानात् ततः सौ, सोरमि विभक्तिकार्ये नीलोत्पलम् इति रूपं सिद्धम्।

नीलपदस्य अनीलादुत्पलाद् उत्पलशब्दस्य व्यावर्तकत्वेन विशेषणत्वमस्ति। तथैव उत्पलपदम् अनुत्पलान्नीलं व्यावर्तयतीत्युत्पलपदस्यापि विशेषणत्वम्। अतः उत्पलशब्दस्य पूर्वनिपातो भवतु इति शङ्का भवति। अत्र समाधानं तावद् जातिगुणक्रियावाचिनां शब्दानां समभिव्याहारे जातिवाचक एव विशेष्यम्, अन्यद् विशेषणं स्वभावात्। अत्र उत्पलशब्दस्य जातिवाचकत्वाद् विशेषणत्वाभावात् न पूर्वनिपातः। गुणशब्दयोः गुणक्रियाशब्दयोः समभिव्याहारे विशेषणविशेष्यभावस्य नास्ति नियमः। अतः गुणवाचकयोः विशेषणविशेष्यभावे खञ्जकुब्जः कुब्जखञ्जः इति रूपद्वयं भवति। एवमेव क्रियाशब्दयोरपि समभिव्याहारे पाचकपाठकः पाठकपाचकः इति रूपद्वयम्। तथा गुणक्रियाशब्दयोः समभिव्याहारे खञ्जपाचकः, पाचकखञ्जः इति रूपद्वयम्। सामान्यजातिविशेषजातिशब्दयोः समभिव्याहारे तु विशेषजातिरेव विशेषणम्। यथा शिंशपावृक्षः इत्यादौ।

[३.१२] कुत्सितानि कुत्सनैः॥ (२.१.५३)

सूत्रार्थः - कुत्स्यमानानि सुबन्तानि कुत्सनैः समानाधिकरणैः सुबन्तैः सह समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र कुत्सितानि इति प्रथमाबहुवचनान्तं कुत्सनैः इति च तृतीयाबहुवचनान्तं पदम्। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तच्च विभक्तिविपरिणामेन कुत्सनैः इत्यस्य विशेषणत्वात् समानाधिकरणैः इति भवति। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सुबन्तम् इति लभ्यते। कुत्सितशब्दे वर्तमाने क्तप्रत्ययः, व्याख्यानात्। कुत्सितानि इत्यस्य कुत्स्यमानानि इत्यर्थः। अतः सूत्रस्यास्यार्थः "कुत्स्यमानानि सुबन्तानि कुत्सनैः समानाधिकरणैः सुबन्तैः सह समस्यन्ते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - अत्रोदाहरणं तावत् वैयाकरणखसूचिः इति। वैयाकरणश्चासौ खसूचिश्चेति इति लौकिकविग्रहे वैयाकरण सु खसूचि सु इत्यलौकिकविग्रहे कुत्स्यमानवाचकं वैयाकरण सु इति सुबन्तं समानाधिकरणेन खसूचि सु इत्यनेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः कुत्सितार्थस्य वैयाकरण सु इत्यस्य पूर्वनिपाते सुब्लुकि निष्पन्नात् वैयाकरणखसूचिशब्दात् सौ प्रक्रियाकार्ये वैयाकरणखसूचिः इति रूपं निष्पन्नम्। एवमेव मीमांसकदुर्दुरूटः इत्यादिकमेतस्य सूत्रस्योदाहरणम्।

पाठगतप्रश्नाः-५

२३. "विशेषणं विशेष्येण बहुलम्" इति सूत्रस्यार्थः कः।

२४. "विशेषणं विशेष्येण बहुलम्" इति सूत्रे बहुलग्रहणस्य किं फलम्।

२५. नीलोत्पलम् इत्यत्र नीलशब्दस्य विशेष्यत्वं कुतः न।

२६. गुणक्रियावाचकानां समभिव्याहारे विशेषणविशेष्यभावस्योदाहरणं देयम्।

२७. "कुत्सितानि कुत्सनैः" इति सूत्रस्यार्थः कः।

२८. "कुत्सितानि कुत्सनैः" इति सूत्रस्योदाहरणं देयम्।

[३.१३] पापाणके कुत्सितैः॥ (२.१.५४)

सूत्रार्थः - पापशब्दः अणकशब्दश्च कुत्स्यमानैः समानाधिकरणैः सुबन्तैः सह समस्यते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र पापाणके इति प्रथमाद्विवचनान्तं कुत्सितैः इति च तृतीयाबहुवचनान्तं पदम्। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तच्च विभक्तिविपरिणामेन कुत्सितैः इत्यस्य विशेषणत्वात् समानाधिकरणैः इति भवति। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ कुत्सितैः इत्यस्य विशेषणत्वात् सुबन्तैः इति लभ्यते। कुत्सितैः नाम कुत्स्यमानैः। अतः सूत्रस्यास्यार्थस्तावत् - "पापशब्दः अणकशब्दश्च कुत्स्यमानैः समानाधिकरणैः सुबन्तैः सह समस्यते, स च तत्पुरुषसंज्ञको भवति" इति।

"विशेषणं विशेष्येण बहुलम्" इत्यनेन एव सूत्रकार्ये सिद्धे सूत्रमिदं किमर्थमिति प्रश्नः समायाति। अत्रोत्तरं तावत् पूर्वसूत्रस्यापवादभूतमिदं सूत्रम्। अत्र पापाणके इति प्रथमान्तत्वेन पठितत्वात् समासे तयोरेव शब्दयोः पूर्वनिपातः।

उदाहरणम् - अत्रोदाहरणं तावत् पापनापितः इति। पापश्चासौ नापितश्चेति इति लौकिकविग्रहे पाप सु नापित सु इत्यलौकिकविग्रहे पाप सु इति सुबन्तं समानाधिकरणेन कुत्स्यमानेन नापित सु इत्यनेन सुबन्तेन सह प्रोक्तसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः पापशब्दस्य पूर्वनिपाते सुब्लुकि निष्पन्नात् पापनापितशब्दात् सौ प्रक्रियाकार्ये पापनापितः इति रूपं निष्पन्नम्। एवमेव अणककुलालः इति अस्य सूत्रस्योदाहरणम्।

[३.१४] उपमानानि सामान्यवचनैः॥ (२.१.५५)

सूत्रार्थः - उपमानवाचकानि सुबन्तानि सामान्यवचनैः समानाधिकरणैः सुबन्तैः सह समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र उपमानानि इति प्रथमाबहुवचनान्तं सामान्यवचनैः इति च तृतीयाबहुवचनान्तं पदम्। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तच्च विभक्तिविपरिणामेन सामान्यवचनैः इत्यस्य विशेषणत्वात् समानाधिकरणैः इति भवति। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ समानाधिकरणैः इत्यनेनान्वयात् सुबन्तैः इति लभ्यते। उपपूर्वकात् मीधातोः करणे ल्युटि उपमानशब्दो निष्पद्यते। उपमीयते सदृशतया परिच्छिद्यते यैस्तानि उपमानानि। समानस्य भावः सामान्यं, साधारणो धर्मः इति तदर्थः। सामान्यम् उक्तवन्तः इति सामान्यवचनाः, तैः सामान्यवचनैः। उपमानोपमेयसाधारणो यो धर्मस्तद्विशिष्टवचनैरित्यर्थः। ये शब्दाः पूर्वं साधारणधर्ममुक्त्वा मत्वर्थीयाच्प्रत्ययबलात् तद्वति द्रव्ये वर्तन्ते ते सामान्यवचना इति वैयाकरणराद्धान्तः। अतः सूत्रस्यास्यार्थस्तावत् "उपमानवाचकानि सुबन्तानि सामान्यवचनैः समानाधिकरणैः सुबन्तैः सह वा समस्यन्ते, स च तत्पुरुषसंज्ञको भवति" इति।

"विशेषणं विशेष्येण बहुलम्" इत्यनेनैव समासे उपमानवाचकस्य पूर्वनिपाते सिद्धे सूत्रमिदं व्यर्थमिति चेदुच्यते उपमानवाचकपदस्यैव पूर्वनिपातः यथा स्यात् तदर्थमिदं सूत्रम्। अन्यथा उभयोः गुणवाचकत्वेन विशेषणविशेष्यभावे कामचारात् खञ्जकुब्जः, कुब्जखञ्जः इतिवद् अनियमापत्तिरिति स्यात्।

उदाहरणम् - अत्रोदाहरणं तावत् घनश्यामः इति। घन इव श्यामः इति लौकिकविग्रहे घन सु श्याम सु इत्यलौकिकविग्रहे उपमानवाचकं घन सु इति सुबन्तं समानाधिकरणेन श्याम सु इत्यनेन सामान्यवचनेन सह विकल्पेन प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः समासविधायकशास्त्रे उपमानानि इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य घन सु इत्यस्य उपसर्जनसंज्ञायां पूर्वनिपाते, समुदायस्य समासत्वात् सुब्लुकि निष्पन्नात् घनश्यामशब्दात् सौ प्रक्रियाकार्ये घनश्यामः इति रूपं निष्पन्नम्।

घनशब्दस्य जलधरवाचकत्वात् श्यामशब्दस्य च रामार्थवाचकत्वात् नास्ति सामानाधिकरण्यम् इति शङ्का। समाधानं तावद् घनपदं घनसदृशे रामे वर्तते, श्यामशब्दोऽपि श्यामगुणविशिष्टे रामे वर्तते इत्यस्ति सामानाधिकरण्यम्।

पाठगतप्रश्नाः-६

२९. "पापाणके कुत्सितैः" इति सूत्रस्यार्थः कः।

३०. "पापाणके कुत्सितैः" इति सूत्रस्योदाहरणं देयम्।

३१. "विशेषणं विशेष्येण बहुलम्" इत्यनेन एव सिद्धे "पापाणके कुत्सितैः" इति सूत्रं किमर्थम्।

३२. "उपमानानि सामान्यवचनैः" इति सूत्रस्यार्थः कः।

३३. "उपमानानि सामान्यवचनैः" इति सूत्रस्योदाहरणं देयम्।

३४. "विशेषणं विशेष्येण बहुलम्" इत्यनेन एव सिद्धे "उपमानानि सामान्यवचनैः" इति सूत्रं किमर्थम्।

[३.१५] उपमितं व्याघ्रादिभिः सामान्याप्रयोगे॥ (२.१.५५)

सूत्रार्थः - उपमेयं सुबन्तं उपमानैः व्याघ्रादिभिः समानाधिकरणैः सुबन्तैः सह विकल्पेन समस्यते साधारणधर्मस्याप्रयोगे सति, तत्पुरुषसंज्ञकश्च भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदत्रयम् अस्ति। अत्र उपमितमिति प्रथमैकवचनान्तं, व्याघ्रादिभिः इति तृतीयाबहुवचनान्तं, सामान्याप्रयोगे इति सप्तम्येकवचनान्तं पदम्। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तच्च विभक्तिविपरिणामेन व्याघ्रादिभिः इत्यस्य विशेषणत्वात् समानाधिकरणैः इति भवति। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ उपमितम् इत्यनेनान्वयात् सुबन्तम् इति लभ्यते। सुपा इत्यस्य तदन्तविधौ व्याघ्रादिभिः इत्यनेनान्वयात् सुबन्तैः इति लभ्यते। उपमितं नाम उपमेयम्। भूतकालः अत्र न विवक्षितः। तच्च सम्बन्धिशब्दत्वाद् उपमानमाक्षिपति। आक्षिप्तस्य उपमानस्य समानाधिकरणेन इत्यस्य च व्याघ्रादिभिः सहान्वयः भवति। एवम् समानाधिकरणैः उपमानैः व्याघ्रादिभिः सुबन्तैः इत्यर्थः। समानस्य भावः सामान्यं, साधारणो धर्मः इत्यर्थः। सामान्यस्य अप्रयोगः सामान्याप्रयोगः, तस्मिन् सामान्याप्रयोगे इति षष्ठीतत्पुरुषः। अतः सूत्रस्यास्यार्थः - "उपमेयं सुबन्तं उपमानैः व्याघ्रादिभिः समानाधिकरणैः सुबन्तैः सह विकल्पेन समस्यते साधारणधर्मस्याप्रयोगे सति, तत्पुरुषसंज्ञकश्च भवति" इति।

अत्र उपमानोपमेययोः उपमानस्यैव पूर्वनिपाते प्राप्ते उपमितस्य पूर्वनिपातविधानार्थम् इदम्।

उदाहरणम् - पुरुषव्याघ्रः इत्यादिकमस्य सूत्रस्योदाहरणम्। पुरुषो व्याघ्र इव इति लौकिकविग्रहे पुरुष सु व्याघ्र सु इत्यलौकिकविग्रहे उपमेयवाचकं पुरुष सु इति सुबन्तं समानाधिकरणेन व्याघ्र सु इत्युपमानवाचकेन सुबन्तेन सह विकल्पेन प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः पुरुष सु इत्युपमेयस्य उपसर्जनत्वात् पूर्वनिपाते सुब्लुकि निष्पन्नात् पुरुषव्याघ्रशब्दात् सौ प्रक्रियाकार्ये पुरुषव्याघ्रः इति रूपं सिद्धम्। अत्र सादृश्यबोधकशौर्यात्मकसाधारणधर्मस्याप्रयोगात् प्रस्तुतसूत्रेण समासः।

सामान्याप्रयोगे इति वचनात् पुरुषो व्याघ्र इव शूर इति विग्रहे उपमानोपमेयसाधारणधर्मस्य शौर्यस्य प्रयोगात् प्रस्तुतसूत्रेण न समासः। व्याघ्रादेराकृतिगणत्वात् मुखपद्मम्, मुखकमलम्, करकिसलयम् इत्यादीन्यपि सिध्यन्ति।

(३.१५.१) शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् (वार्तिकम्)

वार्तिकार्थः - शाकपार्थिवादीनां शब्दानां सिद्धये पूर्वपदे स्थितस्य उत्तरपदलोपस्य उपसंख्यानं कर्तव्यम्।

वार्तिकव्याख्या - "वर्णो वर्णेन" इति सूत्रस्थे महाभाष्ये "समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च" इति। तस्यैव वार्तिकस्य सज्जीकरणेन पूर्वोक्तं वार्तिकरूपम् आगतम्। शाकपार्थिवादीनां सिद्धौ वारद्वयं समासः भवति। आदौ पदद्वयस्य समासेन एकं पदं निर्मीयते, ततः समस्तस्य पदस्य अन्येन समानाधिकरणेन पदेन सह कर्मधारयसमासो भवति। तत्र कर्मधारयसमासे पूर्वपदस्य उत्तरपदस्य अनेन वार्तिकेन लोपो भवति।

उदाहरणम् - वार्तिकस्यास्योदाहरणं भवति शाकपार्थिवः इति। शाकः प्रियः यस्येति विग्रहे "अनेकमन्यपदार्थे" इत्यनेन समासे शाकप्रियः इति रूपम्। शाकप्रियः पार्थिवः इति लौकिकविग्रहे शाकप्रिय सु पार्थिव सु इत्यलौकिकविग्रहे विशेषणं विशेष्येण बहुलम् इत्यनेन सूत्रेण समासे प्रक्रियाकार्ये शाकप्रियपार्थिवशब्दो निष्पन्नः। तदा अनेन वार्तिकेन पूर्वपदस्य शाकप्रियेत्यस्य उत्तरपदस्य प्रियशब्दस्य लोपे प्रक्रियाकार्ये शाकपार्थिवः इति रूपं निष्पद्यते। एतस्यान्यदुाहरणं भवति देवब्राह्मणः। देवानां पूजकः देवपूजकः, देवपूजकः ब्राह्मणः देवब्राह्मणः।

पाठगतप्रश्नाः-७

३५. "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति सूत्रस्यार्थः कः।

३६. "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति सूत्रस्योदाहरणं देयम्।

३७. "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति सूत्रस्य किं प्रयोजनम्।

३८. "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति सूत्रे सामान्याप्रयोगे इति पदं किमर्थम्।

३९. "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्" इति वार्तिकस्यार्थः कः।

४०. "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्" इति वार्तिकस्योदाहरणं देयम्।

[३.१६] सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः॥ (२.१.६१)

सूत्रार्थः - सन्महत्परमोत्तमोत्कृष्टाः समानाधिकरणैः पूज्यमानैः सुबन्तैः सह समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र सन्महत्परमोत्तमोत्कृष्टाः इति इतरेतरद्वन्द्वसमासनिष्पन्नं प्रथमाबहुवचनान्तं, पूज्यमानैः इति

तृतीयाबहुवचनान्तं पदम्। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तस्य च पूज्यमानैः इत्यनेनान्वयाद् विभक्तिविपरिणामेन समानाधिकरणैः इति भवति। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ सन्महत्परमोत्तमोत्कृष्टाः इत्यनेनान्वयात् सुबन्ताः इति लभ्यते। सुपा इत्यस्य तदन्तविधौ पूज्यमानैः इत्यनेनान्वयात् सुबन्तैः इति लभ्यते। अतः सूत्रस्यास्यार्थस्तावत् - "सन्महत्परमोत्तमोत्कृष्टाः सुबन्ताः पूज्यमानैः समानाधिकरणैः सुबन्तैः सह वा समस्यन्ते, तत्पुरुषसंज्ञकश्च भवति" इति।

"विशेषणं विशेष्येण बहुलम्" इत्यनेन एव समासे सिद्धे सन्महत्परमोत्तमोत्कृष्टानां शब्दानां पूर्वनिपातनियमाय इदं सूत्रम्।

उदाहरणम् - सद्वैद्यः इत्यादिकमस्य सूत्रस्योदाहरणम्। सन् वैद्यः इति लौकिकविग्रहे सत् सु वैद्य सु इत्यलौकिकविग्रहे सत् सु इत्यस्य समानाधिकरणेन वैद्य सु इत्यनेन पूज्यमानवाचकेन सुबन्तेन सह विकल्पेन प्रकृतसूत्रेण समासे प्रक्रियाकार्ये सद्वैद्यः इति रूपं सिद्धम्। एवमेव महावैयाकरणः इत्यादिकमस्योदाहरणम्।

[३.१७] वृन्दारकनागकुञ्जरैः पूज्यमानम्॥ (२.१.६२)

सूत्रार्थः - पूज्यमानं सुबन्तं वृन्दारकनागकुञ्जरैः समानाधिकरणैः सुबन्तैः सह वा समस्यते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र वृन्दारकनागकुञ्जरैः इति इतरेतरद्वन्द्वसमासनिष्पन्नं तृतीयाबहुवचनान्तं, पूज्यमानम् इति प्रथमैकवचनान्तं पदम्। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तस्य च वृन्दारकनागकुञ्जरैः इत्यनेनान्वयाद् विभक्तिविपरिणामेन समानाधिकरणैः इति भवति। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। सुप् इत्यस्य तदन्तविधौ पूज्यमानम् इत्यनेनान्वयात् सुबन्तम् इति लभ्यते। सुपा इत्यस्य तदन्तविधौ वृन्दारकनागकुञ्जरैः इत्यनेनान्वयात् सुबन्तैः इति लभ्यते। अतः सूत्रस्यास्यार्थस्तावत् - "पूज्यमानं सुबन्तं वृन्दारकनागकुञ्जरैः समानाधिकरणैः सुबन्तैः सह वा समस्यते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - गोवृन्दारक इत्यादिकमस्य सूत्रस्योदाहरणम्। गौः वृन्दारक इव इति लौकिकविग्रहे गो सु वृन्दारक सु इत्यलौकिकविग्रहे गो सु इति पूज्यमानं सुबन्तं समानाधिकरणेन वृन्दारक सु इत्यनेन सुबन्तेन सह विकल्पेन प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः प्रक्रियाकार्ये निष्पन्नात् गोवृन्दारकशब्दात् सौ गोवृन्दारकः इति रूपं सिद्धम्। एवमेव गोनागः इत्यादिकमस्योदाहरणम्।

[३.१८] किं क्षेपे॥ (२.१.६४)

सूत्रार्थः - निन्दायां गम्यमानायां किमित्यव्ययं समानाधिकरणेन सुबन्तेन सह समस्यते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र किम् इति अव्ययम्, क्षेपे इति च सप्तम्येकवचनान्तं पदम्। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तस्य च सुपा इत्यत्र तदन्तविधौ सुबन्तेनेत्यनेनान्वयो भवति। क्षेपो नाम निन्दा। अतः सूत्रस्यास्यार्थस्तावत् - "निन्दायां गम्यमानायां किमित्यव्ययं समानाधिकरणेन सुबन्तेन सह समस्यते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - अत्रोदाहरणं तावत् किंराजा इति। कुत्सितो राजा इति लौकिकविग्रहे किम् राजन् सु इत्यलौकिकविग्रहे किम् इत्यव्ययं निन्दार्थकं समानाधिकरणेन राजन् सु इत्यनेन सुबन्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः प्रक्रियाकार्ये निष्पन्नात् किंराजन् इत्यस्मात् सौ किंराजा इति रूपम्।

पाठगतप्रश्नाः-८

४१. "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" इति सूत्रस्यार्थः कः।

४२. "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" इति सूत्रस्योदाहरणं देयम्।

४३. "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" इति सूत्रस्य किं प्रयोजनम्।

४४. "वृन्दारकनागकुञ्जरैः पूज्यमानम्" इति सूत्रस्यार्थः कः।

४५. "वृन्दारकनागकुञ्जरैः पूज्यमानम्" इति सूत्रस्योदाहरणं देयम्।

४६. "किं क्षेपे" इति सूत्रस्यार्थः कः।

४७. "किं क्षेपे" इति सूत्रस्योदाहरणं देयम्।

[३.१९] प्रशंसावचनैश्च॥ (२.१.६६)

सूत्रार्थः - रूढ्या प्रशंसावाचकैः समानाधिकरणैः सुबन्तैः जातिवाचकं सुबन्तं समस्यते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। अत्र प्रशंसावचनैः इति तृतीयाबहुवचनान्तं पदम्, चेत्यव्ययपदम्। प्रशंसां वचन्ति इति प्रशंसावचनाः, तैः प्रशंसावचनैः। रूढ्या प्रशंसावाचकैः इत्यर्थः। "प्राक्कडारात्समासः", "सह सुपा",

"तत्पुरुषः" इति सूत्रत्रयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। अत्र "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति सूत्रात् समानाधिकरणेन इति पदम् अनुवर्तते। तस्य च प्रशंसावचनैः इत्यनेनान्वयात् विभक्तिविपरिणामेन समानाधिकरणैः इति भवति। सुपा इत्यत्र तदन्तविधौ प्रशंसावचनैः इत्यनेनान्वयात् सुबन्तैः इति भवति। "पोटायुवतिस्तोककतिपयगृष्टिधेनु-वशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः" इत्यस्मात् सूत्रात् जातिः इत्यनुवर्तते। जातिर्नाम जातिवाचकम्। तस्य विशेषणत्वात् सुप् इत्यस्य तदन्तविधौ सुबन्तमिति भवति। अतः सूत्रस्यास्यार्थस्तावत् - "रूढ्या प्रशंसावाचकैः समानाधिकरणैः सुबन्तैः जातिवाचकं सुबन्तं समस्यते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - अत्रोदाहरणं तावत् गोतल्लजः इति। तल्लजश्चासौ गौश्च इति लौकिकविग्रहे तल्लज सु गो सु इत्यलौकिकविग्रहे प्रंशसावाचकेन तल्लज सु इति सुबन्तेन सह जातिवाचकं गो सु इति सुबन्तं प्रस्तुतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः प्रक्रियाकार्ये निष्पन्नात् गोतल्लजशब्दात् सौ गोतल्लजः इति रूपं निष्पन्नम्। एवमेव गोमतल्लिका, गोमचर्चिका इत्यादिकमेतस्य सूत्रस्योदाहरणम्।

[३.२०] नञ्॥ (२.२.६)

सूत्रार्थः - नञ् सुबन्तेन सह समस्यते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण नञ्तत्पुरुषसमासो विधीयते। सूत्रेऽस्मिन् पदमेकम् अस्ति। अत्र नञ् प्रथमैकवचनान्तं पदम्। किञ्च, "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः", "विभाषा" इति सूत्रचतुष्टयमधिकृतम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति पदमनुवर्तते। अत्र "प्रत्ययग्रहणे तदन्तग्रहणम्" इति परिभाषया सुपा इत्यस्य तदन्तविधौ सुबन्तेनेति भवति। अत्र नञ् इत्यनेन प्रसिद्धस्याव्ययस्यैव ग्रहणं न तु "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" इति सूत्रेण विहितस्य नञ्प्रत्ययस्य। एवं सूत्रार्थः भवति - "नञ् सुबन्तेन सह समस्यते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - अब्राह्मणः इत्यादिकमस्य सूत्रस्योदाहरणम्। न ब्राह्मणः इति लौकिकविग्रहे न ब्राह्मण सु इत्यलौकिकविग्रहे न इत्यव्ययम् ब्राह्मण सु इत्यनेन सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसंज्ञं भवति। ततः सूत्रे नञ् इत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य नेत्यस्य "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन उपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्यनेन पूर्वनिपाते न ब्राह्मण सु इति भवति। ततः समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुब्लुकि न ब्राह्मण इति भवति। तदा नञः नलोपविधायकं सूत्रं प्रवर्तते -

[३.२१] न लोपो नञः॥ (६.३.७३)

सूत्रार्थः - नञो नकारस्य लोपः भवति उत्तरपदे परे ।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण नञः नलोपो विधीयते। सूत्रेऽस्मिन् पदत्रयम् अस्ति। अत्र न इति लुप्तषष्ठ्येकवचनान्तं पदम्। नकारस्येत्यर्थः। लोपः इति प्रथमैकवचनान्तं नञः इति

च षष्ठ्यन्तं पदम्। "अलुगुत्तरपदे" इत्यस्मात् सूत्राद् उत्तरदपदे इत्यनुवर्तते। एवं च सूत्रार्थः भवति - "नञः नकारस्य लोपो भवति उत्तरपदे परे" इति।

उदाहरणम् - अब्राह्मणः इत्यादिकमस्य सूत्रस्योदाहरणम्। न ब्राह्मणः इति लौकिकविग्रहे न ब्राह्मण सु इत्यलौकिकविग्रहे नञ्तत्पुरुषसमासे न ब्राह्मण इति स्थिते प्रस्तुतसूत्रेण उत्तरपदे ब्राह्मणशब्दे परे नञः नकारस्य लोपो भवति। ततः अ ब्राह्मण इति जाते सर्वसंयोगे निष्पन्नात् अब्राह्मणशब्दात् सौ प्रक्रियाकार्ये अब्राह्मणः इति रूपम्।

न अश्व इति विग्रहे "नञ्" इत्यनेन समासे नकारलोपे अ अश्व इति स्थिते अजादौ उत्तरपदे परे नञ्समासे नुडागमविधायकं सूत्रं प्रवृत्तम् -

[३.२२] तस्मान्नुडचि॥ (६.३.७४)

सूत्रार्थः - लुप्तनकारात् नञः उत्तरपदस्य अजादेः नुडागमो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण नुडागमो विधीयते। सूत्रेऽस्मिन् पदत्रयम् अस्ति। अत्र तस्मात् नुट् अचि इति पदच्छेदः। तस्मात् इति पञ्चम्येकवचनान्तं, नुट् इति प्रथमैकवचनान्तम् अचि इति सप्तम्येकवचनान्तं च पदम्। "न लोपो नञः" इत्यस्मात् सूत्रात् नञः इत्यनुवर्तते तच्च पञ्चम्यन्ततया विपरिणमते। अलुगुत्तरपदे इत्यस्मात् सूत्राद् उत्तरपदे इत्यनुवर्तते। "यस्मिन्विधिस्तदादावल्ग्रहणे" इत्यनया परिभाषया अचि इत्यस्य तदादिविधौ उत्तरपदे इत्यनेनान्वये सति अजादौ उत्तरपदे इत्यर्थ आयाति। तस्मादित्यनेन नञः अन्वयात् लुप्तनकारात् नञः इति तात्पर्यम्। उभयनिर्देशे पञ्चमीनिर्देशस्य बलीयस्त्वात् अजादौ उत्तरपदे इत्यस्य षष्ठ्यन्तत्वेन विपरिणामो भवति। एवं सूत्रार्थो भवति - "लुप्तनकारात् नञः उत्तरपदस्य अजादेः नुडागमो भवति" इति।

उदाहरणम् - अनश्वः इत्यादिकमस्य सूत्रस्योदाहरणम्। न अश्वः इति लौकिकविग्रहे न अश्व सु इत्यलौकिकविग्रहे "नञ्" इत्यनेन सूत्रेण नञ्समासे प्रक्रियाकार्ये न अश्व इति स्थिते नञः नकारस्य लोपे अ अश्व इति भवति। ततः अजादेः उत्तरपदस्य अश्व इत्यस्य लुप्तनकारात् नञः नुटि अ नुट् अश्व इति जाते, उकारस्य "उपदेशेऽजनुनासिक इत्" इत्यनेन टकारस्य "चुटू" इत्यनेन च इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे अ न् अश्व इति जाते सर्वसंयोगे निष्पन्नात् अनश्वशब्दात् सौ प्रक्रियाकार्ये अनश्वः इति रूपम्।

पाठगतप्रश्नाः-९

४८. "प्रशंसावचनैश्च" इति सूत्रस्यार्थः कः।

४९. "प्रशंसावचनैश्च" इति सूत्रस्योदाहरणं देयम्।

५०. "नञ्" इति सूत्रस्यार्थः कः।

५१. अब्राह्मणः इत्यत्र नञः नकारस्य लोपः केन सूत्रेण।

५२. अनश्वः इत्यत्र नुडागमविधायकं सूत्रं किम्।

पाठसारः

अस्मिन् पाठे "दिक्संख्ये संज्ञायाम्" "तद्धितार्थोत्तरपदसमाहारे च" इति तत्पुरुषसमासविधायकं सूत्रद्वयं व्याख्यातम्। तत्र संख्यापूर्वस्य तत्पुरुषस्य द्विगुसंज्ञाविधायकं "संख्यापूर्वो द्विगुः" इति सूत्रं, द्विगुसंज्ञायां सत्याम् एकवद्भावविधायकस्य "द्विगुरेकवचनम्" इति सूत्रं, "स नपुंसकम्" इति द्विगोः नपुंसकत्वविधायकं च सूत्रं व्याख्यातम्। अत्र प्रसङ्गाद् "दिक्पूर्वपदादसंज्ञायां ञः" इति तद्धितञप्रत्ययविधायकं "तद्धितेष्वचामादेः" इत्यादेरचो वृद्धिविधायकं सूत्रं प्रस्तुतम्। पञ्चगवधनः इत्यादौ टच्प्रत्ययविधायकं "गोरतद्धितलुकि" इति सूत्रं व्याख्यातम्।

ततः समानाधिकरणतत्पुरुषविधायकानि "विशेषणं विशेष्येण बहुलम्", "कुत्सितानि कुत्सनैः", "पापाणके कुत्सितैः", "उपमानानि सामान्यवचनैः", "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे", "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः", "वृन्दारकनागकुञ्जरैः पूज्यमानम्", "किं क्षेपे", "प्रशंसावचनैश्च" इत्येतानि सूत्राणि व्याख्यातानि। एतदवसरे "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्" इत्युत्तरलोपसविधायकं वार्तिकमपि प्रस्तुतम्। समानाधिकरणस्य तत्पुरुषस्य "तत्पुरुषः समानाधिकरणः कर्मधारयः" इत्यनेन कर्मधारयसंज्ञा प्रस्तुता। कर्मधारयसंज्ञायां सत्यां पुंवद्भावविधायकं "पुंवत्कर्मधारयजातीयदेशीयेषु" इति सूत्रं प्रस्तुतम्। ततः नञ्समासविधायकं "नञ्" इति सूत्रं व्याख्यातम्। ततः नञः नलोपविधायकं "न लोपो नञः" इति सूत्रं व्याख्यातम्। ततः "तस्मान्नुडचि" इति नुडागमविधायकं सूत्रं प्रस्तुतम्।

पाठान्तप्रश्नाः

१. "दिक्संख्ये संज्ञायाम्" इति सूत्रं व्याख्यात।

२. "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रं व्याख्यात।

३. "विशेषणं विशेष्येण बहुलम्" इति सूत्रं व्याख्यात।

४. "उपमानानि सामान्यवचनैः" इति सूत्रं व्याख्यात।

५. "प्रशंसावचनैश्च" इति सूत्रं व्याख्यात।

६. "नञ्" इति सूत्रं व्याख्यात।

७. समानाधिकरणः तत्पुरुषः - इति विषयमाश्रित्य टिप्पणीं लिखत।

८. पञ्चगवम् इति रूपं साधयत।

९. पौर्वशालः इति रूपं साधयत।

१०. पञ्चगवधनः इति रूपं साधयत।

११. घनश्यामः इति रूपं साधयत।

१२. अब्राह्मणः इति रूपं साधयत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. पूर्वेषुकामशमी। नियमसूत्रम्।

२. दिशावाचकं संख्यावाचकं च सुबन्तं समानाधिकरणेन सुबन्तेन सह संज्ञायां गम्यमानायामेव तत्पुरुषसमाससंज्ञं भवति।

३. पूर्वेषुकामशमी।

४. सप्तर्षयः।

उत्तराणि-२

५. विधिसूत्रम्।

६. तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिशावाचकं संख्यावाचकं च सुबन्तं समानाधिकरणेन सुबन्तेन सह विकल्पेन तत्पुरुषसमाससंज्ञं भवति।

७. पौर्वशालः।

८. पञ्चगवधनः।

९. पञ्चगवम्।

उत्तराणि-३

१०. दिशावाचकं पूर्वपदं यस्य तस्मात् प्रातिपदिकाद् शैषिके भवाद्यर्थे असंज्ञायां गम्यमानायां तद्धितः ञप्रत्ययो भवति।

११. पूर्वशब्दस्य दिग्वाचकत्वात् पूर्वशाला इत्यस्य दिक्पूर्वपदत्वात् ततः भवार्थे प्रकृतसूत्रेण ञप्रत्ययो भवति।

१२. ञिति णिति च तद्धिते परे अचाम् आदेः अचो वृद्धिः भवति।

१३. ञिति तद्धिते परे सति अचाम् आदेः अचः तद्धितेष्वचमादेः इति सूत्रेण वृद्धिः।

१४. गोशब्दान्तात् तत्पुरुषात् समासान्तः टच्प्रत्ययो भवति न तद्धितलुकि।

१५. पञ्चगो इति गोशब्दान्तः तत्पुरुषः अतः तस्मात् गोरद्धितलुकि इति सूत्रेण टच्-प्रत्ययः।

उत्तराणि-४

१६. समानाधिकरणः तत्पुरुषसमासः कर्मधारयसंज्ञको भवति।

१७. भाषितपुंस्कात्पर ऊङोऽभावो यस्मिन् तथाभूतस्य स्त्रीलिङ्गकस्य पूर्वपदस्य कर्मधारये जातीयदेशीययोश्च परतः पुंवाचकस्येव रूपं भवति।

१८. कृष्णचतुर्दशी इति।

१९. तद्धितार्थोत्तरपदसमाहारे च इत्यस्मिन् सूत्रे उक्तः त्रिविधः संख्यापूर्वः समासो द्विगुसंज्ञो भवति।

२०. दिग्वर्थः समाहारः एकवद् भवति।

२१. समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं भवति।

२२. पञ्चगवम् इति।

उत्तराणि-५

२३. भेदकं भेद्येन समानाधिकरणेन सह बहुलं समस्यते, स च तत्पुरुषसंज्ञको भवति।

२४. कृष्णसर्पः इत्यादौ नित्यसमासः, रामो जामदग्न्यः इत्यत्र च समासाभावः।

२५. जातिगुणक्रियावाचिनां शब्दानां समभिव्याहारे जातिवाचक एव विशेष्यम्, अन्यद् विशेषणं स्वभावात् इति नियमेन नीलशब्दस्य विशेष्यत्वं नास्ति।

२६. शिंशपावृक्षः इति।

२७. कुत्स्यमानानि सुबन्तानि कुत्सनैः समानाधिकरणैः सुबन्तैः सह समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

२८. वैयाकरणखसूचिः इति।

उत्तराणि-६

२९. पापशब्दः अणकशब्दश्च कुत्स्यमानैः समानाधिकरणैः सुबन्तैः सह समस्यते, स च तत्पुरुषसंज्ञको भवति।

३०. पापनापितः।

३१. पूर्वसूत्रस्यापवादभूतमिदं सूत्रम्।

३२. उपमानवाचकानि सुबन्तानि सामान्यवचनैः समानाधिकरणैः सुबन्तैः सह समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

३३. घनश्यामः।

३४. उपमानवाचकपदस्यैव पूर्वनिपातः यथा स्यात् तदर्थमिदं सूत्रम्।

उत्तराणि-७

३५. उपमेयं सुबन्तं उपमानैः व्याघ्रादिभिः समानाधिकरणैः सुबन्तैः सह विकल्पेन समस्यते साधारणधर्मस्याप्रयोगे सति, तत्पुरुषसंज्ञकश्च भवति।

३६. पुरुषव्याघ्र इति।

३७. उपमानोपमेययोः उपमानस्यैव पूर्वनिपाते प्राप्ते उपमितस्य पूर्वनिपातविधानार्थम् इदम्।

३८. सामान्याप्रयोगे इति वचनात् पुरुषो व्याघ्र इव शूर इति विग्रहे उपमानोपमेयसाधारणधर्मस्य शौर्यस्य प्रयोगात् प्रस्तुतसूत्रेण न समासः।

३९. शाकपार्थिवादीनां शब्दानां सिद्धये पूर्वपदे स्थितस्य उत्तरपदलोपस्य उपसंख्यानं कर्तव्यम्।

४०. शाकपार्थिवः इति।

उत्तराणि-८

४१. सन्महत्परमोत्तमोत्कृष्टाः समानाधिकरणैः पूज्यमानैः सुबन्तैः सह समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

४२. सद्वैद्यः इति।

४३. "विशेषणं विशेष्येण बहुलम्" इत्यनेन एव समासे सिद्धे सन्महत्परमोत्तमोत्कृष्टानां शब्दानां पूर्वनिपातनियमाय इदं सूत्रम्।

४४. पूज्यमानं सुबन्तं वृन्दारकनागकुञ्जरैः समानाधिकरणैः सुबन्तैः सह वा समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

४५. गोवृन्दारकः इति उदाहरणम्।

४६. निन्दायां गम्यमानायां किमित्यव्ययं समानाधिकरणेन सुबन्तेन सह समस्यते, स च तत्पुरुषसंज्ञको भवति।

४७. किंराजा इति।

उत्तराणि-९

४८. रूढ्या प्रशंसावाचकैः समानाधिकरणैः सुबन्तैः जातिवाचकं सुबन्तं समस्यते, स च तत्पुरुषसंज्ञको भवति।

४९. गोतल्लजः इति।

५०. नञ् सुबन्तेन सह समस्यते, स च तत्पुरुषसंज्ञको भवति।

५१. नलोपो नञः इति सूत्रेण।

५२. तस्मान्नुडचि इति।

॥ इति तृतीयः पाठः ॥

346sk04

४

तत्पुरुषसमासः - कुगतिप्रादिसमासः, उपपदसमासः च

प्रस्तावना

अस्मिन् पाठे कुसमासस्य गतिसमासस्य प्रादिसमासस्य उपपदसमासस्य च वर्णनं क्रियते। अत्र आद्यस्य समासत्रयस्य वर्णनाय "कुगतिप्रादयः" इति सूत्रं व्याख्यातम्। प्रादिसमासविधायकानां वार्तिकानां च व्याख्यानं कृतम्। तत उपपदसमासः "उपपदमतिङ्" इत्यनेन सूत्रेण विधीयते। ततः समासान्तकार्याणां विधायकानि सूत्राणि वर्णितानि। तत्र प्रसङ्गतः तत्पुरुषसमासनिष्पन्नानां शब्दानां लिङ्गनिर्णायकानि सूत्राणि समासे विशिष्टादेशविधायकानि च सूत्राणि वर्णितानि।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- कुगतिप्रादिसमासानां विधायकं सूत्रं वार्तिकानि च जानीयात्।
- उपपदसमाससम्बन्धानि सूत्राणि जानीयात्।
- तत्पुरुषसमासान्तप्रत्ययानां विधायकानि सूत्राणि जानीयात्।
- लिङ्गनिर्णायकानि सूत्राणि जानीयात्।
- विशिष्टादेशविधायकानि सूत्राणि जानीयात्।
- ससूत्रं समासं ज्ञात्वा तादृशानाम् अन्येषां समस्तपदानां निर्माणे समर्थो भविष्यति।

[४.१] कुगतिप्रादयः॥ (२.२.१८)

सूत्रार्थः - समर्थाः कुगतिप्रादयः समर्थेन सुबन्तेन सह नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण कुगतिप्रादिसमासाः विधीयन्ते। सूत्रेऽस्मिन् एकं पदम् अस्ति। कुगतिप्रादयः इति प्रथमाबहुवचनान्तं पदम्। कुश्च गतिश्च प्रादिश्च कुगतिप्रादयः इति इतरेतरद्वन्द्वसमासः। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सूत्रात् सुप् इति "नित्यं क्रीडाजीविकयोः"

इत्यस्मात् सूत्रात् नित्यमिति चानुवर्तते। "समर्थः पदविधिः" इत्यस्मात् सूत्रात् समर्थः इति पदमधिक्रियते। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि अत्र अधिकृतानि। यद्यपि कु इति पृथिवीवाची स्त्रीलिङ्गशब्दः वर्तते तथापि गतिप्रादिसाहचर्यात् कुत्सितार्थे विद्यमानं कु इत्यव्ययमेव अत्र गृह्यते। अधिकारानुवृत्तिलब्धपदानि संयोज्य - "समर्थाः कुगतिप्रादयः समर्थेन सुबन्तेन सह नित्यं समस्यन्ते, स च तत्पुरुषसमासः भवति" इत्यर्थो लभ्यते।

उदाहरणम् - कुसमासस्योदाहरणं भवति कुपुरुषः इति। कुत्सितः पुरुषः इति लौकिकविग्रहे कु पुरुष सु इत्यलौकिकविग्रहे कु इति पुरुष सु इति सुबन्तेन सह प्रकृतसूत्रेण तत्पुरुषसंज्ञं भवति। ततः कु इत्यस्य समासशास्त्रे प्रथमानिर्दिष्टस्योपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्यनेन पूर्वनिपाते कु पुरुष सु इति भवति। समुदायस्य समाससंज्ञकस्य प्रातिपदिकत्वात् ततः "सुपो धातुप्रातिपदिकयोः" इत्यनेन प्रातिपदिकावयवस्य सुपः सोः लुकि निष्पन्नात् कुपुरुष इत्यस्मात् प्रातिपदिकात् सौ प्रक्रियाकार्ये कुपुरुषः इति रूपम्।

गतिसमासस्य ऊरीकृत्य शुक्लीकृत्य पटपटाकृत्य इत्यादीनि अत्रोदाहरणानि। "प्रादयः" इति सूत्रेण प्रादीनां द्वाविंशतेः निपातसंज्ञा विधीयते। प्रादिसमासे शोभनः पुरुषः सुपुरुषः इत्यादिकमुदाहणम्। नित्यसमासत्वात् अस्वपदविग्रहः सर्वत्र प्रदर्श्यते।

[४.२] ऊर्यादिच्विडाचश्च॥ (१.४.६१)

सूत्रार्थः - ऊर्यादयः च्व्यन्ताः डाजन्ताश्च क्रियायोगे गतिसंज्ञाः भवन्ति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण गतिसंज्ञा विधीयते। ऊरीकृत्य इत्यादौ गतिसंज्ञाविधानाय इदं सूत्रं प्रवृत्तम्। सूत्रेऽस्मिन् पदद्वयम् अस्ति। ऊर्यादिच्विडाचः इति प्रथमाबहुवचनान्तं पदम्। चेत्यव्ययपदम्। ऊरी आदिर्येषां ते ऊर्यादयः इति तद्गुणसंविज्ञानबहुव्रीहिः। ऊर्यादयश्च च्विश्च डाच् च ऊर्यादिच्विडाचः इति इतरेतरद्वन्द्वसमासः। "उपसर्गाः क्रियायोगे" इत्यस्मात् सूत्रात् क्रियायोगे इत्यनुवर्तते। "गतिश्च" इत्यस्मादनुवृत्तस्य गतिः इति पदस्य वचनविपरिणामेन गतयः इति भवन्ति। "प्रत्ययग्रहणे तदन्तग्रहणम्" इत्यनेन च्विप्रत्ययेन च्विप्रत्ययान्तानां डाच्प्रत्ययेन च डाजन्तानां बोधो भवति। एवं सूत्रार्थो भवति "ऊर्यादयः च्विप्रत्ययान्ताः डाच्प्रत्ययान्ताश्च क्रियायोगे गतिसंज्ञकाः भवन्ति" इति।

"प्रागीश्वरान्निपाताः" इत्यनेन सूत्रेण ऊर्यादीनां च्विप्रत्ययान्तां डाच्प्रत्ययान्तानां च निपातसंज्ञायां "स्वरादिनिपातमव्ययम्" इत्यनेन सूत्रेण तेषामव्ययसंज्ञा भवति। च्विडाच्प्रत्ययोः कृभ्वस्तियोगे एव विधानात् तत्साहचर्याद् ऊर्यादीनामपि कृभ्वस्तिभ्य एव विधानम्।

उदाहरणम् - ऊर्यादीनामुदाहरणं भवति ऊरीकृत्य इति। ऊरी इत्यस्य कृत्वा इत्यनेन योगे प्रकृतसूत्रेण गतिसंज्ञायां "कुगतिप्रादयः" इत्यनेन गतिसमासे प्रक्रियाकार्ये ऊरी कृत्वा इति भवति। ऊरीकृत्वा इत्यस्याव्ययत्वात् ततः सोर्लुकि "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इत्यनेन सूत्रेण क्त्वाप्रत्ययस्य

ल्यपि तुकि प्रक्रियाकार्ये ऊरीकृत्य इति रूपम्। च्विप्रत्ययान्तस्य गतिसंज्ञायां शुक्लीकृत्य डाच्प्रत्ययान्तस्य च गतिसंज्ञायां पटपटाकृत्य इत्युदाहरणम्।

पाठगतप्रश्नाः-१

१. "कुगतिप्रादयः" इति सूत्रस्यार्थः कः।

२. कुतत्पुरुषसमासस्य एकमुदाहरणं देयम्।

३. गतितत्पुरुषसमासस्य एकमुदाहरणं देयम्।

४. प्रादितत्पुरुषसमासस्य एकमुदाहरणं देयम्।

५. "ऊर्यादिच्विडाचश्च" इति सूत्रस्यार्थः कः।

६. "ऊर्यादिच्विडाचश्च" इति सूत्रस्य एकमुदाहरणं देयम्।

प्रादिसमासविधायकानि वार्तिकान्यधः प्रस्तूयन्ते -

(४.२.१) प्रादयो गताद्यर्थे प्रथमया (वार्तिकम्)

वार्तिकार्थः - गताद्यर्थे वर्तमानाः प्रादयः प्रथमान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

वार्तिकव्याख्या - इदं वार्तिकं "कुगतिप्रादयः" इति सूत्रे महाभाष्ये पठितम्। सूत्रस्यास्य नित्यसमासविधानादिदं वार्तिकमपि नित्यसमासं बोधयति। वार्तिके प्रादयः इति प्रथमाबहुवचनान्तं, गताद्यर्थे इति सप्तम्येकवचनान्तं प्रथमया इति च तृतीयान्तं पदम्। "समर्थः पदविधिः" इत्यस्मात् सूत्रात् समर्थः इति पदम् अधिक्रियते। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि सूत्राणि अधिकृतानि। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतः सुप् इति पदमनुवर्तते। प्रथमया इत्यस्य सुपा इत्यस्य च तदन्तविधौ समर्थपदेन सहान्वयेन प्रथमान्तेन समर्थेन सुबन्तेन इत्यागच्छति। गताद्यर्थे प्रादीनां शिष्टसम्मताः प्रयोगाः सन्ति। एवं वार्तिकार्थः समायाति - "गताद्यर्थे वर्तमानाः प्रादयः प्रथमान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति"।

उदाहरणम् - एतस्य वार्तिकस्य प्राचार्यः इत्युदाहरणम्। प्रगत आचार्यः इति लौकिकविग्रहे प्र आचार्य सु इत्यलौकिकविग्रहे प्रोक्तवार्तिकन गताद्यर्थे विद्यमानः प्र इति निपातः आचार्य सु इत्यनेन प्रथमान्तेन सुबन्तेन सह प्रादितत्पुरुषसंज्ञो भवति। ततः प्रक्रियाकार्ये प्राचार्यः इति रूपम्। एवमेव विरुद्धः पक्षः विपक्ष इत्यादिकम् एतस्य वार्तिकस्योदाहरणम्।

(४.२.२) अत्यादयः क्रान्ताद्यर्थे द्वितीयया (वार्तिकम्)

वार्तिकार्थः - क्रान्ताद्यर्थे वर्तमानाः अत्यादयः द्वितीयान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

वार्तिकव्याख्या - इदं वार्तिकं "कुगतिप्रादयः" इति सूत्रे महाभाष्ये पठितम्। सूत्रस्यास्य नित्यसमासविधानादिदं वार्तिकमपि नित्यसमासं बोधयति। वार्तिके अत्यादयः इति प्रथमाबहुवचनान्तं, क्रान्ताद्यर्थे इति सप्तम्येकवचनान्तं द्वितीयया इति च तृतीयान्तं पदम्। "समर्थः पदविधिः" इत्यस्मात् सूत्रात् समर्थः इति पदम् अधिक्रियते। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि सूत्राणि अधिकृतानि। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतः सुप् इति पदमनुवर्तते। द्वितीयया इत्यस्य सुपा इत्यस्य च तदन्तविधौ समर्थपदेन सहान्वयेन द्वितीयान्तेन समर्थेन सुबन्तेन इत्यागच्छति। क्रान्ताद्यर्थे अत्यादीनां शिष्टसम्मताः प्रयोगाः सन्ति। एवं वार्तिकार्थः - "क्रान्ताद्यर्थे वर्तमानाः अत्यादयः द्वितीयान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - एतस्य वार्तिकस्य अतिमालः इत्युदाहरणम्। अतिक्रान्तः मालाम् इति लौकिकविग्रहे अति माला अम् इत्यलौकिकविग्रहे प्रोक्तवार्तिकन क्रान्ताद्यर्थे विद्यमानः अति इति निपातः माला अम् इत्यस्य द्वितीयान्तेन सुबन्तेन सह प्रादितत्पुरुषसंज्ञो भवति। ततः प्रक्रियाकार्ये सुब्लुकि अतिमाला इति स्थिते ह्रस्वविधानाय उपसर्जनसंज्ञाविधायकं सूत्रं प्रवृत्तम् -

[४.३] एकविभक्ति चापूर्वनिपाते॥ (१.२.४४)

सूत्रार्थः - विग्रहे यत् नियतविभक्तिं तस्य उपसर्जनसंज्ञा भवति, किन्तु तस्य पूर्वनिपातो न भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते। सूत्रेऽस्मिन् पदत्रयम् अस्ति। एकविभक्ति च अपूर्वनिपाते इति पदच्छेदः। अत्र एकविभक्ति इति प्रथमैकवचनान्तं पदम्। चेत्यव्ययपदम्। अपूर्वनिपाते इति सप्तम्येकवचनान्तं पदम्। "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यस्मात् सूत्रात् समासे उपसर्जनम् इति पदद्वयम् अनुवर्तते। एका विभक्तिर्यस्य तद् एकविभक्ति इति बहव्रीहिसमासः। नियतविभक्तिकम् इत्यर्थः। पूर्वश्चासौ निपातः पूर्वनिपातः इति कर्मधारयसमासः। न पूर्वनिपातः अपूर्वनिपातः तस्मिन् अपूर्वनिपाते इति नञ्समासः। अत्र नञः पर्युदासप्रतिषेधार्थः। पूर्वनिपातभिन्ने कार्ये कर्तव्ये इत्यर्थः। समासपदेन समासोन्मुखविग्रहवाक्यस्य ग्रहणम्। एवं समासे नाम समासोन्मुखविग्रहवाक्ये इति। पूर्वनिपातभिन्ने कार्ये कर्तव्ये समासे समासोन्मुखविग्रहवाक्ये यत् नियतविभक्तिकं तद् उपसर्जनं भवतीति सूत्रतात्पर्यम्। एवं सूत्रार्थो भवति - "विग्रहे यन्नियतविभक्तिकं तस्य उपसर्जनसंज्ञा भवति, किन्तु तस्य पूर्वनिपातो न भवति" इति।

उदाहरणम् - एतस्य सूत्रस्य अतिमालः इत्युदाहरणम्। अतिक्रान्तः मालाम् इति लौकिकविग्रहे "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इत्यनेन प्रादिसमासे प्रक्रियाकार्ये सुब्लुकि अतिमाला इति स्थिते

प्रस्तुतसूत्रेण विग्रहवाक्ये मालाम् इत्यस्य नियतविभक्तिकत्वात् मालाशब्दस्य उपसर्जनसंज्ञा भवति। अतिमाला इत्यत्र उपसर्जनस्य ह्रस्वविधायकं सूत्रं प्रवृत्तम्-

[४.४] गोस्त्रियोरुपसर्जनस्य॥ (१.२.४८)

सूत्रार्थः - उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण ह्रस्वो विधीयते। सूत्रेऽस्मिन् पदद्वयम् अस्ति। गोस्त्रियोः उपसर्जनस्य इति पदच्छेदः। अत्र गोस्त्रियोः इति षष्ठीद्विवचनान्तं पदम्। उपसर्जनस्य इति षष्ठ्येकवचनान्तं पदम्। "ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यस्मात् सूत्रात् ह्रस्वः प्रातिपदिकस्य इति पदद्वयम् अनुवर्तते। गौश्च स्त्री च गोस्त्रियौ, तयोः गोस्त्रियोः इति इतरेतरद्वन्द्वः। अत्र गोपदेन गोशब्दस्य ग्रहणम्। स्त्रीपदेनात्र "स्त्रियाम्" इत्यधिकारे विहिताः टाप् डाप् चाप् ङीप् ङीष् ङीन् इत्येते प्रत्यया गृह्यन्ते, न तु स्त्रीशब्दः। स्त्रीपदेन तदन्तविधौ स्त्रीप्रत्ययानामेव ग्रहणम्। उपसर्जनस्य इति गोस्त्रियोः इत्यस्य पदस्य विशेषणम्। गोस्त्रियोः इति प्रातिपदिकस्य विशेषणम्। एवं उपसर्जनस्य गोस्त्रियोः प्रातिपदिकस्य इत्यस्य तात्पर्यं भवति उपसर्जनस्य गोप्रातिपदिकस्य उपसर्जनस्य स्त्रीप्रत्ययान्तप्रातिपदिकस्य च इति। उपसर्जनस्य गोप्रातिपदिकस्य स्त्रीप्रत्ययान्तप्रातिपदिकस्य च ह्रस्वः भवति इति सूत्रतात्पर्यम्। एवं सूत्रार्थो भवति - "उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वो भवति" इति। "अलोऽन्त्यस्य" इति "अचश्च" इति च परिभाषाद्वयबलात् प्रातिपदिकस्य अन्त्यस्य अचः स्थाने एव ह्रस्वादेशो भवति।

उदाहरणम् - एतस्य सूत्रस्य अतिमालः इत्युदाहरणम्। अतिक्रान्तः मालाम् इति लौकिकविग्रहे "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इत्यनेन प्रादिसमासे प्रक्रियाकार्ये सुब्लुकि अतिमाला इति स्थिते विग्रहवाक्ये मालाम् इत्यस्य नियतविभक्तिकत्वात् मालाशब्दस्योपसर्जनसंज्ञा भवति। ततः प्रकृतसूत्रेण मालाशब्दस्यान्त्यस्य अच आकारस्य स्थाने ह्रस्वे अकारे अतिमालशब्दो निष्पद्यते। ततः सौ अतिमालः इति रूपम्। गोशब्दान्तस्य ह्रस्वे उदाहरणं चित्रगुः इति।

पाठगतप्रश्नाः-२

७. "प्रादयो गताद्यर्थे प्रथमया" इति वार्तिकस्यार्थः कः।

८. "प्रादयो गताद्यर्थे प्रथमया" इति वार्तिकस्य एकमुदाहरणं देयम्।

९. "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति वार्तिकस्यार्थः कः।

१०. "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति वार्तिकस्य एकमुदाहरणं देयम्।

११. "एकविभक्ति चापूर्वनिपाते" इति सूत्रस्यार्थः कः।

१२. "गोस्त्रियोरुपसर्जनस्य" इति सूत्रस्यार्थः कः।

(४.४.१) अवादयः क्रुष्टाद्यर्थे तृतीयया (वार्तिकम्)

वार्तिकार्थः - क्रुष्टाद्यर्थे वर्तमानाः अवादयः तृतीयान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

वार्तिकव्याख्या - इदं वार्तिकं "कुगतिप्रादयः" इति सूत्रे महाभाष्ये पठितम्। सूत्रस्यास्य नित्यसमासविधानादिदं वार्तिकमपि नित्यसमासं बोधयति। वार्तिके अवादयः इति प्रथमाबहुवचनान्तं, क्रुष्टाद्यर्थे इति सप्तम्येकवचनान्तं तृतीयया इति च तृतीयैकवचनान्तं पदम्। "समर्थः पदविधिः" इत्यस्मात् सूत्रात् समर्थः इति पदम् अधिक्रियते। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि सूत्राणि अधिकृतानि। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतः सुप् इति पदमनुवर्तते। तृतीयया इत्यस्य सुपा इत्यस्य च तदन्तविधौ समर्थपदेन सहान्वयेन तृतीयान्तेन समर्थेन सुबन्तेन इत्यागच्छति। क्रुष्टाद्यर्थे अवादीनां शिष्टसम्मताः प्रयोगाः सन्ति। एवं वार्तिकार्थः समायाति - "क्रुष्टाद्यर्थे वर्तमानाः अवादयः तृतीयान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - एतस्य वार्तिकस्य अवकोकिलः इत्युदाहरणम्। अवक्रुष्टः कोकिलया इति लौकिकविग्रहे अव कोकिला टा इत्यलौकिकविग्रहे प्रोक्तवार्तिकेन क्रुष्टाद्यर्थे विद्यमानः अव इति निपातः कोकिला टा इत्यनेन सुबन्तेन सह तत्पुरुषसंज्ञो भवति। ततः प्रक्रियाकार्ये सुब्लुकि अवकोकिला इति स्थिते कोकिला इत्यस्य "एकविभक्ति चापूर्वनिपाते" इत्यनेनोपसर्जनसंज्ञायां "गोस्त्रियोरुपसर्जनस्य" इत्यनेन ह्रस्वे प्रक्रियाकार्ये अवकोकिलः इति रूपम्। सङ्गतमर्थेन समर्थमित्यादिकमेतस्य वार्तिकस्योदाहरणम्।

(४.४.२) पर्यादयो ग्लानाद्यर्थे चतुर्थ्या (वार्तिकम्)

वार्तिकार्थः - ग्लानाद्यर्थे वर्तमानाः पर्यादयः चतुर्थ्यन्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

वार्तिकव्याख्या - इदं वार्तिकं "कुगतिप्रादयः" इति सूत्रे महाभाष्ये पठितम्। सूत्रस्यास्य नित्यसमासविधानादिदं वार्तिकमपि नित्यसमासं बोधयति। वार्तिके पर्यादयः इति प्रथमाबहुवचनान्तं, ग्लानाद्यर्थे इति सप्तम्येकवचनान्तं चतुर्थ्या इति च तृतीयान्तं पदम्। "समर्थः पदविधिः" इत्यस्मात् सूत्रात् समर्थः इति पदम् अधिक्रियते। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि सूत्राणि अधिकृतानि। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतः सुप् इति पदमनुवर्तते। चतुर्थ्या इत्यस्य सुपा इत्यस्य च तदन्तविधौ समर्थपदेन सहान्वयेन चतुर्थ्यन्तेन समर्थेन सुबन्तेन इत्यागच्छति। ग्लानाद्यर्थे पर्यादीनां शिष्टसम्मताः प्रयोगाः सन्ति। एवं वार्तिकार्थः समायाति - "ग्लानाद्यर्थे वर्तमानाः पर्यादयः चतुर्थ्यन्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - एतस्य वार्तिकस्य पर्यध्ययनः इत्युदाहरणम्। अध्ययनाय परिग्लानः इति लौकिकविग्रहे परि अध्ययन ङे इत्यलौकिकविग्रहे प्रोक्तवार्तिकेन ग्लानाद्यर्थे विद्यमानः परि इति अध्ययन

ङे इत्यनेन चतुर्थ्यन्तेन सुबन्तेन सह तत्पुरुषसंज्ञं भवति। ततः समासे सुब्लुकि प्रक्रियाकार्ये पर्यध्ययनः इति रूपम्। उद्युक्तः संग्रामाय उत्संग्रामः इत्यादिकमिहोदाहरणम्।

(४.४.३) निरादयः क्रान्ताद्यर्थे पञ्चम्या (वार्तिकम्)

वार्तिकार्थः - क्रान्ताद्यर्थे वर्तमानाः निरादयः पञ्चम्यन्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

वार्तिकव्याख्या - इदं वार्तिकं "कुगतिप्रादयः" इति सूत्रे महाभाष्ये पठितम्। सूत्रस्यास्य नित्यसमासविधानादिदं वार्तिकमपि नित्यसमासं बोधयति। वार्तिके निरादयः इति प्रथमाबहुवचनान्तं, क्रान्ताद्यर्थे इति सप्तम्येकवचनान्तं पञ्चम्या इति च तृतीयैकवचनान्तं पदम्। "समर्थः पदविधिः" इत्यस्मात् सूत्रात् समर्थः इति पदम् अधिक्रियते। "प्राक्कडारात्समासः", "सह सुपा", "तत्पुरुषः" इत्येतानि सूत्राणि अधिकृतानि। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतः सुप् इति पदमनुवर्तते। पञ्चम्या इत्यस्य सुपा इत्यस्य च तदन्तविधौ समर्थपदेन सहान्वयेन पञ्चम्यन्तेन समर्थेन सुबन्तेन इत्यागच्छति। क्रान्ताद्यर्थे निरादीनां शिष्टसम्मताः प्रयोगाः सन्ति। एवं वार्तिकार्थः समायाति - "क्रान्ताद्यर्थे वर्तमानाः निरादयः पञ्चम्यन्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति" इति।

उदाहरणम् - एतस्य वार्तिकस्य निष्कौशाम्बिः इत्युदाहरणम्। निष्क्रान्तः कौशाम्ब्या इति लौकिकविग्रहे निर् कौशाम्बी ङसि इत्यलौकिकविग्रहे प्रोक्तवार्तिकेन क्रान्ताद्यर्थे विद्यमानं निर् इति कौशाम्बी ङसि इत्यनेन समर्थेन सुबन्तेन तत्पुरुषसमाससंज्ञकं भवति। ततः निर् इत्यस्य पूर्वनिपाते प्रातिपदिकत्वात् सुब्लुकि च प्रक्रियाकार्ये निर् कौशाम्बी इति भवति। तदा "एकविभक्ति चापूर्वनिपाते" इत्यनेन कौशाम्बीत्यस्य उपसर्जनसंज्ञायां ह्रस्वत्वे निष्पन्नात् निष्कौशाम्बिशब्दात् सौ प्रक्रियाकार्ये निष्कौशाम्बिः इति रूपम्। निष्क्रान्तो वाराणस्याः निर्वाराणसिः इत्यादिकमिहोदाहरणम्।

"उपपदमतिङ्" इत्यनेन वक्ष्यमाणसूत्रेण उपपदसमासात् प्राग् उपपदं किमिति वर्णयितुं सूत्रमारब्धम् -

[४.५] तत्रोपपदं सप्तमीस्थम्॥ (३.१.९२)

सूत्रार्थः - सप्तम्यन्ते पदे कर्मण्यण् इत्यादौ वाच्यत्वेन स्थितं यत्कुम्भादि तद्वाचकं पदमुपपदसंज्ञं भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण उपपदसंज्ञा विधीयते। सूत्रेऽस्मिन् पदत्रयम् अस्ति। तत्र उपपदं सप्तमीस्थम् इति पदच्छेदः। तत्र इत्यव्ययपदम्। उपपदं सप्तमीस्थम् इति पदद्वयं प्रथमैकवचनान्तम्। सप्तम्यां तिष्ठतीति सप्तमीस्थम्। एतस्मात् सूत्रात् पूर्वं "धातोः" इत्यधिकारः प्रवर्तते। स चाधिकारः तृतीयाध्यायपरिसमाप्तिं यावत्। एवं तृतीयाध्यायपरिसमाप्तिं यावत् सूत्रैः ये प्रत्ययाः विहितास्ते धातोः परमेव भवन्ति। प्रस्तुतेन सूत्रेण धात्वधिकारान्तर्गतसूत्रैः यत्र यत्र सप्तम्यन्तं पदं प्रयुक्तं तत्र तत्पदबोध्यं यत् तद्वाचकस्य पदस्योपपदसंज्ञा विधीयते। अत एव सूत्रार्थः समायाति - "सप्तम्यन्ते पदे कर्मण्यण् इत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं भवति" इति।

उदाहरणम् - एतस्य सूत्रस्य कुम्भकारः इत्युदाहरणम्। कुम्भं करोतीत्यर्थे "कर्मण्यण्" इत्यनेन अण् भवति। अत्र सूत्रे कर्मणि इति सप्तम्यन्तं पदम्। कर्मणि इत्यनेन बोध्यस्य कर्मीभूतस्य कुम्भस्य वाचकं यत्कुम्भपदं तस्यैवोपपदसंज्ञा प्रस्तुतेन सूत्रेण भवति।

पाठगतप्रश्नाः-३

१३. "अवादयः क्रुष्टाद्यर्थे तृतीयया" इति वार्तिकस्यार्थः कः।

१४. "अवादयः क्रुष्टाद्यर्थे तृतीयया" इति वार्तिकस्य एकमुदाहरणं देयम्।

१५. "पर्यादयो ग्लानाद्यर्थे चतुर्थ्या" इति वार्तिकस्यार्थः कः।

१६. "पर्यादयो ग्लानाद्यर्थे चतुर्थ्या" इति वार्तिकस्य एकमुदाहरणं देयम्।

१७. "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति वार्तिकस्यार्थः कः।

१८. "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति वार्तिकस्य एकमुदाहरणं देयम्।

१९. "तत्रोपपदं सप्तमीस्थम्" इति सूत्रस्यार्थः कः।

२०. "तत्रोपपदं सप्तमीस्थम्" इति सूत्रस्य एकमुदाहरणं देयम्।

[४.६] उपपदमतिङ्॥ (२.२.१९)

सूत्रार्थः - उपपदं सुबन्तं समर्थेन सह नित्यं समस्यते, स च तत्पुरुषसंज्ञको भवति। अयं च समासः अतिङन्तः।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण उपपदतत्पुरुषसमासो विधीयते। पदद्वयात्मके अस्मिन् सूत्रे उपपदम् अतिङ् इति पदद्वयं प्रथमैकवचनान्तम्। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतः सुबित्यनुवर्तते। प्रथमान्तं समर्थग्रहणं तृतीयान्ततया विपरिणम्यते। तेन समर्थेन इति भवति। अविद्यमानं तिङ् यस्मिन् सः अतिङ् इति बहुव्रीहिसमासः। अतिङन्तमिति तात्पर्यम्। "प्राक्कडारात्समासः", "तत्पुरुषः" इति सूत्रद्वयम् अधिकृतम्। "समर्थः पदविधिः" इत्यतः समर्थः इति पदमधिक्रियते। "नित्यं क्रीडाजीविकयोः" इत्यस्मात् सूत्रात् नित्यम् इत्यनुवर्तते। सुप् इत्यस्य उपपदमित्यस्य विशेषणत्वात् तदन्तविधौ सुबन्तम् उपपदम् इति लभ्यते। एवं सूत्रार्थ आगच्छति - उपपदं सुबन्तं समर्थेन सह नित्यं समस्यते, स च तत्पुरुषसंज्ञको भवति। अयं च समासः अतिङन्तः।" इति।

सूत्रे अतिङ् इति पदस्य ग्रहणाभावे मा भवान् भूत् इति प्रयोगो नोपपद्यते। तथाहि "माङि लुङ्" इत्यनेन माङ्योगे भूधातोर्लुङि रूपम् भवति। सूत्रे माङि इति सप्तमीनिर्दिष्टत्वात् तस्योपपदसंज्ञा भवति। ततः अतिङ् इत्यस्याभावे प्रकृतसूत्रेण मा भूत् इत्यनयोः उपपदसमासः स्यात्। तदा मध्ये भवान् इति प्रयोगो नोपपद्यते समासमध्ये प्रयोगास्वीकारात्। एवम् अतिङ् इत्यस्य प्रयोजनं सूत्रे विद्यते।

उदाहरणम् - एतस्य सूत्रस्य कुम्भकारः इत्युदाहरणम्। कुम्भं करोतीति कुम्भकारः। अत्र कुम्भं करोतीति न विग्रहवाक्यं किन्तु कुम्भकारशब्दस्यार्थ एव। धातुप्रत्ययप्रकरणे "कर्मण्यण्" इत्यत्र कर्मणि इत्यनेन सप्तम्यन्तपदेन कुम्भबोधनात् कुम्भमित्यत्रोपपदम्। ततः कुम्भमित्युपपदं "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषापरिष्कृतेन कारशब्देन कृदन्तेन समर्थेन सह प्रकृतसूत्रेण तत्पुरुषसमाससंज्ञं भवति। ततः कुम्भशब्दस्य कर्मत्वात् कारशब्देन कृदन्तेन योगे "कर्तृकर्मणोः कृति" इत्यनेन ङस्प्रत्ययो भवति। ततः कुम्भ ङस् कार इति स्थिते समासस्य प्रातिपदिकत्वात् सुब्लुकि निष्पन्नात् कुम्भकारशब्दात् सौ प्रक्रियाकार्ये कुम्भकारः इति रूपम्। अत्र प्रातिपदिकेन कारशब्देन सह समासत्वात् लौकिकविग्रहवाक्यम् असम्भवम्।

(४.६.१) गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥

(परिभाषा)

परिभाषार्थः - गतिसंज्ञकस्य कारकसंज्ञकस्य उपपदसंज्ञकस्य च कृदन्तेन सह समासः कृदन्तात् सुबुत्पत्तेः प्राक् भवति।

परिभाषाव्याख्या - "उपपदमतिङ्" इत्यस्मिन् सूत्रे सह सुपा इत्यस्मात् सूत्रात् सुपा इत्यस्यानुवृत्तिः न क्रियते। तदा तिङन्तेन सहोपपदस्य समासप्रसङ्गः, तद्वारणाय सूत्रे अतिङ् इति पदं प्रदत्तम्। एवं सूत्रे सुबुत्पत्तेः प्रागेव कृदन्तेन सह उपपदस्य समासो विहितः। सुपा इत्यस्य पदस्य सूत्रे अनुवृत्तिः यदि भवति तर्हि अतिङ् इति पदं न देयं तिङन्तप्रतिषेधाय। तथापि सुपा इत्यस्य अनुवृत्तिः कथं नास्तीति प्रश्ने सति सुबुत्पत्तेः पूर्वं समासे प्रमाणं दर्शयति "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति।

उदाहरणम् - एतस्याः परिभाषायाः उदाहरणं व्याघ्री इति। विशेषेण आ समन्ताद् जिघ्रतीति विग्रहे आङ् इत्युपपदे घ्राधातोः "आतश्चोपसर्गे" इत्यनेन कप्रत्यये "आतो लोप इटि च" इत्यनेन धातोराकारस्य लोपे आ घ्र् अ इति जाते सर्वसंयोगे आ घ्र इति भवति। तदा घ्र इत्यनेन कृदन्तेन सह आ इति उपपदस्य सुबुत्पत्तेः पूर्वम् "उपपदमतिङ्" इत्यनेन उपपदसमासे आघ्र इति निष्पद्यते। ततः "गतिश्च" इत्यनेन गतिसंज्ञकस्य वि इत्यस्योपसर्गस्य आघ्र इत्यनेन सह "कुगतिप्रादयः" इत्यनेन नित्यं प्रादितत्पुरुषसमासो भवति। ततः वि आघ्र इति स्थिते "इको यणचि" इत्यनेन वि इत्यस्य इकारस्य अचि आकारे परे यणि यकारे सर्वसंयोगे व्याघ्र इति निष्पद्यते। ततः सुबुत्पत्तेः पूर्वमेव ङीषि व्याघ्री इति रूपम्।

कारकस्योदाहरणम् अश्वक्रीती। अश्वेन क्रीता इति लौकिकविग्रहे अश्व टा क्रीत इत्यलौकिकविग्रहे "कर्तृकरणे कृता बहुलम्" इत्यनेन सूत्रेण क्रीत इति कृदन्तेन सह करणकारकस्य अश्व टा इत्यस्य समासे प्रक्रियाकार्ये निष्पन्नात् अश्वक्रीतशब्दात् स्त्रीत्वविवक्षायां "क्रीतात्करणपूर्वात्" इत्यनेन ङीषि प्रक्रियाकार्ये अश्वक्रीती इति रूपम्।

तत्पुरुषसमासे समासान्तानां प्रत्ययानां सूत्राणि -

[४.७] तत्पुरुषस्याङ्गुलेः संख्याऽव्ययादेः॥ (५.४.८६)

सूत्रार्थः - संख्याऽव्ययादेः अङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अच्प्रत्ययो विधीयते। पदत्रयात्मके अस्मिन् सूत्रे तत्पुरुषस्य अङ्गुलेः संख्याव्ययादेः इति पदत्रयं षष्ठ्येकवचनान्तम्। "अच्प्रत्यन्ववपूर्वात् सामलोम्नः" इत्यतः अच् इति प्रथमान्तम् पदम् अनुवर्तते। "समासान्ताः", "तद्धिताः", "प्रत्ययः", "परश्च" इत्येतानि अधिकृतानि। अङ्गुलेः इति तत्पुरुषस्येत्यस्य विशेषणम्। अतः "येन विधिस्तदन्तस्य" इत्यनेन सूत्रेण तदन्तविधौ अङ्गुल्यन्तस्य तत्पुरुषस्य इति भवति। संख्याऽव्ययादेः इत्यस्यापि तत्पुरुषस्येत्यत्रान्वयः। संख्या च अव्ययं च संख्याव्ययम्, संख्याव्ययम् आदि यस्य सः संख्याव्ययादिः तस्येति द्वन्द्वगर्भबहुव्रीहिसमासः। एवं सूत्रार्थ आगच्छति - "संख्याऽव्ययादेः अङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति" इति।

उदाहरणम् - संख्यापूर्वस्याङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तस्य अचः उदाहरणं द्व्यङ्गुलं दार्वादिकम् इति। द्वे अङ्गुली प्रमाणमस्येति लौकिकविग्रहे द्वि औ अङ्गुलि औ इत्यलौकिकविग्रहे तद्धितार्थे मात्रचि विवक्षिते "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन सूत्रेण तत्पुरुषसमासो भवति। ततः संख्यावाचकस्य द्वि औ इत्यस्योपसर्जनत्वात्पूर्वनिपातो भवति। अस्य समासस्य "तत्पुरुषः" इत्यनेन तत्पुरुषत्वं "संख्यापूर्वो द्विगुः" इत्यनेन च सूत्रेण द्विगुत्वमस्ति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि द्वि अङ्गुलि इति स्थिते यणि द्व्यङ्गुलि इति जाते प्रस्तुतेन सूत्रेण संख्यापूर्वस्य तत्पुरुषस्य समासान्तः अच्प्रत्ययो भवति। अचः चकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे द्व्यङ्गुलि अ इति जाते "यचि भम्" इत्यनेन द्व्यङ्गुलि इत्यस्य भसंज्ञायां "यस्येति च" इत्यनेन इकारस्य लोपे सर्वसंयोगे निष्पन्नात् द्व्यङ्गुलशब्दात् सौ द्व्यङ्गुलम् इति रूपं निष्पन्नम्। अव्ययपूर्वस्य अङ्गुल्यन्तस्य समासान्तस्योदाहरणं निर्गतम् अङ्गुलिभ्यः निरङ्गुलम् इति।

पाठगतप्रश्नाः-४

२१. "उपपदमतिङ्" इति सूत्रस्यार्थः कः।

२२. "उपपदमतिङ्" इति सूत्रस्य एकमुदाहरणं देयम्।

२३. "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः" इति परिभाषार्थः कः।

२४. सुबुत्पत्तेः प्राक् कृदन्तेन सह गतिसमासे किमुदाहरणम्।

२५. "तत्पुरुषस्याङ्गुलेः संख्याऽव्ययादेः" इति सूत्रस्यार्थः कः।

२६. संख्यापूर्वस्य तत्पुरुषस्य समासान्तविधाने किमुदाहरणम्।

२७. अव्ययपूर्वपदस्य तत्पुरुषस्य समासान्तविधाने किमुदाहरणम्।

[४.८] अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः॥ (५.४.८७)

सूत्रार्थः - अहःसर्वैकदेशसंख्यातपुण्यशब्देभ्यः संख्याऽव्ययादेः च परो यः रात्रिशब्दः तदन्तस्य तत्पुरुषस्य समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अच्प्रत्ययो विधीयते। पदत्रयात्मके अस्मिन् सूत्रे अहःसर्वैकदेशसंख्यातपुण्यात् इति पञ्चम्येकवचनान्तं पदम्। च इत्यव्ययपदम्। रात्रेः इति षष्ठ्येकवचनान्तं पदम्। "तत्पुरुषस्याङ्गुलेः संख्याऽव्ययादेः" इत्यस्मात् सूत्रात् तत्पुरुषस्य इति पदमनुवर्तते। "अच्प्रत्यन्ववपूर्वात् सामलोम्नः" इत्यतः अच् इति पदम् अनुवर्तते। "समासान्ताः", "तद्धिताः", "प्रत्ययः", "परश्च" इत्येतानि अधिकृतानि। चकारेण पूर्वसूत्रात् संख्याव्ययादेः इति पदस्य ग्रहणमस्ति। अहश्च सर्वश्च एकदेशश्च संख्यातश्च पुण्यश्च अहःसर्वैकदेशसंख्यातपुण्यम्, तस्मादिति समाहारद्वन्द्वसमासः। एकदेशशब्देन अवयववाचकानां पूर्वपराधरोत्तरादीनां शब्दानां ग्रहणं भवति। एवं सूत्रार्थ आगच्छति - "अहःसर्वैकदेशसंख्यातपुण्यशब्देभ्यः संख्याऽव्ययादेः च परो यः रात्रिशब्दः तदन्तस्य तत्पुरुषस्य समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति" इति।

एतस्य सूत्रस्य व्याख्यानावसरे "अहर्ग्रहणं द्वन्द्वार्थम्" इति वार्तिकं पठितम्। अहन्पूर्वस्य रात्र्यन्तस्य द्वन्द्वस्य समासान्तः अच् तेन भवति।

उदाहरणम् - अहन्पूर्वस्य रात्र्यन्तस्य समासान्तस्य अचः उदाहरणम् अहोरात्रः इति। अहश्च रात्रिश्चानयोः समाहारः इति लौकिकविग्रहे अहन् सु रात्रि सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण समाहारद्वन्द्वसमासो भवति। ततः "अल्पाच्तरम्" इत्यनेन अल्पतराच्सहितस्य अहन् सु इत्यस्य पूर्वनिपाते, प्रातिपदिकत्वात् सुब्लुकि अहन् रात्रि इति स्थिते "अहर्ग्रहणं द्वन्द्वार्थम्" इति वार्तिकपरिष्कृतेन प्रकृतसूत्रेण अहन्पूर्वपदस्य रात्र्यन्तस्य द्वन्द्वस्य समासान्ते अचि अनुबन्धलोपे अहोरात्रि अ इति जाते, "यचि भम्" इत्यनेन अहोरात्रि इत्यस्य भसंज्ञायां "यस्येति च" इत्यनेन इकारस्य लोपे सर्वसंयोगे निष्पन्नात् अहोरात्रशब्दात् सौ प्रक्रियाकार्ये अहोरात्रः इति निष्पन्नम्।

सर्वपूर्वपदस्य रात्र्यन्तस्य तत्पुरुषस्य समासान्तस्योदाहणं सर्वरात्रः इति। सर्वा चासौ रात्रिश्च इति लौकिकविग्रहे सर्वा सु रात्रि सु इत्यलौकिकविग्रहे तत्पुरुषसमासे सुब्लुकि प्रक्रियाकार्ये सर्वरात्रि इति स्थिते, अनेन सूत्रेण सर्वपूर्वपदस्य रात्र्यन्तस्य समासान्ते अचि प्रक्रियाकार्ये सौ सर्वरात्रः इति निष्पन्नम्।

एकदेशपूर्वपदस्य समासान्तस्योदाहरणं पूर्वं रात्रेः पूर्वरात्रः इति। संख्यातपूर्वपदस्य समासान्तस्योदाहरणं संख्यातरात्रः इति। पुण्यपूर्वपदस्य समासान्तस्योदाहरणं पुण्यरात्रः इति।

[४.९] रात्राह्नाऽहाः पुंसि॥ (२.४.२९)

सूत्रार्थः - रात्राह्नाहान्तौ द्वन्द्वतत्पुरुषौ पुंसि भवतः।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पुंस्त्वं विधीयते। अहोरात्रशब्दस्य "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन रात्रिशब्दस्य स्त्रीलिङ्गत्वात् स्त्रीलिङ्गता प्राप्नोति, तत् प्रबाध्य "स नपुंसकम्" इत्यनेन नपुंसकत्वापत्तिः। सर्वरात्रशब्दस्य तु स्त्रीलिङ्गतापत्तिश्च। अहोरात्र-सर्वरात्रशब्दयोः किं लिङ्गं स्यादिति वर्णनाय सूत्रमिदं प्रवृत्तम्।

पदद्वयात्मके अस्मिन् सूत्रे रात्राह्नाहाः इति प्रथमाबहुवचनान्तं पुंसि इति सप्तम्येकवचनान्तं पदम्। "परवल्लिङ्गं द्वन्द्वत्पुरुषयोः" इत्यस्मात् सूत्रात् द्वन्द्वतत्पुरुषयोः इति पदमनुवर्तते। तस्य च विभक्तिविपरिणामेन द्वन्द्वतत्पुरुषौ इति रूपम्। रात्रश्च अह्नश्च अहश्च रात्राह्नाहाः इतीतरेतरद्वन्द्वसमासः। द्वन्द्वतत्पुरुषौ इत्यस्य विशेषणत्वात् रात्राह्नाहाः इत्यस्य तदन्तविधौ रात्राह्नाहान्तौ द्वन्द्वतत्पुरुषौ इत्यर्थः। एवं "रात्राह्नाहान्तौ द्वन्द्वतत्पुरुषौ पुंसि भवतः" इति सूत्रार्थः।

एतत्सूत्रव्याख्याने "संख्यापूर्वा रात्रिः" इति लिङ्गानुशासनस्य नपुंसकाधिकारे अन्तर्गतं सूत्रम् अवलम्ब्य एकं वचनं प्राप्यते "संख्यापूर्वं रात्रं क्लीबम्" इति। संख्यापूर्वपदस्य रात्र्यन्तस्य च समासस्य नपुंसकलिङ्गे प्रयोगो भवति इति वचनस्यार्थः।

उदाहरणम् - अहश्च रात्रिश्च इति विग्रहे समासे निष्पन्नस्य अहोरात्रशब्दस्य "स नपुंसकम्" इत्यनेन नपुंसकत्वं प्रबाध्य प्रकृतसूत्रेण पुंस्त्वविधानात् सौ प्रक्रियाकार्ये अहोरात्रः इति रूपम्। एवमेव सर्वरात्रशब्दस्य सौ सर्वरात्रः इति रूपम्।

"संख्यापूर्वं रात्रं क्लीबम्" इति वचनानुसारेण द्वयोः रात्र्योः समाहारः इति विग्रहे निष्पन्नस्य द्विरात्रशब्दस्य नपुंसके प्रयोगो भवति। एवमेव त्रिरात्रम् नवरात्रम् इत्यादिकं सिध्यति।

[४.१०] राजाहःसखिभ्यष्टच्॥ (५.४.९१)

सूत्रार्थः - राजाहःसखिशब्दान्तात् तत्पुरुषात् समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो विधीयते। पदत्रयात्मके अस्मिन् सूत्रे राजाहःसखिभ्यः टच् इति पदच्छेदः। राजाहःसखिभ्यः इति पञ्चमीबहुवचनान्तं टच् इति च प्रथमैकवचनान्तं पदम्। राजा च अहश्च सखा च राजाहःसखायः, तेभ्य इतीतरेतरद्वन्द्वः। "तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः" इत्यस्मात् सूत्रात् तत्पुरुषस्य इति पदमनुवर्तते। तस्य विभक्तिविपरिणामेन पञ्चम्येकवचने तत्पुरुषादिति भवति। तद्विशेषणत्वेन राजाहःसखिभ्यः इत्यस्य तदन्तविधौ राजाहःसखिशब्दान्तात् तत्पुरुषाद् इत्यर्थो भवति। "समासान्ताः", "तद्धिताः" इति सूत्रद्वयम् अधिकृतम्। एवं सूत्रार्थः - "राजाहःसखिशब्दान्तात् तत्पुरुषात् समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं परमराजः इति। परमश्चासौ राजा चेति लौकिकविग्रहे परम सु राजन् सु इत्यलौकिकविग्रहे "विशेषणं विशेष्येण बहुलम्" इत्यनेन तत्पुरुषसमासे प्रक्रियाकार्ये परमराजन् इति निष्पद्यते। ततः प्रकृतसूत्रेण समासान्ते टचि परमराजन् टच् इति स्थिते टकारस्य "चुटू" इत्यनेन चकारस्य च "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे परमराजन् अ इति

भवति। ततः परमराजन् इत्यस्य भसंज्ञायां "नस्तद्धिते" इत्यनेन टेरनः लोपे परमराज् अ इति स्थिते सर्वसंयोगे निष्पन्नस्य परमराजशब्दस्य परवल्लिङ्गत्वेन पुंसि सौ प्रक्रियाकार्ये परमराजः इति रूपम्।

पाठगतप्रश्नाः-५

२८. "अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" इति सूत्रस्यार्थः कः।

२९. "अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" इति सूत्रस्य एकमुदाहरणं देयम्।

३०. "रात्राह्नाहाः पुंसि" इति सूत्रस्यार्थः कः।

३१. "रात्राह्नाहाः पुंसि" इति सूत्रस्य एकमुदाहरणं देयम्।

३२. "संख्यापूर्वं रात्रं क्लीबम्" इति वचनस्यार्थः कः, किञ्चात्रोदाहरणम्।

३३. "राजाहसखिभ्यष्टच्" इति सूत्रस्यार्थः कः।

३४. "राजाहसखिभ्यष्टच्" इति सूत्रस्य एकमुदाहरणं देयम्।

[४.११] आन्महतः समानाधिकरणजातीययोः॥ (६.३.४६)

सूत्रार्थः - समानाधिकरणे उत्तरपदे जातीये च परे महतः आकारः आदेशो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण महतः आकारः अन्तादेशो विधीयते। पदत्रयात्मके अस्मिन् सूत्रे आत् महतः समानाधिकरणजातीययोः इति पदच्छेदः। अस्मिन् सूत्रे आत् इति प्रथमैकवचनान्तं, महतः इति पञ्चम्येकवचनान्तं समानाधिकरणजातीययोः इति च सप्तमीद्विवचनान्तं पदम्। समानाधिकरणं च जातीयश्च समानाधिकरणजातीयौ तयोः समानाधिकरणजातीययोः इति इतरेतरद्वन्द्वः। "अलुगुत्तरपदे" इत्यस्मात्सूत्रात् उत्तरपदे इति पदम् अनुवर्तते। उत्तरपदे इत्यस्यान्वयः समानाधिकरणेत्यंशेन एव सम्भवति "प्रकारवचने जातीयर्" इत्यनेन विहितस्य जातीयस्य प्रत्ययत्वाद् उत्तरपदत्वाभावात्। एवं सूत्रार्थः समायाति - "समानाधिकरणे उत्तरपदे जातीये च परे महतः आकारः आदेशो भवति" इति।

"अलोऽन्त्यस्य" इति परिभाषया महतः अन्त्यस्य तकारस्य स्थाने एव आकारादेशो भवति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं महाराजः इति। महान् चासौ राजा चेति लौकिकविग्रहे महत् सु राजन् सु इत्यलौकिकविग्रहे "विशेषणं विशेष्येण बहुलम्" इत्यनेन तत्पुरुषसमासे प्रक्रियाकार्ये महत् राजन् इति सिध्यति। ततः "अलोऽन्त्यस्य" इति परिभाषया परिष्कृतेन प्रकृतसूत्रेण उत्तरपदे परे महतः तकारस्य आकारादेशे मह आ राजन् इति जाते सवर्णदीर्घे महाराजन् इति निष्पद्यते। ततः समासान्ते टचि प्रक्रियाकार्ये महाराजः इति रूपम्।

जातीयरि परे उदाहरणं भवति महाजातीयः इति। महत्त्वविशिष्ट इत्यर्थे महत् इत्यस्मात् "प्रकारवचने जातीयर्" इत्यनेन जातीयर्-प्रत्यये अनुबन्धलोपे महत् जातीय इति जाते प्रकृतसूत्रेण जातीयरि परे महतः तकारस्य आकारे सवर्णदीर्घे प्रक्रियाकार्ये महाजातीयः इति रूपम्।

[४.१२] द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः॥ (६.३.४७)

सूत्रार्थः - द्वि अष्टन् इत्यनयोः शब्दयोः संख्यावाचके उत्तरपदे परे आकारः अन्तादेशो भवति, न तु बहुव्रीहिसमासे अशीत्युत्तरपदे च परे।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण आकारः अन्तादेशो विधीयते।पदत्रयात्मके अस्मिन् सूत्रे द्व्यष्टनः संख्यायाम् अबहुव्रीह्यशीत्योः इति पदच्छेदः। अस्मिन् सूत्रे द्व्यष्टनः इति षष्ठ्येकवचनान्तं, संख्यायाम् इति सप्तम्येकवचनान्तम् अबहुव्रीह्यशीत्योः इति सप्तमीद्विवचनान्तं पदम्। द्वि च अष्ट च द्व्यष्ट, तस्य द्व्यष्टनः इति समाहारद्वन्द्वः। बहुव्रीहिश्च अशीतिश्च बहुवीह्यशीती, तयोः बहुव्रीह्यशीत्योः इतीतरेतरद्वन्द्वः। न बहुव्रीह्यशीत्योः अबहुव्रीह्यशीत्योः इति नञ्तत्पुरुषः। "आन्महतः समानाधिकरणजातीययोः" इत्यस्मात् सूत्राद् आत् इत्यनुवर्तते। "अलुगुत्तरपदे" इत्यस्मात्सूत्रात् उत्तरपदे इति पदम् अनुवर्तते। उत्तरपदे इत्यस्यान्वयः संख्यायाम् इत्यनेन अशीत्याम् इत्यनेन च सम्भवति। बहुव्रीहौ इत्यनेन सह तस्यान्वयो नास्ति। एवं सूत्रार्थः समायाति - "द्वि अष्टन् इत्यनयोः शब्दयोः संख्यावाचके उत्तरपदे परे आकारः अन्तादेशो भवति, न तु बहुव्रीहिसमासे अशीत्युत्तरपदे च परे" इति।

"अलोऽन्त्यस्य" इति परिभाषया अन्त्यस्य स्थाने एव आकारादेशो भवति।

उदाहरणम् - अस्य सूत्रस्य द्विशब्दस्योदाहरणं तावद् द्वादश इति। द्वौ च दश च इति लौकिकविग्रहे द्वि औ दशन् जस् इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण द्वन्द्वसमासे प्रक्रियाकार्ये सुब्लुकि द्वि दशन् इति स्थिते प्रकृतसूत्रेण संख्यावाचके दशन् इत्युत्तरपदे परे द्विशब्दस्य आकारान्तादेशे द्वादशन् इति निष्पद्यते। ततः जसि प्रक्रियाकार्ये द्वादश इति रूपम्। एवमेव द्विशब्दस्य द्वाविंशतिः, द्वात्रिंशत् इत्यादिकमुदाहरणम्। एवमेव अष्टन्शब्दस्य अष्टादश इत्युदाहरणम्।

[४.१३] त्रेस्त्रयः॥ (६.३.४८)

सूत्रार्थः - त्रिशब्दस्य संख्यावाचके उत्तरपदे परे त्रयस् इत्यादेशो भवति, न तु बहुव्रीहिसमासे अशीत्युत्तरपदे च परे।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण त्रिशब्दस्य त्रयस् इत्यादेशो विधीयते।

पदद्वयात्मके अस्मिन् सूत्रे त्रेः इति षष्ठ्येकवचनान्तं त्रयः इति प्रथमैकवचनान्तं पदम्। "द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः" इत्यस्मात् सूत्रात् संख्यायाम् इति पदम् अबहुव्रीह्यशीत्योः इति च पदम् अनुवर्तते। "अलुगुत्तरपदे" इत्यस्मात्सूत्रात् उत्तरपदे इति पदम् अनुवर्तते। उत्तरपदे इत्यस्यान्वयः संख्यायाम् इत्यनेन अशीत्याम् इत्यनेन च सम्भवति। बहुव्रीहौ इत्यनेन सह तस्यान्वयो नास्ति। एवं

सूत्रार्थः समायाति- "त्रिशब्दस्य संख्यावाचके उत्तरपदे परे त्रयस् इत्यादेशो भवति, न तु बहुव्रीहिसमासे अशीत्युत्तरपदे च परे" इति।

"अनेकाल्शित्सर्वस्य" इति परिभाषया त्रिशब्दस्य सम्पूर्णस्य स्थाने एव त्रयस् इत्यादेशो भवति।

उदाहरणम् - अस्य सूत्रस्य द्विशब्दस्योदाहरणं तावद् त्रयोदश इति। त्रयश्च च दश च इति लौकिकविग्रहे त्रि जस् दशन् जस् इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण द्वन्द्वसमासे प्रक्रियाकार्ये सुब्लुकि त्रि दशन् इति स्थिते प्रकृतसूत्रेण संख्यावाचके दशन् इत्युत्तरपदे परे त्रिशब्दस्य सर्वस्य स्थाने त्रयस् इत्यादेशे त्रयस् दशन् इति निष्पद्यते। ततः सस्य रुत्वे "हशि च" इत्यनेन रेफस्य उकारे गुणे सर्वसंयोगे त्रयोदशन् इति शब्दो निष्पद्यते। ततः जसि प्रक्रियाकार्ये त्रयोदश इति रूपम्। एवमेव त्रिशब्दस्य त्रयोविंशतिः, त्रयस्त्रिंशत् इत्यादिकमुदाहरणम्।

पाठगतप्रश्नाः-६

३५. "आन्महतः समानाधिकरणजातीययोः" इति सूत्रस्यार्थः कः।

३६. महाराजः इत्यत्र महत आकारः अन्तादेशः केन कथम्।

३७. जातीयरि परे महत आकारान्तादेशस्य किमुदाहरणम्।

३८. "द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः" इति सूत्रस्यार्थः कः।

३९. द्वादश इत्यत्र द्विशब्दस्य आकारान्तादेशः कथम्।

४०. "त्रेस्त्रयः" इति सूत्रस्यार्थः कः।

४१. त्रयस् इत्यादेशः सम्पूर्णस्य त्रिशब्दस्य स्थाने कथं भवति।

[४.१४] परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः॥ (२.४.२६)

सूत्रार्थः - द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण द्वन्द्वे तत्पुरुषे च परवल्लिङ्गं विधीयते। पदत्रयात्मके अस्मिन् सूत्रे परवत् इत्यव्ययपदम्, लिङ्गमिति प्रथमैकवचनान्तं द्वन्द्वतत्पुरुषयोः इति षष्ठीद्विवचनान्तं पदम्। परशब्दात् षष्ठ्यन्तात् "तत्र तस्येव" इत्यनेन वतिप्रत्यये परवत् इति रूपम्। परस्य परपदस्य इव इति तात्पर्यम्। द्वन्द्वश्च तत्पुरुषश्च द्वन्द्वतत्पुरुषौ तयोः द्वन्द्वतत्पुरुषयोः इति इतरेतरद्वन्द्वसमासः। एवं सूत्रार्थः समायाति - "द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गं भवति" इति।

उदाहरणम् - अस्य सूत्रस्य द्वन्द्वसमासे उदाहरणं तावत् कुक्कुटमयूर्यौ इति। कुक्कुटश्च च मयूरी च इति लौकिकविग्रहे कुक्कुट सु मयूरी सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासे प्रक्रियाकार्ये कक्कुटमयूरीशब्दो निष्पद्यते। कुक्कुटमयूरी इत्यत्र मयूरी इत्यस्य

स्त्रीलिङ्गत्वात् प्रकृतसूत्रेण द्वन्द्वसमासनिष्पन्नस्य कुक्कुटमयूरीशब्दस्य स्त्रीलिङ्गे प्रथमाद्विवचने कुक्कुटमयूर्यौ इति रूपं निष्पद्यते।

तत्पुरुषे चोदाहरणम् अर्धपिप्पली इति। अर्धं पिप्पल्याः इति लौकिकविग्रहे अर्ध सु पिप्पली ङस् इत्यलौकिकविग्रहे "अर्धं नपुंसकम्" इत्यनेन सूत्रेण तत्पुरुषसमासे प्रक्रियाकार्ये अर्धपिप्पलीशब्दो निष्पन्नः। अर्धपिप्पली इत्यत्र पिप्पली इत्यस्य स्त्रीलिङ्गत्वात् प्रकृतसूत्रेण अर्धपिप्पलीत्यस्य सम्पूर्णस्य स्त्रीलिङ्गत्वविधानात् ततः प्रथमैकवचने सौ अर्धपिप्पली इति रूपम्।

(४.१४.१) द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः (वार्तिकम्)

वार्तिकार्थः - द्विगुसमासे प्राप्तापन्नालम्पूर्वपदे तत्पुरुषसमासे गतिसमासे च परवल्लिङ्गतायाः प्रतिषेधो भवति।

वार्तिकव्याख्या - इदं वार्तिकं "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति सूत्रस्य वर्णनावसरे महाभाष्ये पठितम्। अतः एतत्सूत्रसम्प्राप्तस्य परवल्लिङ्गत्वस्यैव निषेधकं वार्तिकम् इदम्।

त्रिषु स्थानेषु परवल्लिङ्गतायाः निषेधः अनेन वार्तिकेन विधीयते -

क) द्विगुसमासे परवल्लिङ्गतानिषेधो भवति।

ख) प्राप्तापन्नालम्पूर्वपदकस्य तत्पुरुषस्य परवल्लिङ्गतानिषेधो भवति।

ग) गतिसमासे परवल्लिङ्गतानिषेधो भवति।

अलम्पूर्वस्य तत्पुरुषसमासस्य विधायकं किमपि सूत्रं न प्राप्यते। तथापि अस्मिन् वार्तिके तस्योल्लेखादेव अलम्पूर्वकः तत्पुरुषः भवतीति ज्ञाप्यते।

उदाहरणम् - अस्य वार्तिकस्य द्विगुसमासे उदाहरणं पञ्चकपालः इति। पञ्चसु कपालेषु संस्कृतः इति लौकिकविग्रहे पञ्चन् सुप् कपाल सुप् इत्यलौकिकविग्रहे "संस्कृतं भक्षाः" इत्यनेन तद्धिते विवक्षिते "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन सूत्रेण द्विगुसमासे, संख्यावाचकस्य पूर्वनिपाते, सुब्लुकि पञ्चनः नकारस्य लोपे पञ्चकपाल इति सिध्यति। तस्मात् सप्तमीबहुवचने सुपि पञ्चकपाल सुप् इति सप्तम्यन्तात् "संस्कृतं भक्षाः" इत्यनेन तद्धिते अणि "द्विगोर्लुगनपत्ये" इत्यनेनाणः लोपे, "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः लुकि पञ्चकपाल इति तद्धितान्तः शब्दो निष्पद्यते। तस्य प्रातिपदिकत्वात् ततः विभक्त्युत्पत्तेः प्राक् लिङ्गनिर्णयः कार्यः। तदा "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन सूत्रेण कपालशब्दस्येव नपुंसकलिङ्गत्वे प्राप्ते प्रस्तुतेन वार्तिकेन द्विगुसमासे परवल्लिङ्गतानिषेधे पुरोडाशः इति विशेष्यानुसारेण पुंसि सौ प्रक्रियाकार्ये पञ्चकपालः इति रूपम्।

प्राप्तापन्नालम्पूर्वकानामुदाहरणानि यथाक्रमं प्राप्तजीविकः जनः, आपन्नजीविकः जनः, अलङ्कुमारिः इति। गतिसमासे च निष्कौशाम्बिः इत्यादिकमुदाहरणम्।

[४.१५] प्राप्तापन्ने च द्वितीयया॥ (२.२.४)

सूत्रार्थः - प्राप्त आपन्न इत्येतौ शब्दौ द्वितीयया सह समस्येते, अकारश्चानयोः अन्तादेशो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तत्पुरुषसमासः अकारश्च अन्तादेशो विधीयते। प्रसङ्गतः प्राप्तापन्नशब्दयोगे समासविधायकं सूत्रमिदं प्रवृत्तम्। पदत्रयात्मके अस्मिन् सूत्रे प्राप्तापन्ने इति प्रथमाद्विवचनान्तं, च इत्यव्ययं द्वितीयया इति च तृतीयैकवचनान्तं पदम्। द्वितीयया अ इति प्रश्लेषः। प्राप्तं च आपन्नं च प्राप्तापन्ने इति इतरेतरद्वन्द्वः। समासः, सुप्, सह सुपा, तत्पुरुषः इत्येतत्सर्वम् अधिकृतम्। सूत्रे चकारग्रहणं विधिद्वयस्य समुच्चयार्थम्। द्वितीयया इत्यत्र तदन्तविधौ द्वितीयान्तेन सुबन्तेन इत्यर्थ आयाति। एवं सूत्रार्थः - "प्राप्त आपन्न इत्येतौ शब्दौ द्वितीयया सह समस्येते, अकारश्चानयोः अन्तादेशो भवति" इति।

"अलोऽन्त्यस्य" इति परिभाषया प्राप्तापन्नशब्दयोः अन्त्यस्य स्थाने एव अकारादेशो भवति। एतत्सूत्रं "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति द्वितीयातत्पुरुषसमासस्य अपवादभूतम्।

उदाहरणम् - अस्य सूत्रस्योदाहरणं प्राप्तजीविकः इति। प्राप्तः जीविकाम् इति लौकिकविग्रहे प्राप्त सु जीविका अम् इत्यलौकिकविग्रहे प्रोक्तेन सूत्रेण प्राप्त सु इति सुबन्तं जीविका अम् इत्यनेन द्वितीयान्तेन सह तत्पुरुषसमाससंज्ञं भवति। ततः प्रक्रियाकार्ये प्राप्ताजीविका इति स्थिते एतत्सूत्रप्रश्लेषबलाद् प्राप्त इत्यत्र आकारस्य स्थाने अकारे प्राप्तजीविका इति जाते ततः जीविकेत्यस्योपसर्जनसंज्ञायां ह्रस्वत्वे निष्पन्नात् प्राप्तजीविकशब्दात् पूर्वोक्तेन वार्तिकेन विशेष्यानुसारेण पुंसि सौ प्रक्रियाकार्ये प्राप्तजीविकः इति रूपम्। एवमेव प्राप्तजीविकः आपन्नजीविकः इत्यादिकमेतस्य सूत्रस्योदाहरणम्।

[४.१६] अर्धर्चाः पुंसि च॥ (२.४.३१)

सूत्रार्थः - अर्धर्चादिगणे पठिताः शब्दाः पुंसि क्लीबे च भवन्ति।

सूत्रव्याख्या - अर्धर्चादीनां तत्पुरुषसमासनिष्पन्नानां शब्दानां विशेषतया पुंलिङ्गे क्लीबे च प्रयोगविधानाय इदं सूत्रं प्रवृत्तम्। पदत्रयात्मके अस्मिन् सूत्रे अर्धर्चाः इति प्रथमाबहुवचनान्तं, पुंसि इति सप्तम्येकवचनान्तं च इत्यव्ययं पदम्। "अपथं नपुंसकम्" इत्यस्मात् सूत्रात् चकारेण नपुंसकम् इति स्वीक्रियते। तस्य च विभक्तिविपरिणामेन सप्तम्यां नपुंसके इति भवति। अर्धर्चाः इत्यत्र बहुवचनाद् अर्धर्चादिगणे पठिताः अर्धर्चादयः शब्दा गृह्यन्ते। एवं सूत्रार्थ आयाति - "अर्धर्चादिगणे पठिताः शब्दाः पुंसि क्लीबे च भवन्ति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं अर्धर्चम् अर्धर्चः इति। ऋचः अर्धम् इति लौकिकविग्रहे ऋच् ङस् अर्ध सु इत्यलौकिकविग्रहे "अर्धं नपुंसकम्" इत्यनेन विकल्पेन तत्पुरुषसमासे सुब्लुकि प्रक्रियाकार्ये अर्धर्च् इति निष्पद्यते। ततः "ऋक्पूरब्धूःपथामानक्षे" इत्यनेन सूत्रेण अर्धर्च् इत्यस्य समासान्ते अप्रत्यये सर्वसंयोगे निष्पन्नस्य अर्धर्चशब्दस्य तत्पुरुषसंज्ञकत्वात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन परपदस्य

ऋच् इत्यस्यानुसारेण स्त्रीलिङ्गत्वे प्राप्ते तत् प्रबाध्य प्रोक्तेन सूत्रेण अर्धर्चादिगणे पठितस्य शब्दस्य पुंसि नपुंसके च प्रयोगो विधीयते। तेन अर्धर्चः अर्धर्चम् इति रूपद्वयं सिध्यति।

पाठगतप्रश्नाः-७

४२. "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति सूत्रस्यार्थः कः।

४३. द्वन्द्वे परवल्लिङ्गस्य किमुदाहरणम्।

४४. तत्पुरुषे परवल्लिङ्गस्य किमुदाहरणम्।

४५. "द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः" इति वार्तिकस्यार्थः कः।

४६. द्विगौ परवल्लिङ्गतानिषेधस्य किमुदाहरणम्।

४७. प्राप्तापन्नालम्पूर्वकानां तत्पुरुषाणां परवल्लिङ्गतानिषेधस्य कानि उदाहरणानि।

४८. गतिसमासे परवल्लिङ्गतानिषेधस्य किमुदाहरणम्।

४९. "प्राप्तापन्ने च द्वितीयया" इति सूत्रस्यार्थः कः।

५०. "प्राप्तापन्ने च द्वितीयया" इति सूत्रस्य किमुदाहरणम्।

५१. "अधर्चाः पुंसि च" इति सूत्रस्यार्थः कः।

५२. "अधर्चाः पुंसि च" इति सूत्रस्य किमुदाहरणम्।

पाठसारः

अस्मिन् पाठे कु-गति-प्रादिसमासानां विधायकं "कुगतिप्रादयः" इति सूत्रं व्याख्यातम्। "ऊर्यादिच्विडाचश्च" इति गतिसंज्ञाविधायकं सूत्रमत्र व्याख्यातम्। प्रादिसमासविधायकानि "प्रादयो गताद्यर्थे प्रथमया", "अत्यादयः क्रान्ताद्यर्थे द्वितीयया", "अवादयः क्रुष्टाद्यर्थे तृतीयया", "पर्यादयो ग्लानाद्यर्थे चतुर्थ्या", "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति पञ्च वार्तिकानि च व्याख्यातानि। अत्र प्रसङ्गात् "एकविभक्ति चापूर्वनिपाते" इति उपसर्जनसंज्ञाविधायकं "गोस्त्रियोरुपसर्जनस्य" इति उपसर्जनह्रस्वविधायकं सूत्रं व्याख्यातम्।

"तत्रोपपदं सप्तमीस्थम्" इति उपपदसंज्ञाविधायकं सूत्रम् "उपपदमतिङ्" इति उपपदसमासविधायकस्य सूत्रस्य वर्णनात्पूर्वं प्रस्तुतम्। "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति सुबुत्पत्तेः पूर्वं समासप्रतिपादिका परिभाषा व्याख्याता।

ततः अस्मिन् पाठे "तत्पुरुषस्याङ्गुलेः संख्याऽव्ययादेः" इति "अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" समासान्तस्य अच्प्रत्ययस्य, "राजाहःसखिभ्यष्टच्" इति समासान्तस्य टच्प्रत्ययस्य विधायकं सूत्रं

व्याख्यातम्। ततः रात्राह्नाहान्तस्य शब्दस्य लिङ्गनिर्णायकं "रात्राह्नाऽहाः पुंसि" इति सूत्रं व्याख्यातम्। महाराजः इत्यादौ महत आकारान्तादेशविधायकम् "आन्महतः समानाधिकरणजातीययोः" इति सूत्रं प्रतिपादितम्। ततः समासकार्यविधायकानि "द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः", "त्रेस्त्रयः" इति सूत्रद्वयं प्रस्तुतम्। ततः द्वन्द्वतत्पुरुषयोः परवल्लिङ्गताविधायकं "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति सूत्रं तन्निषेधकं च "द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः" इति वार्तिकं प्रस्तुतम्। ततः प्राप्तापन्नशब्दयोगे तत्पुरुषसमासविधायकं "प्राप्तापन्ने च द्वितीयया" इति सूत्रम्, अर्धर्चादीनां पुंसि च क्लीबे विधायकम् "अर्धर्चाः पुंसि च" इति सूत्रं व्याख्यातम्। एवं तत्पुरुषसमासः अस्मिन् पाठे प्रतिपादितः।

पाठान्तप्रश्नाः

१. "कुगतिप्रादयः" इति सूत्रस्य व्याख्यां कुरुत।

२. प्रादिसमासविधायकानि वार्तिकानि आश्रित्य एकां टिप्पणीं लिखत।

३. "तत्रोपपदं सप्तमीस्थम्" इति सूत्रस्य व्याख्यां कुरुत।

४. "उपपदमतिङ्" इति सूत्रस्य व्याख्यां कुरुत।

५. "आन्महतः समानाधिकरणजातीययोः" इति सूत्रस्य व्याख्यां कुरुत।

६. "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति सूत्रस्य व्याख्यां कुरुत।

७. ससूत्रं समस्तपदानि साधयत - अतिमालः निष्कौशाम्बिः कुम्भकारः महाराजः अहोरात्रः प्राप्तजीविकः।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. समर्थाः कुगतिप्रादयः समर्थेन सुबन्तेन सह नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

२. कुपुरुषः इति।

३. ऊरीकृत्य।

४. सुपुरुषः।

५. ऊर्यादयः च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञाः भवन्ति।

६. पटपटाकृत्य।

उत्तराणि-२

७. गताद्यर्थे वर्तमानाः प्रादयः प्रथमान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

८. प्राचार्यः इति।

९. उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वो भवति।

१०. अतिमालः इति।

११. विग्रहे यत् नियतविभक्तिं तस्य उपसर्जनसंज्ञा भवति, किन्तु तस्य पूर्वनिपातो न भवति।

१२. उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वो भवति।

उत्तराणि-३

१३. क्रुष्टाद्यर्थे वर्तमानाः अवादयः तृतीयान्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

१४. अवकोकिलः इति।

१५. ग्लानाद्यर्थे वर्तमानाः पर्यादयः चतुर्थ्यन्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

१६. पर्यध्ययनः।

१७. क्रान्ताद्यर्थे वर्तमानाः निरादयः पञ्चम्यन्तेन समर्थेन सुबन्तेन नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञको भवति।

१८. निष्कौशाम्बिः।

१९. सप्तम्यन्ते पदे कर्मण्यण् इत्यादौ वाच्यत्वेन स्थितं यत्कुम्भादि तद्वाचकं पदमुपपदसंज्ञं भवति।

२०. कुम्भकारः।

उत्तराणि-४

२१. उपपदं सुबन्तं समर्थेन सह नित्यं समस्यते, स च तत्पुरुषसंज्ञको भवति। अयं च समासः अतिङन्तः।

२२. कुम्भकारः।

२३. गतिसंज्ञकस्य कारकसंज्ञकस्य उपपदसंज्ञकस्य च कृदन्तेन सह समासः कृदन्तात् सुबुत्पत्तेः प्राक् भवति।

२४. आघ्रः।

२५. संख्याऽव्ययादेः अङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति।

२६. द्व्यङ्गुलम्।

२७. निरङ्गुलम्।

उत्तराणि-५

२८. अहःसर्वैकदेशसंख्यातपुण्यशब्देभ्यः संख्याऽव्ययादेः च परो यः रात्रिशब्दः तदन्तस्य तत्पुरुषस्य समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति।

२९. अहोरात्रः।

३०. रात्राह्नाहान्तौ द्वन्द्वतत्पुरुषौ पुंसि भवतः।

३१. अहोरात्रः।

३२. संख्यापूर्वपदस्य रात्र्यन्तस्य च समासस्य नपुंसकलिङ्गे प्रयोगो भवति इति वचनस्यार्थः। त्रिरात्रम्, नवरात्रम् इत्यादीनि उदाहरणानि।

३३. राजाहःसखिशब्दान्तात् तत्पुरुषात् समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

३४. परमराजः इत्युदाहरणम्।

उत्तराणि-६

३५. समानाधिकरणे उत्तरपदे जातीये च परे महतः आकारः आदेशो भवति।

३६. राजन् इति समानाधिकरणे उत्तरपदे जातीये च परे महतः आकारः आन्महतः समानाधिकरणजातीययोः इति सूत्रेण।

३७. महाजातीयः इति।

३८. द्वि अष्टन् इत्यनयोः शब्दयोः संख्यावाचके उत्तरपदे परे आकारः अन्तादेशो भवति, न तु बहुव्रीहिसमासे अशीत्युत्तरपदे च परे।

३९. द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः इति सूत्रेण संख्यावाचके दशन् इत्युत्तरपदे परे द्विशब्दस्य आकारान्तादेशे द्वादशन् इति निष्पद्यते। ततः जसि द्वादश इति रूपम्।

४०. त्रिशब्दस्य संख्यावाचके उत्तरपदे परे त्रयस् इत्यादेशो भवति, न तु बहुव्रीहिसमासे अशीत्युत्तरपदे च परे।

४१. "अनेकाल्शित्सर्वस्य" इति परिभाषया त्रिशब्दस्य सम्पूर्णस्य स्थाने एव त्रयस् इत्यादेशो भवति।

उत्तराणि-७

४२. द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गं भवति।

४३. कुक्कुटमयूर्यौ ।

४४. अर्धपिप्पली।

४५. द्विगुसमासे प्राप्तापन्नालम्पूर्वपदे तत्पुरुषसमासे गतिसमासे च परवल्लिङ्गतायाः प्रतिषेधो भवति।

४६. पञ्चकपालः।

४७. प्राप्तापन्नालम्पूर्वकानामुदाहरणानि यथाक्रमं प्राप्तजीविकः जनः, आपन्नजीविकः जनः, अलङ्कुमारिः इति।

४८. निष्कौशाम्बिः।

४९. प्राप्त आपन्न इत्येतौ शब्दौ द्वितीयया सह समस्येते, अकारश्चानयोः अन्तादेशो भवति।

५०. प्राप्तजीविकः।

५१. अर्धर्चादिगणे पठिताः शब्दाः पुंसि क्लीबे च भवन्ति।

५२. अर्धर्चम् अर्धर्चः इति उदाहरणद्वयम्।

॥इति चतुर्थः पाठः॥

346sk05

५

बहुव्रीहिसमासः - व्यधिकरणबहुव्रीहिः समासान्तप्रत्ययः च

प्रस्तावना

अस्मिन् पाठे बहुव्रीहिसमासस्यालोचनं भवति। प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिसमासः इति तस्य सामान्यलक्षणम्। अन्यपदस्यार्थः अन्यपदार्थः। अन्यपदार्थः प्रधानो यस्मिन् सः अन्यपदार्थप्रधानः। अर्थाद् यस्मिन् समासे समस्यमानपदातिरिक्तस्य अन्यस्य पदस्यार्थः प्रधानो भवति स बहुव्रीहिसमासः। यथा पीताम्बरः इति। पीतम् अम्बरं यस्य स इति विग्रहः। अत्र बहुव्रीहौ समस्यमानपदे पीतम् इति अम्बरम् इति च। एतद्द्वयसमस्यमानपदाद् अतिरिक्तम् अन्यत्पदं यस्य इति। तदर्थः विष्णुः। निष्पन्नेन पीताम्बर इति पदेन विष्णोः बोधनात् अन्यपदार्थप्रधानत्वादयं बहुव्रीहिसमासः। अयं च बहुव्रीहिः "शेषो बहुव्रीहिः" इत्यधिकारसूत्रबलात् प्रवर्तते। अस्मिन् पाठे बहुव्रीहिसमासविधायकानि पञ्च सूत्राणि उपन्यस्तानि। वार्तिकानि अपि संगृहीतानि यैः बहुव्रीहिसमासः, पूर्वपदस्य उत्तरपदस्य लोपश्च विधीयते। ततः समासविधायकसूत्रवर्णनावसरे तदुदाहरणेषु समासान्तकार्यविधानाय यानि सूत्राणि अपेक्षितानि तान्यपि अत्र संगृहीतानि।

समासविधायकसूत्रार्थलेखनावसरे बहुत्र समस्यते इति पदस्य प्रयोगः अस्ति। समस्यते इति पदस्यार्थो भवति समाससंज्ञं भवति इति। यथा - "अनेकमन्यपदार्थे" इति सूत्रस्य "अनेकं प्रथमान्तम् अन्यपदार्थे वर्तमानं विकल्पेन समस्यते, स च बहुव्रीहिसंज्ञको भवति" इत्यर्थः। एतस्य तात्पर्यं भवति "अनेकं प्रथमान्तम् अन्यपदार्थे वर्तमानं विकल्पेन बहुव्रीहिसमाससंज्ञं भवति" इति। एवमेव अन्यत्र अवधेयम्।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- बहुव्रीहिसमासविधायकानि सूत्राणि जानीयात्।
- बहुव्रीहौ पूर्वपदस्योत्तरपदलोपविधायकानि वार्तिकानि जानीयात्।
- विधायकसूत्रोपयोगितया पुंवत्कार्य-तिलोप-सादेशविधायकानि सूत्राणि जानीयात्।
- समासान्तप्रत्ययविधायकानि सूत्राणि जानीयात्।

[५.१] शेषो बहुव्रीहिः॥ (२.२.२३)

सूत्रार्थः - "चार्थे द्वन्द्वः" इत्यस्मात् सूत्रात् पूर्वपर्यन्तं बहुव्रीह्यधिकारः।

सूत्रव्याख्या - सूत्रमिदम् अधिकारसूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासस्याधिकारो विधीयते। सूत्रेऽस्मिन् शेषः बहुव्रीहिः इति पदद्वयं प्रथमैकवचनान्तम्। "प्राक्कडारात्समासः" इत्यधिकृतम् अत्र। अयमधिकारः "चार्थे द्वन्द्वः" (२।२।२९) इत्यस्मात् सूत्रात्प्राक्पर्यन्तम्। अर्थात् "शेषो बहुव्रीहिः" इत्यस्मात् सूत्रात् "चार्थे द्वन्द्वः" इत्यतः प्राग् यावत् सूत्रैः यः समासः विधीयते स बहुव्रीहिसंज्ञको भवति। एतस्मिन् अधिकारे पञ्च सूत्राणि आगच्छन्ति - "अनेकमन्यपदार्थे", "संख्ययाव्ययासन्नदूराधिकसंख्याः संख्येये", "दिङ्नामान्यन्तराले", "तत्र तेनेदमिति सरूपे", "तेन सहेति तुल्ययोगे" च।

सूत्रे शेषो नाम उक्तादन्यः। "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इत्यनेन द्वितीयान्तस्य, "तृतीया तत्कृतार्थेन गुणवचनेन" इत्यनेन तृतीयान्तस्य, "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इत्यनेन चतुर्थ्यन्तस्य, "पञ्चमी भयेन" इत्यनेन पञ्चम्यन्तस्य, "षष्ठी" इत्यनेन षष्ठ्यन्तस्य "सप्तमी शौण्डैः" इत्यनेन सप्तम्यन्तस्य च समासो विहितः। अतः द्वितीयादिसप्तमीविभक्त्यन्तानाम् उक्तत्वम्। ततः अन्यः शेषः प्रथमान्तम्। एवं प्रथमान्तानां समास एव बहुव्रीहिसंज्ञकः इति फलति।

[५.२] अनेकमन्यपदार्थे॥ (२.२.२४)

सूत्रार्थः - अन्यपदस्यार्थे वर्तमानम् अनेकं प्रथमान्तं पदं विकल्पेन समस्यते, स च बहुव्रीहिसंज्ञको भवति।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासो विधीयते। सूत्रेऽस्मिन् अनेकम् इति प्रथमैकवचनान्तम् अन्यपदार्थे इति च सप्तम्येकवचनान्तं पदम्। "प्राक्कडारात्समासः", "विभाषा", "शेषो बहुव्रीहिः" इत्येतानि सूत्राणि अधिकृतानि। न एकम् अनेकम् इति नञ्तत्पुरुषसमासः। अन्यच्च तत्पदम् अन्यपदम् इति कर्मधारयसमासः। अन्यपदस्यार्थः अन्यपदार्थः, तस्मिन् अन्यपदार्थे इति षष्ठीतत्पुरुषसमासः। वर्तमानम् इत्यध्याहार्यम्। शेषग्रहणसामर्थ्यात् प्रथमान्तम् इति लभ्यते। प्रथमान्तम् इत्यस्य विशेषणम् अनेकम् इति। "अन्यपदस्यार्थे वर्तमानम् अनेकं प्रथमान्तं पदं विकल्पेन समासं प्राप्नोति, स च बहुव्रीहिसंज्ञको भवती"ति सूत्रस्यार्थः।

उदाहरणम् - सूत्रे प्रथमान्तानां पदानां समस्यमानतया द्वितीयान्तादीनामेव अन्यपदार्थत्वं सम्भवति। द्वितीयान्ते अन्यपदार्थे उदाहरणं प्राप्तम् उदकं यं सः प्राप्तोदको ग्रामः। तृतीयान्ते अन्यपदार्थे उदाहरणं भवति ऊढो रथो येन स ऊढरथः अनड्वान् इति। चतुर्थ्यन्ते अन्यपदार्थे उदाहरणं भवति उपहृतः पशुः यस्मै स उपहृतपशुः इति। पञ्चम्यन्ते अन्यपदार्थे उदाहरणं भवति उद्धृत ओदनो यस्याः सा उद्धृतौदना इति। षष्ठ्यन्ते अन्यपदार्थे उदाहरणं पीतमम्बरं यस्य सः पीताम्बरः इति। सप्तम्यन्ते अन्यपदार्थे उदाहरणं वीराः पुरुषा यस्मिन् स वीरपुरुषको ग्रामः इति।

तथाहि पीतम् अम्बरं यस्य सः इति लौकिकविग्रहे पीत सु अम्बर सु इत्यलौकिकविग्रहे अन्यपदार्थे विष्णवर्थे विद्यमानं पीत सु इति अम्बर सु इति च प्रथमान्तं प्रस्तुतसूत्रेण बहुव्रीहिसमाससंज्ञकं भवति। ततः पीत सु अम्बर सु इति समुदायस्य "कृत्तद्धितसमासाश्च" इत्यनेन सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुद्वयस्य लुकि पीत अम्बर इति भवति। तदा "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन समासविधायकसूत्रे प्रथमान्तमित्यस्य प्रथमानिर्दिष्टत्वात् पीत सु अम्बर सु इत्युभयोरेव तद्बोध्यत्वेन उपसर्जनत्वमस्ति। परन्तु "उपसर्जनं पूर्वम्" इत्यनेन कस्य पूर्वनिपातः इति शङ्कायां पूर्वनिपातविधायकं सूत्रं प्रवर्तते -

[५.३] सप्तमीविशेषणे बहुव्रीहौ॥ (२.२.३५)

सूत्रार्थः - बहुव्रीहिसमासे सप्तम्यन्तं विशेषणं च पूर्वं प्रयुज्यते।

सूत्रव्याख्या - सूत्रमिदं विधायकम्। अनेन सूत्रेण पूर्वनिपातो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् सप्तमीविशेषणे इति प्रथमाद्विवचनान्तं बहुव्रीहौ इति च सप्तम्येकवचनान्तं पदम्। सप्तमी च विशेषणं च सप्तमीविशेषणे इति इतरेतरद्वन्द्वसमासः। "प्रत्ययग्रहणे तदन्ता ग्राह्याः" इति नियमेन सप्तमीत्यस्य तदन्तविधौ सप्तम्यन्तम् इति लभ्यते। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति क्रियाविशेषणं द्वितीयैकवचनान्तम् अनुवर्तते। प्रयुज्यते इति क्रियापदम् अध्याहार्यम्। "बहुव्रीहिसमासे सप्तम्यन्तं पदं विशेषणं च पूर्वं प्रयुज्यते" इति सूत्रस्यार्थः।

समानाधिकरणानां प्रथमान्तानामेव अन्यपदार्थे बहुव्रीहिसमासविधानात् सूत्रे सप्तमीति पदं व्यर्थम्। तद् व्यर्थीभूय ज्ञापयति यत् क्वचिद् व्यधिकरणपदो बहुव्रीहिः भवति। अत एवोक्तं दीक्षितेन – "अत एव ज्ञापकाद् व्यधिकरणपदो बहुव्रीहिः" इति।

उदाहरणम् - विशेषणस्य पूर्वनिपाते पीताम्बरः इत्यादिकम् उदाहरणम्। पीतम् अम्बरं यस्य सः इति लौकिकविग्रहे पीत सु अम्बर सु इत्यलौकिकविग्रहे अन्यपदार्थे विष्णवर्थे "अनेकमन्यपदार्थे" इत्यनेन बहुव्रीहौ सुब्लुकि पीत अम्बर इति भवति। तदा उभयोः समासविधायकसूत्रे अनेकमित्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यत्वेन उभयोः उपसर्जनत्वात् कस्य पूर्वनिपात इति प्रश्ने प्रस्तुतेन सूत्रेण विशेषणभूतस्य पीतशब्दस्य पूर्वनिपातो भवति। ततः पीत अम्बर इति स्थिते सवर्णदीर्घे निष्पन्नात् पीताम्बर इत्यस्मात् सौ प्रक्रियाकार्ये पीताम्बरः इति रूपम्।

सप्तम्यन्तस्य पूर्वनिपाते उदाहरणं कण्ठेकालः इति। कण्ठे कालः यस्य सः इति लौकिकविग्रहे कण्ठ ङि काल सु इत्यलौकिकविग्रहे सप्तमीति ग्रहणसामर्थ्याद् व्यधिकरणबहुव्रीहिसमासो भवति। ततः प्रकृतसूत्रेण सप्तम्यन्तस्य पूर्वनिपाते, प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः ङेः सोश्च लुकि प्राप्ते ङेः लुकः निषेधाय सूत्रं प्रवृत्तम् -

[५.४] हलदन्तात् सप्तम्याः संज्ञायाम्॥ (६.३.८)

सूत्रार्थः - हलन्ताद् अदन्ताच्च सप्तम्याः उत्तरपदे परे संज्ञायां गम्यमानायां लुक् न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण लुकः निषेधो विधीयते। पदत्रयात्मके सूत्रेऽस्मिन् हलदन्तात् इति पञ्चम्येकवचनान्तं सप्तम्याः इति षष्ठ्येकवचनान्तं संज्ञायाम् इति च सप्तम्येकवचनान्तं पदम्। "अलुगुत्तरपदे" इति सूत्रमधिक्रियते। हल् च अत् च हलत्, हलत् अन्ते यस्य स हलदन्तः तस्मात् हलदन्तात् इति द्वन्द्वगर्भबहुव्रीहिसमासः। संज्ञायाम् इत्यनेन सह अन्वयाय गम्यमानायाम् इत्यध्याहार्यम्। "हलन्ताद् अदन्ताच्च सप्तम्याः उत्तरपदे परे संज्ञायां गम्यमानायां लुक् न भवती"ति सूत्रस्यार्थः।

उदाहरणम् - हलन्तात्परं सप्तम्या अलुकि उदाहरणं भवति त्वचिसारः। अदन्तात् परं सप्तम्या अलुकि कण्ठेकालः इत्युदाहरणम्। कण्ठे कालः यस्य सः इति लौकिकविग्रहे कण्ठ ङि काल सु इत्यलौकिकविग्रहे बहुव्रीहौ सप्तम्यन्तस्य पूर्वनिपाते, सुपः ङेः सोश्च लुकि प्राप्ते अदन्तात् कण्ठशब्दात् सप्तम्याः ङेर्विधानात् तस्यालुक् अनेन सूत्रेण भवति। ततः सुपः सोर्लुकि प्रक्रियाकार्ये कण्ठेकालः इति रूपम्।

पाठगतप्रश्नाः-१

१. "शेषो बहुव्रीहिः" इति सूत्रे शेषशब्देन कस्य ग्रहणम्।

२. "शेषो बहुव्रीहिः" इति सूत्रस्याधिकारः कियत्पर्यन्तम्।

३. बहुव्रीहिसमासविधायकानि पञ्च सूत्राणि कानि।

४. "अनेकमन्यपदार्थे" इति सूत्रस्यार्थः कः।

५. "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रस्यार्थः कः।

६. "हलदन्तात् सप्तम्याः संज्ञायाम्" इति सूत्रस्यार्थः कः।

७. अनेकम् इत्यनेन कस्य ग्रहणम्।

८. सप्तम्यन्तस्य विशेषणस्य च पूर्वनिपाते किं किमुदाहरणम्।

९. कण्ठेकालः इत्यत्र सप्तम्या लुक् कुतो न।

(५.४.१) प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः (वार्तिकम्)

वार्तिकार्थः - प्रादिभ्यः परः यः धातुजकृदन्तशब्दः तदन्तस्य प्रथमान्तस्य प्रथमान्तेन सह विकल्पेन बहुव्रीहिसमासो भवति, बहुव्रीहौ च पूर्वपदस्थस्य धातुजस्य उत्तरपदस्य विकल्पेन लोपो भवति।

वार्तिकव्याख्या - अत्र वार्तिके चकारेण बहुव्रीहिसमासविधानं स्वीक्रियते। वस्तुतस्तु "अनेकमन्यपदार्थे" इत्यनेन एव बहुव्रीहिसमासः सिध्यति। वार्तिकमिदं पूर्वपदस्थस्य धातुजस्य उत्तरपदस्य वैकल्पिकलोपविधायकम्।

उदाहरणम् - वार्तिकस्यास्य उदाहरणं प्रपर्णः प्रपतितपर्णो वा। प्रकृष्टानि पतितानि इति विग्रहे प्रेत्यस्य पतित जस् इत्यनेन "प्रादयो गताद्यर्थे प्रथमया" इत्यनेन वार्तिकेन नित्यं तत्पुरुषसमासे प्रक्रियाकार्ये प्रपतितानि इति रूपं निष्पद्यते। प्रपतितानि पर्णानि यस्य सः इति लौकिकविग्रहे प्रपतित जस् पर्ण जस् इत्यलौकिकविग्रहे अन्यपदार्थे वृक्षरूपार्थे "अनेकमन्यपदार्थे" इत्यनेन सूत्रेण बहुव्रीहिसमासः भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन विशेषणस्य प्रपतित जस् इत्यस्य पूर्वनिपाते समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः जस्द्वयस्य लुकि प्रपतितपर्ण इति भवति। तदा प्रोक्तेन वार्तिकेन बहुव्रीहौ पूर्वपदस्य प्रपतित इत्यस्य धातुजस्य उत्तरपदस्य पतित इत्यस्य विकल्पेन लोपे सौ प्रक्रियाकार्ये प्रपर्णः इति रूपम्। लोपस्य वैकल्पिकत्वात् तदभावपक्षे प्रपतितपर्णः इति रूपम्। एवं प्रपतितानि पलाशानि यस्य प्रपलाशः प्रपतितपलाशः पादपः इत्येतस्य वार्तिकस्योदाहरणम्।

(५.४.२) नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः (वार्तिकम्)

वार्तिकार्थः - नञः परस्य अस्त्यर्थकशब्दान्तस्य प्रथमान्तस्य प्रथमान्तेन सह विकल्पेन बहुव्रीहिसमासो भवति, बहुव्रीहौ च पूर्वपदस्थस्य अस्त्यर्थकस्य उत्तरपदस्य विकल्पेन लोपो भवति।

वार्तिकव्याख्या - अत्र वार्तिके चकारेण बहुव्रीहिसमासविधानं स्वीक्रियते। वस्तुतस्तु "अनेकमन्यपदार्थे" इत्यनेन एव बहुव्रीहिसमासः सिध्यति। वार्तिकमिदं पूर्वपदस्थस्य अस्त्यर्थकस्य उत्तरपदस्य वैकल्पिकलोपविधायकम्।

उदाहरणम् - वार्तिकस्यास्य उदाहरणं अपुत्रः अविद्यमानपुत्रो वा। न विद्यमानः इति विग्रहे नेत्यस्य विद्यमान सु इत्यनेन "नञ्" इत्यनेन सूत्रेण तत्पुरुषसमासे प्रक्रियाकार्ये अविद्यमानः इति रूपं निष्पद्यते। अविद्यमानः पुत्रो यस्य सः इति लौकिकविग्रहे अविद्यमान सु पुत्र सु इत्यलौकिकविग्रहे अन्यपदार्थे जनरूपार्थे "अनेकमन्यपदार्थे" इत्यनेन सूत्रेण बहुव्रीहिसमासः भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन विशेषणस्य अविद्यमान सु इत्यस्य पूर्वनिपाते समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुद्वयस्य लुकि अविद्यमानपुत्र इति जाते प्रोक्तेन वार्तिकेन बहुव्रीहौ पूर्वपदस्य अविद्यमान इत्यस्य अस्त्यर्थकस्य उत्तरपदस्य विद्यमान इत्यस्य विकल्पेन लोपे सौ प्रक्रियाकार्ये अपुत्रः इति रूपम्। लोपस्य वैकल्पिकत्वात् तदभावपक्षे अविद्यमानपुत्रः इति रूपम्।

(५.४.३) सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च (वार्तिकम्)

वार्तिकार्थः - सप्तम्यन्तसहितस्य उपमानसहितस्य च पूर्वपदस्य पदान्तरेण समासः पूर्वपदस्य उत्तरपदलोपश्च भवति।

वार्तिकव्याख्या - अत्र वार्तिकेन चकारेण बहुव्रीहिसमासविधानं स्वीक्रियते। वस्तुतस्तु "अनेकमन्यपदार्थे" इत्यनेन एव बहुव्रीहिसमासः सिध्यति। वार्तिकमिदं पूर्वपदस्थस्य उत्तरपदस्य लोपविधायकम्।

उदाहरणम् - वार्तिकस्यास्य सप्तम्यन्तसहितपूर्वपदपक्षे उदाहरणं तावत् कण्ठेकालः इति। कण्ठे तिष्ठतीति विग्रहे "सुपि स्थः" इत्यनेन कण्ठोपपदे स्थाधातोः कप्रत्यये कण्ठेस्थः इति पदं निष्पन्नम्। कण्ठेस्थः कालः यस्य इति लौकिकविग्रहे कण्ठेस्थ सु काल सु इत्यलौकिकविग्रहे अन्यपदार्थे शिवरूपार्थे "अनेकमन्यपदार्थे" इत्यनेन सूत्रेण बहुव्रीहिसमासः भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन विशेषणस्य कण्ठेस्थ सु इत्यस्य पूर्वनिपाते समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुद्वयस्य लुकि कण्ठेस्थकाल इति भवति। तदा प्रोक्तेन वार्तिकेन पूर्वपदस्य कण्ठेस्थ इत्यस्य उत्तरपदस्य स्थ इत्यस्य लोपे सौ प्रक्रियाकार्ये कण्ठेकालः इति रूपम्।

उपमानसहितपूर्वपदे समासस्योदाहरणम् उष्ट्रमुखः इति। उष्ट्रमुखमिव मुखं यस्य इति विग्रहे बहुव्रीहौ प्रक्रियाकार्ये उष्ट्रमुख मुख इति जाते उपमानसहितस्य उष्ट्रमुखेत्यस्य उत्तरपदस्य लोपे प्रक्रियाकार्ये उष्ट्रमुखः इति रूपम्।

पाठगतप्रश्नाः-२

१०. "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः" इति वार्तिकस्यार्थः कः।

११. प्रपर्णः इत्यत्र कः विग्रहः।

१२. "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" इति वार्तिकस्यार्थः कः।

१३. अपुत्रः इत्यत्र कः विग्रहः।

१४. "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकस्यार्थः कः।

१५. "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकस्य सप्तम्यन्तसहितपूर्वपदपक्षे किमुदाहरणम्।

१६. "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकस्य उपमानसहितपूर्वपदपक्षे किमुदाहरणम्।

[५.५] स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु॥ (६.३.३४)

सूत्रार्थः - तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात् पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे भवति, न तु पुरण्यां प्रियादौ च परतः।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पुंवद्भावो विधीयते। सूत्रेऽस्मिन् स्त्रियाः पुंवत् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियाम् अपूरणीप्रियादिषु इति पदच्छेदः। अत्र स्त्रियामिति पञ्चम्यन्तम्, पुंवत् इत्यव्ययम्, भाषितपुंस्कादनूङ् इति प्रथमैकवचनान्तम्, समानाधिकरणे

स्त्रियाम् इत्युभयं सप्तम्येकवचनान्तम् अपूरणीप्रियादिषु इति च सप्तमीबहुवचनान्तं पदम्। "अलुगुत्तरपदे" इत्यस्मात् सूत्राद् उत्तरपदे इत्यनुवर्तते। भाषितपुंस्कादनूङ् स्त्रियाः पुंवत् अपूरणीप्रियादिषु समानाधिकरणे स्त्रियाम् उत्तरपदे इत्यन्वयः।

भाषितपुंस्कादनूङ् इति लुप्तषष्ठ्येकवचनान्तं पदम्। तच्च स्त्रियाः इत्यस्य विशेषणम्। ऊङः अभावः अनूङ् इत्यव्ययीभावसमासः। भाषितः पुमान् येन तद्भाषितपुंस्कम् बहुव्रीहिः। तदस्यास्तीति विग्रहे अर्शआद्यचा भाषितपुंस्कशब्दो निष्पद्यते। यः शब्दः यत् प्रवृत्तिनिमित्तम् आश्रित्य पुंलिङ्गे प्रवर्तते तदेव प्रवृत्तनिमित्तमाश्रित्य यदि अन्यस्मिन् लिङ्गे प्रवर्तते तदा तद् भाषितपुंस्कं भवति। भाषितपुंस्काद् अनुङ् यस्यां सा भाषितपुंस्कादनूङ् तस्याः इति बहुव्रीहिसमासः। अत्र निपातनात्समासे पञ्चम्या अलुक् षष्ठ्याश्च लुक्। स्त्रियाः इत्यस्य स्त्रीवाचकशब्दस्येत्यर्थः। भाषितपुंस्कादनूङ् स्त्रियाः इत्यस्यार्थः भवति - यस्मात् परः ऊङ्-प्रत्ययो न विहितः तादृशस्य भाषितपुंस्कस्य स्त्रीवाचकशब्दस्य इति।

प्रिया आदिर्येषां ते प्रियादयः इति तद्गुणसंविज्ञानबहुव्रीहिः। पूरणी च प्रियादयश्च पूरणीप्रियादयः, तेषु पूरणीप्रियादिषु इति इतरेतरद्वन्द्वसमासः। न पूरणीप्रियादिषु अपूरणीप्रियादिषु इति नञ्समासः। पूरणीशब्देन अत्र पूरणार्थप्रत्ययान्तानां स्त्रीलिङ्गशब्दानां द्वितीयादीनां ग्रहणम्। प्रियादयः नाम प्रियादिगणे पठिताः शब्दाः। उत्तरपदे इत्यनेनान्वये अपूरणीप्रियादिषु इत्यस्यार्थो भवति - पूरणार्थप्रत्ययान्तेषु स्त्रीलिङ्गशब्देषु प्रियादिषु उत्तरपदेषु च परतः न भवति इति।

स्त्रियाम् इति उत्तरपदे इत्यस्य विशेषणं तेन स्त्रीलिङ्गवाचके उत्तरपदे परे इत्यर्थः। एवं सूत्रार्थः समायाति - "तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात् पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे भवति, न तु पुरण्यां प्रियादौ च परतः" इति।

सूत्रे अनूङ् इति पदस्य किं प्रयोजनमिति चेदुच्यते वामोरूभार्यः इति। वामोरुशब्दात् स्त्रीत्वविवक्षायां "सहितशफलक्षणवामादेश्च" इत्यनेन सूत्रेण ऊङि वामोरूः इति निष्पन्नम्। वामोरूः भार्या यस्य सः इति लौकिकविग्रहे वामोरू सु भार्या सु इत्यलौकिकविग्रहे बहुव्रीहिसमासे प्रक्रियाकार्ये वामोरू भार्या इति भवति। अस्मिन् सूत्रे अनूङ् इति पदस्याभावे वामोरूशब्दस्य भाषितपुंस्कत्वात् स्त्रीलिङ्गे उत्तरपदे भार्याशब्दे परे तस्य पुंवद्भावापत्तिः स्यात्। तेन वामोरुभार्यः इत्यनिष्टं रूपं भवति। तद्वारणाय एव सूत्रे अनूङ् इति पदम्। अनूङ् इति पदस्य सत्त्वात् वामोरूशब्दस्य ऊङ्-प्रत्ययान्तत्वात् नास्ति पुंवद्भावः।

सूत्रे अपूरणीप्रियादिषु इति पदस्य सत्त्वात् कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमाः रात्रयः इत्यत्र पञ्चमीति पूरणार्थप्रत्ययान्ते स्त्रीलिङ्गे उत्तरपदे परे, कल्याणी प्रिया यस्य स कल्याणीप्रियः इत्यत्र स्त्रीलिङ्गे प्रियाशब्दे उत्तरपदे परे न पुंवद्भावः।

उदाहरणम् - सूत्रस्योदाहरणं भवति चित्रगुः इति। चित्रा गावः यस्य सः इति लौकिकविग्रहे चित्रा जस् गो जस् इत्यलौकिकविग्रहे बहुव्रीहौ विशेषणस्य पूर्वनिपाते, प्रातिपदिकत्वात् सुब्लुकि चित्रा गो इति भवति। चित्राशब्दस्य भाषितपुंस्कत्वमस्ति पुंलिङ्गे अपि समानार्थे प्रयोगात्। चित्रा इत्यस्मात्परं समानाधिकरणं स्त्रीलिङ्गकः गोशब्दः अस्ति तथा चित्राशब्दाद् ऊङ् अपि नास्ति। अतः प्रोक्तेन सूत्रेण चित्रा गो इति स्थिते समानाधिकरणे स्त्रीलिङ्गे गोशब्दे परे भाषितपुंस्कस्य चित्राशब्दस्य पुंवद्भावे चित्र गो

इति भवति। ततः उपसर्जनसंज्ञकस्य गोशब्दस्य अन्त्यस्य ओकारस्य "गोस्त्रियोरुपसर्जनस्य" इत्यनेन ह्रस्वे उकारे प्रक्रियाकार्ये निष्पन्नात् चित्रगुशब्दात् विशेष्यानुसारेण पुंसि सौ चित्रगुः इति रूपं निष्पद्यते। एवमेव रूपवती भार्या यस्य स रूपवद्भार्यः इत्यादिकमस्य सूत्रस्योदाहरणम्।

[५.६] अप्पूरणीप्रमाण्योः॥ (५.४.११६)

सूत्रार्थः - पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात् प्रमाण्यन्ताच्च बहुव्रीहेः समासान्तः तद्धितसंज्ञकः अप्प्रत्ययः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अप्प्रत्ययः विधीयते। सूत्रेऽस्मिन् अप् इति प्रथमैकवचनान्तं पूरणीप्रमाण्योः इति सप्तमीद्विवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्" इत्यस्मात् सूत्रात् बहुव्रीहौ इति पदम् अनुवर्तते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। पूरणी च प्रमाणी च पूरणीप्रमाण्यौ तयोः पूरणीप्रमाण्योः इति इतरेतरद्वन्द्वसमासः। "परश्च" इत्यधिकारबलात् पूरणीप्रमाण्योः इत्यस्य बहुव्रीहौ इत्यस्य च पञ्चम्यन्ततया विपरिणामो भवति। तेन पूरणीप्रमाणीभ्याम् इति बहुव्रीहेः इति च लभ्यते। पूरणीप्रमाणीभ्याम् इत्यत्र तदन्तविधौ बहुव्रीहेः इत्यनेनान्वये पूरण्यन्तात् प्रमाण्यन्ताच्च बहुव्रीहेः इति भवति। पूरण्यन्तत्वेन "तस्य पूरणे डट्" इत्यादिभिः सूत्रैः विहिता ये प्रत्ययाः तदन्ताः गृह्यन्ते। प्रमाणीशब्दः प्रमीयते अनेनेति विग्रहे प्रपूर्वकात् माधातोः ल्युटि निष्पन्नस्य प्रमाणशब्दस्य स्त्रियां ङीपि निष्पन्नः। एवं सूत्रार्थः समायाति - "पूरण्यन्तात् प्रमाण्यन्तात् च बहुव्रीहेः समासान्तः तद्धितसंज्ञकः अप्प्रत्ययो भवति" इति।

उदाहरणम् - सूत्रस्यास्य पूरण्यन्ते बहुव्रीहौ उदाहरणं भवति कल्याणीपञ्चमाः इति। पञ्चानां पूरणी इत्यर्थे षष्ठ्यन्तात् पञ्चन्शब्दात् मटि स्त्रियां ङीपि पञ्चमीति निष्पद्यते। कल्याणी पञ्चमी यासां रात्रीणां ताः इति लौकिकविग्रहे कल्याणी सु पञ्चमी सु इत्यलौकिकविग्रहे बहुव्रीहौ विशेषणस्य पूर्वनिपाते, सुब्लुकि कल्याणीपञ्चमी इति भवति। तदा कल्याणीपञ्चमीति बहुव्रीहेः पूरण्यन्तत्वात् ततः प्रकृतसूत्रेण अप्प्रत्यये, अपः पकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे कल्याणीपञ्चमी अ इति भवति। तदा कल्याणीपञ्चमीत्यस्य भसंज्ञायां "यस्येति च" इत्यनेन ईकारलोपे सर्वसंयोगे निष्पन्नात् कल्याणीपञ्चमशब्दात् स्त्रियां टापि ततः जसि प्रक्रियाकार्ये कल्याणीपञ्चमाः इति रूपम्।

प्रमाणीशब्दान्ते बहुव्रीहौ उदाहरणं स्त्री प्रमाणं यस्य सः स्त्रीप्रमाणः पुरुषः इति।

पाठगतप्रश्नाः-३

१७. "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रेण किं विधीयते।

१८. "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रस्यार्थः कः।

१९. "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रे अनूङ् इति पदस्य किं प्रयोजनम्।

२०. "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रे अपूरणीप्रियादिषु इति पदस्य किं प्रयोजनम्।

२१. "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रस्य किमुदाहरणम्।

२२. "अप्पूरणीप्रमाण्योः" इति सूत्रेण किं विधीयते।

२३. "अप्पूरणीप्रमाण्योः" इति सूत्रस्यार्थः कः।

२४. "अप्पूरणीप्रमाण्योः" इति सूत्रस्य पूरण्यन्ते प्रमाण्यन्ते च बहुव्रीहौ किं किमुदाहरणम्।

[५.७] संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये॥ (२.२.२५)

सूत्रार्थः - संख्येयवाचकेन एकादिसंख्याशब्देन अव्ययादयः विकल्पेन समस्यन्ते, स च बहुव्रीहिसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासो विधीयते। सूत्रेऽस्मिन् संख्यया अव्ययासन्नदूराधिकसंख्याः संख्येये इति पदच्छेदः। संख्यया इति तृतीयैकवचनान्तम्, अव्ययासन्नदूराधिकसंख्याः इति प्रथमाबहुवचनान्तं संख्येये इति च सप्तम्येकवचनान्तं पदम्। "प्राक्कडारात्समासः", "विभाषा", "शेषो बहुव्रीहिः" इत्येतानि सूत्राणि अधिकृतानि। अव्ययं च आसन्नं च अदूरञ्च अधिकं च संख्या च अव्ययासन्नादूराधिकसंख्याः इति इतरेतरद्वन्द्वसमासः। अव्ययासन्नादूराधिकसंख्याः सुबन्ताः इत्यर्थः। अत्र संख्याशब्दो न स्वरूपपरः स हि एकादिशब्दपरकः। विंशतेः प्राग् एकादिशब्दाः संख्येयेषु वर्तन्ते, ते विशेष्यलिङ्गा भवन्ति। विंशत्यादिनवतिपर्यन्ताः शब्दास्तु नित्यमेकवचनान्ताः स्त्रीलिङ्गे विद्यमानाः संख्यायां संख्येये चार्थे वर्तन्ते। अत्र अमरवचः प्रमाणम् -

"विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्योः।

संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः।।" इति।

एवं संख्येयवाचकाः ये शब्दा भवन्ति ते एव संख्येयार्थाः संख्याः। अत्र च सूत्रार्थो भवति - "संख्येयवाचकेन एकादिसंख्याशब्देन अव्ययादयः विकल्पेन समस्यन्ते, स च बहुव्रीहिसंज्ञको भवति" इति।

उदाहरणम् - सूत्रे अव्ययेन सह बहुव्रीहौ उदाहरणम् उपदशाः इति। अत्र उपेति समीपार्थे वर्तमानम् अव्ययम्। दशानां समीपे ये इति लौकिकविग्रहे दशन् आम् उप इत्यलौकिकविग्रहे प्रकृतसूत्रेण संख्येयवाचकेन संख्याशब्देन दशन् आम् इत्यनेन उपेति अव्ययं बहुव्रीहिसमाससंज्ञं भवति। ततः अव्ययस्य पूर्वनिपाते, प्रातिपदिकसंज्ञायां सुब्लुकि उपदशन् इति रूपं निष्पद्यते। ततः समासान्ते डचि प्रक्रियाकार्ये उपदशाः इति रूपम्।

आसन्नशब्देन सह समासे उदाहरणं भवति विंशतेः आसन्नाः आसन्नविंशाः इति। अदूरशब्देन सह समासे उदाहरणं त्रिंशतः अदूराः अदूरत्रिंशाः इति। अधिकशब्देन सह समासे उदाहरणं चत्वारिंशतः अधिकाः अधिकचत्वारिंशाः इति। संख्यया समासे उदाहरणं द्वौ च त्रयश्च द्वित्राः इति।

तत्र उपदशन् इति स्थिते समासान्तस्य डचः विधानाय सूत्रं प्रवृत्तम्-

[५.८] बहुव्रीहौ संख्येये डजबहुगणात्॥ (५.४.७३)

सूत्रार्थः - संख्येये यो बहुव्रीहिः तस्मात् समासान्तः तद्धितसंज्ञकः डच्प्रत्ययो भवति, किन्तु बहुगणशब्दान्ताद् बहुव्रीहेः न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः डच्प्रत्ययो विधीयते। सूत्रेऽस्मिन् बहुव्रीहौ संख्येये डच् अबहुगणात् इति पदच्छेदः। बहुव्रीहौ संख्येये इति च सप्तम्येकवचनान्तं पदम्। डच् इति प्रथमैकवचनान्तं अबहुगणात् इति च पञ्चम्येवचनान्तं पदम्। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। "परश्च" इत्यधिकारबलात् बहुव्रीहौ इत्यस्य पञ्चम्यन्ततया विपरिणामो भवति। तस्य च संख्येये इत्यनेन अन्वयात् संख्येये यो बहुव्रीहिः तस्माद् इत्यर्थः। संख्येये बहुव्रीहिर्नाम संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये इत्यनेन विहितो यो बहुव्रीहिः। न बहुगणः अबहुगणः तस्माद् अबहुगणादिति नञ्समासः। बहुगणशब्दान्तात् बहुव्रीहेः न भवतीति तात्पर्यम्। एवं सूत्रार्थः समायाति - "संख्येये यो बहुव्रीहिः तस्मात् समासान्तः तद्धितसंज्ञकः डच्प्रत्ययो भवति, किन्तु बहुगणशब्दान्ताद् बहुव्रीहेः न भवति" इति।

सूत्रे अबहुगणाद् इति पदस्य सत्त्वाद् बहूनां समीपे ये सन्ति, गणस्य समीपे ये सन्ति इति विग्रहे यथाक्रमं निष्पन्नाद् उपबहुशब्दाद् उपगणशब्दाच्च डच्प्रत्ययो न भवति।

उदाहरणम् - दशानां समीपे ये इति लौकिकविग्रहे दशन् आम् उप इत्यलौकिकविग्रहे प्रकृतसूत्रेण संख्येयवाचकेन संख्याशब्देन दशन् आम् इत्यनेन उपेति अव्ययं बहुव्रीहिसमाससंज्ञं भवति। ततः अव्ययस्य पूर्वनिपाते, प्रातिपदिकसंज्ञायां सुब्लुकि उपदशन् इति स्थिते प्रस्तुतसूत्रेण समासान्ते डचि, डचयोः यथाक्रमं "चुटू" इत्यनेन "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनने तयोर्लोपे उपदशन् अ इति स्थिते पूर्वस्य भसंज्ञायां "नस्तद्धिते" इत्यनेन टेरनः लोपे सर्वसंयोगे उपदशशब्दो निष्पद्यते। ततः जसि उपदशाः इति रूपम्।

आसन्नशब्देन सह समासे उदाहरणं भवति आसन्नविंशाः इति। तत्र विंशतेः आसन्नाः इति विग्रहे समासे आसन्न विंशति इति स्थिते पूर्वसूत्रेण डचि आसन्न विंशति अ इति जाते तिशब्दस्य लोपाय सूत्रं प्रवृत्तम्-

[५.९] ति विंशतेर्डिति॥ (६.४.१४२)

सूत्रार्थः - डिति परे विंशत्यन्तस्य भस्य तिशब्दस्य लोपः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण तिलोपः विधीयते। सूत्रेऽस्मिन् ति विंशतेः डिति इति पदच्छेदः। ति इति लुप्तषष्ठ्येकवचनान्तम्, विंशतेः इति षष्ठ्येकवचनान्तं डिति इति च सप्तम्येकवचनान्तं पदम्। "भस्य" इत्यधिकृतम्। "अल्लोपोऽनः" इत्यस्मात् सूत्रात् लोपः इत्यनुवर्तते। विंशतेः इत्यनेन विंशत्यन्तस्य ग्रहणम्। डिति विंशतेः भस्य ति लोपः इत्यन्वयः। एवं सूत्रार्थः समायाति - "डिति परे विंशत्यन्तस्य भस्य तिशब्दस्य लोपः भवति" इति।

उदाहरणम् - सूत्रस्यास्य आसन्नविंशाः इत्युदाहरणम्। तत्र विंशतेः आसन्नाः इति विग्रहे "संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये" इति सूत्रेण समासे आसन्न विंशति इति स्थिते पूर्वसूत्रेण डचि आसन्न विंशति अ इति स्थिते प्रकृतसूत्रेण डिति डचि परे भसंज्ञकस्य आसन्नविंशतिशब्दस्य ति इत्यंशस्य लोपो भवति। ततः लोपे आसन्नविंश अ इति जाते "यस्येति च" इत्यकारलोपे सर्वसंयोगे निष्पन्नाद् आसन्नविंशशब्दात् जसि आसन्नविंशा इति रूपम्।

पाठगतप्रश्नाः-४

२५. "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये" इति सूत्रस्यार्थः कः।

२६. "बहुव्रीहौ संख्येये डजबहुगणात्" इति सूत्रस्यार्थः कः।

२७. "बहुव्रीहौ संख्येये डजबहुगणात्" इति सूत्रे अबहुगणात् इति पदस्य किं प्रयोजनम्।

२८. "ति विंशतेर्डिति" इति सूत्रस्यार्थः कः।

२९. "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये" इत्यस्य सविग्रहमेकमुदाहरणं देयम्।

३०. उपदशाः इत्यत्र डच्प्रत्ययः कथं केन सूत्रेण।

३१. आसन्नविंशाः इत्यत्र विंशतेस्तिलोपः केन सूत्रेण।

[५.१०] दिङ्नामान्यन्तराले॥ (२.२.२६)

सूत्रार्थः - दिशः नामानि अन्तराले वाच्ये विकल्पेन समस्यन्ते, स बहुव्रीहिसंज्ञको भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासो विधीयते। सूत्रेऽस्मिन् दिङ्नामानि अन्तराले इति पदच्छेदः। दिङ्नामानि इति प्रथमाबहुवचनान्तम् अन्तराले च सप्तम्येकवचनान्तं पदम्। "प्राक्कडारात्समासः", "विभाषा", "शेषो बहुव्रीहिः" इत्येतानि सूत्राणि अधिकृतानि। दिशः नामानि दिङ्नामानि इति षष्ठीतत्पुरुषसमासः। दिङ्नामानि नाम दिग्वाचकानि दिगर्थे रूढानि सुबन्तानि इति। अन्तराले इत्यत्र वाच्ये इत्यध्याहार्यम्। अतः सूत्रार्थो भवति - "दिग्वाचकानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते, स च बहुव्रीहिसंज्ञको भवति" इति।

उदाहरणम् - सूत्रस्यास्योदाहरणं तावत् दक्षिणपूर्वा इति। दक्षिणस्याश्च पूर्वस्याश्च दिशः अन्तरालम् इति लौकिकविग्रहे दक्षिणा ङस् पूर्वा ङस् इत्यलौकिकविग्रहे प्रकृतसूत्रेण दिग्वाचकं दक्षिणा

ङस् इति पूर्वा ङस् इति च बहुव्रीहिसमाससंज्ञं भवति। ततः प्रक्रियाकार्ये दक्षिणापूर्वा इति जाते "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इत्यनेन वार्तिकेन दक्षिणाशब्दस्य पुंवद्भावे दक्षिणपूर्वा इति निष्पद्यते। निष्पन्नाद् दक्षिणपूर्वा इत्यस्मात् शब्दात् दिग् इति विशेष्यानुसारेण स्त्रियां सौ दक्षिणपूर्वा इति रूपम्।

[५.११] तत्र तेनेदमिति सरूपे॥ (२.२.२७)

सूत्रार्थः - सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे कर्मव्यतिहारे द्योत्ये विकल्पेन समस्येते, स बहुव्रीहिसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासो विधीयते। सूत्रेऽस्मिन् तत्र तेन इदम् इति सरूपे इति पदच्छेदः। तत्र इति सप्तम्यन्तमव्ययम्। तेन इति तृतीयैकवचनान्तं पदम्। इति इत्यव्ययपदम्। सरूपे इति सप्तम्येकवचनान्तं पदम्। "प्राक्कडारात्समासः", "विभाषा", "शेषो बहुव्रीहिः" इत्येतानि सूत्राणि अधिकृतानि।

तत्र इत्यनेन सप्तम्यन्ते पदे विवक्षिते। ग्रहणविषये इति प्रथमाद्विवचनान्तं तद्विशेषणम् अध्याहार्यम्। गृह्यते अस्मिन्निति विग्रहे अधिकरणे ल्युटा ग्रहणम् इति निष्पद्यते। ग्रहणं नाम केशादिकम्। तद् विषयः वाच्यं ययोस्ते ग्रहणविषये इति बहुव्रीहिः। ग्रहणवाचके इत्यर्थः।

तेन इत्यनेन तृतीयान्ते पदे विवक्षिते। प्रहरणविषये इति प्रथमाद्विवचनान्तं तद्विशेषणम् अध्याहार्यम्। प्रह्रियते अनेनेति विग्रहे करणे ल्युटा प्रहरणम् इति निष्पद्यते। प्रहरणं नाम दण्डादिकम्। तद् विषयः वाच्यं ययोस्ते प्रहरणविषये इति बहुव्रीहिः। प्रहरणवाचके इत्यर्थः।

सरूपे इति प्रथमाद्विवचनान्तं पदविशेषणम्। ग्रहणविषये इति सप्तम्यन्तेन सह प्रहरणविषये इति च तृतीयान्तेन सह अन्वेति। इदम् इत्यर्थनिर्देशः। अत्र युद्धं प्रवृत्तम् इति विशेष्यम् अध्याहार्यम्। कर्मव्यतिहारे द्योत्ये इत्यप्यध्याहार्यम्। कर्मव्यतिहारो नाम परस्परग्रहणं परस्परप्रहरणं च।

इतिशब्दः लौकिकप्रसिद्धप्रकारवाचकः। अर्थात् केशाकेशीत्यादिलौकिकप्रयोगे यावानर्थः प्रसिद्धः तावत्यर्थे एवायं बहुव्रीहिर्भवति।

अत्र च सूत्रार्थो भवति - "सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे कर्मव्यतिहारे द्योत्ये विकल्पेन समस्येते, स बहुव्रीहिसंज्ञको भवती"ति।

उदाहरणम् - सूत्रस्यास्य सप्तम्यन्तसमासे केशाकेशि इत्युदाहरणम्। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति लौकिकविग्रहे केश सुप् केश सुप् इत्यलौकिकविग्रहे प्रकृतसूत्रेण सप्तम्यन्तयोः बहुव्रीहिसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुब्लुकि केश केश इति भवति। ततः "अन्येषामपि दृश्यते" इत्यनेन सूत्रेण पूर्वपदस्याकारस्य बहुव्रीहौ कर्मव्यतिहारे द्योत्ये दीर्घे केशाकेश इति भवति। ततः कर्मव्यतिहारे समासान्ते इच्प्रत्यये अनुबन्धलोपे केशाकेश इ इति भवति। ततः केशाकेशशब्दस्य भसंज्ञायां अकारलोपे सर्वसंयोगे निष्पन्नात् केशाकेशि इति शब्दात् सौ प्रक्रियाकार्ये केशाकेशि इति रूपम्। एवमेव तृतीयान्तसमासे दण्डैश्च दण्डैश्च गृहीत्वा इदं युद्धं प्रवृत्तं दण्डादण्डि इत्युदाहरणम्।

केशाकेशि दण्डादण्डि इत्यादौ समासान्तस्य इचो विधायकं सूत्रं प्रवृत्तम् -

[५.१२] इच्कर्मव्यतिहारे॥ (५.४.१२७)

सूत्रार्थः - कर्मव्यतिहारे यो बहुव्रीहिः तस्मात् समासान्तः तद्धितसंज्ञक इच्प्रत्ययो भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः इच्प्रत्ययो विधीयते। सूत्रेऽस्मिन् इच् इति प्रथमैकवचनान्तं कर्मव्यतिहारे इति च सप्तम्येकवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्" इत्यस्मात् सूत्रात् बहुव्रीहौ इति पदम् अनुवर्तते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। "परश्च" इत्यधिकारबलात् बहुव्रीहौ इत्यस्य पञ्चम्यन्ततया विपरिणामो भवति। तस्य च कर्मव्यतिहारे इत्यनेन अन्वयात् कर्मव्यतिहारे यो बहुव्रीहिः तस्माद् इत्यर्थः। एवं सूत्रार्थः समायाति - "कर्मव्यतिहारे यो बहुव्रीहिः तस्मात् समासान्तः तद्धितसंज्ञक इच्प्रत्ययो भवति" इति।

उदाहरणम् - सूत्रस्यास्य सप्तम्यन्तसमासे केशाकेशि इत्युदाहरणम्। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति लौकिकविग्रहे प्रक्रियाकार्ये केशाकेश इति स्थिते प्रकृतसूत्रेण कर्मव्यतिहारे बहुव्रीहेः केशाकेश इत्यस्मात् समासान्त इच्प्रत्ययो भवति। तत इचश्चकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे केशाकेश इ इति स्थिते, पूर्वस्य "यचि भम्" इत्यनेन भसंज्ञायां "यस्येति च" इत्यनेन भसंज्ञकस्य अन्त्यस्याकारस्य लोपे सर्वसंयोगे केशाकेशि इति निष्पद्यते। ततः निष्पन्नात् केशाकेशि इत्यस्मात् नपुंसके प्रक्रियाकार्ये सौ केशाकेशि इति रूपम्।

पाठगतप्रश्नाः-५

३२. "दिङ्नामान्यन्तराले" इति सूत्रस्यार्थः कः।

३३. "दिङ्नामान्यन्तराले" इति सूत्रस्य किमुदाहरणम्।

३४. "तत्र तेनेदमिति सरूपे" इति सूत्रस्यार्थः कः।

३५. "इच्कर्मव्यतिहारे" इति सूत्रस्यार्थः कः।

३६. केशाकेशि इत्यत्र कः विग्रहः।

[५.१३] तेन सहेति तुल्ययोगे॥ (२.२.२८)

सूत्रार्थः - तुल्ययोगे वर्तमानं सह इत्यव्ययं तृतीयान्तेन सह विकल्पेन समस्यते, स च समासो बहुव्रीहिसंज्ञको भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासो विधीयते। सूत्रेऽस्मिन् तेन सह इति तुल्ययोगे इति पदच्छेदः। तेन इति सप्तम्यन्तमव्ययम्। सह इति साहित्यबोधकम्

अव्ययपदम्। इति इत्यव्ययपदम्। तुल्ययोगे इति सप्तम्येकवचनान्तं पदम्। युगपत्कालिकक्रियायोगे इत्यर्थः। तेन इत्यनेन तृतीयान्तेन इति लभ्यते। "प्राक्कडारात्समासः", "विभाषा", "शेषो बहुव्रीहिः" इत्येतानि सूत्राणि अधिकृतानि। एवं च सूत्रार्थो भवति - "तुल्ययोगे वर्तमानं सह इत्यव्ययं तृतीयान्तेन सह विकल्पेन समस्यते, स च समासो बहुव्रीहिसंज्ञको भवती"ति।

उदाहरणम् - सूत्रस्यास्य सहपुत्रः सपुत्रो वा उदाहरणम्। पुत्रेण सह इति लौकिकविग्रहे पुत्र टा सह इत्यलौकिकविग्रहे प्रकृतसूत्रेण तृतीयान्तेन पुत्र टा इत्यनेन तुल्ययोगे वर्तमानं सहेत्यव्ययं बहुव्रीहिसमाससंज्ञकं भवति। ततः प्रातिपदिकत्वात् सुब्लुकि प्रक्रियाकार्ये सहपुत्र इति निष्पद्यते। ततः सहेत्यस्य विकल्पेन स इत्यादेशे निष्पन्नात् सपुत्रशब्दात् सौ सपुत्रः इति रूपम्। सहस्य सादेशाभावपक्षे च सौ सहपुत्रः इति रूपम्।

सहपुत्रः सपुत्रः इत्यादौ विकल्पेन सादेशविधायकं सूत्रं प्रवृत्तम् -

[५.१४] वोपसर्जनस्य॥ (६.३.८२)

सूत्रार्थः - उपसर्जनसर्वावयवकस्य बहुव्रीहेः अवयवस्य सहस्य विकल्पेन सादेशो भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण सहस्य विकल्पेन सादेशो विधीयते। सूत्रेऽस्मिन् वा उपसर्जनस्य इति पदच्छेदः। वा इति विकल्पार्थकमव्ययपदम्। उपसर्जनस्येति षष्ठ्येकवचनान्तं पदम्। "अलुगुत्तरपदे" इत्यतः उत्तरपदे इत्यधिकृतम्। "सहस्य सः संज्ञायाम्" इत्यस्मात् सूत्रात् सहस्य सः इति पदद्वयमनुवर्तते। उपसर्जनम् अस्यास्तीति उपसर्जनः, मत्वर्थे अर्शआद्यच्। उत्तरपदाक्षिप्तः समासो विशेष्यम्। उपसर्जनस्येत्यस्य उपसर्जनवतः समासस्य इत्यर्थः। उपसर्जनसर्वावयवकस्येति तात्पर्यम्। उपसर्जनस्य इत्यनेन लब्धस्य बहुव्रीहेः इत्यस्यान्वयः। बहुव्रीहेः इत्यवयवषष्ठी। एवं च सूत्रार्थो भवति - "उपसर्जनसर्वावयवकस्य बहुव्रीहेः अवयवस्य सहस्य विकल्पेन सादेशो भवती"ति।

उदाहरणम् - सूत्रस्यास्य सहपुत्रः सपुत्रो वा उदाहरणम्। पुत्रेण सह इति लौकिकविग्रहे पुत्र टा सह इत्यलौकिकविग्रहे "तेन सहेति तुल्ययोगे" इत्यनेन बहुव्रीहिसमासे सहपुत्र इति निष्पद्यते। ततः प्रकृतसूत्रेण सहेत्यस्य विकल्पेन स इत्यादेशे निष्पन्नात् सपुत्रशब्दात् सौ सपुत्रः इति रूपम्। तदभावपक्षे च सहपुत्रः इति रूपम्।

पाठगतप्रश्नाः-६

३७. "तेन सहेति तुल्ययोगे" इति सूत्रस्यार्थः कः।

३८. "वोपसर्जनस्य" इति सूत्रस्यार्थः कः।

३९. तुल्ययोगे इति पदस्यार्थः कः।

४०. सहपुत्रः सपुत्र इत्यत्र सहस्य विकल्पेन सादेशः केन सूत्रेण कथं च भवति।

पाठसारः

अस्मिन् पाठे बहुव्रीहिसमासः प्रतिपादितः। प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिसमासः इति तस्य सामान्यलक्षणम्। अयं च बहुव्रीहिः "शेषो बहुव्रीहिः" इत्यधिकारसूत्रबलात् "चार्थे द्वन्द्वः" इत्यस्मात् सूत्रात् पूर्वपर्यन्तं प्रवर्तते। अत्र बहुव्रीहिसमासविधायकानि "अनेकमन्यपदार्थे", "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये", "दिङ्नामान्यन्तराले", "तत्र तेनेदमिति सरूपे", "तेन सहेति तुल्ययोगे" इति पञ्च सूत्राणि व्याख्यातानि। बहुव्रीहौ पूर्वनिपातविधायकं "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रं प्रस्तुतम्। सप्तमीविशेषणे इत्यत्र सप्तमीति पदसत्त्वाद् व्यधिकरणपदो बहुव्रीहिः भवति इति ज्ञाप्यते। ततः सप्तम्यन्तस्य अलुग्विधानाय "हलदन्तात् सप्तम्याः संज्ञायाम्" इति सूत्रं व्याख्यातम्।

"प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः", "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः","सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इत्येतानि वार्तिकानि अपि संगृहीतानि यैः बहुव्रीहिसमासः पूर्वपदस्य उत्तरपदस्य लोपश्च विधीयते।

ततः बहुव्रीहौ पुंवद्भावविधायकं "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रं प्रस्तुतम्। "अप्पूरणीप्रमाण्योः" इति समासान्तस्य अप्प्रत्ययस्य "बहुव्रीहौ संख्येये डजबहुगणात्" डच्प्रत्ययस्य "इच्कर्मव्यतिहारे" इति च इच्प्रत्ययस्य विधायकं सूत्रत्रयं व्याख्यातम्। आसन्नविंशा इत्यादौ तिशब्दस्य लोपविधायकं "ति विंशतेर्डिति" इति सूत्रं सहपुत्रः सपुत्रः इत्यादौ विकल्पेन सादेशविधायकं "वोपसर्जनस्य" इति सूत्रं व्याख्यातम्। एवं समासेन बहुव्रीहिसमासः अस्मिन् पाठे प्रस्तुतः।

पाठान्तप्रश्नाः

१. "अनेकमन्यपदार्थे" इति सूत्रं व्याख्यात।

२. "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रं व्याख्यात।

३. "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु" इति सूत्रं व्याख्यात।

४. "बहुव्रीहौ संख्येये डजबहुगणात्" इति सूत्रं व्याख्यात।

५. "दिङ्नामान्यन्तराले" इति सूत्रं व्याख्यात।

६. "तत्र तेनेदमिति सरूपे" इति सूत्रं व्याख्यात।

७. "तेन सहेति तुल्ययोगे" इति सूत्रं व्याख्यात।

८. "संख्ययाव्ययासन्नदूराधिकसंख्याः संख्येये" इति सूत्रं व्याख्यात।

९. पीताम्बरः इति रूपं साधयत।

१०. कण्ठेकालः इति रूपं साधयत।

११. चित्रगुः इति रूपं साधयत।

१२. दक्षिणपूर्वा इति रूपं साधयत।

१३. केशाकेशि इति रूपं साधयत।

१४. सपुत्रः इति रूपं साधयत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. सूत्रे शेषो नाम उक्तादन्यः।

२. "चार्थे द्वन्द्वः" (२।२।२९) इत्यस्मात् सूत्रात्प्राक्पर्यन्तम्।

३. "अनेकमन्यपदार्थे", "संख्ययाव्ययासन्नदूराधिकसंख्याः संख्येये", "दिङ्नामान्यन्तराले", "तत्र तेनेदमिति सरूपे", "तेन सहेति तुल्ययोगे" च।

४. अन्यपदस्यार्थे वर्तमानम् अनेकं प्रथमान्तं पदं विकल्पेन समस्यते, स च बहुव्रीहिसंज्ञको भवति।

५. बहुव्रीहिसमासे सप्तम्यन्तं विशेषणं च पूर्वं प्रयुज्यते।

६. हलन्ताद् अदन्ताच्च सप्तम्याः उत्तरपदे परे संज्ञायां गम्यमानायां लुक् न भवति।

७. अनेकम् इति प्रथमान्तस्य विशेषणम्।

८. कण्ठेकालः।

९. अदन्तात् कण्ठशब्दात् सप्तम्याः ङेर्विधानात् तस्यालुक् भवति।

उत्तराणि-२

१०. प्रादिभ्यः परः यः धातुजकृदन्तशब्दः तदन्तस्य प्रथमान्तस्य प्रथमान्तेन सह विकल्पेन बहुव्रीहिसमासो भवति, बहुव्रीहौ च पूर्वपदस्थस्य धातुजस्य उत्तरपदस्य विकल्पेन लोपो भवति।

११. प्रकृष्टानि पतितानि इति विग्रहः।

१२. नञः परस्य अस्त्यर्थकशब्दान्तस्य प्रथमान्तस्य प्रथमान्तेन सह विकल्पेन बहुव्रीहिसमासो भवति, बहुव्रीहौ च पूर्वपदस्थस्य अस्त्यर्थकस्य उत्तरपदस्य विकल्पेन लोपो भवति।

१३. अविद्यमानः पुत्रो यस्य सः इति विग्रहः।

१४. सप्तम्यन्तसहितं उपमानसहितस्य च पूर्वपदस्य पदान्तरेण समासः पूर्वपदस्य उत्तरपदलोपश्च भवति।

१५. कण्ठेकालः।

१६. उष्ट्रमुखः।

उत्तराणि-३

१७. पुंदद्भावः।

१८. तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात् पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे भवति, न तु पुरण्यां प्रियादौ च परतः।

१९. अनूङ् इति पदस्य सत्त्वात् वामोरूशब्दस्य ऊङ्-प्रत्ययान्तत्वात् नास्ति पुंवद्भावः।

२०. सूत्रे अपूरणीप्रियादिषु इति पदस्य सत्त्वात् कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमाः रात्रयः इत्यत्र पञ्चमीति पूरणार्थप्रत्ययान्ते स्त्रीलिङ्गे उत्तरपदे परे, कल्याणी प्रिया यस्य स कल्याणीप्रियः इत्यत्र स्त्रीलिङ्गे प्रियाशब्दे उत्तरपदे परे न पुंवद्भावः।

२१. चित्रगुः।

२२. समासान्तः अप्-प्रत्ययः।

२३. पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात् प्रमाण्यन्ताच्च बहुव्रीहेः समासान्तः तद्धितसंज्ञकः अप्प्रत्ययः भवति।

२४. कल्याणीपञ्चमाः, स्त्रीप्रमाणः पुरुष।

उत्तराणि-४

२५. संख्येयवाचकेन एकादिसंख्याशब्देन अव्ययादयः विकल्पेन समस्यन्ते, स च बहुव्रीहिसंज्ञको भवति।

२६. संख्येये यो बहुव्रीहिः तस्मात् समासान्तः तद्धितसंज्ञकः ङच्प्रत्ययो भवति, किन्तु बहुगणशब्दान्ताद् बहुव्रीहेः न भवति।

२७. सूत्रे अबहुगणाद् इति पदस्य सत्त्वाद् बहूनां समीपे ये सन्ति, गणस्य समीपे ये सन्ति इति विग्रहे यथाक्रमं निष्पन्नाद् उपबहुशब्दाद् उपगणशब्दाच्च ङच्प्रत्ययो न भवति।

२८. डिति परे विंशत्यन्तस्य भस्य तिशब्दस्य लोपः भवति।

२९. दशानां समीपे ये इति विग्रहे उपदशाः।

३०. संख्येये यो बहुव्रीहिः तस्मात् बहुव्रीहौ संख्येये डजबहुगणात् इति सूत्रेण भवति।

३१. ति विंशतेर्डिति इति सूत्रेण।

उत्तराणि-५

३२. दिशः नामानि अन्तराले वाच्ये विकल्पेन समस्यन्ते, स बहुव्रीहिसंज्ञको भवति।

३३. दक्षिणपूर्वा।

३४. सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे कर्मव्यतिहारे द्योत्ये विकल्पेन समस्येते, स बहुव्रीहिसंज्ञको भवति।

३५. कर्मव्यतिहारे यो बहुव्रीहिः तस्मात् समासान्तः तद्धितसंज्ञक इच्प्रत्ययो भवति।

३६. केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति विग्रहः।

उत्तराणि-६

३७. तुल्ययोगे वर्तमानं सह इत्यव्ययं तृतीयान्तेन सह विकल्पेन समस्येते, स च समासो बहुव्रीहिसंज्ञको भवति।

३८. उपसर्जनसर्वावयवकस्य बहुव्रीहेः अवयवस्य सहस्य विकल्पेन सादेशो भवति।

३९. युगपत्कालिकक्रियायोगे इत्यर्थः।

४०. सहपुत्रः, सपुत्रः इत्यत्र उपसर्जनसर्वावयवकस्य बहुव्रीहेः अवयवस्य सहस्य विकल्पेन सादेशो वोपसर्जनस्य इति सूत्रेण भवति।

॥ इति पञ्चमः पाठः॥

346sk06

६

बहुव्रीहिसमासः - समासान्तप्रत्ययः निपातव्यवस्थादिकम्

प्रस्तावना

अस्मिन् पाठे बहुव्रीहिसमासस्य अवशिष्टांशस्य आलोचनं भवति। बहुव्रीहौ समासान्तप्रत्ययविधायकानि समासान्तादेशविधायकानि च यानि सूत्राणि सन्ति तान्यत्र आलोच्यन्ते। ततः क्वचिद् बहुव्रीहिसमासे निपातनं भवति तद् वर्ण्यते। बहुव्रीहौ पूर्वनिपातविषये अत्रालोचनं भवति। ततः समासविधायकसूत्रवर्णनावसरे तदुदाहरणेषु विसर्गस्यादेशविधानाय यानि सूत्राणि अपेक्षितानि तान्यपि अत्र संगृहीतानि।

उद्देश्यानि

इमं पाठं पठित्वा भवान्/भवती -

- बहुव्रीहौ समासान्तप्रत्ययविधायकानि सूत्राणि जानीयात्।
- बहुव्रीहौ समासान्तादेशविधायकानि सूत्राणि जानीयात्।
- बहुव्रीहौ निपातनं जानीयात्।
- बहुव्रीहौ पूर्वनिपातविधायकानि सूत्राणि जानीयात्।
- बहुव्रीह्युपयोगितया विसर्गस्य आदेशविधायकानि सूत्राणि जानीयात्।

[६.१] बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्॥ (५.४.११३)

सूत्रार्थः - स्वाङ्गवाचिनः सक्थ्यक्ष्यन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः षच्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः षच्प्रत्ययो विधीयते। पदचतुष्टयात्मके सूत्रेऽस्मिन् बहुव्रीहौ इत्यत्र पञ्चम्यर्थे सप्तमी। सक्थ्यक्ष्णोः इति पञ्चम्यर्थे षष्ठी, "व्यत्ययो बहुलम्" इति छन्दसि वचनात्। स्वाङ्गात् इति पञ्चम्येकवचनान्तं षच् इति प्रथमैकवचनान्तं पदम्। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। सक्थ्यक्ष्णोः इत्यत्र तदन्तविधौ सक्थ्यक्ष्यन्ताद् इति लभ्यते। स्वाङ्गात् सक्थ्यक्ष्णोः बहुव्रीहौ इत्यस्यार्थो भवति स्वाङ्गवाचकात् सक्थ्यक्ष्यन्ताद् बहुव्रीहेः

इति। एवं सूत्रार्थः समायाति - "स्वाङ्गवाचिनः सक्थ्यक्ष्यन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः षच्प्रत्ययो भवति" इति।

उदाहरणम् - स्वाङ्गवाचिसक्थ्यन्तबहुव्रीहेरुदाहरणं तावद् दीर्घसक्थः इति। दीर्घे सक्थिनी यस्य स इति लौकिकविग्रहे दीर्घ औ सक्थि औ इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन विशेषणस्य दीर्घ औ इत्यस्य पूर्वनिपाते दीर्घ औ सक्थि औ इति जाते, समासस्य "कृत्तद्धितसमासाश्च" इत्यनेन प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन प्रातिपदिकावयवयस्य सुपः औप्रत्ययद्वयस्य लुकि दीर्घसक्थि इति भवति। तदा स्वाङ्गवाचिनः दीर्घसक्थि इत्यस्मात् बहुव्रीहेः प्रकृतसूत्रेण समासान्तः षच्प्रत्ययो भवति। षचयोः यथाक्रमं "षः प्रत्ययस्य" इत्यनेन "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन तयोर्लोपे दीर्घसक्थि अ इति भवति। ततः "यचि भम्" इत्यनेन पूर्वस्य दीर्घसक्थि इति शब्दस्य भसंज्ञायां "यस्येति" च इत्यनेन भसंज्ञकस्य दीर्घसक्थि इत्यस्य अन्त्यस्य इकारस्य लोपे सर्वसंयोगे दीर्घसक्थशब्दो निष्पद्यते। ततः सौ दीर्घसक्थः इति रूपम्।

स्वाङ्गवाचिनः अक्ष्यन्तबहुव्रीहेरुदाहरणं तावद् जलजाक्षी इति। जलजे इव अक्षिणी यस्याः इति विग्रहे प्रक्रियाकार्ये जलजाक्षि इति निष्पद्यते। ततः प्रोक्तेन सूत्रेण षचि अनुबन्धलोपे जलजाक्षि अ इति भवति। ततः भसंज्ञकस्य जलजाक्षिशब्दस्य अन्त्यस्य इकारस्य लोपे जलजाक्षशब्दो निष्पद्यते। तस्य षिदन्तत्वात् "षिद्गौरादिभ्यश्च" इत्यनेन ङीषि जलजाक्षी इति रूपम्।

[६.२] द्वित्रिभ्यां ष मूर्ध्नः॥ (५.४.११५)

सूत्रार्थः - बहुव्रीहिसमासे द्वित्रिभ्यां परस्य मूर्ध्नः समासान्तः तद्धितसंज्ञकः षप्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः षप्रत्ययो विधीयते। पदत्रयात्मके सूत्रेऽस्मिन् द्वित्रिभ्याम् इति पञ्चमीद्विवचनान्तम्, ष इति लुप्तप्रथमैकवचनान्तं मूर्ध्नः इति च पञ्चम्येकवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। द्विश्च त्रिश्च द्वित्री, ताभ्यां द्वित्रिभ्याम् इति इतरेतरद्वन्द्वसमासः। एवं सूत्रार्थः समायाति - "बहुव्रीहिसमासे द्वित्रिभ्यां परस्य मूर्ध्नः समासान्तः तद्धितसंज्ञकः षप्रत्ययो भवति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् द्विमूर्धः इति। द्वौ मूर्धानौ यस्य स इति लौकिकविग्रहे द्वि औ मूर्धन् औ इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन विशेषणस्य द्वि औ इत्यस्य पूर्वनिपाते द्वि औ मूर्धन् औ इति जाते, समासस्य "कृत्तद्धितसमासाश्च" इत्यनेन प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन प्रातिपदिकावयवयस्य सुपः औप्रत्ययद्वयस्य लुकि द्विमूर्धन् इति भवति। द्विमूर्धन् इति बहुव्रीहिसंज्ञकात् प्रकृतसूत्रेण समासान्ते षप्रत्यये, षकारस्य "षः प्रत्ययस्य" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनने लोपे द्विमूर्धन् अ इति भवति। ततः पूर्वस्य द्विमूर्धन् इति शब्दस्य "यचि भम्" इत्यनेन भसंज्ञायां

"नस्तद्धिते" इत्यनेन भस्य द्विमूर्धन् इत्यस्य टेरनः लोपे सर्वसंयोगे द्विमूर्धशब्दो निष्पद्यते। ततः सौ द्विमूर्धः इति रूपम्। एवमेव त्रिमूर्धः इत्यस्य सूत्रस्योदाहरणम्।

पाठगतप्रश्नाः-१

१. "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति सूत्रस्यार्थः कः।

२. दीर्घसक्थः इत्यत्र कः विग्रहः।

३. "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति सूत्रस्य स्वाङ्गवाचिनः अक्ष्यन्तस्य किमुदाहरणम्।

४. "द्वित्रिभ्यां ष मूर्ध्नः" इति सूत्रस्यार्थः कः।

५. "द्वित्रिभ्यां ष मूर्ध्नः" इति सूत्रस्य किमुदाहरणम्।

[६.३] अन्तर्बहिर्भ्यां च लोम्नः॥ (५.४.११७)

सूत्रार्थः - बहुव्रीहिसमासे अन्तर्बहिर्भ्यां परस्य लोम्नः समासान्तः तद्धितसंज्ञकः अप्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अप्प्रत्ययो विधीयते। पदत्रयात्मके सूत्रेऽस्मिन् अन्तर्बहिर्भ्याम् इति पञ्चमीद्विवचनान्तम्, च इत्यव्ययपदम्। चकारेण "अप्पूरणीप्रमाण्योः" इत्यस्मात् सूत्राद् अप् इत्यनुवर्तते। लोम्नः इति पञ्चम्येकवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। एवं सूत्रार्थः समायाति - "बहुव्रीहिसमासे अन्तर्बहिर्भ्यां परस्य लोम्नः समासान्तः तद्धितसंज्ञकः अप्प्रत्ययो भवति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् अन्तर्लोमः इति। अन्तः लोमानि यस्य स इति लौकिकविग्रहे अन्तर् लोमन् औ इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। ततः प्रक्रियाकार्ये समासस्य प्रातिपदिकत्वात् सुब्लुकि अन्तर्लोमन् इति भवति। अन्तर्लोमन् इति बहुव्रीहिसंज्ञकात् प्रकृतसूत्रेण समासान्ते अप्प्रत्यये, पकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनने लोपे अन्तर्लोमन् अ इति भवति। तदा पूर्वस्य अन्तर्लोमन् इति शब्दस्य "यचि भम्" इत्यनेन भसंज्ञायां "नस्तद्धिते" इत्यनेन भस्य अन्तर्लोमन् इत्यस्य टेरनः लोपे सर्वसंयोगे अन्तर्लोमशब्दो निष्पद्यते। ततः सौ अन्तर्लोमः इति रूपम्। एवमेव बहिर्लोमः इत्यस्य सूत्रस्योदाहरणम्।

[६.४] पादस्य लोपोऽहस्त्यादिभ्यः॥ (५.४.१३८)

सूत्रार्थः - बहुव्रीहिसमासे हस्त्यादिवर्जिताद् उपमानात्परस्य पादशब्दस्य समासान्तः लोपः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तलोपो विधीयते। पदत्रयात्मके सूत्रेऽस्मिन् पादस्य लोपः अहस्त्यादिभ्यः इति पदच्छेदः। पादस्य इति षष्ठ्येकवचनान्तम्, लोपः इति प्रथमैकवचनान्तम् अहस्त्यादिभ्यः पञ्चमीबहुवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। "उपमानाच्च" इति सूत्रात् उपमानात् इत्यनुवर्तते। "समासान्ताः" इत्यधिकृतम्। न हस्त्यादयः अहस्त्यादयः, तेभ्यः अहस्त्यादिभ्यः इति नञ्तत्पुरुषसमासः। अहस्त्यादिभ्यः उपमानात् पादस्य समासान्तः लोपः बहुव्रीहौ इत्यन्वयः। एवं सूत्रार्थः समायाति - "बहुव्रीहिसमासे हस्त्यादिवर्जिताद् उपमानात् परस्य पादशब्दस्य समासान्तः लोपो भवति" इति।

"अलोऽन्त्यस्य" इति परिभाषया अयं समासान्तः लोपः पादशब्दस्य अन्त्यस्य अकारस्य भवति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् व्याघ्रपात् इति। व्याघ्रपादौ इव पादौ यस्य स इति लौकिकविग्रहे व्याघ्रपाद औ पाद औ इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इत्यनेन बहुव्रीहिसमासो भवति। ततः "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुब्लुकि व्याघ्रपाद पाद इति स्थिते "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकेन बहुव्रीहिसमासे पूर्वपदस्य व्याघ्रपादशब्दस्य उत्तरपदस्य पादशब्दस्य लोपे व्याघ्रपादशब्दो निष्पद्यते। ततः बहुव्रीहिसमासे अहस्त्यादिवाचकस्य उपमानस्य व्याघ्रशब्दस्य विद्यमानत्वात् ततः परस्य पादशब्दस्य "अलोऽन्त्यस्य" इति परिभाषया परिष्कृतेन प्रकृतसूत्रेण अन्त्यस्य अकारस्य लोपे व्याघ्रपाद् इति निष्पद्यते। ततः पुंसि सौ प्रक्रियाकार्ये "वाऽवसाने" इत्यनेन वैकल्पिके चर्त्वे व्याघ्रपात् इति भवति। चर्त्वाभावपक्षे व्याघ्रपाद् इति रूपम्।

पाठगतप्रश्नाः-२

६. "अन्तर्बहिर्भ्यां च लोम्नः" इति सूत्रस्यार्थः कः।

७. "अन्तर्बहिर्भ्यां च लोम्नः" इति सूत्रस्य किमुदाहरणम्।

८. "पादस्य लोपोऽहस्त्यादिभ्यः" इति सूत्रेण किं विधीयते।

९. "पादस्य लोपोऽहस्त्यादिभ्यः" इति सूत्रस्यार्थः कः।

१०. "पादस्य लोपोऽहस्त्यादिभ्यः" इति सूत्रस्य किमुदाहरणम्।

[६.५] संख्यासुपूर्वस्य॥ (५.४.१४०)

सूत्रार्थः - बहुव्रीहिसमासे संख्यावाचकपूर्वस्य सु-इत्यव्ययपूर्वस्य च पादशब्दस्य समासान्तो लोपो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः लोपो विधीयते। एकपदात्मके सूत्रेऽस्मिन् संख्यासुपूर्वस्येति षष्ठ्येकवचनान्तं पदम्। "पादस्य लोपोऽहस्त्यादिभ्यः" इत्यस्मात् सूत्रात्

पादस्य इत्यनुवर्तते। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। "समासान्ताः" इत्यधिकृतम्। संख्या च सुश्च संख्यासू इतीतरेतरद्वन्द्वः। संख्यासू पूर्वौ यस्य स संख्यासुपूर्वः, तस्य संख्यासुपूर्वस्य इति बहुव्रीहिसमासः। एवं सूत्रार्थः समायाति - "बहुव्रीहिसमासे संख्यावाचकपूर्वस्य सु इत्यव्ययपूर्वस्य पादशब्दस्य समासान्तः लोपो भवति" इति।

"अलोऽन्त्यस्य" इति परिभाषया अयं समासान्तः लोपः पादशब्दस्य अन्त्यस्य अकारस्य भवति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् द्विपात् इति। द्वौ पादौ यस्य स लौकिकविग्रहे द्वि औ पाद औ इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेन बहुव्रीहिसमासो भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन सूत्रेण विशेषणस्य द्वि औ इत्यस्य पूर्वनिपाते, समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन प्रातिपदिकावयवस्य सुपः औद्वयस्य लुकि द्विपादशब्दो निष्पद्यते। ततः बहुव्रीहिसमासस्य संख्यापूर्वकत्वात् ततः परस्य पादशब्दस्य अन्त्यस्य अकारस्य "अलोऽन्त्यस्य" इति परिभाषया परिष्कृतेन प्रकृतसूत्रेण लोपे द्विपाद् इति निष्पद्यते। ततः पुंसि सौ प्रक्रियाकार्ये "वाऽवसाने" इत्यनेन वैकल्पिके चर्त्वे तकारे द्विपात् इति रूपम्। चर्त्वाभावपक्षे च द्विपाद् इति रूपम्। एवमेव सुपात् सुपाद् इति रूपद्वयं सिध्यति।

पाठगतप्रश्नाः-३

११. "संख्यासुपूर्वस्य" इति सूत्रेण किं विधीयते।

१२. "संख्यासुपूर्वस्य" इति सूत्रस्यार्थः कः।

१३. "संख्यासुपूर्वस्य" इति सूत्रस्य किमुदाहरणम्।

१४. "संख्यासुपूर्वस्य" इति सूत्रेण विहितः लोपः अन्त्यस्य कथं भवति।

[६.६] उद्विभ्यां काकुदस्य॥ (५.४.१४८)

सूत्रार्थः - बहुव्रीहिसमासे उद्विभ्यां परस्य काकुदशब्दस्य समासान्तो लोपो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः लोपो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् उद्विभ्याम् इति पञ्चमीद्विवचनान्तं काकुदस्येति च षष्ठ्येकवचनान्तं पदम्। "ककुदस्यावस्थायां लोपः" इत्यस्मात्सूत्रात् लोपः इत्यनुवर्तते। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। "समासान्ताः" इत्यधिकृतम्। उच्च विश्व उद्वी, ताभ्याम् उद्विभ्याम् इतीतरेतरद्वन्द्वः। उद् वि इति निपातद्वयात् इति तात्पर्यम्। एवं सूत्रार्थः समायाति - "बहुव्रीहिसमासे उद्विभ्यां परस्य काकुदशब्दस्य समासान्तः लोपो भवति" इति।

"अलोऽन्त्यस्य" इति परिभाषया अयं समासान्तः लोपः काकुदशब्दस्य अन्त्यस्य अकारस्य भवति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् उत्काकुत् इति। उद्गतं काकुदं यस्य स लौकिकविग्रहे उद्गत सु काकुद सु इत्यलौकिकविग्रहे "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः" इति वार्तिकेन बहुव्रीहिसमासे, विशेषणस्य पूर्वनिपाते सुब्लुकि वार्तिकेन च पूर्वपदस्य उद्गत इत्यस्य उत्तरपदस्य गतेत्यस्य लोपे उद् काकुद इति भवति। ततः "खरि च" इत्यनेन दकारस्य चर्त्वे तकारे उत्काकुदशब्दो निष्पद्यते। ततः बहुव्रीहिसमासे उत् इत्यस्य परं काकुदशब्दस्य सत्त्वात् काकुदशब्दस्य अन्त्यस्य अकारस्य "अलोऽन्त्यस्य" इति परिभाषया परिष्कृतेन प्रोक्तेन सूत्रेण लोपे उत्काकुद् इति निष्पद्यते। ततः पुंसि सौ प्रक्रियाकार्ये "वाऽवसाने" इत्यनेन वैकल्पिके चर्त्वे तकारे उत्काकुत् इति रूपम्। चर्त्वस्य वैकल्पिकत्वात् तदभावपक्षे उत्काकुद् इति। एवमेव विकाकुत् विकाकुद् इति रूपद्वयं सिध्यति।

पाठगतप्रश्नाः-४

१५. "उद्विभ्यां काकुदस्य" इति सूत्रेण किं विधीयते।

१६. "उद्विभ्यां काकुदस्य" इति सूत्रस्यार्थः कः।

१७. "उद्विभ्यां काकुदस्य" इति सूत्रस्य किमुदाहरणम्।

१८. "उद्विभ्यां काकुदस्य" इति सूत्रेण विहितः लोपः अन्त्यस्य कथं भवति।

[६.७] पूर्णाद्विभाषा॥ (५.४.१४९)

सूत्रार्थः - बहुव्रीहिसमासे पूर्णशब्दात् परस्य काकुदशब्दस्य विकल्पेन समासान्तो लोपो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः लोपो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् पूर्णाद् इति पञ्चम्येकवचनान्तं पदं विभाषा इति च विकल्पबोधकम् अव्ययपदम्। "ककुदस्यावस्थायां लोपः" इत्यस्मात्सूत्रात् लोपः इत्यनुवर्तते। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। "समासान्ताः" इत्यधिकृतम्। एवं सूत्रार्थः समायाति - "बहुव्रीहिसमासे पूर्णशब्दात् परस्य काकुदशब्दस्य विकल्पेन समासान्तः लोपो भवति" इति।

"अलोऽन्त्यस्य" इति परिभाषया अयं समासान्तः लोपः काकुदशब्दस्य अन्त्यस्य अकारस्य भवति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् पूर्णकाकुत् इति। पूर्णं काकुदं यस्य स लौकिकविग्रहे पूर्ण सु काकुद सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। तत्र विशेषणस्य पूर्ण सु इत्यस्य पूर्वनिपाते सुब्लुकि पूर्णकाकुदशब्दो निष्पद्यते। ततः बहुव्रीहिसमासे पूर्णशब्दात्परस्य काकुदशब्दस्य सत्त्वात् "अलोऽन्त्यस्य" इति परिभाषया परिष्कृतेन प्रोक्तेन सूत्रेण

काकुदशब्दस्य विकल्पेन अन्त्यस्याकारस्य लोपे पूर्णकाकुद् इति निष्पद्यते। ततः पुंसि सौ प्रक्रियाकार्ये "वाऽवसाने" इत्यनेन वैकल्पिके चर्त्वे तकारे पूर्णकाकुत् इति रूपम्। चर्त्वस्य वैकल्पिकत्वात् तदभावपक्षे पूर्णकाकुद् इति रूपम्। समासान्तलोपस्य वैकल्पिकत्वात् तदभावपक्षे सौ प्रक्रियाकार्ये पूर्णकाकुदः इति रूपम्।

पाठगतप्रश्नाः-५

१९. "पूर्णाद्विभाषा" इति सूत्रेण किं विधीयते।

२०. "पूर्णाद्विभाषा" इति सूत्रस्यार्थः कः।

२१. पूर्णं काकुदं यस्येति विग्रहे कति रूपाणि भवन्ति।

२२. "पूर्णाद्विभाषा" इति सूत्रेण विहितः लोपः अन्त्यस्य कथं भवति।

[६.८] सुहृद्-दुर्हृदौ मित्रामित्रयोः॥ (५.४.१५०)

सूत्रार्थः - बहुव्रीहिसमासे सुदुर्भ्यां परस्य हृदयशब्दस्य समासान्तो हृद्भावो निपात्यते क्रमशः मित्रामित्रयोः अर्थयोः।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तहृद्भावनिपातनं विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् सहृद्-दुर्हृदौ इति प्रथमाद्विवचनान्तं मित्रामित्रयोः इति च सप्तमीद्विवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। "समासान्ताः" इत्यधिकृतम्। सहृत् च दुर्हृत् च सुहृद्-दुर्हृदौ इतीतरेतरद्वन्द्वसमासः। मित्रं च अमित्रश्च मित्रामित्रौ ,तयोः मित्रामित्रयोः इतीतरेतरद्वन्द्वसमासः। वस्तुतस्तु निपातने मित्रार्थे सुहृच्छब्दः अमित्रार्थे च दुर्हृच्छब्दः सिद्धः। तत्र हृदयस्य हृद्भाव एव निपात्यते इति लभ्यते। एवं सूत्रार्थः समायाति - "बहुव्रीहिसमासे सुदुर्भ्यां परस्य हृदयशब्दस्य समासान्तः हृद्भावो निपात्यते क्रमशः मित्रामित्रयोः अर्थयोः" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं सुहृत् इति। शोभनं हृदयं यस्य स लौकिकविग्रहे सु हृदय सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासे सुब्लुकि च सुहृदयशब्दो निष्पद्यते। ततः बहुव्रीहिसमासे सु इति निपातात्परस्य हृदयशब्दस्य सत्त्वात् हृदयशब्दस्य स्थाने मित्रार्थे प्रोक्तेन सूत्रेण समासान्ते हृद् इत्यादेशे सुहृद् इति निष्पद्यते। ततः पुंसि सौ प्रक्रियाकार्ये "वाऽवसाने" इत्यनेन वैकल्पिके चर्त्वे तकारे सुहृत् इति रूपम्। चर्त्वस्य वैकल्पिकत्वात् तदभावपक्षे सुहृद् इति रूपम्। एवमेव अमित्रार्थे तु दुर्हृत् दुर्हृद् इति रूपद्वयम्।

[६.९] उरःप्रभृतिभ्यः कप्॥ (५.४.१५१)

सूत्रार्थः - उरःप्रभृत्यन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः कप्प्रत्ययो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् उरःप्रभृतिभ्यः इति पञ्चमीबहुवचनान्तं कप् इति च प्रथमैकवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। तच्च विभक्तिविपरिणामेन बहुव्रीहेः इति भवति। उरस् इति शब्दः प्रभृतिः आदिः येषां ते उरःप्रभृतयः तेभ्य उरःप्रभृतिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिसमासः। उरःप्रभृतिभ्यः इति पदं बहुव्रीहेः इत्यस्य विशेषणम्। तेन तदन्तविधौ उरःप्रभृत्यन्ताद् बहुव्रीहेः इति लभ्यते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। एवं सूत्रार्थः समायाति - "उरःप्रभृत्यन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो भवति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् व्यूढोरस्कः इति। व्यूढम् उरः यस्य स इति लौकिकविग्रहे व्यूढ सु उरस् सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन सूत्रेण विशेषणस्य व्यूढ सु इत्यस्य पूर्वनिपाते व्यूढ सु उरस् सु इति जाते, समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुद्वयस्य लुकि गुणे च व्यूढोरस् इति भवति। व्यूढोरस् इति बहुव्रीहिसंज्ञकस्य उरःशब्दान्तत्वात् प्रकृतसूत्रेण समासान्ते कप्प्रत्यये, पकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनने लोपे व्यूढोरस् क इति स्थिते प्रक्रियाकार्ये सर्वसंयोगे व्यूढोरस्कशब्दो निष्पद्यते। ततः पुंसि सौ व्यूढोरस्कः इति रूपम्। एवमेव प्रियं सर्पिः यस्य स इति विग्रहे प्रियसर्पिष्कः इत्यादिकमेतस्य सूत्रस्योदाहरणम्।

समासान्तस्य कप्प्रत्ययस्यालोचनप्रसङ्गे क्वचिद् व्यूढोरस्कः इत्यादौ विसर्गस्य सकारादेशः क्वचित् प्रियसर्पिष्कः इत्यादौ षकारादेशश्च भवति। तत्र सकारादेशविधायकं सूत्रम् अवतरति -

[६.१०] सोऽपदादौ॥ (८.३.३८)

सूत्रार्थः - पाश-कल्प-क-काम्येषु प्रत्ययेषु परेषु विसर्गस्य सकारादेशो भवति संहितायां विवक्षितायाम्।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण विसर्गस्य सकारादेशो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् सः अपदादौ इति पदच्छेदः। सः इति प्रथमैकवचनान्तम् अपदादौ इति सप्तम्येकवचनान्तं पदम्। सः इत्यत्र अकार उच्चारणार्थकः। "विसर्जनीयस्य सः" इत्यस्मात् सूत्राद् विसर्जनीयस्य इति पदमनुवर्तते। "कुप्वो ᳕क ᳕पौ च" इत्यस्मात् सूत्रात् कुप्वोः इति पदमनुवर्तते। "तयोर्य्वावचि संहितायाम्" इत्यस्मात् सूत्रात् संहितायाम् इति पदम् अनुवर्तते। न पदादिः अपदादिः, तस्मिन् अपदादौ इति नञ्समासः। अपदादौ इत्यस्य कुप्वोः इत्यनेनान्वयाद् अपदाद्योः कुप्वोः इत्यर्थो भवति। एवम् अपदादौ कवर्गे पवर्गे च परे सति विसर्गस्य स्थाने स् इत्यादेशो भवति संहितायां विवक्षितायाम् इति सूत्रार्थः समायाति। अपदादिकवर्गपवर्गत्वं पाश-कल्प-क-काम्यानां चतुर्णां प्रत्ययानामेव सम्भवति। एवं "पाश-कल्प-क-काम्येषु प्रत्ययेषु परेषु विसर्गस्य सकारादेशो भवति संहितायां विवक्षितायाम्" इति सूत्रार्थः पर्यवस्यति।

उदाहरणम् - अस्य सूत्रस्य पाशपि परे उदाहरणं पयस्पाशम् इति। कल्पपि परे उदाहरणं पयस्कल्पम् इति। काम्यचि परे उदाहरणं पयस्काम्यम्। प्रकृते च व्यूढम् उरः यस्य स इति लौकिकविग्रहे व्यूढ सु उरस् सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन सूत्रेण विशेषणस्य पूर्वनिपाते प्रातिपदिकत्वात् सुब्लुकि च गुणे व्यूढोरस् इति जाते, ततः "उरःप्रभृतिभ्यः कप्" इत्यनेन समासान्ते कप्प्रत्यये व्यूढोरस् क इति भवति। तदा "खरवसानयोर्विसर्जनीयः" इत्यनेन सस्य खरि परे विसर्गादेशे व्यूढोरः क इति जाते प्रकृतसूत्रेण अपदादिकप्रत्ययपरकत्वात् विसर्गस्य सादेशे पुंसि सौ व्यूढोरस्कः इति रूपम्।

पाठगतप्रश्नाः-६

२३. "सुहृद्-दुर्हृदौ मित्रामित्रयोः" इति सूत्रेण किं विधीयते।

२४. "सुहृद्-दुर्हृदौ मित्रामित्रयोः" इति सूत्रस्यार्थः कः।

२५. "सुहृद्-दुर्हृदौ मित्रामित्रयोः" इति सूत्रस्य किमुदाहरणम्।

२६. "उरःप्रभृतिभ्यः कप्" इति सूत्रस्यार्थः कः।

२७. "उरःप्रभृतिभ्यः कप्" इति सूत्रस्य किमुदाहरणम्।

२८. "सोऽपदादौ" इति सूत्रस्यार्थः कः।

२९. "सोऽपदादौ" इति सूत्रस्य किमुदाहरणम्।

[६.११] इणः षः॥ (८.३.३९)

सूत्रार्थः - पाश-कल्प-क-काम्येषु प्रत्ययेषु परेषु इण उत्तरस्य विसर्गस्य षकारादेशो भवति संहितायां विवक्षितायाम्।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण विसर्गस्य षकारादेशो विधीयते। "सोऽपदादौ" इत्येनन प्राप्तस्य सत्वस्य बाधकत्वाद् इदम् अपवादसूत्रम्। पदद्वयात्मके सूत्रेऽस्मिन् इणः इति पञ्चम्येकवचनान्तं षः इति प्रथमैकवचनान्तं पदम्। षः इत्यत्र अकार उच्चारणार्थकः। "सोऽपदादौ" इति सूत्राद् अपदादौ इति पदमनुवर्तते। "विसर्जनीयस्य सः" इत्यस्मात् सूत्राद् विसर्जनीयस्य इति पदमनुवर्तते। "कुप्वो ᳕क ᳕पौ च" इत्यस्मात् सूत्रात् कुप्वोः इति पदमनुवर्तते। "तयोर्य्वावचि संहितायाम्" इत्यस्मात् सूत्रात् संहितायाम् इति पदम् अनुवर्तते। न पदादिः अपदादिः, तस्मिन् अपदादौ इति नञ्समासः। अपदादौ इत्यस्य कुप्वोः इत्यनेनान्वयाद् अपदाद्योः कुप्वोः इत्यर्थो भवति। एवम् अपदादौ कवर्गे पवर्गे च परे सति इणः परस्य विसर्गस्य स्थाने स् इत्यादेशो भवति संहितायां विवक्षितायाम् इति सूत्रार्थः समायाति। अपदादिकवर्गपवर्गत्वं पाश-कल्प-क-काम्यानां चतुर्णां

प्रत्ययानामेव सम्भवति। एवं "पाश-कल्प-क-काम्येषु प्रत्ययेषु परेषु इणः परस्य विसर्गस्य षकारादेशो भवति संहितायां विवक्षितायाम्" इति सूत्रार्थः पर्यवस्यति।

उदाहरणम् - अस्य सूत्रस्य पाशपि परे उदाहरणं सर्पिष्पाशम् इति। कल्पपि परे उदाहरणं यजुष्कल्पम् इति। काम्यचि परे उदाहरणं सर्पिष्काम्यम्। प्रकृते च प्रियं सर्पिः यस्य स इति लौकिकविग्रहे प्रिय सु सर्पिस् सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासे, विशेषणस्य पूर्वनिपाते प्रातिपदिकत्वात् सुब्लुकि च गुणे प्रियसर्पिस् जाते, ततः "उरःप्रभृतिभ्यः कप्" इति प्रकृतसूत्रेण समासान्ते कप्प्रत्यये प्रियसर्पिस् क इति भवति। तदा "खरवसानयोर्विसर्जनीयः" इत्यनेन सस्य विसर्गादेशे प्रियसर्पिः क इति जाते प्रकृतसूत्रेण अपदादिकप्रत्ययपरकत्वात् विसर्गस्य स्थाने प्राप्तं सादेशं प्रबाध्य इणः परस्य षादेशे पुंसि सौ प्रियसर्पिष्कः इति रूपम्।

प्रकरणोपयोगितया विसर्गस्य स्थाने षत्व-सत्वविधायकं सूत्रं प्रवृत्तम् -

[६.१२] कस्कादिषु च॥ (८.३.४८)

सूत्रार्थः - कस्कादिषु इण उत्तरस्य विसर्गस्य षकारादेशो भवति, अन्यत्र तु सकारादेशो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण विसर्गस्य षकारादेशः सकारादेशश्च विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् कस्कादिषु इति सप्तमीबहुवचनान्तं च इत्यव्ययं पदम्। इणः षः इति सूत्रं सम्पूर्णमनुवर्तते। "सोऽपदादौ" इति सूत्रात् सः इति पदमनुवर्तते। "विसर्जनीयस्य सः" इत्यस्मात् सूत्राद् विसर्जनीयस्य इति पदमनुवर्तते। "कुप्वो ∩क ∩पौ च" इत्यस्मात् सूत्रात् कुप्वोः इति पदमनुवर्तते। "तयोर्य्वावचि संहितायाम्" इत्यस्मात् सूत्रात् संहितायाम् इति पदम् अनुवर्तते। कस्कशब्द आदिर्येषां ते कस्कादयः, तेषु कस्कादिषु इति तद्गुणसंविज्ञानबहुव्रीहिः। एवं कस्कादिषु शब्देषु इण्प्रत्याहारात् परं विसर्जनीयस्य स्थाने सकारादेशो भवति, कस्कादिषु अन्यत्र विसर्जनीयस्य स्थाने सकारादेशो भवति इति सूत्रार्थः समायाति।

उदाहरणम् - अस्य इण्परकत्वे उदाहरणं सर्पिष्कुण्डिका इति। सर्पिः कुण्डिका इति स्थिते कस्कादिषु पठितत्वात् सर्पिः इत्यस्य इणः इकारात्परस्य विसर्गस्य प्रकृतसूत्रेण षकारेदेशे सर्पिष्कुण्डिका इति रूपं भवति। इण्परकत्वाभावे कस्कः इत्युदाहरणम्। "नित्यवीप्सयोः" इत्यनेन सूत्रेण वीप्सार्थे कः इति पदस्य द्वित्वे कः क इति स्थिते विसर्गस्य इण्परकत्वाभावात् प्रकृतसूत्रेण सकारादेशे कस्कः इति रूपं भवति।

पाठगतप्रश्नाः-७

३०. "इणः षः" इति सूत्रस्यार्थः कः।

३१. "इणः षः" इति सूत्रस्य किमुदाहरणम्।

३२. प्रियसर्पिष्कः इत्यत्र षत्वादेशः केन सूत्रेण।

३३. "कस्कादिषु च" इति सूत्रस्यार्थः कः।

३४. "कस्कादिषु च" इति सूत्रस्य किमुदाहरणम्।

३५. सर्पिष्कुण्डिका इत्यत्र षत्वादेशः केन सूत्रेण।

३६. कस्कः इत्यत्र सत्वादेशः केन सूत्रेण।

[६.१३] इनः स्त्रियाम्॥ (५.४.१५२)

सूत्रार्थः - इन्नन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो भवति स्त्रीत्वे विवक्षिते।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः कप्प्रत्ययो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् इनः इति पञ्चम्येकवचनान्तं स्त्रियाम् इति च सप्तम्येकवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। तच्च विभक्तिविपरिणामेन बहुव्रीहेः इति भवति। "उरःप्रभृतिभ्यः कप्" इत्यस्मात् कप् इत्यनुवर्तते। इनः इति पदं बहुव्रीहेः इत्यस्य विशेषणम्। तेन तदन्तविधौ इन्नन्ताद् बहुव्रीहेः इति लभ्यते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। एवं सूत्रार्थः समायाति - "इन्नन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो भवति स्त्रीत्वे विवक्षिते" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं तावद् बहुदण्डिका नगरी इति। दण्डः अस्यास्तीति विग्रहे "अत इनिठनौ" इत्यनेन सूत्रेण इनिप्रत्यये दण्डी इति निष्पद्यते । बहवः दण्डिनो यस्यां सा इति लौकिकविग्रहे बहु जस् दण्डिन् जस् इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन सूत्रेण विशेषणस्य बहु जस् इत्यस्य पूर्वनिपाते बहु जस् दण्डिन् जस् इति जाते, समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः जस्द्वयस्य लुकि बहुदण्डिन् इति भवति। बहुदण्डिन् इति बहुव्रीहिसंज्ञकस्य इन्नन्तत्वात् स्त्रीत्वे विवक्षिते प्रकृतसूत्रेण समासान्ते कप्प्रत्यये, पकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनने लोपे बहुदण्डिन् क इति स्थिते, नकारस्य लोपे सर्वसंयोगे निष्पन्नात् बहुदण्डिकशब्दात् "अजाद्यतष्टाप्" इत्यनेन सूत्रेण टापि प्रक्रियाकार्ये सर्वसंयोगे बहुदण्डिकाशब्दो निष्पद्यते। ततः सौ प्रक्रियाकार्ये बहुदण्डिका इति रूपम्।

[६.१४] शेषाद्विभाषा॥ (५.४.१५४)

सूत्रार्थः - अनुक्तसमासान्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो विकल्पेन भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः कप्प्रत्ययो विकल्पेन विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् शेषात् इति पञ्चम्येकवचनान्तं विभाषा इति च प्रथमैकवचनान्तं पदम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इत्यस्मात् बहुव्रीहौ इति पदमनुवर्तते। तच्च विभक्तिविपरिणामेन बहुव्रीहेः इति भवति। "उरःप्रभृतिभ्यः कप्" इत्यस्मात् सूत्रात् कप् इत्यनुवर्तते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। यस्मात् समासान्तप्रत्ययो न विहितः स एव शेषशब्देन गृह्यते।

शेषात् नाम अनुक्तसमासान्ताद् इति। एवं सूत्रार्थः समायाति - "अनुक्तसमासान्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो विकल्पेन भवति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं महायशस्कः इति। महद् यशो यस्य स इति लौकिकविग्रहे महत् सु यशस् सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासो भवति। ततः "सप्तमीविशेषणे बहुव्रीहौ" इत्यनेन विशेषणस्य महत् सु इत्यस्य पूर्वनिपाते महत् सु यशस् सु इति स्थिते, "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुद्वयस्य लुकि च महत् यशस् इति जाते "आन्महतः समानाधिकरणजातीययोः" इत्यनेन सूत्रेण महतः तकारस्य आकारादेशे "अकः सवर्णे दीर्घः" इत्यनेन सवर्णदीर्घे महायशस् इति शब्दो निष्पद्यते। महायशस् इति बहुव्रीहिसंज्ञकस्य अनुक्तसमासान्तत्वात् प्रकृतसूत्रेण विकल्पेन समासान्ते कप्प्रत्यये, पकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनने लोपे महायशस् क इति स्थिते, "खरवसानयोर्विसर्जनीयः" इत्यनेन खरि परे सकारस्य विसर्गादेशे महायशः क इति जाते "सोऽपदादौ" इत्यनेन सूत्रेण विसर्गस्य सादेशे सर्वसंयोगे महायशस्कशब्दो निष्पद्यते। ततः पुंसि सौ महायशस्कः इति रूपम्। कपः वैकल्पिकत्वात् तदभावपक्षे सौ प्रक्रियाकार्ये महायशाः इति रूपम्।

पाठगतप्रश्नाः-८

३७. "इनः स्त्रियाम्" इति सूत्रस्यार्थः कः।

३८. "इनः स्त्रियाम्" इति सूत्रस्य किमुदाहरणम्।

३९. "शेषाद्विभाषा" इति सूत्रस्यार्थः कः।

४०. "शेषाद्विभाषा" इति सूत्रस्य किमुदाहरणम्।

४१. महद् यशः यस्य स इति विग्रहे बहुव्रीहौ कति रूपाणि।

[६.१५] निष्ठा॥ (२.२.३६)

सूत्रार्थः - निष्ठान्तं बहुव्रीहौ पूर्वं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पूर्वनिपातो विधीयते। एकपदात्मके सूत्रेऽस्मिन् निष्ठा इति प्रथमैकवचनान्तं पदम्। "सप्तमीविशेषणे बहुव्रीहौ" इत्यस्मात् सूत्राद् बहुव्रीहौ इति पदम् अनुवर्तते। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति क्रियाविशेषणं द्वितीयैकवचनान्तम् अनुवर्तते। प्रयुज्यते इति क्रियापदम् अध्याहार्यम्। "क्तक्तवतू निष्ठा" इति सूत्रेण विहितयोः क्तक्तवतुप्रत्ययोः निष्ठासंज्ञा। "प्रत्ययग्रहणे तदन्तग्रहणम्" इति नियमेन निष्ठा इत्यस्य तदन्तविधौ निष्ठान्तम् इति लभ्यते। बहुव्रीहिसमासे निष्ठाप्रत्ययान्तं पदं पूर्वं प्रयुज्यते इति सूत्रस्यार्थः।

उदाहरणम् - निष्ठान्तस्य पूर्वनिपाते युक्तयोगः इत्यादिकम् उदाहरणम्। युक्तो योगो येन सः इति लौकिकविग्रहे युक्त सु योग सु इत्यलौकिकविग्रहे अन्यपदार्थे विद्यमानस्य युक्त सु इत्यस्य योग सु इत्यस्य च प्रथमान्तस्य "अनेकमन्यपदार्थे" इत्यनेन बहुव्रीहिसमासे, समासस्य "कृत्तद्धितसमासाश्च" इत्यनेन प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यनेन सूत्रेण सुद्वयस्य लुकि युक्त योग इति भवति। तदा प्रोक्तेन सूत्रेण निष्ठान्तस्य युक्त इत्यस्य पूर्वनिपाते निष्पन्नात् युक्तयोग इत्यस्माद् विशेष्यानुसारेण पुंसि सौ प्रक्रियाकार्ये युक्तयोगः इति रूपम्।

पाठगतप्रश्नाः-९

४२. "निष्ठा" इति सूत्रेण किं विधीयते।

४३. "निष्ठा" इति सूत्रस्यार्थः कः।

४४. "निष्ठा" इति सूत्रस्य किमुदाहरणम्।

४५. निष्ठासंज्ञा केषां भवति।

[६.१६] वाऽऽहिताग्न्यादिषु॥ (२.२.३७)

सूत्रार्थः - आहिताग्न्यादिषु बहुव्रीहिषु निष्ठान्तं पूर्वं विकल्पेन भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण विकल्पेन पूर्वनिपातो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् वा इति विकल्पबोधकमव्यम्। आहिताग्न्यादिषु इति सप्तमीबहुवचनान्तं पदम्। "सप्तमीविशेषणे बहुव्रीहौ" इत्यस्मात् सूत्राद् बहुव्रीहौ इति पदम् अनुवर्तते। तस्य च आहिताग्न्यादिषु इत्यनेन सहान्वयाद् आहिताग्न्यादिषु बहुव्रीहिषु इति लभ्यते। आहिताग्निः आदिर्येषां ते आहिताग्न्यादयः, तेषु आहिताग्न्यादिषु इति तद्गुणसंविज्ञानबहुव्रीहिसमासः। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति क्रियाविशेषणं द्वितीयैकवचनान्तम् अनुवर्तते। प्रयुज्यते इति क्रियापदम् अध्याहार्यम्। "निष्ठा" इत्यस्मात् सूत्रात् निष्ठा इत्यनुवर्तते। "प्रत्ययग्रहणे तदन्तग्रहणम्" इति नियमेन निष्ठा इत्यस्य तदन्तविधौ निष्ठान्तम् इति लभ्यते। "आहिताग्न्यादिषु बहुव्रीहिसमासेषु निष्ठाप्रत्ययान्तं पदं विकल्पेन पूर्वं प्रयुज्यते" इति सूत्रस्यार्थः।

उदाहरणम् - निष्ठान्तस्य विकल्पेन पूर्वनिपाते आहिताग्निः अग्न्याहितः इत्यादिकम् उदाहरणम्। आहिता अग्नयः येन सः इति लौकिकविग्रहे आहित जस् अग्नि जस् इत्यलौकिकविग्रहे अन्यपदार्थे विद्यमानस्य आहित जस् इत्यस्य अग्नि जस् इत्यस्य च प्रथमान्तस्य "अनेकमन्यपदार्थे" इत्यनेन बहुव्रीहौ सुब्लुकि आहित अग्नि इति भवति। तदा आहिताग्निगणे पाठात् प्रोक्तेन सूत्रेण बहुव्रीहौ विकल्पेन निष्ठान्तस्य आहित इत्यस्य पूर्वनिपाते सवर्णदीर्घे निष्पन्नात् आहिताग्नि इत्यस्माद् विशेष्यानुसारेण पुंसि सौ प्रक्रियाकार्ये आहिताग्निः इति रूपम्। पूर्वनिपातस्य वैकल्पिकत्वात् तदभावपक्षे अग्नि आहित इति जाते यणि निष्पन्नाद् अग्न्याहितशब्दात् पुंसि सौ प्रक्रियाकार्ये अग्न्याहितः इति रूपम्।

पाठगतप्रश्नाः-१०

४६. "वाऽऽहिताग्न्यादिषु" इति सूत्रेण किं विधीयते।

४७. "वाऽऽहिताग्न्यादिषु" इति सूत्रस्यार्थः कः।

४८. "वाऽऽहिताग्न्यादिषु" इति सूत्रस्य किमुदाहरणम्।

४९. अग्न्याहितः आहिताग्निः इति रूपद्वयं कथं भवति।

पाठसारः

अस्मिन् पाठे बहुव्रीहिसमासस्य अवशिष्टांशः प्रस्तुतः। बहुव्रीहौ समासान्तस्य षच्प्रत्ययस्य विधायकं "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति, षप्रत्ययस्य विधायकं "द्वित्रिभ्यां ष मूर्ध्नः" इति, अप्प्रत्ययस्य च विधायकम् "अन्तर्बहिर्भ्यां च लोम्नः" इति सूत्रं व्याख्यातम्। अत्र "पादस्य लोपोऽहस्त्यादिभ्यः" इति, "संख्यासुपूर्वस्य" इति, "उद्भिभ्यां काकुदस्य" इति "पूर्णाद्विभाषा" इति च समासान्तलोपविधायकं सूत्रं व्याख्यातम्। प्रसङ्गात् "सुहृद्-दुर्हृदौ मित्रामित्रयोः" इति हृदयशब्दस्य हृदादेशनिपातविधायकं सूत्रमपि व्याख्यातम्। निपातनं भवति तद् वर्ण्यते। बहुव्रीहौ पूर्वनिपातविषये अत्रालोचनं भवति। ततः समासविधायकसूत्रवर्णनावसरे तदुदाहरणेषु विसर्गस्यादेशविधानाय यानि सूत्राणि अपेक्षितानि तान्यपि अत्र संगृहीतानि। समासान्तस्य कप्प्रत्ययस्य विधायकमत्र "उरःप्रभृतिभ्यः कप्" "इनः स्त्रियाम्" "शेषाद्विभाषा" सूत्रत्रयमपि व्याख्यातम्।

समासान्तपर्यालोचनावसरे "सोऽपदादौ" इति सकारादेशविधायकम्, "इणः षः" इति "कस्कादिषु च" इति षकारादेशविधायकं सूत्रमपि व्याख्यातम्। ततः बहुव्रीहौ पूर्वनिपातविधायकं "निष्ठा" इति "वाऽऽहिताग्न्यादिषु" इति च सूत्रं प्रस्तुतम्। एवं बहुव्रीहिसमासस्यावशिष्टांशः अस्मिन् पाठे प्रस्तुतः।

पाठान्तप्रश्नाः

१. "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्" इति सूत्रं व्याख्यात।

२. "द्वित्रिभ्यां ष मूर्ध्नः" इति सूत्रं व्याख्यात।

३. "अन्तर्बहिर्भ्यां च लोम्नः" इति सूत्रं व्याख्यात।

४. "पादस्य लोपोऽहस्त्यादिभ्यः" इति सूत्रं व्याख्यात।

५. "संख्यासुपूर्वस्य" इति सूत्रं व्याख्यात।

६. "उद्भिभ्यां काकुदस्य" इति सूत्रं व्याख्यात।

७. "उरःप्रभृतिभ्यः कप्" इति सूत्रं व्याख्यात।

८. दीर्घसक्थः इति रूपं साधयत।

९. अन्तर्लोमः इति रूपं साधयत।

१०. द्विमूर्धः इति रूपं साधयत।

११. व्याघ्रपाद् इति रूपं साधयत।

१२. द्विपाद् इति रूपं साधयत।

१३. उत्काकुद् इति रूपं साधयत।

१४. पूर्णकाकुदः इति रूपं साधयत।

१५. व्यूढोरस्कः इति रूपं साधयत।

१६. महायशस्कः इति रूपं साधयत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. स्वाङ्गवाचिनः सक्थ्यक्ष्यन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः षच्प्रत्ययो भवति।

२. दीर्घे सक्थिनी यस्य सः इति विग्रहः।

३. जलजाक्षी।

४. बहुव्रीहिसमासे द्वित्रिभ्यां परस्य मूर्ध्नः समासान्तः तद्धितसंज्ञकः षप्रत्ययो भवति।

५. द्विमूर्धः।

उत्तराणि-२

६. बहुव्रीहिसमासे अन्तर्बहिर्भ्यां परस्य लोम्नः समासान्तः तद्धितसंज्ञकः अप्प्रत्ययो भवति।

७. अन्तर्लोमः।

८. समासान्तलोपः विधीयते।

९. बहुव्रीहिसमासे हस्त्यादिवर्जिताद् उपमानात्परस्य पादशब्दस्य समासान्तः लोपः भवति।

१०. व्याघ्रपात्।

उत्तराणि-३

११. समासान्तलोपो विधीयते।

१२. बहुव्रीहिसमासे संख्यावाचकपूर्वस्य सु इत्यव्ययपूर्वस्य पादशब्दस्य समासान्तो लोपो भवति।

१३. द्विपात्।

१४. अलोऽन्त्यस्य इति परिभाषया।

उत्तराणि-४

१५. समासान्तलोपः विधीयते।

१६. बहुव्रीहिसमासे उद्भिभ्यां परस्य काकुदशब्दस्य समासान्तो लोपो भवति।

१७. उत्काकुत्।

१८. अलोऽन्त्यस्य इति परिभाषया।

उत्तराणि-५

१९. समासान्तलोपः।

२०. बहुव्रीहिसमासे पूर्णशब्दात् परस्य काकुदशब्दस्य विकल्पेन समासान्तो लोपो भवति।

२१. रूपत्रयम्।

२२. अलोऽन्त्यस्य इति परिभाषया।

उत्तराणि-६

२३. समासान्तहृद्भावनिपातनम्।

२४. बहुव्रीहिसमासे सुदुर्भ्यां परस्य हृदयशब्दस्य समासान्तो हृद्भावो निपात्यते क्रमशः मित्रामित्रयोः अर्थयोः।

२५. सुहृत्।

२६. उरःप्रभृत्यन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो भवति।

२७. व्यूढोरस्कः।

२८. पाश-कल्प-क-काम्येषु प्रत्ययेषु परेषु विसर्गस्य सकारादेशो भवति संहितायां विवक्षितायाम्।

२९. पयस्पाशम्।

उत्तराणि-७

३०. पाश-कल्प-क-काम्येषु प्रत्ययेषु परेषु इण उत्तरस्य विसर्गस्य षकारादेशो भवति संहितायां विवक्षितायाम्।

३१. सर्पिष्पाशम्।

३२. इणः षः इति सूत्रेण।

३३. कस्कादिषु इण उत्तरस्य विसर्गस्य षकारादेशो भवति, अन्यत्र तु सकारादेशो भवति।

३४. सर्पिष्कुण्डिका।

३५. कस्कादिषु च इति सूत्रेण।

३६. कस्कादिषु च इति सूत्रेण।

उत्तराणि-८

३७. इन्नन्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो भवति स्त्रीत्वे विवक्षिते।

३८. बहुदण्डिका नगरी।

३९. अनुक्तसमासान्ताद् बहुव्रीहेः समासान्तः तद्धितसंज्ञकः कप्प्रत्ययो विकल्पेन भवति।

४०. महायशस्कः।

४१. रूपद्वयम्।

उत्तराणि-९

४२. पूर्वनिपातः।

४३. निष्ठान्तं बहुव्रीहौ पूर्वं भवति।

४४. युक्तयोगः।

४५. क्तक्तवतुप्रत्यययोः निष्ठासंज्ञा।

उत्तराणि-१०

४६. पूर्वनिपातः।

४७. आहिताग्न्यादिषु बहुव्रीहिषु निष्ठान्तं पूर्वं विकल्पेन भवति।

४८. आहिताग्निः अग्न्याहितः इत्यादीनि उदाहरणानि।

४९. विकल्पेन निष्ठान्तस्य आहित इत्यस्य पूर्वनिपाते प्रक्रियायाम् आहिताग्निः इति रूपम्,पूर्वनिपातस्य वैकल्पिकत्वात् तदभावपक्षे अग्न्याहितः इति रूपम्।

॥ इति षष्ठः पाठः॥

346sk07

७

द्वन्द्वसमासः - पूर्वपरनिपातः विशेषकार्याणि एकशेषः च

प्रस्तावना

बहुव्रीहिसमासात्परं समासस्य भेदो भवति द्वन्द्वः। "चार्थे द्वन्द्वः" इति द्वन्द्वसमासविधायकं सूत्रम्। प्रायेण उभयपदार्थप्रधानः अयं समासः। उभयपदयोः अर्थः उभयपदार्थः। उभयपदार्थः प्रधानः यस्मिन् स उभयपदार्थप्रधानः। यथा रामः च कृष्णः च इति विग्रहे रामकृष्णौ इति। अत्र समस्यमानयोः पदयोः उभयस्यैव प्राधान्यम् अस्ति। अतः रामकृष्णौ गच्छतः इत्युच्यते चेत् रामस्य कृष्णस्य उभयोरेव गमनक्रियायां प्राधान्येनान्वयः। द्वन्द्वे पूर्वपरनिपातविधायकानि सूत्राणि अत्रालोचितानि।

अयं च द्वन्द्वसमासः इतरेतरद्वन्द्वः समाहारद्वन्द्वः इति द्विधा विभक्तः। समाहारद्वन्द्वे च एकवद्भावविधायकानि कानिचन सूत्राणि वर्तन्ते। तान्यत्र आलोचितानि। द्वन्द्वपर्यालोचनावसरे तदपवादत्वेन एकशेषविधानमपि अत्र आलोचितम्।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- द्वन्द्वसमासविधायकं सूत्रं जानीयात्।
- पूर्वपरनिपातविधायकानि सूत्राणि जानीयात्।
- द्वन्द्वापवादम् एकशेषं जानीयात्।
- द्वन्द्वे विशेषकार्यविधायकानि सूत्राणि जानीयात्।
- द्वन्द्वापवादभूतानि एकशेषसूत्राणि जानीयात्।

[७.१] चार्थे द्वन्द्वः॥ (२.२.२९)

सूत्रार्थः - अनेकं सुबन्तं चार्थे वर्तमानं विकल्पेन समस्यते, स च द्वन्द्वसंज्ञको भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण द्वन्द्वसमासो विधीयते। सूत्रेऽस्मिन् चार्थे इति सप्तम्येकवचनान्तं द्वन्द्वः इति च प्रथमैकवचनान्तं पदम्। "प्राक्कडारात्समासः", "विभाषा" इत्येतद्द्वयम् अधिकृतम्। "अनेकमन्यपदार्थे" इत्यस्मात् अनेकम् इति "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यस्मात् सुप् इति

च अनुवर्तते। चस्य अर्थः चार्थः, तस्मिन् चार्थे इति षष्ठीतत्पुरुषसमासः। सुप् इत्यत्र तदन्तविधौ अनेकम् इत्यनेन अन्वयात् अनेकं सुबन्तम् इति लभ्यते। "अनेकं सुबन्तं चार्थे वर्तमानं विकल्पेन समासं प्राप्नोति, स च समासः द्वन्द्वसंज्ञको भवती"ति सूत्रस्यार्थः।

चार्थाः के इति चेद् दीक्षितेनोक्तं सिद्धान्तकौमुद्यां- "समुच्चयान्वाचयेतरेतरयोग-समाहाराश्चार्थाः। परस्परनिरपेक्षस्य अनेकस्य एकस्मिन् अन्वयः समुच्चयः। अन्यतरस्य आनुषङ्गिकत्वे अन्वयः अन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः" इति।

परस्परनिरपेक्षानां अनेकपदानां यत्र एकस्मिन् क्रियापदे अन्वयः भवति तत्र समुच्चयः चार्थः। यथा ईश्वरं गुरुं च भजस्व इति। ईश्वरं भजस्व गुरुमपि इति तात्पर्यम्।

अन्यतरस्य एकस्य पदस्य यत्र अप्रधानत्वेन क्रियायामन्वयः, अन्यस्य च प्रधानत्वेन तत्र चार्थः अन्वाचयः। यथा - भिक्षामट गां चानय इति। भिक्षामट, गौः सङ्गता चेत् तामपि आनय इति तात्पर्यम्।

परस्परापेक्षितानां समुदितानाम् एकस्मिन् क्रियापदे अन्वयः यत्र तत्र चार्थः इतरेतरयोगः। इततरेतरयोगो नाम परस्परसाहित्यम्। यथा धवश्च खदिरश्च धवखदिरौ इति। अत्र इतरेतरयोगबोधनाय चकारद्वयप्रयोगः।

एकीभूय क्रियायामन्वयः यत्र तत्र चार्थः समाहारः। यथा संज्ञा च परिभाषा च संज्ञापरिभाषम् इति। समाहारस्यैकत्वादत्र एकवचनम्।

समुच्चये अन्वाचये च असामर्थ्यात् समासो न भवति। यथा ईश्वरं गुरुं च भजस्वेत्यत्र ईश्वरगुरुशब्दयोः परस्परनिरपेक्षयोः आवृत्ते भजस्वेति क्रियापदे क्रमेणान्वयात् परस्परम् अन्वयाभावात् नास्ति सामर्थ्यम्। एवमेव भिक्षामट गां चानयेत्यत्र भिक्षागोपदयोः परस्परनिरपेक्षयोः क्रमशः अटने आनयने चान्वयात् परस्परमन्वयाभावात् नास्ति सामर्थ्यम्। किन्तु इतरेतरयोगस्य समाहारस्य च चार्थस्य सामर्थ्यसत्त्वाद् भवति समासः।

एवमस्मिन् सूत्रे चार्थशब्देन इतरेतरयोगस्य समाहारस्य च ग्रहणम्। एवं **सूत्रार्थः** - "अनेकं सुबन्तं चार्थे इतरेतरयोगे समाहारे च वर्तमानं विकल्पेन समासं प्राप्नोति, स च समासः द्वन्द्वसंज्ञको भवति" इति।

उदाहरणम् - इतरेतरयोगस्य चार्थत्वे धवखदिरौ इत्युदाहरणम्। तथाहि धवश्च खदिरश्च इति लौकिकविग्रहे धव सु खदिर सु इत्यलौकिकविग्रहे इतरेतरयोगार्थे विद्यमानस्य धव सु इत्यस्य खदिर सु इत्यस्य च सुबन्तस्य प्रस्तुतसूत्रेण द्वन्द्वसमासो भवति। ततः समुदायस्य प्रातिपदिकत्वात् सुपः सुद्वयस्य लुकि धवखदिरशब्दो निष्पद्यते। ततः "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन सूत्रेण उत्तरपदस्य पुंसि विद्यमानत्वात् धविखदिरशब्दस्य पुंसि विद्यमानत्वात् ततः प्रथमाद्विवचने औप्रत्यये प्रक्रियाकार्ये धवखदिरौ इति रूपम्।

समाहारस्य चार्थत्वे संज्ञापरिभाषम् इत्यदाहरणम्। तथाहि संज्ञा च परिभाषा च इति लौकिकविग्रहे संज्ञा सु परिभाषा सु इत्यलौकिकविग्रहे समाहारार्थे विद्यमानस्य संज्ञा सु इत्यस्य परिभाषा सु इत्यस्य च सुबन्तस्य प्रस्तुतसूत्रेण द्वन्द्वसमासो भवति। ततः समुदायस्य प्रातिपदिकत्वात् सुपः

सुद्वयस्य लुकि संज्ञापरिभाषाशब्दो निष्पद्यते। ततः "स नपुंसकम्" इत्यनेन सूत्रेण संज्ञापरिभाषाशब्दस्य नपुंसकत्वात् ह्रस्वत्वे निष्पन्नात् संज्ञापरिभाषशब्दात् सौ प्रक्रियाकार्ये संज्ञापरिभाषम् इति रूपम्।

[७.२] राजदन्तादिषु परम्॥ (२.२.३१)

सूत्रार्थः - राजदन्तादिषु पूर्वप्रयोगार्हं परं भवति।

सूत्रव्याख्या -इदं विधिसूत्रम्। अनेन सूत्रेण परनिपातो विधीयते। सूत्रेऽस्मिन् राजदन्तादिषु इति सप्तमीबहुवचनान्तं परम् इति च प्रथमैकवचनान्तं पदम्। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति पदमनुवर्तते। प्रयुज्यते इति क्रियापदमध्याहार्यम्। राजदन्त इति शब्द आदिर्येषां ते राजदन्तादयः, तेषु राजदन्तादिषु इति तद्गुणसंविज्ञानबहुव्रीहिसमासः। राजदन्तादयः राजदन्तादिगणे पठिताः शब्दाः भवन्ति। एवं सूत्रार्थो भवति - "राजदन्तादिषु समासे पूर्वप्रयोगार्हं पदं परं प्रयुज्यते" इति।

उदाहरणम् - राजदन्तः इत्यादिकमेतस्य सूत्रस्योदाहरणम्। तथाहि दन्तानां राजा इति लौकिकविग्रहे दन्त आम् राजन् सु इत्यलौकिकविग्रहे "षष्ठी" इत्यनेन सूत्रेण षष्ठीतत्पुरुषसमासो भवति। ततः "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यनेन समासविधायकसूत्रे षष्ठीत्यस्य प्रथमानिर्दिष्टत्वात् तद्बोध्यस्य दन्त आम् इत्यस्योपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्यनेन पूर्वनिपातं प्राप्नोति। तदा राजदन्तादिगणपठितत्वात् प्रोक्तसूत्रेण दन्त आम् इत्यस्य परनिपाते राजन् सु दन्त आम् इति भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन सूत्रेण राजन् सु दन्त आम् इति समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सूत्रेण सुपः सुप्रत्ययस्य आम्प्रत्ययस्य च लुकि राजन् दन्त इति भवति। तदा "न लोपः प्रातिपदिकान्तस्य" इत्यनेन राजन् इत्यस्य नकारस्य लोपे निष्पन्नात् राज दन्त इत्यस्मात् प्रातिपदिकात् प्रथमैकवचनविवक्षायां सौ प्रक्रियाकार्ये राजदन्तः इति रूपम्।

(७.२.१) धर्मादिष्वनियमः॥ (वार्तिकम्)

वार्तिकार्थः - धर्मादिषु समस्यमानयोः अन्यतरस्य पूर्वनिपातो परनिपातो वा भवति।

वार्तिकव्याख्या - इदं वार्तिकं धर्मादिगणे पठितानां शब्दानां समासे अन्यतरस्य पूर्वनिपातं विदधाति। वस्तुतस्तु गणसूत्रमिदम्। अस्य वार्तिकस्यार्थो भवति धर्मादिगणे पठितानां शब्दानां समासे पूर्वनिपाते परनिपाते च नियमो नास्तीति।

उदाहरणम् - अर्धधर्मौ धर्मार्थौ इत्यादिकमेतस्य वार्तिकस्योदाहरणम्। तथाहि धर्मश्च अर्थश्च इति लौकिकविग्रहे धर्म सु अर्थ सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुप्रत्ययद्वयस्य लुकि धर्म अर्थ इति भवति। ततः "अजाद्यन्तम्" इति सूत्रेण अजादेः अर्थशब्दस्य पूर्वनिपाते प्राप्ते प्रोक्तेन वार्तिकेन धर्मशब्दस्य पाक्षिके पूर्वनिपाते सवर्णदीर्घे निष्पन्नाद् धर्मार्थशब्दाद् प्रथमाद्विवचने औप्रत्यये धर्मार्थौ इति रूपम्। अन्यस्मिन् पक्षे अर्थशब्दस्य पूर्वनिपाते अर्थधर्मौ इति रूपम्।

[७.३] द्वन्द्वे घि॥ (२.२.३२)

सूत्रार्थः - द्वन्द्वे घिसंज्ञकं पूर्वं प्रयुज्यते।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पूर्वनिपातो विधीयते। सूत्रेऽस्मिन् द्वन्द्वे इति सप्तम्येकवचनान्तं घि इति च लुप्तप्रथमैकवचनान्तं पदम्। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति द्वितीयैकवचनान्तं क्रियाविशेषणपदमनुवर्तते। प्रयुज्यते इति क्रियापदमध्याहार्यम्। "शेषो घ्यसखि" इति सूत्रेण विहितस्य सखिवर्जस्य ह्रस्वेकारान्तस्य ह्रस्वोकारान्तस्य च घिसंज्ञकस्यैव घिपदेन ग्रहणम्। एवं सूत्रार्थो भवति - "द्वन्द्वे घिसंज्ञकं पूर्वं प्रयुज्यते" इति।

उदाहरणम् - हरिहरौ इत्यादिकमेतस्य सूत्रस्योदाहरणम्। तथाहि हरिश्च हरश्च इति लौकिकविग्रहे हरि सु हर सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासे, प्रातिपदिकत्वात् सुब्लुकि हरि हर इति स्थिते प्रोक्तसूत्रेण इकारान्तत्वाद् घिसंज्ञकस्य हरिशब्दस्य पूर्वनिपाते निष्पन्नाद् हरिहरशब्दात् प्रथमाद्विवचने औप्रत्यये हरिहरौ इति रूपम्।

पाठगतप्रश्नाः-१

१. "चार्थे द्वन्द्वः" इति सूत्रस्यार्थः कः।

२. चार्थाः के भवन्ति।

३. समुच्चयः नाम कः तस्योदाहरणं च किम्।

४. अन्वाचयः नाम कः तस्योदाहरणं च किम्।

५. इतरेतरयोगः नाम कः तस्योदाहरणं च किम्।

६. समाहारः नाम कः तस्योदाहरणं च किम्।

७. समुच्चयान्वाचयार्थे कुतः समासो न भवति।

८. "राजदन्तादिषु परम्" इति सूत्रस्यार्थः कः।

९. "राजदन्तादिषु परम्" इति सूत्रस्य किमुदाहरणम्।

१०. "धर्मादिष्वनियमः" इति वार्तिकस्यार्थः कः।

११. "धर्मादिष्वनियमः" इति वार्तिकस्य किमुदाहरणम्।

१२. "द्वन्द्वे घि" इति सूत्रस्यार्थः कः।

१३. हरिहरौ इत्यत्र हरिशब्दस्य पूर्वनिपातः कथम्।

(७.३.१) अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे॥ (वार्तिकम्)

वार्तिकार्थः - अनेकस्य घिसंज्ञकस्य पदस्य द्वन्द्वप्राप्तौ सत्यामेकस्य घिसंज्ञकस्य पूर्वनिपातनियमः,अन्यस्मिन् घिसंज्ञकविषये पूर्वनिपातस्य विकल्पो भवति।

वार्तिकव्याख्या - इदं वार्तिकम् "अल्पाच्तरम्" इति सूत्रस्य महाभाष्ये पठितम्। अनेन वार्तिकेन अनेकघिसंज्ञकसमासे पूर्वनिपातनियमः विधीयते।

वार्तिकेऽस्मिन् अनेकप्राप्तौ एकत्र नियमः अनियमः शेषे इति पदच्छेदः। अनेकप्राप्तौ इति शेषे इति च सप्तम्यन्तम् एकत्र इति च सप्तम्यर्थबोधकमव्ययम्। नियमः अनियमः इति पदद्वयं प्रथमैकवचनान्तम्। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति द्वितीयैकवचनान्तं क्रियाविशेषणपदमनुवर्तते। "द्वन्द्वे घि" इति सूत्रमनुवर्तते। एवं वार्तिकस्यास्य अर्थो भवति - "अनेकस्य घिसंज्ञकस्य द्वन्द्वप्राप्तौ एकस्मिन् घिसंज्ञके पूर्वनिपातनियमः, अन्यत्र घिसंज्ञके पूर्वनिपातस्यानियमः" इति।

उदाहरणम् - हरिगुरुहराः हरिहरगुरवः इत्यादिकमेतस्य वार्तिकस्योदाहरणम्। तथाहि हरिश्च हरश्च गुरुश्च इति लौकिकविग्रहे हरि सु हर सु गुरु सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुप्रत्ययत्रयस्य लुकि हरि हर गुरु इति भवति। ततः प्रोक्तवार्तिकसहायेन "द्वन्द्वे घि" इत्यनेन सूत्रेण इकारान्तत्वाद् घिसंज्ञकस्य हरिशब्दस्य पूर्वनिपाते, द्वितीयस्य घिसंज्ञकस्य गुरुशब्दस्य विकल्पेन पूर्वनिपाताभावात् सर्वसंयोगे निष्पन्नाद् हरिहरगुरुशब्दाद् प्रथमाबहुवचने जस्प्रत्यये हरिहरगुरवः इति रूपम्। द्वितीयस्य घिसंज्ञकस्य पूर्वनिपातस्य वैकल्पिकत्वात् तत्पक्षे निष्पन्नाद् हरिगुरुहरशब्दात् जसि हरिगुरुहराः इति रूपम्।

[७.४] अजाद्यदन्तम्॥ (२.२.३३)

सूत्रार्थः - द्वन्द्वे यद् अजादि अदन्तं च तत् पूर्वं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पूर्वनिपातो विधीयते।एकपदात्मकसूत्रेऽस्मिन् अजाद्यदन्तम् इति प्रथमैकवचनान्तं पदम्। "द्वन्द्वे घि" इत्यस्मात् द्वन्द्वे इति पदमनुवर्तते। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति द्वितीयैकवचनान्तं क्रियाविशेषणपदमनुवर्तते। प्रयुज्यते इति क्रियापदमध्याहार्यम्। अच् आदिर्यस्य तद् अजादि इति बहुव्रीहिसमासः। अत अन्तो यस्य तद् अदन्तमिति बहुव्रीहिसमासः। एवं सूत्रार्थो भवति - "द्वन्द्वे यद् अजादि अदन्तं च तत् पूर्वं प्रयुज्यते" इति।

उदाहरणम् - ईशकृष्णौ इत्यादिकमेतस्य सूत्रस्योदाहरणम्। तथाहि ईशश्च कृष्णश्च इति लौकिकविग्रहे ईश सु कृष्ण सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुप्रत्ययद्वयस्य लुकि ईश कृष्ण इति भवति। ततः ईशशब्दस्य आदौ ईकारः अस्ति। अतः सः अजादिः। एवमेव अकारः अन्ते अस्ति अतः ईशशब्दः अदन्तः। एवं प्रोक्तसूत्रेण अजादेः अदन्तस्य ईशशब्दस्य पूर्वनिपाते निष्पन्नाद् ईशकृष्णशब्दात् प्रथमाद्विवचने औप्रत्यये ईशकृष्णौ इति रूपम्।

[७.५] अल्पाच्तरम्॥ (२.२.३४)

सूत्रार्थः - द्वन्द्वे अल्पाच्तरं पदं पूर्वं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण पूर्वनिपातो विधीयते। एकपदात्मकसूत्रेऽस्मिन् अल्पाच्तरम् इति प्रथमैकवचनान्तं पदम्। "द्वन्द्वे घि" इत्यस्मात् द्वन्द्वे इति पदमनुवर्तते। "उपसर्जनं पूर्वम्" इत्यतः पूर्वम् इति द्वितीयैकवचनान्तं क्रियाविशेषणपदमनुवर्तते। प्रयुज्यते इति क्रियापदमध्याहार्यम्। अल्पः अच् यस्य तद् अल्पाच् इति बहुव्रीहिसमासः। अल्पाच् एव अल्पाच्तरम् इति स्वार्थे तरप्प्रत्ययः। अत एव निपातनात् कुत्वाभावः। एवं सूत्रार्थो भवति - "द्वन्द्वे अल्पाज्विशिष्टं पदं पूर्वं प्रयुज्यते" इति।

उदाहरणम् - शिवकेशवौ इत्यादिकमेतस्य सूत्रस्योदाहरणम्। तथाहि शिवश्च केशवश्च इति लौकिकविग्रहे शिव सु केशव सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुप्रत्ययद्वयस्य लुकि शिव केशव इति भवति। अत्र शिव इत्यस्य व्यच्कत्वं केशव इत्यस्य च त्र्यच्कत्वमस्ति। एवं प्रोक्तसूत्रेण शिव इत्यस्य अल्पाच्कस्य पूर्वनिपाते निष्पन्नात् शिवकेशवशब्दात् प्रथमाद्विवचने औप्रत्यये शिवकेशवौ इति रूपम्।

(७.५.१) ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण॥ (वार्तिकम्)

वार्तिकार्थः - समानसंख्याच्कानाम् ऋतूनां नक्षत्राणां च द्वन्द्वे आनुपूर्व्येण क्रमेण निपातो वक्तव्यः।

वार्तिकव्याख्या - अनेन वार्तिकेन क्रमेण निपातो विधीयते। वार्तिकेऽस्मिन् ऋतुनक्षत्राणां समाक्षराणाम् आनुपूर्व्येण इति पदच्छेदः। ऋतुनक्षत्राणां समाक्षराणाम् इति पदद्वयं षष्ठीबहुवचनान्तम्। आनुपूर्व्येण इति तृतीयैकवचनान्तं पदम्। "द्वन्द्वे घि" इत्यस्माद् द्वन्द्वे इति पदमनुवर्तते। अत्राक्षरशब्देन अचः ग्रहणम्। समानि अक्षराणि येषां तानि समाक्षराणि, तेषामिति बहुव्रीहिः। समसख्यांकाच्कानाम् इति तात्पर्यम्। एवं वार्तिकस्यास्य अर्थो भवति - "समानसंख्याच्कानाम् ऋतूनां नक्षत्राणां च द्वन्द्वे आनुपूर्व्येण क्रमेण निपातो वक्तव्यः" इति।

उदाहरणम् - हेमन्तशिशिरवसन्ताः इत्यादिकमेतस्य वार्तिकस्योदाहरणम्। तथाहि हेमन्तश्च शिशिरश्च वसन्तश्च इति लौकिकविग्रहे हेमन्त सु शिशिर सु वसन्त सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासे, प्रातिपदिकत्वात् सुब्लुकि हेमन्त शिशिर वसन्त इति स्थिते प्रोक्तवार्तिकेन हेमन्तशिशिरवसन्तानां समानाच्कत्वात् तेषाम् आनुपूर्व्यस्य लोकप्रसिद्धत्वात् हेमन्तशब्दस्य पूर्वनिपाते ततः परं शिशिरशब्दस्य निपातो भवति। ततः सर्वसंयोगे निष्पन्नात् हेमन्तशिशिरवसन्तशब्दाद् प्रथमाबहुवचने जस्प्रत्यये हेमन्तशिशिरवसन्ताः इति रूपम्। एवमेव नक्षत्रवाचकत्वे निपातस्योदाहरणं कृत्तिकारोहिण्यौ इति।

(७.५.२) लघ्वक्षरं पूर्वम्॥ (वार्तिकम्)

वार्तिकार्थः - लघ्वक्षरं पदं द्वन्द्वे पूर्वं प्रयोज्यम्।

वार्तिकव्याख्या - अनेन वार्तिकेन पूर्वनिपातो विधीयते। वार्तिकेऽस्मिन् लघ्वक्षरं पूर्वमिति पदद्वयं प्रथमैकवचनान्तम्। "द्वन्द्वे घि" इत्यस्माद् द्वन्द्वे इति पदमनुवर्तते। अत्राक्षरशब्देन अचः ग्रहणम्। लघु अक्षरम् अच् यस्य तत् लघ्वक्षरमिति बहुव्रीहिसमासः। ह्रस्वाज्वर्णविशिष्टं पदम् इति तात्पर्यम्। एवं वार्तिकस्यास्य अर्थो भवति - "लघ्वच्कं पदं द्वन्द्वे पूर्वं प्रयोज्यम्" इति।

उदाहरणम् - कुशकाशम् इत्यादिकमेतस्य वार्तिकस्योदाहरणम्। तथाहि कुशश्च काशश्च इति लौकिकविग्रहे कुश सु काश सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण समाहारद्वन्द्वसमासो भवति। ततः "कृत्तद्धितसमासाश्च" इत्यनेन समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुप्रत्ययद्वयस्य लुकि कुश काश इति स्थिते प्रोक्तवार्तिकेन कुशशब्दस्य लघ्वच्कत्वात् तस्य पूर्वनिपातो भवति। ततः सर्वसंयोगे निष्पन्नस्य कुशकाशशब्दस्य एकवद्भावे नपुंसकत्वे ततः सौ कुशकाशम् इति रूपम्।

पाठगतप्रश्नाः-२

१४. "अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे" इति वार्तिकस्यार्थः कः।

१५. "अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे" इति वार्तिकस्य किमुदाहरणम्।

१६. "अजाद्यदन्तम्" इति सूत्रस्यार्थः कः।

१७. "अजाद्यदन्तम्" इति सूत्रस्योदाहरणं किम्।

१८. "अल्पाच्तरम्" इति सूत्रस्यार्थः कः।

१९. "अल्पाच्तरम्" इति सूत्रस्य किमुदाहरणम्।

२०. "ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण" इति वार्तिकस्यार्थः कः।

२१. "ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण" इति वार्तिकस्य किमुदाहरणम्।

२२. "लघ्वक्षरं पूर्वम्" इति वार्तिकस्यार्थः कः।

२३. "लघ्वक्षरं पूर्वम्" इति वार्तिकस्य किमुदाहरणम्।

(७.५.३) अभ्यर्हितं च॥ (वार्तिकम्)

वार्तिकार्थः - अभ्यर्हितं पदं द्वन्द्वे पूर्वं प्रयोज्यम्।

वार्तिकव्याख्या - अनेन वार्तिकेन पूर्वनिपातो विधीयते। वार्तिकेऽस्मिन् अभ्यर्हितमिति पदं प्रथमैकवचनान्तम्। चेत्यव्ययपदम्। "द्वन्द्वे घि" इत्यस्माद् द्वन्द्वे इति पदमनुवर्तते। अभ्यर्हितं नाम पूज्यम्। चपदेन पूर्वम् इत्यस्य ग्रहणम्। एवं वार्तिकस्यास्य अर्थो भवति - "अभ्यर्हितं पदं द्वन्द्वे पूर्वं प्रयोज्यम्" इति।

उदाहरणम् - वासुदेवार्जुनौ इत्यादिकमेतस्य वार्तिकस्योदाहरणम्। तथाहि वासुदेवश्च अर्जुनश्च इति लौकिकविग्रहे वासुदेव सु अर्जुन सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासे, प्रातिपदिकत्वात् सुब्लुकि वासुदेव अर्जुन इति भवति। ततः "अल्पाच्तरम्" इत्यनेन अल्पाक्षरविशिष्टस्य अर्जुनशब्दस्य पूर्वनिपाते प्राप्ते तं प्रबाध्य प्रोक्तवार्तिकेन अभ्यर्हितस्य वासुदेवशब्दस्य पूर्वनिपातो विधीयते। ततः सवर्णदीर्घे निष्पन्नाद् वासुदेवार्जुनशब्दात् पुंसि प्रथमाद्विवचने औप्रत्यये वासुदेवार्जुनौ इति रूपम्।

(७.५.४) वर्णानामानुपूर्व्येण॥ (वार्तिकम्)

वार्तिकार्थः - द्वन्द्वे वर्णानामानुपूर्व्येण पूर्वनिपातो वक्तव्यः।

वार्तिकव्याख्या - अनेन वार्तिकेन पूर्वनिपातो विधीयते।

वार्तिकेऽस्मिन् वर्णानाम् इति षष्ठीबहुवचनान्तम् आनुपूर्व्येण इति तृतीयैकवचनान्तं पदम्। "द्वन्द्वे घि" इत्यस्माद् द्वन्द्वे इति पदमनुवर्तते। "उपसर्जनं पूर्वम्" इत्यस्मात् पूर्वम् इत्यनुवर्तते। वर्णशब्देन प्रसिद्धा ब्राह्मणादयः चत्वारः गृह्यन्ते। एवं वार्तिकस्यार्थो भवति - "द्वन्द्वे वर्णानाम् आनुपूर्व्येण पूर्वनिपातो वक्तव्यः" इति।

उदाहरणम् - ब्राह्मणक्षत्रियविट्शूद्राः इत्येतस्य वार्तिकस्योदाहरणम्। तथाहि ब्राह्मणश्च क्षत्रियश्च विट् च शूद्रश्च इति लौकिकविग्रहे ब्राह्मण सु क्षत्रिय सु विश् सु शूद्र सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः समासस्य "कृत्तद्धितसमासाश्च" इत्यनेन प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन प्रातिपदिकावयवस्य सुप्रत्ययत्रयस्य लुकि ब्राह्मण क्षत्रिय विश् शूद्र इति भवति। तदा प्रोक्तवार्तिकेन वर्णानामानुपूर्व्येण पूर्वनिपाते प्रक्रियाकार्ये निष्पन्नाद् ब्राह्मणक्षत्रियविट्शूद्रशब्दात् पुंसि प्रथमाबहुवचने जस्प्रत्यये ब्राह्मणक्षत्रियविट्शूद्राः इति रूपम्।

(७.५.५) भ्रातुर्ज्यायसः॥ (वार्तिकम्)

वार्तिकार्थः - द्वन्द्वे ज्येष्ठभ्रातृवाचकस्य पदस्य पूर्वनिपातो वक्तव्यः।

वार्तिकव्याख्या - अनेन वार्तिकेन पूर्वनिपातो विधीयते। वार्तिकेऽस्मिन् भ्रातुः इति ज्यायसः इति पदद्वयं षष्ठ्येकवचनान्तम्। "द्वन्द्वे घि" इत्यस्माद् द्वन्द्वे इति पदमनुवर्तते। "उपसर्जनं पूर्वम्" इत्यस्मात् पूर्वम् इत्यनुवर्तते। एवं वार्तिकस्यास्य अर्थो भवति - "द्वन्द्वे ज्येष्ठभ्रातृवाचकस्य पदस्य पूर्वनिपातो वक्तव्यः" इति।

उदाहरणम् - युधिष्ठिराजुनौ इत्येतस्य वार्तिकस्योदाहरणम्। तथाहि युधिष्ठिरश्च अर्जुनश्च इति लौकिकविग्रहे युधिष्ठिर सु अर्जुन सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि युधिष्ठिर अर्जुन इति स्थिते, "अल्पाच्तरम्" इत्यनेन

अल्पाक्षरविशिष्टस्य अर्जुनशब्दस्य पूर्वनिपाते प्राप्ते तं प्रबाध्य प्रोक्तवार्तिकेन ज्येष्ठभ्रातृवाचकस्य युधिष्ठिरशब्दस्य पूर्वनिपातो भवति। ततः सवर्णदीर्घे निष्पन्नाद् युधिष्ठिरार्जुनशब्दात् पुंसि प्रथमाद्विवचने औप्रत्यये युधिष्ठिरार्जुनौ इति रूपम्।

(७.५.६) संख्याया अल्पीयस्याः॥ (वार्तिकम्)

वार्तिकार्थः - समासे अल्पसंख्यावाचकस्य पूर्वनिपातो वक्तव्यः।

वार्तिकव्याख्या - अनेन वार्तिकेन पूर्वनिपातो विधीयते। वार्तिकेऽस्मिन् संख्यायाः इति अल्पीयस्याः इति पदद्वयं षष्ठ्येकवचनान्तम्। संख्यायाः अल्पीयस्याः इत्यस्य अल्पसंख्यावाचकस्य इत्यर्थः। "उपसर्जनं पूर्वम्" इत्यस्मात् पूर्वम् इत्यनुवर्तते। एवं वार्तिकस्यास्यार्थो भवति - "समासे अल्पसंख्यावाचकस्य पदस्य पूर्वनिपातो वक्तव्यः" इति।

उदाहरणम् - द्वादश इत्येतस्य वार्तिकस्योदाहरणम्। तथाहि द्वौ च दश च इति लौकिकविग्रहे द्वि जस् दशन् जस् इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि द्वि दशन् इति स्थिते, प्रोक्तवार्तिकेन अल्पसंख्यावाचकस्य द्विशब्दस्य पूर्वनिपाते द्वि दशन् इति स्थिते ततः द्विशब्दस्य इकारस्य "द्व्यष्टनः संख्यायामबह्वीह्यशीत्योः" इत्यनेन सूत्रेण आकारान्तादेशे द्वादशन् इति जाते, नलोपे प्रक्रियाकार्ये निष्पन्नाद् द्वादशशब्दात् जसि द्वादश इति रूपम्।

पाठगतप्रश्नाः-३

२४. "अभ्यर्हितं च" इति वार्तिकस्यार्थः कः।

२५. "अभ्यर्हितं च" इति वार्तिकस्य किमुदाहरणम्।

२६. "वर्णानामानुपूर्व्येण" इति वार्तिकस्यार्थः कः।

२७. "वर्णानामानुपूर्व्येण" इति वार्तिकस्य किमुदाहरणम्।

२८. "भ्रातुर्ज्यायसः" इति वार्तिकस्यार्थः कः।

२९. "भ्रातुर्ज्यायसः" इति वार्तिकस्य किमुदाहरणम्।

३०. "संख्याया अल्पीयस्याः" इति वार्तिकस्यार्थः कः।

३१. "संख्याया अल्पीयस्याः" इति वार्तिकस्य किमुदाहरणम्।

[७.६] द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्॥ (२.४.२)

सूत्रार्थः - प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां च द्वन्द्व एकवद् भवति।

सूत्रव्याख्या - इदम् अतिदेशसूत्रम्। अनेन सूत्रेण एकवद्भावः अतिदिश्यते। एकवत् नाम एकस्मिन् इव। अर्थाद् एकवचनान्ततया प्रयोगो भवति। पदत्रयात्मकसूत्रेऽस्मिन् सूत्रे द्वन्द्व इति प्रथमैकवचनान्तं पदम्। चेत्यव्ययपदम्। प्राणितूर्यसेनाङ्गानाम् इति षष्ठीबहुवचनान्तं पदम्। "द्विगुरेकवचनम्" इत्यस्मात् एकवचनम् इति पदमनुवर्तते। प्राणी च तूर्यञ्च सेना च प्राणितूर्यसेनाः इतीतरेतरयोगद्वन्द्वसमासः। तासाम् अङ्गानि प्राणितूर्यसेनाङ्गानि, तेषां प्राणितूर्यसेनाङ्गानाम् इति षष्ठीतत्पुरुषसमासः। "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति न्यायात् प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानाम् इति लभ्यते। एकं वक्तीति एकवचनम् इति कर्तरि ल्युट्। "समाहारग्रहणं कर्तव्यम्" इति वार्तिकबलात् समाहाररूपार्थस्य प्रतिपादकम् एषां द्वन्द्वसमास इति लभ्यते। एवं सूत्रार्थो भवति- "प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां च द्वन्द्व एकवद् भवति" इति।

उदाहरणम् - प्राण्यङ्गस्योदाहरणं पाणिपादम् इति। पाणी च पादौ एषां समाहारः इति लौकिकविग्रहे पाणि औ पाद औ इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण समाहारद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि पाणि पाद इति स्थिते प्रोक्तसूत्रेण प्राण्यङ्गद्वन्द्वत्वाद् पाणिपाद इति द्वन्द्वस्य एकवद्भावो भवति। ततः पाणिपादशव्दात् प्रथमैकवचने सौ "स नपुंसकम्" इत्यनेन समाहारद्वन्द्वस्य पाणिपादशब्दस्य नपुंसकत्वं भवति। ततः सोरमि पाणिपाद अम् इति जाते "अमि पूर्वः" इत्यनेन दकाराकारस्य अमः अकारस्य च स्थाने पूर्वरूपे अकारे पाणिपादम् इति रूपम्।

तूर्याङ्गानामुदाहरणं भवति मार्दङ्गिकाश्च वैणविकाश्च एषां समाहारः इति विग्रहे मार्दङ्गिकवैणविकम्। सेनाङ्गानामुदाहरणं भवति रथिकाश्च अश्वारिहाश्च एषां समाहारः इति विग्रहे रथिकाश्वारोहम्।

[७.७] जातिरप्राणिनाम्॥ (२.४.६)

सूत्रार्थः - प्राणिवर्जितजातिवाचकानां द्वन्द्व एकवद् भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदम् अतिदेशसूत्रम्। अनेन सूत्रेण एकवद्भावः अतिदिश्यते। पदत्रयात्मकसूत्रेऽस्मिन् सूत्रे जातिः इति प्रथमैकवचनान्तम् अप्राणिनाम् इति षष्ठीबहुवचनान्तं पदम्। जातिः इत्यत्र षष्ठीबहुवचनस्थाने व्यत्ययेन प्रथमा। जातिवाचिनाम् इत्यर्थः। अप्राणिनामित्यस्य प्राणिवाचकवर्जितानाम् इत्यर्थः। "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्राद् द्वन्द्वः इति पदमनुवर्तते। "द्विगुरेकवचनम्" इत्यस्मात् एकवचनम् इति पदमनुवर्तते। "समाहारग्रहणं कर्तव्यम्" इति वार्तिकबलात् समाहाररूपार्थस्य प्रतिपादकम् एषां द्वन्द्वसमास इति लभ्यते। एवं सूत्रार्थो भवति - "प्राणिवर्जितजातिवाचकानां द्वन्द्व एकवद् भवति" इति।

उदाहरणम् - धानाशष्कुलि इत्युदाहरणम्। धानाश्च शष्कुलयश्च तासां समाहारः इति लौकिकविग्रहे धाना जस् शष्कुलि जस् इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण समाहारद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सूत्रेण सुपः जस्द्वयस्य लुकि धानाशष्कुलि इति भवति। तदा प्रोक्तसूत्रेण प्राणिभिन्नशस्यजातिवाचिनां द्वन्द्वस्य

धानाशष्कुलि इत्यस्य एकवद्भावो भवति। ततः धानाशष्कुलिशब्दात् सौ "स नपुंसकम्" इत्यनेन नपुंसकत्वे प्रक्रियाकार्ये धानाशष्कुलि इति रूपम्।

[७.८] येषां च विरोधः शाश्वतिकः॥ (२.४.९)

सूत्रार्थः - येषां विरोधः शाश्वतिकः तेषां द्वन्द्व एकवद् भवति।

सूत्रव्याख्या - इदम् अतिदेशसूत्रम्। अनेन सूत्रेण एकवद्भावस्य अतिदेशः क्रियते। पदत्रयात्मकसूत्रेऽस्मिन् सूत्रे येषामिति षष्ठीबहुवचनान्तं पदम्। चेत्यव्ययपदम्। विरोधः शाश्वतिकः इति पदद्वयं प्रथमैकवचनान्तम्। विरोधो वैरम्। शाश्वतिको नाम सदा। "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्राद् द्वन्द्वः इति पदमनुवर्तते। "द्विगुरेकवचनम्" इत्यस्मात् एकवचनम् इति पदमनुवर्तते। "समाहारग्रहणं कर्तव्यम्" इति वार्तिकबलात् एषां द्वन्द्वसमास इति लभ्यते। एवं सूत्रार्थो भवति- "येषां विरोधः शाश्वतिकः तेषां द्वन्द्व एकवद् भवति" इति।

उदाहरणम् - अहिनकुलम् इत्युदाहरणम्। अहयश्च नकुलाश्च इति लौकिकविग्रहे अहि जस् नकुल जस् इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण समाहारद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि प्रक्रियाकार्ये अहिनकुल इति भवति। अहिनकुलयोः विरोधयोः सुप्रसिद्धत्वात् प्रोक्तसूत्रेण तयोर्द्वन्द्वस्य एकवद्भावो भवति। ततः अहिनकुलशब्दात् सौ "स नपुंसकम्" इत्यनेन नपुंसकत्वे सोरमि प्रक्रियाकार्ये अहिनकुलम् इति रूपम्।

[७.९] विप्रतिषिद्धं चानधिकरणवाचि॥ (२.४.१३)

सूत्रार्थः - विरुद्धार्थानाम् अद्रव्यवाचिनां द्वन्द्व एकवद् विकल्पेन भवति।

सूत्रव्याख्या - इदम् अतिदेशसूत्रम्। अनेन सूत्रेण विकल्पेन एकवद्भावः अतिदिश्यते। पदत्रयात्मकसूत्रेऽस्मिन् विप्रतिषिद्धम् अनधिकरणवाचि इति पदद्वयं प्रथमैकवचनान्तम्। चेत्यव्ययपदम्। "विभाषा" इत्यनुवर्तते। विप्रतिषेधो विरोधः सहानवस्थानलक्षणः। अधिकरणं द्रव्यम्। न अधिकरणम् अनधिकरणं नाम अद्रव्यम्। "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्राद् द्वन्द्वः इति पदमनुवर्तते। "द्विगुरेकवचनम्" इत्यस्मात् एकवचनम् इति पदमनुवर्तते। "समाहारग्रहणं कर्तव्यम्" इति वार्तिकबलात् एषां द्वन्द्वसमास इति लभ्यते। एवं सूत्रार्थो भवति - "विरुद्धार्थानाम् अद्रव्यवाचिनां द्वन्द्व एकवद् विकल्पेन भवति" इति।

उदाहरणम् - शीतोष्णम् इत्युदाहरणम्। शीतं च उष्णं च इति लौकिकविग्रहे शीत सु उष्ण सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण समाहारद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुपः सुप्रत्ययद्वयस्य लुकि शीत उष्ण इति स्थिते गुणे शीतोष्णशब्दो भवति। शीतोष्ण इत्यत्र अद्रव्यवाचिनोः विरुद्धार्थयोः द्वन्द्वत्वात् तयोर्द्वन्द्वस्य प्रोक्तसूत्रेण विकल्पेन एकवद्भावो भवति। ततः शीतोष्णशब्दात् सौ "स नपुंसकम्" इत्यनेन नपुंसकत्वे

प्रक्रियाकार्ये शीतोष्णम् इति रूपम्। एकवद्भावस्य वैकल्पिकत्वात् तदभावपक्षे औप्रत्यये शीतोष्णे इति रूपं भवति।

पाठगतप्रश्नाः-४

३२. "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्रस्यार्थः कः।

३३. "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्रेण प्राण्यङ्गानामेकवद्भावे किमुदाहरणम्।

३४. "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्रेण तूर्याङ्गानामेकवद्भावे किमुदाहरणम्।

३५. "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्रेण सेनाङ्गानामेकवद्भावे किमुदाहरणम्।

३६. "जातिरप्राणिनाम्" इति सूत्रस्यार्थः कः।

३७. "जातिरप्राणिनाम्" इति सूत्रस्य किमुदाहरणम्।

३८. "येषां च विरोधः शाश्वतिकः" इति सूत्रस्यार्थः कः।

३९. "येषां च विरोधः शाश्वतिकः" इति सूत्रस्य किमुदाहरणम्।

४०. "विप्रतिषिद्धं चानधिकरणवाचि" इति सूत्रस्यार्थः कः।

४१. "विप्रतिषिद्धं चानधिकरणवाचि" इति सूत्रस्य किमुदाहरणम्।

[७.१०] आनङृतो द्वन्द्वे॥ (६.३.२५)

सूत्रार्थः - द्वन्द्वे विद्यायोनिसम्बन्धवाचिनाम् ऋदन्तानाम् उत्तरपदे परे आनङ् भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण आनङ् विधीयते। पदत्रयात्मके सूत्रेऽस्मिन् आनङ् इति प्रथमैकवचनान्तम् ऋतः इति षष्ठ्येकवचनान्तं द्वन्द्वे इति च सप्तम्येकवचनान्तं पदम्। "अलुगुत्तरपदे" इत्यतः उत्तरपदे इत्यनुवर्तते। "ऋतो विद्यायोनिसम्बन्धेभ्यः" इत्यस्मात् सूत्राद् विद्यायोनिसम्बन्धेभ्यः इति पदमनुवर्तते। तच्च पदं षष्ठ्यन्ततया विपरिणमते। ऋतः इत्यत्र तदन्तविधौ ऋदन्तानाम् इति लभ्यते। एवं सूत्रार्थो भवति - "द्वन्द्वसमासे विद्यायोनिसम्बन्धवाचिनाम् ऋदन्तानाम् उत्तरपदे परे आनङ् भवति" इति।

अयं च आनङ् इत्यादेशः ङित्त्वात् "ङिच्च" इति परिभाषया अन्त्यस्य अल एव स्थाने भवति।

उदाहरणम् - विद्यासम्बन्धवाचित्वे उदाहरणं होतापोतारौ इति। होता च पोता च इति लौकिकविग्रहे होतृ सु पोतृ सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि होतृ पोतृ इति भवति। विद्यासम्बन्धिवाचिनः ऋदन्तस्य होतृशब्दस्य पोतृ इत्युत्तरपदे परे "ङिच्च" इति परिभाषया परिष्कृतेन प्रोक्तसूत्रेण ऋकारस्य आनङि होत् आनङ् पोतृ इति भवति। आनङः ङकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे,

नकाराकारस्योच्चारणार्थकत्वाच्च होतान् पोतृ इति भवति। तदा "न लोपः प्रातिपदिकान्तस्य" इत्यनेन होतान् इत्यत्र अन्त्यस्य नकारस्य लोपे होतापोतृशब्दो निष्पद्यते। ततः प्रथमाद्विवचनविवक्षायाम् औप्रत्यये होतापोतारौ इति रूपम्।

एवमेव योनिसम्बन्धवाचित्वे उदाहरणं मातापितरौ इति। माता च पिता च इति लौकिकविग्रहे मातृ सु पितृ सु इत्यलौकिकविग्रहे इतरेतरद्वन्द्वसमासे प्रक्रियाकार्ये मातृ पितृ इति स्थिते प्रोक्तसूत्रेण मातृशब्दस्य ऋकारस्यानङि प्रक्रियाकार्ये मातापितरौ इति रूपम्।

मातापितरौ इत्यत्र इतरेतरद्वन्द्वसमासः। तस्य च समासस्य अपवाद एकशेषः। तस्य एकशेषस्य विधानाय प्रवृत्तम् -

[७.११] पिता मात्रा॥ (१.२.७०)

सूत्रार्थः - मातृशब्देन सहोक्तौ पितृशब्दः विकल्पेन अवशिष्यते।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण द्वन्द्वसमासापवाद एकशेषो विधीयते।पदद्वयात्मके सूत्रेऽस्मिन् पिता इति प्रथमैकवचनान्तं मात्रा इति च तृतीयैकवचनान्तं पदम्। "सरूपाणामेकशेष एकविभक्तौ" इत्यस्मात् सूत्रात् शेषः इति पदमनुवर्तते। "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" इत्यस्मात् सूत्राद् अन्यतरस्याम् इति पदमनुवर्तते। एवं च सूत्रार्थः- "मातृशब्देन सहोक्तौ पितृशब्दः विकल्पेन अवशिष्यते" इति।

उदाहरणम् - सूत्रस्यास्य उदाहरणं पितरौ इति। माता च पिता च इति लौकिकविग्रहे प्रोक्तसूत्रेण मातृपितृशब्दयोः स्थाने पितृशब्दस्य शेषो भवति। ततः "यः शिष्यते स लुप्यमानार्थाभिधायी" इति न्यायेन पितृशब्देन मातृपितृशब्दयोरर्थबोधनात् ततः प्रथमाद्विवचने औप्रत्यये पितृ औ इति भवति। ततः "ऋतो ङिसर्वनामस्थानयोः" इत्यनेन ऋकारस्य गुणे रपरत्वे पितर् औ इति जाते, सर्वसंयोगे पितरौ इति रूपं सिध्यति। एकशेषस्य वैकल्पिकत्वात् तदभावपक्षे द्वन्द्वसमासे मातापितरौ इति रूपम्।

[७.१२] देवताद्वन्द्वे च॥ (६.३.२६)

सूत्रार्थः - देवतावाचिनां द्वन्द्वसमासे उत्तरपदे परे आनङ् भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदम् विधिसूत्रम्। अनेन सूत्रेण आनङ् विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् देवताद्वन्द्वे इति सप्तम्येकवचनान्तं पदम्। चेत्यव्ययपदम्। चकारेण "आनङृतो द्वन्द्वे" इत्यस्मात् सूत्राद् आनङः ग्रहणं भवति। "अलुगुत्तरपदे" इत्यतः उत्तरपदे इत्यनुवर्तते। देवतानां द्वन्द्वं देवताद्वन्द्वं तस्मिन् इति षष्ठीतत्पुरुषसमासः। देवताशब्देन देवतावाचकानां शब्दानां ग्रहणम्। एवं सूत्रार्थो भवति - "देवतावाचिनां द्वन्द्वसमासे उत्तरपदे परे आनङ् भवति" इति।

अयं च आनङ् इत्यादेशः ङित्त्वात् "ङिच्च" इति परिभाषया अन्त्यस्य अल एव स्थाने भवति।

उदाहरणम् - मित्रावरुणौ इत्यादिकमस्य सूत्रस्य उदाहरणम्। मित्रश्च वरुणश्च इति लौकिकविग्रहे मित्र सु वरुण सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण इतरेतरद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि मित्रवरुण इति भवति। देवतावाचिद्वन्द्वत्वाद् उत्तरपदे वरुणशब्दे परे "ङिच्च" इति परिभाषया परिष्कृतेन प्रोक्तसूत्रेण मित्रेत्यत्र रकाराकारस्य आनङि मित् र् आनङ् वरुण इति भवति। ततः ङकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे, नकाराकारस्योच्चारणार्थ-कत्वाच्च मित्रान् वरुण इति भवति। तदा "न लोपः प्रातिपदिकान्तस्य" इत्यनेन मित्रान् इत्यस्य नकारस्य लोपे निष्पन्नात् मित्रावरुणशव्दात् प्रथमाद्विवचनविवक्षायाम् औप्रत्यये मित्रावरुणौ इति रूपम्।

[७.१३] द्वन्द्वाच्चुदषहान्तात्समाहारे॥ (५.४.१०६)

सूत्रार्थः - चवर्गान्ताद् दषहान्ताच्च द्वन्द्वात् समाहारे समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः टच्प्रत्ययो विधीयते।पदत्रयात्मके सूत्रेऽस्मिन् द्वन्द्वात् चुदषहान्तात् समाहारे इति पदच्छेदः। द्वन्द्वात् चुदषहान्तात् इति पदद्वयं पञ्चम्येकवचनान्तम्। समाहारे इति सप्तम्येकवचनान्तं पदम्। चुश्च दश्च षश्च हश्च एषां समाहारः चुदषहम् इति समाहारद्वन्द्वः। चुदषहम् अन्ते यस्य स चुदषहान्तः, तस्मात् चुदषहान्तात् इति बहुव्रीहिसमासः। "राजाहःसखिभ्यष्टच्" इत्यस्मात् सूत्रात् टच् इत्यनुवर्तते। "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। चुशब्देन चवर्गस्य ग्रहणम्। दषहेत्यत्र अकार उच्चारणार्थकः। एवं सूत्रार्थो भवति - "चवर्गान्ताद् दषहान्ताच्च द्वन्द्वात् समाहारे समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति" इति।

उदाहरणम् - चवर्गान्तात् टचः वाक्त्वचम् इत्युदाहरणम्। वाक् च त्वक् चानयोः समाहारः इति लौकिकविग्रहे वाच् सु त्वच् सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण समाहारद्वन्द्वसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि वाच् त्वच् इति भवति। ततः अन्तर्वर्तिनीं विभक्तिमाश्रित्य "चोः कुः" इत्यनेन वाच् इत्यस्य चकारस्य कुत्वे ककारे वाक् त्वच् इति भवति। चवर्गान्तत्वाद् वाक्त्वच् इति समाहारद्वन्द्वस्य प्रोक्तसूत्रेण टचि वाक्त्वच् टच् इति भवति। टचः टकारस्य "चुटू" इत्यनेन चकारस्य च "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे वाक्त्वच् अ इति भवति। तदा सर्वसंयोगे निष्पन्नात् वाक्त्वचशब्दात् "स नपुंसकम्" इत्यनेन नपुंसके विद्यमानात् सौ प्रक्रियाकार्ये वाक्त्वचम् इति रूपम्।

दकारान्तात् टच उदाहरणं शमी च दृषत् चानयोः समाहारः शमीदृषदम् इति। षकारान्तात् टच उदाहरणं वाक् च त्विट् चानयोः समाहारः वाक्त्विषम् इति। हकारान्तात् टच उदाहरणं छत्रं च उपानत् चानयोः समाहारः छत्रोपानहम् इति।

पाठगतप्रश्नाः-५

४२. "आनङृतो द्वन्द्वे" इति किम्प्रकारकं सूत्रम्।

४३. "आनङृतो द्वन्द्वे" इति सूत्रस्यार्थः कः।

४४. "आनङृतो द्वन्द्वे" इति सूत्रस्य किमुदाहरणम् ।

४५. "पिता मात्रा" इति सूत्रेण किं विधीयते।

४६. "पिता मात्रा" इति सूत्रस्यार्थः कः।

४७. "पिता मात्रा" इति सूत्रस्य किमुदाहरणम्।

४८. "देवताद्वन्द्वे च" इति सूत्रेण किं विधीयते।

४९. "देवताद्वन्द्वे च" इति सूत्रस्यार्थः कः।

५०. "देवताद्वन्द्वे च" इति सूत्रस्य किमुदाहरणम्।

५१. "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति सूत्रेण किं विधीयते।

५२. "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति सूत्रस्यार्थः कः।

५३. "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति सूत्रस्य किमुदाहरणम्।

पाठसारः

अस्मिन् पाठे द्वन्द्वसमासः प्रस्तुतः। बहुव्रीहिसमासात्परं समासस्य भेदो भवति द्वन्द्वः। "चार्थे द्वन्द्वः" इति द्वन्द्वसमासविधायकं सूत्रम्। प्रायेण उभयपदार्थप्रधानः अयं समासः। द्वन्द्वसमासः इतरेतरद्वन्द्वः समाहारद्वन्द्वः द्विधा विभक्तः। अत्र "चार्थे द्वन्द्वः" इति सूत्रस्य व्याख्यानावसरे चार्थाः प्रतिपादिताः। समुच्चयः अन्वाचयः इतरेतरयोगः समाहारः च चार्थः। परस्परनिरपेक्षाणाम् अनेकपदानां यत्र एकस्मिन् क्रियापदे अन्वयः भवति तत्र समुच्चयः चार्थः। अन्यतरस्य एकस्य पदस्य यत्र अप्रधानत्वेन क्रियायामन्वयः, अन्यस्य च प्रधानत्वेन तत्र चार्थः अन्वाचयः। परस्परापेक्षितानां समुदितानाम् एकस्मिन् क्रियापदे अन्वयः यत्र तत्र चार्थः इतरेतरयोगः। एकीभूय क्रियायामन्वयः यत्र तत्र चार्थः समाहारः। समुच्चये अन्वाचये च सामर्थ्याभावात् न समासो भवति। किन्तु इतरेतरयोगस्य समाहारस्य च चार्थस्य सामर्थ्यसत्त्वाद् भवति समासः। एवं "चार्थे द्वन्द्वः" इति सूत्रेण इतरेतरयोगे समाहारे च द्वन्द्वसमासो भवति।

ततः "राजदन्तादिषु परम्" इति पूर्वनिपातविधायकं सूत्रं प्रस्तुतम्। तद्विषयकतया "धर्मादिष्वनियमः" इति वार्तिकमपि व्याख्यातम्। ततः द्वन्द्वे घिसंज्ञकानां पूर्वप्रयोगविधायकं "द्वन्द्वे घि" इति सूत्रं व्याख्यातम्। ततः "अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे" इति, "ऋतुनक्षत्राणां

समाक्षराणामानुपूर्व्येण" इति, "लघ्वक्षरं पूर्वम्" इति, "अभ्यर्हितं च" इति, "वर्णानामानुपूर्व्येण" इति, "भ्रातुर्ज्यायसः" इति,"संख्याया अल्पीयस्याः" इति पूर्वनिपातविधायकानि वार्तिकानि व्याख्यातानि।

ततः द्वन्द्वे एकवद्भावविधायकानि "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति, "जातिरप्राणिनाम्" इति, "येषां च विरोधः शाश्वतिकः" इति सूत्राण्यपि व्याख्यातानि।

द्वन्द्वसमासप्रसङ्गे मातापितरौ इत्यत्र उत्तरपदे परे आनङ्-विधायकम् "आनङृतो द्वन्द्वे" इति सूत्रमपि व्याख्यातम्। अत्र च द्वन्द्वापवादस्य एकशेषस्य विधायकं "पिता मात्रा" इति सूत्रमपि व्याख्यातम्। मित्रावरुणौ इत्यादी आनङादेशविधायकं "देवताद्वन्द्वे च" इति सूत्रं ततः प्रतिपादितम्। ततः समासान्तस्य टच्प्रत्ययस्य विधायकं "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति सूत्रं प्रतिपादितम्। एवं द्वन्द्वसमासः अस्मिन् पाठे प्रतिपादितः।

पाठान्तप्रश्नाः

१. "चार्थे द्वन्द्वः" इति सूत्रस्य व्याख्यां कुरुत।

२. "द्वन्द्वे घि" इति सूत्रस्य व्याख्यां कुरुत।

३. "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्रस्य व्याख्यां कुरुत।

४. "विप्रतिषिद्धं चानधिकरणवाचि" इति सूत्रस्य व्याख्यां कुरुत।

५. "येषां च विरोधः शाश्वतिकः" इति सूत्रस्य व्याख्यां कुरुत।

६. "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति सूत्रस्य व्याख्यां कुरुत।

७. चार्थाः के। तान् विवृणुत।

८. द्वन्द्वे पूर्वपरनिपातः इति विषयमाश्रित्य टिप्पणीं लिखत।

९. समाहारद्वन्द्वे एकवद्भावः इति विषयमाश्रित्य टिप्पणीं लिखत।

१०. धवखदिरौ इति रूपं साधयत।

११. पाणिपादम् इति रूपं साधयत।

१२. शीतोष्णम् इति रूपं साधयत।

१३. अहिनकुलम् इति रूपं साधयत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते।

२. "समुच्चयान्वाचयेतरेतरयोग-समाहाराश्चार्थाः।

३. परस्परनिरपेक्षाणाम् अनेकपदानां यत्र एकस्मिन् क्रियापदे अन्वयः भवति तत्र समुच्चयः चार्थः। ईश्वरं गुरुं च भजस्व इति उदाहरणम्।

४. अन्यतरस्य एकस्य पदस्य यत्र अप्रधानत्वेन क्रियायामन्वयः, अन्यस्य च प्रधानत्वेन तत्र चार्थः अन्वाचयः। भिक्षाम् अट गां च आनय इति।

५. परस्परापेक्षितानां समुदितानाम् एकस्मिन् क्रियापदे अन्वयः यत्र तत्र चार्थः इतरेतरयोगः। धवखदिरौ इति छिन्धि इति उदाहरणम्।

६. एकीभूय क्रियायामन्वयः यत्र तत्र चार्थः समाहारः। पाणिपादम् इति उदाहरणम्।

७. परस्परम् अन्वयाभावात्।

८. राजदन्तादिषु पूर्वप्रयोगार्हं परं भवति।

९. राजदन्तः इति।

१०. धर्मादिषु समस्यमानयोः अन्यतरस्य पूर्वनिपातो परनिपातो वा भवति।

११. अर्थधर्मौ धर्मार्थौ इति उदाहरणम्।

१२. द्वन्द्वे घिसंज्ञकं पूर्वं प्रयुज्यते।

१३. हरिशब्दः घिसंज्ञकः अतः तस्य पूर्वनिपातः।

उत्तराणि-२

१४. अनेकस्य घिसंज्ञकस्य पदस्य द्वन्द्वप्राप्तौ सत्यामेकस्य घिसंज्ञकस्य पूर्वनिपातनियमः,अन्यस्मिन् घिसंज्ञकविषये पूर्वनिपातस्य विकल्पो भवति।

१५. हरिगुरुहराः हरिहरगुरवः इत्यादिकमेतस्य वार्तिकस्योदाहरणम्।

१६. द्वन्द्वे यद् अजादि अदन्तं च तत् पूर्वं भवति।

१७. ईशकृष्णौ।

१८. द्वन्द्वे अल्पाच्तरं पदं पूर्वं भवति।

१९. शिवकेशवौ इति

२०. समानसंख्याच्कानाम् ऋतूनां नक्षत्राणां च द्वन्द्वे आनुपूर्व्येण क्रमेण निपातो वक्तव्यः।

२१. हेमन्तशिशिरवसन्ताः।

२२. लघ्वक्षरं पदं द्वन्द्वे पूर्वं प्रयोज्यम्।

२३. कुशकाशम्।

उत्तराणि-३

२४. अभ्यर्हितं पदं द्वन्द्वे पूर्वं प्रयोज्यम्।

२५. वासुदेवार्जुनौ।

२६. द्वन्द्वे वर्णानामानुपूर्व्येण पूर्वनिपातो वक्तव्यः।

२७. ब्राह्मणक्षत्रियविट्शूद्राः।

२८. द्वन्द्वे ज्येष्ठभ्रातृवाचकस्य पदस्य पूर्वनिपातो वक्तव्यः।

२९. युधिष्ठिराजुर्नौ।

३०. समासे अल्पसंख्यावाचकस्य पूर्वनिपातो वक्तव्यः।

३१. द्वादश।

उत्तराणि-४

३२. प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां च द्वन्द्व एकवद् भवति।

३३. पाणिपादम्।

३४. मार्दङ्गिकपाणविकम्।

३५. रथिकाश्वहरोम्।

३६. प्राणिवर्जितजातिवाचकानां द्वन्द्व एकवद् भवति।

३७. धानाशष्कुलि।

३८. येषां विरोधः शाश्वतिकः तेषां द्वन्द्व एकवद् भवति।

३९. अहिनकुलम्।

४०. विरुद्धार्थानाम् अद्रव्यवाचिनां द्वन्द्व एकवद् विकल्पेन भवति।

४१. शीतोष्णम्।

उत्तराणि-५

४२. विधिसूत्रम्।

४३. विद्यायोनिसम्बन्धवाचिनाम् ऋदन्तानाम् उत्तरपदे परे आनङ् भवति।

४४. होतापोतारौ।

४५. द्वन्द्वसमासापवाद एकशेषः।

४६. मातृशब्देन सहोक्तौ पितृशब्दः विकल्पेन अवशिष्यते।

४७. पितरौ।

४८. आनङ्।

४९. देवतावाचिनां द्वन्द्वसमासे उत्तरपदे परे आनङ् भवति।

५०. मित्रावरुणौ।

५१. समासान्तः टच्प्रत्ययः विधीयते।

५२. चवर्गान्ताद् दषहान्ताच्च द्वन्द्वात् समाहारे समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति।

५३. शमीदृषदम्।

॥ इति सप्तमः पाठः॥

346sk08

८

प्रकीर्णं समासप्रकरणम्

प्रस्तावना

आद्येषु पाठेषु केवलसमासः अव्ययीभावसमासः तत्पुरुषसमासः द्वन्द्वसमासश्च वर्णितः। तत्र तत्तत्समासपर्यालोचनावसरे एव समासान्तानां कार्याणां विधायकानि निषेधकानि च सूत्राणि उल्लिखितानि। अस्मिन् पाठे सर्वसमासोपकारकाणि यानि समासान्तकार्यविधायकानि सूत्राणि तेषामुल्लेखः अस्ति। किञ्च, समासान्तकार्यनिषेधकानि सूत्राणि अपि अत्र संगृहीतानि।

ततः पदविधित्वं वृत्तेरस्ति अतः वृत्तिर्नाम का इति जिज्ञासा। ततः वृत्तिस्वरूपं तद्भेदाः विग्रहस्वरूपं तद्भेदाः च अस्मिन् पाठे वर्णिताः। ततः वृत्तिषु अन्यतमस्य समासस्य संक्षेपेण स्वरूपं प्रतिपाद्य तद्भेदा वर्णिताः। तत्तत्समासानां समासान्तकार्येषु कीदृशं महत्त्वं तदपि प्रतिपादितम् अस्मिन् पाठे।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- सर्वसमासान्तविधायकानि सूत्राणि जानीयात्।
- सर्वसमासान्तनिषेधकानि सूत्राणि जानीयात्।
- वृत्तिस्वरूपं जानीयात्।
- विग्रहस्वरूपं जानीयात्।
- वृत्तिभेदान् विग्रहभेदान् च जानीयात्।
- समासभेदान् तल्लक्षणानि च जानीयात्।

अथ सर्वसमासेषु उपकारकाणि समासान्तकार्यविधायकानि सूत्राणि आलोच्यन्ते -

[८.१] ऋक्पूरब्धूःपथामानक्षे।।॥ (५.४.७४)

सूत्रार्थः - ऋगाद्यन्तस्य समासस्य अप्रत्ययः अन्तावयवो भवति, अक्षे या धूः तदन्तस्य न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अप्रत्ययो विधीयते।

पदत्रयात्मके सूत्रेऽस्मिन् ऋक्पूरब्धूःपथाम् अ अनक्षे इति पदच्छेदः। अत्र ऋक्पूरब्धूःपथाम् इति षष्ठीबहुवचनान्तम्, अ इति लुप्तप्रथमैकवचनान्तम् अनक्षे इति च सप्तम्येकवचनान्तं पदम्। ऋक् च पूश्च आपश्च धूश्च पन्थाश्च ऋक्पूरब्धूःपन्थानः, तेषाम् ऋक्पूरब्धूःपथाम् इति इतरेतरद्वन्द्वसमासः। न अक्षः अनक्षः, तस्मिन् अनक्षे इति नञ्तत्पुरुषसमासः। सम्बन्धस्याधिकरणविवक्षायामत्र सप्तमी। सूत्रे "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। समासस्य अन्तः समासान्तः। ऋक्पूरब्धूःपथाम् इत्यस्य विशेष्यत्वात् समासस्येत्यत्र वचनविपरिणामेन समासानाम् इति भवति। ततः ऋक्पूरब्धूःपथाम् इत्यत्र तदन्तविधौ ऋगाद्यन्तानां समासानाम् इत्यन्वयो भवति। अनक्षे इति निषेधः साधारणतया यद्यप्युक्तः तथापि अन्यैः सह निषेधासम्भवात् धुर् इत्यनेनैव सम्बन्धः स्वीक्रियते। एवं सूत्रार्थो भवति - "ऋगाद्यन्तस्य समासस्य अप्रत्ययः अन्तावयवः भवति, परन्तु अक्षशब्दविषये धुरन्तः यः तस्मान्न भवति" इति।

सूत्रे अनक्षे इति प्रतिषेधात् अक्षशब्देन धुर् इत्यस्य समासे न समासान्तः। तथाहि अक्षस्य धूः इति विग्रहे प्रक्रियाकार्ये अक्षधुर् इति जाते अनक्षे इत्यनेन न अप्रत्ययः। ततः सौ प्रक्रियाकार्ये अक्षधूः इति रूपम्।

उदाहरणम् - ऋक्शब्दान्तसमासस्य समासान्ते उदाहरणम् अर्धर्चः इति। ऋचः अर्धम् इति लौकिकविग्रहे ऋच् ङस् अर्ध सु इत्यलौकिकविग्रहे "अर्धं नपुंसकम्" इत्यनेन सूत्रेण तत्पुरुषसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि, अर्धशब्दस्य पूर्वनिपाते "आद् गुणः" इत्यनेन सूत्रेण अकारस्य ऋकारस्य च स्थाने गुणे रपरत्वे अर्धर्च् इति भवति। ततः प्रोक्तसूत्रेण ऋगन्तस्य अर्धर्च् इति शब्दस्य समासान्तः अप्रत्ययो भवति। ततः अर्धर्च् अ इति जाते सर्वसंयोगे निष्पन्नस्य अर्धर्चशब्दस्य "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन परवल्लिङ्गत्वे प्राप्ते "अर्धर्चाः पुंसि च" इत्यनेन विकल्पेन पुंलिङ्गे सौ अर्धर्चः इति रूपम्। नपुंसकलिङ्गे सौ अर्धर्चम् इति रूपम्।

पुर्-शब्दान्तसमासस्य समासान्ते उदाहरणं विष्णोः पूः इति विग्रहे विष्णुपुरम् इति। अप्-शब्दान्तसमासस्य समासान्ते उदाहरणं विमला आपो यस्य तद् विमलापं सरः इति। धुर्-शब्दान्तसमासस्य समासान्ते उदाहरणं राज्ञः धूः राजधुरा इति। पथिन्-शब्दान्तसमासस्य समासान्ते उदाहरणं सख्युः पन्थाः सखिपथः इति।

[८.२] अच् प्रत्यन्ववपूर्वात् सामलोम्नः॥ (५.४.७४)

सूत्रार्थः - प्रत्यन्ववपूर्वात् सामलोमान्तात् समासात् समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अच्प्रत्ययो विधीयते। पदत्रयात्मके सूत्रेऽस्मिन् अच् इति प्रथमैकवचनान्तं पदम्। प्रत्यन्ववपूर्वात् सामलोम्नः इति पदद्वयं पञ्चम्येकवचनान्तम्। प्रत्यन्ववपूर्वात् इत्यस्य तात्पर्यं प्रति अनु अव इति पूर्वपदं यस्य तस्मात् इति। सूत्रे "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। प्रत्यन्ववपूर्वाद् इत्यस्य पदस्य विशेष्यं समासाद्

इति। समासाद् इत्यस्य विशेषणत्वात् तदन्तविधौ सामलोम्नः इत्यस्य सामलोमान्ताद् इत्यर्थो भवति। एवं च **सूत्रार्थः** - "प्रत्यन्ववपूर्वात् सामलोमान्तात्समासात् समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति" इति।

उदाहरणम् - सामान्तस्य समासस्य समासान्ते उदाहरणं प्रतिसामम् इति। प्रतिगतं साम इति लौकिकविग्रहे प्रति सामन् सु इत्यलौकिकविग्रहे "कुगतिप्रादयः" इत्यनेन सूत्रेण प्रादितत्पुरुषसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि प्रतिसामन् इति भवति। ततः प्रोक्तसूत्रेण प्रतिपूर्वात् सामान्तात् प्रतिसामन् इत्यस्मात् समासात् अच्प्रत्ययो भवति। अचः चकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे प्रतिसामन् अ इति भवति। ततः "यचि भम्" इत्यनेन पूर्वस्य प्रतिसामन् इत्यस्य भसंज्ञायां "नस्तद्धिते" इत्यनेन टेरनः लोपे प्रतिसाम् अ इति जाते सर्वसंयोगे निष्पन्नस्य प्रतिसामशब्दस्य "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन परवल्लिङ्गत्वे प्राप्ते नपुंसके सौ प्रतिसामम् इति रूपम्।

लोमान्तस्य समासान्ते अवलोमम् इत्युदाहरणम्। अवहीनं लोम इति लौकिकविग्रहः।

[८.३] अक्ष्णोऽदर्शनात्॥ (५.४.७६)

सूत्रार्थः - अचक्षुःपर्यायाद् अक्ष्णः समासान्तः तद्धितसंज्ञकः अचप्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अच्प्रत्ययो विधीयते।पदद्वयात्मके सूत्रेऽस्मिन् अक्ष्णः अदर्शनात् इति पदच्छेदः। अत्र अक्ष्णः इति अदर्शनात् इति च पदद्वयं पञ्चम्येकवचनान्तम्। "अच्प्रत्यन्ववपूर्वात् सामलोम्नः" इत्यस्मात् सूत्राद् अच् इति पदमनुवर्तते। सूत्रे "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। दृश्यते अनेनेति दर्शनमिति करणे ल्युट्। नेत्रमित्यर्थः। न दर्शनम् अदर्शनम्, तस्माद् अदर्शनाद् इति नञ्तत्पुरुषसमासः। नेत्रवाचिभिन्नाद् अचक्षुःपर्यायाद् इति। समासस्यान्तः समासान्तः। समासस्येत्यनेनान्वयाद् विभक्तिविरिणामेन तदन्तविधौ अचक्षुःपर्यायान्तस्य समासस्य इति लभ्यते। एवं सूत्रार्थो भवति - "अचक्षुःपर्यायाद् अक्षिशब्दात् समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं गवाक्षः इति। गवाम् अक्षि इव इति लौकिकविग्रहे गो आम् अक्षि सु इत्यलौकिकविग्रहे "षष्ठी" इत्यनेन सूत्रेण गो आम् इति षष्ठ्यन्तं अक्षि सु इति सुबन्तेन सह षष्ठीतत्पुरुषसमाससंज्ञं भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि गो अक्षि इति स्थिते "ङिच्च" इति परिभाषया परिष्कृतेन "अवङ् स्फोटायनस्य" इत्यनेन गोशब्दस्य ओकारस्यावङि अनुबन्धलोपे ग् अव अक्षि इति भवति। ततः अकारद्वयस्य स्थाने सवर्णदीर्घे आकारे गवाक्षि इति निष्पद्यते। गवाक्षि इत्यस्य अचक्षुःपर्यायाक्षिशब्दान्तत्वात् ततः प्रोक्तसूत्रेण अच्प्रत्यये अनुबन्धलोपे गवाक्षि अ इति भवति। तदा गवाक्षिशब्दस्य "यचि भम्" इत्यनेन भसंज्ञायां "यस्येति च" इत्यनेन इकारस्य लोपे सर्वसंयोगे निष्पन्नात् गवाक्षशब्दात् लोकप्रसिद्धत्वात् पुंसि विद्यमानात् सौ प्रक्रियाकार्ये गवाक्षः इति रूपम्।

पाठगतप्रश्नाः-१

१. "ऋक्पूरब्धूःपथामानक्षे" इति सूत्रेण किं विधीयते।

२. "ऋक्पूरब्धूःपथामानक्षे" इति सूत्रस्यार्थः कः।

३. "ऋक्पूरब्धूःपथामानक्षे" इति सूत्रस्य किमुदाहरणम्।

४. ऋक्पूरब्धूःपथामानक्षे" इति सूत्रे अनक्षे इति पदं किमर्थम्।

५. "अच् प्रत्यन्ववपूर्वात् सामलोम्नः" इति सूत्रेण किं विधीयते।

६. "अच् प्रत्यन्ववपूर्वात् सामलोम्नः" इति सूत्रस्यार्थः कः।

७. "अच् प्रत्यन्ववपूर्वात् सामलोम्नः" इति सूत्रस्य किमुदाहरणम्।

८. "अक्ष्णोऽदर्शनात्" इति सूत्रेण किं विधीयते।

९. "अक्ष्णोऽदर्शनात्" इति सूत्रस्यार्थः कः।

१०. "अक्ष्णोऽदर्शनात्" इति सूत्रस्य किमुदाहरणम्।

[८.४] उपसर्गादध्वनः॥ (५.४.८५)

सूत्रार्थः - प्रादिभ्यः अध्वनः समासान्तः तद्धितसंज्ञकः अचप्रत्ययो भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तः अचप्रत्ययो विधीयते।पदद्वयात्मके सूत्रेऽस्मिन् उपसर्गाद् अध्वनः इति पदच्छेदः। अत्र उपसर्गाद् इति अध्वनः इति च पदद्वयं पञ्चम्येकवचनान्तम्। "अचप्रत्यन्ववपूर्वात् सामलोम्नः" इत्यस्मात् सूत्राद् अच् इति पदमनुवर्तते। सूत्रे "प्रत्ययः", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। उपसर्गपदेन प्रादयो गृह्यन्ते। एवं सूत्रार्थो भवति - "प्रादिपूर्वपदाद् अध्वन्नन्तात् समासाद् समासान्तः तद्धितसंज्ञकः अचप्रत्ययो भवति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं प्राध्वो रथः इति। प्रगतः अध्वानम् इति लौकिकविग्रहे प्र अध्वन् अम् इत्यलौकिकविग्रहे "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इत्यनेन वार्तिकेन प्रादितत्पुरुषसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि प्र अध्वन् इति स्थिते अकारद्वयस्य स्थाने सवर्णदीर्घे आकारे प्राध्वन् इति निष्पद्यते। प्रादिपूर्वकाध्वन्नन्तत्वात् प्राध्वन् इति शब्दस्य ततः प्रोक्तसूत्रेण समासान्तः अचप्रत्ययो भवति। अचः चकारस्य "हलन्त्यम्" इत्यनेन इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे प्राध्वन् अ इति भवति। प्राध्वन्शब्दस्य "यचि भम्" इत्यनेन भसंज्ञायां "नस्तद्धिते" इत्यनेन भसंज्ञकस्य प्राध्वन्शब्दस्य टेरनः लोपे प्राध्व् अ इति जाते, सर्वसंयोगे निष्पन्नात् प्राध्वशब्दात् पुंसि सौ प्रक्रियाकार्ये प्राध्वः इति रूपम्।

समासान्तकार्याणां निषेधकानि सूत्राण्यधः प्रस्तूयन्ते -

[८.५] न पूजनात्॥ (५.४.६९)

सूत्रार्थः - पूजनार्थात् परं यत् प्रातिपदिकं तदन्तात् समासात् समासान्ताः न भवन्ति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तनिषेधो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् नेत्यव्ययपदं पूजनात् इति पञ्चम्येकवचनान्तं पदम्। सूत्रे "प्रत्ययः", "ङ्याप्प्रातिपदिकात्", "परश्च", "तद्धिताः", "समासान्ताः" इत्येतानि अधिकृतानि। पूजनशब्देन पूजनार्थकस्य ग्रहणम्। पूजनात् प्रातिपदिकात् इत्यनेनान्वयः। तेन पूजनार्थात्परं यत्प्रातिपदिकं तस्माद् इति लभ्यते। समासस्य अन्ताः समासान्ताः। समासपदेनान्वयात् प्रातिपदिकान्तात् समासात् इति लभ्यते। एवं सूत्रार्थो भवति - "पूजनार्थात् परं यत् प्रातिपदिकं तदन्तात् समासात् समासान्ताः न भवन्ति" इति। "स्वतिभ्यामेव" इति भाष्येष्टिबलेन सु अति इत्युपसर्गद्वयस्य पूजनार्थस्यैव सूत्रे ग्रहणम्। इष्टिः नाम इच्छाप्रतिपादकं वचनम्।

उदाहरणम् - अस्य सूत्रस्योदाहरणं सुराजा इति। सुशोभनो राजा इति लौकिकविग्रहे सुशोभन सु राजन् सु इत्यलौकिकविग्रहे "कुगतिप्रादयः" इत्यनेन सूत्रेण प्रादितत्पुरुषसमासो भवति। ततः समासस्य प्रातिपदिकत्वात् सुब्लुकि, सुराजन् इति निष्पद्यते। सुराजन् इत्यस्मात् "राजाहःसखिभ्यष्टच्" इत्यनेन टचि प्राप्नोति। परन्तु सुराजन् इत्यत्र सु इति पूजनार्थकम्। एवं सुराजन् इत्यस्य पूजनार्थपूर्वपदकत्वात् प्रोक्तसूत्रेण टचः निषेधे सुराजन् इति भवति। ततः सुराजन् इत्यस्मात् पुंसि सौ प्रक्रियाकार्ये सुराजा इति रूपम्।

एवमेव अतिशयितो राजा अतिराजा इत्यत्र न समासान्तप्रत्ययः।

[८.६] किमः क्षेपे॥ (५.४.७०)

सूत्रार्थः - निन्दार्थकात् किंशब्दात् परं यत् प्रातिपदिकं तदन्तात् समासात् समासान्ताः न भवन्ति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तनिषेधो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् किमः इति पञ्चम्येकवचनान्तं क्षेपे इति सप्तम्येकवचनान्तं पदम्। सूत्रे "प्रत्ययः", "ङ्याप्प्रातिपदिकात्", "परश्च", "तद्धिताः" "समासान्ताः" इत्येतानि अधिकृतानि। क्षेपो नाम निन्दा। किमः इत्यस्य प्रातिपदिकात् इत्यनेनान्वयः। तेन पूजनार्थात्परं यत्प्रातिपदिकम् तस्माद् इति लभ्यते। समासस्य अन्ताः समासान्ताः। समासपदेनान्वयात् प्रातिपदिकान्तात् समासात् इति लभ्यते। एवं **सूत्रार्थः** - "निन्दार्थकात् किंशब्दात् परं यत् प्रातिपदिकं तदन्तात् समासात् समासान्ताः न भवन्ति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं किंराजा इति। कुत्सितो राजा इति लौकिकविग्रहे किम् सु राजन् सु इत्यलौकिकविग्रहे "किं क्षेपे" इत्यनेन सूत्रेण तत्पुरुषसमासो भवति। ततः किमित्यस्य पूर्वनिपाते समासस्य प्रातिपदिकत्वात् सुब्लुकि किंराजन् इति भवति। किंराजन् इत्यस्मात् "राजाहःसखिभ्यष्टच्"

इत्यनेन टचि प्राप्ते किंपूर्वपदकत्वात् प्रोक्तसूत्रेण तन्निषेधे किंराजन् इति भवति। किंराजन् इत्यस्मात् पुंसि सौ किंराजा इति रूपम्।

[८.७] नञस्तत्पुरुषात्॥ (५.४.७१)

सूत्रार्थः - नञ्तत्पुरुषसमासात् समासान्ताः न भवन्ति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तनिषेधो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् नञः तत्पुरुषात् इति पदद्वयं पञ्चम्येकवचनान्तम्। सूत्रे "प्रत्ययः", "परश्च", "तद्धिताः" "समासान्ताः" इत्येतानि अधिकृतानि। एवं सूत्रार्थो भवति - "नञ्तत्पुरुषसमासात् समासान्ताः न भवन्ति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं अराजा इति। न राजा इति लौकिकविग्रहे न राजन् सु इत्यलौकिकविग्रहे "नञ्" इत्यनेन सूत्रेण तत्पुरुषसमासे, प्रातिपदिकत्वात् सुब्लुकि, नलोपे अराजन् इति निष्पद्यते।अराजन् इत्यस्मात् "राजाहःसखिभ्यष्टच्" इत्यनेन टचि प्राप्ते नञ्तत्पुरुषत्वात् प्रोक्तसूत्रेण तन्निषेधे अराजन् इत्यस्मात् पुंसि सौ प्रक्रियाकार्ये अराजा इति रूपम्।

[८.८] पथो विभाषा॥ (५.४.७२)

सूत्रार्थः - पथिन्शब्दान्तात् नञ्तत्पुरुषसमासात् विकल्पेन समासान्ताः न भवन्ति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण समासान्तनिषेधो विधीयते। पदद्वयात्मके सूत्रेऽस्मिन् पथः पञ्चम्येकवचनान्तं विभाषा इति च विकल्पबोधकम् अव्ययपदम्। सूत्रे "प्रत्ययः", "परश्च", "तद्धिताः" "समासान्ताः" इत्येतानि अधिकृतानि। "नञस्तत्पुरुषात्" इति सूत्रमनुवर्तते। पथिन्शब्दस्य तत्पुरुषादित्यनेनान्वयात् तदन्तविधौ पथिन्शब्दान्तात् तत्पुरुषात् इति लभ्यते। एवं सूत्रार्थो भवति - "पथिन्शब्दान्तात् नञ्तत्पुरुषसमासात् विकल्पेन समासान्ताः न भवन्ति" इति।

उदाहरणम् - अस्य सूत्रस्योदाहरणं अपन्थाः इति। न पन्थाः इति लौकिकविग्रहे न पथिन् सु इत्यलौकिकविग्रहे "नञ्" इत्यनेन सूत्रेण तत्पुरुषसमासे, प्रातिपदिकत्वात् सुब्लुकि, नलोप अपथिन् इति निष्पद्यते। अरापथिन् इत्यस्मात् "ऋक्पूरब्धूःपथामानक्षे" इत्यनेन अचि प्राप्ते पथिन्शब्दान्तनञ्तत्पुरुषत्वात् प्रोक्तसूत्रेण विकल्पेन तन्निषेधे अपथिन् इत्यस्मात् पुंसि सौ प्रक्रियाकार्ये अपन्थाः इति रूपम्। निषेधस्य वैकल्पिकत्वात् तदभावपक्षे अचि अपथिन् अ इति स्थिते, भस्य टेरनो लोपे निष्पन्नस्य अपथशब्दस्य "पथः संख्याव्ययादेः" इत्यनेन नपुंसकत्वे सौ अपथम् इति रूपम्।

पाठगतप्रश्नाः-२

११. "उपसर्गादध्वनः" इति सूत्रस्यार्थः कः।

१२. "उपसर्गादध्वनः" इति सूत्रस्य किमुदाहरणम्।

१३. "न पूजनात्" इति सूत्रस्यार्थः कः।

१४. "न पूजनात्" इति सूत्रस्य किमुदाहरणम्।

१५. "किमः क्षेपे" इति सूत्रस्यार्थः कः।

१६. "किमः क्षेपे" इति सूत्रस्य किमुदाहरणम्।

१७. "नञस्तत्पुरुषात्" इति सूत्रस्यार्थः कः।

१८. "नञस्तत्पुरुषात्" इति सूत्रस्य किमुदाहरणम्।

१९. "पथो विभाषा" इति सूत्रस्यार्थः कः।

२०. "पथो विभाषा" इति सूत्रस्य किमुदाहरणम्।

८.१) वृत्तिस्वरूपम्, तद्भेदाश्च

"समर्थः पदविधिः" इति सूत्रे पदविधिर्नाम पदसम्बन्धी विधिः इति। अर्थात् पदोद्देश्यकविधिः इति। पदोद्देश्यकविधित्वं वृत्तीनामस्ति। वृत्तिर्नाम का इति प्रश्नः समायाति। अस्मिन् प्रसङ्गे सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेनोक्तं - "कृत्तद्धितसमासैकशेषसनाद्यन्त-धातुरूपाः पञ्च वृत्तयः। परार्थाभिधानं वृत्तिः।" इति।

"परार्थाभिधानं वृत्तिः" इति वृत्तिलक्षणम्। परार्थस्य अभिधानं परार्थाभिधानम् इति षष्ठीतत्पुरुषसमासः। अभिधानमिति करणे ल्युट्प्रत्ययः। परार्थः नाम विग्रहवाक्यावयवपदार्थेभ्यः परः यः अर्थः स परार्थः तत्प्रतिपादिका वृत्तिः। अर्थाद् विग्रहवाक्येषु यानि पदानि सन्ति तेषामर्था भवन्ति, ततः भिन्नस्य विशिष्टैकार्थस्य प्रतिपादिका भवति वृत्तिः। एवं विग्रहवाक्यावयवपदार्थेभ्यः परः अन्यः यः विशिष्टैकार्थः, तत्प्रतिपादिका वृत्तिः। अर्थात् प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन प्रथमविगृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादिका वृत्तिः। समुदायशक्तिर्नाम एकार्थीभावसामर्थ्यम्। एवम् एकार्थीभावसामर्थ्यविशिष्टा वृत्तिः विशिष्टैकार्थं प्रतिपादयति।

वृत्तेः पञ्च भेदाः भवन्ति - कृदन्तवृत्तिः, तद्धितान्तवृत्तिः, समासवृत्तिः, एकशेषवृत्तिः सनाद्यन्तवृत्तिश्चेति। तत्र समासवृत्तौ यथा वृत्तिलक्षणसङ्गमनम्। यथा राज्ञः पुरुषः इत्यत्र राज्ञः इति पदस्य राजसम्बन्धी इत्यर्थः पुरुषः इति पदस्य च पुरुष इत्यर्थः। अत्र समासवृत्तौ सत्यां राजपुरुष इति निष्पद्यते। राजपुरुष इति पदस्यार्थो भवति राजविशिष्टपुरुषः इति।

८.२) विग्रहवाक्यस्वरूपम्, तद्भेदाश्च

वृत्तिलक्षणावसरे परार्थो नाम कः इति पृष्टे विग्रहवाक्यावयवपदार्थेभ्यः परः यः अर्थः इति उक्तः। तदा विग्रहः कः प्रश्नः समायाति। अस्मिन् प्रसङ्गे सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेनोक्तं - "वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स द्विविधः। लौकिकोऽलौकिकश्च। परिनिष्ठितत्वात्साधुर्लौकिकः। प्रयोगानर्होऽसाधुरलौकिकः।" इति।

"वृत्त्यर्थावबोधकं वाक्यं विग्रहः" इति विग्रहवाक्यस्य लक्षणम्। वृत्त्यर्थस्य अवबोधकं यद् वाक्यं तदेव विग्रहः। यथा राजपुरुषः इति समासवृत्तौ राज्ञः पुरुषः इति वाक्यं तदर्थबोधकः। अतः स विग्रहः।

स च विग्रहः लौकिकः अलौकिकश्चेति द्विधा विभक्तः।

तत्र लौकिकविग्रहः परिनिष्ठितो भवति। परिनिष्ठितो नाम व्याकरणसंस्कृतः। व्याकरणेन संस्कृतानामेव पदानां प्रयोगार्हत्वात् लोके साधुत्वम्। एवं "परिनिष्ठितत्वात् साधुर्लौकिकः" इति लौकिकविग्रहवाक्यलक्षणम्। लौकिको नाम लोके प्रयोगार्हः। अलौकिकः नाम लोके प्रयोगानर्हः। अर्थात् परिनिष्ठितत्वाभावाद् यः विग्रहः लोके प्रयोगार्हं नास्ति सः अलौकिकविग्रहः। एवं "प्रयोगानर्हः असाधुरलौकिकः" इति अलौकिकविग्रहवाक्यलक्षणम्।

यथा उदाहरणं राजपुरुषः इति समासे। राज्ञः पुरुषः इति लौकिकविग्रहवाक्यम्, अस्य वाक्यस्य व्याकरणसंस्कृतत्वात् लोके प्रयोगार्हत्वात्। अत्र राजन् ङस् पुरुष सु इत्यलौकिकविग्रहवाक्यम्। अस्य वाक्यस्य व्याकरणसंस्कृतत्वाभावात् लोके प्रयोगार्हत्वं नास्ति।

पाठगतप्रश्नाः-३

२१. वृत्तेः किं लक्षणम्।

२२. वृत्तेः कति भेदाः।

२३. विग्रहो नाम कः।

२४. विग्रहस्य कति भेदाः के च ते।

२५. सोदाहरणं लौकिकविग्रहलक्षणं लिखत।

२६. सोदाहरणम् अलौकिकविग्रहलक्षणं लिखत।

८.३) समासभेदाः

स च समासः नित्यः अनित्यश्चेति द्विधा विभक्तः। अविग्रहो अस्वपदविग्रहो वा नित्यसमासः। नास्ति विग्रहो यस्य सः अविग्रहः इति। अत्र विग्रहपदेन लौकिकविग्रहः स्वीक्रियते। एवं लौकिकविग्रहवाक्यरहितः नित्यसमासः। नास्ति स्वैः पदैः विग्रहः यस्य सः अस्वपदविग्रहः। अर्थात् समस्यमानैः स्वैः पदैः विग्रहः यस्य समासस्य न भवति सः अस्वपदविग्रहः। अस्वपदविग्रहः स समासः नित्यसमासः।

अविग्रहस्य नित्यसमासस्योदाहरणं यथा कृष्णसर्पः इति। अत्र कृष्णश्चासौ सर्पश्चेति लौकिकविग्रहेन सर्पजातिविशेषवाचकस्य बोधाभावात् कृष्णसर्पः इत्यविग्रहो नित्यसमासः।

अस्वपदविग्रहस्य नित्यसमासस्योदाहरणं यथा कुपुरुषः इति। अत्र कुत्सितश्चासौ पुरुषश्चेति लौकिकविग्रहः। समासे प्रयुज्यमानस्य कु इत्यस्य अर्थबोधनाय लौकिकविग्रहे कुत्सितः इति पदस्य प्रयोगादयं समासः अस्वपदविग्रहो नित्यसमासः।

स्वपदविग्रहो भवति अनित्यसमासः। स्वैः समस्यमानैः पदैः विग्रहो यस्य स स्वपदविग्रहः। अर्थाद् यस्मिन् समासे समासप्रयुक्तैः पदैः एव विग्रहवाक्यं निर्मीयते स स्वपदविग्रहः समासो भवति। सः अनित्यः। यथा पीतम् अम्बरं यस्य स पीताम्बरः इति। अत्र पीतशब्देन अम्बरशब्देन च समस्यमानेन एव विग्रहस्य दर्शनाद् अयम् अनित्यसमासः।

समासस्य कति भेदा इत्यत्र बहूनामस्ति विप्रतिपत्तिः। सामान्यतः समासस्य पञ्च भेदा इति वक्तुं शक्यन्ते। ते च – केवलसमासः अव्ययीभावः तत्पुरुषः बहुव्रीहिः द्वन्द्वः चेति।

८.३.१) केवलसमासः

अव्ययीभावादिविशेषसंज्ञाभिः विनिर्मुक्तः यः समासः स केवलसमासः। समासप्रकरणे विद्यमानैः समासविधायकैः सूत्रैः समासः विधीयते। सूत्रेण क्वचित् समासो विधीयते परन्तु तस्य समासस्य विशेषसंज्ञा न क्रियते स समासः केवलसमास इत्युच्यते। विशेषसंज्ञाः भवन्ति - अव्ययीभावः, तत्पुरुषः, द्वन्द्वो बहुव्रीहिश्च। अस्य समासस्य सुप्सुपासमास इति नामान्तरम्। "सह सुपा" इति सूत्रं "इवेन सह समासो विभक्त्यलोपश्च" इति वार्तिकम् अस्य समासस्य विधायकम्। भूतपूर्वः वागर्थाविव इत्यादिकम् अस्य समासस्य उदाहरणम्।

८.३.२) अव्ययीभावसमासः

"प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः" इत्यव्ययीभावसमासस्य लक्षणम्। पूर्वपदस्यार्थः पूर्वपदार्थः। पूर्वपदार्थः प्रधानो यत्र स पूर्वपदार्थप्रधानः इति बहुव्रीहिः। अस्मिन् समासे प्रायेण पूर्वपदार्थस्य प्राधान्यं दृश्यते। अव्ययीभाव इति अन्वर्था संज्ञा। अनव्ययम् अव्ययं भवतीति अव्ययीभावः। "अव्ययीभावः" इत्यधिकृत्य विहितः समासः अव्ययीभावसंज्ञकः भवति। एतस्मात् सूत्रात् "तत्पुरुषः" इत्यस्मात् सूत्रात्प्राक् पर्यन्तं यानि सूत्राणि सन्ति तैः विहितः समासः अव्ययीभावसंज्ञको भवति।

अव्ययीभावसमासस्य पाठे समासस्यास्य विधायकानि सूत्राणि पञ्च सूत्राणि सन्निविष्टानि। तानि भवन्ति - "अव्ययं विभक्ति-समीप-समृद्धि-व्यद्ध्यर्थाभावाऽत्ययाऽसम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्याऽन्तवचनेषु", "यावदवधारणे", "सुप्प्रतिना मात्रार्थे", "संख्या वंश्येन" "नदीभिश्च" चेति। तत्र "अव्ययं विभक्ती"ति सूत्रस्य अधिहरि, उपकृष्णम्, सुमद्रम्, दुर्यवनम् इत्यादीन्युदाहरणानि भवन्ति। "यावदवधारणे" इति सूत्रस्य यावच्छ्लोकम् इति, "सुप्प्रतिना मात्रार्थे" इति सूत्रस्य सूपप्रति इति, "संख्या वंश्येन" इति सूत्रस्य एकविंशतिभारद्वाजम्, "नदीभिश्च" इति सूत्रस्य पञ्चगङ्गम् इत्यादिकम् उदाहरणम्।

अव्ययीभावसमासे पूर्वपदार्थप्राधान्यं दृश्यते। यथा अधिहरि इत्यादौ। हरौ इति लौकिकविग्रहे हरि ङि अधि इत्यलौकिकविग्रहे अधिहरि इति रूपं निष्पद्यते। अधिहरि इत्यत्र अव्ययीभावसमासे अधि इत्यव्ययं पूर्वपदम्। अत्र पूर्वपदस्य अधिकरणार्थस्य प्राधान्यात् अधिहरि इति पूर्वपदार्थप्रधानः।

परन्तु सूपप्रति इत्यत्रास्ति पूर्वपदार्थप्राधान्यस्य व्यभिचारः। "सुप्प्रतिना मात्रार्थे" इत्यनेन सूत्रेण सूपस्य लेशः इति लौकिकविग्रहे समासे सूपप्रति इति रूपं निष्पद्यते। सूपप्रति इत्यत्र प्रति इति मात्राबोधकम्। वस्तुतः अत्र मात्रार्थस्य उत्तरपदार्थस्यैव प्राधान्यमस्ति, पूर्वपदार्थस्य च अप्राधान्यम्। अत एवोच्यते प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः।

"समासान्ताः" इत्यधिकृत्य केचन समासान्ताः प्रत्यया विधीयन्ते । ते च प्रत्ययाः "तद्धिताः" इत्यधिकारबलात् तद्धितसंज्ञका भवन्ति। अत्र अव्ययीभावसमासस्य पाठे टच्प्रत्ययविधायकानि चत्वारि सूत्राणि उल्लिखितानि। तेषु "अव्ययीभावे शरत्प्रभृतिभ्यः" "अनश्च" इति सूत्रद्वयं नित्यं टच्प्रत्ययविधायकम्। अत्र यथाक्रमम् उपशरदम् अध्यात्मम् इत्यादिकमुदाहरणम्। "नपुंसकादन्यतरस्याम्" "झयः" इति सूत्रद्वयं विकल्पेन टच्प्रत्ययविधायकम्। अत्र यथाक्रमम् उपचर्म उपचर्मम् उपसमिधम् उपसमित् इत्यादिकमुदाहरणम्।

अव्ययीभावसमासनिष्पन्नस्य शब्दस्य "अव्ययीभावः" इत्यनेन नपुंसकत्वं भवति। तेन "ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यनेन सूत्रेण नपुंसकस्य ह्रस्वं भवति। अव्ययीभावसमासस्य "अव्ययीभावश्च" इत्यनेन सूत्रेण अव्ययसंज्ञा भवति। अव्ययसंज्ञायां सत्याम् "अव्ययादाप्सुपः" इत्यनेन सुपो लुक् प्राप्नोति। यदा अव्ययीभावसमासनिष्पन्नः शब्दः अकारान्तः भवति तदा विशेषकार्यं भवति। तदा "नाव्ययीभावादतोम्त्वपञ्चम्याः" "तृतीयासप्तम्योर्बहुलम्" इति सूत्रद्वयं प्रवर्तते। "नाव्ययीभावादतोम्त्वपञ्चम्याः" इत्यनेन अदन्ताद् अव्ययीभावात् परस्य सुपः "अव्ययादाप्सुपः" इत्यनेन लुको निषेधो भवति। किञ्च पञ्चमीं विना सुपः स्थाने अमादेशो भवति। "तृतीयासप्तम्योर्बहुलम्" इति सूत्रेण अदन्ताद् अव्ययीभावात् तृतीयायां सप्तम्यां च बहुलम् सोः अमादेशो भवति। तेन उपकृष्णम् उपकृष्णेन उपकृष्णे उपकृष्णम् इत्यादयः प्रयोगाः संगच्छन्ते।

पाठगतप्रश्नाः-४

२७. नित्यसमासस्य किं लक्षणम्।

२८. नित्यसमासस्य पक्षद्वये उदाहरणं दर्शयत।

२९. समासस्य सामान्यतः कति भेदाः।

३०. केवलसमासस्य लक्षणं किम्।

३१. विशेषसंज्ञाः काः।

३२. अव्ययीभावसमासस्य लक्षणं किम्।

३३. अव्ययीभावसमासलक्षणे प्रायेण इति पदं किमर्थम्।

३४. अव्ययीभावसमासे समासान्तटच्प्रत्ययस्य विधायकानि सूत्राणि कानि।

३५. अव्ययीभावसमासे अमादेशविधायकं सूत्रद्वयं किम्।

८.३.४) तत्पुरुषसमासः

"प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः" इति तत्पुरुषसमासस्य लक्षणम्। उत्तरपदस्यार्थः पूर्वपदार्थः। उत्तरपदार्थः प्रधानो यत्र स उत्तरपदार्थप्रधानः इति बहुव्रीहिः। अस्मिन् समासे प्रायेण उत्तरपदार्थस्य प्राधान्यं दृश्यते। "तत्पुरुषः" इत्यधिकृत्य विहितः समासः तत्पुरुषसंज्ञकः भवति। एतस्मात् सूत्रात् "शेषो बहुव्रीहिः" इत्यस्मात् सूत्रात्प्राक् पर्यन्तं यानि सूत्राणि सन्ति तैः विहितः समासः तत्पुरुषसंज्ञको भवति।

अस्य समासस्य कृष्णश्रितः इत्यादिकम् उदाहरणम्। कृष्णश्रितः इत्यत्र समासे श्रितः इत्युत्तरपदम्। तस्यार्थस्य प्राधान्यात् उत्तरपदार्थप्राधान्याद् अयं समासः उत्तरपदार्थप्रधानः तत्पुरुषः।

परन्तु अतिमालः इत्यत्रास्ति उत्तरपदार्थप्राधान्यस्य व्यभिचारः। "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इत्यनेन वार्तिकेन मालामतिक्रान्तः इति लौकिकविग्रहे समासे अतिमालः इति रूपं निष्पद्यते। अतिमालः इत्यत्र अति इति अतिक्रान्तार्थबोधकम्। अत्र अतिक्रान्तार्थस्य पूर्वपदार्थस्यैव प्राधान्यमस्ति, उत्तरपदार्थस्य च अप्राधान्यम्। अत एवोच्यते प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः।

तत्पुरुषसमासस्य बहवः भेदा भवन्ति। समानाधिकरणः व्यधिकरणश्चेति भेदद्वयम् इति वक्तुं शक्यन्ते। तत्र व्यधिकरणतत्पुरुषस्य द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः, षष्ठीतत्पुरुषः सप्तमीतत्पुरुषश्चेति षट् भेदाः सन्ति। समानाधिकरणतत्पुरुषः नाम कर्मधारयः समासः इति। अन्यथा अपि सामान्यः, कर्मधारयः, द्विगुः, नञ्प्रभृतयश्चेति चत्वारो भेदा इति वक्तुं शक्यन्ते।

तत्र सामान्या भवन्ति द्वितीयादिसप्तमीतत्पुरुषाः। तत्पुरुषपाठे सामान्यतत्पुरुषविधायकानि अष्टौ सूत्राणि समुल्लिखितानि। द्वितीयातत्पुरुषस्य "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति विधायकं सूत्रम्। कृष्णश्रितः दुःखातीतः इत्यादिकमेतस्योदाहरणम्। तृतीयातत्पुरुषस्य "तृतीया तत्कृतार्थेन गुणवचनेन" "कर्तृकरणे कृता बहुलम्" इति विधायकं सूत्रद्वयम्। शङ्कुलाखण्डः नखभिन्नः इत्यादिकं यथाक्रमम् उदाहरणम्। चतुर्थीतत्पुरुषस्य "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति विधायकं सूत्रम्। यूपदारु द्विजार्थः सूपः इत्यादिकमेतस्योदाहरणम्। पञ्चमीतत्पुरुषस्य "पञ्चमी भयेन" "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति विधायकं सूत्रद्वयम्। चोरभयम् इत्यादिकमत्र उदाहरणम्। षष्ठीतत्पुरुषस्य "षष्ठी" इति विधायकं सूत्रम्। राजपुरुषः इत्यादिकमत्र उदाहरणम्। सप्तमीतत्पुरुषस्य "सप्तमी शौण्डैः" इति विधायकं सूत्रम्। अक्षशौण्डः इत्यादिकमत्र उदाहरणम्। किञ्च षष्ठीसमासनिषेधकानि सप्त सूत्राणि सन्ति - "न निर्धारणे" "पूरणगुणसुहितार्थसदव्ययतव्य-समानाधिकरणेन" "क्तेन च पूजायाम्" "अधिकरणवाचिना च" "कर्मणि च" "तृजकाभ्यां कर्तरि" "कर्तरि च" इति। षष्ठीसमासस्य अपवादभूतं सूत्रद्वयं "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति "अर्धं नपुंसकम्" इति च। अत्र पूर्वकायः अर्धपिप्पली इति यथाक्रमम् उदाहरणम्।

समानविभक्त्यन्तपदानां यदा तत्पुरुषसमासस्तदा कर्मधारयसंज्ञा। अत्र "तत्पुरुषः समानाधिकरणः कर्मधारयः" इति सूत्रं प्रमाणम्। समानाधिकरणतत्पुरुषविधायकानि तत्पुरुषसमासस्य पाठे नव सूत्राणि संगृहीतानि। तानि तावद् - "विशेषणं विशेष्येण बहुलम्" "कुत्सितानि कुत्सनैः" "पापाणके कुत्सितैः" "उपमानानि सामान्यवचनैः" "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" "वृन्दारकनागकुञ्जरैः पूज्यमानम्" "किं क्षेपे" "प्रशंसावचनैश्च" इति। नीलोत्पलम्, वैयाकरणखसूचिः, पापनापितः, घनश्यामः, पुरुषव्याघ्रः, सद्वैद्यः, गोवृन्दारकः, किंराजा गोतल्लजः इत्यादीनि यथाक्रमं सूत्राणाम् उदाहरणानि। अत्र "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्" इति वार्तिकमपि पठितम्। शाकपार्थिवः इत्यादिकमिहोदाहरणम्। एतैः सूत्रैः वार्तिकेन च विधीयमानस्य तत्पुरुषस्य सामानाधिकण्यात् कर्मधारयसंज्ञा। एवं कर्मधारयस्य विशेषणपूर्वपदः, विशेषणोत्तरपदः, उपमानपूर्वपदः, उपमानोत्तरपदः इत्यादयः अवान्तरभेदाः कल्पयितुं शक्यन्ते।

तृतीयो भेदः द्विगुः। "तद्धितार्थोत्तरपदसमाहारे च" इत्यनेन सूत्रेण विहितः संख्यापूर्वः तत्पुरुषसमासो द्विगुसंज्ञां लभते।अत्र प्रमाणं "संख्यापूर्वो द्विगुः" इति सूत्रम्। द्विगुसमासः त्रिविधः - समाहारद्विगुः, तद्धितार्थद्विगुः, उत्तरपदद्विगुश्चेति। अत्र समाहारद्विगोः उदाहरणं पञ्चगवम् इति। तद्धितार्थद्विगोः उदाहरणं पौर्वशालः इति। उत्तरपदद्विगोश्च उदाहरणं पञ्चगवधनः इति। "द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्" "गोरतद्धितलुकि" इति सूत्रवार्तिके च द्विगुसमासस्य रूपनिष्पादने उपयोगिनी।

नञ्प्रभृतयः समासाः पञ्च भवन्ति। नञ्तत्पुरुषः, कुतत्पुरुषः, गतितत्पुरुषः, प्रादितत्पुरुषः उपपदतत्पुरुषश्चेति। "नञ्" इति नञ्तत्पुरुषविधायकं सूत्रम्। अब्राह्मणः इत्युदाहरणम्। कुतत्पुरुषः, गतितत्पुरुषः प्रादितत्पुरुषश्च "कुगतिप्रादयः" इति सूत्रेण विधीयते। अत्र कुपुरुषः, ऊरीकृत्य, सुपुरुषः इत्यादीनि यथाक्रमम् उदाहरणानि। प्रादिसमासस्य विधायकानि पञ्च वार्तिकान्यपि समुल्लिखितानि - "प्रादयो गताद्यर्थे प्रथमया", "अत्यादयः क्रान्ताद्यर्थे द्वितीयया", "अवादयः क्रुष्टाद्यर्थे तृतीयया", "पर्यादयो ग्लानाद्यर्थे चतुर्थ्या", "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति। प्राचार्यः, अतिमालः, अवकोकिलः, पर्यध्ययनः, निष्कौशाम्बिः इत्यादीनि एतेषां वार्तिकानां क्रमेण उदाहरणानि। "उपपदमतिङ्" इति उपपदतत्पुरुषविधायकं सूत्रम्। अत्र कुम्भकारः इत्यादीनि उदाहरणानि।

तत्पुरुषसमासे "समासान्ताः" इत्यधिकृत्य केचन समासान्ताः प्रत्यया विधीयन्ते । ते च प्रत्ययाः "तद्धिताः" इत्यधिकारबलात् तद्धितसंज्ञका भवन्ति। अत्र तत्पुरुषसमासस्य पाठे अच्प्रत्ययविधायकं "तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः" इति "अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" इति सूत्रद्वयम् उल्लिखितम्। अत्र द्व्यङ्गुलम्, सर्वरात्रः इत्यादीनि क्रमेण उदाहरणानि। टज्विधायकं "राजाहःसखिभ्यष्टच्" इति सूत्रम्। परमराजः इत्युदाहरणम्। अत्र "रात्राह्नाहाः पुंसि", "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः", "अर्धर्चाः पुंसि च" इत्यादीनि लिङ्गानुशासनपरकाणि सूत्राण्यपि विद्यन्ते। अत्र अहोरात्रः, राजपुत्रः, अर्धर्चः इत्यादीनि क्रमश उदाहरणानि।

पाठगतप्रश्नाः-५

३६. तत्पुरुषसमासस्य लक्षणं किम्।

३७. तत्पुरुषसमासलक्षणे प्रायेण इति पदं किमर्थम्।

३८. व्यधिकरणतत्पुरुषस्य कति भेदाः।

३९. समानाधिकरणतत्पुरुषस्य का संज्ञा केन च सूत्रेण।

४०. द्विगुसंज्ञा कस्य केन च सूत्रेण।

४१. प्रादितत्पुरुषसमासविधायकानि वार्तिकानि कानि।

४२. तत्पुरुषे समासान्तस्याच्प्रत्ययविधायकानि सूत्राणि लिखत।

४३. परमराजः इत्यत्र टच्प्रत्ययः केन सूत्रेण।

८.३.५) बहुव्रीहिसमासः

"प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिः" इति बहुव्रीहिसमासस्य लक्षणम्। अन्यपदस्यार्थः अन्यपदार्थः। समस्यमानपदार्थापेक्षया भिन्नः पदार्थः अन्यपदार्थो भवति। अन्यपदार्थः प्रधानो यत्र सः अन्यपदार्थप्रधानः। अस्मिन् समासे प्रायेण अन्यपदार्थस्य प्राधान्यं दृश्यते। "शेषो बहुव्रीहिः" इत्यधिकृत्य विहितः समासः तत्पुरुषसंज्ञकः भवति। एतस्मात् सूत्रात् "चार्थे द्वन्द्वः" इत्यस्मात् सूत्रात्प्राक् पर्यन्तं यानि सूत्राणि सन्ति तैः विहितः समासः बहुव्रीहिसंज्ञको भवति।

अस्य समासस्य पीताम्बरः इत्यादिकम् उदाहरणम्। पीताम्बर इत्यत्र समस्यमानं पीतम् अम्बरं चेति पदद्वयम्। पीताम्बररूपसमस्यमानपदयोः अर्थापेक्षया अन्यपदार्थः भवति विष्णुरूपः। तस्य अन्यपदार्थस्य विष्णोः प्राधान्यात् अयं समासः अन्यपदार्थप्रधानः बहुव्रीहिः।

परन्तु द्वित्राः इत्यत्रास्ति अन्यपदार्थप्राधान्यस्य व्यभिचारः। "संख्ययाव्ययासन्नदूराधिकसंख्याः संख्येये" इत्यनेन सूत्रेण द्वौ च त्रयश्च इति लौकिकविग्रहे समासे द्वित्राः इति रूपं निष्पद्यते। द्वित्राः इत्यत्र उभयपदार्थस्य प्राधान्यमस्ति, अन्यपदार्थस्य च प्राधान्याभावः। अत एवोच्यते प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिः इति।

बहुव्रीहिसमासस्य विधायकानि पञ्च सूत्राणि सन्ति "अनेकमन्यपदार्थे", "संख्ययाव्ययासन्नदूराधिक-संख्याः संख्येये", "दिङ्नामान्यन्तराले" "तत्र तेनेदमिति सरूपे", "तेन सहेति तुल्ययोगे" इति। अत्र पीताम्बरः, द्वित्राः, दक्षिणपूर्वा, हस्ताहस्ति, केशाकेशि इत्यादीनि क्रमशः सूत्राणामुदाहरणानि। "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः", "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः", "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इत्येतानि वार्तिकानि बहुव्रीहिविधायकानि सन्ति।

बहुव्रीहिसमासे पूर्वनिपातविधायकानि "सप्तमीविशेषणे बहुव्रीहौ" "निष्ठा" "वाऽऽहिताग्न्यादिषु" इति सूत्राणि सन्ति। अत्र च पूर्वनिपातस्य यथाक्रमं कण्ठेकालः युक्तयोगः अग्न्याहितः इत्यादीन्युदाहरणानि।

बहुव्रीहिसमासे "समासान्ताः" इत्यधिकृत्य केचन समासान्ताः प्रत्यया विधीयन्ते । ते च प्रत्ययाः "तद्धिताः" इत्यधिकारबलात् तद्धितसंज्ञका भवन्ति। "अप्पूरणीप्रमाण्योः" "अन्तर्बहिर्भ्यां च लोम्नः" इति सूत्रद्वयम् अप्प्रत्ययस्य विधायकम्। कल्याणीपञ्चमाः अन्तर्लोमः इत्यादीनि क्रमशः उदाहरणानि। "बहुव्रीहौ संख्येये डजबहुगणात्" इति डच्प्रत्ययस्य विधायकम्। उपदशाः इत्यादिकम् इहोदाहरणम्। "इच्कर्मव्यतिहारे" इति इच्प्रत्ययस्य विधायकम्। केशाकेशि इत्यादिकम् इहोदाहरणम्। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति षच्प्रत्ययस्य विधायकम्। दीर्घसक्थः इत्यादिकम् अत्रोदाहरणम्। "द्वित्रिभ्यां ष मूर्ध्नः" इति षप्रत्ययविधायकम्। द्विमूर्धः इत्यादिकम् अत्रोदाहरणम्। "उरःप्रभृतिभ्यः कप्", "इनः स्त्रियाम्, ""शेषाद्विभाषा" इति सूत्रत्रयं कप्प्रत्ययविधायकम्। व्यूढोरस्कः, बहुदण्डिका महायशस्कः इत्यादीनि अत्रोदाहरणानि। समासान्तलोपविधानाय "पादस्य लोपोऽहस्त्यादिभ्यः" "संख्यासुपूर्वस्य" "उद्विभ्यां काकुदस्य" "पूर्णाद्विभाषा" इत्येतानि चत्वारि सूत्राणि पठितानि। व्याघ्रपात्, द्विपात्, उत्काकुत्, पूर्णकाकुत् इत्यादीनि क्रमश उदाहरणानि भवन्ति।

८.३.६) द्वन्द्वसमासः

"प्रायेण उभयपदार्थप्रधानः द्वन्द्वः" इति द्वन्द्वसमासस्य लक्षणम्। उभयपदस्यार्थः उभयपदार्थः। समस्यमानस्य पूर्वपदस्य उत्तरपदस्य चार्थ उभयपदार्थो भवति। उभयपदार्थः प्रधानो यत्र सः उभयपदार्थप्रधानः। अस्मिन् समासे प्रायेण उभयपदार्थस्य प्राधान्यं दृश्यते। "चार्थे द्वन्द्वः" इति द्वन्द्वसमासविधायकं सूत्रम्। चार्थाः समुच्चयान्वाचयेतरतेरयोगसमाहाराः। एतेषु समुच्चयान्वाचययोः असमार्थ्यात् समासो न भवति। एवं इतरेतरयोगः समाहारश्चेति द्वन्द्वसमासो द्विधा विभज्यते।

अस्य समासस्य धवखदिरौ इत्यादिकम् उदाहरणम्। धवखदिरौ इत्यत्र समस्यमानधवखदिरपदयोः अर्थस्य प्राधान्याद् अयम् उभयपदार्थप्रधानः द्वन्द्वः।

परन्तु दन्तोष्ठम् इत्यत्रास्ति उभयप्राधान्यस्य व्यभिचारः। "चार्थे द्वन्द्वः" इत्यनेन सूत्रेण दन्तः च ओष्ठश्च तयोः समाहारः इति लौकिकविग्रहे समासे दन्तोष्ठम् इति रूपं निष्पद्यते। दन्तोष्ठम् इत्यत्र अन्यपदार्थस्य समाहारस्य प्राधान्यमस्ति, उभयपदार्थस्य च प्राधान्यं नास्ति। अत एवोच्यते प्रायेण उभयपदार्थप्रधानः द्वन्द्वः।

द्वन्द्वसमासे पूर्वनिपातविधायकानि "द्वन्द्वे घि" "अजाद्यन्तम्" "अल्पाच्तरम्" इति सूत्राणि सन्ति। अत्र हरिहरौ ईशकृष्णौ शिवकेशवौ इत्यादीनि क्रमश उदाहरणानि। ततः परनिपातविधायकेषु "राजदन्तादिषु परम्" इत्युल्लेखार्हम्। तेन राजदन्तः इत्यादिकं सिध्यति। "धर्मादिष्वनियमः" "अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे", "ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण" "लघ्वक्षरं पूर्वम्" "अभ्यर्हितं च", "वर्णानामानुपूर्व्येण" "भ्रातुर्ज्यायसः" इत्यादीनि पूर्वपरनिपातबोधकानि वार्तिकानि सन्ति।

ततः एकवद्भावविधायकानि "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" "जातिरप्राणिनाम्" "विप्रतिषिद्धं चानधिकरणवाचि" "येषां च विरोधः शाश्वतिकः" इत्यादीनि कानिचन सूत्राणि सन्ति। तत्र पाणिपादम्, धानाशष्कुलि, शीतोष्णम्, अहिनकुलम् इत्यादिकम् उदाहरणम्।

द्वन्द्वसमासे "समासान्ताः" इत्यधिकृत्य समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो विहितः। तत्र च "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति विधायकम्। वाक्त्विषम्, शमीदृषदम् इत्यादिकम् उदाहरणम्।

पाठगतप्रश्नाः-६

४४. बहुव्रीहिसमासस्य लक्षणं किम्।

४५. बहुव्रीहिसमासलक्षणे प्रायेण इति पदं किमर्थम्।

४६. बहुव्रीहिसमासविधायकानि वार्तिकानि लिखत।

४७. बहुव्रीहौ समासान्तस्य अप्प्रत्ययस्य विधायकं किम्।

४८. बहुव्रीहौ के के समासान्ताः प्रत्यया भवन्ति।

४९. समासान्तलोपविधायकानि कानिचन सूत्राणि लिखत।

५०. द्वन्द्वसमासस्य लक्षणं किम्।

५१. द्वन्द्वसमासलक्षणे प्रायेण इति पदं किमर्थम्।

५२. द्वन्द्वसमासे एकवद्भावविधायकानि सूत्राणि लिखत।

५३. द्वन्द्वसमासे पूर्वनिपातविधायकानि सूत्राणि लिखत।

५४. द्वन्द्वसमासे पूर्वपरनिपातविधायकानि वार्तिकानि लिखत।

५५. द्वन्द्वसमासे समासान्तः टच्प्रत्ययः केन विधीयते।

पाठसारः

आद्येषु सप्तसु पाठेषु समासभेदा वर्णिताः। तत्र तत्तत्समासपर्यालोचनावसरे एव समासान्तकार्यविधायकनिषेधकसूत्राणां समुल्लेखः विहितः। अस्मिन् पाठे सर्वसमासोपकारकाणि समासान्तकार्यविधायकानि सूत्राणि व्याख्यातानि। तथाहि "ऋक्पूरब्धूःपथामानक्षे" इति समासान्तस्य अप्रत्ययस्य विधायकम्, "अच् प्रत्यन्ववपूर्वात् सामलोम्नः" इति, "अक्ष्णोऽदर्शनात्" इति "उपसर्गादध्वनः" इति च अच्प्रत्ययस्य विधायकं सूत्रं व्याख्यातम्। प्रसङ्गतः समासान्तनिषेधकानि "न पूजनात्" इति,"किमः क्षेपे" इति, "नञस्तत्पुरुषात्" इति "पथो विभाषा" इति च समासान्तनिषेधकानि सूत्राणि प्रतिपादितानि।

ततः वृत्तिस्वरूपं पर्यालोचितम्। "परार्थाभिधानं वृत्तिः" इति वृत्तिलक्षणम्। परार्थस्य अभिधानं परार्थाभिधानम्। परार्थः नाम विग्रहवाक्यावयवपदार्थेभ्यः परः यः अर्थः स परार्थः तत्प्रतिपादिका वृत्तिः। वृत्तेः पञ्च कृत्तद्धितसमास-सनाद्यन्तैकशेषरूपाः भेदाः भवन्ति।

ततः विग्रहस्य स्वरूपं प्रतिपादितं "वृत्त्यर्थावबोधकं वाक्यं विग्रहः" इति। वृत्त्यर्थस्य अवबोधकं यद् वाक्यं तदेव विग्रहः। स च विग्रहः द्विविधः लौकिकः अलौकिकश्चेति। तत्र लौकिकविग्रहः परिनिष्ठितः अर्थाद् व्याकरणेन संस्कृतः। व्याकरणेन संस्कृतानामेव पदानां प्रयोगार्हत्वात् लोके। अत एव "परिनिष्ठितत्वात् साधुर्लौकिकः" इति लौकिकविग्रहवाक्यलक्षणम्। अलौकिकः नाम लोके प्रयोगानर्हः। अर्थात् परिनिष्ठितत्वाभावाद् यः विग्रहः लोके प्रयोगार्हं नास्ति सः अलौकिकविग्रहः। एवं "प्रयोगानर्हः असाधुरलौकिकः" इति अलौकिकविग्रहवाक्यलक्षणम्।

वृत्तिषु अन्यतमः भवति समासः। स च समासः सामान्यतः नित्यः अनित्यश्चेति द्विधा विभक्तः। तत्र अविग्रहः अस्वपदविग्रहो वा नित्यसमासः। स्वपदविग्रहो भवति अनित्यसमासः। समासस्य कति भेदा इत्यत्र बहूनामस्ति विप्रतिपत्तिः। सामान्यतः समासस्य पञ्च भेदाः सन्ति। ते च – केवलसमासः अव्ययीभावः तत्पुरुषः बहुव्रीहिः द्वन्द्वः चेति। ततः पूर्वतनेषु पाठेषु केवलादीनां पञ्चानां समासानां कथं परिशीलनं संवृत्तम् इति संक्षेपेण अस्मिन् पाठे प्रस्तुतम्।

पाठान्तप्रश्नाः

१. "ऋक्पूरब्धूःपथामानक्षे" इति सूत्रं व्याख्यात।

२. सर्वसमासान्तप्रत्ययाः इति विषयम् आश्रित्य टिप्पणीं लिखत।

३. समासान्तनिषेधकानि इति विषयम् आश्रित्य टिप्पणीं लिखत।

४. वृत्तिस्वरूपं तद्भेदान् च वर्णयत।

५. विग्रहस्वरूपं तद्भेदान् च वर्णयत।

६. समासभेदाः के भवन्ति। कानि च तेषां लक्षणानि।

७. अव्ययीभावसमासं विवृणुत।

८. तत्पुरुषसमासं विवृणुत।

९. द्वन्द्वसमासं विवृणुत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. समासान्तः अप्रत्ययः।

२. ऋगाद्यन्तस्य समासस्य अप्रत्ययः अन्तावयवो भवति, अक्षे या धूः तदन्तस्य न भवति।

३. अर्धर्चः।

४. अनक्षे इति प्रतिषेधात् अक्षशब्देन धुर् इत्यस्य समासे न समासः।

५. समासान्तः अच्प्रत्ययः विधीयते।

६. प्रत्यन्ववपूर्वात् सामलोमान्तात् समासात् समासान्तः तद्धितसंज्ञकः अच्प्रत्ययो भवति।

७. प्रतिसामम्।

८. समासान्तः अच्प्रत्ययो विधीयते।

९. अचक्षुःपर्यायाद् अक्ष्णः समासान्तः तद्धितसंज्ञकः अचप्रत्ययो भवति।

१०. गवाक्षः।

उत्तराणि-२

११. प्रादिभ्यः अध्वनः समासान्तः तद्धितसंज्ञकः अचप्रत्ययो भवति।

१२. प्राध्वो रथः।

१३. पूजनार्थात् परं यत् प्रातिपदिकं तदन्तात् समासात् समासान्ताः न भवन्ति।

१४. सुराजा।

१५. निन्दार्थकात् किंशब्दात् परं यत् प्रातिपदिकं तदन्तात् समासात् समासान्ताः न भवन्ति।

१६. किंराजा।

१७. नञ्तत्पुरुषसमासात् समासान्ताः न भवन्ति।

१८. अराजा।

१९. पथिन्शब्दान्तात् नञ्तत्पुरुषसमासात् विकल्पेन समासान्ताः न भवन्ति।

२०. अपन्थाः।

उत्तराणि-३

२१. "परार्थाभिधानं वृत्तिः" इति वृत्तिलक्षणम्।

२२. पञ्च।

२३. "वृत्त्यर्थावबोधकं वाक्यं विग्रहः" इति विग्रहवाक्यस्य लक्षणम्।

२४. द्वौ भेदौ।

२५. "परिनिष्ठितत्वात् साधुर्लौकिकः" इति लौकिकविग्रहवाक्यलक्षणम्। उदाहरणं- राज्ञः पुरुषः।

२६. "प्रयोगानर्हः असाधुरलौकिकः" इति अलौकिकविग्रहवाक्यलक्षणम्। उदाहरणं-राजन् ङस् पुरुष सु।

उत्तराणि-४

२७. अविग्रहो अस्वपदविग्रहो वा नित्यसमासः।

२८. कृष्णसर्पः इति अविग्रहे, कुपुरुषः इति अस्वपदविग्रहे।

२९. पञ्च।

३०. अव्ययीभावादिविशेषसंज्ञाभिः विनिर्मुक्तः यः समासः स केवलसमासः।

३१. विशेषसंज्ञाः भवन्ति - अव्ययीभावः, तत्पुरुषः, द्वन्द्वो बहुव्रीहिश्च।

३२. "प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः" इत्यव्ययीभावसमासस्य लक्षणम्।

३३. वस्तुतः अत्र मात्रार्थस्य उत्तरपदार्थस्यैव प्राधान्यमस्ति, पूर्वपदार्थस्य च अप्राधान्यम्। अत एवोच्यते प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः।

३४. "अव्ययीभावे शरत्प्रभृतिभ्यः" "अनश्च" इति सूत्रद्वयं नित्यं टच्प्रत्ययविधायकम्। "नपुंसकादन्यतरस्याम्" "झयः" इति सूत्रद्वयं विकल्पेन टच्प्रत्ययविधायकम्।

३५. नाव्ययीभावादतोम्त्वपञ्चम्याः इति, तृतीयासप्तम्योर्बहुलम् इति च।

उत्तराणि-५

३६. "प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः" इति तत्पुरुषसमासस्य लक्षणम्।

३७. "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इत्यनेन वार्तिकेन मालामतिक्रान्तः इति लौकिकविग्रहे समासे अतिमालः इति रूपं निष्पद्यते। अतिमालः इत्यत्र अति इति अतिक्रान्तार्थबोधकम्। अत्र अतिक्रान्तार्थस्य पूर्वपदार्थस्यैव प्राधान्यमस्ति, उत्तरपदार्थस्य च अप्राधान्यम्। अत एवोच्यते प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः।

३८. व्यधिकणतत्पुरुषस्य द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः, षष्ठीतत्पुरुषः सप्तमीतत्पुरुषश्चेति षट् भेदाः सन्ति।

३९. कर्मधारयसंज्ञा "तत्पुरुषः समानाधिकरणः कर्मधारयः" इति सूत्रेण भवति।

४०. संख्यापूर्वः तत्पुरुषसमासो द्विगुसंज्ञां लभते। प्रमाणभूतं सूत्रं हि संख्यापूर्वो द्विगुः इति।

४१. प्रादिसमासस्य विधायकानि पञ्च वार्तिकान्यपि समुल्लिखितानि - "प्रादयो गताद्यर्थे प्रथमया", "अत्यादयः क्रान्ताद्यर्थे द्वितीयया", "अवादयः क्रुष्टाद्यर्थे तृतीयया", "पर्यादयो ग्लानाद्यर्थे चतुर्थ्या", "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति।

४२. "तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः" इति "अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" इति सूत्रद्वयम् उल्लिखितम्।

४३. राजाहःसखिभ्यष्टच् इति सूत्रेण।

उत्तराणि-६

४४. "प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिः" इति बहुव्रीहिसमासस्य लक्षणम्।

४५. द्वित्राः इत्यत्र उभयपदार्थस्य प्राधान्यमस्ति, अन्यपदार्थस्य च प्राधान्याभावः। अत एवोच्यते प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिः इति।

४६. "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः", "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः", "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इत्येतानि वार्तिकानि बहुव्रीहिविधायकानि सन्ति।

४७. "अप्पूरणीप्रमाण्योः" "अन्तर्बहिर्भ्यां च लोम्नः" इति सूत्रद्वयम् अप्प्रत्ययस्य विधायकम्।

४८. अप्, इच्, डच्,षच्, कप् इति पञ्च समासान्ताः प्रत्ययाः भवन्ति।

४९. समासान्तलोपविधानाय "पादस्य लोपोऽहस्त्यादिभ्यः" "संख्यासुपूर्वस्य" "उद्विभ्यां काकुदस्य" "पूर्णाद्विभाषा" इत्येतानि चत्वारि सूत्राणि पठितानि।

५०. "प्रायेण उभयपदार्थप्रधानः द्वन्द्वः" इति द्वन्द्वसमासस्य लक्षणम्।

५१. दन्तोष्ठम् इत्यत्र अन्यपदार्थस्य समाहारस्य प्राधान्यमस्ति, उभयपदार्थस्य च प्राधान्यं नास्ति। अत एवोच्यते प्रायेण उभयपदार्थप्रधानः द्वन्द्वः।

५२. "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" "जातिरप्राणिनाम्" "विप्रतिषिद्धं चानधिकरणवाचि" "येषां च विरोधः शाश्वतिकः" इत्यादीनि कानिचन सूत्राणि सन्ति।

५३. "द्वन्द्वे घि" "अजाद्यन्तम्" "अल्पाच्तरम्" इति सूत्राणि सन्ति।

५४. "धर्मादिष्वनियमः" "अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे", "ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण" "लघ्वक्षरं पूर्वम्" "अभ्यर्हितं च", "वर्णानामानुपूर्व्येण" "भ्रातुर्ज्यायसः" इत्यादीनि पूर्वपरनिपातबोधकानि वार्तिकानि सन्ति।

५५. द्वन्द्वाच्चुदषहान्तात्समाहारे इति सूत्रेण।

॥ इति अष्टमः पाठः॥

स्त्रीप्रत्ययप्रकरणम्

भूमिका

संस्कृतभाषायां प्रातिपदिकसंज्ञकानां शब्दानां त्रयः अर्थाः भवन्ति। जातिः व्यक्तिः लिङ्गं चेति। तत्र लिङ्गानि त्रीणि भवन्ति पुंस्त्वम्, स्त्रीत्वम्, नपुंसकत्वं चेति। तत्र किं पुंस्त्वम्, किं स्त्रीत्वम्, किं च नपुंसकत्वम् इति जिज्ञासायां शास्त्रकारैः त्रयाणां लिङ्गानां लक्षणं प्रोच्यते -

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।

उभयोरन्तरं यच्च तदभावे नपुंसकम्।।

अर्थात् स्तनकेशवती स्त्री भवति। लोमवान् पुरुषः भवति। तदभावे स्तनकेशलोमादिव्यञ्जकाभावे सति यद् उभयोः अन्तरं सादृश्यं भवति तन्नपुंसकं भवति इति भावः। एतेन स्तनकेशादिमत्त्वं स्त्रीत्वस्य लक्षणं प्रतिफलति। लोमादिमत्त्वं पुंस्त्वस्य लक्षणं प्रतिफलति। स्तनकेशलोमाद्यभावत्वविशिष्टोभयसदृशत्वं च नपुंसकत्वस्य लक्षणं प्रतिफलति। परन्तु लिङ्गस्य इदं लौकिकं लक्षणं जडपदार्थेषु न सम्भवति। यथा वृक्षादिपदार्थानां न किमपि प्रोक्तं लिङ्गं दृश्यते। यतो हि तत्र लोमादिकं नास्ति। खट्वादिपदार्थानां न किमपि प्रोक्तं लिङ्ग दृश्यते। यतो हि तत्र स्तनकेशादिकं नास्ति। अतः दोषयुक्तमपि इदं लक्षणम् अस्ति। तथाहि सुहृदः पर्यायभूतः मित्रशब्दः नपुंसकलिङ्गः अस्ति अर्थात् नपुंसकलिङ्गविशिष्टार्थस्य वाचकः अस्ति। किन्तु मित्रवाच्यः अर्थः तु बालिका अपि भवितुमर्हति, बालकः अपि भवितुमर्हति। तत्र स्तनकेशादिकमपि भवितुमर्हति लोमादिकमपि भवितुमर्हति। तत्र लौकिकलक्षणानुसारं मित्रपदार्थस्य स्त्रीत्वमपि प्राप्तं पुंस्त्वमपि प्राप्तम्। किन्तु मित्रशब्दः नित्यनपुंसकलिङ्गविशिष्टस्य अर्थस्य वाचकः अस्ति। अत एव अयं शब्दः नित्यनपुंसकलिङ्गः इति व्यवहारः। तस्माद् एतल्लक्षणानुसारं शास्त्रे लिङ्गस्य व्यवस्था भवितुं नार्हति। अतः लौकिकलिङ्गस्य लक्षणे दोषान् दृष्ट्वा शास्त्रकर्तृभिः लिङ्गस्य शास्त्रीयं लक्षणं कल्पितम् अस्ति। तथाहि सत्त्वम्, रजः, तमः, इत्येते त्रयाः गुणाः सन्ति। एते च गुणाः जडे चेतने च तिष्ठन्ति। पुनः प्रत्येकं वस्तुनि तिष्ठन्ति। एवञ्च सत्त्वरजोतमसां प्राकृतगुणानाम् उपचयः पुंस्त्वम्। सत्त्वरजोतमसां प्राकृतगुणानाम् अपचयः स्त्रीत्वम्। सत्त्वरजोतमसां प्राकृतगुणानां स्थितिमात्रं नपुंसकत्वम्। तत्र प्रत्येकं पदार्थे एते त्रयः गुणाः तिष्ठन्ति। पुनः प्रत्येकं पदार्थे एतेषां गुणानाम् उपचयः अपचयः स्थितिमात्रं च भवति। तस्मात् प्रत्येकं पदार्थे त्रीणि लिङ्गानि भवन्ति। परन्तु कः एकलिङ्गकः पदार्थः, कः द्विलिङ्गकः, कः त्रिलिङ्गकः इत्यत्र कोशादिकमेव प्रमाणम्। यथा तटशब्दः लिङ्गत्रयविशिष्टस्य अर्थस्य वाचकः अस्ति। त्रिषु लिङ्गेषु वर्तते। रामादिशब्दाः नित्यपुंस्त्वविशिष्टस्यार्थस्य वाचकाः सन्ति। अत एव नित्यपुल्लिङ्गाः सन्ति। ज्ञानादिशब्दाः नित्यनपुंसकत्वविशिष्टस्यार्थस्य वाचकाः सन्ति। अतः नित्यनपुंसकलिङ्गाः सन्ति। एवमेवान्यत्रापि बोध्यम्। तस्माद् कस्य शब्दस्य किं लिङ्गम् इत्यस्य ज्ञानाय अमरकोशादिग्रन्थाः लिङ्गानुशासनादिकं च पठनीयम्। तेनैव शब्दानां लिङ्गविषये प्रामाणिकं ज्ञानं भवति।

९

346sk09

स्त्रीप्रत्ययः - चाप् टाप् डाप् प्रत्ययाः

प्रस्तावना

तत्र त्रिषु लिङ्गेषु मध्ये पुंस्त्वबोधनाय नपुंसकत्वबोधनाय च प्रत्ययान्तरम् अपेक्षितं नास्ति। प्रातिपदिकेनैव तेषां प्रतीतिः भवति। किन्तु स्त्रीत्वबोधनाय केचन् प्रत्ययाः कल्पिताः सन्ति। ते च

टाप्-डाप्-चापस्त्रयोप्येते ङीप्-ङीष्-ङीन्-प्रत्ययैः सह।

ऊङ्-तिभ्यां मिलिताश्चापि सन्त्यष्टौ प्रत्ययाः स्त्रियाम्।।

एवञ्च टाप् डाप् चाप् ङीप् ङीष् ङीन् ऊङ् ति इत्येते अष्टौ प्रत्ययाः स्त्रीत्वस्य द्योतनाय प्रातिपदिकात् भवन्ति। तत्र कस्माद् प्रातिपदिकात् टाप् भवति कस्मात् वा डाप् भवति इति बोधयितुं प्रकृतं प्रकरणं प्रवर्तते। अत्र च पाठे टाप् डाप् चाप् ङीन् ति इत्येते पञ्च प्रत्ययाः कस्मात् प्रातपदिकात् भवन्ति इति प्रतिपाद्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- टाप् डाप् चाप् ङीन् ति इति एतान् पञ्च स्त्रीप्रत्ययान् ज्ञातुं शक्नुयात्।
- टाप् डाप् चाप् ङीन् ति इति एतान् पञ्च स्त्रीप्रत्ययान् प्रयोक्तुं प्रभवेत्।
- एतेषां प्रत्ययानां संयोजनेन शब्देषु किं किं परिवर्तनं भवति इति ज्ञातुं शक्नुयात्।।
- एतेषां प्रत्ययानां संयोजनं कृत्वा स्त्रीलिङ्गशब्दानां निर्माणं कर्तुं शक्नुयात्।
- पठनपाठनकाले तत्र तत्र शब्देषु एतेषु कः स्त्रीप्रत्ययः अस्ति इति सुस्पष्टं ज्ञातुं प्रभवेत्।

[९.१] अजाद्यतष्टाप्॥ (४.१.४)

सूत्रार्थः - स्त्रीत्वे द्योत्ये अजादिगणपठितशब्दान्तात् प्रातिपदिकात् परः टाप् प्रत्ययः भवति। एवं स्त्रीत्वे द्योत्ये ह्रस्वाकारान्तात् प्रातिपदिकात् परः टाप् प्रत्ययः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं टाप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। अजाद्यतः इति पञ्चम्येकवचनान्तं पदम्। टाप् इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अस्मिन् सूत्रे अजाद्यतः इति पदे बहुव्रीहिगर्भसमाहारद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति - अजः आदिः येषां ते अजादयः।

अजादयश्च अत् च इत्यनयोः समाहारः अजाद्यत्, तस्मात् अजाद्यतः। एवञ्च अस्य अर्थः भवति - अजादेः अतः च। तत्र अजादेः इत्यस्य अजादिगणपठितशब्दात् इत्यर्थः। अतः इत्यस्य ह्रस्वाकारात् इत्यर्थः। तत्र अजादेः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण अजादेः इत्यत्र तदन्तविधिः भवति। एवञ्च अजादेः इत्यस्यार्थो भवति अजादिगणपठितशब्दान्तात् इति। एवम् अतः इत्यपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च अतः इत्यत्रापि येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अतः इत्यस्यार्थो भवति ह्रस्वाकारान्तात् इति। एवञ्च सूत्रार्थो भवति अजादिगणपठितशब्दान्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये टाप् प्रत्ययः परः भवति। एवं ह्रस्वाकारान्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये टाप् प्रत्ययः परः भवति।

उदाहरणम् - अजा। खड्वा।

सूत्रार्थसमन्वयः -

अजा। तत्र अजादिगणे अज इति प्रातिपदिकं पठितम् अस्ति। पुनः व्यपदेशिवद्भावेन अजान्तमपि अस्ति। एवञ्च अजादिगणपठितशब्दान्तं प्रातिपदिकम्, अज इति प्रातिपदिकम्। तस्मात् स्त्रीत्वद्योतनाय अजाद्यतष्टाप् इति सूत्रेण टाप् प्रत्ययः भवति। तेन च अज टाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण प्रत्ययाद्यस्य टापः टकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। पुनः टापः पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। ततश्च अज आ इति स्थितिः भवति। ततः परम् अकः सर्वर्णे दीर्घः इति सूत्रेण दीर्घे कृते सति अजा इति रूपं सिद्ध्यति। ततश्च स्वादिप्रत्ययययोगेन प्रथमैकवचने अजा इति सुबन्तं पदं सिध्यति। अन्येषां रूपाणां सिद्धिप्रक्रिया अजन्तस्त्रीलिङ्गप्रकरणे रमाशब्दवत् वर्तते।

खड्वा। अत्र खड्व इति प्रातिपदिकम् अस्ति। अस्य च अन्त्यवर्णः ह्रस्वाकारः अस्ति। तेन इदं प्रातिपदिकं ह्रस्वाकारान्तम् अस्ति। ततश्च ह्रस्वाकारान्तात् खड्व इति प्रातिपदिकात् स्त्रीत्वद्योतनाय अजाद्यतष्टाप् इति सूत्रेण टाप् प्रत्ययः भवति। तेन च खड्व टाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण टापः टकारस्य इत्संज्ञा भवति तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। पुनः टापः पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। ततश्च खड्व आ इति स्थितिः भवति। ततः परम् अकः सर्वर्णे दीर्घः इति सूत्रेण दीर्घे कृते सति खड्वा इति रूपं सिद्ध्यति।

अत्राजादिगणपठितशब्दानामन्यान्युदाहरणानि - अजा एडका अश्वा चटका मूषिका बाला वत्सा होडा पाका मन्दा विलाता क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा मध्यमा कोकिला दंष्ट्रा इति।

अत्रादन्तप्रातिपदिकानामन्यान्युदाहरणानि - खड्वा रमा माला मेधा गङ्गा यमुना शाला सर्वा धनिका कृत्रिमा स्वभावजा गता माया विद्या अविद्या इति।

[९.२] डाबुभाभ्यामन्यतरस्याम्॥ (४.१.१३)

सूत्रार्थः - मन्नन्तात् प्रातिपदिकात् अन्नन्तात् बहुव्रीहिसंज्ञकात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये वा डाप् प्रत्ययः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं डाप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। डाप् इति प्रथमैकवचनान्तं पदम्। उभाभ्याम् इति पञ्चमीद्विवचनान्तं पदम्। अन्यतरस्याम् इति अव्ययपदम्। अत्र मनः इति सूत्रात् मनः (५/१) इति अनुवर्तते। अनो बहुव्रीहेः इति सम्पूर्णमपि सूत्रम् अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अत्र मनः इति अनः इति च प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण मनः इत्यत्र अनः इत्यत्र च तदन्तविधिः भवति। तेन मनः इत्यस्य मन्नन्तात् इत्यर्थो भवति। अनः इत्यस्य च अन्नन्तात् इत्यर्थो भवति। बहुव्रीहेः इत्यपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। एवञ्च सूत्रार्थो भवति - मन्नन्तात् प्रातिपदिकात्, अन्नन्तात् बहुव्रीहिसंज्ञकात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये वा डाप् प्रत्ययः परः भवति।

उदाहरणम् - दामा। बहुयज्वा।

सूत्रार्थसमन्वयः -

दामा। अत्र दामन् इति प्रातिपदिकम्। एतच्च मन्नन्तम् अस्ति। अतः मन्नन्तात् दामन् इति प्रातिपदिकात् स्त्रीत्वद्योतनाय डाबुभाभ्यामन्यतरस्याम् इति सूत्रेण विकल्पेन डाप् प्रत्ययः भवति। तेन च दामन् डाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण डकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन दामन् आ इति स्थितिः जायते। ततः परं टेः इति सूत्रेण दामन् इति शब्दस्य टेः अन् इत्यस्य लोपे सति दाम् आ इति स्थितिः जायते। वर्णसम्मेलने च सति दामा इति रूपं सिध्यति। डाप् इत्यस्य अभावे तु दामन् इत्येव रूपं तिष्ठति। एवमेव दामा पामा सीमा अतिमहिमा इत्यादावपि बोध्यम्।

बहुयज्वा। अत्र बहुयज्वन् इति प्रातिपदिकम्। एतच्च अन्नन्तम् अस्ति। पुनः अत्र बहुव्रीहिसमासः अपि अस्ति। अतः इदं बहुव्रीहिसंज्ञकमपि अस्ति। एवञ्च अन्नन्तात् बहुव्रीहिसंज्ञकात् बहुयज्वन् इति प्रातिपदिकात् स्त्रीत्वद्योतनाय डाबुभाभ्यामन्यतरस्याम् इति सूत्रेण विकल्पेन डाप् प्रत्ययः भवति। तेन च बहुयज्वन् डाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण डकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण च पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन बहुयज्वन् आ इति स्थितिः जायते। ततः परं टेः इति सूत्रेण बहुयज्वन् इति शब्दस्य टेः अन् इत्यस्य लोपे सति बहुयज्व् आ इति स्थितिः जायते। वर्णसम्मेलने च सति बहुयज्वा इति रूपं सिध्यति। डाप् इत्यस्य अभावे तु बहुयज्वन् इत्येव रूपं तिष्ठति। एवमेव सुचर्मा सुपर्वा बहुराजा इत्यादावपि बोध्यम्।

[९.३] यङश्चाप्॥ (४.१.७४)

सूत्रार्थः - य्यङन्तात् प्रातिपदिकात्, ष्यङन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये चाप् प्रत्ययः परः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं चाप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। यङः इति पञ्चम्येकवचनान्तं पदम्। चाप् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम्। अत्र सूत्रे

स्त्रियाम् (७/१) इति अधिकारः आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अत्र यङः इत्यनेन ञ्यङः ष्यङः च ग्रहणम् अस्ति। ञ्यङः ष्यङः च प्रत्ययौ इति कृत्वा अत्र प्रत्ययग्रहणे तदन्ता ग्राह्याः इति नियमेन तदन्तविधिः भवति। तेन यङः इति पदस्य ञ्यङन्तात् ष्यङन्तात् च इत्यर्थः भवति। पुनः ञ्यङन्तात् ष्यङन्तात् इति अनयोः च प्रातिपदिकात् इत्यत्र अन्वयः भवति। एवञ्च सूत्रार्थो भवति - ञ्यङन्तात् प्रातिपदिकात्, ष्यङन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये चाप् प्रत्ययः परः भवति।

उदाहरणम् - आम्बष्ठ्या। कारीषगन्ध्या।

सूत्रार्थसमन्वयः -

आम्बष्ठ्या। अत्र आम्बष्ठ्य इति शब्दः ञ्यङन्तः अस्ति। यतोहि अम्बष्ठशब्दात् अम्बष्ठस्य अपत्यं स्त्री इत्यर्थे वृद्धेत्कोसलाजादाञ्ञ्यङ् इति सूत्रेण ञ्यङ् इति प्रत्यये अम्बष्ठ ञ्यङ् इति जाते ञकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे च सति अम्बष्ठ य इति स्थितिः भवति। ततः तद्धितेष्वचामादेः इति सूत्रेण आदिवृद्धौ यस्येति च इति सूत्रेण अम्बष्ठशब्दस्य अन्त्यस्य अकारस्य लोपे च सति आम्बष्ठ् य इति रूपं भवति। ततः वर्णसम्मेलनं कृत्वा आम्बष्ठ्य इति रूपं जायते। एवञ्च आम्बष्ठ्य इति प्रातिपदिकं ञ्यङन्तमस्ति इति सुस्पष्टमेव। तेन च स्त्रीत्वविवक्षायां ञ्यङन्तात् आम्बष्ठ्य इति प्रातिपदिकात् यङश्चाप् इति सूत्रेण चाप् प्रत्यये सति आम्बष्ठ्य चाप् इति स्थितिः भवति। ततः चापः चकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे सति आम्बष्ठ्य आ इति स्थितिः भवति। ततः अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे च सति आम्बष्ठ्या इति रूपं सिध्यति। अम्बष्ठनामकस्य जनस्य पुत्री इति तदर्थः।

कारीषगन्ध्या। अत्र कारीषगन्ध्य इति शब्दः ष्यङन्तः अस्ति। यतोहि करीषगन्धिशब्दात् करीषगन्धेः गोत्रापत्यं स्त्री इत्यर्थे अण्-प्रत्यये सति करीषगन्धि अण् इति स्थितौ अणः स्थाने अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे इति सूत्रेण ष्यङ् इत्यादेशे सति करीषगन्धि ष्यङ् इति जाते षकारस्य षः प्रत्ययस्य इति सूत्रेण इत्संज्ञायाम्, ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे च सति करीषगन्धि य इति स्थितिः भवति। ततः तद्धितेष्वचामादेः इति सूत्रेण आदिवृद्धौ यस्येति च इति सूत्रेण करीषगन्धिशब्दस्य इकारस्य लोपे च सति कारीषगन्ध् य इति रूपं भवति। ततः वर्णसम्मेलनं कृत्वा कारीषगन्ध्य इति रूपं जायते। एवञ्च कारीषगन्ध्य इति प्रातिपदिकं ष्यङन्तमस्ति इति सुस्पष्टमेव। तेन च स्त्रीत्वविवक्षायां ष्यङन्तात् कारीषगन्ध्य इति प्रातिपदिकात् यङश्चाप् इति सूत्रेण चाप् प्रत्यये सति कारीषगन्ध्य चाप् इति स्थितिः भवति। ततः चापः चकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे सति कारीषगन्ध्य आ इति स्थितिः भवति। ततः अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे च सति कारीषगन्ध्या इति रूपं सिध्यति। कारीषगन्धिः इति कस्यचित् जनस्य नाम। तस्य गोत्रापत्यं स्त्री कारीषगन्ध्या इति।

[९.४] यूनस्तिः॥ (४.१.७७)

सूत्रार्थः - युवन् इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये ति प्रत्ययो भवति। स च तद्धितः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं तिप्रत्ययं विदधाति। सूत्रेऽस्मिन् यूनः इति पञ्चम्येकवचनान्तं पदम्। ति इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः तद्धिताः (१/३) इति अधिकारः च अत्र आगच्छति। अत्र ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अत्र यूनः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। एवञ्च सूत्रार्थो भवति - युवन् इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये ति प्रत्ययः परः भवति स च तद्धितः भवति।

उदाहरणम् - युवतिः।

सूत्रार्थसमन्वयः -

युवति। अत्र युवन् इति नान्तं प्रातिपदिकम् अस्ति। एवञ्च स्त्रित्वविवक्षायां युवन् इति प्रातिपदिकात् यूनस्ति इति सूत्रेण ति प्रत्ययः भवति। तेन युवन् ति इति स्थितिः भवति। ततः परं नलोपः प्रातिपदिकस्य इति सूत्रेण युवन् इति शब्दस्य नकारस्य लोपः भवति। तेन च युवति इति जायते। ततः तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां स्वादिकार्ये च कृते युवतिः इति रूपं सिध्यति। तरुणी इति तदर्थः।

[९.५] शार्ङ्गरवाद्यञो ङीन्॥ (४.१.७३)

सूत्रार्थः - जातिवाचकात् अनुपसर्जनात् शार्ङ्गरवादिगणपठितात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति। जातिवाचकात् अनुपसर्जनात् अञन्तात् अदन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीन्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। शार्ङ्गरवाद्यञः इति पञ्चम्येकवचनान्तं पदम्। ङीन् इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदमनुवर्तते। जातेरस्त्रीविषयादयोपधात् इति सूत्रात् जातेः (५/१) इति पदमनुवर्तते। अनुपसर्जनात् (५/१) इति अधिकारः अत्र आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। शार्ङ्गरवाद्यञः इति पदं समस्तम् अस्ति। अत्र च बहुव्रीहिगर्भसमाहारद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति - शार्ङ्गरवः आदिः येषां ते शार्ङ्गरवादयः। शार्ङ्गरवादयश्च अञ् च इति शार्ङ्गरवाद्यञ्, तस्मात् शार्ङ्गरवाद्यञः। एवञ्च अस्यार्थो भवति - शार्ङ्गरवादेः अञः च इति। शार्ङ्गरवादेः इत्यस्य च शार्ङ्गरवादिगणपठितात् इत्यर्थः। अत्र जातेः इति पदम् अनुपसर्जनात् इति पदं च शार्ङ्गरवादेः इत्यस्य विशेषणं भवति। पुनः शार्ङ्गरवादेः इति पदं प्रातिपदिकात् इत्यस्य विशेषणं भवति। अञः इति प्रत्ययग्रहणम् अस्ति। तेन प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया तत्र तदन्तविधिः भवति। तेन अञः इत्यस्य अञन्तात् इत्यर्थः भवति। पुनः अञन्तात् इत्यस्य जातेः

इति पदम् अनुपसर्जनात् इति पदं च विशेषणं भवति। तेन जातिवाचकात् अनुपसर्जनात् अञन्तात् इत्यर्थो लभ्यते। अञन्तात् इति प्रातिपदिकात् इत्यस्य विशेषणम् अस्ति। अतः इति पदमपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन येन विधिस्तदन्तस्य इति परिभाषया अत्र तदन्तविधिः भवति। तेन अदन्तात् प्रातिपदिकात् इत्यर्थो भवति। एवञ्च सूत्रार्थो भवति - जातिवाचकात् अनुपसर्जनात् शार्ङ्गरवादिगणपठितात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति। जातिवाचकात् अनुपसर्जनात् अञन्तात् अदन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति।

उदाहरणम् - शार्ङ्गरवी। बैदी।

सूत्रार्थसमन्वयः -

शार्ङ्गरवी। अत्र शार्ङ्गरव इति शब्दः शार्ङ्गरवादिगणे पठितः अस्ति। पुनः जातिवाचकः अस्ति। अनुपसर्जनः अस्ति, अदन्तश्च अस्ति। अतः स्त्रीत्वविवक्षायां शार्ङ्गरवाद्यञो ङीन् इति सूत्रेण ङीन् प्रत्ययः भवति। तेन शार्ङ्गरव ङीन् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन शार्ङ्गरव ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते शार्ङ्गरवी इति रूपं सिध्यति। अस्य रूपप्रक्रिया च अजन्तस्त्रीलिङ्गप्रकरणे गौरीशब्दवद् बोध्या।

बैदी। अत्र बैद इति शब्दः अस्ति। अयं शब्दः अञन्तः अस्ति। पुनः जातिवाचकः अस्ति। अनुपसर्जनः अस्ति, अदन्तश्च अस्ति। अतः स्त्रीत्वविवक्षायां शार्ङ्गरवाद्यञो ङीन् इति सूत्रेण ङीन् प्रत्ययः भवति। तेन बैद ङीन् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन बैद ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते बैदी इति रूपं सिध्यति। अस्य रूपप्रक्रिया च अजन्तस्त्रीलिङ्गप्रकरणे गौरीशब्दवद् बोध्या।

[९.६] प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः॥ (७.३.४४)

सूत्रार्थः - प्रत्ययस्थात् कात् पूर्वस्य अतः स्थाने इत् भवति आपि परे। किन्तु सुप्परके आपि परे अतः स्थाने इद् न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रम् इत् इति आदेशं विदधाति। सूत्रेऽस्मिन् सप्त पदानि सन्ति। प्रत्ययस्थात् इति पञ्चम्यन्तं पदम्। कात् इति पञ्चम्यन्तं पदम्। पूर्वस्य इति षष्ठ्यन्तं पदम्। अतः इति षष्ठ्यन्तं पदम्। इद् इति प्रथमान्तं पदम्। आपि इति सप्तम्यन्तं पदम्। असुपः इति पञ्चम्यन्तं पदम्। असुपः इति पदं समस्तम् अस्ति। अत्र नञ्तत्पुरुषसमासः अस्ति। अस्य च विग्रहः भवति न सुप् इति असुप्, तस्मात् असुपः। प्रत्ययस्थात् इति पदं कात् इत्यस्य विशेषणं भवति। कात् इति पदं पूर्वस्य

इत्यस्य विशेषणं भवति। पूर्वस्य इति पदम् अतः इत्यस्य विशेषणं भवति। एवञ्च अस्य सूत्रस्यार्थः भवति प्रत्ययस्थात् कात् पूर्वस्य अतः स्थाने इत् भवति आपि परे। किन्तु सुप्परके आपि परे अतः स्थाने इद् न भवति। इत् इत्यत्र तकारः उच्चारणार्थः न तु श्रवणार्थः।

उदाहरणम् - कारिका बालिका इत्यादीनि उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः -

कारिका। अत्र कृ धातोः ण्वुल्तृचौ इति सूत्रेण ण्वुल्प्रत्यये कृते कृ ण्वुल् इति जाते ततः परं चुटू इति सूत्रेण णकारस्य इत्संज्ञायाम्, लकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां च सत्यां तस्य लोपः इति सूत्रेण उभयोः लोपे कृ वु इति जायते। ततश्च युवोरनाकौ इति सूत्रेण वोः स्थाने अक इति आदेशे कृ अक इति जाते अचो ञ्णिति इति सूत्रेण ऋकारस्य स्थाने वृद्धिं कृत्वा कार् अक इति जाते वर्णसम्मेलने च सति कारक इति शब्दः सिध्यति। ततः कृदन्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां जातायाम्, कारक इत्यस्य अदन्तप्रातिपदिकत्वात् अजाद्यतष्टाप् इति सूत्रेण टाप्-प्रत्यये टापः टकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे सति कारक आ इति स्थितिः भवति। तदा अत्र टापि परे अकरूपप्रत्ययस्थात् कात् पूर्वस्य अतः स्थाने प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रेण इत् इत्यादेशे कारिक आ इति स्थितिः भवति। तत्पश्चात् अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घे सति कारिका इति रूपं सिध्यति।

अन्यानि उदाहरणानि - बालिका अश्वपालिका अध्यापिका तारिका हारिका धारिका परिव्राजिका शयिका नायिका गायिका पाचिका पाठिका इत्यादीनि।

पाठगतप्रश्नाः

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१. कति लिङ्गानि भवन्ति। कानि च तानि।

२. कति स्त्रीप्रत्ययाः सन्ति।

३. अजाद्यतष्टाप् इति सूत्रेण किं विधीयते।

४. यूनस्ति इति सूत्रेण किं विधीयते।

५. दामा इत्यत्र कः स्त्रीप्रत्ययः अस्ति।

६. यङश्चाप् इति सूत्रेण किं विधीयते।

७. अजादिपदे कः समासः कश्च विग्रहः।

८. पुंस्त्वस्य शास्त्रीयं लक्षणं किम्।

९. स्त्रीत्वस्य शास्त्रीयं लक्षणं किम्।

१०. नपुंसकत्वस्य शास्त्रीयं लक्षणं किम्।

११. सिद्धान्ते लिङ्गं किन्निष्ठम्।

पाठसारः

अत्र पाठे टाप् डाप् चाप् ङीन् ति इति पञ्चानां स्त्रीप्रत्ययानां वर्णनं वर्तते। अत्र सर्वप्रथमं टाप्प्रत्ययविधायकस्य अजाद्यतष्टाप् इति सूत्रस्य व्याख्यानम् अस्ति। तदुदाहरणानि च दत्तानि सन्ति। पुनः डाप्प्रत्ययविधायकस्य डाबुभाभ्यामन्यतरस्याम् इति सूत्रस्य व्याख्यानम् उदाहरणं च वर्तते। ततः परं चाप्प्रत्ययविधायकस्य यङश्चाप् इति सूत्रस्य व्याख्यानं तदुदाहरणं च अस्ति। एवं तिप्रत्ययविधायकस्य यूनस्तिः इति सूत्रस्य व्याख्या वर्तते। पुनः ङीन्प्रत्ययविधायकस्य शार्ङ्गरवाद्यञो ङीन् इति सूत्रस्य व्याख्या कृता तदुदाहरणानि च साधितानि। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रस्य व्याख्यानं तदुदाहरणानां च सिद्धिः दर्शिता इति।

पाठान्तप्रश्नाः

अत्र परीक्षोपयोगिनः प्रष्टव्याः प्रश्नाः प्रदीयन्ते।

१. अजाद्यतष्टाप् इति सूत्रस्य सोदाहरणं व्याख्यां लिखन्तु।

२. डाबुभाभ्यामन्यतरस्याम् इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

३. यङश्चाप् इति सूत्रस्य सोदाहरणं व्याख्यां लिखत।

४. यूनस्ति इति सूत्रस्य सोदाहरणं व्याख्यां लिखत।

५. शार्ङ्गरवाद्यञो ङीन् इति सूत्रस्य सोदाहरणं व्याख्यां कुर्वन्तु।

६. प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रस्य व्याख्या लेख्या।

७. कारिका इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।

८. शार्ङ्गरवी इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।

९. कारीषगन्ध्या इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।

१०. बहुयज्वा इति प्रयोगस्य सिद्धिप्रक्रियां प्रदर्शयन्तु।

पाठगतप्रश्नोत्तराणि

१. त्रीणि लिङ्गानि भवन्ति। स्त्रीत्वम्, पुंस्त्वम् नपुंसकत्वम् च इति।

२. अष्टौ स्त्रीप्रत्ययाः सन्ति।

३. अजाद्यतष्टाप् इति सूत्रेण टाप्प्रत्ययः विधीयते।

४. यूनस्ति इति सूत्रेण तिप्रत्ययः विधीयते।

५. दामा इत्यत्र डाप्प्रत्ययः अस्ति।

६. यङश्चाप् इति सूत्रेण चाप्प्रत्ययः विधीयते।

७. अजादिपदे बहुव्रीहिसमासः अस्ति। अस्य च अजः आदिः येषां ते अजादयः इति विग्रहः।

८. सत्त्वरजस्तमसां प्राकृतगुणानाम् उपचयः पुंस्त्वम्।

९. सत्त्वरजस्तमसां प्राकृतगुणानाम् अपचयः स्त्रीत्वम्।

१०. सत्त्वरजस्तमसां प्राकृतगुणानां स्थितिमात्रं नपुंसकत्वम्।

११. पदार्थनिष्ठम्।

॥इति नवमः पाठः॥

346sk10

१०

स्त्रीप्रत्ययः - ङीप् प्रत्ययः

प्रस्तावना

अत्र स्त्रीप्रत्ययप्रकरणस्यादौ एव वर्णितं यद् अष्टौ स्त्रीप्रत्ययाः सन्ति। तेषु ङीप्प्रत्ययः अपि प्रमुखः प्रत्ययः अस्ति। तस्य विधायकानि अनेकानि सूत्राणि सन्ति। तेषु - ऋन्नेभ्यो ङीप् , उगितश्च, वयसि प्रथमे, द्विगोः, वर्णादनुदात्तात्तोपधात् तो नः, टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति एतानि सूत्राणि मुख्यानि अत्र चितानि च। तेषामेवात्र व्याख्यानं प्रस्तूयते।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- ङीप्प्रत्ययं ज्ञातुं शक्नुयात्।
- ङीप्प्रत्ययः कस्मात् प्रातिपदिकात् भवति इति ज्ञातुं प्रभवेत्।
- ङीप्प्रत्ययान्तशब्दं ज्ञातुं शक्नुयात्।
- ङीप्प्रत्ययस्य संयोजनेन शब्दपरिवर्तनं ज्ञातुं शक्नुयात्।
- ङीप्प्रत्ययस्य संयोजनं कृत्वा स्त्रीलिङ्गशब्दानां निर्माणे अर्हः भवेत्।
- पठनपाठनकाले तत्र तत्र शब्देषु ङीप्प्रत्ययः अस्ति न वा इति सुस्पष्टं ज्ञातुं प्रभवेत्।।

[१०.१] ऋन्नेभ्यो ङीप्॥ (४.१.५)

सूत्रार्थः - ऋदन्तात् प्रातिपदिकात् नान्तात् च प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

सूत्रावतरणम् - तत्र तावत् टाप् डाप् चाप् ङीप् ङीष् ङीन् इत्येते षट् मुख्यस्त्रीप्रत्ययाः सन्ति। तेषु ङीप्प्रत्ययः अपि एकः। तस्य प्रत्ययस्य विधानाय ऋन्नेभ्यो ङीप् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। ऋन्नेभ्यः इति पञ्चमीबहुवचनान्तं पदम्। ङीप् इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते।

प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। ऋन्नेभ्यः इति पदं समस्तं वर्तते। अत्र च इतरेतरयोगद्वन्द्वसमासः अस्ति। तस्य च विग्रहः भवति ऋत् च नश्च इति ऋन्नः, तेभ्यः ऋन्नेभ्यः। एवञ्च अस्य अर्थः भवति ऋतः नात् इति। तत्र ऋतः इति नात् इति च प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण अत्र तदन्तविधिः भवति। तेन ऋदन्तात् प्रातिपदिकात् नान्तात् प्रातिपदिकात् च इति लभ्यते। ततश्च सूत्रार्थः भवति - ऋदन्तात् प्रातिपदिकात् नान्तात् च प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः परः भवति।

उदाहरणम् - कर्त्री। दण्डिनी।

सूत्रार्थसमन्वयः -

कर्त्री। अत्र कर्तृ इति शब्दः ऋदन्तः अस्ति, अपि च कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च ऋदन्तं प्रातिपदिकम् अस्ति कर्तृ इति। तस्मात् स्त्रीत्वे द्योत्ये ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप्प्रत्ययो भवति तेन कर्तृ ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कर्तृ ई इति स्थितिः भवति। ततः परम् इको यणचि इति सूत्रेण यणादेशे कृते वर्णसम्मेलने च कृते कर्त्री इति रूपं सिद्ध्यति।

दण्डिनी। अत्र दण्डिन् इति शब्दः नान्तः अस्ति, अपि च कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च नान्तं प्रातिपदिकम् अस्ति दण्डिन् इति। तस्मात् स्त्रीत्वे द्योत्ये ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप्प्रत्ययो भवति। तेन दण्डिन् ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन दण्डिन् ई इति स्थितिः भवति। ततः परं वर्णसम्मलेने कृते सति दण्डिनी इति रूपे सिद्ध्यति।

[१०.२] उगितश्च॥ (४.१.६)

सूत्रार्थः - उगिदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। उगितः इति पञ्चम्येकवचनान्तं पदम्। च इति अव्ययपदम्। अत्र ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। उगितः इति पदं समस्तं वर्तते। अत्र च बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति। उक् इत् यस्य सः उगित्, तस्य उगितः। तत्र उगितः इति पदं प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण अत्र तदन्तविधिः भवति। तेन उगिदन्तात् प्रातिपदिकात् इति लभ्यते। ततश्च सूत्रार्थः भवति - उगिदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

उदाहरणम् - पचन्ती। भवन्ती। नमन्ती। पठन्ती। पतन्ती।

सूत्रार्थसमन्वयः -

पचन्ती। पच् इति धातोः वर्तमाने लट् इति सूत्रेण लट्प्रत्यये सति पच् लट् इति जायते। ततः लटः स्थाने लटः शतृशानचावप्रथमासमानाधिकरणे इति सूत्रेण शतृप्रत्यये कृते पच् शतृ इति जाते शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, ऋकारस्य उपदेशेऽजनुनासिक इत्, इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति पच् अत् इति जायते। ततः शतुः शित्त्वात् तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम्, कर्तरि शप् इति सूत्रेण शप्प्रत्यये सति पच् शप् अत् इति जायते। ततः शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति पच् अ अत् इति जायते। ततश्च अतो गुणे इति सूत्रेण पररूपे पचत् इति सिद्ध्यति। तत्र शतृप्रत्ययस्य ऋकारस्य इत्संज्ञा भवति। तेन शतृप्रत्ययः उगित् अस्ति। ततश्च पचत् इति शब्दः उगिदन्तः अस्ति। अपि च कृत्तद्धितसमासाश्च इति सूत्रेण तस्य प्रातिपदिकसंज्ञा भवति। तेन पचत् इति उगिदन्तं प्रातिपदिकम् अस्ति। अतः उगिदन्तात् प्रातिपदिकात् पचत् इत्यतः उगितश्च इति सूत्रेण ङीप्प्रत्ययः भवति। तेन पचत् ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन पचत् ई इति जायते। ततः शप्श्यनोर्नित्यम् इति नुमागमे अनुबन्धलोपे च सति पचन्त् ई इति स्थिते वर्णमेलने च पचन्ती इति रूपं सिध्यति।

भवन्ती। भू इति धातोः वर्तमाने लट् इति सूत्रेण लट्प्रत्यये सति भू लट् इति जायते। ततः लटः स्थाने लटः शतृशानचावप्रथमासमानाधिकरणे इति सूत्रेण शतृप्रत्यये कृते भू शतृ इति जाते शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, ऋकारस्य उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति भू अत् इति जायते। ततः शतुः शित्त्वात् तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम्, कर्तरि शप् इति सूत्रेण शप्प्रत्यये सति भू शप् अत् इति जायते। ततः शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति भू अ अत् इति जायते। ततश्च शपः अपि शित्त्वेन सार्वधातुकत्त्वात् सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे ओकारे एचोऽयवायावः इति सूत्रेण अव् इत्यादेशे च कृते भव् अ अत् इति जाते अतो गुणे इति सूत्रेण पररूपे भवत् इति सिद्ध्यति। अत्र शतृप्रत्ययस्य ऋकारस्य इत्संज्ञा भवति। तेन शतृप्रत्ययः उगित् अस्ति। ततश्च भवत् इति शब्दः उगिदन्तः अस्ति। अपि च कृत्तद्धितसमासाश्च इति सूत्रेण तस्य प्रातिपदिकसंज्ञा भवति। तेन भवत् इति उगिदन्तं प्रातिपदिकम् अस्ति। अतः उगिदन्तात् प्रातिपदिकात् भवत् इत्यतः उगितश्च इति सूत्रेण ङीप्प्रत्ययः भवति। तेन भवत् ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन भवत् ई इति जायते। ततः नुमागमे अनुबन्धलोपे च सति भवन्ती इति रूपं सिध्यति। अन्यानि उदाहरणानि एवमेव सिद्ध्यन्तीत्यूह्यम्।

[१०.३] वयसि प्रथमे॥ (४.१.२०)

सूत्रार्थः - प्रथमवयोवाचकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। वयसि इति सप्तम्येकवचनान्तं पदम्। प्रथमे इति सप्तम्येकवचनान्तं पदम्। अत्र ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदम्, अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र सूत्रे प्रथमे इति वयसि इत्यस्य विशेषणं भवति, वयसि इति च प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन प्रथमवयोवाचकात् इत्यर्थः समायाति। अतः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अदन्तात् प्रातिपदिकात् इत्यर्थो भवति। ततश्च सूत्रार्थो भवति - प्रथमवयोवाचकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति। प्राणिनाम् कालकृतावस्थाविशेषो वयः। तच्च कौमारं यौवनं वार्धकम् इति त्रिधा।

पिता रक्षति कौमारे भर्ता रक्षति यौवने।

पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति।।

इति शास्त्रवचनमत्र प्रमाणम्। केषांचिद् आचार्याणां मते वयः चतुर्विधम्। तथाहि पद्यम् -

आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्।

तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति।।

एवं त्रिविधं वा भवतु, चतुर्विधं वा वयः भवतु। प्रथमं वयः तु कौमारं वयः इत्येव।

उदाहरणम् - कुमारी। वधूटी। चिरन्टी।

सूत्रार्थसमन्वयः -

कुमारी। कुमार इति शब्दः अदन्तः अस्ति, अपि च प्रातिपदिकमपि अस्ति। एवमेव प्रथमवयसि विद्यमानानां शिशूनां वाचकः अपि अस्ति। अतः स्त्रीत्वविवक्षायां प्रथमवयोवाचकात् अदन्तात् कुमार इति प्रातिपदिकात् वयसि प्रथमे इति सूत्रेण ङीप्प्रत्ययः भवति। तेन कुमार ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कुमार ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण कुमार इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते कुमारी इति रूपं सिध्यति।

[१०.४] द्विगोः॥ (४.१.२१)

सूत्रार्थः - अदन्तात् द्विगुसंज्ञकात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् एकमेव पदम् अस्ति। द्विगोः इति पञ्चम्यन्तं पदम्। अत्र ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदम्, अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र सूत्रे द्विगोः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन द्विगुसंज्ञकात् प्रातिपदिकात् इत्यर्थः समायाति। अतः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अदन्तात् प्रातिपदिकात् इत्यर्थो भवति। ततश्च सूत्रार्थो भवति - द्विगुसंज्ञकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

उदाहरणम् - त्रिलोकी। त्रिपादी। अष्टाध्यायी। पञ्चवटी। चतुःसूत्री। दशरथी। पञ्चमूली। पञ्चलक्षणी।

सूत्रार्थसमन्वयः -

त्रिलोकी। त्रिलोक इति शब्दे द्विगुः समासः अस्ति। तथाहि त्रयाणां लोकानां समाहारः इति विग्रहे तद्धितार्थोत्तरपदसमाहारे च इति सूत्रेण समासः भवति। ततः परं संख्यापूर्वो द्विगुः इति सूत्रेण तस्य द्विगुसंज्ञा भवति। एवमेव त्रिलोक इति शब्दः अदन्तः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां द्विगुसंज्ञकात् अदन्तात् त्रिलोक इति प्रातिपदिकात् द्विगोः इति सूत्रेण ङीप्प्रत्ययः भवति। तेन त्रिलोक ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन त्रिलोक ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण त्रिलोक इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते त्रिलोकी इति रूपं सिध्यति।

[१०.५] वर्णादनुदात्तात्तोपधात्तो नः॥ (४.१.३९)

सूत्रार्थः - वर्णवाचकात् तोपधात् अनुपसर्जनात् अनुदात्तान्तात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीप् प्रत्ययः भवति, तकारस्य स्थाने नकारश्च भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। वर्णात् इति पञ्चम्यन्तं पदम्। अनुदात्तात् इति पञ्चम्यन्तं पदम्। तोपधात् इति पञ्चम्यन्तं पदम्। तः इति षष्ठ्यन्तं पदम्। नः इति प्रथमान्तं पदम्। अत्र सूत्रे ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदमनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। मनोरौ वा इति सूत्रात् वा इति अव्ययपदमनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। तोपधात् इति पदमत्र समस्तं वर्तते। अत्र बहुव्रीहिसमासः अस्ति। तथाहि तः उपधा यस्य सः तोपधः। तस्मात् तोपधात्। अत्र सूत्रे अनुदात्तात् इति पदं अतः इति पदं च प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन अनुदात्तात् इत्यत्र अतः इत्यत्र च तदन्तविधिः भवति। तेन अनुदात्तात्

इत्यस्य अनुदात्तान्तात् इत्यर्थः। अतः इत्यस्य अदन्तात् इत्यर्थश्च भवति। वर्णात् इति पदम्, तोपधात् इति पदम्, अनुपसर्जनात् इति च प्रातिपदिकात् इत्यस्यैव विशेषणं भवति। तेन सूत्रार्थः भवति - वर्णवाचकात् तोपधात् अनुपसर्जनात् अनुदात्तान्तात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीप् प्रत्ययः भवति, तकारस्य स्थाने नकारश्च भवति।

उदाहरणम् - एनी एता। रोहिणी रोहिता। श्येनी श्येता। हरिणी हरिता।

सूत्रार्थसमन्वयः -

एनी, एता। अत्र एत इति शब्दः अस्ति। अयं चित्रवर्णस्य वाचकः अस्ति। पुनः अस्य शब्दस्य उपधायां तकारः अस्ति। अतः अयं शब्दः तोपधः अपि अस्ति। एत इति शब्दस्य अन्त्यः अकारः अनुदात्तः अस्ति। अतः अयं शब्दः अनुदात्तान्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। पुनः अदन्तः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां वर्णवाचकात् तोपधात् अनुदात्तान्तात् अनुपसर्जनात् अदन्तात् एत इति प्रातिपदिकात् वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रेण ङीप् प्रत्ययः, तकारस्य नकारश्च भवति। तेन एन ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन एन ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण एन इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते एनी इति रूपं सिध्यति। एवञ्च वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रं विकल्पेन प्रवर्तते। यदा अस्य सूत्रस्य प्रवृत्तिः नैव भवति, तदा एत इत्यस्य अदन्तत्वात् स्त्रीत्वविवक्षायाम् अजाद्यतष्टाप् इति सूत्रेण टापि कृते एता इति रूपं सिध्यति।

रोहिणी, रोहिता। अत्र रोहित इति शब्दः अस्ति। अयं रक्तवर्णस्य वाचकः अस्ति। पुनः अस्य शब्दस्य उपधायां तकारः अस्ति। अतः अयं शब्दः तोपधः अपि अस्ति। रोहित इति शब्दस्य अन्त्यः अकारः अनुदात्तः अस्ति। अतः अयं शब्दः अनुदात्तान्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। पुनः अदन्तः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां वर्णवाचकात् तोपधात् अनुदात्तान्तात् अनुपसर्जनात् अदन्तात् रोहित इति प्रातिपदिकात् वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रेण ङीप् प्रत्ययः, तकारस्य नकारश्च भवति। तेन रोहिन ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन रोहिन ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण रोहिन इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे नकारस्य णकारे च कृते वर्णसम्मेलने च कृते रोहिणी इति रूपं सिध्यति। पुनः वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रं विकल्पेन प्रवर्तते। एवञ्च यदा अस्य सूत्रस्य प्रवृत्तिः नैव भवति, तदा रोहित इत्यस्य अदन्तत्वात् स्त्रीत्वविवक्षायाम् अजाद्यतष्टाप् इति सूत्रेण टापि कृते रोहिता इति रूपं सिध्यति।

[१०.६] टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः॥ (४.१.१५)

सूत्रार्थः - टिदन्तात् ढप्रत्ययान्तात् अण्-प्रत्ययान्तात् अञ्-प्रत्ययान्तात् द्वयसच्-प्रत्ययान्तात् दघ्नञ्-प्रत्ययान्तात् मात्रच्-प्रत्ययान्तात् तयप्-प्रत्ययान्तात् ठक्-प्रत्ययान्तात् ठञ्-प्रत्ययान्तात् कञ्-प्रत्ययान्तात् क्वरप्-प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् एकमेव पदमस्ति। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति पञ्चम्येकवचनान्तं पदम्। अत्र सूत्रे ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदमनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र अनुपसर्जनात् इति अधिकारः आगच्छति। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति पदं समस्तमस्ति। अत्र च समाहारद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति - टित् च ढः च अण् च अञ् च द्वयसच् च दघ्नञ् च मात्रच् च तयप् च ठक् च ठञ् च कञ् च क्वरप् च इति टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्। तस्मात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति। अत्र टित् इति पदं समस्तमस्ति। अत्र च बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति ट् इत् यस्य सः टित्। अर्थात् टकारेत्संज्ञकः। अत्र सूत्रे टित्पदेन टितः प्रातिपदिकस्य प्रत्ययस्य धातोः च ग्रहणम् अस्ति। पुनः टिदंशे तदन्तविधिः भवति। तेन टितः इत्यस्य टिदन्तात् इत्यर्थः। सूत्रे ढ इत्यतः आरभ्य क्वरप्पर्यन्तं सर्वे अपि प्रत्ययाः सन्ति। सर्वत्रैव च तदन्तविधिः भवति प्रत्ययग्रहणे तदन्ता ग्राह्या इति परिभाषया। तेन च ढप्रत्ययान्तात् अण्प्रत्ययान्तात् अञ्प्रत्ययान्तात् द्वयसच्प्रत्ययान्तात् दघ्नञ्प्रत्ययान्तात् मात्रच्प्रत्ययान्तात् तयप्प्रत्ययान्तात् ठक्प्रत्ययान्तात् ठञ्प्रत्ययान्तात् कञ्प्रत्ययान्तात् क्वरप्प्रत्ययान्तात् इत्यर्थः तेषां लभ्यते। एतेषां समेषामपि प्रातिपदिके अन्वयः भवति। अत्र सूत्रे अतः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन अतः इत्यंशे येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अतः इत्यस्य अदन्तात् इत्यर्थो भवति। अनुपसर्जनात् इत्यपि प्रातिपदिकात् इत्यत्र अन्वेति। एवञ्च सूत्रार्थो भवति - टिदन्तात् ढप्रत्ययान्तात् अण्प्रत्ययान्तात् अञ्प्रत्ययान्तात् द्वयसच्प्रत्ययान्तात् दघ्नञ्प्रत्ययान्तात् मात्रच्प्रत्ययान्तात् तयप्प्रत्ययान्तात् ठक्प्रत्ययान्तात् ठञ्प्रत्ययान्तात् कञ्प्रत्ययान्तात् क्वरप्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात्।

उदाहरणम् - नदी। कुरुचरी। सौपर्णेयी। ऐन्द्री। कुम्भकारी। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पञ्चतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी।

सूत्रार्थसमन्वयः -

नदी। टिदन्तात् अदन्तात् अनुपसर्जनात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र नदट् इति शब्दः अस्ति। अस्य टकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण लोपः भवति। तेन नद इति अवशिष्यते। इदं टित् प्रातिपदिकमस्ति। अपि च व्यवदेशिवद्भावेन टिदन्तम् अपि अस्ति। अदन्तमपि अस्ति। अनुपसर्जनमपि अस्ति। तस्मात् टिदन्तात् अनुपसर्जनात् अदन्तात् नद इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन नद ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन नद ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण नद इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते नदी इति रूपं सिध्यति। एवमेव देवी चोरी इत्यादावपि बोध्यम्।

कुरुचरी। टिदन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र कुरुचर इति शब्दः अस्ति। अयं शब्दः कुरुषु चरति इत्यर्थे कुरु सु चर् इत्यतः चरेष्टः इति सूत्रेण टप्रत्यये कृते सति सिध्यति। तस्मादयं शब्दः टिदन्तः अस्ति। अपि च अदन्तः अपि अस्ति। अनुपसर्जनम् अपि अस्ति। प्रातिपदिकम् अपि अस्ति। अतः टिदन्तात् अनुपसर्जनात् अदन्तात् कुरुचर इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन कुरुचर ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कुरुचर ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण कुरुचर इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते कुरुचरी इति रूपं सिध्यति।

सौपर्णेयी। ढप्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र सौपर्णेय इति शब्दः अस्ति। अयं शब्दः सुपर्ण्याः अपत्यं स्त्री इत्यर्थे स्त्रीभ्यो ढक् इति सूत्रेण ढक्-प्रत्यये कृते सति सिध्यति। तस्मादयं शब्दः ढप्रत्ययान्तः अस्ति। अपि च अदन्तः अपि अस्ति। अनुपसर्जनम् अपि अस्ति। प्रातिपदिकम् अपि अस्ति। अतः ढप्रत्ययान्तात् अनुपसर्जनात् अदन्तात् सौपर्णेय इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन सौपर्णेय ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन सौपर्णेय ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण सौपर्णेय इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते सौपर्णेयी इति रूपं सिध्यति। एवमेव वैनतेयी इत्यादावपि बोध्यम्।

ऐन्द्री। अणन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र ऐन्द्र इति शब्दः अस्ति। अयं शब्दः इन्द्रो देवता अस्याः इति विग्रहे इन्द्रशब्दात् सास्य देवता इति सूत्रेण अण् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः अण्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च अण्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऐन्द्र इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऐन्द्र ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऐन्द्र ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऐन्द्र इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऐन्द्री इति रूपं सिध्यति।

कुम्भकारी। अणन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र कुम्भकार इति शब्दः अस्ति। अयं शब्दः कुम्भं करोति इति विग्रहे कुम्भ अम् कृ इत्यतः कर्मण्यण् इति सूत्रेण अण् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः अण्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च अण्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् कुम्भकार इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन कुम्भकार ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कुम्भकार ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण कुम्भकार इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते कुम्भकारी इति रूपं सिध्यति।

औत्सी। इदम् अञन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र औत्स इति अस्ति। अयं शब्दः उत्सस्य इयम् इति विग्रहे उत्स इति शब्दात् उत्सादिभ्योऽञ् इति सूत्रेण अञ् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः अञ्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च अञ्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् औत्स इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन औत्स ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन औत्स ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण औत्स इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते औत्सी इति रूपं सिध्यति।

ऊरुद्वयसी। इदम् द्वयसजन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र ऊरुद्वयस इति अस्ति। अयं शब्दः ऊरू प्रमाणम् अस्याः इति विग्रहे ऊरू इति शब्दात् प्रमाणे द्वयसजदघ्नञ्मात्रचः इति सूत्रेण द्वयसच् इति प्रत्यये कृते

सति सिध्यति। एवञ्च अयं शब्दः द्वयसच्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च द्वयसच्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऊरुद्वयस इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऊरुद्वयस ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऊरुद्वयस ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऊरुद्वयस इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऊरुद्वयसी इति रूपं सिध्यति।

ऊरुदघ्नी। इदम् दघ्नजन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र ऊरुदघ्न इति अस्ति। अयं शब्दः ऊरू प्रमाणम् अस्याः इति विग्रहे ऊरू इति शब्दात् प्रमाणे द्वयसजदघ्नञ्मात्रचः इति सूत्रेण दघ्नच् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः दघ्नच्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च दघ्नच्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऊरुदघ्न इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऊरुदघ्न ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऊरुदघ्न ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऊरुदघ्न इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऊरुदघ्नी इति रूपं सिध्यति।

ऊरुमात्री। इदम् मात्रजन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र ऊरुमात्र इति अस्ति। अयं शब्दः ऊरू प्रमाणम् अस्याः इति विग्रहे ऊरू इति शब्दात् प्रमाणे द्वयसजदघ्नञ्मात्रचः इति सूत्रेण मात्रच् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः मात्रच्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च मात्रच्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऊरुमात्र इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऊरुमात्र ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऊरुमात्र ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऊरुमात्र इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऊरुमात्री इति रूपं सिध्यति।

पञ्चतयी। इदम् तयप्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र पञ्चतय इति अस्ति। अयं शब्दः पञ्च अवयवाः अस्याः इति विग्रहे पञ्च इति शब्दात् संख्यायाः अवयवे तयप् इति सूत्रेण तयप् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः तयप्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च तयप्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् पञ्चतय इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन

पञ्चतय ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन पञ्चतय ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण पञ्चतय इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते पञ्चतयी इति रूपं सिध्यति।

आक्षिकी। इदम् ठक्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र आक्षिक इति अस्ति। अयं शब्दः अक्षैः दीव्यति इति विग्रहे अक्ष इति शब्दात् तेन दीव्यति खनति जयति जितम् इति सूत्रेण ठक् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः ठक्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च ठक्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् आक्षिक इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन आक्षिक ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन आक्षिक ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण आक्षिक इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते आक्षिकी इति रूपं सिध्यति।

लावणिकी। इदम् ठञ्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र लावणिक इति अस्ति। अयं शब्दः लवणं पण्यम् अस्याः इति विग्रहे लवण इति शब्दात् लवणाट् ठञ् इति सूत्रेण ठञ् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः ठञ्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च ठञ्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् लावणिक इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन लावणिक ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन लावणिक ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण लावणिक इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते लावणिकी इति रूपं सिध्यति।

यादृशी। इदम् कञ्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र यादृश इति अस्ति। अयं शब्दः यत् इति शब्दात् त्यदादिषु दृशोऽनालोचने कञ् इति सूत्रेण कञ् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः कञ्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च कञ्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् यादृश इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन यादृश ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन यादृश ई इति स्थितिः

भवति। ततः यचि भम् इति सूत्रेण यादृश इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते यादृशी इति रूपं सिध्यति।

इत्वरी। इदम् क्वरप्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र इत्वर इति अस्ति। अयं शब्दः इण् इति धातोः इण्नशजिसर्तिभ्यः क्वरप् इति सूत्रेण क्वरप् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः क्वरप्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च क्वरप्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् इत्वर इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन इत्वर ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन इत्वर ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण इत्वर इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते इत्वरी इति रूपं सिध्यति।

पाठगतप्रश्नाः

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१. ऋन्नेभ्यः इति पदे कः समासः, कश्च विग्रहः।

२. उगितः इति पदे कः समासः कश्च विग्रहः।

३. तोपधात् इति पदे कः समासः कश्च विग्रहः।

४. कुम्भकारी इत्यस्य कः विग्रहः।

५. ऊरुद्वयसी इत्यस्य कः अर्थः।

६. पञ्चतयी इत्यस्य कः अर्थः।

पाठसारः

ऋन्नेभ्यो ङीप् इति सूत्रं ङीप्रत्ययविधायकेषु सूत्रेषु प्रमुखं सूत्रमस्ति, तस्य सर्वप्रथमम् अत्र पाठे व्याख्या वर्तते। ततः परम् उगितश्च इति सूत्रस्य व्याख्या अस्ति। तदन्तरं वयसि प्रथमे इति सूत्रस्य व्याख्या विद्यते। तत्पश्चात् द्विगोः इति सूत्रस्य व्याख्या वर्तते। ततश्च वर्णादनुदात्तात्तोपधात् तो नः इति सूत्रस्य व्याख्यानं विद्यते। अन्तिमे च टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रस्य व्याख्या अस्ति। एवञ्च यथासम्भवम् उदाहरणेषु सूत्रार्थस्य समन्वयः अपि प्रदर्शितः अस्ति।

पाठान्तप्रश्नाः-

अत्र परीक्षोपयोगिनः प्रष्टव्याः प्रश्नाः प्रदीयन्ते।

१. ऋन्नेभ्यो ङीप् इति सूत्रस्य व्याख्यां लिखत।

२. उगितश्च इति सूत्रं व्याख्यात।

३. वयसि प्रथमे इति सूत्रस्य व्याख्यानं कुर्वन्तु।

४. द्विगोः इति सूत्रस्य व्याख्यानं लिख।

५. वर्णादनुदात्तात्तोपधात् तो नः इति सूत्रस्य व्याख्यां लिखन्तु।

६. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रस्य व्याख्या कार्या।

७. सौपर्णेयी इति प्रयोगं साधयत।

८. कुमारी इति प्रयोगः साधनीयः।

९. भवन्ती इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।

१०. इत्वरी इति प्रयोगस्य सिद्धिं लिखन्तु।

११. रोहिणी, रोहिता इत्यनयोः प्रयोगयोः सिद्धिः कार्या।

पाठगतप्रश्नोत्तराणि -

१. ऋन्नेभ्यः इति पदे इतरेतरयोगद्वन्द्वसमासः अस्ति। तस्य च विग्रहः भवति - ऋच्च नश्च इति ऋन्नः, तेभ्यः ऋन्नेभ्यः।

२. उगितः इति पदे बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति - उक् इत् यस्य सः उगित्। तस्य उगितः।

३. तोपधात् इति पदे बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति - तः उपधा यस्य सः तोपधः। तस्मात् तोपधात्।

४. कुम्भं करोति या सा कुम्भकारी इति विग्रहः।

५. ऊरू प्रमाणम् अस्याः इति ऊरुद्वयसी इत्यस्य अर्थः।

६. पञ्च अवयवाः अस्याः इति पञ्चतयी इत्यस्य अर्थः।

॥ इति दशमः पाठः॥

346sk11

११

स्त्रीप्रत्ययः - ङीष्-प्रत्ययः

प्रस्तावना

अत्र स्त्रीप्रत्ययप्रकरणस्यादौ एव वर्णितं यद् अष्टौ स्त्रीप्रत्ययाः सन्ति। तेषु ङीष्प्रत्ययः अपि प्रमुखः प्रत्ययः अस्ति। तस्य विधायकानि अनेकानि सूत्राणि सन्ति। तेषामेवात्र व्याख्यानं क्रियते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- ङीष्प्रत्ययं ज्ञातुं शक्नुयात्।
- ङीष्प्रत्ययः कस्मात् प्रातिपदिकात् भवति इति ज्ञातुं प्रभवेत्।
- ङीष्प्रत्ययान्तशब्दं ज्ञातुं शक्नुयात्।
- ङीष्प्रत्ययस्य संयोजनेन शब्देषु किं किं परिवर्तनं भवति इति ज्ञातुं शक्नुयात्।
- ङीष्प्रत्ययस्य संयोजनं कृत्वा स्त्रीलिङ्गशब्दानां निर्माणं कर्तुं शक्नुयात्।
- पठनपाठनकाले तत्र तत्र शब्देषु ङीष्प्रत्ययः अस्ति नवा इति सुस्पष्टं ज्ञातुं प्रभवेत्।

[११.१] षिद्गौरादिभ्यश्च॥ (४.१.४१)

सूत्रार्थः - षिदन्तात् अदन्तात् प्रातिपदिकात्, गौरादिगणपठितशब्दान्तात् अदन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय षिद्गौरादिभ्यश्च इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। षिद्गौरादिभ्यः इति पञ्चम्यन्तं पदम्। च इति अव्ययं पदम्। अत्र सूत्रे अन्यतो ङीष् इति सूत्रात् ङीष् इति पदमनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः इति पदं च अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र षिद्गौरादिभ्यः इति पदं समस्तम् अस्ति। अत्र च बहुव्रीहिगर्भेतरेतरयोगद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति ष् इत् यस्य सः षित्। गौरः आदिः येषां ते गौरादयः। षित् च गौरादयश्च इति षिद्गौरादयः।

तेभ्यः षिद्गौरादिभ्यः। तेन अस्य शब्दस्य अर्थो भवति षितः गौरादेः च। गौरादेः इत्यस्य च गौरादिगणपठितात् इत्यर्थः।

सूत्रार्थविचारः - अत्र सूत्रे षिद्गौरादिभ्यः इति पदं प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। ततश्च षिदन्तात् गौरादिगणपठितशब्दान्तात् इत्यर्थः समागच्छति। पुनः अतः इत्यपि प्रातिपदिकात् इत्यस्य विशेषणं भवति तेन अतः इत्यत्रापि येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति तेन अतः इत्यस्य अदन्तात् इत्यर्थो लभ्यते। एवं समेषां पदानां संयोजनेन सूत्रार्थो भवति षिदन्तात् अदन्तात् प्रातिपदिकात्, गौरादिगणपठितशब्दान्तात् अदन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

उदाहरणम् - नर्तकी, खनकी, रजकी इत्यादीनि षितः उदाहरणानि। गौरी, सुन्दरी, नटी, कटी, पितामही, मातामही, इत्यादीनि गौरादिगणस्य उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः - नर्तकी, गौरी, इत्यनयोः उदाहरणयोः सूत्रार्थस्य समन्वयः प्रस्तूयते।

नर्तकी। नृत् इति धातोः शिल्पिनि ष्वुन् इति सूत्रेण ष्वुन् प्रत्यये सति नृत् ष्वुन् इति स्थितिः भवति। ततः षकारस्य षः प्रत्ययस्य इति सूत्रेण नकारस्य च हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति। ततः तस्य लोपः इति सूत्रेण उभयोः लोपे कृते नृत् वु इति स्थितिः भवति। ततः वु इत्यस्य आर्धधातुसंज्ञकत्वात् पुगन्तलघूपधस्य च इति सूत्रेण उपधागुणे वु इत्यस्य स्थाने अक इत्यादेशे कृते नर्तक इति शब्दः सिध्यति। तत्र ष्वुन् प्रत्ययः षिद् अस्ति। तस्मात् नर्तकशब्दः षिदन्तः अस्ति। अदन्तः अस्ति, अपि च कृदन्तत्वात् प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां षिदन्तात् अदन्तात् नर्तक इति प्रातिपदिकात् षिद्गौरादिभ्यश्च इति सूत्रेण ङीष्प्रत्ययः भवति। तेन नर्तक ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन नर्तक ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण नर्तक इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते नर्तकी इति रूपं सिध्यति।

गौरी। गौरादिगणे गौर इति शब्दः पठितः अस्ति। तस्मादयं शब्दः गौरादिगणपठितः अस्ति। अपि च व्यपदेशिवद्भावेन गौरादिगणपठितशब्दान्तः अपि अस्ति। एवमेव अदन्तः अस्ति, अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां गौरादिगणपठितशब्दान्तात् अदन्तात् गौर इति प्रातिपदिकात् षिद्गौरादिभ्यश्च इति सूत्रेण ङीष्प्रत्ययः भवति। तेन गौर ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन गौर ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण गौर इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते गौरी इति रूपं सिध्यति।

[११.२] वोतो गुणवचनात्॥ (४.१.४४)

सूत्रार्थः - गुणवाचकात् अनुपसर्जनात् उदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीष् प्रत्ययः भवति।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय वोतो गुणवचनात् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। उतः इति पञ्चम्यन्तं पदम्। गुणवचनात् इति पञ्चम्यन्तं पदम्। वा इति अव्ययपदम्। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति पदम् अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अनुपसर्जनात् इति अधिकारः, प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति।

सूत्रार्थविचारः - अत्र गुणवचनात् इत्यस्य गुणवाचकात् इत्यर्थः। एतत्पदं च प्रातिपदिकात् इत्यस्य विशेषणं भवति। उतः इति पदमपि प्रातिपदिकात् इत्यस्य विशेषणं भवति ततश्च येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन उतः इत्यस्य उदन्तात् इत्यर्थो भवति। ततश्च सूत्रार्थो भवति गुणवाचकात् अनुपसर्जनात् उदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीष् प्रत्ययः भवति।

उदाहरणम् - मृद्वी, मृदुः। लघ्वी, लघुः। गुर्वी, गुरुः। तन्वी, तनुः। पृथ्वी, पृथुः। साध्वी साधुः। पट्वी पटुः। इत्यादीनि उदन्तगुणवाचकस्य उदाहरणानि भवन्ति।

सूत्रार्थसमन्वयः - मृद्वी, मृदुः, इत्यत्र सूत्रार्थस्य समन्वयः प्रस्तूयते।

मृद्वी, मृदुः। अत्र मृदु इति शब्दः अस्ति। अयं शब्दः गुणवाचकः अस्ति। उदन्तः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां गुणवाचकात् उदन्तात् मृदु इति प्रातिपदिकात् वोतो गुणवचनात् इति सूत्रेण विकल्पेन ङीष्प्रत्ययः भवति। तेन मृदु ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन मृदु ई इति स्थितिः भवति। ततः इको यणचि इति सूत्रेण यणादेशे कृते वर्णसम्मेलने च कृते मृद्वी इति रूपं सिध्यति। यदा च ङीष्प्रत्ययः न भवति तदा मृदुः इत्येव रूपं तिष्ठति।

[११.३] बह्वादिभ्यश्च॥ (४.१.४५)

सूत्रार्थः - बह्वादिगणपठितात् अनुपसर्जनात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीष् प्रत्ययः भवति।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय बह्वादिभ्यश्च इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। वह्वादिभ्यः इति पञ्चम्यन्तं पदम्। च इति अव्ययपदम् अनुवर्तते। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति

पदम्। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अनुपसर्जनात् इति अधिकारः, प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र बह्वादिभ्यः इति पदं समस्तम् अस्ति। अत्र च बहुव्रीहिसमासः अस्ति। एतस्य विग्रहः भवति बहुः आदिः येषां ते बह्वादयः। तेभ्यः बह्वादिभ्यः। अस्य बह्वादिगणपठितशब्देभ्यः इत्यर्थः।

सूत्रार्थविचारः - अत्र बह्वादिभ्यः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च सूत्रार्थो भवति बह्वादिगणपठितात् अनुपसर्जनात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीष् प्रत्ययः भवति।

उदाहरणम् - बह्वी, बहुः। कपी, कपिः। अही, अहिः। मुनी, मुनिः। इत्यादीनि बह्वादिगणस्य उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः - बह्वी बहुः, इत्यत्र सूत्रार्थस्य समन्वयः प्रस्तूयते।

बह्वी, बहुः। अत्र बहु इति शब्दः अस्ति। अयं शब्दः बह्वादिगणे पठितः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां बह्वादिगणपठितात् बहु इति प्रातिपदिकात् बह्वादिभ्यश्च इति सूत्रेण विकल्पेन ङीष्प्रत्ययः भवति। तेन बहु ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन बहु ई इति स्थितिः भवति। ततः इको यणचि इति सूत्रेण यणादेशे कृते वर्णसम्मेलने च कृते बह्वी इति रूपं सिध्यति। यदा च ङीष्प्रत्ययः न भवति तदा बहुः इत्येव रूपं तिष्ठति।

[११.४] इतो मनुष्यजातेः॥ (४.१.६५)

सूत्रार्थः - मनुष्यजातिवाचकात् अनुपसर्जनात् इदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय इतो मनुष्यजातेः इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। इतः इति पञ्चम्यन्तं पदम्। मनुष्यजातेः इति पञ्चम्यन्तं पदम्। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति पदम् अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अनुपसर्जनात् इति अधिकारः, प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र मनुष्यजातेः इति पदं समस्तम् अस्ति। अत्र च षष्ठीतत्पुरुषसमासः अस्ति। एतस्य विग्रहः भवति मनुष्याणां जातिः इति मनुष्यजातिः, तस्याः मनुष्यजातेः। अस्य मनुष्यजातिवाचकात् इत्यर्थः।

सूत्रार्थविचारः - अत्र इतः इति पदं प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन इतः इत्यस्य इदन्तात् इत्यर्थः लभ्यते। मनुष्यजातेः इत्यपि प्रातिपदिकात् इत्यस्य विशेषणम् अस्ति। ततश्च सूत्रार्थो भवति मनुष्यजातिवाचकात् अनुपसर्जनात् इदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

उदाहरणम् - दाक्षी। प्लाक्षी। औदमेयी। अवन्ती। कुन्ती। इत्यादीनि इदन्तमनुष्यजातिवाचकस्य उदाहरणानि भवन्ति।

सूत्रार्थसमन्वयः - दाक्षी इत्यत्र सूत्रार्थस्य समन्वयः प्रस्तूयते।

दाक्षी। अत्र दाक्षि इति शब्दः अस्ति। अयं शब्दः मनुष्यजातिवाचकः अस्ति। अपि च इदन्तः अपि अस्ति प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां इदन्तात् मनुष्यजातिवाचकात् दाक्षि इति प्रातिपदिकात् इतो मनुष्यजातेः इति सूत्रेण विकल्पेन ङीष्प्रत्ययः भवति। तेन दाक्षि ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन दाक्षि ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण इकारलोपे कृते वर्णसम्मेलने च कृते दाक्षी इति रूपं सिध्यति।

[११.५] पुंयोगादाख्यायाम्॥ (४.१.४८)

सूत्रार्थः - पुरुषसम्बन्धात् स्त्रियां विद्यमानात् पुरुषवाचकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय पुंयोगादाख्यायाम् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। पुंयोगाद् इति पञ्चम्येकवचनान्तं पदम्। आख्यायाम् इति सप्तम्येकवचनान्तं पदम्। परन्तु अत्र पञ्चम्यर्थे सप्तमीविभक्तिः अस्ति, तस्मात् आख्यायाम् इत्यस्य स्थाने आख्यायाः इति ज्ञेयम्। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति पदम् अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अनुपसर्जनात् इति अधिकारः, प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र पुंयोगात् इत्यस्य च पुरुषसम्बन्धात् इत्यर्थो बोध्यः। एवम् आख्याशब्दस्य वाचकः इत्यर्थः अस्ति। तेन आख्यायाः इत्यस्य वाचकात् इत्यर्थः ज्ञेयः। तत्र कस्य वाचकात् इति जिज्ञासायाम् पुंयोगात् इति पदसान्निध्यवशात् पुरुषवाचकात् इति लभ्यते।

सूत्रार्थविचारः - अत्र पुंयोगात् इत्यस्य स्त्रियाम् इत्यत्र अन्वयः भवति। स्त्रियाम् इत्यस्य च पुरुषवाचकात् इत्यत्र अन्वयः भवति। पुरुषवाचकात् इत्यस्य प्रातिपदिकात् इत्यत्र अन्वयः भवति। अतः इति पदं प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अतः इत्यस्य अदन्तात् इत्यर्थः लभ्यते। एवं सर्वपदसंयोजनेन सूत्रार्थः भवति पुरुषसम्बन्धात् स्त्रियां विद्यमानात् पुरुषवाचकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

उदाहरणम् - गोपी। गणकी। महापात्री। गिरीशी। इत्यादीनि उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः - गोपी इत्यत्र सूत्रार्थस्य समन्वयः प्रस्तूयते।

गोपी। अत्र गोप इति शब्दः अस्ति। अयं शब्दः गोपालनकर्तुः पुरुषस्य वाचकः अस्ति। परन्तु गोपालेन पुरुषेण सह यस्याः स्त्रियाः विवाहः भवति तस्यै अपि अयं गोपशब्दः प्रयुज्यते। अतः अयं गोपशब्दः पुरुषसम्बन्धात् स्त्रियाम् अपि विद्यमानं भवति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायां पुरुषसम्बन्धात् स्त्रियां विद्यमानात् अदन्तात् गोप इति प्रातिपदिकात् पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति। तेन गोप ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन गोप ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते गोपी इति रूपं सिध्यति। तत्र गोपः इत्यस्य गोपालनकर्ता इत्यर्थः। गोपी इत्यस्य च गोपस्य स्त्री इत्यर्थः भवति।

[११.६] जातेरस्त्रीविषयादयोपधात्॥ (४.१.६३)

सूत्रार्थः - अनियतस्त्रीलिङ्गात् यकारोपधभिन्नात् अनुपसर्जनात् जातिवाचकात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय जातेरस्त्रीविषयादयोपधात् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। जातेः इति पञ्चम्यन्तं पदम्। अस्त्रीविषयाद् इति पञ्चम्यन्तं पदम्। अयोपधात् इति पञ्चम्यन्तं पदम्। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति पदम् अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अनुपसर्जनात् इति अधिकारः, प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र अस्त्रीविषयात् इति पदं समस्तम् अस्ति। अत्र च बहुव्रीहिगर्भनञ्तत्पुरुषसमासः अस्ति। एतस्य विग्रहः भवति स्त्री विषयः यस्य सः स्त्रीविषयः, अस्य च नित्यस्त्रीलिङ्गः इत्यर्थः। न स्त्रीविषयः यस्य सः अस्त्रीविषयः। तस्मात् अस्त्रीविषयात्। अस्य नित्यस्त्रीलिङ्गभिन्नात् इत्यर्थः, अनियतस्त्रीलिङ्गात् इति यावत्। पुनः अयोपधात् इत्यपि समस्तं पदम्। अत्रापि बहुव्रीहिगर्भनञ्तत्पुरुषसमासः अस्ति। अस्य च विग्रहः भवति यः उपधा यस्य सः योपधः, न योपधः इति अयोपधः, तस्मात् अयोपधात् इति। अस्य च यकारोपधभिन्नात् इत्यर्थः।

सूत्रार्थविचारः - अत्र जातेः इति पदम्, अस्त्रीविषयात् इति पदम्, अयोपधात् इति पदम्, अनुपसर्जनात् इति पदं च प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन सूत्रार्थः भवति अनियतस्त्रीलिङ्गात् यकारोपधभिन्नात् अनुपसर्जनात् जातिवाचकात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

उदाहरणम् - तटी। कुक्कुटी। सूकरी। वृषली। कठी। वह्वृची। औपगवी। इत्यादीनि उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः - तटी, वृषली, कठी, इति त्रिषु उदाहरणेषु सूत्रार्थस्य समन्वयः क्रियते।

तटी। अत्र तट इति शब्दः अस्ति। अयं शब्दः त्रिलिङ्गः अस्ति इत्यतः अनियतस्त्रीलिङ्गः अस्ति। अस्य शब्दस्य उपधायां यकारः नास्ति, अतः यकारोपधभिन्नः अपि अस्ति। अपि च अनुपसर्जनः अपि अस्ति। पुनः जातिवाचकः अपि अस्ति। एवमेव प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायाम् अनियतस्त्रीलिङ्गात् अयोपधात् अनुपसर्जनात् जातिवाचकात् तट इति प्रातिपदिकात् जातेरस्त्रीविषयादयोपधात् इति सूत्रेण ङीष्प्रत्ययः भवति। तेन तट ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन तट ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते तटी इति रूपं सिध्यति।

वृषली। अत्र वृषल इति शब्दः अस्ति। अयं शब्दः द्विलिङ्गः अस्ति इत्यतः अनियतस्त्रीलिङ्गः अस्ति। अस्य शब्दस्य उपधायां यकारः नास्ति, अतः यकारोपधभिन्नः अपि अस्ति। अपि च अनुपसर्जनः अपि अस्ति। पुनः जातिवाचकः अपि अस्ति। एवमेव प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायाम् अनियतस्त्रीलिङ्गात् अयोपधात् अनुपसर्जनात् जातिवाचकात् वृषल इति प्रातिपदिकात् जातेरस्त्रीविषयादयोपधात् इति सूत्रेण ङीष्प्रत्ययः भवति। तेन वृषल ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन वृषल ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते वृषली इति रूपं सिध्यति।

कठी। अत्र कठ इति शब्दः अस्ति। अयं शब्दः द्विलिङ्गः अस्ति इत्यतः अनियतस्त्रीलिङ्गः अस्ति। अस्य शब्दस्य उपधायां यकारः नास्ति, अतः यकारोपधभिन्नः अपि अस्ति। अपि च अनुपसर्जनः अपि अस्ति। पुनः जातिवाचकः अपि अस्ति। एवमेव प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायाम् अनियतस्त्रीलिङ्गात् अयोपधात् अनुपसर्जनात् जातिवाचकात् कठ इति प्रातिपदिकात् जातेरस्त्रीविषयादयोपधात् इति सूत्रेण ङीष्प्रत्ययः भवति। तेन कठ ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कठ ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते कठी इति रूपं सिध्यति।

[११.७] स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्॥ (४.१.५४)

सूत्रार्थः - संयोगोपधभिन्नम् उपसर्जनीभूतं च यत् स्वाङ्गम्, तादृशस्वाङ्गवाचकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीष् स्यात्।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। स्वाङ्गात् इति पञ्चम्यन्तं पदम्। च इति अव्ययपदम्। उपसर्जनात् इति पञ्चम्यन्तं पदम्। असंयोगोपधात् इति पञ्चम्यन्तं पदम्। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति पदम् अनुवर्तते। वोतो गुणवचनात् इति सूत्रात् वा इति पदमनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः इति पदं च अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अत्र सूत्रे प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। असंयोगोपधात् इति पदं समस्तम् अस्ति। अत्र च बहुव्रीहिगर्भनञ्तत्पुरुषसमासः अस्ति। अस्य च विग्रहः भवति, संयोगः उपधायां यस्य सः संयोगोपधः, न संयोगोपधः इति असंयोगोपधः, तस्मात् असंयोगोपधात् इति। अस्य च संयोगोपधभिन्नात् इत्यर्थः।

सूत्रार्थविचारः - अत्र उपसर्जनात् इति असंयोगोपधात् इति च स्वाङ्गात् इत्यस्य विशेषणं भवति। तेन संयोगोपधभिन्नम् उपसर्जनं च यद् स्वाङ्गम्, इति लभ्यते। पुनः स्वाङ्गात् इति पदं प्रातिपदिकात् इत्यस्य विशेषणम् अस्ति। अतः इति पदमपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन स्वाङ्गान्तात् अदन्तात् इत्यर्थः लभ्यते। ततश्च सूत्रार्थः भवति संयोगोपधभिन्नम् उपसर्जनीभूतं च यत् स्वाङ्गम्, तादृशस्वाङ्गवाचकशब्दान्तात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीष् स्यात्।

उदाहरणम् - अतिकेशी, अतिकेशा। चन्द्रमुखी, चन्द्रमुखा। सुकेशी, सुकेशा। पीनस्तनी, पीनस्तना। इत्यादीनि उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः - अतिकेशी, अतिकेशा। चन्द्रमुखी, चन्द्रमुखा, इत्यत्र सूत्रार्थस्य समन्वयः प्रस्तूयते।

अतिकेशी, अतिकेशा। अत्र अतिकेश इति शब्दः अस्ति। अत्र केशशब्दः स्वाङ्गवाचकः अस्ति। पुनः केशशब्दस्य उपधायां संयोगः ऩास्ति अतः असंयोगोपधः अपि अस्ति। अपि च एतस्य अर्थः भवति केशान् अतिक्रान्तः इति। तस्मात् केशपदार्थः अतिक्रान्ते अर्थे उपसर्जनम् अपि अस्ति। एवञ्च असंयोगोपधः उपसर्जनीभूतः स्वाङ्गवाचकः शब्दः केशशब्दः। तादृशकेशशब्दान्तम् अदन्तं प्रातिपदिकं भवति अतिकेश इति। एवञ्च असंयोगोपधम् उपसर्जनीभूतं च स्वाङ्गम् केश इति तदन्तात् अदन्तात् अतिकेश इति प्रातिपदिकात् स्त्रीत्वविवक्षायां स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रेण विकल्पेन ङीष्प्रत्ययः भवति। तेन अतिकेश ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन अतिकेश ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते अतिकेशी इति रूपं सिध्यति। यदा च ङीष्प्रत्यय नैव भवति तदा अजाद्यतष्टाप् इति सूत्रेण टापि प्रत्यये कृते अतिकेश टाप् इति स्थितौ

अनुबन्धलोपे च कृते अतिकेश आ इति स्थितिः भवति। ततः अकः सवर्णे दीर्घः इति सूत्रेण दीर्घैकादेशे कृते अतिकेशा इति रूपं सिध्यति।

चन्द्रमुखी, चन्द्रमुखा। अत्र चन्द्रमुख इति शब्दः अस्ति। अत्र मुखशब्दः स्वाङ्गवाचकः अस्ति। पुनः मुखशब्दस्य उपधायां संयोगः नास्ति अतः असंयोगोपधः अपि अस्ति। अपि च एतस्य अर्थः भवति चन्द्रसदृशमुखवान् इति। तस्मात् मुखपदार्थः अन्यपदार्थे उपसर्जनम् अपि अस्ति। एवञ्च असंयोगोपधः उपसर्जनीभूतः स्वाङ्गवाचकः शब्दः मुखशब्दः। तादृशमुखशब्दान्तम् अदन्तं प्रातिपदिकं भवति चन्द्रमुख इति। एवञ्च असंयोगोपधम् उपसर्जनीभूतं च स्वाङ्गम् मुख इति तदन्तात् अदन्तात् चन्द्रमुख इति प्रातिपदिकात् स्त्रीत्वविवक्षायां स्वाङ्गच्चोपसर्जनादसंयोगोपधात् इति सूत्रेण विकल्पेन ङीष्प्रत्ययः भवति। तेन चन्द्रमुख ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन चन्द्रमुख ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते चन्द्रमुखी इति रूपं सिध्यति। यदा च ङीष्प्रत्ययो नैव भवति तदा अजाद्यतष्टाप् इति सूत्रेण टापि प्रत्यये कृते चन्द्रमुख टाप् इति स्थितौ अनुबन्धलोपे च कृते चन्द्रमुख आ इति स्थितिः भवति। ततः अकः सवर्णे दीर्घः इति सूत्रेण दीर्घैकादेशे कृते चन्द्रमुखा इति रूपं सिध्यति।

[११.८] क्रीतात्करणपूर्वात्॥ (४.१.५०)

सूत्रार्थः - करणपूर्वात् क्रीतान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय क्रीतात्करणपूर्वात् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। क्रीतात् इति पञ्चम्यन्तं पदम्। करणपूर्वात् इति पञ्चम्यन्तं पदम्। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति पदम् अनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः इति पदं च अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अनुपसर्जनात् इति अधिकारः, प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र करणपूर्वात् इति पदं समस्तम् अस्ति। अत्र च बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति करणं पुर्वं यस्य सः करणपूर्वः, तस्मात् करणपूर्वात्। अस्य च करणपूर्वकात् इत्यर्थः।

सूत्रार्थविचारः - अत्र अतः इति पदम्, क्रीतात् इति पदं च प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन च अदन्तात् क्रीतान्तात् इत्यर्थः लभ्यते। करणपूर्वात् इति पदमपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च सूत्रार्थो भवति करणपूर्वात् क्रीतान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः भवति।

उदाहरणम् - वस्त्रक्रीती। अश्वक्रीती।

सूत्रार्थसमन्वयः - वस्त्रक्रीती इत्यत्र सूत्रार्थस्य समन्वयः प्रस्तूयते।

वस्त्रक्रीती। अत्र वस्त्रक्रीत इति शब्दः अस्ति। अयं शब्दः क्रीतान्तः अस्ति। अपि च अदन्तः अपि पुनः अस्य शब्दस्य पूर्वभागः अस्ति वस्त्र इति तच्च करणम् अस्ति, अतः अयं शब्दः करणपूर्वकः अपि अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां करणपूर्वकात् क्रीतान्तात् अदन्तात् वस्त्रक्रीत इति प्रातिपदिकात् क्रीतात्करणपूर्वात् इति सूत्रेण ङीष्प्रत्ययः भवति। तेन वस्त्रक्रीत ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन वस्त्रक्रीत ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते वस्त्रक्रीती इति रूपं सिध्यति।

[११.९] इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणा मा-नुक्॥ (४.१.४९)

सूत्रार्थः - इन्द्र वरुण भव शर्व रुद्र मृड हिम अरण्य यव यवन मातुल आचार्य इति एतेभ्यः अदन्तेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः स्यात्, इन्द्रादिप्रातिपदिकानाम् आनुक् इत्यागमश्च स्यात्।

सूत्रावतरणम् - ङीप् ङीष् ङीन् इत्येतेषु त्रिषु प्रत्ययेषु ङीष् प्रत्ययः अन्यतमः अस्ति। तस्य विधानाय इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीष्प्रत्ययम् आनुगागमं च विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणाम् इति षष्ठीबहुवचनान्तं पदम्। आनुक् इति प्रथमैकवचनान्तं पदम्। अत्र अन्यतो ङीष् इति सूत्रात् ङीष् इति पदम् अनुवर्तते। पुंयोगादाख्यायाम् इति सम्पूर्णमपि सूत्रमत्र अनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः इति पदं च अनुवर्तते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् इति अनुवर्तते। अनुपसर्जनात् इति अधिकारः, प्रत्ययः इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणाम् इति पदं समस्तम् अस्ति। अत्र च इतरेतरयोगद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति इन्द्रश्च वरुणश्च भवश्च शर्वश्च रुद्रश्च मृडश्च हिमं च अरण्यं च यवश्च यवनश्च मातुलश्च आचार्यश्च इति इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याः। तेषाम् इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणाम् इति।

सूत्रार्थविचारः - अत्र अतः इति पदम्, प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन च अदन्तात् इत्यर्थः लभ्यते। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणाम् इति पदमपि प्रातिपदिकात् इत्यस्य विशेषणं

भवति। ततश्च इन्द्र वरुण भव शर्व रुद्र मृड हिम अरण्य यव यवन मातुल आचार्य इति एतेभ्यः अदन्तेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वे द्योत्ये ङीष् प्रत्ययः स्यात्, इन्द्रादिप्रातिपदिकानाम् आनुक् इत्यागमश्च स्यात्। अत्रेदं बोध्यम् यत् इन्द्र वरुण भव शर्व रुद्र मृड मातुल आचार्य इति अष्टभ्यः प्रातिपदिकेभ्यः पुरुषसम्बन्धदशायां भवति। अर्थात् तस्य स्त्री इत्यर्थे सति भवति। हिम अरण्य इति द्वाभ्यां प्रातिपदिकाभ्यां तु महत्त्वे अर्थे सति भवति। यव इति प्रातिपदिकात् दुष्टे अर्थे सति भवति। यवन इत्यस्मात् च लिपिः इत्यर्थे सति भवति।

उदाहरणम् - इन्द्राणी वरुणानी भवानी शर्वाणी रुद्राणी मृडानी हिमानी अरण्यानी यवानी यवनानी मातुलानी आचार्यानी इत्यादीनि उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः - इन्द्राणी वरुणानी आचार्यानी हिमानी अरण्यानी यवानी यवनानी इत्यत्र सूत्रार्थस्य समन्वयः प्रस्तूयते।

इन्द्राणी- अत्र इन्द्र इति शब्दः अस्ति। अयं शब्दः देवराजस्य वाचकः अस्ति। परन्तु देवराजेन इन्द्रेण सह यस्याः शचीदेव्याख्यायाः स्त्रियः विवाहः संजातः अस्ति तस्यै शचीदेव्यै अपि अयम् इन्द्रशब्दः प्रयुज्यते। अतः अयम् इन्द्रशब्दः पुरुषसम्बन्धात् स्त्रियाम् अपि विद्यमानं भवति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायां पुरुषसम्बन्धात् स्त्रियां विद्यमानात् अदन्तात् इन्द्र इति प्रातिपदिकात् परः पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति, इन्द्र इति प्रातिपदिकस्य आनुक् आगमश्च भवति। तेन इन्द्र आनुक् ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। आनुकः ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, आनुकः उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण उभयोः लोपः भवति। तेन इन्द्र आन् ई इति स्थितिः भवति। ततः इन्द्र आन् इत्यत्र अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते इन्द्रान् ई इति स्थितौ वर्णसम्मेलने इन्द्रानी इति जाते अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णत्वे च कृते इन्द्राणी इति सिध्यति। एतस्य च इन्द्रस्य स्त्री इत्यर्थः।

वरुणानी- अत्र वरुण इति शब्दः अस्ति। अयं शब्दः जलदेवस्य वाचकः अस्ति। परन्तु जलदेवेन वरुणेन सह यस्याः स्त्रियः विवाहः संजातः अस्ति तस्यै अपि अयम् वरुणशब्दः प्रयुज्यते। अतः अयम् वरुणशब्दः पुरुषसम्बन्धात् स्त्रियाम् अपि विद्यमानं भवति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायां पुरुषसम्बन्धात् स्त्रियां विद्यमानात् अदन्तात् वरुण इति प्रातिपदिकात् परः पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति, वरुण इति प्रातिपदिकस्य आनुक् आगमश्च भवति। तेन वरुण आनुक् ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। आनुकः ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, आनुकः उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण उभयोः लोपः भवति। तेन वरुण आन् ई इति स्थितिः भवति। ततः वरुण आन् इत्यत्र अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते वरुणान् ई इति स्थितौ वर्णसम्मेलने वरुणानी इति सिध्यति। एतस्य च वरुणस्य स्त्री इत्यर्थः। एवमेव भवानी शर्वाणी रुद्राणी मृडानी

इत्यादीनामपि सिद्धिः बोध्या। अत्र विस्तरभयात् न लिख्यते। तत्र भवानी इत्यस्य भवस्य स्त्री इत्यर्थः। शर्वाणी इत्यस्य शर्वस्य स्त्री इत्यर्थः।

आचार्यानी- अत्र आचार्य इति शब्दः अस्ति। अयं शब्दः अध्यापकस्य वाचकः अस्ति। परन्तु अध्यापकेन सह यस्याः स्त्रियः विवाहः संजातः अस्ति तस्यै अपि अयम् आचार्यशब्दः प्रयुज्यते। अतः अयम् आचार्यशब्दः पुरुषसम्बन्धात् स्त्रियाम् अपि विद्यमानं भवति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायां पुरुषसम्बन्धात् स्त्रियां विद्यमानात् अदन्तात् आचार्य इति प्रातिपदिकात् परः पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति, आचार्य इति प्रातिपदिकस्य आनुक् आगमश्च भवति। तेन आचार्य आनुक् ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। आनुकः ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, आनुकः उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण उभयोः लोपः भवति। तेन आचार्य आन् ई इति स्थितिः भवति। ततः आचार्य आन् इत्यत्र अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते आचार्यान् ई इति स्थितौ वर्णसम्मेलने आचार्यानी इति सिध्यति। अत्र यद्यपि नकारस्य स्थाने अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णकारः प्राप्तः अस्ति किन्तु आचार्यादणत्वं च इति वार्तिकेन तस्य निषेधः भवति। तेन आचार्यानी इति रूपं सिध्यति। एतस्य च आचार्यस्य स्त्री इत्यर्थः।

हिमानी- अत्र हिम इति प्रातिपदिकम् अस्ति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायाम् अदन्तात् हिम इति प्रातिपदिकात् परः पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति, हिम इति प्रातिपदिकस्य आनुक् आगमश्च भवति। तेन हिम आनुक् ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। आनुकः ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, आनुकः उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण उभयोः लोपः भवति। तेन हिम आन् ई इति स्थितिः भवति। ततः हिम आन् इत्यत्र अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते हिमान् ई इति स्थितौ वर्णसम्मेलने हिमानी इति सिध्यति। एतस्य च महद् हिमम् इत्यर्थः।

अरण्यानी- अत्र अरण्य इति प्रातिपदिकम् अस्ति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायाम् अदन्तात् अरण्य इति प्रातिपदिकात् परः पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति, अरण्य इति प्रातिपदिकस्य आनुक् आगमश्च भवति। तेन वरुण आनुक् ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। आनुकः ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, आनुकः उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण उभयोः लोपः भवति। तेन अरण्य आन् ई इति स्थितिः भवति। ततः अरण्य आन् इत्यत्र अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते अरण्यान् ई इति स्थितौ वर्णसम्मेलने अरण्यानी इति सिध्यति। एतस्य च महद् अरण्यम् इत्यर्थः।

यवानी- अत्र यव इति प्रातिपदिकम् अस्ति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायाम् अदन्तात् यव इति प्रातिपदिकात् परः पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति, यव इति प्रातिपदिकस्य आनुक् आगमश्च भवति। तेन यव आनुक् ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। आनुकः ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, आनुकः उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण उभयोः लोपः भवति। तेन यव आन् ई इति स्थितिः भवति। ततः यव आन् इत्यत्र अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते यवान् ई इति स्थितौ वर्णसम्मेलने यवानी इति सिध्यति। एतस्य च दुष्टाः यवाः इत्यर्थः।

यवनानी- अत्र यवन इति प्रातिपदिकम् अस्ति। अपि च इदम् अदन्तम् अपि अस्ति। अतः स्त्रीत्वविवक्षायाम् अदन्तात् यवन इति प्रातिपदिकात् परः पुंयोगादाख्यायाम् इति सूत्रेण ङीष्प्रत्ययः भवति, यवन इति प्रातिपदिकस्य आनुक् आगमश्च भवति। तेन यवन आनुक् ङीष् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। आनुकः ककारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, आनुकः उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण उभयोः लोपः भवति। तेन यवन आन् ई इति स्थितिः भवति। ततः यवन आन् इत्यत्र अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते यवनान् ई इति स्थितौ वर्णसम्मेलने यवनानी इति सिध्यति। एतस्य च यवनानां लिपिः इत्यर्थः।

पाठगतप्रश्नाः

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१. गौरादयः इति पदे कः समासः कश्च विग्रहः।

२. अस्त्रीविषयात् इति पदस्य कः अर्थः।

३. संयोगोपधः इति पदे कः समासः। कश्च विग्रहः।

४. गुणवचनात् इति पदस्य कः अर्थः।

५. करणपूर्वात् इति पदे कः समासः कश्च विग्रहः।

६. वस्त्रक्रीती इत्यस्य लौकिकं विग्रहं वाक्यं लिख।

७. अतिकेशी इत्यस्य लौकिकं विग्रहवाक्यं किम्।

८. औपगवी इत्यस्य कः अर्थः।

पाठसारः

अस्मिन् पाठे ङीष्प्रत्ययस्य विवेचनं वर्तते। तत्र सर्वप्रथमं षिद्गौरादिभ्यश्च इति सूत्रस्य व्याख्यानं वर्तते। ततः परं वोतो गुणवचनात् इति सूत्रस्य व्याख्या वर्तते। तदन्तरं बह्वादिभ्यश्च इति सूत्रस्य विवेचनमस्ति। तत्पश्चात् इतो मनुष्यजातेः इति सूत्रस्य सोदाहरणं व्याख्यानं वर्तते। पुनः पुंयोगादाख्यायाम् इति सूत्रस्य व्याख्या अस्ति। तत्पश्चात् जातेरस्त्रीविषयादयोपधात् इति सूत्रस्य व्याख्या प्रदर्शिता। अतः परं स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रस्य व्याख्यानं कृतम्। अन्तिमे च क्रीतात्पूर्वात्करणपूर्वात् इति सूत्रस्य व्याख्यानं वर्तते। अन्ते च इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् इति सूत्रस्य सोदाहरणं व्याख्यानं वर्तते।

पाठान्तप्रश्नाः

अत्र परीक्षोपयोगिनः प्रष्टव्याः प्रश्नाः प्रदीयन्ते।

१. षिद्गौरादिभ्यश्च इति सूत्रस्य व्याख्या कार्या।

२. वोतो गुणवचनात् इति सूत्रस्य व्याख्या कार्या।

३. इतो मनुष्यजातेः इति सूत्रस्य व्याख्या कार्या।

४. जातेरस्त्रीविषयादयोपधात् इति सूत्रस्य व्याख्या कार्या।

५. स्वाङ्गाच्चोपसर्जनादसंयोगपधात् इति सूत्रस्य व्याख्या कार्या।

६. पुंयोगादाख्यायाम् इति सूत्रस्य व्याख्या कार्या।

७. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् इति सूत्रस्य व्याख्या कार्या।

८. गौरी इति प्रयोगस्य सिद्धिः लेख्या।

९. नर्तकी इति प्रयोगस्य सिद्धिः लेख्या।

१०. मृद्वी मृदुः इति प्रयोगस्य सिद्धिः लेख्या।

११. दाक्षी इति प्रयोगस्य सिद्धिः लेख्या।

१२. वस्त्रक्रीती इति प्रयोगस्य सिद्धिः लेख्या।

१३. चन्द्रमुखी चन्द्रमुखा इति प्रयोगस्य सिद्धिः लेख्या।

१४. तटी इति प्रयोगस्य सिद्धिः लेख्या।

पाठगतप्रश्नोत्तराणि

१. गौरादयः इति पदे बहुव्रीहिसमासः अस्ति। गौरः आदिः येषां ते गौरादयः इति च विग्रहः।

२. अस्त्रीपिषयात् इत्यस्य नित्यस्त्रीलिङ्गभिन्नात् इत्यर्थः।

३. संयोगोपधः इति पदे बहुव्रीहिसमासः। संयोगः उपधा यस्य सः संयोगोपधः।

४. गुणवचनात् इति पदस्य गुणवाचकात् इत्यर्थः।

५. करणपूर्वात् इति पदे बहुव्रीहिसमासः। करणं पूर्वं यस्य सः करणपूर्वः, तस्मात् करणपूर्वात्, इति च विग्रहः।

६. वस्त्रक्रीती इत्यस्य लौकिकं विग्रहवाक्यं भवति वस्त्रैः क्रीता इति वस्त्रक्रीती।

७. केशान् अतिक्रान्ता इति अतिकेशी इत्यस्य लौकिकं विग्रहवाक्यम्।

८. उपगोः अपत्यं स्त्री इति औपगवी इत्यस्य अर्थः।

॥ इति एकादशः पाठः॥

346sk12

१२

भ्वादिप्रकरणे-

भूधातोः लटि रूपसाधनम् -१

प्रस्तावना

पाणिनिमुनिना अष्टाध्यायीनामकः ग्रन्थः लिखितः। तत्र लाघवसम्पादनाय धातुपाठः गणपाठः नामलिङ्गानुशासनम् इत्यादिकम् अपि विरचितम्। धातुपाठे पठिताः शब्दाः धातवः कथ्यन्ते। तथाहि सूत्रं - भूवादयो धातव इति। धातोः अर्थः फलम् व्यापारश्च। तदग्रे विस्तरशः वर्णयिष्यते। धातोः परं तिङ् कृत् चेति द्वेधा प्रत्ययौ विधीयेते। तत्र धातोः तिङ्-प्रत्ययविधानेन तिङन्तं पदं निष्पद्यते। तदेवेदं तिङन्तप्रकरणमत्र प्रकृतम्।

धातुतिङोः मध्ये विधीयमानः प्रत्ययः विकरणं कथ्यते। धातूनां दश विकरणानि सन्ति। यथा शप् श्लुक् श्लुः श्यन् शः श्नम् उ श्ना शप् इति। अन्यानि अपि विकरणानि स्य तास् च्लि इत्यादीनि। तथापि गणशः विभाजनस्य कारणं हि शबादीनि दश विकरणानि एव। यस्मात् धातोः शप् विकरणं विधीयते स धातुः प्रथमगणे पाणिनिना स्थापितः। तत्प्रथमगणस्य प्रथमो धातुस्तावत् भू इति। अतः भूः आदिः यस्य गणस्य दलस्य स गणः भ्वादिगणः। एवम् श्लुक् विकरणं येषां धातूनां ते धातवः द्वितीयगणे स्थापिताः। तस्य गणस्य प्रथमो धातुः अद् धातुः। अतः अद् आदिः यस्य गणस्य स अदादिगणः भवति। एवं धातूनां विकरणवशाद् दश गणाः। अत एव बहुत्र धातोरुल्लेखः क्रियते तदा स कस्य गणस्य इति लिख्यते। यथा भू (भ्वादि, प.प.) - अर्थात् भू धातुः भ्वादिगणीयः, परस्मैपदी च। विकरणज्ञानं विना धातोः लट् लोट् लङ् विधिलिङ् एषु लकारेषु रूपाणि न कर्तुं शक्यानि। अन्येषु लकारेषु विकरणस्य प्रभावो नास्ति। अतः गणज्ञानं विनैव तेषु रूपाणि कर्तुं शक्यन्ते।

अस्मिन् पाठे, इतः परं च नवसु पाठेषु भ्वादिगणीयधातूनामेव रूपाणि आलोच्यन्ते। भ्वादिगणस्य प्रायः सर्वाणि सूत्राणि अन्येषु गणेषु धातूनां रूपाणि साधयितुम् अपेक्षितानि। अतः भ्वादिगणस्य सम्यग् ज्ञानम् नूनम् अर्जनीयम्।

भूधातोः लटि लकारे सर्वाणि रूपाणि इति अति विस्तृतं कार्यम्। अतः पाठद्वयम् एकत्रीकृत्य अत्र भूधातोः लटि रूपाणि उपन्यस्यन्ते। ततश्च त्रिषु पाठेषु भूधातोरेव अन्येषु लकारेषु रूपाणि उपन्यस्तानि सन्ति। एवञ्च एतत्प्रकरणोपयोगीनि कानिचन सूत्राणि अस्य पाठद्वयस्य अन्ते दत्तानि सन्ति।

इत्थम् पञ्चमपाठात् परं भ्वादिप्रकरणस्य अवशिष्टानि मुख्यानि सूत्राणि प्रदत्तानि सन्ति।

भूधातोः भवति इति रूपसाधनाय बहूनि सूत्राणि आवश्यकानि सन्ति। अतः भवति इति रूपम् एकत्र नोपलभ्यते। तत् बहूषु सूत्रेषु व्यापृतमस्ति। अतः छात्रेण तद् एकत्र कर्तव्यम्।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य सूत्राणि बुध्यात्।
- धातुरूपाणि साधयितुं प्रभवेत्।
- सूत्राणि व्याख्यातुम् जानीयात्।
- सर्वेषां लकाराणाम् अर्थान् रूपाणि च जानीयात्।
- संस्कृतव्याकरणे कालभेदान् जानीयात्।
- परस्मैपदम् आत्मनेपदम् च किमिति ज्ञास्यति।
- प्रथममध्यमोत्तमान् जानीयात्।
- सार्वधातुकम् आर्धधातुकं च किमिति ज्ञास्यति।
- णोपदेशः षोपदेशः धातुश्च क इति ज्ञास्यति।

भूधातोः लटि रूपाणि

[१२.१] लः कर्मणि च भावे चाकर्मकेभ्यः॥ (३.४.६९)

सूत्रार्थः - लकाराः सकर्मकेभ्यः धातुभ्यः कर्मणि कर्तरि च स्युः। अकर्मकेभ्यः धातुभ्यः भावे कर्तरि च स्युः।

सूत्रावतरणम् - सकर्मकेभ्यः धातुभ्यः कर्मणि कर्तरि च लकारविधानाय अकर्मकेभ्यः धातुभ्यः च भावे कर्तरि च लकारविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - इदं विधिसूत्रम्। सूत्रेऽस्मिन् षट् पदानि सन्ति। लः कर्मणि च भावे च अकर्मकेभ्यः इति सूत्रगतपदच्छेदः। लः इति प्रथमाबहुवचनान्तम् पदम्। कर्मणि इति सप्तम्यन्तं पदम्। च इति अव्ययपदम्। भावे इति सप्तम्यन्तं पदम्। च इति अव्यय पदम्। अकर्मकेभ्यः इति पञ्चम्यन्तं पदम्। अत्र धातोः इति पञ्चम्यन्तम् पदम् अधिकृतम्। सूत्रेऽस्मिन् वाक्यद्वयम् अस्ति। वाक्यद्वयेऽपि चकारेण कर्तरि कृत् इति सूत्रात् कर्तरि इति सप्तम्यन्तं पदम् अनुकृष्यते।

प्रथमं वाक्यम् - धातोः लः कर्मणि कर्तरि च इति। अकर्मकधातोः कर्मणि लकारविधानं न सम्भवति। अत इदं सकर्मकधातुविषयकम्। तेन लः अर्थात् लकाराः सकर्मकधातुभ्यः कर्मणि कर्तरि च भवन्तीति प्रथमवाक्यार्थः।

द्वितीयं वाक्यम् - धातोः भावे कर्तरि च अकर्मकेभ्यः इति। धातोः इत्यस्य विशेषणानुरोधेन बहुवचनान्ततया विपरिणामः क्रियते। तेन अर्थः भवति - अकर्मकेभ्यः धातुभ्यः भावे कर्तरि च लकाराः भवन्ति इति। अत्र भावशब्दस्यार्थः क्रिया एव।

यस्य सकर्मकधातोः कर्म वाक्ये नास्ति स धातुः अविवक्षितकर्मकः कथ्यते। अतः तस्मात् धातोः अपि लकाराः भावे कर्तरि च भवन्ति।

लकारस्य विधानं कर्तरि कर्मणि, कर्तरि भावे च सम्भवति। धातोः परं कदा कर्तरि लकारः विधेयः कदा वा कर्मणि इत्यादिविवेकः तु वक्त्रा कर्तव्यः। वाक्यरचनाकर्ता स्वविवक्षया एव कस्मिन्नर्थे लकारप्रयोगः इति चिन्तयति। अतः विवक्षा एव अत्र विनिगमना।

कर्तरि लकारः विधीयते इति वाक्यस्यार्थो भवति कर्त्रर्थे लकारः विधीयते इति। अत्र कर्तरि कर्मणि भावे इति सप्तम्यन्तानि पदानि। तेषाम् अर्थाः तु कर्त्रर्थे कर्मार्थे भावार्थे इति भवति। एवमेव अग्रे वर्तमाने लट् इत्यत्र वर्तमानार्थे लट् इत्यादिकम् बोध्यम्।

सकर्मकः अकर्मकः च धातुः -

यस्य धातोः कर्म सम्भवति स धातुः सकर्मकः कथ्यते। यस्य कर्म न सम्भवति स धातुः अकर्मकः कथ्यते। धातोः फलं व्यापारः चेति अर्थद्वयम्। तत्र व्यापारः हि क्रिया। अयं व्यापारः फलजनकः भवति। अतः फलानुकूलः व्यापारः कथ्यते। व्यापारस्य आश्रयः एकम् कारकम् भवति। फलस्य आश्रयः अपि एकम् कारकं भवति। यस्य धातोः फलम् एकस्मिन् कारके वर्तते, व्यापारः अपरस्मिन् कारके वर्तते, स धातुः सकर्मकः कथ्यते। यस्य धातोः फलम् यस्मिन् कारके वर्तते, व्यापारः अपि तस्मिन्नेव कारके वर्तते स धातुः अकर्मकः कथ्यते।

यथा तक्षा कुठारेण काष्ठं छिनत्ति। अस्मिन् उदाहरणे कुठारस्य उद्यमन-निपातनरूपं व्यापारं तक्षा करोति। तक्षाणं विना अयं व्यापारः विरतः भवति। अतः व्यापारः तक्षणि वर्तते। व्यापारेण जायमानं छेदनरूपं फलम् तु काष्ठे वर्तते। अतः व्यापारः तक्षणि, फलं काष्ठे इति फलव्यापारयोः आश्रयौ भिन्नौ। अतः छिद्-धातुः सकर्मकः।

रामः तिष्ठति। अत्र स्थाधातोः गतिनिवृत्तिः अर्थः। गतिविरामः फलम्। तदनुकूलः च व्यापारः स्थितिरूपः। उभयमपि रामे एव वर्तते। अतः फलव्यापारयोः आश्रयौ न भिन्नौ अपि तु राम एक एव। अतः स्थाधातुः अकर्मकः।

अकर्मक-सकर्मकधातुविषये केचित् प्रसिद्धाः श्लोकाः -

कर्तृ-कर्म-क्रिया-युक्तः प्रयोगः स्यात् सकर्मकः।
अकर्मकः कर्मशून्यः कर्मद्वन्द्वो द्विकर्मकः।।

क्रियापदं कर्तृपदेन युक्तं व्यपेक्षन्ते यत्र किमित्यपेक्षाम्।
सकर्मकं तं सुधियो वदन्ति शेषस्ततो धातुरकर्मकः।।

अकर्मकधातुगणः -

भ्वादिप्रकरणे- भूधातोः लटि रूपसाधनम् -१

लज्जा-सत्ता-स्थिति-जागरणं वृद्धि-क्षय-भय-जीवनमरणम्।
शयन-क्रीडा-रुचि-दीप्त्यर्थं धातुगणं तमकर्मकमाहुः।।

कारिकोक्तार्थानाम् वाचकाः धातवः अकर्मकाः भवन्ति।

लकाराः -

ल् इति वर्णानन्तरम् माहेश्वरसूत्रक्रमेण अ इ उ ऋ ए ओ इति षड् वर्णाः योजनीयाः। ततः ट् इति वर्णः योजनीयः। तदा लट् लिट् लुट् लृट् लेट् लोट् इति षट् शब्दाः लभ्यन्ते। एते लकाराः कथ्यन्ते। एषु अन्तिमः टकारः हलन्त्यम् इति सूत्रेण इत्संज्ञकः भवति। अत एते टित्-लकाराः अपि कथ्यन्ते।

ल् इति वर्णानन्तरम् माहेश्वरसूत्रक्रमेण अ इ उ ऋ इति चत्वारः वर्णाः योजनीयाः। ततः ङ् इति वर्णः योजनीयः। तदा लङ् लिङ् लुङ् लृङ् इति चत्वारः शब्दाः लभ्यन्ते। एते लकाराः कथ्यन्ते। एषु अन्तिमः ङकारः हलन्त्यम् इति सूत्रेण इत्संज्ञकः भवति। अत एते ङित्-लकाराः अपि कथ्यन्ते।

टित् षट् , ङित् चत्वारः इति दश लकाराः भवन्ति। तेषु लेट् लकारः वेदे एव प्रयुज्यते। अस्मिन् पाठ्यक्रमे वैदिकप्रकरणं नास्ति। अतः लेट्-लकारस्य रूपाणि न प्रदर्श्यन्ते। अतः नव लकाराः अवशिष्यन्ते। तत्रापि पुनः लिङ्-लकारस्य विधिलिङ् आशीर्लिङ् इति भेदद्वयम् भवति। एवम् आहत्य दश लकाराः भवन्ति।

तदेवात्र तालिकायां प्रदर्श्यते।

लकारः	अर्थः	विधायकं सूत्रम्
ल् + अ + ट् = लट्	वर्तमाने	वर्तमाने लट्
ल् + इ + ट् = लिट्	अनद्यतनपरोक्षभूते	परोक्षे लिट्
ल् + उ + ट् = लुट्	अनद्यतनभविष्यति	अनद्यतने लुट्
ल् + ऋ + ट् = लृट्	भविष्यति	लृट् शेषे च
ल् + ए + ट् = लेट्	वेदे एव प्रयुक्तः	लिङर्थे लेट्
ल् + ओ + ट् = लोट्	विध्याद्यर्थेषु	लोट् च। आशिषि लिङ्लोटौ।
ल् + अ + ङ् = लङ्	अनद्यतनभूते	अनद्यतने लङ्
ल् + इ + ङ् = लिङ्	विध्याद्यर्थेषु	विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्
ल् + इ + ङ् = लिङ्	आशीर्वादार्थे	आशिषि लिङ्लोटौ
ल् + उ + ङ् = लुङ्	सामान्यभूते	लुङ्
ल् + ऋ + ङ् = लृङ्	क्रियातिपत्तौ	लुङ्निमित्ते लृङ् क्रियातिपत्तौ। भूते च।

लकारबोधिका कारिका -

लट् वर्तमाने लेट् वेदे भूते लुङ्-लङ्-लिटस्तथा।
विध्याशिषास्तु लिङ्लोटौ लुट्-लृट्-लृङ् च भविष्यति।।

उदाहरणम् -

पठ्-धातुः **सकर्मकः** - रामः वेदं पठति इत्यत्र पठ्-धातुतः लकारः कर्तरि विहितः अस्ति।

रामेण वेदः पठ्यते इति वाक्ये पठ्-धातुतः लकारः कर्मणि विहितः अस्ति।

रामः तिष्ठति इति वाक्ये स्थाधातुः **अकर्मकः**। तस्मात् धातोः लकारः कर्तरि विहितः अस्ति।

रामेण स्थीयते इति वाक्ये स्था-धातुतः लकारः भावे विहितः अस्ति।

रामः खादति इति अस्मिन् वाक्ये कर्म उल्लिखितं नास्ति। अतः खाद्-धातुः अत्र **अविवक्षितकर्मकः** अस्ति। अत्र खाद्-धातोः लकारः कर्तरि विहितः अस्ति।

रामेण खाद्यते इति अस्मिन् वाक्ये कर्मणः उल्लेखो नास्ति। अतः खाद्-धातुः अविक्षितकर्मकः। अतः अत्र खाद्-धातोः लकारः भावे विहितः अस्ति।

[१२.२] वर्तमाने लट्॥ (३.२.१२३)

सूत्रार्थः - वर्तमानक्रियावृत्तेः धातोः लट् स्यात्।

सूत्रव्याख्या - इदम् विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयमस्ति। वर्तमाने इति सप्तम्यन्तं पदम्। लट् इति प्रथमान्तं पदम्।

धातोः इति अधिकृतमस्ति। प्रत्ययः (३.१.१), परश्च (३.१.२) सूत्रद्वयम् अत्र अधिकृतम्। सूत्रमिदं प्रत्ययाधिकारे पठितम्। तस्मात् लट् इति प्रत्ययः। धातोः इति पञ्चम्यन्तं पदम्। तस्मादित्युत्तरस्य इति परिभाषाप्रभावेण परश्च इति सूत्रबलेन च लट् धातोः अव्यवहितः परः विधीयते। एवञ्च सूत्रार्थो भवति - वर्तमाने अर्थे विद्यमानाद् धातोः अव्यवहितः परः लट् प्रत्ययः भवति।

अत्र इदम् अवधेयम् - यो भूतकालो नास्ति, यो भविष्यत्कालो नास्ति स वर्तमानकालः। कापि क्रिया बहूनां लघुव्यापाराणां समुदायः भवति। अर्थात् एकस्याः क्रियायाः नैके अवयवाः सम्भवन्ति। यस्याः क्रियायाः प्रथमः अवयवः कृतः अस्ति, परन्तु अन्तिमः अवयवः अवशिष्टः अस्ति सा क्रिया वर्तमानकालिकी क्रिया इनिर्गुण ब्रह्मति कथ्यते। यथा पाकक्रियायाः नैके अवयवाः। तण्डुलशोधनं पात्रस्थापनम् अग्निप्रज्वालनम् इत्यादयः। तेषु यः प्रथमावयवः कल्पितः स यदि कृतः अस्ति किञ्च अन्तिमः अवयवः यथा अग्निनिर्वापः अथवा पात्रस्य अवनामः इति यदि एतावता न कृतः तर्हि पाकक्रिया वर्तमानकालिकी क्रिया।

धातोः अर्थः व्यापारः फलं चेति उक्तमेव। यस्य धातोः अर्थः व्यापारः अर्थात् क्रिया वर्तमानकाले वर्तते स धातुः वर्तमानक्रियावृत्तिः कथ्यते। वर्तमाने (काले) क्रियायाः वृत्तिः यस्य स

वर्तमानक्रियावृत्तिः धातुः। यदि वर्तमाने काले क्रिया वर्तते इति प्रकटनस्य विवक्षा अस्ति तर्हि धातोः लट् विधीयते।

एवं सूत्रस्य निष्कृष्टार्थः भवति - वर्तमानक्रियावृत्तित्वविवक्षायां धातोः लट् भवति।

लट् इत्यस्य टकारस्य हलन्त्यम् (१.३.३) इति सूत्रेण एवञ्च अकारस्य उपदेशेऽजनुनासिक इत् (१.३.२) इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इत्यनेन तयोः लोपः भवति। लशक्वतद्धिते (१.३.८) इति सूत्रेण लस्य इत्-संज्ञा प्राप्ता। किन्तु लस्यापि यदि इत्-संज्ञा स्यात् तर्हि तस्य लोपः इति सूत्रेण लकारस्य लोपः प्रसज्येत। तदा तु लट् इति समग्रस्य उच्चारणम् व्यर्थताम् आपद्येत। परन्तु पाणिनिमुनेः किमपि उच्चारणं न व्यर्थम्। अतः उच्चारणसामर्थ्यात् लस्य इत्संज्ञा न भवति।

उदाहरणम् - पाणिनिमुनिप्रणीते धातुपाठे भू इति आद्यः धातुः। तस्य अर्थः सत्ता उत्पत्तिः च। सत्ता हि आत्मधारणम् तदनुकूलः व्यापारश्च। वर्षा भवति इति उदाहरणम्। यदा वर्षायाः अर्थात् वृष्टेः वर्षणरूपः व्यापारः वर्तमाने काले वर्तते, प्रवर्तते इति विवक्षा अस्ति तर्हि भूधातुतः लट् लकारः विधीयते वर्तमाने लट् इति सूत्रेण। भूधातुः अकर्मकः। अतः तस्मात् परं लकारः कर्तरि भावे च भवितुम् अर्हति। तदा कस्मिन्नर्थे लकारः विधेयः इत्यत्र विवक्षा एव नियामिका। अत्र दशगणी इति प्रकरणे सदा कर्तरि एव लकारः विधीयते प्रदर्श्यते च। कर्मणि भावे च विधानार्थम् अग्रे भावकर्मप्रकरणम् अस्ति। अतः अत्र भूधातुतः लट् लकारः कर्तरि विधीयते।

लट् इति लकारे अकारटकारौ इत्संज्ञकौ इति उक्तमेव। पाणिनिमुनिः लट् इति सूत्रे उच्चारितवान्। अतः लट् उपदेशः। धातोः उत्तरम् लटः योजनकाले एव अकारटकारयोः लोपः कर्तव्यः। तेन भू ल् इति स्थितिः जायते। कदापि भू लट् इति स्थितिः न प्रकटनीया।

कालादिविचारः -

कालस्य वर्तमानकालः भविष्यत्कालः भूतकालः चेति विभागत्रयं भवति। भविष्यत्कालस्य अद्यतनभविष्यत्कालः अनद्यतनभविष्यत्कालः इति प्रकारद्वयम्। भूतकालस्यापि अद्यतनभूतकालः अनद्यभूतकालः इति प्रकारद्वयम्। सर्वा अपि भविष्यत्कालिकाः क्रियाः भूते वर्तमाने वा इन्द्रियगोचराः न भवन्ति। अतः भविष्यत्कालिकाः क्रियाः परोक्षाः एव भवन्ति वर्तमानक्षणे। भूतकालिकाः काश्चन क्रिया वक्तुः इन्द्रियगोचराः भवन्ति। काश्चन च न भवन्ति। यासाम् क्रियाणाम् वक्ता इन्द्रियार्थसन्निकर्षवशात् स्वयम् अनुभवं करोति ताः क्रियाः प्रत्यक्षाः। यासां न करोति ताः क्रियाः परोक्षाः। अनद्यतनभूतकालिका परोक्षा क्रिया प्रकटनीया चेत् तद्वाचकाद् धातोः लिट् लकारः विधीयते। अनद्यतनभूतकालिका क्रिया प्रकटनीया चेत् तद्वाचकाद् धातोः लङ् लकारः प्रयुज्यते। अतीतकालिका कापि क्रिया प्रकटनीया चेत् तद्वाचकाद् धातोः लुङ् लकारः विधीयते। यदि अद्यतनभविष्यत्काकिला क्रिया प्रकटनीया तर्हि लृट् लकारः प्रयोक्तव्यः। यदि अनद्यतनभविष्यत्कालिका क्रिया प्रकटनीया तर्हि तद्वाचकाद् धातोः लुट् लकारः प्रयुज्यते।

समेषामपि लकाराणां कालवाचकाः प्रेरणादिवाचकाः इति भागद्वयं भवति। लट् लिट् लुट् लृट् लङ् लुङ् लृङ् चेति लकाराः कालवाचकाः। लोट् लिङ् चेति लकारद्वयं प्रेरणादिवाचकम्। तत्र लट्

वर्तमानकालस्य वाचकः। लिट् लङ् लुङ् चेति भूतकालस्य वाचकाः। लुट् लृट् चेति भविष्यत्कालस्य वाचकौ। लृङ् क्रियायाः अनिष्पत्तौ प्रयुज्यते भूते भाविनि च काले।

एते एव विभागाः संक्षेपेण अधः तालिकायां प्रदर्शिताः सन्ति।

<table>
<tr><td colspan="3">भूतकालः</td><td rowspan="2">वर्तमान-
कालः</td><td colspan="3">भविष्यत्-कालः</td></tr>
<tr><td>अनद्यतन-
परोक्ष – लिट्
लङ्</td><td>गतरात्रौ १२
वादनम्</td><td>अद्यतन-
लुङ्
सर्वभूते</td><td>लट्</td><td>अद्यतन-
लृट्</td><td>आगामिरात्रौ
१२ वादनम्</td><td>अनद्यतन-
लुट्</td></tr>
</table>

लकाराणां कदा कस्मिन्नर्थे प्रयोगः इति प्रकाशिके कारिके -

वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः।।

ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः।।

इत्थम् भूधातोः कर्तृविवक्षायाम् वर्तमाने लट् इति सूत्रेण लटि अनुबन्धलोपे भू-ल् इति स्थितिः जायते। तदा - (अग्रिमे सूत्रे द्रष्टव्यम्।)

पाठगतप्रश्नाः-१

१. लः कर्मणि चेति सूत्रे वाक्यद्वयं किम्।

२. सकर्मकधातोः लक्षणं किम्।

३. अकर्मकधातोः लक्षणं किम्।

४. कति लकाराः।

५. कति टित्लकाराः।

६. कति ङित्लकाराः।

७. कः लकारः वेदे एव प्रयुज्यते।

८. कः धातुः वर्तमानक्रियावृत्तिः कथ्यते।

९. धातुपाठे प्रथमः धातुः कः।

१०. यद्धात्वर्थः व्यापारः वर्तमानकाले वर्तते इति प्रकटनाय तद्धातोः परं कः लकारः विधीयते। केन च सूत्रेण।

[१२.३] तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातञ्झ-थासाथांध्वम्-इड्वहिमहिङ्॥ (३.४.७८)

सूत्रार्थः - तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति एते अष्टादश लस्य स्थाने आदेशाः स्युः।

सूत्रव्याख्या - सूत्रमिदम् विधिसूत्रम्। अस्मिन् सूत्रे एकमेव पदमस्ति। तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति प्रथमान्तं पदम्। अस्मिन् पदे १८ शब्दस्वरूपाणि सन्ति। अत्र समाहारद्वन्द्वसमासः। अतः एकवचनम् अस्ति। लस्य इति षष्ठ्यन्तम् पदम् अधिकृतमस्ति। स्थानषष्ठी इयम्। अतः लकारस्य स्थाने इति अर्थो लभ्यते। ततश्च सूत्रार्थः भवति - तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति एते अष्टादश लस्य स्थाने आदेशाः स्युः इति। सूत्रमिदम् प्रत्ययाधिकारे पठितम्। तस्मात् एतानि शब्दस्वरूपाणि प्रत्ययसंज्ञकानि भवन्ति। स्थाने यो विधीयमानः स आदेशः कथ्यते। अतः एते १८ आदेशाः इति सन्ति। एवञ्च एते लकारस्य स्थाने विधीयन्ते। अतः एते लादेशाः कथ्यन्ते। महिङ् इति अन्तिमप्रत्ययस्य ङ् इत्यनेन सह तिप् इति प्रथमप्रत्ययस्य ति इति उच्चार्यमाणः तिङ् इति प्रत्याहारः भवति। स सर्वेषाम् १८ प्रत्ययानाम् बोधको भवति। अयमेव तिङ् अन्ते यस्य तत् तिङन्तं पदं भवति।

उदाहरणम् - भू ल् इति स्थितिः पूर्वम् वर्णिता। अत्र लस्य स्थाने १८ आदेशाः प्रकृतसूत्रेण विधीयन्ते। ते च धातोः अव्यवहितपरम् एव निवेशनीयाः। भूधातोः परम् लस्य स्थाने एकदा एक एव आदेशः निवेशयितुं शक्यः। एककालं १८ प्रत्ययाः किञ्च अव्यवहितपराः इति नैव सम्भवति। अतः युगपत् १८ प्रत्ययाः प्रयोक्तुं न शक्यन्ते, परन्तु एकैकः पर्यायेण प्रयोक्तुं शक्यते। तदा कः प्रत्ययः कस्मै प्रयोजनाय प्रयोक्तव्यः इति विवेकाय अग्रिमाणि सूत्राणि आयान्ति।

[१२.४] लः परस्मैपदम्॥ (१.४.९८)

सूत्रार्थः - लादेशाः परस्मैपदसंज्ञाः स्युः।

सूत्रव्याख्या - संज्ञासूत्रमिदम्। अस्मिन् द्वे पदे स्तः। लः (६/१), परस्मैपदम् (१/१)। लः इति सम्बन्धस्य अनुयोगिविरहात् स्थानषष्ठी। तेन लस्य स्थाने इति लभ्यते। स्थाने आदेशाः भवन्ति। अतः आदेशाः इति पदस्य अध्याहारः क्रियते। सूत्रार्थो भवति - लादेशाः परस्मैपदसंज्ञाः भवन्ति इति। अर्थात् लस्य स्थाने तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातञ्झ-थासाथांध्वम्-इड्वहिमहिङ्। (३.४.७८) इति सूत्रेण प्राप्ताः १८ आदेशाः परस्मैपदसंज्ञां लभन्ते।

[१२.५] तङानावात्मनेपदम्॥ (१.४.९९)

सूत्रार्थः - तङ्-प्रत्याहारः शानच्-कानचौ च आत्मनेपदसंज्ञाः स्युः।

सूत्रव्याख्या - संज्ञासूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। तङानौ (१/२), आत्मनेपदम् (१/१)। लः परस्मैपदम् इति सूत्रात् लः इति षष्ठ्येकवचनान्तं पदम् अनुवर्तते। लः इति स्थानषष्ठी। अतः लस्य स्थाने इति अर्थः लभ्यते।

तङ् च आनः च तङानौ इति इतरेतरयोगद्वन्द्वसमासः। तङ् इति प्रत्याहारः। तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातञ्झ-थासाथांध्वम्-इड्वहिमहिङ्। (३.४.७८) इति सूत्रे तातञ्झ इति अत्र त आताम् झ इति छेदः। अत्र त इति प्रत्ययः अस्ति। स महिङ् इति अन्तिमप्रत्ययस्य अन्त्येन इता ङकारेण सह उच्चारितः चेत् तङ् इति प्रत्याहारः निष्पद्यते। तस्य अर्थः - त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति नव प्रत्ययाः।

आनः इति पदे आन इत्यंशः वर्तते। तदात्मकः यः प्रत्ययः सः आन इति शब्देन बोध्यः। व्याकरणे शानच् कानच् चानश् इति त्रयः प्रत्ययाः सन्ति। एषु आन इत्यंशः अस्ति। तत्र शानच् कानच् इति एतौ एव धातोः विधीयेते। चानश् तद्धितप्रत्ययः, अतः धातोः न विधीयते। स लस्य स्थाने न विधीयते। शानच् कानच् एतौ एव लस्य स्थाने विधीयेते। अतः आन इत्यनेन शानच् कानच् इति एतौ अत्र गृह्येते। परन्तु सूत्रे आन इति उक्तम्। अत्र प्रत्ययः तु शानच् कानच् चेति। कथम् आन इत्यनेन अनयोः ग्रहणम्। तत्रोच्यते यद् आन इति अनुबन्धरहितम् उच्चारणम्। यदा अनुबन्धरहितस्य उच्चारणं क्रियते तदा तेन अनुबन्धसहितस्य ग्रहणं कर्तव्यमिति। तथाहि परिभाषा - निरनुबन्धकग्रहणे सानुबन्धकस्य इति।

सूत्रार्थो भवति - लस्य स्थाने जायमानः तङ् प्रत्याहारः शानच्-कानचौ च आत्मनेपदसंज्ञाः स्युः। तिङ्-प्रत्याहारे तङ् अन्तर्भवति। तिङाम् परस्मैपदसंज्ञा विहिता एव। तेषु नवानाम् तङाम् अनेन प्रकृतसूत्रेण आत्मनेपदसंज्ञा प्राप्ता। आकडारादेका संज्ञा इति अधिकारे एतानि सूत्राणि। अतः पूर्वसंज्ञां बाधित्वा प्रकृतसूत्रेण तङः आत्मनेपदसंज्ञा विधीयते। एवञ्च पारिशेष्यात् तिप् तस् झि सिप् थस् थ मिप् वस् मस् इति एतेषां नवानां परस्मैपदसंज्ञा। त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति नवानाम् एवञ्च शानच् कानच् इति एतयोः च आत्मनेपदसंज्ञा फलति।

या या संज्ञा सा सा फलवती। अतः कृतानाम् आत्मनेपदादिसंज्ञानां किम् फलमिति निर्णयाय अग्रिमाणि त्रीणि सूत्राणि आयान्ति।

पाठगतप्रश्नाः-२

११. लादेशाः कति के च।

१२. केषां परस्मैपदसंज्ञा।

१३. केषाम् आत्मनेपदसंज्ञा।

१४. परस्मैपदसंज्ञाविधायकं सूत्रं किम्।

१५. आत्मनेपदसंज्ञाविधायकं सूत्रं किम्।

१६. निरनुबन्धकग्रहणे सानुबन्धकस्य इति परिभाषार्थः कः।

[१२.६] अनुदात्तङित आत्मनेपदम्॥ (१.३.१२)

सूत्रार्थः - अनुदात्तेतो ङितश्च धातोः आत्मनेपदं स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। इदं सूत्रम् आत्मनेपदसंज्ञकानाम् प्रत्ययानाम् धातोः विधानं करोति। अस्मिन् सूत्रे द्वे पदे स्तः। अनुदात्तङितः आत्मनेपदम् इति सूत्रगतपदच्छेदः। अनुदात्तङितः (५/१), आत्मनेपदम् (१/१)। भूवादयो धातवः इति सूत्रात् धातवः इति पदम् अनुवर्तते। तस्य पञ्चम्यन्ततया विपरिणामो भवति। तेन धातोः इति लभ्यते। अनुदात्तश्च ङ् च इति अनुदात्तङौ इति इतरेतरयोगद्वन्द्वसमासः। अनदात्तङौ इतौ यस्य सः अनुदात्तङित्। तस्य अनुदात्तङितः इति। **द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते** इति नियमः। अर्थात् द्वन्द्वसमासस्य आदौ मध्ये अन्ते वा विद्यमानम् द्वन्द्वसमासस्य अनङ्गभूतम् पदम् द्वन्द्वसमासे विद्यमानैः पदैः प्रत्येकम् अभिसम्बध्यते, अन्वेति इति। इत् इति पदं द्वन्द्वसमासस्य अवयवः नास्ति, किन्तु द्वन्द्वसमासस्य अन्ते अस्ति। अतः तस्य अनुदात्त इति ङ् इति द्वाभ्याम् शब्दाभ्याम् अभिसम्बन्धः अर्थात् अन्वयः भवति। एवञ्च अनुदात्तेत् इति ङित् इति च निष्पद्यते। लस्य स्थाने तिङ् विधीयते। आत्मनेपदम् तिङ् एव। अतः लस्य इति षष्ठ्येकवचनान्तं पदम् आक्षिप्यते। तदा पदयोजना - अनुदात्तेतः ङितः च धातोः लस्य आत्मनेपदम् इति। सूत्रार्थो भवति - अनुदात्तेतो ङितश्च धातोः लस्य स्थाने आत्मनेपदं विधेयम्। अर्थात् यस्य धातोः अनुदात्तः अच् इत् अस्ति सः अनुदात्तेत्, यस्य धातोः ङकारः इत् अस्ति स ङित्। एवम् अनुदात्तेत् ङित् यदि धातुः स्यात् तर्हि तस्मात् परस्य लस्य स्थाने आत्मनेपदनामकाः प्रत्ययाः आदेशत्वेन विधेयाः इति।

उदाहरणम् - एधँ वृद्धौ। कमुँ कान्तौ। यतीँ प्रयत्ने इत्यादयः अनुदात्तेतः धातवः। शीङ् स्वप्ने इत्यादयः ङितः धातवः। अनुदात्तेत्त्वम् ङित्त्वम् इति ईदृशानि आत्मनेपदविधानस्य धातौ विद्यमानानि निमित्तानि। ईदृशधातोः आत्मनेपदनामकाः प्रत्ययाः विधेयाः।

[१२.७] स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ (१.३.७२)

सूत्रार्थः - स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण आत्मनेपदं विधीयते। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। स्वरितञितः (५/१), कर्त्रभिप्राये क्रियाफले चेति पदद्वयं सप्तम्यन्तम्।

अनुदात्तङित आत्मनेपदम् इति सूत्रात् आत्मनेपदम् इति पदमनुवर्तते। भूवादयो धातवः इति सूत्रात् धातवः इति पदम् अनुवर्तते। तस्य पञ्चम्यन्ततया विपरिणामो भवति। तेन धातोः इति लभ्यते।

स्वरितः च ञ् च इति स्वरितञौ इति इतरेतरयोगद्वन्द्वसमासः। स्वरितञौ इतौ यस्य स स्वरितञित् इति बहुव्रीहिसमासः। तस्य स्वरितञितः इति। **द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते** इति नियमः। अर्थात् द्वन्द्वसमासस्य आदौ मध्ये अन्ते वा विद्यमानम् द्वन्द्वसमासस्य अनवयवभूतम् पदम् द्वन्द्वसमासे विद्यमानैः पदैः प्रत्येकम् अभिसम्बध्यते, अन्वेति इति। इत् इति पदं द्वन्द्वसमासस्य अवयवः नास्ति, किन्तु द्वन्द्वसमासस्य अन्ते अस्ति। अतः तस्य स्वरित इति ञ् इति द्वाभ्याम् शब्दाभ्याम् अभिसम्बन्धः अर्थात् अन्वयः भवति। एवञ्च स्वरितेत् इति ञित् इति च निष्पद्यते।

कर्तारम् अभिप्रैति (गच्छति) इति कर्त्रभिप्रायम्(फलम्)। तस्मिन् कर्त्रभिप्राये। क्रियायाः फलं क्रियाफलम्। तस्मिन् क्रियाफले इति षष्ठीतत्पुरुषः समासः। पदयोजना भवति - स्वरितेतः ञितः धातोः आत्मनेपदं भवति कर्त्रभिप्राये क्रियाफले। क्रियायाः फलं कर्ता प्राप्नोति चेत् ईदृशधातोः आत्मनेपदं विधेयम्। अत्र क्रियायाः व्यापारः फलं चेति अर्थद्वयमिति उक्तमेव। परन्तु इदं फलं नात्र अभिप्रेतम्। यतः अस्य फलस्याश्रयः कर्म इति उच्यते। यदि इदं फलं कर्तारं गच्छेत् तर्हि कर्तुः कर्मसंज्ञापत्तिः। अतः यत् प्रयोजनम् उद्दिश्य क्रिया आरभ्यते तत् फलमेवात्र फलपदेन ग्राह्यम्। यथा स्वर्गादिलाभाय यागः आरभ्यते। परन्तु पुरोहितः तु दक्षिणालाभाय यागं करोति। यजमानस्य स्वर्गः फलम्। पुरोहितस्य दक्षिणा फलम्। अत्र स्वर्गः एव फलम् अत्र फलपदेन ग्राह्यम्। अत्र स्वर्गः एव फलम् यदि यज्ञकर्तारं प्रति गच्छति तर्हि इदं कर्त्रभिप्रायं क्रियाफलम्। एवं सति यज्-धातोः आत्मनेपदस्य विधानं भवति।

लस्य स्थाने तिङ् विधीयते। आत्मनेपदम् तिङ् एव। अतः लस्य इति षष्ठ्येकवचनान्तं पदम् आक्षिप्यते। सूत्रार्थो भवति - स्वरितेतः ञितः च धातोः लस्य स्थाने आत्मनेपदं विधेयम् कर्तृगामिनि क्रियाफले। अर्थात् यस्य धातोः स्वरितः अच् इत् अस्ति सः स्वरितेत्, यस्य धातोः ञकारः इत् अस्ति स ञित्। एवम् स्वरितेत् ञित् वा यदि धातुः स्यात् तर्हि तस्मात् परस्य लस्य स्थाने आत्मनेपदनामकाः प्रत्ययाः आदेशत्वेन विधेयाः इति यदि क्रियायाः फलं कर्ता प्राप्नोति।

उदाहरणम् - डुपचँस् पाके, यजँ देवपूजासंगतिकरणदानेषु इत्यादयः स्वरितेतः धातवः। डुकृञ् करणे णीञ् प्रापणे इत्यादयः ञितः धातवः। यजँ इत्यत्र अँकारः अनुनासिकः। अतः उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञकः भवति। स च अँकारः स्वरितः अपि अस्ति। अतः यजधातुः स्वरितेत्। एवमन्यत्रापि। ईदृशानि आत्मनेपदविधानस्य धातौ विद्यमानानि निमित्तानि। ईदृशधातोः आत्मनेपदनामकाः प्रत्ययाः विधेयाः।

[१२.८] शेषात् कर्तरि परस्मैपदम्॥ (१.३.७८)

सूत्रार्थः - आत्मनेपदनिमित्तहीनाद् धातोः कर्तरि परस्मैपदं स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण परस्मैपदस्य विधिः क्रियते। अस्मिन् त्रीणि पदानि सन्ति। शेषात् कर्तरि परस्मैपदम् इति सूत्रगतपदच्छेदः। शेषात् (५/१), कर्तरि (७/१), परस्मैपदम् (१/१)। उक्ताद् अन्यः शेषः। किं किम् उक्तम्। आत्मनेपदप्रत्ययस्य विधानस्य निमित्तानि उक्तानि। अनुदात्तङित आत्मनेपदम् (१.३.१२) इति सूत्रम् आरभ्य विभाषोपपदेन प्रतीयमाने (१.३.७७) इति सूत्रं यावत् आत्मनेपदप्रत्ययविधानस्य बहूनि निमित्तानि उक्तानि। तानि निमित्तानि यस्य धातोः न सन्ति स

धातुः आत्मनेपदनिमित्तेन हीनः। स एव शेषः। एवञ्च आत्मनेपदनिमित्तहीनाद् धातोः परस्मैपदसंज्ञकः तिङ् विधीयते। परस्मैपदम् तिङ् एव। अतः लस्य इति षष्ठ्येकवचनान्तं पदम् आक्षिप्यते। एवञ्च ईदृशात् आत्मनेपदनिमित्तहीनाद् धातोः लस्य स्थाने कर्त्रर्थे परस्मैपदस्य विधानं प्रकृतं सूत्रं करोति। तथाहि सूत्रार्थः - आत्मनेपदनिमित्तहीनाद् धातोः परस्य लस्य स्थाने कर्तरि परस्मैपदं स्यात्।

उदाहरणम् - भू इति धातौ आत्मनेपदस्य किमपि निमित्तं नास्ति। अतः भूधातुः आत्मनेपदनिमित्तहीनः। अतः शेषः। अत एव भूधातोः परस्य लस्य स्थाने परस्मैपदं कर्त्रर्थे विधीयते।

अत्र धातोः परं लस्य स्थाने ९ परस्मैपदसंज्ञकाः आदेशाः प्रकृतसूत्रेण विधीयन्ते। ते च अव्यवहितपरम् एव निवेशनीयाः। धातोः परम् लस्य स्थाने एकदा एक एव आदेशः निवेशयितुं शक्यः। एककालं ९ प्रत्ययाः किञ्च अव्यवहितपराः इति नैव सम्भवति। अतः युगपत् ९ प्रत्ययाः प्रयोक्तुं न शक्यन्ते। परन्तु एकैकः पर्यायेण प्रयोक्तुं शक्यते। तदा कः प्रत्ययः कस्मै प्रयोजनाय प्रयोक्तव्यः इति विवेकाय अग्रिमाणि सूत्राणि आयान्ति।

[१२.९] तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः॥ (१.४.१००)

सूत्रार्थः - तिङः आत्मनेपद-परस्मैपदयोः त्रयः त्रिकाः क्रमाद् प्रथममध्यमोत्तमसंज्ञाः स्युः।

सूत्रव्याख्या - संज्ञासूत्रम्। अनेन सूत्रेण प्रथमः मध्यमः उत्तमः इति संज्ञात्रयं विधीयते। अत्र सूत्रे चत्वारि पदानि सन्ति। तिङः त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति सूत्रगतपदच्छेदः। तिङः (६/१), त्रीणि (१/३), त्रीणि (१/३), प्रथममध्यमोत्तमाः (१/३)। लः परस्मैपदम् इति सूत्रात् परस्मैपदम् इति प्रथमान्तं पदमनुवर्तते। षष्ठ्यन्ततया च विपरिणमते। तङानावात्मनेपदम् इति सूत्रात् आत्मनेपदमिति पदमनुवर्तते। षष्ठ्यन्ततया च विपरिणमते। प्रथमः च मध्यमः च उत्तमः चेति प्रथममध्यमोत्तमाः इति इतरेतरयोगद्वन्द्वसमासः। तदा पदयोजना भवति - तिङः परस्मैपदस्य आत्मनेपदस्य त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति।

परस्मैपदस्य त्रयाणां प्रत्ययानाम् एकम् दलम् इति क्रमेण त्रीणि दलानि भवन्ति। प्रथमः मध्यमः उत्तमः इति संज्ञाः तिस्रः सन्ति। अतः येषां संज्ञा कर्तव्या ते त्रयः सन्ति, संज्ञाः च तिस्रः सन्ति। अतः यथासंख्यमनुदेशः समानाम् इति परिभाषया प्रथमदलस्य प्रथमः इति संज्ञा। द्वितीयदलस्य मध्यमः इति संज्ञा। तृतीयदलस्य उत्तमः इति संज्ञा। तथा च – तिप् तस् झि इत्यस्य प्रथम इति संज्ञा। सिप् थस् थ इत्यस्य मध्यमः इति संज्ञा। मिप् वस् मस् इति दलस्य उत्तमः इति संज्ञा।

आत्मनेपदस्यापि त्रयाणां प्रत्ययानाम् एकमिति दलम् इति क्रमेण त्रीणि दलानि भवन्ति। प्रथमः मध्यमः उत्तमः इति संज्ञाः तिस्रः सन्ति। अतः येषां संज्ञा कर्तव्या ते त्रयः सन्ति, संज्ञाः च तिस्रः सन्ति। अतः यथासंख्यमनुदेशः समानाम् इति परिभाषया प्रथमदलस्य प्रथमः इति संज्ञा। द्वितीयदलस्य मध्यमः इति संज्ञा। तृतीयदलस्य उत्तमः इति संज्ञा। तथा च – त आताम् झ इति दलस्य प्रथम इति संज्ञा। थास् आथाम् ध्वम् इति दलस्य मध्यमः इति संज्ञा। इट् वहि महिङ् इति दलस्य उत्तमः इति संज्ञा।

अधः चतुरश्रे संज्ञाविभागः प्रदर्शितः।

दलम्	परस्मैपदम्			आत्मनेपदम्			संज्ञा
प्रथमदलम्	तिप्	तस्	झि	त	आताम्	झ	प्रथमः
द्वितीयदलम्	सिप्	थस्	थ	थास्	आथाम्	ध्वम्	मध्यमः
तृतीयदलम्	मिप्	वस्	मस्	इट्	वहि	महिङ्	उत्तमः

[१२.१०] तान्येकवचनद्विवचनबहुवचनान्येकशः॥ (१.४.१०१)

सूत्रार्थः - प्रथममध्यमोत्तमसंज्ञानि तिङः त्रीणि त्रीणि वचनानि प्रत्येकम् एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु संज्ञासूत्रमिदम्। अनेन सूत्रेण प्रथममध्यमोत्तमानाम् प्रत्ययानाम् प्रत्येकम् एकवचनद्विवचनबहुवचनसंज्ञाः विधीयन्ते। सूत्रेऽस्मिन् पदत्रयं विद्यते। तानि (१/३), एकवचनद्विवचनबहुवचनानि (१/३) एकवचनम्, द्विवचनम्, बहुवचनञ्चेति एकवचनद्विवचनबहुवचनानि इति इतरेतरयोगद्वन्द्वसमासः। एकशः इति च अव्ययम्। एकशः इत्यस्य प्रत्येकमित्यर्थः। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति सूत्रात् तिङः इति षष्ठ्येकवचनान्तं पदम्, त्रीणि त्रीणि इति प्रथमाबहुवचनान्ते द्वे पदे अनुवर्तन्ते। सूत्रस्थेन तानि इति शब्देन तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति पूर्वसूत्रस्थानि त्रीणि त्रीणि परामृश्यन्ते। तानि त्रीणि त्रीणि दलानि इति आहत्य षट् दलानि सन्ति। प्रति दलम् विद्यमानेषु त्रिषु घटकेषु एकैकस्य क्रमशः एकवचनम् द्विवचनं बहुवचनं चेति संज्ञाः भवन्ति।

तथा चायं सारः -

परस्मैपदस्य प्रथमं दलम् तिप् तस् झि। एषु तिप् इत्यस्य एकवचनम्, तस् इत्यस्य द्विवचनम्, झि इत्यस्य बहुवचनम् च संज्ञा भवति।

तिङः त्रीणि त्रीणि इत्यत्र त्रीणि इति पदस्य वारद्वयं ग्रहणेन परस्मैपदस्य तथा आत्मनेपदस्य तिङः उभयोः पदयोः ग्रहणं भवति। एवमग्रेऽपि।

कस्य का संज्ञा फलति इति अधः चतुरश्रे प्रदर्शितमस्ति।

	परस्मैपदम्			आत्मनेपदम्			
	एकवचन	द्विवचन	बहुवचन	एकवचन	द्विवचन	बहुवचन	संज्ञा
प्रथमदलम्	तिप्	तस्	झि	त	आताम्	झ	प्रथमः
द्वितीयदलम्	सिप्	थस्	थ	थास्	आथाम्	ध्वम्	मध्यमः
तृतीयदलम्	मिप्	वस्	मस्	इट्	वहि	महिङ्	उत्तमः

पाठगतप्रश्नाः-३

१७. अनुदात्तेतो धातोः कः तिङ् विधीयते।

१८. ङितो धातोः कः तिङ् विधीयते।

१९. आत्मनेपदविधानस्य निमित्तानि किन्निष्ठानि भ्वादिप्रकरणे।

२०. द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इत्यस्यार्थं लिखत।

२१. आत्मनेपदं कस्य स्थाने विधीयते।

२२. आत्मनेपदविधानस्य निमित्तानि कानि भ्वादिप्रकरणे।

२३. ञितो धातोः आत्मनेपदं कदा विधीयते।

२४. अनुदात्तेतो धातोः उदाहरणम् किम्।

२५. शेषात् कर्तरि परस्मैपदमित्यत्र कः शेषपदार्थः।

२६. प्रथमसंज्ञाविधायकं सूत्रं किम्।

२७. तिङाम् एकवचनादिसंज्ञा केन सूत्रेण।

[१२.११] युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः॥ (१.४.१०४)

सूत्रार्थः - लकारवाच्यकारकवाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण मध्यमः विधीयते। अस्मिन् सूत्रे षट् पदानि सन्ति। युष्मदि (७/१), उपपदे (७/१), समानाधिकरणे (७/१) स्थानिनि (७/१), अपि (अव्ययम्), मध्यमः (१/१)। उप समीपे उच्चारितं पदम् उपपदम्। तस्मिन् उपपदे, समीपोच्चारिते इति तदर्थः। समानम् अधिकरणम् (वाच्यम्) यस्य तत् समानाधिकरणम्। तस्मिन् समानाधिकरणे। समानार्थके इति तदर्थः। स्थानं प्रसङ्गः। सोऽस्ति अस्य इति स्थानी, तस्मिन् स्थानिनि। अस्य च अप्रयुज्यमाने इत्यर्थः। सूत्रे विद्यमानेन अपिपदेन प्रयुज्यमाने इति अर्थो लभ्यते। लः परस्मैपदम् इति सूत्रात् लः इति षष्ठ्यन्तम् पदमनुवर्तते। ततः सूत्रार्थो भवति - लकारसामानार्थके समीपोच्चारिते प्रयुज्यमाने अप्रयुज्यमाने वा युष्मदि लस्य स्थाने मध्यमः भवति।

इदमत्र स्पष्टीकरणम् -

लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण धातोः लकारः विहितः। एवञ्च क्रमशः वर्तमाने लट् इति सूत्रेण लट् विहितः। तदा भू ल् इति स्थितिः उत्पन्ना। अत्र लकारः विवक्षातः कर्तरि विहितः इत्यपि शेषात् कर्तरि परस्मैपदम् इत्यनेनापि स्पष्टम्। लकारस्य स्थाने यः तिङ् विधेयः अस्ति सोऽपि लकारवत् कर्तरि एव भविष्यति। अतः इदं स्पष्टं यत् तिङ् कर्तरि विधास्यते। अतः लस्य (तिङः) वाच्यम् कारकम् कर्तृकारकमिति स्पष्टम्। भूधातोः प्रयोगः यस्मिन् वाक्ये भविष्यति तस्मिन् यदि युष्मद् इति सर्वनाम्नः प्रयोगः कर्तृकारके अर्थात् युष्मदः वाच्यः कर्ता स्यात्। तदा भूधातुतः मध्यमसंज्ञकः तिङ् विधेयः इत्यर्थः।

एवं वाक्ये प्रयुक्तस्य युष्मदः वाच्यं कारकम्, एवञ्च धातोः परं विहितस्य लकारस्य वाच्यं कारकं यदि समानं स्यात् तर्हि धातोः परं मध्यमसंज्ञकः प्रत्ययः विधेयः इति सूत्रार्थः। युष्मदः वाच्यम् एव लस्य वाच्यम् इत्यस्य अर्थः युष्मदः यदधिकरणम् (अर्थः, वाच्यम्) तदेव अधिकरणं लस्यापि अस्ति। अर्थात् युष्मद् लस्य समानाधिकरणः अस्ति। तयोः सामानाधिकरण्यम् अस्ति। तयोः वाच्यं कारकं समानम् अस्ति। द्वयोः अर्थः समानः। अतः युष्मद् लकारसमानार्थकः अस्ति। तदा मध्यमसंज्ञकाः सिप् थस् थ इति परस्मैपदिनः, थास् आथाम् ध्वम् इति आत्मेनपदिनः विधेयाः इत्यर्थः। एवञ्च यदि युष्मदः साक्षात् उल्लेखः वाक्ये अस्तु अथवा साक्षाद् उल्लेखः मास्तु, परन्तु तदर्थः प्रतीयते तदापि मध्यमः विधीयते।

उदाहरणम् - त्वं खादसि।

सूत्रार्थसमन्वयः - यथा - त्वम् खाद् ल् इति वाक्यं कर्तव्यम् अस्ति। अत्र लकारः कर्तरि विवक्षितः अस्ति। युष्मदः रूपम् त्वम् इत्यस्य अर्थः अपि कर्ता एव विवक्षितः। युष्मदः लस्य च सामानाधिकरण्यम् अस्ति। अतः लस्य स्थाने मध्यमसंज्ञकः प्रत्ययः विधेयः। तदा त्वं खादसि इति वाक्यं स्यात्।

एवञ्च – (युष्मद्) खाद् ल् इति वाक्यं कर्तव्यम् अस्ति। अत्र लकारः कर्मणि विवक्षितः अस्ति। युष्मदः रूपम् प्रयोक्तव्यम् अस्ति। तस्य अर्थः अपि कर्ता एव विवक्षितः। द्वयोः अर्थः भिन्नः। इत्थं युष्मदः लस्य च सामानाधिकरण्यम् नास्ति। अतः लस्य स्थाने मध्यमसंज्ञकः प्रत्ययः विधातुं न शक्यते।

[१२.१२] अस्मद्युत्तमः॥ (१.४.१०६)

सूत्रार्थः - अस्मद् लकारसमानाधिकरणः चेत् अस्मदि प्रयुज्यमानेऽप्रयुज्यमाने च उत्तमः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण उत्तमः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अस्मदि (७/१), उत्तमः (१/१)। युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इति सूत्रात् उपपदे (७/१), समानाधिकरणे (७/१) स्थानिनि (७/१), अपि (अव्ययम्) इति एतानि पदानि अनुवर्तन्ते। उप समीपे उच्चारितं पदम् उपपदम्। तस्मिन् उपपदे, समीपोच्चारिते इति तदर्थः। समानम् अधिकरणम् (वाच्यम्) यस्य तत् समानाधिकरणम्। तस्मिन् समानाधिकरणे। समानार्थके इति तदर्थः। स्थानं प्रसङ्गः।

सोऽस्ति अस्य इति स्थानी, तस्मिन् स्थानिनि। अस्य च अप्रयुज्यमाने इत्यर्थः। सूत्रे विद्यमानेन अपिपदेन प्रयुज्यमाने इति अर्थो लभ्यते। लः परस्मैपदम् इति सूत्रात् लः इति षष्ठ्यन्तम् पदमनुवर्तते। ततः सूत्रार्थो भवति - लकारसामानार्थके समीपोच्चारिते प्रयुज्यमाने अप्रयुज्यमाने वा अस्मदि लस्य स्थाने उत्तमः भवति।

सूत्रार्थस्पष्टीकरणम् -

लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण धातोः लकारः विधीयते। एवञ्च क्रमशः वर्तमाने लट् इति सूत्रेण लट् विधीयते। तदा भू ल् इति एवं स्थितिः उत्पन्ना। अत्र लकारः विवक्षातः कर्तरि विहितः इत्यपि शेषात् कर्तरि परस्मैपदम् इत्यनेनापि स्पष्टम्। अतः लस्य (तिङः) वाच्यम् कारकम् कर्तृकारकमिति स्पष्टम्। भूधातोः प्रयोगः यस्मिन् वाक्ये भविष्यति तस्मिन् यदि अस्मद् इति सर्वनाम्नः प्रयोगः कर्तृकारके अर्थात् अस्मदः वाच्यः कर्ता स्यात्। तदा भूधातुतः उत्तमसंज्ञकः तिङ् विधेयः इत्यर्थः।

एवं वाक्ये प्रयुक्तस्य अस्मदः वाच्यं कारकम्, धातोः परं विहितस्य लकारस्य च वाच्यं कारकं यदि समानं स्यात् तर्हि धातोः परम् उत्तमसंज्ञकः प्रत्ययः विधेयः इति सूत्रार्थः। अस्मदः वाच्यम् एव लस्य वाच्यम् इत्यस्य अर्थः अस्मदः यदधिकरणम् (अर्थः, वाच्यम्) तदेव अधिकरणं लस्यापि अस्ति चेत् अस्मद् लस्य समानाधिकरणः अस्ति। तयोः सामानाधिकरण्यम् अस्ति। तयोः वाच्यं कारकं समानम् अस्ति। तदा उत्तमसंज्ञकाः मिप् वस् मस् इति परस्मैपदिनः, इट् वहि महिङ् इति आत्मनेपदिनः विधेयाः इत्यर्थः। एवञ्च यदि अस्मदः साक्षात् उल्लेखः वाक्ये अस्तु अथवा साक्षाद् उल्लेखः मास्तु, परन्तु तदर्थः प्रतीयते तदापि उत्तमः विधीयते।

उदाहरणम् - अहं खादामि।

सूत्रार्थसमन्वयः - यथा - अहम् खाद् ल् इति वाक्यं कर्तव्यम् अस्ति। अत्र लकारः कर्तरि विवक्षितः अस्ति। अस्मदः रूपम् अहम् इत्यस्य अर्थः अपि कर्ता एव विवक्षितः। अस्मदः लस्य च सामानाधिकरण्यम् अस्ति। अतः लस्य स्थाने उत्तमसंज्ञकः प्रत्ययः विधेयः। तदा अहं खादामि इति वाक्यं स्यात्।

[१२.१३] शेषे प्रथमः॥ (१.४.१०७)

सूत्रार्थः - मध्यमोत्तमयोः अविषये धातोः प्रथमः स्यात्।

सूत्रव्याख्या - षड्विधेषु पाणिनीसुत्रेषु विधिसूत्रमिदम्। सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र शेषे इति सप्तम्येकवचनान्तं पदम्। प्रथमः इति च प्रथमैकवचनान्तं पदम्। उक्तादन्यः शेषः। मध्यमस्य उत्तमस्य च विषयः उक्तः। तेन च उक्ताद् मध्यमोत्तयोः विषयाद् अन्यः शेषः इति लभ्यते।

वस्तुतः किमुक्तम्। कश्च शेषः। युष्मद्-लकारयोः सामानाधिकरण्यं चेत् धातोः मध्यमो विधेयः। अस्मद्-लकारयोः सामानाधिकरण्यं चेत् धातोः उत्तमो विधेयः इति एतद्द्वयम् उक्तम्। ततः अन्यः

इत्यस्य अर्थः यत् इत्थम् उक्तं सामानाधिकरण्यद्वयं नास्ति चेत् धातोः प्रथमसंज्ञकः विधेयः। सूत्रार्थो भवति - मध्यमोत्तमयोः अविषये धातोः प्रथमः स्यात्।

यत्र एकस्मिन् वाक्ये युष्मद्-लकारयोः सामानाधिकरण्यम् एवञ्च अस्मद्-लकारयोः सामानाधिकरण्यम् इति एतद्वयमपि अस्ति। तदा विप्रतिषेधे परं कार्यमिति परिभाषया अस्मद्युत्तमः इत्यनेन सूत्रेण उत्तमः एव विधेयः। उदाहरणम् - अहं च त्वं च गच्छावः।

यत्र एकस्मिन् वाक्ये युष्मद्-लकारयोः सामानाधिकरण्यम् एवञ्च तस्मिन्नेव कारके अपरमपि पदं प्रयुक्तं चेदपि युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इत्यनेन सूत्रेण मध्यमः एव विधेयः। कुत इति चेदुच्यते - प्रथमः शेषे सति विधीयते। अस्मिन् वाक्ये तु युष्मदः विषयः अस्ति। अतः यद्यपि शेषे प्रथमः इति सूत्रं परसूत्रम्। तथापि शेषत्वाभावान्न प्रवर्तते। उदाहरणम् - त्वं च स च गच्छथः।

यत्र एकस्मिन् वाक्ये अस्मद्-लकारयोः सामानाधिकरण्यम् एवञ्च तस्मिन्नेव कारके अपरमपि पदं प्रयुक्तं चेदपि अस्मद्युत्तमः इत्यनेन सूत्रेण उत्तम एव विधेयः। कुत इति चेदुच्यते - प्रथमः शेषे सति विधीयते। अस्मिन् वाक्ये तु अस्मदः विषयः अस्ति। अतः यद्यपि शेषे प्रथमः इति सूत्रं परसूत्रम्। तथापि शेषत्वाभावान्न प्रवर्तते। उदाहरणम् - अहं च स च गच्छावः।

अयमत्र संग्रहः

लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण धातोः परं त्रिषु अर्थेषु लकारः भवति। तत्र विवक्षा एव नियामिका। तदा विवक्षातः कर्तरि लकारः विहितः। ततः च धातोः अर्थः व्यापारः वर्तमाने काले वर्तते इति विवक्षितम्। अतः वर्तमाने लट् इति सूत्रेण धातोः लट् विहितः। तदा भू ल् इति स्थितिः लब्धा। लस्य स्थाने तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति एते अष्टादश आदेशाः प्राप्ताः। ते च अव्यवहितपरम् एव निवेशनीयाः। भूधातोः परम् लस्य स्थाने एकदा एक एव आदेशः निवेशयितुं शक्यः। एककालं १८ प्रत्ययाः किञ्च अव्यवहितपराः इति नैव सम्भवति। अतः युगपत् १८ प्रत्ययाः प्रयोक्तुं न शक्यन्ते, परन्तु एकैकः पर्यायेण प्रयोक्तुं शक्यते। तदा कः प्रत्ययः कस्मै प्रयोजनाय प्रयोक्तव्यः इति विवेकाय लः परस्मैपदम् इति सूत्रेण अष्टादशानां परस्मैपदसंज्ञा कृता। ततश्च तङानावात्मनेपदम् इति सूत्रेण तङ्-प्रत्याहारस्य शानच्-कानचोः च आत्मनेपदसंज्ञा कृता। इत्थम् १८ प्रत्ययेषु आद्यानां नवानां परस्मैपदसंज्ञा अन्त्यानां नवानां तङाम् आत्मनेपदसंज्ञा विहिता।

तत्रापि परस्मैपदसंज्ञायाः आत्मनेपदसंज्ञायाश्च किम् फलमिति निर्णयाय अनुदात्तङित आत्मनेपदम् इति स्वरितञितः कर्त्रभिप्राये क्रियाफले इति च सूत्रद्वयम् उपन्यस्तम्। तेन यस्य धातोः आत्मनेपदनिमित्तम् अस्ति तस्माद्धातोः आत्मनेपदसंज्ञकाः नव प्रत्ययाः युगपत् पर्यायेण वा प्रसक्ताः। एवञ्च यस्य धातोः आत्मनेपदनिमित्तं नास्ति तादृशाद् धातोः शेषात् कर्तरि परस्मैपदम् इति सूत्रेण परस्मैपदसंज्ञकाः ९ प्रत्ययाः युगपत् पर्यायेण वा प्राप्ताः।

भ्वादिप्रकरणे- भूधातोः लटि रूपसाधनम् -१

इत्थम् अत्र धातोः परं लस्य स्थाने ९ परस्मैसंज्ञकाः आदेशाः प्रसक्ताः। ते च अव्यवहितपरम् एव निवेशनीयाः। धातोः परम् लस्य स्थाने एकदा एक एव आदेशः निवेशयितुं शक्यः। एककालं ९ प्रत्ययाः किञ्च अव्यवहितपराः इति नैव सम्भवति। अतः युगपत् ९ प्रत्ययाः प्रयोक्तुं न शक्यन्ते, परन्तु एकैकः पर्यायेण प्रयोक्तुं शक्यते। तदा कः प्रत्ययः कस्मै प्रयोजनाय प्रयोक्तव्यः इति विवेकाय इतोऽपि संज्ञाः कृताः।

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति सूत्रेण तिङः आत्मनेपद-परस्मैपदयोः त्रयाणां त्रिकाणां क्रमाद् प्रथमः मध्यमः उत्तमः इति संज्ञाः विहिताः। इत्थं येषां प्रथमादिसंज्ञाः जाताः तेषु प्रत्येकम् एकैकशः तान्येकवचनद्विवचनबहुवचनान्येकशः इति सूत्रेण एकवचनं द्विवचनं बहुवचनम् इति संज्ञाः विहिताः।

एतावता प्रति प्रत्ययं काचित् संज्ञा लब्धा। यथा तिप् इत्यस्य परस्मैपदम् प्रथमः एकवचनम् इति तिस्रः संज्ञाः जाताः। इत्थम् अन्येषामपि प्रत्ययानाम्।

तथापि कस्मै प्रयोजनाय एताः संज्ञाः। कथं वा तासाम् उपयोगः इति विवेकाय सूत्राणि प्रणीतानि।

तत्र यदि एकस्मिन् वाक्ये युष्मद्-लकारयोः सामानाधिकरण्यम् अस्ति तर्हि धातोः मध्यमः विधेयः इति युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इति सूत्रेण व्यवस्था कृता।

यदि एकस्मिन् वाक्ये अस्मद्-लकारयोः सामानाधिकरण्यम् अस्ति तर्हि धातोः उत्तमो विधेयः इति अस्मद्युत्तम इति सूत्रेण व्यवस्था कृता।

यदि मध्यमोत्तमयोः अविषयः भवति तर्हि धातोः शेषे प्रथम इति सूत्रेण प्रथमः विहितः।

तथापि मध्यमसंज्ञकाः सिप् थस् थ इति त्रयः सन्ति। अधुना इदं स्पष्टं यत् कदा मध्यमस्य प्रयोगः कर्तव्यः। परन्तु इदं न स्पष्टं यत् सिप्-थस्-थ इति त्रिषु कतमः प्रयोक्तव्यः इति। तदा द्व्येकयोर्द्विवचनैकवचने इति बहुषु बहुवचनम् इति द्वाभ्याम् सूत्राभ्याम् इदम् आयाति यत् लस्यार्थः यत् कारकम् तद् यदि एकम् तर्हि एकवचनसंज्ञकः सिप् प्रयोक्तव्यः। यदि लस्यार्थः यत् कारकम् तस्य यदि द्वित्वं स्यात् अर्थात् कारकद्वयम् स्यात् तर्हि द्विवचनसंज्ञकः थस् इति प्रत्ययः प्रयोक्तव्यः। यदि लस्यार्थः यत् कारकम् तस्य यदि बहुत्वं स्यात् अर्थात् द्व्यधिकं कारकम् स्यात् तर्हि बहुवचनसंज्ञकः थ इति प्रत्ययः प्रयोक्तव्यः इति। एवमन्यत्रापि।

एवम् कर्तरि लकारे विवक्षिते भू ल् इति स्थिते लस्य स्थाने तिबादिषु अष्टादशसु प्रत्ययेषु प्राप्तेषु लस्य वाच्यः कर्ता एकः किञ्च स युष्मदः अस्मदः वाच्यः नास्ति इति विवक्षिते लस्य स्थाने एकवचनसंज्ञकः प्रथमः विधेयः। तिपि पस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति लोपे च कृते भू ति इति स्थितिः जायते। तदा -

धातोः विहितानां प्रत्ययानां सार्वधातुकम् आर्धधातुकं चेति संज्ञाद्वयम् अस्ति। अष्टाध्याय्याम् सार्वधातुकसंज्ञाविधायकानि आर्धधातुकसंज्ञाविधायकानि च सूत्राणि एकत्र एव उपन्यस्तानि। तेषां ज्ञानम् एककालं भवतु इति धिया तानि सूत्राणि अपि अत्रैव दीयन्ते।

पाठगतप्रश्नाः-४

२८. कदा मध्यमः विधीयते।

२९. कदा उत्तमः विधीयते।

३०. कदा प्रथमः विधीयते।

३१. युष्पद्युपपदे इत्यादिसूत्रे समानाधिकरणपदार्थः कः।

३२. शेषे प्रथमः इत्यत्र कः शेषः।

अवधेयम्

भूधातोः लटि भवति इति रूपं भवति। तस्य समग्रस्य साधनाय बहूनि सूत्राणि आवश्यकानि। केलवं भवति इति रूपसाधनमेव पाठद्वयात्मकम् अस्ति। अतः अत्र पाठः विभक्तः। परन्तु विषयः क्रमशः अग्रे प्रचलति। अतः अत्र पाठसारः नास्ति, पाठान्तप्रश्नाः न सन्ति, उत्तराणि च न सन्ति। तत्सर्वमपि अग्रिमपाठस्यान्ते द्रष्टव्यम्।

346sk13

१३

भ्वादिप्रकरणे- भूधातोः लटि रूपसाधनम् -२

उपक्रमः -

भूधातोः भवति इति रूपसाधनमेवानुवर्तते। अतः पृथक् प्रस्तावना उद्देश्यानि वा न दत्तम्।

[१३.१] तिङ् शित् सार्वधातुकम्॥ (३.४.११३)

सूत्रार्थः - धात्वधिकारोक्तः तिङ् शित् च सार्वधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - संज्ञासूत्रमिदम्। अनेन सार्वधातुकसंज्ञा विधीयते। अस्मिन् त्रीणि पदानि सन्ति। तिङ् (१/१), शकारः इत् यस्य स शित् (१/१), सार्वधातुकम् (१/१) इति संज्ञापरपदम्। तिङ् इति प्रत्याहारः। तस्मिन् तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति एते अष्टादश प्रत्ययाः सन्ति। धातोः इति पञ्चम्यन्तम् पदम् अधिकृतम्। पदयोजना - धातोः तिङ् शित् सार्वधातुकम्। सूत्रार्थो भवति - धातोः इति अधिकारे विहितः तिङ् शित् च सार्वधातुकसंज्ञः भवति। अर्थात् धात्वधिकरोक्तः तिङ् शिच्च सार्वधातुकसंज्ञकः भवति।

उदाहरणम् - तिप् तस् झि इत्यादयः तिङः। शप् श्यन् इत्यादयः शितः।

[१३.२] आर्धधातुकं शेषः॥ (३.४.११४)

सूत्रार्थः - धातोरिति विहितः तिङ्शिद्भ्योऽन्यः प्रत्ययः आर्धधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - सूत्रमिदं संज्ञासूत्रम्। अनेन आर्धधातुकसंज्ञा विधीयते। अस्मिन् द्वे पदे स्तः। आर्धधातुकम् शेषः इति सूत्रगतपदच्छेदः। धातोः इति पञ्चम्येकवचनान्तं पदम् अधिकृतम् अस्ति। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रादपि धातोः इति पञ्चम्यन्तं पदमनुवर्तते। पदयोजना - धातोः धातोः शेषः आर्धधातुकम्। शेषः इत्यस्य तिङ्-शिद्भ्यः अन्यः इत्यर्थः। तेन सूत्रार्थश्च भवति - धातोरिति धातोर्विहितः तिङ्शिद्भ्यः अन्यः प्रत्ययः आर्धधातुकसंज्ञः स्यात् इति। अर्थात् धातोः इति अधिकृत्य धातुतः विहितः यः तिङ्भिन्नः शिद्भिन्नः च प्रत्ययः तस्य आर्धधातुकसंज्ञा अनेन सूत्रेण भवति।

गुप्तिज्किद्भ्यः सन् इति सूत्रेण धातुतः सन् प्रत्ययः विहितः। किन्तु धातोः इति उक्त्वा अर्थात् धात्वधिकारे न विहितः। अतः अस्य आर्धधातुकसंज्ञा न भवति।

उदाहरणम् - च्लि सिच् स्य तास् क्त क्तवतु इत्यादयः।

[१३.३] लिट् च॥ (३.४.११५)

सूत्रार्थः - लिडादेशः तिङ् आर्धधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - शक्तिग्राहकत्वात् सूत्रमिदं संज्ञाकोटौ अन्तर्याति। द्विपदात्मकेऽस्मिन् सूत्रे लिट् इति लुप्तषष्ठीकं पदम्। अतः लिटः इति लभ्यते। च इति अव्ययपदम्। तिङ् शित् सार्वधातुकम् इति सूत्रात् तिङ् इति प्रथमैकवचनान्तं संज्ञिबोधकं पदमनुवर्तते। तथा आर्धधातुकं शेषः इति सूत्रात् संज्ञासमर्पकं प्रथमान्तं पदमनुवर्तते। लङः शाकटायनस्यैव इति सूत्रात् एव इत्यव्ययपदम् अनुवर्तते। एवं लिटः तिङ् आर्धधातुकम् एव इति सूत्रगतपदान्वयः। तेन सूत्रार्थः भवति - लिटः स्थाने विहितः तिङ् आर्धधातुकसंज्ञः एव स्यात्। अत्र एवकारेण सार्वधातुकसंज्ञा व्यावृत्यते। अतः लिटः स्थाने विहितस्य तिङः सार्वधातुकसंज्ञा न भवति।

[१३.४] लिङाशिषि॥ (३.४.११६)

सूत्रार्थः - आशिषि लिङादेशः तिङ् आर्धधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - संज्ञासूत्रमिदम्। अनेन आर्धधातुकसंज्ञा विधीयते। अस्मिन् द्वे पदे स्तः। लिङ् इति लुप्तषष्ठीकं पदम्। तेन लिङः इति लभ्यते। आशिषि (७/१)। तिङ् शित् सार्वधातुकम् इति सूत्रात् तिङ् इति प्रथमान्तं संज्ञिपरं पदमनुवर्तते। आर्धधातुकं शेषः इति सूत्रात् संज्ञासमर्पकम् आर्धधातुकमिति प्रथमान्तं पदमनुवर्तते। लङः शाकटायनस्यैव इति सूत्रात् एव इत्यव्ययपदम् अनुवर्तते। पदयोजना - आशिषि लिङः तिङ् आर्धधातुकम् एव। सूत्रार्थो भवति - आशीर्वादार्थे विहितस्य लिङः स्थाने यः तिङ् तस्य आर्धधातुकसंज्ञा एव भवति। अत्र एवकारेण सार्वधातुकसंज्ञा व्यावृत्यते। अतः लिटः स्थाने विहितस्य तिङः सार्वधातुकसंज्ञा न भवति।

अयमत्र सारः

धातुतः लकाराः विधीयन्ते। कोऽपि लकारः तिङ् नास्ति शित् वा नास्ति। अतः सर्वे लकाराः आर्धधातुकसंज्ञकाः। लकाराणां स्थाने तिङ् विधीयते। अयं तिङ् सार्वधातुकसंज्ञकः भवति। परन्तु लिटः स्थाने विहितः तिङ् एवञ्च आशीर्वादार्थे विहितस्य लिङः स्थाने विहितः तिङ् आर्धधातुकसंज्ञकः भवति। यस्य लकारस्य आदेशः तिङ् सार्वधातुकसंज्ञकः स लकारः सार्वधातुकलकारः इति केचित् वदन्ति। परन्तु लकारः न कदापि सार्वधातुकसंज्ञकः।

लुटि लृटि लुङि लृङि च धातु-लकारयोः मध्ये तास् स्य च्लि स्य एते विधीयन्ते। ते धातोः विहिताः तिङ्भिन्नाः, शिद्भिन्नाः च सन्ति। अतः आर्धधातुकसंज्ञकाः सन्ति। परन्तु तेषां लकराणां स्थाने विहितः तिङ् सार्वधातुकसंज्ञक एव अस्ति। तथापि लुट् लृट् लुङ् लृङ् चेति आर्धधातुकलकाराः इति प्रचारः।

भू ति इति स्थिते तिप् तिङ् अस्ति, धातोः विहितः अस्ति। अतः तिङ्शित् सार्वधातुकम् इति सूत्रेण तिपः सार्वधातुकसंज्ञा भवति। मूलतः वर्तमाने लट् इत्यत्र स्पष्टीकृतं यत् लट् कर्तरि अर्थात् कर्त्रर्थे विहितः अस्ति। तदा - (अग्रिमसूत्रे द्रष्टव्यम्)

पाठगतप्रश्नाः-५

३३. सार्वधातुकसंज्ञा कस्य।

३४. आर्धधातुकसंज्ञा केषाम्।

३५. आर्धधातुकं शेषः इत्यत्र कः शेषः।

३६. के लकाराः सार्वधातुकसंज्ञकाः। उत्तरं समर्थयत।

३७. केषां लकाराणाम् आदेशः तिङ् आर्धधातुकसंज्ञकः।

३८. लिडादेशः तिङ् सार्वधातुकमार्धधातुकं वा।

३९. केषां लकाराणां विकरणानि आर्धधातुकानि। कानि च तानि।

[१३.५] कर्तरि शप्॥ (३.१.६८)

सूत्रार्थः - कर्त्रर्थे सार्वधातुके परे धातोः शप् भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु 'कर्तरि शप्' इति विधिसूत्रम्। अनेन शप् विधीयते। सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र कर्तरि इति सप्तम्येकवचनान्तं पदम्, शप् इति च प्रथमैकवचनान्तं पदम्। 'सार्वधातुके यक्' इति सूत्रात् सार्वधातुके इति पदमनुवृत्तम्। 'धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ्' इति सूत्रात् धातोरिति पदम् अनुवर्तते। 'प्रत्ययः' इति 'परश्च' इति सूत्रद्वयमपि अत्र अधिकृतम्। पदयोजना - कर्तरि सार्वधातुके धातोः शप् प्रत्ययः परः इति। सूत्रार्थो भवति - कर्त्रर्थे सार्वधातुके प्रत्यये परे धातोः परः शप् प्रत्ययः स्यादिति। तिङ्प्रत्यये परे सति धातोः ये शबादयः प्रत्यया विधीयन्ते तेषां विकरणसंज्ञा भवतीति प्राचीनाचार्याणां मतम्। अतः शप् इति विकरणम्।

उदाहरणम् - भवति।

सूत्रार्थसमन्वयः - भूधातोः विवक्षातः कर्त्रर्थे लट् अस्ति। लटः स्थाने तिप् विहितः। तदा भू ति इति स्थितिः जाता। अत्र भूधातोः परं तिप् तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञकः। भूधातोः परं कर्त्रर्थे सार्वधातुकम् अस्ति। अतः कर्तरि शप् इति सूत्रेण धातोः शप्प्रत्यये शप्प्रत्ययस्थितस्य शकारस्य 'लशक्वतद्धिते' इति सूत्रेण तथा पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा भवति। इत्संज्ञायां सत्यां 'तस्य लोपः' इति सूत्रेण उभयोः शकारपकारयोः लोपो भवति। तदा भू अ ति इति स्थितिः जायते। तदा -

[१३.६] सार्वधातुकार्धधातुकयोः॥ (७.३.८४)

सूत्रार्थः - सार्वधातुकार्धधातुकयोः परयोरिगन्ताङ्गस्य गुणः स्यात्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण गुणः विधीयते। अस्मिन् सूत्रे सार्वधातुकार्धधातुकयोः इति सप्तमीद्विवचनान्तम् पदम्। मिदेर्गुणः इत्यस्मात् सूत्रात् गुणः इति प्रथमान्तं पदमनुवर्तते। अङ्गस्य इति अधिकृतमस्ति। अस्मिन् सूत्रे कस्य स्थाने गुणः भविष्यति इति स्थानी साक्षात् नोक्तः। किञ्च गुणः इति विधेयपरं गुणपदम् उच्चार्य गुणः विधीयते। अतः इको गुणवृद्धी इति परिभाषया इकः इति षष्ठ्यन्तं पदमत्रोपस्थाप्यते। इदं सूत्रम् अङ्गाधिकारे पठितम्। अङ्गसंज्ञा प्रत्यये परे सति एव फलति। अतः प्रत्यये इति पदमाक्षिप्यते। तत्रापि सार्वधातुकार्धधातुकयोः इति सप्तमीद्विवचनम्। एतौ अपि प्रत्ययौ एव। अतः प्रत्यये इत्यस्य प्रत्ययोः इति सप्तमीद्विवचनं गृह्यते। तदा पदयोजना भवति - इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः प्रत्ययोः इति।

अत्र इकः अङ्गस्य चेति समानविभक्तिकं पदद्वयम् अस्ति। अङ्गस्य इति पदं विशेष्यम् अस्ति, इकः इति पदम् तस्य विशेषणम् अस्ति। अतः येन विधिस्तदन्तस्य इत्यनेन तदन्तविधिना इगन्ताङ्गस्य इत्यर्थः लभ्यते। इगन्ताङ्गस्य इत्यत्र अल्समुदायबोधकात् स्थानषष्ठी श्रूयते। एवञ्च आदेशः गुणः एकाल् अस्ति। अतः अलोऽन्त्यस्य इति परिभाषया इगन्ताङ्गस्य अन्त्यस्य इकः गुणः भवति। ततश्च सूत्रार्थो भवति –सार्वधातुके आर्धधातुके च प्रत्यये परे इगन्ताङ्गस्य अन्त्यस्य अलः स्थाने गुणः स्यात् इति। इगन्ताङ्गस्य अन्त्यः अल् इक् एव। अतः इकः स्थाने एव गुणो भवति।

उदाहरणम् - भू-धातोः लटि तिपि शपि भू अ ति इति स्थितिः निरूपिता पूर्वसूत्रेषु। शप् धातोः इति विहितः शित् प्रत्ययः। अतः तिङ् शित् सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञां लभते। अस्मिन् परे भू इत्यस्य अङ्गसंज्ञा भवति। भू इति इगन्तम् अङ्गमस्ति। अतः सार्वधातुकार्धधातुकयोः इति प्रकृतसूत्रेण इगन्ताङ्गस्य भू इत्यस्य अन्त्यस्य इकः ऊकारस्य गुणः प्रसक्तः। ऊकारस्य स्थाने स्थानेऽन्तरतमः इति परिभाषाबलेन स्थानकृदान्तर्याद् ओकारे भो अ ति इति स्थितिः भवति। अत्र ओकाराद् अचि परतः एचोऽयवायावः इत्यनेन ओकारस्य अवादेशे भ् अव् अ ति इति स्थिते सर्ववर्णमेलनेन '**भवति**' इति रूपं सिद्धं भवति।

भवतः - भूधातोः वर्तमानक्रियावृत्तित्वविवक्षायां वर्तमाने लट् इति सूत्रेण कर्तरि लट् विधीयते। लटः अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने प्रथमपुरुषद्विवचनविवक्षायां तस्प्रत्यये भू तस् इति भवति। ततः तिङ्शित्सार्वधातुकम् इति सूत्रेण तसः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ तस् इति जायते। शप्प्रत्ययः शित् एवञ्च धात्वधिकारोक्तः। अतः तिङ्शित् सार्वधातुकमिति तस्य सार्वधातुकसंज्ञा भवति। अतः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ तस् इति जायते। यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ तस् इति जायते। ततः भवतस् इति समुदायस्य सुप्तिङन्तं पदम् इति सूत्रेण तिङन्तत्वेन पदसंज्ञायाम्, अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन ससजुषो रुः इत्यनेन पदान्तसकारस्य रुत्वेऽनुबन्धलोपे भवतर्

इति जायते। अत्र रेफोच्चारणात् परं वर्णान्तरोच्चारणाभावेन तदभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायाम्, अवसाने परे अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन खरवसानयोर्विसर्जनीयः इत्यनेन पदान्तस्य रेफस्य विसर्गे वर्णसम्मेलने भवतः इति रूपं सिद्ध्यति।

भवन्ति - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने प्रथमपुरुषबहुवचन-विवक्षायां झिप्रत्यये भू झि इति स्थितिः भवति। तदा -

[१३.७] झोऽन्तः॥ (७.१.३)

सूत्रार्थः - प्रत्ययावयवस्य झकारस्य स्थाने अन्त् इत्यादेशः स्यात्।

सूत्रव्याख्या - साक्षाल्लक्ष्यसंस्कारानुरोधादिदं विधिसूत्रम्। सूत्रे द्वे पदे स्तः। झः अन्तः इति सूत्रगतपदच्छेदः। झः इति षष्ठ्येकवचनान्तम् उद्देश्यबोधकं पदम्। इयं च स्थानषष्ठी। अन्तः इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (७.१.२) इति पूर्वसूत्रात् प्रत्ययादिपदस्य एकदेशः प्रत्ययः इति अनुवर्तते, षष्ठ्यन्ततया च विपरिणमते। तेन प्रत्ययस्य इति भवति। अत्र च अवयवावयविभावसम्बन्धे षष्ठी। तेन प्रत्ययावयवस्य झकारस्य स्थाने इति अर्थ आयाति। प्रत्ययस्य झस्य अन्तः इति सूत्रगतपदान्वयः। तेन प्रत्ययावयवस्य झकारस्य स्थाने अन्तादेशो भवतीति सूत्रस्यार्थः भवति। अत्र अन्त् इत्यादेशः तकारान्तः, न तु अकारान्तः। अकारोऽत्र उच्चारणार्थः।

उदाहरणम् - भवन्ति।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण भू झि इत्यवस्थायां प्रकृतसूत्रेण प्रत्ययावयवस्य झि इत्यस्य झकारस्य स्थाने अन्त् इत्यादेशः भवति।

अतः प्रकृतसूत्रेण अन्त् इति आदेशे भू अन्त् इ इति जायते। तत्र तिङ्शित्सार्वधातुकम् इति सूत्रेण अन्ति इति समुदायस्य सार्वधातुकसंज्ञा भवति। झिप्रत्ययः कर्तरि विहितः अस्ति। अतः कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ अन्ति इति जायते। शपोऽपि तिङ्शित् सार्वधातुकमिति सूत्रेण सार्वधातुकसंज्ञा भवति। ततः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ अन्ति इति जाते एचोऽयवायावः इति सूत्रेण ओकारस्य अवादेशे भव् अ अन्ति इति स्थितिर्भवति। तत्र च अकारात् परम् गुणः अकारः अस्ति। अतः अतो गुणे इति सूत्रेण अकाराकारयोः पररूपैकादेशे भव् अन्ति इति जाते वर्णसम्मेलने **भवन्ति** इति रूपं सिद्ध्यति।

भवसि - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि लस्य मध्यमपुरुषैक-वचनविवक्षायां सिपि अनुबन्धलोपे भू सि इति स्थितिर्भवति। ततश्च तिङ्शित्सार्वधातुकम् इति सूत्रेण सिपः सार्वधातुकसंज्ञायां कर्तरि विहितत्वाच्च कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ सि इति जायते। शपोऽपि तिङ्शित् सार्वधातुकमिति सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ सि इति जाते एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ सि इति जाते वर्णसम्मेलने **भवसि** इति रूपं सिद्ध्यति।

भवथः - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि लस्य स्थाने मध्यमपुरुषद्विवचनविवक्षायां थस्-प्रत्यये भू थस् इति स्थितिर्भवति। तिङ्शित्सार्वधातुकम् इति सूत्रेण थसः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ थस् इति जाते, शपोऽपि सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ थस् इति जाते एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ थस् इति जाते रुत्वे विसर्गे च कृते भव् अ थः इति स्थिते वर्णसम्मेलने **भवथः** इति रूपं सिद्ध्यति।

भवथ - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि लस्य स्थाने मध्यमपुरुषबहुवचनविवक्षायां थ-प्रत्यये भू थ इति स्थितिर्भवति। तिङ्शित्सार्वधातुकम् इति सूत्रेण थस्य सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ थ इति जाते, शपोऽपि सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ थ इति जाते एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ थ इति जाते वर्णसम्मेलने **भवथ** इति रूपं सिद्ध्यति।

भवामि - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने उत्तमपुरुषैकवचनविवक्षायां मिपि अनुबन्धलोपे भू मि इति स्थितिर्भवति। तिङ्शित्सार्वधातुकम् इति सूत्रेण मिपः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ मि इति जाते, शपोऽपि शित्त्वात् सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे ओकारे भो अ मि इति जाते एचोऽयवायावः इति सूत्रेण अवादेशे भव् अ मि इति जायते। तदा -

[१३.८] अतो दीर्घो यञि॥ (७.३.१०१)

सूत्रार्थः - अदन्तस्य अङ्गस्य स्थाने दीर्घः स्यात् यञादौ सार्वधातुके परे।

सूत्रव्याख्या - षड्विधपाणिनीयसूत्रेषु साक्षाल्लक्ष्यसंस्कारत्वाद् विधिकोटौ इदं सूत्रम् अन्तर्याति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। अतः दीर्घः यञि इति सूत्रस्थपदच्छेदः। तेषु अतः इति षष्ठ्येकवचनान्तं पदम्। दीर्घः इति प्रथमान्तं विधेयबोधकं पदम्। यञि इति सप्तम्यन्तं पदम्। सूत्रमिदम् अङ्गस्य इत्यधिकारे वर्तते। 'अतः' इति पदम् अङ्गस्य इति षष्ठ्यन्तपदस्य विशेषणम्। अतः येन विधिस्तदन्तस्य इति तदन्तविधिना अदन्तस्य अङ्गस्य इत्यर्थो भवति। तुरुस्तुशम्यमः सार्वधातुके इति सूत्रात् सार्वधातुके इति सप्तम्यन्तं पदमनुवर्तते। इदं च विशेष्यबोधकं पदम्। यञि इति सप्तम्यन्तम् अल्बोधकं विशेषणम्। ततश्च यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधिना यञादौ सार्वधातुके इत्यर्थो भवति। एवमाहत्य अदन्ताङ्गस्य दीर्घः यञि सार्वधातुके इति सूत्रस्थपदानामन्वयः। अदन्ताङ्गस्य इत्यत्र अल्समुदायबोधकात् स्थानषष्ठी श्रूयते। अतः अलोऽन्त्यस्य इति परिभाषया अदन्ताङ्गस्य अन्त्यस्य अलः एव आदेशः स्यात्। तेन सूत्रार्थः भवति - अदन्ताङ्गस्य अन्त्यस्य अलः स्थाने दीर्घो भवति यञादौ सार्वधातुके परे इति।

उदाहरणम् - भवामि।

भ्वादिप्रकरणे- भूधातोः लटि रूपसाधनम् -२

सूत्रार्थसमन्वयः - भव् अ मि इत्यवस्थायां मिप्प्रत्ययपरतः पूर्वस्य भव् अ इति समुदायस्य अङ्गसंज्ञा अस्ति। मिप्प्रत्ययः सार्वधातुकसंज्ञकः यञादिः च अस्ति। किञ्च इदम् अङ्गम् अदन्तम् अस्ति। अतोऽत्र प्रकृतसूत्रेण अन्त्याकारस्य स्थाने दीर्घो भवति। तदा भवा मि इति जाते वर्णसम्मेलने **भवामि** इति रूपं सिद्ध्यति।

भवावः - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि अनुबन्धलोपे भू ल् इति स्थिते लस्य स्थाने उत्तमपुरुषद्विवचनविवक्षायां वसि भू वस् इति स्थितिर्जायते। ततः तिङ्शित्सार्वधातुकम् इति सूत्रेण वसः सार्वधातुकसंज्ञायां तस्मिन् परतः कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ वस् इति जाते, शपोऽपि सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे, एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ वस् इति स्थितिः उद्भवति। तत्र वसि परे विकरणविशिष्टस्य भव इत्यस्य अङ्गसंज्ञा भवति। वस् यञादिः सार्वधातुकः च। अतः अतो दीर्घो यञि इति सूत्रेण अदन्ताङ्गस्य भव इत्यस्य वकारोत्तरस्य अकारस्य दीर्घो भवति। तदा भवा वस् इति जायते। भवावस् इति समुदायः तिङन्तः। अतः तस्य सुप्तिङन्तं पदम् इति सूत्रेण पदसंज्ञा भवति। तेन ससजुषो रुः इत्यनेन पदान्तसकारस्य रुत्वेऽनुबन्धलोपे खरवसानयोर्विसर्जनीयः इत्यनेन रेफस्य विसर्गे वर्णसम्मेलने भवावः इति रूपं सिद्ध्यति।

भवामः - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि, लस्य स्थाने उत्तमपुरुषद्विवचनविवक्षायां मसि, तिङ्शित्सार्वधातुकम् इति सूत्रेण मसः सार्वधातुकसंज्ञायां तस्मिन्परतः कर्तरि शप् इति सूत्रेण धातोः शपि, शपोऽपि सार्वधातुकत्वेन तस्मिन्परे सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे ओकारे, एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ मस् इति जाते मसः यञादित्वेन सार्वधातुकत्वेन च तस्मिन् परे विकरणविशिष्टस्य भव इत्यस्य अङ्गत्वविज्ञानात् अतो दीर्घो यञि इति सूत्रेण अदन्ताङ्गस्य भव इत्यस्य मकारोत्तरस्य अकारस्य दीर्घे भवा मस् इति जाते समुदायस्य तिङन्तत्वेन पदसंज्ञायाम्, ससजुषो रुः इत्यनेन पदान्तसकारस्य रुत्वेऽनुबन्धलोपे खरवसानयोर्विसर्जनीयः इत्यनेन रेफस्य विसर्गे वर्णसम्मेलने भवावः इति रूपं सिद्ध्यति।

भूधातोः लटि रूपाणि --

लट्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	भवति	भवतः	भवन्ति
मध्यमपुरुषः	भवसि	भवथः	भवथ
उत्तमपुरुषः	भवामि	भवावः	भवामः

पाठगतप्रश्नाः-६

४०. शप् कदा विधीयते।

४१. भू अ ति इति स्थिते भुवः ऊकारस्य गुणः केन सूत्रेण।

४२. झोऽन्तः इति सूत्रस्यार्थं लिखत।

४३. भूधातोः लटि सिपि किं रूपम्।

[१३.९] धात्वादेः षः सः॥ (६.१.६२)

सूत्रार्थः - धात्वादेः षस्य सः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सकारः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। धात्वादेः (६/१), षः (६/१), सः (१/१)। धातोः आदिः धात्वादिः तस्य धात्वादेः इति षष्ठीतत्पुरुषः समासः। सूत्रार्थो भवति - धातोः आदेः षकारस्य स्थाने सकारादेशः भवति। धातुपाठे येषां धातूनां आदिवर्णः षकारः अस्ति ते षोपदेशाः धातवः कथ्यन्ते।

उदाहरणम् - षिध गत्याम्।

सूत्रार्थसमन्वयः - षिध इति धातुपाठे पठितः धातुः। अतः उपदेशावस्थायां स तस्यादिः षकारः अस्ति। अतः स षोपदेशः। धात्वादेः षः सः इति प्रकृतसूत्रेण तस्य आदेः षकारस्य स्थाने सकारादेशः भवति। तेन सिध इति जायते।

[१३.१०] णो नः॥ (६.१.६३)

सूत्रार्थः - धात्वादेः णस्य नः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण नकारः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। णः (६/१), नः (१/१)। धात्वादेः षः सः इति सूत्रात् धात्वादेः (६/१) इति पदमनुवर्तते। धातोः आदिः धात्वादिः तस्य धात्वादेः इति षष्ठीतत्पुरुषः समासः। सूत्रार्थो भवति - धातोः आदेः णकारस्य स्थाने नकारादेशः भवति। धातुपाठे येषां धातूनां आदिवर्णः णकारः अस्ति ते णोपदेशाः धातवः कथ्यन्ते।

उदाहरणम् - णम् - नम्, णीञ् - नी, णद – नद।

सूत्रार्थसमन्वयः - णम् इति धातुपाठे पठितः धातुः। अतः उपदेशावस्थायां तस्य आदिः णकारः अस्ति। अतः स णोपदेशः। णो नः इति प्रकृतसूत्रेण तस्य आदेः णकारस्य स्थाने नकारादेशः भवति। तेन नम् इति जायते। ततश्च लटि तिपि शपि नमति इत्यादिरूपाणि सिध्यन्ति।

णद अव्यक्ते शब्दे इति भ्वादिगणीयः धातुः। स च णोपदेशः। तस्य लटि रूपाणि सुसाध्यानि सन्ति। तानि रूपाणि तावत् - **नदति नदतः नदन्ति। नदसि नदथः नदथ। नदामि नदावः नदामः।**

सिध्-धातोः वर्तमाने लट् इति लटि तिपि शपि सिध् अ ति इति स्थितिः जायते। तदा - (पुगन्तलघूपधस्य च इति सूत्रे द्रष्टव्यम्।)

[१३.११] इदितो नुम् धातोः॥ (७.१.५८)

सूत्रार्थः - इदितो धातोः नुमागमः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण नुम् विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। इदितः नुम् धातोः इति सूत्रगतपदच्छेदः। इदितः (६/१), नुम् (१/१), धातोः (१/१)। 'इत्' इत् यस्य सः इदित्, तस्य इदितः इति बहुव्रीहिसमासः। अर्थात् यस्य धातोः ह्रस्वः इकारः इत्संज्ञकः अस्ति स धातुः इदित्। सूत्रार्थो भवति - इदितो धातोः नुमागमः भवति। नुम् मित् अस्ति। अतः मिदचोऽन्त्यात् परः इति परिभाषया अन्त्यात् अचः परः भवति।

उदाहरणम् - टु नर्दिँ समृद्धौ।

सूत्रार्थसमन्वयः - टु नर्दिँ इति धातुः धातुपाठे पठितः। तस्य टु इत्यस्य आदिर्ञिटुडवः इति सूत्रेण इत्संज्ञा भवति। इकारः अनुनासिकः। अतः उपदेशेऽजनुनासिक इत् इति सूत्रेण इत् इत्संज्ञकः भवति। अतः अयं धातुः इदित्। इदितो नुम् धातोः इति सूत्रेण तस्य नुम् भवति। मित्त्वात् मिदचोऽन्त्यात् परः इति परिभाषया मित् नकारः परः यः अकारः तस्मात् परः भवति। तेन नन् द् इति स्थितिः भवति। नश्चापदान्तस्य झलि इति सूत्रेण अस्य नकारस्य अनुस्वारः भवति। ततश्च अनुस्वारस्य ययि परसवर्णः इति सूत्रेण परसवर्णे कृते नन्द् इति लभ्यते। ततश्च वर्तमाने लट् इति लटि तिपि शपि नन्द् अ ति इति स्थिते वर्णमेलने **नन्दति** इति रूपं सिध्यति।

णद धातोः अन्येषु रूपेषु कोऽपि विशेषो नास्ति। तानि रूपाणि हि - **नन्दति नन्दतः नन्दन्ति। नन्दसि नन्दथः नन्दथ। नन्दामि नन्दावः नन्दामः।**

[१३.१२] पुगन्तलघूपधस्य च॥ (७.३.८६)

सूत्रार्थः - पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः सार्वधातुकार्धधातुकयोः प्रत्ययोः परयोः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण गुणो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। पुगन्तलघूपधस्य (६/१), च इत्यव्ययम्। मिदेर्गुणः इत्यस्मात् सूत्रात् गुणः इति प्रथान्तं पदमनुवर्तते। अङ्गस्य (६/१) इति अधिकृतमस्ति। सार्वधातुकार्धधातुकयोः (७/२) इति सूत्रमायाति। अर्ति-ह्री-व्ली-री-क्नूयी-क्ष्माय्यातां पुण्णौ इति सूत्रेण पुगागमो विधीयते। अयं पुक् अन्ते यस्य तत् पुगन्तम् अङ्गम् इति बहुव्रीहिसमासः। लघुः उपधा यस्य तद् लघूपधम् अङ्गम् इति बहुव्रीहिसमासः। पुगन्तं च लघूपधं चेति पुगन्तलघूपधम्, तस्य पुगन्तलघूपधस्य इति समाहारद्वन्द्वसमासः।

अस्मिन् सूत्रे कस्य स्थाने गुणः भविष्यति इति स्थानी साक्षात् नोक्तः। किञ्च गुणः इति विधेयपरं गुणपदम् उच्चार्य गुणः विधीयते। अतः इको गुणवृद्धी इति परिभाषया इकः इति षष्ठ्यन्तं पदमत्रोपस्थाप्यते। इदं सूत्रम् अङ्गाधिकारे पठितम्। अङ्गसंज्ञा प्रत्यये परे सति एव फलति। अतः प्रत्यये

इति पदमाक्षिप्यते। तत्रापि सार्वधातुकार्धधातुकयोः इति सप्तमीद्विवचनम्। एतौ अपि प्रत्ययौ एव। अतः प्रत्यये इत्यस्य प्रत्ययययोः इति सप्तमीद्विवचनं गृह्यते। तदा पदयोजना भवति - पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः प्रत्ययययोः इति।

ततश्च सूत्रार्थो भवति – सार्वधातुके आर्धधातुके च प्रत्यये परे पुगन्तस्य लघूपधस्य अङ्गस्य इकः स्थाने गुणः स्यात् इति।

उदाहरणम् - सेधति।

सूत्रार्थसमन्वयः - धात्वादेः षः सः इति पूर्वसूत्रोक्तप्रकारेण सिध्-धातोः वर्तमाने लट् इति लटि तिपि शपि सिध् अ ति इति स्थितिः जायते। शप् सार्वधातुकम् परे अस्ति तदा सिध् इति अङ्गम् अस्ति। तस्य इकारः लघुसंज्ञकः उपधासंज्ञकः च। अतः पुगन्तलघूपधस्य च इति प्रकृतसूत्रेण इकः इकारस्य स्थाने गुणे स्थानत आन्तर्याद् एकारे **सेधति** इति रूपं सिध्यति।

षिध गत्याम् इति भ्वादिगणीयः धातुः। अस्य रूपाणि एतावता उपात्तैः सूत्रैरेव भवन्ति। अतः तानि रूपाणि छात्रेण साधनीयानि। सिद्धानि रूपाणि अधः अग्रे दत्तानि सन्ति। - **सेधति सेधतः सेधन्ति। सेधसि सेधथः सेधथ। सेधामि सेधावः सेधामः।**

अधः केचिद् धातवः दीयन्ते। एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य तेषां रूपाणि कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **पठति पठतः पठन्ति। पठसि पठथः पठथ। पठामि पठावः पठामः।**

२) **गद** व्यक्तायां वाचि - **गदति गदतः गदन्ति। गदसि गदथः गदथ। गदामि गदावः गदामः।**

३) **अर्च** पूजायाम्- **अर्चति अर्चतः अर्चन्ति। अर्चसि अर्चथः अर्चथ। अर्चामि अर्चावः अर्चामः।**

४) **व्रज** गतौ - **व्रजति व्रजतः व्रजन्ति। व्रजसि व्रजथः व्रजथ। व्रजामि व्रजावः व्रजामः।**

५) **कटँ** वर्षावरणयोः- **कटति कटतः कटन्ति। कटसि कटथः कटथ। कटामि कटावः कटामः।**

६) **क्षि** क्षये - **क्षयति क्षयतः क्षयन्ति। क्षयसि क्षयथः क्षयथ। क्षयामि क्षयावः क्षयामः।**

७) **चितीँ** संज्ञाने - **चेतति चेततः चेतन्ति। चेतसि चेतथः चेतथ। चेतामि चेतावः चेतामः।**

८) **तप** सन्तापे - **तपति तपतः तपन्ति। तपसि तपथः तपथ। तपामि तपावः तपामः।**

९) **शुच** शोके - **शोचति शोचतः शोचन्ति। शोचसि शोचथः शोचथ। शोचामि शोचावः शोचामः।**

पाठगतप्रश्नाः-७

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

४४. षोपदेशधातुः कः। उदारहणं देयम्।

४५. णोपदेशधातुः कः। उदारहणं देयम्।

४६. उपदेशे धात्वादेः षस्य किं भवति, केन च सूत्रेण।

४७. उपदेशे धात्वादेः णस्य किं भवति, केन च सूत्रेण।

४८. उपदेशे यदि धातुः इदित् अस्ति तर्हि किं भवति, केन च सूत्रेण।

४९. सेधति इति रूपे सिध्-धातोः इकारस्य एकारः केन सूत्रेण।

५०. सार्वधातुके परे लघूपधस्य अङ्गस्य इकः गुणः केन सूत्रेण।

५१. नन्दति इत्यत्र नद् धातुः उपदशे कीदृशः।

५२. कस्मिन् परे लघूपधस्य अङ्गस्य इकः गुणः भवति।

१) सार्वधातुके २) आर्धधातुके ३) सार्वधातुके आर्धधातुके च ४) इडागमे

५३. पुगन्तलघूपधस्य च इत्यस्य उदाहरणम् किम्।

१) भवति २) सेधति ३) क्षयति ४) अक्षैषीत्

५४. नन्दति इत्यत्र नद् धातोः अर्थः कः।

१) वृद्धिः २) समृद्धिः ३) सत्ता ४) अव्यक्तः शब्दः

पाठसारः

भूवादयो धातव इति सूत्रेण धातुपाठे पठितानां शब्दस्वरूपाणां धातुसंज्ञा भवति। धातवः क्रियावाचकाः भवन्ति। धातोः अर्थः फलं व्यापारश्च। धातोः व्यापारः विभिन्नेषु कालेषु वर्तते इति द्योतनाय धातोः परं विभिन्नाः लकाराः प्रयुज्यन्ते। एते लकाराः प्राधान्येन लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण विधीयन्ते। तेषां लकाराणां यथा वर्तमानादिकालाः अर्थाः तथा कर्ता कर्म भावः एते अपि अर्थाः सन्ति। अत्र भावशब्दस्यार्थः क्रिया एव। सकर्मकधातोः परं कर्तरि कर्मणि च लकारः भवति। अकर्मकधातोः परं कर्तरि भावे च लकारः भवति। कस्माद् धातोः लकारः कदा कर्तरि कदा कर्मणि इत्यादि विवक्षाधीनम्।

धात्वर्थः व्यापारः वर्तमाने काले वर्तेते इति द्योतनाय वर्तमाने लट् इति सूत्रेण लट् विधीयते। लस्य स्थाने तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातञ्झ-थासाथांध्वम्-इड्वहिमहिङ् इति सूत्रेण अष्टादश आदेशाः विधीयन्ते। एते लादेशाः इति कथ्यते। ततश्च लः परस्मैपदम् इति तङानावात्मनेपदम् इति सूत्रद्वयस्य पर्यालोचनया इदं लभ्यते यत् तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस् परस्मैपदसंज्ञकाः सन्ति। तङ् प्रत्याहारः शानच्-कानचौ च आत्मनेपदसंज्ञाः भवन्ति।

उपदेशे यस्य धातोः अनुदात्ताच् इत् अस्ति, यस्य धातोः ङकारः इत् तादृशात् धातोः अनुदात्तङित आत्मनेपदम् इति सूत्रेण आत्मनेपदसंज्ञकाः प्रत्ययाः विधीयन्ते। उपदेशे यस्य धातोः स्वरिताच् इत् अस्ति, यस्य धातोः ञकारः इत् अस्ति, अपि च तद्धातोः क्रियाफलं कर्तारम् गच्छति इति ईदृशाद् धातोः आत्मनेपदविधानम् स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रेण क्रियते।

वाक्ये प्रयुक्तस्याप्रयुक्तस्य वा युष्मदः वाच्यं कारकम्, एवञ्च धातोः परं विहितस्य लकारस्य वाच्यं कारकं यदि समानं स्यात् तर्हि धातोः परं मध्यमसंज्ञकः प्रत्ययः भवति "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" इति सूत्रेण। अस्मद् लस्य समानाधिकरणः अस्ति चेत् धातोः परम् उत्तमसंज्ञकः प्रत्ययः अस्मद्युत्तम इति सूत्रेण विधीयते। यत्र एकस्मिन् वाक्ये युष्मद्-लकारयोः सामानाधिकरण्यम् एवञ्च अस्मद्-लकारयोः सामानाधिकरण्यम् इति एतद्वयमपि नास्ति चेत् धातोः परम् प्रथमसंज्ञकः प्रत्ययः शेषे प्रथमः इति सूत्रेण विधीयते।

धात्वधिकारोक्तः तिङ् शिच्च सार्वधातुकसंज्ञकः तिङ् शित् सार्वधातुकम् इति सूत्रेण भवति। तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञां लभते। किञ्च लिटः स्थाने विहितः तिङ् लिट् च इति सूत्रेण आर्धधातुकसंज्ञकः भवति। एवञ्च आशीर्वादार्थे विहितस्य लिङः स्थाने विहितः तिङ् लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञकः भवति।

धातुतः कर्त्रर्थं सार्वधातुकं परम् अस्ति चेत् कर्तरि शप् इति सूत्रेण धातोः परं शप् विधीयते। यदि सार्वधातुके आर्धधातुके वा परे इगन्तम् अङ्गं यदि स्यात् तर्हि "सार्वधातुकार्धधातुकयोः" इति सूत्रेण इकः गुणः विधीयते। इत्थं भू अ ति इति स्थिते भू इत्यस्य ऊकारस्य ओकारः भवति। ओकारस्यापि अवादेशे भवति इति रूपं सिध्यति।

झि इति प्रथमबहुचनस्य प्रत्ययः। तस्य झकारस्य स्थाने अन्त् इत्यादेशः झोऽन्तः इति सूत्रेण भवति। ततश्च भवन्ति इति रूपं सिध्यति। यञादौ सार्वधातुके परे अदन्तस्य अङ्गस्य स्थाने दीर्घः अतो दीर्घो यञि इति सूत्रेण विधीयते।

पाणिनिना धातुपाठे केचिद् धातवः णादित्वेन षादित्वेन च उपदिष्टाः। तेषां णस्य नत्वं षस्य सत्वं च धात्वादेः षः सः, णो नः इति सूत्राभ्यां भवति।

यथा सार्वधातुके आर्धधातुके वा परे इगन्ताङ्गस्य गुणो भवति, तद्वत् यस्य अङ्गस्य उपधा लघ्वी अस्ति, तत्र इग्लक्षणगुणविधानाय पुगन्तलघूपदस्य चेति सूत्रे कृतं पाणिनिना।

एतावान् विषयोऽत्र उपन्यस्तोऽस्ति।

पाठान्तप्रश्नाः

१. लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रं व्याख्यात।

२. धातोः सकर्मकत्वम् अकर्मकत्वं च सोदाहरणं प्रतिपादयत।

३. लकारान् परिचाययत।

४. वर्तमाने लट् इति सूत्रं व्याख्यात।

५. कालम् आश्रित्य लघुनिबन्धं रचयत।

६. लः परस्मैपदम् इति सूत्रं व्याख्यात।

७. तङानावात्मनेपदम् इति सूत्रं व्याख्यात।

८. तङानावात्मनेपदम् इति सूत्रस्थेन आन इत्यनेन चानशः ग्रहणं कुतो न।

९. अनुदात्तङित आत्मनेपदम् इति सूत्रं व्याख्यात।

१०. स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रं व्याख्यात।

११. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इति सूत्रं व्याख्यात।

१२. अस्मद्युत्तमः इति सूत्रं व्याख्यात।

१३. शेषे प्रथमः इति सूत्रं व्याख्यात।

१४. प्रथममध्यमोत्तमानाम् प्रयोगम् अवलम्ब्य प्रबन्धं लिखत।

१५. धातोः लस्य स्थाने तिपः विधानं यावत् कथं सूत्राणि व्यस्थापयन्ति इति विशदीकुरुत।

१६. तिङ् शित् सार्वधातुकम् इति सूत्रं व्याख्यात।

१७. आर्धधातुकं शेषः इति सूत्रं व्याख्यात।

१८. कस्य सार्वधातुकसंज्ञा कस्य वा आर्धधातुकसंज्ञा इति सारं संगृह्णीत।

१९. सार्वधातुकार्धधातुकयोः इति सूत्रं व्याख्यात।

२०. अतो दीर्घो यञि इति सूत्रं व्याख्यात।

२१. पुगन्तलघूपधस्य च इति सूत्रं व्याख्यात।

२२. एतानि रूपाणि ससूत्रं साधयत। - भवति, भवन्ति, भवामि, भवामः।

२३. ससूत्रं रूपाणि साधयत – नन्दति, सेधति, नन्दन्ति, सेधामि।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि- १

१. लादेशाः सकर्मकधातुभ्यः कर्मणि कर्तरि च भवन्तीति प्रथमवाक्यम्। लादेशाः अकर्मकेभ्यः धातुभ्यः भावे कर्तरि च विधीयन्ते द्वितीयं वाक्यम्।

२. यस्य धातोः अर्थः फलम् एकस्मिन् कारके वर्तते, व्यापारः अपरस्मिन् कारके वर्तते स धातुः सकर्मकः कथ्यते।

३. यस्य धातोः फलम् यस्मिन् कारके वर्तते, व्यापारः अपि तस्मिन्नेव कारके वर्तते स धातुः अकर्मकः कथ्यते।

४. दश।

५. षट्।

६. चत्वारः।

७. लेट्।

८. यस्य धातोः अर्थः व्यापारः अर्थात् क्रिया वर्तमानकाले वर्तते स धातुः वर्तमानक्रियावृत्तिः कथ्यते। वर्तमाने (काले) क्रियायाः वृत्तिः यस्य स वर्तमानक्रियावृत्तिः धातुः।

९. भू।

१०. लट्। वर्तमाने लट्।

उत्तराणि- २

११. तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति एते अष्टादश लादेशाः।

१२. तिप् तस् झि सिप् थस् थ मिप् वस् मस् इति एतेषां परस्मैपदसंज्ञा।

१३. त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति एवञ्च शानच् कानच् इति एतेषाम् आत्मनेपदसंज्ञा।

१४. लः परस्मैपदम्।

१५. तङानावात्मनेपदम्।

१६. यदा अनुबन्धरहितस्य उच्चारणं क्रियते तदा तेन अनुबन्धसहितस्य ग्रहणं कर्तव्यमिति निरनुबन्धकग्रहणे सानुबन्धकस्य इति परिभाषार्थः।

उत्तराणि- ३

भ्वादिप्रकरणे- भूधातोः लटि रूपसाधनम् -२

१७. आत्मनेपदसंज्ञकः।

१८. आत्मनेपदसंज्ञकः।

१९. धातुनिष्ठानि।

२०. द्वन्द्वसमासस्य आदौ मध्ये अन्ते वा विद्यमानम् द्वन्द्वसमासस्य अनङ्गभूतम् पदम् द्वन्द्वसमासे विद्यमानैः पदैः प्रत्येकम् अभिसम्बध्यते, अन्वेति इति।

२१. लस्य।

२२. भ्वादिप्रकरणे आलोचितानि आत्मनेपदविधानस्य कानिचन निमित्तानि - उपदेशे यस्य धातोः अनुदात्ताच् इत् अस्ति, यस्य धातोः ङकारः इत् अस्ति द्वे निमित्ते। एवञ्च उपदेशे यस्य धातोः स्वरिताच् इत् अस्ति, यस्य धातोः ञकारः इत् अस्ति, अपि च तद्धातोः क्रियाफलं कर्तारम् गच्छति इत्यपि द्वे निमित्ते आत्मनेपदविधानस्य।

२३. ञितो धातोः कर्तृगामिनि क्रियाफले आत्मनेपदं विधीयते।

२४. एधँ वृद्धौ। कमुँ कान्तौ।

२५. आत्मनेपदनिमित्तहीनः धातुः हि शेषपदार्थः।

२६. तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः।

२७. तान्येकवचनद्विवचनबहुवचनान्येकशः।

उत्तराणि- ४

२८. वाक्ये युष्मद् लस्य समानाधिकरणः अस्ति चेत् मध्यमः विधीयते।

२९. वाक्ये अस्मद् लस्य समानाधिकरणः अस्ति चेत् उत्तमः विधीयते।

३०. वाक्ये मध्यमोत्तमयोः अविषये प्रथमः विधीयते।

३१. वाच्यम्, अर्थः, अभिधेयः।

३२. युष्मद्-लकारयोः सामानाधिकरण्यं चेत् धातोः मध्यमो विधेयः। अस्मद्-लकारयोः सामानाधिकरण्यं चेत् धातोः उत्तमो विधेयः इति उक्ताद् एतद्द्वयाद् अन्यः शेषः। सामानाधिकरण्यद्वयं वाक्ये नास्ति चेत् शेषः अस्ति। एवञ्च तदा धातोः प्रथमसंज्ञकः विधेयः।

उत्तराणि- ५

३३. धात्वधिकारोक्तः तिङ् शित् च सार्वधातुकसंज्ञः।

३४. तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः, लिडादेशः तिङ्, आशिषि लिङादेशः तिङ् च आर्धधातुकसंज्ञकाः भवन्ति।

३५. तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः शेषः।

३६. कोऽपि लकारः सार्वधातुकसंज्ञकः नास्ति, तिङ्भिन्नत्वात् शिद्भिन्नत्वाच्च।

३७. लिडादेशः तिङ्, आशिषि लिङादेशः तिङ् च आर्धधातुकसंज्ञकः भवतः।

३८. आर्धधातुकम्।

३९. लुटि लृटि लुङि लृङि च धातु-लकारयोः मध्ये तास् स्य च्लि स्य एते विधीयन्ते। ते धातोः विहिताः तिङ्भिन्नाः, शिद्भिन्नाः च सन्ति। अतः आर्धधातुकसंज्ञकाः सन्ति।

उत्तराणि- ५

४०. कर्त्रर्थे सार्वधातुके परे धातोः शप् भवति।

४१. सार्वधातुकार्धधातुकयोः इति सूत्रेण।

४२. प्रत्ययावयवस्य झकारस्य स्थाने अन्त् इत्यादेशः स्यादिति झोऽन्तः इति सूत्रस्यार्थः।

४३. भवसि।

४४. उपदेशे यस्य धातोः आदिः षकारः भवति स षोपदेशधातुः। यथा षिध।

४५. उपदेशे यस्य धातोः आदिः णकारः भवति स णोपदेशधातुः। यथा णीञ्।

४६. उपदेशे धात्वादेः षस्य सकारः भवति, धात्वादेः षः सः इति सूत्रेण।

४७. उपदेशे धात्वादेः णस्य नकारः भवति, णो नः इति सूत्रेण।

४८. उपदेशे यदि धातुः इदित् अस्ति तर्हि इदितो नुम् धातोः इति सूत्रेण तस्य नुमागमः भवति।

४९. पुगन्तलघूपधस्य च।

५०. पुगन्तलघूपधस्य च।

५१. नन्दति इत्यत्र नद् धातुः उपदशे टुनदि इतीदृशः।

५२. ३

५३. २

५४. २

॥इति त्रयोदशः पाठः ॥

346sk14

१४

भ्वादिप्रकरणे - भूधातोः लिटि लुटि च रूपसाधनम्

प्रस्तावना

व्याकरणाध्ययनं सोपनक्रमेण भवति। अर्थात् दशमकक्षायाः व्याकरणस्य पुस्तकं यो जानाति स एव अत्र पठितुं बोद्धुम् रूपाणि च साधयितुम् प्रभवेत्। भूवादयो धातव इति सूत्रेण धातुपाठपठितानां धातूनां धातुसंज्ञा भवतीति दशमकक्षायाः पाठ्यपुस्तके विषयः आसीत्। सम्प्रति अपि तिङन्तप्रकरणे लट्-लकारे बहूनि सूत्राणि गतानि यानि अत्र लिल्लकारे प्रयुज्यन्ते। अतः लल्लकारस्य सम्यग् ज्ञानमुपार्ज्य अत्र प्रवर्तितव्यम्। एवञ्च रूपसाधने यद्यपि पूर्वसूत्राणि परिभाषाः बाहुल्येन आवश्यकानि तथापि तानि सर्वाणि सर्वेषु रूपेषु नोच्यन्ते। कानिचन रूपाणि नायकत्वेन प्रदर्श्यन्ते। अन्येषु रूपेषु छात्रेण स्वयं तानि स्थलानि ऊह्यानि इति अपेक्षा।

साधुधातुरूपसाधनं प्रधानं लक्ष्यमत्र। प्रथमं धातुसंज्ञा। ततः लकारविधानम्। ततः लादेशविधानम्। ततः सति प्रसङ्गे शबादिविकरणविधानम्। लिट्-लकारे अभ्यासकार्यम्। ततः धातु-प्रत्यययोः सन्धिकार्याणि। एवं क्रमेण सामान्यतः रूपं सिद्धं भवति। एतावता धातुसंज्ञा, लकारविधानम्, लस्य स्थाने तिङो विधानम्, क्वचित् धातु-प्रत्ययोः सन्धिः इति एतानि कार्याणि अतिक्रान्तानि पूर्वस्मिन् पाठे। इतः परं लिट्-लकारे एतेषाम् उपयोगः, अभ्यासादिकार्याणि च नूत्नः विषयः समायाति।

लिट्-लकारोत्तरं लुट् लकारः प्रस्तूयते अस्मिन् पाठे एव। यतो हि लकाराणां क्रमः माहेश्वरसूत्रक्रमेणास्ति। यद्यपि पाणिनिः स्वयम् अष्टाध्याय्यां भिन्नेनैव क्रमेण सूत्राणि उपन्यस्तवान् तथापि सर्वादृतः क्रमः अत्रापि आद्रियते।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- लिट्-लकारस्य सूत्राणि बुध्यात्।
- लिटि धातुरूपाणि साधयितुं प्रभवेत्।
- लिट्-लकारं प्रयोक्तुं समर्थो भवेत्।
- संस्कृतव्याकरणे परोक्षकालं जानीयात्।

- अभ्यासकार्यं कर्तुं प्रभवेत्।
- भूधातोः लुट्-लकारे रूपाणि कथं भवन्ति इति ज्ञास्यति।
- लुट्-लकारस्य सूत्राणि व्याख्यातुं प्रभवेत्।
- अनद्यतनभविष्यत्कालीनायाः क्रियायाः प्रकटनाय लुट् प्रयोक्तुं समर्थो भविष्यति।
- अनुवृत्तिः अधिकारः आक्षेपः तदादिविधिः तदन्तविधिः एषाम् इतोऽपि अधिकान् प्रयोगस्थलान् ज्ञास्यति।

भूधातोः लिट्-लकारः रूपाणि

[१४.१] परोक्षे लिट्॥ (३.२.११५)

सूत्रार्थः - भूताऽनद्यतनपरोक्षार्थवृत्तेर्धातोः लिट् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। सूत्रेणानेन लिट्लकारो विधीयते। द्विपदात्मकमिदं सूत्रम्। परोक्षे इति सप्तम्येकवचनान्तं समस्तपदम्। अक्ष्णोः परम् परोक्षम् इति अव्ययीभावसमासः। अक्षिशब्दोऽत्र इन्द्रियसामान्यवाची। इन्द्रियागोचरत्वं परोक्षत्वम्। लिट् इति प्रथमैकवचनान्तं पदम्। अनद्यतने लङ् इति सूत्राद् अनद्यतने इति सप्तम्यन्तं पदमनुवर्तते। अद्य भवः अद्यतनः, अविद्यमानः अद्यतनः यस्मिन् सः अनद्यतनः कालः इति बहुव्रीहिसमासः। अतीतरात्रेः अन्त्ययामेन आगामिरात्रेः आद्ययामेन सहितः कालः अद्यतनः। तद्भिन्नः अनद्यतनः। भूते इत्यधिकारपठितमिदं सूत्रम्। भूतत्वं नाम अतीतकालः। धातोः इति अधिकृतमस्ति। प्रत्ययः (३.१.१), परश्च (३.१.२) सूत्रद्वयम् अत्र अधिकृतम्। सूत्रमिदं प्रत्ययाधिकारे पठितम्। तस्मात् लिट् इति प्रत्ययः। धातोः इति पञ्चम्यन्तं पदम्। तस्मादित्युत्तरस्य इति परिभाषाप्रभावेन परश्च इति सूत्रबलेन च लिट् धातोः अव्यवहितः परः विधीयते। एतेन भूते अनद्यतने परोक्षे धातोः परः लिट् प्रत्ययः इति सूत्रगतपदान्वयः। लिडिति प्रथमान्तं विधेयबोधकं पदम्। भूते अनद्यतने परोक्षे इति त्रिष्वेव सप्तम्यन्तपदेषु विषयसप्तमी। एवं क्रियायाः भूताऽनद्यतनपरोक्षत्वविवक्षायां धातोः लिट् स्यात् इति सूत्रार्थो भवति।

धातोः अर्थः व्यापारः फलं चेति उक्तमेव। यस्य धातोः अर्थः व्यापारः अर्थात् क्रिया अनद्यतने भूते परोक्षे च वर्तते स धातुः भूताऽनद्यतनपरोक्षार्थवृत्तिः कथ्यते। तस्मिन् काले क्रियायाः वृत्तिः यस्य स भूताऽनद्यतनपरोक्षक्रियावृत्तिः धातुः। यदि तस्मिन् काले क्रिया इति प्रकटनस्य विवक्षा अस्ति तर्हि धातोः लिट् विधीयते।

उदाहरणम् - रामः अयोध्याया राजा बभूव।

सूत्रार्थसमन्वयः - अयोध्यायां राजा रामः आसीत्। परन्तु तदवस्थं भूतं रामम् वक्ता न प्रत्यक्षीकृतवान्। अतः अत्र लिट् प्रयुक्तः।

बभूव - भूधातोः भूतानद्यतनपरोक्षार्थवृत्तित्वविवक्षायां परोक्षे लिट् इति सूत्रेण कर्तरि लिट्लकारो विधीयते। लिटः इकारटकारयोः इत्संज्ञायां लोपे च कृते भू ल् इति स्थिते लस्य स्थाने प्रथमपुरुषैकवचनविवक्षायां तिपि भू ति इति भवति। तदा -

[१४.२] परस्मैपदानां णलतुसुस्थलथुसणल्वमाः॥(३.४.८२)

सूत्रार्थः - लिटः स्थाने विधीयमानानां परस्मैपदसंज्ञकानां तिबादीनां नवानां स्थाने णलादयः नव प्रत्ययाः स्युः।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं साक्षाल्लक्ष्यसंस्कारत्वाद् विधिसूत्रम्। द्विपदात्मकमिदं सूत्रम्। परस्मैपदानाम् इति षष्ठीबहुवचनान्तं पदम्। इयं च स्थानषष्ठी। तेन परस्मैपदसंदज्ञकानां प्रत्ययानां स्थाने इत्यर्थ आयाति। तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस् इति नव परस्मैपदसंज्ञकाः प्रत्ययाः। णल्-अतुस्-उस्-थल्-अथुस्-अ-णल्-व-माः इति प्रथमाबहुवचनान्तं समस्तपदम्। णल् च अतुस् च उस् च थल् च अथुस् च अः च णल् च वः च मः च णलतुसुस्थलथुसणल्वमाः, इति इतरेतरद्वन्दसमासः। लिटस्तझयोरेशिरेच् इति सूत्रात् लिटः इति षष्ठ्यन्तं पदमनुवर्तते। धातोः (३.१.९१) इत्यधिक्रियते। धातोः लिटः परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इति सूत्रगतपदान्वयः। तेन लिट्स्थानिकानां परस्मैदसंज्ञकानां नवानां प्रत्ययानां स्थाने णलादयः नव प्रत्ययाः क्रमेण स्युरित्यर्थः।

णलादयो नव प्रत्ययाः। परस्मैदसंज्ञका अपि नव एव। अत स्थान्यादेशयोः समसंख्यकत्वात् यथासंख्यमनुदेशः समानाम् इति परिभाषया तिबादीनां स्थाने णलादयः क्रमेण भवन्ति। तद्यथा-

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
	स्थानी - आदेशः	**स्थानी - आदेशः**	**स्थानी - आदेशः**
प्रथमपुरुषः	तिप् - णल् (अ)	तस् - अतुस्	झि - उस्
मध्यमपुरुषः	सिप् - थल् (थ)	थस् - अथुस्	थ - अ
उत्तमपुरुषः	मिप् - णल् (अ)	वस् - व	मस् - म

तिबादीनां स्थाने णलादयः विधीयन्ते। यावत् णलादयः तिबादीनां स्थानग्रहणं कुर्वन्ति तावत् तिबादीनां धर्माः णलादिषु न आरोप्यन्ते। अतः एव णलादीनां प्रत्ययसंज्ञा अपि णलादिप्रयोगात् उत्तरमेव। अतः यावत् णल् तिपः निवृत्तिं न करोति तावत् णल् प्रत्ययः नास्ति। प्रत्ययः नास्ति चेत् चुटू इति सूत्रेण तस्य आद्यस्य णकारस्य इत्संज्ञा न भवति। अतः प्रयोगात् पूर्वं णलः अनेकाल्त्वम् अस्ति। तेन अनेकाल्शित् सर्वस्य इति सूत्रे सर्वस्य तिपः स्थाने एव आदेशः भवति न तु अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य। एवं तेषु तेषु प्रत्ययेषु बोध्यम्। एवञ्च अ इत्यादेशो यद्यपि एकाल् तथापि अयम्

(अ+अ) द्वयोः अकारयोः प्रश्लेषात् संहितया सिद्ध आदेशः। अतो गुणे इति पररूपमत्र भवति, तेनात्र सवर्णदीर्घो न भवति। तेनात्र सर्वादेशत्वं निर्बाधं सम्भवति।

उदाहरणम् -

स्थानी	**आदेशः**	**उदाहरणम्**
तिप्	णल् (अ)	बभूव
तस्	अतुस्	बभूवतुः
झि	उस्	बभूवुः
सिप्	थल् (थ)	बभूविथ
थस्	अथुस्	बभूवथुः
थ	अ	बभूव
मिप्	णल्	बभूव
वस्	व	बभूविव
मस्	म	बभूविम

सूत्रार्थसमन्वयः - भू ति इत्यवस्थायां परस्मैपदसंज्ञकस्य तिपः स्थाने प्रकृतसूत्रेण णलादेशे लस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण लस्य लोपे च ण इत्यस्य अनेकाल्त्वात् अनेकाल्शित् सर्वस्य इति सूत्रेण तिपः सर्वस्य स्थाने णादेशे भू ण इति जायते। अत्र ण इत्यस्य स्थानिवद्भावेन प्रत्ययसंज्ञा भवति। चुटू इति सूत्रेण प्रत्ययाद्यस्य णकारस्य इत्संज्ञा भवति, तस्य लोपः इति सूत्रेण णस्य लोपः च भवति। तदा भू अ इति स्थितिः जायते। तदा -

[१४.३] भुवो वुग् लुङ्-लिटोः॥ (६.४.८८)

सूत्रार्थः - लुङ्लिट्लकारसम्बन्धिनि अज्वर्णे परतः भूधातोः वुगागमो भवति।

सूत्रव्याख्या - सूत्रमिदं साक्षाल्लक्ष्यसंस्कारतया विधिकोटौ अन्तर्याति। त्रिपदात्मकेऽस्मिन् सूत्रे भुवः वुक् लुङ्लिटोः इति पदच्छेदः। अत्र भुवः इति भूशब्दस्य षष्ठ्यन्तं रूपम्। लुङ्लिटोः इति सप्तमीद्विवचनान्तं समस्तपदम्। पदद्वयमेव उद्देश्यबोधकं पदम्। लुङ् च लिट् च लुङ्लिटौ इतीतरेतरयोगद्वन्दसमासः, तयोः लुङ्लिटोरिति। वुक् इति प्रथमान्तं विधेयसमर्पकं पदम्। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रात् अचि इति सप्तम्यन्तपदमत्रानुवर्तते। लुङ्लिटोः अचि इत्युभयं पदं समविभक्तिकत्वात् अभेदेनार्थबोधं जनयति। किञ्च अचीति पदं लुङि, लिटि चोभयस्मिन् पृथक्तया

अन्वेति। तेन लुङ्सम्बन्धिनि अचि परे तथा लिट्सम्बन्धिनि अचि परे इत्यर्थ आयाति। अङ्गस्य इत्यधिकृतम्। पदयोजना - लुङ्लिटोः अचि अङ्गस्य भुवः वुक्। अङ्गस्य भुवः इति पदद्वयं षष्ठ्यन्तं समानविभक्तिकम्। परन्तु अत्र तदन्तविधिर्नास्ति। अभेदान्वयः भवति। अङ्गं यो भूः तस्य इत्यर्थो भवति। सूत्रार्थो भवति - लुङ्लिट्सम्बन्धिनि अचि परतः अङ्गसंज्ञकस्य भुवः वुगागमो भवति इति।

वुकः उकारः उच्चारणार्थः। किञ्च ककारः औपदेशिकत्वात् हलन्त्यम् इत्यनेन इत्संज्ञकः। तेन वुक् इत्ययमागमः आद्यन्तौ टकितौ इति परिभाषया कित्त्वात् भूशब्दस्य अन्तावयवो भवति।

उदाहरणे सूत्रार्थसमन्वयः - भू अ इति स्थिते लिट्सम्बन्धिनि अकाररूपे अज्वर्णे परतः प्रकृतसूत्रेण भू इत्यस्य वुक् इत्ययमागमो भवति। स च आगमः कित्त्वात् भूशब्दस्य अन्त्याद् ऊकारात् परं भवति, तस्यैव अन्त्यावयवश्च भवति। तेन भूव् अ इति जायते। तदा -

पाठगतप्रश्नाः-१

१. किं परोक्षत्वम् लिटि।

२. लिट् कदा प्रयोक्तव्यः।

३. तिपः णल् कथं सर्वादेशः।

४. भुवः वुक् केषु लकारेषु।

५. भुवो वुग् लुङ्-लिटोः इति सूत्रेण विहितः वुक् कः।

१) आगमः २) आदेशः ३) प्रत्ययः ४) स्थानी

[१४.४] लिटि धातोरनभ्यासस्य॥ (६.१.८)

सूत्रार्थः - लिटि परे अनभ्यासधात्ववयवस्य एकाचः प्रथमस्य द्वे स्तः, आदिभूतादचः परस्य तु द्वितीयस्य।

सूत्रव्याख्या - षड्विधसूत्रेषु इदं विधिसूत्रम्। त्रिपदात्मकेऽस्मिन् सूत्रे लिटि धातोः अनभ्यासस्य इति पदच्छेदः। तत्र लिटि इति सप्तम्येकवचनान्तं पदम्। औपश्लेषाधिकरणं च सप्तम्यर्थः। धातोः इति षष्ठ्येकवचनान्तं पदम्। अवयवायविभावसम्बन्धेनात्र षष्ठी विहिता। अतः धात्ववयवस्य इति तदर्थः। अनभ्यासस्य इति षष्ठ्येकवचनान्तं समस्तपदम्। न अभ्यासः अनभ्यासः, तस्य अनभ्यासस्य इति नञ्समासः। अभ्याससंज्ञारहितस्य इति तदर्थः। एतच्च धातोः इत्यस्य विशेषणं, समविभक्तिकत्वात्। एकाचो द्वे प्रथमस्य , अजादेर्द्वितीयस्य चेति सूत्रद्वयमत्र अधिक्रियते। तत्र एकाचः इति षष्ठ्येकवचनान्तं समस्तपदम्। एकः अच् यस्य यस्मिन् वा स एकाच् , तस्य एकाचः इति बहुव्रीहिसमासः। एतच्च धातोः इत्यनेन सम्बध्यते। तेन धात्ववयवस्य एकाचः इति तदर्थः। प्रथमस्य इत्यपि षष्ठ्येकवचनान्तम्, एकाचः

इत्यस्य विशेषणम्। द्वे इति प्रथमान्तं विधेयबोधकं पदम्। अजादेः इति पञ्चम्येकवचनान्तं समस्तपदम्। अच् चासौ आदिश्च अजादिः इति कर्मधारयसमासः। तस्माद् अजादेः इति। द्वितीयस्य इति षष्ठ्येकवचनान्तं पदम्। सूत्रगतपदानामन्वयः एवम् - लिटि अनभ्यासस्य धातोः प्रथमस्य एकाचः द्वे, अजादेः द्वितीयस्य इति। द्वे इत्यनेन द्विरुच्चारणं द्विः प्रयोगो वा विधीयते।

सूत्रे वाक्यद्वयं वर्तते। तद्धि - प्रथमं वाक्यम् - लिटि परे अभ्याससंज्ञारहितस्य धातोः अवयवभूतस्य प्रथमैकाज्भागस्य द्वित्वं भवति।

द्वितीयं वाक्यम् - धातुः अनेकाच् तथा अजादिः चेत् लिटि परतः तस्यैव धातोः द्वितीयस्य एकाज्भागस्य द्वित्वं भवतीति

अत्र उत्तरवाक्ये अजादेर्द्वितीयस्येत्यत्र द्वितीयस्येति वचनात् धातौ अनेकाच्त्वं विशिष्यते। अन्यथा एकाज्धातौ द्वितीयस्य अज्भागस्य अभावात् द्वितीयस्येति वचनं व्यर्थं स्यात्।

अतः सूत्रार्थ एवं भवति - लिटि परतः अभ्याससंज्ञारहितस्य धात्ववयवस्य प्रथमस्य एकाचः द्विः प्रयोगो भवति, आदिभूतादचः परस्य तु द्वितीयस्य एकाज्भागस्य द्विः प्रयोगो भवति इति।

उदाहरणे सूत्रार्थसमन्वयः - भूधातोः लिटि तिपि णलि वुगागमे च कृते भूव् अ इति स्थितिः जाता। धातोः अभ्याससंज्ञा नास्ति। अतः प्रकृतसूत्रेण लिटि परतः प्रथमस्य अज्भागस्य द्विः प्रयोगो भवति। तेन भूव् भूव् अ इति जायते। तदा -

[**विमर्शः** - एकाचः इत्यत्र बहुव्रीहिरेव ग्राह्यः। एकश्चासौ अच्च एकाच्, तस्य एकाचः इति कर्मधारयस्वीकारे तु इणाद्येकाज्धातूनां द्वित्वं सिध्यति, किन्तु पचादीनां धातूनां द्वित्वं न भवति। तेन पपाच इत्यादि न सिध्येत। बहुव्रीहिस्वीकारे तु इयाय इत्यादिस्थले इणादीनां द्वित्वं व्यपदेशिवद्भावेन सिध्यतीति न दोषः। किञ्च अजादेः इत्यत्र कर्मधारयसमास एव ग्राह्यः। अन्यथा अच् आदिर्यस्य अजादिः, तस्य अजादेरिति बहुव्रीहिस्वीकारे तु इन्द्रीय इति क्यजन्तात् सनि इन्द्रिद्रीयिषति इतीष्टं रूपं न सिद्ध्यति।]

[१४.५] पूर्वोऽभ्यासः॥ (६.१.४)

सूत्रार्थः - षाष्ठद्वित्वप्रकरणे यत् द्वित्वं विहितं, तयोः पूर्वस्य अभ्याससंज्ञा भवति।

सूत्रव्याख्या - शक्तिग्राहकत्वात् षड्विधेषु पाणिनीयसूत्रेष्विदं संज्ञासूत्रम्। सूत्रेऽस्मिन् द्वे पदे स्तः। पूर्वः अभ्यासः इति सूत्रगत-पदच्छेदः। पदद्वयमपि प्रथमैकवचनान्तम्। सूत्रेणानेन अभ्याससंज्ञा विधीयते। कस्येयं संज्ञेति आकाङ्क्षायां एकाचो द्वे प्रथमस्य (६.१.१) इति सूत्रात् द्वे इति पदमनुवर्तते। तच्च द्वयोः इति षष्ठीद्विवचनतया विपरिणमते। सूत्रमिदं एकाचो द्वे प्रथमस्य इति सूत्राधिकारे पठितम्। अतः द्विरुक्तयोः पूर्वभागस्य अनेन अभ्याससंज्ञा विधीयते। द्वयोः पूर्वः अभ्यासः इत्यन्वयः। सूत्रार्थो भवति - षाष्ठद्वित्व-प्रकरणे ये द्वे विहिते, तयोः पूर्वभागः अभ्याससंज्ञको भवति इति।

अभ्याससंज्ञायाः फलम् अभ्यासे चर्च (८.४.५४) , ह्रस्वः (७.४.४९) इत्यादिसूत्रेषु स्पष्टम्।

उदाहरणे सूत्रार्थसमन्वयः - भूधातोः लिटि धातोरनभ्यासस्य (६.१.८) द्वित्वे कृते भूव् भूव् अ इति स्थितिरुद्भूता। अत्र द्वित्वविधायकसूत्रं षाष्ठद्वित्वप्रकरणे विद्यते। अतः प्रकृतसूत्रेण पूर्वभागस्य अभ्याससंज्ञा भवति। तदा -

[१४.६] हलादिः शेषः। ७.४.६०।।

सूत्रार्थः - अभ्यासस्य आदिः हल् एव शिष्यते, अन्ये हलो लुप्यन्ते।

सूत्रव्याख्या - षड्विधपाणिनीयसूत्रेषु विधिसूत्रमिदम्। त्रिपदात्मकमिदं सूत्रम्। हल् आदिः शेषः इति पदच्छेदः। त्रीण्यपि पदानि प्रथमैकवचनान्तानि। शिष्यते इति शेषः। इतरनिवृत्तिपूर्वकावस्थित्यर्थे विद्यमानात् शिष्-धातोः कर्मणि घञा निष्पन्नोऽयं शब्दः। अत्र लोपोऽभ्यासस्य इति सूत्रात् अभ्यासस्य इति षष्ठ्यन्तपदमनुवर्तते। एवम् अभ्यासस्य आदिः हल् शेषः पदयोजना। तेन सूत्रार्थो भवति- अभ्यासस्य आदिः हल् एव शिष्यते, अन्ये हलो लुप्यन्ते इति। शिष्-धातोः इतरनिवृत्तिरूपव्यापारेण अन्येषां हलाम् अदर्शनं भवति इति फलितार्थकथनम्।

सूत्रे हलादिः इति न समासः। अनेन सूत्रेण अभ्यासे विद्यमानेषु हल्सु आद्यः हल् शिष्यते, अवशिष्यते, न लुप्यते। अन्ये हलः लुप्यन्ते, अदर्शनतां व्यवहाराभावं गच्छन्तीत्यर्थः। एवञ्च अनेन सूत्रेण अभ्यासे विद्यामानानाम् अचां विषये किमपि नोक्तम्। अतः आदिः अच् भवतु अनादिः वा अच् भवतु स न लुप्यते अनेन सूत्रेण। हलेव अस्य विषयः न तु अच्।

उदाहरणे सूत्रार्थसमन्वयः - भूव् भूव् अ इत्यवस्थायां पूर्वोऽभ्यासः (६.१.४) इति सूत्रेण भूव् इति पूर्वस्य अभ्याससंज्ञा जाता। ततश्च प्रकृतसूत्रेण अभ्याससंज्ञकस्य भूव् इत्यस्य हल्सु आदिः भकारः शिष्यते, अन्ये हलः अर्थात् वकारः लुप्यते। अभ्यासे य ऊकारः अस्ति स न लुप्यते। तेन भू भूव् अ इति जायते। तदा -

[१४.७] ह्रस्वः॥ (७.४.५९)

सूत्रार्थः - अभ्यासस्याचो ह्रस्वः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्, एकपदात्मकं च। ह्रस्वः इति प्रथमान्तं विधेयबोधकं पदम्। सूत्रे उद्देश्यबोधकं पदं नास्ति। अत्र लोपोऽभ्यासस्य इति सूत्रात् उद्देश्यसमर्पकम अभ्यासस्य इति षष्ठ्यन्तं पदमनुवर्तते। अस्मिन् सूत्रे स्थानी साक्षात् नोल्लिखितः। एवञ्च ह्रस्वः इति विधेयपरं शब्दम् उच्चार्य अच् विधीयते। अतः अचश्च इति परिभाषयाऽत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते। अभ्यासस्य अचः ह्रस्वः इति पदयोजना। सूत्रार्थो भवति - अभ्यासस्य अचः ह्रस्वः स्यादिति।

उदाहरणे सूत्रार्थसमन्वयः - भू भूव् अ इत्यवस्थायां प्रकृतसूत्रेण अभ्याससंज्ञकस्य भू इत्यस्य ऊकारस्य ह्रस्वे उकारे च कृते भु भूव् अ इति स्थितिर्भवति। तदा -

[१४.८] भवतेरः॥ (७.४.७३)

सूत्रार्थः - भूधातोः अभ्यासस्य उकारस्य अकारः स्यात् लिटि परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। भवतेः अः इति सूत्रगतपदच्छेदः। द्विपदात्मकेऽस्मिन् सूत्रे भवतेः इति षष्ठ्यन्तं पदम्। भवति इत्यस्य षष्ठ्येकवचने रूपमिदम्। भूधातोः इति तदर्थः। इक्श्तिपौ धातुनिर्देशे इति शास्त्रेण धातुनिर्देशार्थं श्तिप्-प्रत्यययोगे भूधातोः भवतिः इति सुबन्तम् रूपं भवति। तस्यैव षष्ठ्यां रूपमिदम्। स्थानषष्ठी इयम्। अः इति प्रथमान्तं विधेयसमर्पकं पदम्। व्यथो लिटि इति सूत्रात् लिटि इति सप्तम्यन्तं पदमनुवर्तते। अत्र लोपोऽभ्यासस्य इति सूत्रात् अभ्यासस्य इति षष्ठ्यन्तं पदमनुवर्तते। एवम् लिटि भवतेः अभ्यासस्य अः इति सूत्रगतपदान्वयः। अत्र अभ्यासस्य इति अल्समुदायबोधकात् स्थानषष्ठी श्रूयते। अतः अलोऽन्त्यस्य इति परिभाषया भूधातोः अभ्यासस्य अन्त्यस्य अलः स्थाने एव अकारः भवति। अन्त्यः अलत्र उकार एव। एवमर्थो लभ्यते - लिट्-संज्ञकप्रत्ययः परम् अस्ति चेत् भू-धातोः अभ्यासस्य उवर्णस्य अकारः भवतीति सूत्रार्थः।

उदाहरणे सूत्रार्थसमन्वयः - भू-धातोः लिटि तिपि णलि वुगागमे आद्यावयवे द्वित्वे अभ्याससंज्ञायाम् अभ्यासकार्ये भु भूव् अ इति स्थितिः जाता। अत्र णल् इति लिट्-संज्ञकप्रत्ययः परे अस्ति। अतः प्रकृतसूत्रेण भू-धातोः अभ्यासस्य उकारस्य स्थाने अकारादेशः भवति। अतः भ भूव् अ इति स्थितिः जायते। तदा -

[१४.९] अभ्यासे चर्च॥ (८.४.५३)

सूत्रार्थः - अभ्यासे झलां चरः स्युः जशश्च। झशां जशः खयां चरः इति विवेकः।

सूत्रव्याख्या - इदं विधिसूत्रम्। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। अभ्यासे चर् च इति सूत्रगतपदच्छेदः। अभ्यासे इति सप्तम्यन्तं पदम्। चर् इति प्रथमान्तं पदम्। चर् इति प्रत्याहारः। वर्गप्रथमवर्णाः श् ष् स् एते तस्य वाच्याः। च इति अव्ययपदम्। झलां जश् झशि इति सूत्रात् झलाम् इति षष्ठ्यन्तं पदं जश् इति प्रथमान्तं पदम् च अनुवर्तते। झल् इति प्रत्याहारः। अतः अभ्यासे झलां जश् चर् च इति सूत्रगतपदान्वयः। तेन सूत्रस्यार्थः भवति अभ्यासे झलां स्थाने चरः जशः च भवन्ति।

विशेषः - अत्र झल्-प्रत्याहारस्थवर्णानां स्थाने चर्-प्रत्याहारस्थवर्णाः जश्-प्रत्याहारस्थवर्णाः च विधीयन्ते। झल्प्रत्याहारे चतुर्विंशतिः वर्णाः सन्ति, तथा जश्प्रत्याहारे चर्-प्रत्याहारे च आहत्य दशवर्णाः सन्ति। एवं स्थानिनः चतुर्विंशतिः, आदेशाश्च दश एव। तत्र झश्-प्रत्याहारस्थवर्णानां स्थाने जश्-प्रत्याहारस्थवर्णाः भवेयुः खय्-प्रत्याहारस्थवर्णानां स्थाने च चर्-प्रत्याहारस्थवर्णाः स्युः इति। एतच्च स्थानेऽन्तरतमः इति परिभाषया यत्नतः आन्तरतम्यपरीक्षामादायैव निर्णितम्। तत्र खय्-प्रत्याहारस्थवर्णानां बाह्यप्रयत्नाः - विवारः, श्वासः, अघोषश्च। चर्-प्रत्याहारस्थवर्णा अपि तादृशप्रयत्नवन्तः। एवमेव झश्-प्रत्याहारस्थवर्णानां स्थाने जश्-प्रत्याहारस्थवर्णाः विधीयन्ते बाह्यप्रयत्नेन आन्तरतम्यवशात्।

भ्वादिप्रकरणे - भूधातोः लिटि लुटि च रूपसाधनम्

उदाहरणे सूत्रार्थसमन्वयः - भूधातोः लिटि, तिपि, णलि, द्वित्वे, अभ्याससंज्ञायां, ह्रस्वादिकार्ये भ भूव् अ इति स्थिते अभ्यासस्य झलः स्थाने चर् जश् च आदेशः भवति। अत्र प्रकृतसूत्रेण झशः भकारस्य स्थाने स्थानेऽन्तरतमः इति परिभाषाबलेन स्थानत आन्तर्येण जश् बकारः आदेशः भवति। बभूव इति रूपं च सिद्ध्यति।

भू-धातुतः लिट्-विधानम् आरभ्य बभूव इति रूपनिष्पत्तिं यावत् बहूनि विधिसूत्राणि संज्ञासूत्राणि परिभाषासूत्राणि च प्रवर्तन्ते। तेषु बहूनि सूत्राणि अत्र इतः पूर्वम् उपन्यस्तानि। कानिचन पूर्वप्रकरणेषु सन्ति। कानिचन च दशमकक्षायाः पाठ्यपुस्तके सन्ति। अतः सर्वेषामपि सूत्राणां समावेशे समग्रं रूपं कथं सिद्ध्यति इति एकत्रीकृत्य प्रदर्श्यते। एवं रूपेण अन्येषु रूपेषु यानि सूत्राणि आवश्यकानि तानि स्थलं दृष्ट्वा छात्रेण स्वयं प्रयोक्तव्यानि। येन क्रमेण बभूव इति रूपसिद्ध्यर्थं सूत्राणि आवश्यकानि तेनैव क्रमेण अन्यत्रापि सूत्राणि प्रवर्तेरन् इति तु न भवति। सर्वत्र क्रमः भिन्नः भवितुम् अर्हति। अतः सकलरूपाणां सिद्धिः छात्रेण स्वयं बुद्ध्वा कर्तव्या।

अत्र बभूव इत्यस्य प्रक्रिया अधः प्रदर्श्यते -

तिङन्ते रूपसाधने केचिद् विभागाः सन्ति। यथा -

१) धातुपरिचयः, २) लकारविधानं, लकारस्य स्थाने तिबादिविधानम्, ३) तिबादेशविधानं, विकरणविधानम् , ४) सन्धिः, अभ्यासादिकार्यं, लोपादिकम् ईदृशानि कार्याणि, ५) विसर्गादिविधानम्। एवं क्रमेण अधः रूपं प्रदर्श्यते।

बभूव -

१) धातुपरिचयः - सत्तार्थे वर्तमानो भ्वादिगणे पठितत्वाद् भूवादयो धातव इत्यनेन धातुसंज्ञकः अकर्मकः सेट् भू इति धातुः।

२) लकारविधानं, लकारस्य स्थाने तिबादिविधानम् - भूधात्वर्थस्य सत्ताक्रियायाः भूतानद्यतनपरोक्षे वृत्तित्वविवक्षायां परोक्षे लिट् इति सूत्रेण भूधातोः विवक्षातः कर्तरि लिटि अनुबन्धलोपे भू ल् इति जाते लस्य इत्यधिकृत्य तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्वम्-इड्वहिमहिङ् इति सूत्रेण अष्टादशसु लादेशेषु प्रसक्तेषु भूधातोः आत्मनेपदनिमित्तहीनत्वात् शेषात् कर्तरि परस्मैपदम् इत्यनेन तिबादिनवसु प्रत्ययेषु प्रसक्तेषु मध्यमोत्तमयोः अविषयत्वात् कर्तुः एकत्वाच्च प्रथमपुरुषैकवचनविवक्षायां तिपि अनुबन्धलोपे भू ति इति स्थितिः जायते।

३) तिबादेशविधानं, विकरणविधानम् - प्रत्ययाधिकारे विहितः तिप् प्रत्ययसंज्ञकः भवति। परस्मैपदानां णलतुसुस्-थलथुस-णल्वामाः इति सूत्रेण तिपः सर्वादेशे णलि अनुबन्धलोपे भू ण इति जाते तिपः प्रत्ययत्वात् णस्यापि स्थानिवद्भावेन प्रत्ययत्वात् चुटू इत्यनेन प्रत्ययाद्यस्य णकारस्य इत्संज्ञायां तस्य लोपः इति लोपे च कृते भू अ इति स्थितिः भवति। तत्पश्चात् अजादौ लिडादेशे अप्रत्यये प्रत्यये

परे भुवो वुग् लुङ्लिटोः इति सूत्रेण वुगागमे अनुबन्धलोपे कित्त्वाद् आद्यन्तौ टकितौ इति परिभाषया अन्त्यावयवे भूव् अ इति स्थितिः जायते।

४) सन्धिः, अभ्यासादिकार्यं, लोपादिकम् ईदृशानि कार्याणि - लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः सागमकस्य भूव् इति समुदायस्य द्वित्वे भूव् भूव् अ इति जाते द्विरुक्तस्य पूर्वभागस्य भूव् इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञा भवति। तदा हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे भू भूव् अ इति स्थितिर्जायते। ततश्च ह्रस्वः इति सूत्रेण अभ्यासस्य अच ऊकारस्य ह्रस्वत्वे भु भूव् अ इति जाते भवतेरः इति सूत्रेण अभ्यासस्य उकारस्य अकारे भ भूव् अ इति स्थितिरुद्भवति। ततश्च अभ्यासे चर्च इति सूत्रेण अभ्यास-भकारस्य स्थानत आन्तर्याद् बकारे बभूव् अ इति जाते वर्णसम्मेलने बभूव इति रूपं सिद्ध्यति।

बभूवतुः - (सर्वत्र रूपसाधनेषु केचित् साधारणविषयाः भवन्ति। यथा धातुपरिचयादिकम्। अतः तत् पुनः पुनः न प्रदर्श्यते। परीक्षादौ छात्रेण तत् स्वयं बुद्ध्वा लेख्यमिति आशा।)

(१+२+३) - भूधातोः परोक्षे लिट् इति सूत्रेण लिटि लस्य स्थाने प्रथमपुरुषद्विवचनविवक्षायां तसि भू तस् इति स्थिते परस्मैपदानां णलतुसुस्-थलथुस-णल्वामाः इति सूत्रेण तसः सर्वादेशे अतुसि भू अतुस् इति स्थितिर्जायते। ततश्च अजादौ लिडादेशे अतुस्-प्रत्यये परे भुवो वग् लुङ्लिटोः इति सूत्रेण वुगागमे कित्त्वाद् अन्तावयवे अनुबन्धलोपे भूव् अतुस् इति स्थितिर्भवति।

४) ततश्च लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः सागमकस्य भूव् इति समुदायस्य द्वित्वे भूव् भूव् अतुस् इति जाते द्विरुक्तस्य पूर्वभागस्य भूव् इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे भू भूव् अतुस् इति जाते ह्रस्वः इति सूत्रेण अभ्यासस्य अच ऊकारस्य ह्रस्वत्वे भु भूव् अतुस् इति जाते भवतेरः इति सूत्रेण अभ्यासस्य उकारस्य अकारे भ भूव् अतुस् इति स्थितिर्भवति। तदा अभ्यासे चर्च इति सूत्रेण अभ्यास-भकारस्य स्थानत आन्तर्याद् बकारे बभूव् अतुस् इति स्थितिः भवति।

५) विसर्गादिविधानम् - बभूव् अतुस् इति समुदायस्य तिङन्तत्वेन सुप्तिङन्तं पदमिति सूत्रेण पदसंज्ञायाम् ससजुषो रुः इत्यनेन पदान्तस्य सकारस्य रुत्वेऽनुबन्धलोपे ब भूव् अतुर् इति जाते, अवसाने परे खरवसानयोर्विसर्जनीयः इत्यनेन पदान्तस्य रेफस्य विसर्गे ब, भूव्, अतुः इति जाते वर्णसम्मेलने बभूवतुः इति रूपं सिद्ध्यति।

सर्वत्र सर्वाणि सूत्राणि प्रयुज्य समेषामपि रूपाणां सिद्धिः विस्तारभयेन सविस्तरं न प्रदर्श्यते।

बभूवुः - भूधातोः परोक्षे लिट् इति कर्तरि लिटि प्रथमपुरुषबहुवचनविवक्षायां झिप्रत्यये भू झि इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वामाः इति सूत्रेण झेः सर्वादेशे उसि भू उस् इति स्थितिः जायते। तदा अजादौ लिडादेशे उस्-प्रत्यये परे भुवो वग् लुङ्लिटोः इति सूत्रेण वुगागमे कित्त्वाद् अन्तावयवे अनुबन्धलोपे भूव् उस् इति स्थितिः भवति।

ततश्च लिटि धातोरनभ्यासस्य इति सूत्रेण भूव् इति समुदायस्य द्वित्वे भूव् भूव् उस् इति जाते द्विरुक्तस्य पूर्वभागस्य भूव् इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्यासंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे भू भूव् उस् इति जायते। ततश्च ह्रस्वः इति सूत्रेण अभ्यासस्य अच ऊकारस्य ह्रस्वत्वे भु भूव् उस् इति जाते भवतेरः इति सूत्रेण अभ्यासस्य उकारस्य अकारे भ भूव् उस् इति स्थिते अभ्यासे चर्च इति सूत्रेण अभ्यास-भकारस्य बकारे बभूव् उस् इति जायते। पदान्तसकारस्य रुत्वेऽनुबन्धलोपे रेफस्य विसर्गे च कृते वर्णसम्मेलने बभूवुः इति रूपं सिद्ध्यति।

बभूविथ - भूधातोः तिपि परोक्षे लिट् इति कर्तरि लिटि भू ल् इति जाते लस्य स्थाने मध्यमपुरुषैकवचनविवक्षायां सिपि अनुबन्धलोपे भू सि इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वामाः इति सूत्रेण सिपः सर्वादेशे थलि अनुबन्धलोपे भू थ इति जायते। तदा -

[१४.१०] आर्धधातुकस्येड् वलादेः॥ (७.२.३५)

सूत्रार्थः - वलादेरार्धधातुकस्य इडागमः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। आर्धधातुकस्य इट् वलादेः इति सूत्रगतपदच्छेदः। आर्धधातुकस्य वलादेः चेति पदद्वयं षष्ठ्येकवचनान्तं पदम्। इट् इति प्रथमान्तं पदम्। वलादेः आर्धधातुकस्य इट् इति सूत्रगतपदान्वयः। ततश्च वलादेः आर्धधातुकस्य इडागमः भवतीति सूत्रार्थः। इटः टकारः हलन्त्यम् इति सूत्रेण इत्संज्ञां प्राप्नोति। ततः तस्य लोपः इति सूत्रेण तस्य लोपो भवति। अतः अयम् इडागमः टित् अस्ति। तस्मात् आद्यन्तौ टकितौ इति परिभाषया अयं (इट्) आगमिनः आद्यावयवः भवति।

उदाहरणम् - बभूविथ।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तरूपेण भूधातोः लिटि सिपि थलि अनुबन्धलोपे भू थ इति स्थितिः जाता। तत्र थल् लिडादेशस्य सिपः स्थाने विहितः। लिट् च इति सूत्रेण सिपः आर्धधातुकसंज्ञा भवति। तस्य स्थाने विहितस्य थलः अपि तिङ्भिन्नत्वात् शिद्भिन्नत्वात् च आर्धधातुकंसंज्ञा भवति। थलः आदिवर्णः वल् अस्ति। अतः थल् वलादिः अस्ति। एवं थलः आर्धधातुकत्वेन वलादित्वेन च प्रकृतसूत्रेण इडागमः भवति। स इडागमः आर्धधातुकस्य इति षष्ठ्या आर्धधातुकम् उद्दिश्य विहितः। अतः स थलः आद्यावयवः भवति। ततश्च भू इथ इति स्थितिः भवति। ततः भुवो वुग् लुङ्लिटोः इति सूत्रेण वुगागमे अन्त्यावयवे भूव् इथ इति जाते लिटि धातोरनभ्यासस्य इति सूत्रेण द्विरुक्तस्य पूर्वभागस्य भूव् इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्यासंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे भू भूव् इ थ इति जाते ह्रस्वः इति सूत्रेण अभ्यासस्य अचः ऊकारस्य ह्रस्वत्वे भु भूव् इ थ इति जाते भवतेरः इति सूत्रेण अभ्यासस्य उकारस्य अकारे भ भूव् इ थ इति स्थिते अभ्यासे चर्च इति सूत्रेण अभ्यास-भकारस्य बकारे बभूव् इ थ इति जाते वर्णसम्मेलने बभूविथ इति रूपं सिद्ध्यति।

बभूवथुः - भूधातोः लिटि मध्यमपुरुषद्विवचनविवक्षायां थसि तस्य अथुसादेशे अभ्यासकार्ये रुत्वे विसर्गे च बभूवथुः इति रूपं सिध्यति।

बभूव – भूधातोः लिटि मध्यमपुरुषबहुवचनविवक्षायां थप्रत्यये तस्य अ इत्यादेशे अभ्यासकार्ये बभूव इति रूपं सिध्यति।

बभूव – भूधातोः लिटि उत्तमपुरुषैकवचनविवक्षायां मिपि तस्य णलादेशे अभ्यासकार्ये बभूव इति रूपं सिध्यति।

बभूविव – भूधातोः लिटि उत्तमपुरुषद्विवचनविवक्षायां वसि तस्य व इत्यादेशे अभ्यासकार्ये वप्रत्ययस्य आर्धधातुकत्वात् वलादित्वाच्च इडागमे बभूविव इति रूपं सिध्यति।

बभूविम – भूधातोः लिटि उत्तमपुरुषद्विवचनविवक्षायां मसि तस्य म इत्यादेशे अभ्यासकार्ये मप्रत्ययस्य आर्धधातुकत्वात् वलादित्वाच्च इडागमे बभूविम इति रूपं सिध्यति।

भूधातोः लिटि रूपाणि -

लिट्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	बभूव	बभूवतुः	बभूवुः
मध्यमपुरुषः	बभूविथ	बभूवथुः	बभूव
उत्तमपुरुषः	बभूव	बभूविव	बभूविम

पाठगतप्रश्नाः-२

६. धातोर्द्वित्वविधायकं सूत्रं लिखत।

७. कस्याभ्याससंज्ञा।

८. हलादिः शेषः कस्य।

९. ह्रस्वः इति सूत्रेण कस्य ह्रस्वः।

१०. लिटि भूधातोः अभ्यासस्य ऊकारस्य ह्रस्वः केन सूत्रेण।

११. भवतेरः कस्य।

१२. भवतेरः कस्मिन् लकारे।

१३. अभ्यासे चर्च, अन्यच्च किम्। कस्य च।

१४. वलादेः आर्धधातुकस्य इट् केन सूत्रेण।

भूधातोः लुट्-लकारे रूपाणि

[१४.११] अनद्यतने लुट्॥ (३.३.१५)

सूत्रार्थः - भविष्यत्यनद्यतने अर्थे धातोर्लुट्।

सूत्रव्याख्या - सूत्रमिदम् विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयमस्ति। अनद्यतने (७/१), लुट् (१/१)। अविद्यमानोऽद्यतनः कालः सः अनद्यतनः। तस्मिन् इति बहुव्रीहिसमासः। प्रत्ययः परश्च इति सूत्रद्वयमधिकृतमत्र। प्रत्ययाधिकारे पठितत्वात् लुट् इति प्रत्ययः। धातोः इति पञ्चम्यन्तं पदमधिकृतमस्ति। भविष्यति गम्यादयः इत्यस्मात् सूत्रात् भविष्यति इति पदमनुवर्तते। अनद्यतने भविष्यति धातोः लुट् प्रत्ययः परः इति वाक्ययजना। ततश्च सूत्रार्थः भवति अनद्यतनभविष्यदर्थाद्धातोः लुट् प्रत्ययः परः स्यात् इति। अर्थात् यस्य धातोः अर्थः व्यापारः अनद्यतने भविष्यत्काले इति विवक्षा तस्माद् धातोः लुट् विधीयते इति।

उदाहरणम् - भूधातोरर्थः सत्ता। सा च अनद्यतने भविष्यत्काले इति विवक्षा चेत् भूधातोः अनद्यतने लुट् इति आलोच्यमानसूत्रेण लुट् विवक्षातः कर्तरि विधीयते। ततः उकारस्य टकारस्य च इत्संज्ञायां लोपे भू ल् इति स्थिते लस्य स्थाने अष्टादशसु तादेशेषु प्रसक्तेषु भूधातोः आत्मनेपदनिमित्तहीनत्वात् प्रथमपुरुषैकवचनविवक्षया च तिपि अनुबन्धलोपे भू ति इति स्थितिर्जायते। तदा -

[१४.१२] स्यतासी लृलुटोः॥ (३.१.३३)

सूत्रार्थः - धातोः स्यतासी एतौ प्रत्ययौ स्तः लृ-लुटोः परतः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण स्य तास् इति एतौ विधीयेते। अस्मिन् सूत्रे द्वे पदे स्तः। स्यतासी (१/२), लृ-लुटोः (७/२)। स्यः च तासिश्च स्यतासी इति इतरेतरयोगद्वन्द्वसमासः। तासि इत्यत्र इकारः उच्चारणसौकर्याय। ला च लुट् च लृलुटौ, तयोः लृलुटोः इति इतरेतरयोगद्वन्द्वसमासः। निरनुबन्धकग्रहणे सानुबन्धकस्य इति परिभाषया लृ इत्यनेन लृट् लृङ् इति द्वयोरपि ग्रहणं भवति। प्रत्ययः परश्च इति सूत्रद्वयमधिकृतम्। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः इति पञ्चम्यन्तं पदमायाति, द्विवचनान्ततया विपरिणमते च। तदा पदयोजना भवति - धातोः स्यतासी प्रत्ययौ परौ लृटि लृङि लुटि। स्य तास् चेति द्वौ, लृ-लुटौ इति निमित्ते द्वे। अतः यथासंख्यमनुदेशः समानाम् इति परिभाषया लृपरतः स्यप्रत्ययः भवति, लुट्-परतः तास्-प्रत्ययः भवति। अत्र स्थान्यादेशयोः यथासंख्यं नास्ति। सदा स्थान्यादेशयोः एव यथासंख्यं न भवतीति अत्र गम्यते। सूत्रार्थो भवति - धातोः स्य प्रत्ययः स्यात् लृटि लृङि च परतः। धातोः तास् प्रत्ययः स्यात् लुटि परतः।

धातोः परं कर्त्रर्थे लुट् विधीयते। तत्र तस्य स्थाने तिङ् विधीयते। तिङ् तिङ् शित् सार्वधातुकमिति सूत्रेण सार्वधातुकसंज्ञकः। अतः धातोः कर्त्रर्थे सार्वधातुके परे कर्तरि शप् इति सूत्रेण शप्

प्रसक्तः। एवम् अन्येषु गणेषु श्यन् शः श्नुः श्नम्, उ, श्ना इत्यादयः अपि प्रसक्ताः। परन्तु प्रकृतसूत्रेण विहितः स्य तास् च एतेषाम् अपवादौ स्तः। किञ्च स्य तास् एव भवतः।

उदाहरणम् - भविता।

सूत्रार्थसमन्वयः - पूर्वोक्तसूत्रोक्तरूपेण भू ति इति स्थितिर्जाता। तत्र भूधातोः लुट्-स्थानिके तिपि परे तिप् तिङ् शित् सार्वधातुकमिति सूत्रेण सार्वधातुकसंज्ञकः। अतः भूधातोः कर्त्रर्थे सार्वधातुके परे कर्तरि शप् इति सूत्रेण शप् प्रसक्तः। परन्तु प्रकृतसूत्रेण विहितः तास् च शपः अपवादः अस्ति। अतः शपं प्रबाध्य तास्-प्रत्यये भू तास् ति इति स्थितिर्जायते। तास् तिङ् नास्ति, शित् नास्ति, धातोः इति विहितः अस्ति। अतः आर्धधातुकं शेषः इति सूत्रेण तस्य आर्धधातुकसंज्ञा भवति। तास् वलादिश्च वर्तते। अतः आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे टित्त्वाद् तासः आद्यावयवे भू इतास् ति इति स्थितिर्जाता। यदागमपरिभाषया इतास् इति आगमसहितः समुदायः एव प्रत्ययः। स च आर्धधातुकसंज्ञकः। आर्धधातुके परे सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य स्थाने स्थानतः आन्तर्याद् गुणे ओकारे भो इतास् ति इति स्थितिर्जायते। तदा इतास् इत्यस्य अचि इकारे परे एचोऽयवायावः इति सूत्रेण अवादेशे भव् इतास् ति अवस्था उत्पन्ना। तदा -

[१४.१३] लुटः प्रथमस्य डारौरसः॥ (२.४.८५)

सूत्रार्थः - लुटः प्रथमस्य स्थाने डा रौ रस् एते क्रमात् स्युः।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण डारौरसः विधीयन्ते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अत्र लुटः (६/१), प्रथमस्य (६/१), डारौरसः (१/३)। तदा वाक्ययोजना भवति - लुटः प्रथमस्य डारौरसः इति। ततश्च सूत्रार्थो भवति लुटः स्थाने विहितानां प्रथमपुरुषसंज्ञकानां प्रत्ययानां स्थाने डा रौ रस् एते क्रमात् स्युः इति।

तिप् तस्-झि इति परस्मैपदसंज्ञकाः त्रयः, त-आताम्-झ इति आत्मनेपदसंज्ञकाः त्रयः सन्ति। एवम् आहत्य षट् प्रत्ययाः सन्ति। डा-रौ-रसः इति प्रथमाबहुवचनान्तं पदम्। डा-रौ-रसः च डा-रौ-रसः चेति एकशेषे डा-रौ-रसः इति पदं निष्पद्यते। अतः तस्मिन् षट् प्रत्ययाः सन्ति। अतः यथासंख्यमनुदेशः समानाम् इति परिभाषाबलेन तिप्-तस्-झि इति एतेषां स्थाने क्रमशः डा-रौ-रस् एते भवन्ति। एवञ्च त-आताम्-झ एतेषां स्थाने डा-रौ-रस् एते क्रमशः भवन्ति।

तिप्-तस्-झि एतेषां स्थाने डा-रौ-रस् एते विधीयन्ते। यावत् डा-रौ-रस् एते तिबादीनां स्थानग्रहणं कुर्वन्ति तावत् तिबादीनां धर्माः डा-रौ-रस् एषु न आरोप्यन्ते। अतः एव डा-रौ-रस् इति एषां प्रत्ययसंज्ञा अपि तेषां प्रयोगात् उत्तरमेव। अतः यावत् डा तिपः निवृत्तिं न करोति तावत् डा प्रत्ययः नास्ति। प्रत्ययः नास्ति चेत् चुटू इति सूत्रेण तस्य आद्यस्य डकारस्य इत्संज्ञा न भवति। अतः प्रयोगात् पूर्वं डा इत्यस्य अनेकाल्त्वम् अस्ति। तेन अनेकाल्शित् सर्वस्य इति सूत्रेण सर्वस्य तिपः स्थाने एव आदेशः डा भवति न तु अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य। एवं तेषु तेषु प्रत्ययेषु बोध्यम्।

उदाहरणम् - पूर्वपूर्वसूत्रोक्तप्रकारेण भव् इतास् ति इति जायते। तत्र लुटः स्थाने विहितः तिप् प्रथमसंज्ञकः अस्ति। तिपः स्थाने यथासंख्यमनुदेशः समानाम् इति परिभाषया प्रकृतसूत्रेण स्थाने डा-आदेशे अनेकाल्शित् सर्वस्य इति सूत्रेण सर्वादेशे भव् इतास् डा इति स्थिते चुटू इति सूत्रेण प्रत्ययाद्यस्य डकारस्य इत्संज्ञायां तस्य लोपः इति लोपे च कृते भव् इतास् आ इति स्थितिर्जायते।

तिप् प्रत्ययः। तस्य स्थाने विहितः डा अपि स्थानिवद्भावाद् प्रत्ययसंज्ञकः। स्वादिषु कप्-प्रत्ययावधिषु एव परे पूर्वस्य भसंज्ञा भवति। डा स्वादिषु नास्ति। अतः डा-प्रत्यये परे भसंज्ञा न भवति। तथापि पाणिनिमुनिः डा इत्यस्य डित्त्वं कृतवान्। तेन इदं ज्ञाप्यते यत् भसंज्ञा नास्ति चेत् अभस्यापि टेः लोपः भवति। तदुच्यते डित्त्वसामर्थ्याद् अभस्यापि टेर्लोपः। डि-प्रत्यये परे इतास् इत्यस्य आस् टि अस्ति। तस्य लोपे भव् इत् आ इति स्थितिः भवति। तदा वर्णमेलनेन **भविता** इति रूपं सिद्ध्यति।

भवितारौ - पूर्ववत् भू-धातोः कर्तरि लुटि प्रथमपुरुषद्विवचनविवक्षायाम् तस्-प्रत्यये भू तस् इति जाते कर्तरि शप् इत्यनेन शपि प्रसक्ते स्यतासी लृलुटोः इत्यनेन शपं प्रबाध्य तास्-प्रत्यये भू तास् तस् इति स्थिते तासः आर्धधातुकत्वाद् वलादित्वाच्च आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे आद्यावयवे भू इतास् तस् इति स्थिते सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे ओकारे भो इतास् तस् इति स्थिते एचोऽयवायावः अवादेशे भवितास् तस् इति जाते लुटः प्रथमस्य डा-रौ-रसः इति सूत्रेण तसः स्थाने रौ इति सर्वादेशे भवितास् रौ इति अवस्था जाता। तदा - (रि च इति सूत्रे द्रष्टव्यम्।)

[१४.१४] तासस्त्योर्लोपः॥ (७.४.५०)

सूत्रार्थः - तासेरस्तेश्च सस्य लोपः स्यात् सादौ प्रत्यये परे।

सूत्रव्याख्या - इदं विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। तासस्त्योः लोपः इति सूत्रगतपदच्छेदः। तासस्त्योः (६/२), लोपः (१/१)। तास् च अस्तिश्च तासस्ती। तयोः तासस्त्योः इति इतरेतरयोगद्वन्द्वसमासः। अङ्गस्य इति अधिकृतम्। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। सः स्यार्धधातुके इति सूत्रात् सि इति सप्तम्यन्तम् पदमनुवर्तते। तदा तासस्त्योः लोपः सि प्रत्यये इति वाक्ययोजना। अस्मिन् सूत्रे तदादिविधिः भवति। सि इति अल्बोधकं पदं प्रत्यये इत्यस्य विशेषणम् अस्ति। अतः तदादिविधिना 'सादौ प्रत्यये' इति अर्थः लभ्यते। तास्त्योः इत्यत्र षष्ठ्यर्थस्य सम्बन्धस्य अनुयोगिविरहात् स्थानषष्ठी। सा च अल्समुदायबोधकात् श्रूयते। किञ्च आदेशः लोपात्मकः। अतः अलोऽन्त्यस्य इति परिभाषाबलेन तास् इत्यस्य अस् इत्यस्य च अन्त्यस्य अलः सकारस्य लोपो भवतीत्यर्थो लभ्यते। ततश्च सूत्रार्थः भवति - सकारादौ प्रत्यये परे तासेः अस्तेश्च सकारस्य लोपो भवति इति।

उदाहरणम् - अस्य उदाहरणम् भवितासि इति। परन्तु प्रकृते भवितारौ इति रूपसाधनं प्रचलति। एवञ्च अस्मात् परं भवितारः इति रूपं भवति। अत्र रूपद्वयेऽपि इदं सूत्रं न प्रवर्तते। तथापि रि च इति सूत्रम् अस्मात् परम् अस्ति अष्टाध्याय्याम्। एवञ्च यदि रूपस्य क्रमेण एव अस्य उपस्थापनं कर्तव्यं

तर्हि रि च इति सूत्रात् अव्यवहितपरमेव अस्य उपस्थापनम् भवेत्। अतः अष्टाध्यायीक्रममादृत्य पूर्वम् उपन्यासः कृतः।

[१४.१५] रि च॥ (७.४.५१)

सूत्रार्थः - तासेरस्तेश्च सस्य लोपः स्यात् रादौ प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सस्य लोपः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। रि (७/१), च इत्यव्ययपदम्। तासस्त्योर्लोपः इति सूत्रात् तासस्त्योः इति षष्ठीद्विवचनान्तं पदमनुवर्तते, लोपः इति प्रथमान्तं पदं चानुवर्तते। तास् च अस्तिश्च तासस्ती। तयोः तासस्त्योः इति इतरेतरयोगद्वन्द्वसमासः। अङ्गस्य इति अधिकृतम्। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। तदा पदयोजना भवति - तासस्त्योः रि प्रत्यये च लोपः। रि इति अल्बोधकं पदं प्रत्यये इत्यस्य विशेषणम् अस्ति। अतः तदादिविधिना 'रादौ प्रत्यये' इति अर्थः लभ्यते। तास्त्योः इत्यत्र षष्ठ्यर्थस्य सम्बन्धस्य अनुयोगिविरहात् स्थानषष्ठी। सा च अल्समुदायबोधकात् श्रूयते। किञ्च आदेशः लोपात्मकः। अतः अलोऽन्त्यस्य इति परिभाषाबलेन तास् इत्यस्य अस् इत्यस्य च अन्त्यस्य अलः सकारस्य लोपो भवतीत्यर्थो लभ्यते। ततश्च सूत्रार्थः भवति - रेफादौ प्रत्यये परे तासेः अस्तेश्च सकारस्य लोपो भवति इति।

उदाहरणम् - भवितारौ।

सूत्रार्थसमन्वयः - लुटः प्रथमस्य डा-रौ-रसः इति सूत्रोक्तरूपेण भवितास् रौ इति स्थितौ रौ इति रादिप्रत्ययः परे अस्ति। अतः तास् इत्यस्य अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य सस्य लोपः रि च इति प्रकृतसूत्रेण भवति। तदा भवितारौ इति रूपं निष्पद्यते।

भवितारः - पूर्ववत् भू-धातोः लुटि प्रथमपुरुषबहुवचनविवक्षायाम् झि-प्रत्यये भू झि इति जाते कर्तरि शप् इत्यनेन शपि प्रसक्ते स्यतासी लृलुटोः इत्यनेन शपं प्रबाध्य तास्-प्रत्यये भू तास् झि इति स्थिते आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे भू इतास् झि इति स्थिते सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे ओकारे भो इतास् झि इति स्थिते एचोऽयवायावः इति सूत्रेण अवादेशे भवितास् झि इति जाते लुटः प्रथमस्य डा-रौ-रसः इति सूत्रेण स्थाने रस् इति सर्वादेशे भवितास् रस् इति अवस्था जाता। अत्र रादिप्रत्ययः परे अस्ति। अतः तास् इत्यस्य अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य सस्य लोपः रि च इति प्रकृतसूत्रेण भवति। तदा भवितारस् इति स्थिते पदान्तत्वात् रूत्वे विसर्गे भवितारः इति रूपं निष्पद्यते।

भवितासि - पूर्ववत् भू-धातोः लुटि मध्यमपुरुषैकवचनविवक्षायाम् सिप्-प्रत्यये अनुबन्धलोपे भू सि इति जाते प्राप्तं शपं प्रबाध्य स्यतासी लृलुटोः इत्यनेन तास्-प्रत्यये भू तास् सि इति स्थिते इडागमे भुवः ऊकारस्य गुणे ओकारे भो इतास् सि इति स्थिते अवादेशे भवितास् सि इति जायते। अत्र सादिप्रत्ययः परे अस्ति। अतः तास् इत्यस्य अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य सस्य लोपः तासस्त्योर्लोपः इति सूत्रेण भवति। तदा भवितासि इति रूपं निष्पद्यते।

भ्वादिप्रकरणे - भूधातोः लिटि लुटि च रूपसाधनम्

भवितास्थः - (अत्र प्रक्रियां नैके अंशाः पूर्ववद् ऊह्याः।) भूधातोः लुटि थासि तास्-प्रत्यये इडागमे ऊकारस्य गुणे ओकारे ओकारस्य अवादेशे भवितास् थस् इति स्थिते समुदायस्य पदान्तत्वात् रूत्वे विसर्गे च कृते भवितास्थः इति रूपं सिध्यति।

भवितास्थ - (अत्र प्रक्रियां नैके अंशाः पूर्ववद् ऊह्याः।) भूधातोः लुटि थप्रत्यये तास्-प्रत्यये इडागमे ऊकारस्य गुणे ओकारे ओकारस्य अवादेशे भवितास् थ इति स्थिते भवितास्थ इति रूपं सिध्यति।

भवितास्मि, भवितास्वः भवितास्मः - (अत्र प्रक्रिया पूर्ववद् ऊह्या।)

भूधातोः लुटि रूपाणि अधः पट्टिकायां प्रदर्शितानि सन्ति -

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	भविता	भवितारौ	भवितारः
मध्यमपुरुषः	भवितासि	भवितास्थः	भवितास्थ
उत्तमपुरुषः	भवितास्मि	भवितास्वः	भवितास्मः

रूपसाधनम्

भविता -

(भविता इति रूपं बहूषु सूत्रेषु व्याप्तम् अस्ति। तस्य खण्डशः प्रक्रिया किञ्चित् किञ्चित् अग्रे प्रगच्छति। अतः सर्वाणि सूत्राणि परिशील्य सर्वे खण्डाः एकत्रीकृत्य समग्रं रूपं साधनीयमिति अवधेयम्। भविता इति एकं रूपमत्र प्रदर्श्यते। अन्यानि रूपाणि छात्रेण स्वयमूह्यानि।)

१) धातुपरिचयः - सत्तार्थे वर्तमानो भ्वादिगणे पठितत्वाद् भूवादयो धातव इत्यनेन धातुसंज्ञकः अकर्मकः सेट् भू इति धातुः।

२) लकारविधानं, लकारस्य स्थाने तिबादिविधानम् - भूधात्वर्थस्य सत्ताक्रियायाः भविष्यति अनद्यने काले वृत्तित्वविवक्षायां अनद्यतने लुट् इति सूत्रेण भूधातोः विवक्षातः कर्तरि लुटि अनुबन्धलोपे भू ल् इति जाते लस्य इत्यधिकृत्य तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्वम्-इड्वहिमहिङ् इति सूत्रेण अष्टादशसु लादेशेषु प्रसक्तेषु भूधातोः आत्मनेपदनिमित्तहीनत्वात् शेषात् कर्तरि परस्मैपदम् इत्यनेन तिबादिनवसु प्रत्ययेषु प्रसक्तेषु मध्यमोत्तमयोः अविषयत्वात् कर्तुः एकत्वाच्च प्रथमपुरुषैकवचनविवक्षायां तिपि अनुबन्धलोपे भू ति इति स्थितिः जायते।

३) तिबादेशविधानं, विकरणविधानम् - भू ति इति स्थिते तत्र भूधातोः लुट्-स्थानिके तिपि परे तिङ् शित् सार्वधातुकमिति सूत्रेण तिपः सार्वधातुकत्वात् कर्तरि विहितत्वाच्च कर्त्रर्थे सार्वधातुके परे कर्तरि शप् इति सूत्रेण शपि प्रसक्ते प्रकृतसूत्रेण शपम् अपवादत्वेन प्रबाध्य तास्-प्रत्यये भू तास् ति इति स्थितिर्जायते। तास् इत्यस्य तिङ्-भिन्नत्वात् शिद्-भिन्नत्वात् , धातोः इति विहितत्वाच्च आर्धधातुकं

शेषः इति सूत्रेण आर्धधातुकसंज्ञा भवति। तास् वलादिश्च वर्तते। अतः आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे टित्त्वाद् तासः आद्यावयवे भू इतास् ति इति स्थितिर्जाता। इतास् इति समुदायः प्रत्ययः, आर्धधातुकसंज्ञकः च। आर्धधातुके परे सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य स्थाने स्थानतः आन्तर्याद् गुणे ओकारे भो इतास् ति इति स्थितिर्जायते। तदा इतास् इत्यस्य अचि इकारे परे एचोऽयवायावः इति सूत्रेण अवादेशे भव् इतास् ति अवस्था जाता। तत्र लुटः स्थाने विहितः तिप् प्रथमसंज्ञकः अस्ति। तिपः स्थाने यथासंख्यमनुदेशः समानाम् इति परिभाषया प्रकृतसूत्रेण स्थाने अनेकाल्शित् सर्वस्य इति सूत्रेण डा इति सर्वादेशे भव् इतास् डा इति स्थिते डा इत्यस्य स्थानिवद्भावात् प्रत्ययत्वविज्ञानात् चुटू इति सूत्रेण प्रत्ययाद्यस्य डकारस्य इत्संज्ञायां तस्य लोपः इति लोपे च कृते भव् इतास् आ इति स्थितिर्जायते।

तिप् -प्रत्ययस्य स्थाने विहितः डा अपि स्थानिवद्भावाद् प्रत्ययसंज्ञकः। एवञ्च डित्त्वसामर्थ्याद् अभस्यापि टेः इतास् इत्यस्य आस् इत्यस्य लोपे भव् इत् आ इति स्थिते वर्णमेलनेन **भविता** इति रूपं सिद्ध्यति।

अधः केचिद् धातवः दीयन्ते। तेषां रूपाणि एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **पठिता पठितारौ पठितारः। पठितासि पठितास्थः पठितास्थ। पठितास्मि पठितास्वः पठितास्मः।**

२) **गद** व्यक्तायां वाचि - **गदिता गदितारौ गदितारः। गदितासि गदितास्थः गदितास्थ। गदितास्मि गदितास्वः गदितास्मः।**

३) **अर्च** पूजायाम् - **अर्चिता अर्चितारौ अर्चितारः। अर्चितासि अर्चितास्थः अर्चितास्थ। अर्चितास्मि अर्चितास्वः अर्चितास्मः।**

४) **व्रज** गतौ - **व्रजिता व्रजितारौ व्रजितारः। व्रजितासि व्रजितास्थः व्रजितास्थ। व्रजितास्मि व्रजितास्वः व्रजितास्मः।**

५) **कटँ** वर्षावरणयोः - **कटिता कटितारौ कटितारः। कटितासि कटितास्थः कटितास्थ। कटितास्मि कटितास्वः कटितास्मः।**

६) **क्षि** क्षये - **क्षयिता क्षयितारौ क्षयितारः। क्षयितासि क्षयितास्थः क्षयितास्थ। क्षयितास्मि क्षयितास्वः क्षयितास्मः।**

७) **चितीँ** संज्ञाने - **चेतिता चेतितारौ चेतितारः। चेतितासि चेतितास्थः चेतितास्थ। चेतितास्मि चेतितास्वः चेतितास्मः।**

८) **शुच** शोके - **शोचिता शोचितारौ शोचितारः। शोचितासि शोचितास्थः शोचितास्थ। शोचितास्मि शोचितास्वः शोचितास्मः।**

पाठगतप्रश्नाः

१५. लुट् कस्मिन्नर्थे विधीयते।

१६. धात्वर्थव्यापारस्य अनद्यतने भविष्यति वृत्तित्वविक्षायां कः लकारः विधेयः।

१७. भवितास्मि इति कस्मिन् लकारे रूपम्।

१८. भवितास्मि इत्यत्र विकरणं किम्। केन सूत्रेण विहितम्।

१९. तास् कस्यापवादः।

२०. लुटः प्रथमस्य डारौरसः इत्यत्र प्रथमाः के।

२१. डा-रौ-रसः कस्य स्थाने कस्मिन् लकारे विधीयन्ते।

२२. तासेरस्तेश्च सस्य लोपः सादौ प्रत्यये परे केन सूत्रेण।

२३. भवितारौ इत्यत्र रूपे तासः सस्य लोपः केन सूत्रेण।

पाठसारः

अस्मिन् पाठे लिट् लुट् इति लकारद्वयम् उपन्यस्तम्। धातोः अर्थः व्यापारः यदि अनद्यतनभूतकालीनः स्यात् एवञ्च वक्तुः अप्रत्यक्षः स्यात् तदा तस्माद् धातोः परोक्षे लिट् इति सूत्रेण लिट् लकारः प्रयुज्यते। लिटः आर्धधातुकत्वात् अत्र शबादिकं न भवति। लिट्-लकारे तिङां स्थाने परस्मैदानां णलतुसुस्थलथुसणल्वमाः इति सूत्रेण णलादयः आदेशाः भवन्तीति अस्य लकारस्य एको विशेषः। लिटि परतः अनभ्यासधातोः अवयवस्य द्वित्वम् लिटि धातोरनभ्यासस्य इति सूत्रेण भवतीति अपरो विशेषः। द्वित्वे यो पूर्वः तस्य अभ्याससंज्ञा पूर्वोऽभ्यासः इति सूत्रेण भवति। तस्य चाभ्यासस्य हलादिः शेषः इति सूत्रेण आदिः हल् शिष्यते अन्ये हलः च लुप्यन्ते। एवञ्च अचः न लुप्यन्ते। अभ्यासस्य अचः ह्रस्वः इति सूत्रेण ह्रस्वत्वं भवति। भूधातोस्तु भवतेरः इति सूत्रेण उकारस्य अकारो भवति। अभ्यासे चर्च इति सूत्रेण अभ्यासस्य झशां जशः खयां च चरः विधीयन्ते। वलादि आर्धधातुकं चेत् तस्य आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमः विधीयते। इत्थं कानिचन मुख्यानि सूत्राणि तेषां कार्याणि च लिट्-लकारे सन्ति। इतोऽपि अन्यानि सूत्राणि कार्याणि च सन्ति तानि अग्रिमप्रकरणेषु वक्ष्यन्ते। लिटः सम्यग् ज्ञानाय लिटः पठनानन्तरं अग्रे लिटः प्रकरणं पठनीयम्।

धातोः अर्थः व्यापारः यदि अनद्यतनभविष्यत्कालीनः स्यात् तर्हि तस्माद् धातोः अनद्यतने लुट् इति सूत्रेण लिट् लकारः प्रयुज्यते। स्यतासी इति सूत्रेण लुटि परतः धातोः तास् भवति। एवञ्च लुटः

प्रथमस्य डारौरसः इति सूत्रेण प्रथमस्य डा रौ रस् एते विधीयन्ते। ततश्च सादौ प्रत्यये तासः सस्य लोपः तासस्त्योर्लोपः इति सूत्रेण भवति, रादौ प्रत्यये च रि च इति सूत्रेण तासः सस्य लोपो भवति।

इत्थम् संक्षेपेण इदमधेयं यत् लिटि णलादयः द्वित्वम् हलादिशेषत्वं ह्रस्वत्वम् चर्त्वं जश्त्वम् इति एतानि मुख्यानि कार्याणि। एवञ्च लुटि च तास् डा रौ रस् तासः सलोपः एतानि मुख्यानि कार्याणि।

पाठान्तप्रश्नाः

१. परोक्षे लिट् इति सूत्रं व्याख्येयम्।

२. णलादीनां कथम् सर्वादेशत्वम् इति लिखत।

३. लिटि धातोरनभ्यासस्य इति सूत्रं व्याख्येयम्।

४. अभ्यासे चर्च इति सूत्रं व्याख्येयम्।

५. अभ्यासकार्याणि आश्रित्य प्रबन्धं रचयत।

६. आर्धधातुकस्येड् वलादेः इति सूत्रं व्याख्येयम्।

७. बभूव बभूविथ बभूवुः इति एतानि रूपाणि ससूत्रं साधयत।

८. अनद्यतने लुट् इति सूत्रं व्याख्यात।

९. स्यतासी लृलुटोः इति सूत्रं व्याख्यात।

१०. तासस्त्योर्लोपः इति सूत्रं व्याख्यात।

११. ससूत्रं रूपाणि साधयत – भविता भवितारौ भवितासि भवितास्मः।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि- १

१. इन्द्रियागोचरत्वं परोक्षत्वम्।

२. धातोः अर्थः व्यापारः अर्थात् क्रिया अनद्यतने भूते परोक्षे च वर्तते इति विवक्षितं चेत् तस्माद् धातोः लिट् विधीयते।

३. तिपं निवर्त्य णल् यावत् तिपः स्थानम् अधिकरोति तावत् णल् न प्रत्ययः। स्थानिवद्भावेन तस्य यदा प्रत्ययत्वम् अतिदिश्यते तदा चुटू इति सूत्रेण प्रत्ययाद्यस्य णकारस्य इत्संज्ञा भवति। ततः तस्य लोपः इति लोपोऽभवति। अत एव विधानात् पूर्वं णस्य इत्संज्ञालोपयोः अभावे णलः अलेकाल्त्वमस्ति। अतः अनेकाल्शित् सर्वस्य इति सूत्रेण णल् सर्वस्य तिपः स्थाने भवति।

४. भुवः वुक् लुङि लिटि च।

५. १

उत्तराणि- २

६. लिटि धातोरनभ्यासस्य॥

७. षाष्ठद्वित्वप्रकरणे ये द्वे विहिते, तयोः पूर्वस्य अभ्याससंज्ञा भवति।

८. अभ्यासस्य आदेः हलः शेषः।

९. अभ्यासस्याचो ह्रस्वः।

१०. ह्रस्वः।

११. भूधातोः अभ्यासस्य उकारस्य अकारः लिटि परे।

१२. भूधातोः अभ्यासस्य उकारस्य अकारः लिटि परे।

१३. अभ्यासे झलां चर् जश् च। झशां जशः खयां चरः इति विवेकः।

१४. आर्धधातुकस्येड् वलादेः॥

उत्तराणि- ३

१५. धात्वर्थव्यापारस्य अनद्यतने भविष्यति वृत्तित्वविक्षायां लुट् लकारः विधेयः।

१६. लुट्

१७. लुटि मिपि रूपम्।

१८. तास्। स्यतासी लृलुटोः इति सूत्रेण विहितम्।

१९. शप् श्यन् शः श्नुः श्नम्, उ, श्ना इत्यादीनाम् लुटि परतः प्राप्तानां विकरणानाम्।

२०. लुटः प्रथमस्य डारौरसः इत्यत्र प्रथमाः - तिप् तस्-झि इति परस्मैपदसंज्ञकाः त्रयः, त-आताम्-झ इति आत्मनेपदसंज्ञकाः त्रयः सन्ति। एवम् आहत्य षट् प्रथमसंज्ञकाः प्रत्ययाः सन्ति।

२१. डा-रौ-रसः प्रथमसंज्ञकानाम् तिप् तस्-झि इति परस्मैपदसंज्ञकानां, त-आताम्-झ इति आत्मनेपदसंज्ञकानां च स्थाने लुटि लकारे विधीयन्ते।

२२. तासेरस्तेश्च सस्य लोपः सादौ प्रत्यये परे तासस्त्योर्लोपः इति सूत्रेण।

२३. भवितारौ इत्यत्र रूपे तासः सस्य लोपः रि च इति सूत्रेण।

॥ इति चतुर्दशः पाठः ॥

346sk15

१५

भ्वादिप्रकरणे- भूधातोः लृटि लोटि च रूपसाधनम्

प्रस्तावना

पूर्वपाठेषु लट् लिट् लुट् इति एते लकाराः अतिक्रान्ताः। एषु लकारेषु भूधातोः रूपाणि साधितानि। तेषां साधनाय यानि सूत्राणि अपेक्षितानि तानि प्रस्तूय व्याख्यातानि च।

इतः परं लृट् लोट् लङ् चेति त्रयो लकाराः अत्र प्रस्तोष्यन्ते। भूधातोः एषु लकारेषु सर्वाणि रूपाणि साधयितुम् यानि सूत्राणि अपेक्षितानि सन्ति तानि अत्र प्रदास्यन्ते। एतेषां रूपाणां साधनाय यानि दशमकक्षायाः व्याकरणस्य पुस्तकस्य सूत्राणि इतः पूर्वम् अतिक्रान्तानि च सूत्राणि छात्रेण ज्ञातानि एव इति मत्वा पुनः न व्याख्यास्यन्ते। अतः व्याकरणे परपाठस्य अध्यनाय प्रथमतः पठितेषु किं सूत्रं कदा अपेक्षितं भवेदिति निश्चयः नास्ति। अतः दशमकक्षायाः पाठाः द्वादश्याः च इतः पूर्वं गताः पाठाः साधु पठनीयाः।

प्रथमद्वितीयपाठयोः यानि तिङन्तप्रकरणस्य साधारणानि सूत्राणि सन्ति तानि बहूनि यद्यपि आवश्यकानि भवन्ति तथापि सर्वेषां सदा उल्लेखः न करिष्यते। प्रति रूपं सर्वाणि रूपाणि उल्लिख्यन्ते चेत् ग्रन्थस्य परिमाणम् निर्दिष्टपरिमाणादपि अद्यधिकं भवेद्।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य सूत्राणि बुध्यात्।
- लृट् लोट् लङ् एषु लकारेषु भूधातोः रूपाणि ज्ञास्यति।
- लृट् लोट् लङ् एषु त्रिषु लकारेषु भूधातोः तत्तुल्यानाम् अन्येषामपि धातूनां रूपाणि साधयितुं समर्थो भविष्यति।
- लृट् लोट् लङ् एषां लकाराणां कदा कुत्र प्रयोगः कर्तव्यः इति विज्ञास्यति।
- शबादिविकरणस्य अपवादं ज्ञास्यति।

- लृट् लोट् लङ् एषु त्रिषु लकारेषु अनुवृत्तिः अधिकारः आक्षेपः तदादिविधिः तदन्तविधिः एतान् ज्ञास्यति।
- लृट् लोट् लङ् एषां त्रयाणां लकाराणां सूत्राणि व्याख्यातुं समर्थो भविष्यति।

भूधातोः लृट्-लकारे रूपाणि

[१५.१] लृट् शेषे च॥ (३.३.१३)

सूत्रार्थः - भविष्यति अर्थे धातोर्लृट् क्रियार्थायां क्रियायां सत्याम् असत्यां च।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन लृट् लकारः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। लृट् (१/१), शेषे (७/१), च इत्यव्ययपदम्। भविष्यति गम्यादयः इति सूत्राद् भविष्यति इति सप्तम्यन्तं पदमनुवर्तते। धातोः इति पञ्चम्यन्तमधिकृतमस्ति। च इत्यनेन तुमुण्वुलौ क्रियायां क्रियार्थायाम् इति सूत्रस्थाभ्यां क्रियार्थायां क्रियायाम् इति पदाभ्यां परामर्शः भवति। क्रियार्था या क्रिया ततः भिन्नार्थः एवात्र शेषः। सूत्रार्थो भवति - क्रियार्थायाम् क्रियायां सत्याम् असत्यां च धात्वर्थव्यापारः भविष्यत्काले इति विवक्षा चेत् धातोः लृट् विधीयते।

विवरणम् -

या क्रिया अपरक्रियायाः निष्पादनार्थं क्रियते सा क्रियार्था क्रिया। क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था क्रिया। चैत्रः वदति - पठिष्यामि इति पाठशालां गच्छामि इति वाक्यम्। अत्र चैत्रः गमनक्रियां करोति। किं प्रयोजनम् अस्याः क्रियायाः। अत्र गमनं कृत्वा पठिष्यति चैत्रः। अतः गमनक्रियायाः प्रयोजनम् पठनक्रिया। गमनं पठनार्थम्। अतः गमनक्रिया पठनार्था क्रिया। अतः क्रियार्था क्रिया गमनक्रिया।

वाक्ये क्रियार्था क्रिया स्यात् न वा स्यात् , धातोः लृट् 'भविष्यति' अर्थे विधीयते। अत एव सूत्रार्थो भवति - क्रियार्थक्रियायाः सत्त्वे असत्त्वे च धात्वर्थव्यापारः भविष्यत्काले इति विवक्षा चेत् धातोः लृट् विधीयते।

लृट् अद्यतने अनद्यतने च भविष्यति काले भवति। अतः भविष्यत्सामान्ये लृट् विधीयते।

उदाहरणम् - १) क्रियार्थायाम् क्रियायां सत्याम् - पठिष्यामि इति गच्छामि इति। २) क्रियार्थायाम् क्रियायाम् असत्याम् - पठिष्यामि इति।

सूत्रार्थसमन्वयः - १) क्रियार्थायाम् क्रियायां सत्याम् - पठिष्यामि इति गच्छामि इति। अत्र पठनार्थम् गमनम्। पठनक्रियार्था गमनक्रिया। अतः क्रियार्थायाम् सत्याम् भविष्यति काले पठने विवक्षिते प्रकृतसूत्रेण पठ्-धातोः लृट् विहितः।

२) क्रियार्थायाम् क्रियायाम् असत्याम् - पठिष्यामि इति। अत्र वाक्ये क्रियार्था क्रिया नास्ति, परन्तु भविष्यति काले पठनं विवक्षितम्। अतः प्रकृतसूत्रेण पठधातोः लृट् विहितः।

भूधात्वर्थः व्यापारः भविष्यत्काले इति विवक्षायां भूधातोः लृट् शेषे च इति सूत्रेण लृटि ऋकारटकारयोः इत्संज्ञायां लोपे च भू ल् इति स्थितिः जायते। कर्तुः प्रथमपुरुषैकवचनविवक्षायाम् लस्य स्थाने तिपि अनुबन्धलोपे भू ति इति स्थितिर्भवति। अत्र लृट् कर्तरि विहितः। एवञ्च तस्य स्थाने विहितः तिप् अपि स्थानिवद्भावेन कर्तरि एव, तिङ्त्वात् तिङ् शित् सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञकश्च। अतः कर्त्रर्थे सार्वधातुके परे कर्तरि शप् इति सूत्रेण शप् प्राप्नोति। तदा स्यतासी लृलुटोः इति सूत्रेण शपम् अपवादत्वेन प्रबाध्य स्यप्रत्यये कृते भू स्य ति इति स्थितिर्जायते। अत्र स्य प्रत्ययः तिङ्-भिन्नत्वात् शिद्भिन्नत्वात् धातोः इति विहितत्वाच्च आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञकः, तस्य आद्यवर्णः सकारः वल्-प्रत्याहारस्थः, अतः स्यप्रत्ययः वलादिरपि अस्ति। अतः आर्धधातुकस्येड् वलादेः इति सूत्रेण स्यस्य इडागमे टित्त्वाद् आद्यावयवे भू इस्य ति इति स्थितिर्जायते।

ततश्च यदागमपरिभाषया इस्य इति आगमसहितः समुदायः एव प्रत्ययः। स च आर्धधातुकसंज्ञकः। आर्धधातुके परे सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य स्थाने स्थानतः आन्तर्याद् गुणे ओकारे भो इस्य ति इति स्थितिर्जायते। तदा इस्य इत्यस्य अचि इकारे परे एचोऽयवायावः इति सूत्रेण अवादेशे भव् इस्य ति अवस्था उत्पन्ना। अत्र स्य प्रत्ययस्य अवयवः सकारः। स च इणः इकारात् परः अस्ति, अपदान्तश्च अस्ति। अतः आदेशप्रत्यययोः इति सूत्रेण सस्य मूर्धन्यादेशे षकारे भव् इष्य ति इति स्थिते सर्ववर्णमेलने **भविष्यति** इति रूपं सिध्यति।

(**सूत्रम् - आदेशप्रत्यययोः** - इण्-कुभ्यां परस्य अपदान्तस्य आदेशस्य, प्रत्ययावयवश्च यः सकारः तस्य, मूर्धन्यादेशः भवति।)

एवमन्यानि लृट्-लकारस्य सर्वाणि रूपाणि सिध्यन्ति। इतः पूर्वम् उक्तेभ्यः अन्यत् नूतनं सूत्रं तत्र नापेक्षितम्। अतः पूर्वम् अतिक्रान्तानि सूत्राणि आनीय विशिष्टक्रमेण सन्निवेशे सर्वाणि रूपाणि सिध्यन्ति। तत्र कानिचन अत्यन्तं लघुना प्रदर्श्यन्ते। प्रति रूपम् सुदीर्घा रूपसाधनप्रक्रिया भवति। परन्तु सर्वेषामपि रूपाणां समग्रा प्रक्रिया पुस्तकस्य परिमाणम् अत्यधिकं वर्धयेत्। अतः सविस्तरं नोच्यते।

भविष्यतः - भूधात्वर्थव्यापारः भविष्यत्काले विवक्षितः तदा भूधातोः लृटि तसि शपं प्रबाध्य स्यप्रत्यये इडागमे भुवः ऊकारस्य गुणे ओकारे ओकारस्य अवादेशे स्यस्य सकारस्य मूर्धन्यादेशे भविष्यतस् इति स्थिते समुदायस्य तिङन्तत्वेन पदत्वात् रुत्वे विसर्गे भविष्यतः इति रूपं सिध्यति।

भविष्यन्ति - भूधातोः लृटि झिप्रत्यये झस्य अन्तादेशे पूर्ववत् भविष्य अन्ति इति अतो गुणे इत्यनेन पररूपैकादेशे भविष्यन्ति इति रूपं सिध्यति।

भविष्यसि, भविष्यथः भविष्यथ एषु पूर्ववत् रूपाणि भवन्ति।

भविष्यामि - भूधातोः लृटि मिपि पूर्ववत् भविष्य मि इति अतो दीर्घो यञि इत्यनेन अदन्ताङ्गस्य दीर्घे भविष्यामि इति रूपं सिध्यति। एवमेव भविष्यावः भविष्यामः इत्यपि।

भ्वादिप्रकरणे- भूधातोः लृटि लोटि च रूपसाधनम्

भूधातोः लृटि रूपाणि अधः पट्टिकायां प्रदर्शितानि सन्ति -

लृट्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	भविष्यति	भविष्यतः	भविष्यन्ति
मध्यमपुरुषः	भविष्यसि	भविष्यथः	भविष्यथ
उत्तमपुरुषः	भविष्यामि	भविष्यावः	भविष्यामः

अधः केचिद् धातवः दीयन्ते। तेषां रूपाणि एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **पठिष्यति पठिष्यतः पठिष्यन्ति। पठिष्यसि पठिष्यथः पठिष्यथ। पठिष्यामि पठिष्यावः पठिष्यामः।**

२) **गद** व्यक्तायां वाचि - **गदिष्यति गदिष्यतः गदिष्यन्ति। गदिष्यसि गदिष्यथः गदिष्यथ। गदिष्यामि गदिष्यावः गदिष्यामः।**

३) **अर्च** पूजायाम् - **अर्चिष्यति अर्चिष्यतः अर्चिष्यन्ति। अर्चिष्यसि अर्चिष्यथः अर्चिष्यथ। अर्चिष्यामि अर्चिष्यावः अर्चिष्यामः।**

४) **व्रज** गतौ - **व्रजिष्यति व्रजिष्यतः व्रजिष्यन्ति। व्रजिष्यसि व्रजिष्यथः व्रजिष्यथ। व्रजिष्यामि व्रजिष्यावः व्रजिष्यामः।**

५) **कटँ** वर्षावरणयोः - **कटिष्यति कटिष्यतः कटिष्यन्ति। कटिष्यसि कटिष्यथः कटिष्यथ। कटिष्यामि कटिष्यावः कटिष्यामः।**

६) **क्षि** क्षये - **क्षयिष्यति क्षयिष्यतः क्षयिष्यन्ति। क्षयिष्यसि क्षयिष्यथः क्षयिष्यथ। क्षयिष्यामि क्षयिष्यावः क्षयिष्यामः।**

७) **चितीँ** संज्ञाने - **चेतिष्यति चेतिष्यतः चेतिष्यन्ति। चेतिष्यसि चेतिष्यथः चेतिष्यथ। चेतिष्यामि चेतिष्यावः चेतिष्यामः।**

८) **शुच** शोके - **शोचिष्यति शोचिष्यतः शोचिष्यन्ति। शोचिष्यसि शोचिष्यथः शोचिष्यथ। शोचिष्यामि शोचिष्यावः शोचिष्यामः।**

पाठगतप्रश्नाः-१

१. लृट् शेषे च इति सूत्रस्य उदाहरणं किम्।

२. लृडादेशस्य तिङः आर्धधातुकसंज्ञा भवति न वा।

३. लृटि स्यप्रत्ययः सार्वधातुकः आर्धधातुको वा।

४. स्यप्रत्ययः केषु लकारेषु भवति।

५. लृट् शेषे च इत्यत्र कः शेषपदार्थः।

६. इदं लृटः उदाहरणं नास्ति।

१) भविष्यथः २) भविष्याव ३) भविष्यामि ४) भविष्यतः

लोट् लकारः

[१५.२] लोट् च॥ (३.३.१६२)

सूत्रार्थः - विध्यादिषु अर्थेषु धातोः लोट् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अस्मिन् सूत्रे पदद्वयमस्ति। लोट् (१/१), च इत्यव्ययपदम्। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रात् विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु इति पदमनुवर्तते। प्रत्ययः परश्च इति सूत्रद्वयमधिकृतमत्र। प्रत्ययाधिकारे पठितत्वात् लोट् इति प्रत्ययसंज्ञकः। धातोः इति पञ्चम्यन्तं पदमधिकृतमस्ति। सूत्रार्थो भवति - विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु अर्थे वर्तमानाद् धातोः परं लोट् प्रत्ययः भवति। विध्यादीनाम् विस्तृतं विवेचनम् विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रे द्रष्टव्यम्।

(यदि परीक्षासु अस्य व्याख्या कर्तव्या तर्हि विधिलिङि प्रपञ्चितो विषयः अवश्यलेख्यः अस्ति।)

[१५.३] आशिषि लिङ्-लोटौ॥ (३.३.१७३)

सूत्रार्थः - आशिषि अर्थे धातोः लिङ्लोटौ स्तः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। आशिषि (७/१), लिङ्लोटौ (१/२)। लिङ् च लोट् च इति लिङ्लोटौ इति इतरेतरयोगद्वन्द्वसमासः। प्रत्ययः परश्च इति सूत्रद्वयमधिकृतमत्र। प्रत्ययाधिकारे पठितत्वात् लिङ् लोट् इति प्रत्ययौ। धातोः इति पञ्चम्यन्तं पदमधिकृतमस्ति। सूत्रार्थो भवति - आशिषि अर्थे वर्तमानाद् धातोः परम् लिङ् लोट् च प्रत्ययौ स्तः।

आशिस् इति सकारान्तः स्त्रीलिङ्गशब्दः। आशासनम् याच्ञा आशीः। अप्राप्तस्य इष्टस्य अर्थस्य प्राप्तुम् इच्छा आशीः। कश्चिद् शक्त्या ज्ञानेन वयसा वा ज्येष्ठः कनिष्ठस्य अप्राप्तः इष्टः अर्थः कनिष्ठस्य भवतु इति इच्छां वचसा प्रकटयति। सा आशीः कथ्यते। तथाहि अभियुक्तोक्तिः -

वात्सल्याद्यत्र मान्येन कनिष्ठस्याभिधीयते।
इष्टावधारकं वाक्यमाशीः सा परिकीर्तिता।।

उदाहरणम् - चिरं जीव। सफलो भवतात्। स्वस्ति भवतु।

सूत्रार्थसमन्वयः - आशीर्वादार्थे वर्तमानाद् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोट् विधीयते। लोटः अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने प्रथमपुरुषैकवचनविवक्षायां तिप्-प्रत्यये भू ति इति स्थिते तिङ्शित्सार्वधातुकम् इति सूत्रेण तिपः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ ति इति जायते। शप्-प्रत्ययः शित् एवञ्च धात्वधिकारोक्तः। अतः तिङ्शित् सार्वधातुकमिति सार्वधातुकसंज्ञकः। अतः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ ति इति जायते। यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ ति इति जाते वर्णसम्मेलने भवति इति रूपं लभ्यते। तदा -

[१५.४] एरुः॥ (३.४.८६)

सूत्रार्थः - लोटः इकारस्य उः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण उकारः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। एः (६/१) (इकारस्य षष्ठी), उः (१/१)। लोटो लङ्वत् इति सूत्रात् लोटः इति षष्ठ्यन्तं पदमनुवर्तते। सूत्रार्थो भवति - लोटः इकारस्य स्थाने उकारः स्यात्।

उदाहरणम् - भवतु

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण भव् अ ति स्थितौ ति लोट् अस्ति। एवञ्च तस्य इकारः अस्ति। अतः प्रकृतसूत्रेण इकारस्य स्थाने उकारे भवतु इति रूपं लभ्यते। तदा -

[१५.५] तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्॥ (७.१.३५)

सूत्रार्थः - आशिषि तुह्योः तातङ् वा स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण तातङ् विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। तुह्योः तातङ् आशिषि अन्यतरस्याम् इति सूत्रस्थसन्धेः छेदः। तुह्योः (६/२), तातङ् (१/१), आशिषि (७/१), अन्यतरस्याम् इति विकल्पार्थे अव्ययम्। तुश्च हिश्च तुही, तयोः तुह्योः इति इतरेतरयोगद्वन्द्वसमासः। सूत्रार्थो भवति - आशिषि विद्यमानस्य तु इत्यस्य स्थाने हि इत्यस्य च स्थाने तातङ् विकल्पेन भवति।

तातङ् इत्यस्य ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, तस्य लोपः इति सूत्रेण लोपः च भवति। अकारः उच्चारणार्थः अस्ति। तात् इति अवशिष्यते। इत्थम् तात् अर्थात् तातङ् अनेकाल् अस्ति, ङिदपि अस्ति। अतः परिभाषाप्रकरणे प्रोक्तप्रकारेण अनेकाल् ङित् आदेशः ङिच्च इति परिभाषया यस्य उक्तः तस्य अन्त्यस्य अलः एव भवति। ङिच्च इति परिभाषा अनेकाल्शित् सर्वस्य इति परिभाषायाः अपवादः एवास्ति। तत्रोच्यते - कोऽपि इत्संज्ञकः पाणिनिना प्रयोजनम् उद्दिश्य आसज्यते। यथा क्वचित् ङकारः इत् चेत् क्ङिति च इति सूत्रेण वृद्धिनिषेधो भवति, ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च इत्यनेन सम्प्रसारणं भवति। इत्थं यदि

ङित्त्वस्य प्रयोजनं स्यात् तर्हि इदं ङित्त्वं कार्यं कृत्वा मन्थरं भवति, शक्तिहीनं भवति। अतः तादृशं ङित्त्वम् अस्ति चेदपि ङिच्च इति परिभाषा कार्यं न करोति। अत्रापि तातङः ङित्त्वम् अन्यत्र कार्यं कृत्वा शक्तिहीनं सञ्जातम्। अतः ङिच्च इति परिभाषा न प्रवर्तते। अत एव अनेकाल्शित् सर्वस्य इति परिभाषया तातङ् तुस्थाने हिस्थाने सर्वादेशः भवति।

उदाहरणम् - भवतात्।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण भवतु इति स्थितौ तु इति प्रत्ययः आशिषि लिङ्लोटौ इति सूत्रेण विहितस्य लोटः स्थाने अस्ति। अतः स्थानिवद्भावात् सोऽपि आशिषि एवास्ति। अतः अनेकाल्शित् सर्वस्य इति परिभाषया तु इति सर्वस्य स्थाने विकल्पेन तातङ्- आदेशे **भवतात्** इति रूपं निष्पद्यते। तातङ्ङभावपक्षे **भवतु** इत्यपि रूपं सिध्यति।

--

आशीर्वादार्थे वर्तमानाद् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोटि लस्य स्थाने तस्-प्रत्यये भू तस् इति स्थितिर्जायते। तदा -

[१५.६] लोटो लङ्वत्॥ (३.४.८५)

सूत्रार्थः - लङः स्थाने कार्याणि इव कार्याणि लोटः स्थाने अतिदिश्यन्ते। कार्याणि च लोटः तामादयः सलोपश्च।

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। लोटः लङ्वत् इति सूत्रगतपदच्छेदः। लोटः (६/१), लङ्वत् इत्यव्ययपदम्। लङः इव इति लङ्वत्। (तत्र तस्येव इति सूत्रेण वतिः प्रत्ययः।) सूत्रार्थो भवति - लङः स्थाने कार्याणि इव कार्याणि लोटः स्थाने अतिदिश्यन्ते। कानि तानि कार्याणि। कार्याणि हि - तस्थस्थमिपां तान्तन्तामः इति सूत्रेण विहिताः तामादयः, नित्यं ङितः सूत्रेण विहितः सलोपश्चेति।

अनेन सूत्रेण अतिदेशः कृतः। अतः अतिदेशवशात् लङः स्थाने कार्यविधायकानि सूत्राणि अत्र प्रवर्तन्ते। तदुपन्यासः अधस्तात्।

[१५.७] तस्थस्थमिपां तान्तन्तामः॥ (३.४.१०१)

सूत्रार्थः - ङितः चतुर्णां तामादयः क्रमात् स्युः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण ताम् तम् त अ एते विधीयन्ते। अस्मिन् सूत्रे द्वे पदे स्तः। तस्थस्थमिपाम् तान्तन्तामः इति सूत्रगतपदच्छेदः। नित्यं ङितः इति सूत्रात् ङितः इति षष्ठ्यन्तं पदमनुवर्तते। लस्य इत्यधिकृतम्। ताः च थाः च थः च मिप् च इति तस्थस्थमिपः, तेषां तस्थस्थमिपाम् इति इतरेतरयोगद्वन्द्वसमासः। (अत्र तस् इति सान्तः प्रत्ययः। तस्य वेधस्-शब्दवत् पुंसि रूपम् ताः। एवमन्यत्र।) ताम् च तम् च तश्च अम् च इति तान्तन्तामः इति इतरेतरयोगद्वन्द्वसमासः। ङितः इति लस्य विशेषणम्। अतः लः यः ङित् तस्य इत्यर्थो लभ्यते। सूत्रार्थो भवति - ङितः लस्य स्थाने विहितानाम् तस् थस् थ मिप् एषां स्थाने ताम् तम् त अम् एते क्रमात् स्युः। ताम् इत्यादयः अनेकालः सन्ति। अतः

भ्वादिप्रकरणे- भूधातोः लृटि लोटि च रूपसाधनम्

अनेकाल्शित् सर्वस्य इति परिभाषया सर्वस्य स्थाने भवन्ति। एवञ्च ङितो लकाराः भवन्ति लङ् लिङ् लुङ् लृङ् चेति चत्वारः। एषे चतुर्षु अस्य सूत्रस्य प्रवृत्तिः स्यात्। तत्र लोटः स्थाने लङः इव कार्याणि अतिदिष्टानि। अतः एतत्सूत्रं लोटि अपि प्रवर्तते।

उदाहरणम् - भवताम्। भवतम्। भवत।

सूत्रार्थसमन्वयः - आशीर्वादार्थे वर्तमानाद् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोटि लस्य स्थाने तस्-प्रत्यये भू तस् इति स्थितिर्जायते। तत्र लोटः स्थाने तस् विहितः अस्ति। लोटः स्थाने लङः इति कार्याणि भवन्ति इति अतिदेशः अस्ति। अतः लङः स्थाने कार्यविधायकं तस्थस्थमिपां तान्तन्तामः इति सूत्रमत्र प्रवर्तते। तेन तसः स्थाने सर्वादेशः ताम् भवति। तेन भू ताम् इति स्थितिर्जायते। स्थानिवद्भावात् तामः अपि तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ ताम् इति जायते। शप्-प्रत्ययः शित् एवञ्च धात्वधिकारोक्तः। अतः तिङ्शित् सार्वधातुकमिति सार्वधातुकसंज्ञकः। अतः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ ताम् इति जायते। यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ ताम् इति जाते वर्णसम्मेलने **भवताम्** इति रूपं सिध्यति।

(भवन्तु इति रूपे लोटो लङ्वत् इत्यादिकार्यं नास्ति। तथापि क्रमेण रूपम् आयाति। अतः अत्र उपस्थाप्यते।)

भवन्तु - आशीर्वादार्थे वर्तमानाद् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोटि लस्य स्थाने प्रथमबहुवचनविवक्षायाम् झि-प्रत्यये भू झि इति स्थिते झकारस्य स्थाने झोऽन्तः इति सूत्रेण अन्त् इत्यादेशे भू अन्ति इति जाते ततः शपि गुणे अवादेशे भव् अ अन्ति इति स्थिते अतो गुणे इति सूत्रेण पररूपैकादेशे भवन्ति इति रूपं लभ्यते। तत्र अन्ति लोट् अस्ति। एवञ्च तस्य इकारः अस्ति। अतः एरुः इति सूत्रेण इकारस्य स्थाने उकारे **भवन्तु** इति रूपं सिध्यति।

(अत्र सिप्-प्रत्यये कृते भव इति रूपं देयमस्ति। परन्तु तद् अग्रे दत्तमस्ति। प्रकृतसूत्रस्योदाहरणानि अत्र दीयन्ते।)

भवतम् - पूर्ववत् आशीर्वादार्थे वर्तमानाद् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोटि लस्य स्थाने मध्यमद्विवचनविवक्षायाम् थस्-प्रत्यये भू थस् इति स्थितिर्जायते। लोटो लङ्वत् इति अतिदेशेन तस्थस्थमिपां तान्तन्तामः इति सूत्रेण थसः स्थाने सर्वादेशे तम्-आदेशे भू तम् इति स्थितिर्जायते। ततः शपि गुणे अवादेशे भव् अ तम् इति जाते वर्णसम्मेलने **भवतम्** इति रूपं सिध्यति।

भवत - पूर्ववत् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोटि लस्य स्थाने मध्यमबहुवचनविवक्षायाम् थ-प्रत्यये भू थ इति स्थितिर्जायते। लोटो लङ्वत् इति अतिदेशेन तस्थस्थमिपां तान्तन्तामः इति सूत्रेण थस्य स्थाने सर्वादेशे त-आदेशे भू त इति स्थितिर्जायते। ततः शपि गुणे अवादेशे भव् अ त इति जाते वर्णसम्मेलने **भवत** इति रूपं सिध्यति।

[१५.८] सेर्ह्यपिच्च॥ (३.४.८७)

सूत्रार्थः - लोटः सेः हि स्यात्। सः अपित् अस्ति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण हि-आदेशः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। सेः हि अपित् च इति सूत्रगतपदच्छेदः। सेः (६/१), हि (१/१), अपित् (१/१), च इत्यव्ययम्। लोटो लङ्वत् इति सूत्रात् लोटः इति षष्ठ्यन्तं पदमनुवर्तते। प्रत्ययः परश्चेति द्वयमपि अधिकृतम्। सूत्रार्थो भवति - लोटः स्थाने विहितस्य सिपः स्थाने हि इत्यादेशो भवति। स च आदेशः अपित् अस्ति। तिप्-तस्-झि ... इति सूत्रेण मध्यमैकवचनविवक्षायां लस्य स्थाने सिप् विधीयते। यदि लोटः स्थाने सिप् विहितः तर्हि सिपः स्थाने अनेन सूत्रेण हि इति आदेशः विधीयते। हि अनेकाल्त्वात् सर्वादेशः भवति।

स्थानिवद्भावात् सिपः पित्त्वं हि-आदेशे अतिदिश्यते। तद्वारणाय अपित् इति उक्तं सूत्रे। अपित्त्वस्य फलं तु सार्वधातुकमपित् इति सूत्रेण ङिद्वद्भावात् क्ङिङति च इति गुणवृद्धिनिषेधादिकम्।

उदाहरणे सूत्रार्थसमन्वयः -

भवसि - आशीर्वादार्थे वर्तमानाद् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोटि लस्य स्थाने मध्यमपुरुषैक-वचनविवक्षायां सिपि अनुबन्धलोपे भू सि इति स्थितिर्भवति। अत्र लोटः स्थाने सिः विहितः अस्ति। अतः सेर्ह्यपिच्च इति प्रकृतसूत्रेण सिस्थाने हि इति अनेकाल्त्वात् सर्वादेशे भू हि इति जाते हि-आदेशस्य स्थानिवद्भावात् सार्वधातुकसंज्ञायां कर्तरि विहितत्वाच्च कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ हि इति जायते। ततश्च भुवः ऊकारस्य गुणे ओकारे भो अ हि इति जाते ओकारस्य अवादेशे भव हि इति जायते। तदा -

[१५.९] अतो हेः॥ (६.४.१०५)

सूत्रार्थः - अदन्तादङ्गात् परस्य हेर्लुक्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। सूत्रेस्मिन् पदद्वयं वर्तते। अतः हेः इति सूत्रगतपदच्छेदः। अतः (५/१), हेः (६/१)। चिणो लुक् इति सूत्रात् लुक् इति प्रथमान्तं पदमनुवर्तते। अङ्गस्य इति अधिकृतम्। अङ्गस्य इति षष्ठ्यन्तं पदं पञ्चम्यन्ततया विपरिणमते। तदा वाक्ययोजना भवति - अतः अङ्गात् हेः लुक् इति। अत्र तदन्तविधिः भवति। अत्र अतः अङ्गात् इति पदद्वयं समानविभक्तिकं वर्तते। अत्र अङ्गात् इति विशेष्यम्। अतः इति विशेषणम्। अतः तदन्तविधिना अदन्तात् अङ्गात् इति लभ्यते। ततश्च सूत्रार्थः भवति - अदन्तात् अङ्गात् परस्य हेः लुक् भवतीति।

विशेषता - प्रत्ययस्य लुक्-श्लु-लुपः इत्यनेन प्रत्ययस्य अदर्शनस्य लुक् इति संज्ञा भवति। अत्र हि इत्यपि स्थानिवद्भावेन प्रत्ययः अस्ति। अतः अत्र हि इति समग्रस्य प्रत्ययस्य लुक् भवति। तस्मात् अत्र अलोऽन्त्यस्य इति परिभाषा न प्रवर्तते।

उदाहरणम् - भव।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तरूपेण भव हि इति स्थितिः। अत्र हि-प्रत्यये परे भव इति अङ्गम्। तच्च अदन्तमस्ति। तस्मात् तस्मात् परस्य हेः लुक् प्रकृतसूत्रेण भवति। तेन **भव** इति साधु रूपं निष्पद्यते।

तुह्योस्तातङ्ङाशिषि अन्यतरस्याम् इति सूत्रेण विकल्पेन हिस्थाने तातङ् विधयते। अतः पक्षे **भवतात्** इत्यपि रूपं भवति।

[१५.१०] मेर्निः॥ (३.४.८९)

सूत्रार्थः - लोटः मेः स्थाने निः आदेशः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण निः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। मेः (६/१), निः (१/१)। लोटो लङ्वत् इति सूत्रात् लोटः इति षष्ठ्यन्तं पदमनुवर्तते। सूत्रार्थो भवति - लोटः स्थाने विहितस्य मिपः स्थाने निः आदेशः भवति। मिः अनेकाल्त्वात् सर्वादेशः भवति। लङ्वद्भावेन तस्थस्थमिपां तान्तन्तामः इति सूत्रेण मिपः स्थाने अम् प्राप्तः। तस्य अनेन बाधः क्रियते। अतः अमः निः अपवादः।

उदाहरणे सूत्रार्थसमन्वयः - आशीर्वादार्थे वर्तमानाद् भूधातोः आशिषि लिङ्-लोटौ इति सूत्रेण कर्तरि लोटि लस्य स्थाने उत्तमैक-वचनविवक्षायां मिपि अनुबन्धलोपे भू मि इति स्थितिर्भवति। लोटो लङ्वत् इति सूत्रेण अतिदेशे कृते तस्थस्थमिपां तान्तन्तामः इति सूत्रेण मिपः स्थाने अम्-आदेशे प्राप्ते प्रकृतसूत्रेण तम् अपवादत्वेन प्रबाध्य निः विधीयते। अतः भू नि इति स्थितिर्जायते। तदा -

[१५.११] आडुत्तमस्य पिच्च॥ (३.४.९२)

सूत्रार्थः - लोडुत्तमस्य आट् स्यात् पिच्च।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन आट् विधीयते। अस्मिन् सूत्रे आट् उत्तमस्य पित् च इति पदचतुष्टयम् अस्ति। तत्र आट् (१/१), उत्तमस्य (६/१) पित् (१/१), चेति अव्ययपदम्। प् इत् यस्य स पित् इति बहुव्रीहिसमासः। ततश्च सूत्रार्थो भवति - लोटः स्थाने विहितस्य उत्तमपुरुषस्य आट् स्यात् स पित् च स्यात् इति। आटः टित्त्वात् आद्यन्तौ टकितौ इत्यनया परिभाषया आट् उत्तमपुरुषस्य आद्यावयवः भवति।

उत्तमाः षट् सन्ति। मिप् वस् मस् , इट् वहि महिङ् इति। तेषु केवलं मिप् एव पित् अस्ति। अन्ये अपितः सन्ति। अतः तेषामपि पित्त्वविधानाय अत्र आटः पित्त्वम् उक्तम्। एवञ्च सार्वधातुकमपित् इति सूत्रेण अपित् सार्वधातुकं ङिद्वद् भवति। तद् मा भूत् इति पित्त्वविधिः। ङित्त्वेन क्ङिति च गुणवृद्धिनिषेधः प्राप्नोति। तस्य वारणायायं पित्त्वप्रपञ्चः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तरूपेण भू नि इति स्थितिः। तत्र लोटः उत्तमस्य मिपः स्थाने विहितः निः अपि उत्तमः एव। अत एव आडुत्तमस्य पिच्च इति प्रकृतसूत्रेण आडागमे आटः टित्त्वात् आद्यन्तौ टकितौ इत्यनया परिभाषया आद्यावयवे भू आति इति स्थिते आनि इत्यस्य

सार्वधातुकसंज्ञायां कर्तरि विहितत्वाच्च कर्तरि शप् इति सूत्रेण धातोः शपि भू अ आनि इति जाते भुवः ऊकारस्य गुणे ओकारे भो अ आनि इति जाते ओकारस्य अवादेशे भव आनि इति जायते। तदा अकः सवर्णे दीर्घः इति सूत्रेण अकार-आकारयोः स्थाने सवर्णदीर्घैकादेशे **भवानि** इति रूपं सिध्यति।

[१५.१२] नित्यं ङितः॥ (३.४.९९)

सूत्रार्थः - सकारन्तस्य ङिदुत्तमस्य नित्यं लोपः भवति।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयमस्ति। नित्यम् ङितः इति सूत्रगतपदच्छेदः। नित्यम् इति क्रियाविशेषणम् अव्ययपदम्। ङितः इति षष्ठ्यन्तं पदम्। लस्य (६/१) इति अधिकृतम्। स उत्तमस्य इति सम्पूर्णं सूत्रमनुवर्तते। तत्र सः इति षष्ठ्यन्तम्। उत्तमस्य इत्यपि षष्ठ्यन्तम्। प्रत्ययः इति अधिकृतम्। षष्ठ्यन्ततया विपरिणामश्च भवति। ङकारः इत् यस्य सः ङित्, तस्य ङितः इति बहुव्रीहिसमासः। ङित् इत्यनेन ङित् लकाराः ग्राह्याः। ते हि लङ् लिङ् लुङ् लृङ् चेति चत्वारः। पदयोजना - सः उत्तमस्य ङितः लस्य प्रत्ययस्य नित्यं लोपः।

ङितः उत्तमस्य इत्यस्यार्थो हि ङितः लकारस्य स्थाने विहितः य उत्तमसंज्ञकः प्रत्ययः तस्य इति।

अत्र सूत्रे तदन्तविधिः भवति। अत्र सः ङिदुत्तमस्य इति षष्ठ्यन्तं समानविभक्तिकं पदद्वयमस्ति। सः इति विशेषणम्, उत्तमस्य इति विशेष्यम्। अतः तदन्तविधिना सकारान्तस्य उत्तमस्य इत्यर्थो लभ्यते। अत्र उत्तमस्य इति अल्समुदायबोधकं पदम्, आदेशस्य लोपः। अतः अलोऽन्त्यस्य इति परिभाषया सान्तस्य उत्तमस्य अन्त्यस्य अलः सकारस्य लोपः भवति इत्यर्थो लभ्यते। अतः सूत्रार्थो भवति - ङितः लस्य स्थाने विहितः यः सकारान्तः उत्तमः, तस्य अन्त्यस्य अलः सकारस्य नित्यं लोपः भवति।

उदाहरणम् - भवाव। भवाम।

सूत्रार्थसमन्वयः -

भवाव - भू-धातोः लोटि उत्तमपुरुषद्विवचने वसि भू वस् इति आङुत्तमस्य पिच्च इत्यनेन आडागमे टित्त्वाद् आद्यावयवे भू आवस् इति स्थिते शपि गुणे अवादेशे भव आवस् इति स्थिते लोटो लङ्वत् इति अतिदेशबलेन आवस् इत्यपि लङः ङित्त्वात् यानि कार्याणि तानि लभते। अतः आवस् इति ङितः स्थाने विहितः उत्तमसंज्ञकः, सान्तश्च अस्ति। अतः नित्यं ङितः इति सूत्रेण आवस् अन्त्यस्य अलः सकारस्य लोपे भव आव इति स्थिते अकः सवर्णे दीर्घः इति सूत्रेण अकार-आकारयोः स्थाने सवर्णदीर्घैकादेशे **भवाव** इति रूपं सिध्यति।

भवाम - भू-धातोः लोटि उत्तमपुरुषबहुवचने मसि भू मस् इति स्थिते आडागमे भू आमस् इति जाते शपि गुणे अवादेशे भव आमस् इति स्थिते लोटो लङ्वत् इति अतिदेशबलेन आमस् इत्यस्य ङिद्भावेन नित्यं ङितः इति सूत्रेण आमस् अन्त्यस्य अलः सकारस्य लोपे भव आम इति स्थिते अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घैकादेशे **भवाम** इति रूपं सिध्यति।

भ्वादिप्रकरणे- भूधातोः लृटि लोटि च रूपसाधनम्

आशिषि भूधातोः लोटि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

आशीर्लोट्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	भवतु भवतात्	भवताम्	भवन्तु
मध्यमपुरुषः	भव भवतात्	भवतम्	भवत
उत्तमपुरुषः	भवानि	भवाव	भवाम

धातोः परं विध्यादिषु अर्थेषु लोट्-लकारे विहिते तातङ् न भवति। अन्यानि सर्वाणि रूपाणि यथा आशिषि साध्यन्ते तथैव विध्यादिषु अर्थेषु अपि साध्यन्ते। न कोऽपि भेदः।

विध्यादिषु अर्थेषु भूधातोः लोटि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

विधिलोट्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	भवतु	भवताम्	भवन्तु
मध्यमपुरुषः	भव	भवतम्	भवत
उत्तमपुरुषः	भवानि	भवाव	भवाम

अधः केचिद् धातवः दीयन्ते। तेषां रूपाणि एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **पठतु पठताम् पठन्तु। पठ पठतम् पठत। पठानि पठाव पठाम।**

२) **गद** व्यक्तायां वाचि - **गदतु गदताम् गदन्तु। गद गदतम् गदत। गदानि गदाव गदाम।**

३) **अर्च** पूजायाम् - **अर्चतु अर्चताम् अर्चन्तु। अर्च अर्चतम् अर्चत। अर्चानि अर्चाव अर्चाम।**

४) **व्रज** गतौ - **व्रजतु व्रजताम् व्रजन्तु। व्रज व्रजतम् व्रजत। व्रजानि व्रजाव व्रजाम।**

५) **कटँ** वर्षावरणयोः - **कटतु कटताम् कटन्तु। कट कटतम् कटत। कटानि कटाव कटाम।**

६) **क्षि** क्षये - **क्षयतु क्षयताम् क्षयन्तु। क्षय क्षयतम् क्षयत। क्षयानि क्षयाव क्षयाम।**

७) **चितीँ** संज्ञाने - **चेततु चेतताम् चेतन्तु। चेत चेततम् चेतत। चेतानि चेताव चेताम।**

८) **तप** सन्तापे - **तपतु तपताम् तपन्तु। तप तपतम् तपत। तपानि तपाव तपाम।**

९) **शुच** शोके - **शोचतु शोचताम् शोचन्तु। शोच शोचतम् शोचत। शोचानि शोचाव शोचाम।**

पाठगतप्रश्नाः-२

७. लोट् च इति सूत्रस्य अर्थं लिखत।

८. आशिषि के लकाराः भवन्ति।

९. आशिषि लोट् केन सूत्रेण विधीयते।

१०. आशिःशब्दार्थः कः।

११. एरुः इति सूत्रस्यार्थं लिखत।

१२. मेर्निः कस्य कस्मिन् लकारे च।

१३. भवाव इति रूपे सलोपः केन सूत्रेण।

१४. लोटः मिपः स्थाने क आदेशो भवति।

१) नि २) अम् ३) इलोपः ४) आट्

१५. लोटः उदाहरणं किम्।।

१) भवावः २) भवाम ३) भवथ ४) भवतः

१६. भवतु इति रूपे तिपः इकारस्य उकारः केन सूत्रेण।

१) इतश्च २) एरुः ३) नित्यं ङितः ४) अतो हेः

१७. लोटः आट् केन सूत्रेण विधीयते।

१) आटश्च २) आडजादीनाम् ३) आडुत्तमस्य पिच्च ४) लोट् च

१८. लोटः कस्य आट् भवति।

१) अङ्गस्य २) मध्यमस्य ३) उत्तमस्य ४) आगमस्य

१९. नित्यं ङितः इति सूत्रं किं करोति।

१) आडागमः २) अडागमः ३) वृद्धिः ४) सलोपः

२०. लोटः उत्तमस्य आट् कीदृशः।

१) पित् २) अपित् ३) ङित् ४) कित्

२१. सेर्हि कीदृशः।

१) पित् २) अपित् ३) ङित् ४) कित्

२२. अतो हेः इति सूत्रेण किं विधीयते।

१) अल्लोपः २) हिलोपः ३) हिलुक् ४) अतो दीर्घः

२३. अतो हेः इति सूत्रस्योदाहरणं किम्।

१) याहि २) एधि ३) भवत ४) भव

भूधातोः लङ्-लकारे रूपाणि

[१५.१३] अनद्यतने लङ्॥ (३.२.१११)

सूत्रार्थः - अनद्यतनभूतार्थवृत्तेः धातोः लङ् स्यात्।

सूत्रव्याख्या - सूत्रमिदम् विधिसूत्रम्। अस्मिन् सूत्रे पदत्रयमस्ति। अनद्यतने (७/१), लङ् (१/१)। भूते (७/१), धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। अद्य भवः अद्यतनः, अविद्यमानः अद्यतनः यस्मिन् सः अनद्यतनः कालः इति बहुव्रीहिसमासः। अतीतरात्रेः अन्त्ययामेन आगामिरात्रेः आद्ययामेन सहितः कालः अद्यतनः। तद्भिन्नः अनद्यतनः। भूतत्वं च अतीतकालः। पदयोजना - अनद्यतने भूते धातोः परः लङ् प्रत्ययः। ततश्च सूत्रार्थः भवति - अनद्यतनभूते अर्थे वर्तमानाद् धातोः परं लङ् प्रत्ययः स्यात् इति।

धातोः अर्थः व्यापारः फलं चेति उक्तमेव। यस्य धातोः अर्थः व्यापारः अर्थात् क्रिया अनद्यतने भूते वर्तते स धातुः अनद्यतनभूतार्थवृत्तिः कथ्यते। तस्मिन् काले क्रियायाः वृत्तिः यस्य स अनद्यतनभूतार्थवृत्तिः धातुः। यदि तस्मिन् काले क्रिया इति प्रकटनस्य विवक्षा अस्ति तर्हि धातोः परं लङ् प्रत्ययः विधीयते।

उदाहरणम् - रामः अयोध्याया राजा अभवत्।

भूधातोः भूते अनद्यतने अर्थे लङि अकारस्य ङकारस्य च इत्संज्ञायां लोपे भू ल् इति स्थिते तिपि भू ति इति स्थिते इकारस्य लोपे भू त् इति स्थिते शपि अनुबन्धलोपे भू अ त् इति स्थिते गुणे अवादेशे अडागमे अ भव् अ त् इति स्थिते सर्वसंयोगे अभवत् इति रूपं सिद्ध्यति।

[१५.१४] लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः॥ (६.४.७१)

सूत्रार्थः - लुङ् लङ् लृङ् एषु अङ्गस्य अट् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अट् विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। लुङ्-लङ्-लृङ्-क्षु (७/३), अट् (१/१), उदात्तः (१/१)। अङ्गाधिकारे पठितमिदं सूत्रम्। लुङ् च लङ् च लृङ् च इति लुङ्-लङ्-लृङः, तेषु लुङ्-लङ्-लृङ्-क्षु इति इतरेतरयोगद्वन्द्वसमासः। सूत्रार्थो भवति - लुङ्-लङ्-लृङ् एषु प्रत्ययेषु परेषु यदङ्गं तस्य अट् स्यात् स उदात्तश्च। अटः टस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, तस्य लोपः इति सूत्रेण लोपश्च भवति। अटः टित्त्वात् आद्यन्तौ टकितौ इति परिभाषया सः अङ्गस्य आद्यावयवः भवति।

उदाहरणे सूत्रार्थसमन्वयः - (लट्-लकारवत् अत्र प्रक्रिया भवति। सा संक्षेपेण दीयते अत्र।) अनद्यतनभूतार्थे वर्तमानाद् भूधातोः अनद्यतने लङ् इति सूत्रेण कर्तरि लङ् विधीयते। लङः अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने प्रथमपुरुषैकवचनविवक्षायां तिप्-प्रत्यये भू ति इति स्थिते तिङ्शित्सार्वधातुकम् इति सूत्रेण तिपः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि

अनुबन्धलोपे भू अ ति इति जायते। शप्-प्रत्ययः शित् एवञ्च धात्वधिकारोक्तः। अतः तिङ्शित् सार्वधातुकमिति सार्वधातुकसंज्ञकः। अतः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ ति इति जायते। यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव ति इति जाते लङः स्थाने विहिते तिपि परे भव इति शप्-सहितस्य अङ्गसंज्ञा भवति। तदा लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अट्-आगमे टित्त्वाद् आद्यावयवे अभव ति इति स्थितिः जायते। तदा -

[१५.१५] आडजादीनाम्॥ (६.४.७२)

सूत्रार्थः - अजादेः अङ्गस्य आट् लुङ्-लङ्-लृङ्-क्षु।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण आट् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। आट् अजादीनाम् इति सूत्रगतपदच्छेदः। आट् (१/१), अजादीनाम् (६/३)। अङ्गस्य इति अधिकृतम्। तस्य बहुवचनान्ततया विपरिणामः भवति। लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रात् लुङ्-लङ्-लृङ्-क्षु इति सप्तमीबहुवचनान्तं पदमनुवर्तते। उदात्तः इति प्रथमान्तं पदमनुवर्तते। अच् आदिः येषां ते अजादयः, तेषाम् अजादीनाम् इति बहुव्रीहिः समासः। लुङ् च लङ् च लृङ् च इति लुङ्-लङ्-लृङः, तेषु लुङ्-लङ्-लृङ्-क्षु इति इतरेतरयोगद्वन्द्वसमासः। पदयोजना भवति - अजादीनाम् अङ्गानाम् आट् उदात्तः लुङ्-लङ्-लृङ्-क्षु। सूत्रार्थो भवति - लुङ्-लङ्-लृङ् एषु प्रत्ययेषु परेषु यद् अजादि अङ्गं तस्य आट् स्यात् स उदात्तश्च। आटः टस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति, तस्य लोपः इति सूत्रेण लोपश्च भवति। आटः टित्त्वात् आद्यन्तौ टकितौ इति परिभाषया सः अङ्गस्य आद्यावयवः भवति।

उदाहरणम् - आतत्।

सूत्रार्थसमन्वयः - अत सातत्यगमने इति धातोः लङि अनुबन्धलोपे अत् ल् इति जाते तिपि शपि अत् अ ति जाते लङि परतः अत्+अ इति अङ्गम्। तस्य आदिवर्णः अकारः अच्। अतः अङ्गम् अजादि। अतः प्रकृतसूत्रेण तस्य आट् आगमः, आटः टित्त्वात् आद्यन्तौ टकितौ इति परिभाषया सः अङ्गस्य आद्यावयवः भवति। तेन आ अत् अ ति स्थितिः जायते। तदा -

[१५.१६] आटश्च॥ (६.१.९०)

सूत्रार्थः - आटोऽचि परे वृद्धिरेकादेशः स्यात्।

सूत्रावतरणम् - आ एध् ल् इति स्थिते अकार-एकारयोः स्थाने वृद्धिविधानार्थम् इदं सूत्रं प्रवर्तते।

सूत्रव्याख्या - विधिसूत्रमिदम्। सूत्रेऽस्मिन् द्वे पदे स्तः। आटः इति षष्ठ्यन्तं पदम्। च इति अव्ययपदम्। वृद्धिरादैच् इति सूत्रात् वृद्धिः इति प्रथमान्तं पदम् अनुवर्तते। एकः पूर्वपरयोः इति सूत्रस्य अधिकारे विद्यते। तेन पूर्वपरयोः स्थाने वृद्धिः एकादेशः भवतीति सूत्रार्थः समायाति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तरूपेण आ अत् अ ति स्थितौ आटश्च इति सूत्रेण अचि परतः पूर्वपरयोः आ अ इत्यनयोः वृद्धिः एकादेशः भवति। तेन आत् अ ति जाते। ततश्च इतश्च इति सूत्रेण तिपः इकारलोपे **आतत्** इति रूपं सिध्यति।

[१५.१७] इतश्च॥ (३.४.९९)

सूत्रार्थः - ङितो लस्य परस्मैपदम् इकारान्तं यत् तदन्तस्य लोपः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण लोपो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। इतः च इति पदच्छेदः। इतः (६/१), च इत्यव्ययम्। नित्यं ङितः इति सूत्रात् ङितः इति षष्ठ्यन्तं पदमनुवर्तते। लस्य (६/१) इति अधिकृतम्। इतश्च लोपः परस्मैपदेषु इति सूत्रात् परस्मैपदम् अनुवर्तते, षष्ठ्येकवचनान्ततया च विपरिणमते। पदयोजना - ङितः लस्य इतः परस्मैपदस्य लोपः।

इतः परस्मैपदस्य इति समानविभक्तिकं पदद्वयम्। इतः इति विशेषणम्, परस्मैपदमिति विशेष्यम्। अतः तदन्तविधिना इदन्तस्य परस्मैपदस्य इति लभ्यते। इदन्तपरस्मैपदस्य इत्यत्रापि स्थानषष्ठी अल्समुदायबोधकात् श्रूयते। एवञ्च आदेशः लोपरूपः। अतः अलोऽन्त्यस्य इति परिभाषया इदन्तपरस्मैपदस्य अन्त्यस्य अलः इतः लोपः भवतीति अर्थो लभ्यते। ङितः इति लस्य इत्यस्य विशेषणम्। तयोः अभेदान्वयः भवति। ङिद् यो लः तस्य इति। सूत्रार्थो भवति - ङिद् यो लकारः, तस्य स्थाने विहितं यद् इकारान्तं परस्मैपदम् , तदन्तस्य इकारस्य लोपः भवतीति। अयं लोपः सर्वेषु ङित्-लकारेषु भवति।

उदाहरणम् - अभवत्। अभवन्। अभवः।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण अभव ति इति स्थितिः अस्ति। अत्र ङित् लकारः लङ्। तस्य स्थाने विहितम् इकारान्तं परस्मैपदम् ति। अतः इतश्च इति प्रकृतसूत्रेण इकारस्य लोपे **अभवत्** इति रूपं सिध्यति। दशमकक्षायाः सन्धिप्रकरणे पठितानि सूत्राणि कानिचन अत्र प्रवर्तन्ते। तथाहि - अभवत् इति तिङन्तत्वात् पदम्। झलां जशोऽन्ते इति सूत्रेण अन्त्यस्य तकारस्य स्थाने स्थानत आन्तर्याद् जश्त्वे दकारे अभवद् इति स्थितिः जायते। ततश्च वाऽवसाने इति सूत्रेण विकल्पेन चर्त्वे तकारे कृते अभवत् इत्यपि शब्दः निष्पद्यते। इत्थम् **अभवद् अभवत्** इति द्विधमपि रूपं साधु। एवमन्यत्रापि विद्यार्थिना स्वयमूह्यम्।

अभवताम् - अनद्यतनभूतार्थे वर्तमानाद् भूधातोः अनद्यतने लङ् इति सूत्रेण कर्तरि लङ् विधीयते। लङः अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने तस्-प्रत्यये भू तस् इति स्थितिर्जायते। तस्थस्थमिपां तान्तन्तामः इति सूत्रेण तसः स्थाने तामि सर्वादेशः भू ताम् इति स्थितिर्जायते। स्थानिवद्भावात् तामः अपि तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ ताम् इति जायते। शपोऽपि शित्त्वात् धात्वधिकारोक्तत्वाच्च तिङ्शित् सार्वधातुकमिति सार्वधातुकसंज्ञा भवति। अतः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ ताम् इति जायते। यथासंख्यमनुदेशः समानाम् इति

परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव ताम् इति जाते लङः स्थाने विहितस्य तसः स्थाने विहिते तामि परे भव इति शप्-सहितस्य अङ्गसंज्ञा भवति। तदा लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अट्-आगमे टित्त्वाद् आद्यावयवे अभव ताम् जाते वर्णसम्मेलने **अभवताम्** इति रूपं सिध्यति। (यद्यपि अस्मिन् रूपे इतश्च इति सूत्रं न प्रवर्तते तथापि धातोः लङि रूपाणि प्रायः क्रमशः साधयित्वा प्रदर्श्यन्ते। अतः क्रमानुरोधादत्र उपन्यस्तम्।)

अभवन् - अनद्यतनभूतार्थे वर्तमानाद् भूधातोः अनद्यतने लङ् इति सूत्रेण कर्तरि लङ् विधीयते। लङः अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने प्रथमबहुवचनविवक्षायाम् झि-प्रत्यये भू झि इति स्थिते झकारस्य स्थाने झोऽन्तः इति सूत्रेण अन्त् इत्यादेशे भू अन्ति इति जाते ततः शपि गुणे अवादेशे भव् अ अन्ति इति स्थिते लङः स्थाने विहिते झि-प्रत्यये परे भव इति शप्-सहितस्य अङ्गसंज्ञा भवति। तदा लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अट्-आगमे टित्त्वाद् आद्यावयवे अभव अन्ति इति स्थिते अतो गुणे इति सूत्रेण पररूपैकादेशे अभवन्ति इति जायते। अत्र ङित् लकारः लङ् अस्ति। तस्य स्थाने विहितम् इकारान्तं परस्मैपदम् अन्ति। अतः इतश्च इति प्रकृतसूत्रेण इकारस्य लोपे अभवन्त् इति जाते समुदायस्य तिङन्तत्वात् पदसंज्ञायाम् संयोगान्तस्य लोपः इति सूत्रेण अन्त्यस्य तकारस्य लोपे **अभवन्** इति रूपं सिध्यति।

अभवः - भूधातोः लङि सिपि गुणे अवादेशे भव सि इति स्थिते लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अडागमे अभव सि इति जाते इतश्च इति सूत्रेण इलोपे अभवस् इति जाते रुत्वे विसर्गे अभवः इति रूपं सिध्यति।

अभवतम् - पूर्ववत् भूधातोः लङि लस्य स्थाने मध्यमद्विवचनविवक्षायाम् थस्-प्रत्यये भू थस् इति स्थितिर्जायते। तस्थस्थमिपां तान्तन्तामः इति सूत्रेण थसः स्थाने सर्वादेशे तम्-आदेशे भू तम् इति स्थितिर्जायते। ततः शपि गुणे अवादेशे भव् अ तम् इति जाते लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अडागमे अभव तम् इति स्थिते वर्णसम्मेलने **अभवतम्** इति रूपं सिध्यति।

अभवत - पूर्ववत् भूधातोः लङि लस्य स्थाने मध्यमबहुवचनविवक्षायाम् थ-प्रत्यये भू थ इति जाते तस्थस्थमिपां तान्तन्तामः इति सूत्रेण थस्य स्थाने सर्वादेशे त-आदेशे भू त इति जाते शपि गुणे अवादेशे भव् अ त इति जाते लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अडागमे अभव त इति स्थिते वर्णसम्मेलने **अभवत** इति रूपं सिध्यति।

अभवम् - पूर्ववत् भूधातोः लङि लस्य स्थाने उत्तमैकवचनविवक्षायाम् मिपि भू मि इति जाते तस्थस्थमिपां तान्तन्तामः इति सूत्रेण मिपः स्थाने अम्-आदेशे भू अम् इति जाते शपि गुणे अवादेशे भव् अ अम् इति जाते लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अडागमे अभव अम् इति स्थिते अतो गुणे इति सूत्रेण पररूपैकादेशे वर्णसम्मेलने **अभवम्** इति रूपं सिध्यति।

अभवाव - भू-धातोः लङि उत्तमपुरुषद्विवचने वसि भू वस् इति स्थिते शपि गुणे अवादेशे भव वस् इति स्थितौ वस् इति ङितः स्थाने विहितः उत्तमसंज्ञकः, सान्तश्च अस्ति। अतः नित्यं ङितः इति सूत्रेण वसः अन्त्यस्य अलः सकारस्य लोपे भव व इति स्थिते लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव

भ्वादिप्रकरणे- भूधातोः लृटि लोटि च रूपसाधनम्

इति अङ्गस्य अभव व इति स्थिते अतो दीर्घो यञि इति सूत्रेण अतः अङ्गस्य दीर्घे आकारे **अभवाव** इति रूपं सिध्यति।

अभवाम - भू-धातोः लङि उत्तमपुरुषबहुवचने मसि भू मस् इति स्थिते शपि गुणे अवादेशे भव मस् इति स्थितौ मस् इति ङितः स्थाने विहितः उत्तमसंज्ञकः, सान्तश्च अस्ति। अतः नित्यं ङितः इति सूत्रेण मसः अन्त्यस्य अलः सकारस्य लोपे भव म इति स्थिते लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण भव इति अङ्गस्य अभव म इति स्थिते अतो दीर्घो यञि इति सूत्रेण अतः अङ्गस्य दीर्घे आकारे **अभवाम** इति रूपं सिध्यति।

अनद्यतने भूते भूधातोः लङि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

लङ्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	अभवत्	अभवताम्	अभवन्
मध्यमपुरुषः	अभवः	अभवतम्	अभवत
उत्तमपुरुषः	अभवम्	अभवाव	अभवाम

अधः केचिद् धातवः दीयन्ते। तेषां रूपाणि एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **अपठत् अपठताम् अपठन्। अपठः अपठतम् अपठत। अपठम् अपठाव अपठाम।**

२) **गद** व्यक्तायां वाचि - **अगदत् अगदताम् अगदन्। अगदः अगदतम् अगदत। अगदम् अगदाव अगदाम।**

३) **अर्च** पूजायाम् - **आर्चत् आर्चताम् आर्चन्। आर्चः आर्चतम् आर्चत। आर्चम् आर्चाव आर्चाम।**

४) **व्रज** गतौ - **अव्रजत् अव्रजताम् अव्रजन्। अव्रजः अव्रजतम् अव्रजत। अव्रजम् अव्रजाव अव्रजाम।**

५) **कटँ** वर्षावरणयोः - **अकटत् अकटताम् अकटन्। अकटः अकटतम् अकटत। अकटम् अकटाव अकटाम।**

६) **क्षि** क्षये - **अक्षयत् अक्षयताम् अक्षयन्। अक्षयः अक्षयतम् अक्षयत। अक्षयम् अक्षयाव अक्षयाम।**

७) **चितीँ** संज्ञाने - **अचेतत् अचेतताम् अचेतन्। अचेतः अचेततम् अचेतत। अचेतम् अचेताव अचेताम।**

८) **तप** सन्तापे - **अतपत् अतपताम् अतपन्। अतपः अतपतम् अतपत। अतपम् अतपाव अतपाम।**

९) **शुच** शोके - **अशोचत् अशोचताम् अशोचन्। अशोचः अशोचतम् अशोचत। अशोचम् अशोचाव अशोचाम।**

पाठगतप्रश्नाः

२४. अनद्यतने लङ्, भूते भविष्यति वा।

२५. लङ्विधायकं सूत्रं लिखत।

२६. अभवत् इतीह अड्विधायकं सूत्रं किम्।

२७. इतश्च इति सूत्रस्य वृत्तिं लिखत।

२८. लङि हलादेः अङ्गस्य अट् केन सूत्रेण।

२९. लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अट् कस्य आगमो विधीयते।।

१) धातोः २) अङ्गस्य ३) प्रत्ययस्य ४) अभ्यासस्य

३०. इतश्च इति सूत्रस्योदाहरणं किम्।

१) अभवः २) अभवताम् ३) अभवतम् ४) अभवम्

३१. अभवत् इतीह तिपः इकारलोपः केन सूत्रेण।

१) इतश्च २) एरुः ३) नित्यं ङितः ४) अतो हेः

३२. आडजादीनाम् इति सूत्रस्योदाहरणं किम्।

१) आगच्छति २) आतत् ३) आस्ते ४) भवानि

३३. एषु किं सूत्रं लोट्-लकारे न प्रवर्तते।

१) एरुः २) शेषात् कर्तरि परस्मैपदम् ३) शेषे प्रथमः ४) इतश्च

पाठसारः

अस्मिन् पाठे लृट् लोट् लङ् चेति त्रयो लकाराः उपन्यस्ताः। तेषु लकारेषु भूधातोः रूपाणि साधयितुं यानि नूतनानि सूत्राणि प्रवर्तन्ते तानि उपन्यस्तानि।

क्रियार्थायाम् क्रियायां सत्याम् असत्यां च धात्वर्थव्यापारः भविष्यत्काले इति विवक्षा चेत् धातोः लृट् लृट् शेषे च इति सूत्रेण विधीयते। स्यतासी लृलुटोः इति सूत्रेण लृटि परतः शपं प्रबाध्य धातोः स्यप्रत्ययः भवतीति अस्य लकारस्य विशेषोऽस्ति। स्यप्रत्ययः आर्धधातुकसंज्ञकः। अतः अयम् आर्धधातुकलकारः इति प्रसिद्धिः।

भ्वादिप्रकरणे- भूधातोः लृटि लोटि च रूपसाधनम्

विध्यादीनाम् अर्थानाम् प्रकटनाय धातोः लोट् लोट् च इति सूत्रेण विधीयते। आशिषि तु आशिषि लिङ्-लोटौ इति सूत्रेण लिट् लिङ् च विधीयते। विधिलोटि आशीर्लोटि च साधारणानि कार्याणि सन्ति। केवलं तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् इति सूत्रेण तिपः सिपः रूपयोः तातङ् इति आशीर्लोटि विशिष्टं कार्यम्। तेन भवतु भवतात् , भव भवतात् इति रूपं द्वयं तत्र भवति। अन्यानि रूपाणि विधिलोटि आशीर्लोटि च साधारणानि एव। तत्र इकारस्य उकारत्वाय एरुः, सेर्ह्यपिच्च इति सूत्रेण सिपः हि, अतो हेः इत्यनेन अतः परस्य हेः लुक्, मेर्निः इत्यनेन मिपः निः, आडुत्तमस्य पिच्च इति सूत्रेण उत्तमस्य आट् भवति इति लोटः सारसंक्षेपः।

कानिचन कार्याणि लङ् लिङ् लुङ् लृङ् एषां चतुर्णां ङित्-लकाराणाम् सन्ति। तानि च लोटि अपि अपेक्षितानि। अतः लोटो लङ्वत् इति अतिदेशेन तानि कार्याणि लोटि प्रापितानि। तानि तस्थस्थमिपं तान्तन्तामः इति तामादयः, नित्यं ङितः इति सूत्रेण वस्-मसोः सलोपश्चेति।

यस्य धातोः अर्थः व्यापारः अर्थात् क्रिया अनद्यतने भूते वर्तते इति प्रकटनाय तस्माद् धातोः अनद्यतने लङ् इति सूत्रेण लङ् लकारः विधीयते। लङ्-लकारस्य वैशिष्ट्यं यद् लुङ्-लङ्-लृङ्-क्ष्वडुदात्तः इति सूत्रेण हलादेः अङ्गस्य अट् भवति, आडजादीनाम् इति सूत्रेण अजादेः अङ्गस्य आडागमश्च भवति। इतश्चेति सूत्रेण ङितो लस्य परस्मैपदम् इकारान्तं यत् तदन्तस्य लोपः भवति।

इत्थम् संक्षेपेण इदमधेयं यत् लृटि शबपवादः स्यप्रत्ययः भवति।

लोटि लकारे तु इकारस्य उकारः, तु हि अनयोः तातङ् आशिषि, लङ्वद् अतिदेशः, तेन तामादयः सलोपश्चेति कार्यद्वयम्, सिस्थाने हि, अतः हेर्लुक्, मेर्निः, उत्तमस्या आट् इति एतानि कार्याणि भवन्ति।

लङि लकारे तु अट् आट् इलोपः, इति एतानि कार्याणि सन्ति।

पाठान्तप्रश्नाः

१. लृट् शेषे च इति सूत्रं व्याख्यात।

२. ससूत्रं रूपाणि साधयत – भविष्यति भविष्यन्ति भविष्यामि

३. लोट् च इति सूत्रं व्याख्यात।

४. आशिषि लिङ्-लोटौ इति सूत्रं व्याख्यात।

५. मेर्निः इति सूत्रं व्याख्यात।

६. नित्यं ङितःइति सूत्रं व्याख्यात।

७. लोटः मिपः स्थाने अम्-आदेशः कुतो न भवति।

८. ससूत्रं रूपाणि साधयत – भवतात्, भवतु, भवताम्, भव, भवानि, भवाम।

९. अनद्यतने लङ् इति सूत्रं व्याख्यात।

१०. इतश्च इति सूत्रं व्याख्यात।

११. ससूत्रं रूपाणि साधयत – अभवत्, अभवन्, अभवः, अभवम्।

पाठगतप्रश्नानाम् उत्तरमाला

उत्तराणि- १

१. भविष्यामि।

२. न।

३. आर्धधातुकः।

४. लृटि लृङि च।

५. क्रियार्था या क्रिया ततः भिन्नार्थः एवात्र शेषः।

६. २

उत्तराणि- २

७. विध्यादिषु अर्थेषु धातोः लोट् स्यात्।

८. लिङ्लोटौ।

९. आशिषि लिङ्-लोटौ॥

१०. आशासनम् याच्ञा आशीः। अप्राप्तस्य इष्टस्य अर्थस्य प्राप्तुम् इच्छा आशीः।

११. लोटः इकारस्य उः स्यात्।

१२. लोटः स्थाने विहितस्य मिपः स्थाने निः आदेशः भवति।

१३. नित्यं ङितः।

१४. १

१५. २

१६. २

१७. ३

१८. ३

१९. ४

२०. १

२१. २

२२. ३

२३. ४

उत्तराणि- ३

२४. भूते।

२५. अनद्यतने लङ्।

२६. लुङ्लङ्लृङ्क्ष्वडुदात्तः।

२७. ङितो लस्य परस्मैपदम् इकारान्तं यत् तदन्तस्य लोपः।

२८. लुङ्लङ्लृङ्क्ष्वडुदात्तः।

२९. २

३०. १

३१. १

३२. २

३३. ४

॥इति पञ्चदशः पाठः॥

१६

346sk16

भ्वादिप्रकरणे- भूधातोः लिङि लुङि लृङि च रूपसाधनम्

प्रस्तावना

तिङन्तस्य पूर्वपाठेषु लट् लिट् लुट् लृट् लोट् लङ् चेति लकाराः पठिताः। अस्मिन् पाठे लिङ् लुङ् लृङ् चेति त्रयो लकाराः पठनीयाः सन्ति।

एषु लिङः विधिलिङ् आशीर्लिङ् इति भागद्वयमस्ति। आज्ञा अनुरोधः याच्ञा इत्यादयो भावाः भाषया प्रकट्यन्ते। तदर्थं विधिलिङ् लकारस्य प्रयोगः बाहुल्येन भवति। लिङ् लकारः कमपि विशिष्टं कालं न द्योतयति, क्रियायाम् प्रेरणं द्योतयति। आशीर्लिङ् आशीर्वादार्थे प्रयुज्यते।

अतीतकालीनायाः क्रियायाः प्रकटनाय लुङ् सुप्रसिद्धः प्राचीनसाहित्येषु प्रचुरं प्रयुक्तः लकारः। लुङ् विकरणभेदेन बहुविधो भवति। अस्मिन् पाठे लुङः साधारणप्रक्रिया प्रदर्श्यते। अवशिष्टानि सूत्राणि कानिचन अग्रे वक्ष्यन्ते।

अल्पप्रयोगः भवति लृङ्लकारस्य। तथापि लोके प्रयोगवशात् अत्र उपस्थाप्यते। क्रियातिपतौ गम्यमानायाम् अस्य प्रयोगो भवति।

भूधातोः एषु लकारेषु रूपाणि प्रदर्श्यन्ते। अन्येषु भूधातुतुल्येषु धातुषु प्रक्रिया रूपाणि च विद्यार्थिना स्वयमूह्यानि।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- विध्यादीन् बुध्यात्।
- लिङो भेदान् ज्ञास्यति।
- आज्ञादिकं कर्तुं योग्यस्य लकारस्य प्रयोगे समर्थो भवेत्।
- सर्वासाम् अतीतकालीनानाम् क्रियाणां प्रकटनाय लुङः प्रयोगं विज्ञास्यति।
- क्रियातिपत्तिश्चेत् को लकारः प्रयोक्तव्यः इति जानीयात्।

विधिलिङ् लकारः

[१६.१] विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्॥ (३.३.१६१)

सूत्रार्थः - विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु एषु अर्थेषु धातोः लिङ् स्यात्।

सूत्रव्याख्या - सूत्रमिदम् विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयमस्ति। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु (७/३) लिङ् (१/१)। धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। विधिः च निमन्त्रणं च आमन्त्रणं च अधीष्टः च संप्रश्नः च प्रार्थनं च इति विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनानि, तेषु विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु इति इतरेतरयोगद्वन्द्वसमासः। सूत्रार्थो भवति - विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु अर्थेषु विद्यमानाद् धातोः परं लिङ् प्रत्ययः भवति।

विध्यादिशब्दानाम् अर्थः अधस्तात् उपन्यस्यते -

१) विधिः - वयसा अधिकारेण वर्णेन वा निकृष्टस्य भृत्यादेः (कनिष्ठस्य) प्रवर्तनम् हि विधिः। वक्तुः वचनेन श्रोता कर्मणि प्रवर्तते, प्रेरितो भवति। अत्र आज्ञा भवति विधिः। उदाहरणम् - भृत्यं स्वामी वदति - भवान् वस्त्रं क्षालयेद् इति। शिष्यम् आचार्यः आह – त्वं वेदं पठेः। सेवकं स्वामी आह – जलम् आनयेः। भृत्यस्य अकरणे यद्यपि पापं न भवति, तथापि स दण्डार्हः भवति। शास्त्रवचनानि प्रायः आज्ञारूपेण सन्ति। यथा - सत्यं ब्रूयात् प्रियं ब्रूयात्। स्वर्गकामो यजेत।

२) निमन्त्रणम् - नियोगकरणं हि निमन्त्रणम्। त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलः इत्यादिवचनानि श्रुतिस्मृतिशास्त्रेषु सन्ति। शास्त्रवचनम् अनुसृत्य यस्य गृहे श्राद्धादिकर्म अस्ति स यथाशास्त्रं ब्राह्मणादीन् भोजनाय आह्वयति। तत्र यदि आहूतः भोजनाय न गच्छति तर्हि शास्त्रमर्यादायाः उल्लङ्घनात् शास्त्रानुसारं पापभाग् भवति, तस्य पापम् अधर्मः प्रत्यवायः भवति। अतः एतत् अवश्यकर्तव्यम् अस्ति। ईदृशं नियोगकरणं हि निमन्त्रणम्।

३) आमन्त्रणम् - कामचारानुज्ञा हि आमन्त्रणम्। यथेच्छम् आचारणम् कामचारः। यथा गृहम् आगतम् अतिथिम् गृहस्वामी आह – इह आसने उपविशेत् भवान्। परन्तु अतिथिः स्वेच्छानुसारम् अन्यत्र एव उपविशति। अतिथेः तथा आचरणेन तस्य न कोऽपि प्रत्यवायः, अधर्मः भवति। एवञ्च अत्र अतिथिं प्रति आज्ञा अपि नास्ति। आमन्त्रणशब्दस्य साम्प्रतिकाः आह्वानम् इति अर्थं बहुधा मन्यन्ते। परन्तु केवलम् आह्वनमेव आमन्त्रणम् इति न। यथा मित्र इदं फलं खादेः त्वम् इति वाक्ये क्रियायां प्रवर्तनम् अस्ति। अत्र खादनाय प्रेरणमस्ति। एवं कस्यामपि क्रियायाम् प्रेरणम्, यत्र आज्ञा नास्ति, अकरणे प्रत्यवायः नास्ति, कामचारः अस्ति, तथा प्रेरणम् आमन्त्रणम्।

४) अधीष्टः (अधीष्टम् इत्यपि क्वचित्) - सत्कारपूर्वको व्यापारो हि अधीष्टम्। सत्कृत्य प्रवर्तनमित्यर्थः। कश्चित् गृही स्वपुत्रम् गुरुकूलम् नीत्वा गुरुम् आह – पुत्रम् अध्यापयेद् भवान्। अत्र

अनेन वचनेन गुरुः अध्यापनकार्ये प्रेरितः। परन्तु अत्र गुरुं प्रति आज्ञा नास्ति, याच्ञा नास्ति, अकरणे गुरोः प्रत्यवायः नास्ति, एवञ्च सम्मानप्रदर्शनपुरःसरं गृही गुरुं प्रति वदति, गुरुं च प्रेरयति। अतः अत्र लिङर्थः भवति अधीष्टः।

५) संप्रश्नः - विचार्य निर्धारणं हि सम्प्रश्नः। संप्रधारणं सम्प्रश्नः। यथा कश्चित् शिष्यः गुरुं प्रति आह – किं भो व्याकरणम् अधीयीय उत शिक्षाम् इति। अत्र प्रश्नं कृत्वा शिष्यः निर्णेतुम् इच्छति।

६) प्रार्थनम् - याच्ञा हि प्रार्थनम्। यथा कश्चित् भिक्षुकः आह - भवानन्नं मे दद्याद् इति। भो भोजनं लभेय।

विध्यादिषु आद्येषु चतुर्षु अर्थेषु प्रवर्तनसामान्यम् अस्ति। अतः तत्र प्रवर्तनात्वम् लिङर्थः। प्रवर्तना हि प्रवृत्त्यनुकूलो व्यापारः। यथा अनुचरं प्रति जलम् आनय इति वाक्येन अनुचरस्य जलानयने प्रवृत्तिः भवति। अत एव ईदृशवाक्यप्रयोगः एवात्र व्यापारः। तत्रापि विशिष्य लोटः लिङः वा प्रयोगः। अत्र प्रवृत्तिः प्रेरितनिष्ठा, तदनुकूलव्यापारश्च प्रेरकनिष्ठः। प्रेरकः वाक्यप्रयोगकर्ता।

उदाहरणम् - विध्यादिषु अर्थेषु वर्तमानाद् भूधातोः विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रेण कर्तरि लिङि ङकारेकारयोः लोपे भू ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायाम् तिप्-तस्-झि ... इति सूत्रेण तिपि अनुबन्धलोपे भू ति इति स्थिते इतश्च इत्यनेन इकारलोपे भू त् इति स्थितिः जायते।

[१६.२] यासुट् परस्मैपदेषूदात्तो ङिच्च॥ (३.४.१०३)

सूत्रार्थः - लिङः परस्मैपदानां यासुडागमः स्यात् स ङित् च।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण यासुट् विधीयते। अस्मिन् सूत्रे पञ्च पदानि सन्ति। यासुट् परस्मैपदेषु उदात्तः ङित् च इति सूत्रगतपदच्छेदः। तत्र यासुट् (१/१), परस्मैपदेषु (७/१), उदात्तः (१/१), ङित् (१/१), च इत्यव्ययम्। लिङः सीयुट् इति सूत्रात् लिङः इति षष्ठ्यन्तं पदमनुवर्तते। ङ् इत् यस्य स ङित् इति बहुव्रीहिसमासः। परस्मैपदेषु इत्यस्य परस्मैपदानाम् इति षष्ठ्यन्ततया विपरिणामः भवति। सूत्रार्थो भवति - लिङः स्थाने विहितानां परस्मैपदानाम् यासुट् आगमः भवति, स च उदात्तः इति। यासुट् टित्त्वाद् आद्यन्तौ टकितौ इति परिभाषया आद्यावयवः भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण भू त् इति स्थितिः। तत्र प्रकृतसूत्रेण त् इति लिङः स्थाने विहितस्य परस्मैपदस्य यासुट् इति आगमे अनुबन्धलोपे भू यास् त् इति स्थितिः भवति। अत्र सागमकस्य यास्त् इति समुदायस्य तिङ् शित् सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम् कर्तरि शप् इति शपि गुणे अवादेशे च भव यास्त् इति स्थितिः जाता। तदा -

[१६.३] लिङः स लोपोऽनन्त्यस्य॥ (७.२.७९)

सूत्रार्थः - सार्वधातुकलिङः अनन्त्यस्य सस्य लोपः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण लोपः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। लिङः स लोपः अनन्त्यस्य इति सूत्रगतपदच्छेदः। लिङः (६/१), स (६/१) इदं लुप्तषष्ठीकं पदम्, तेन सस्य इति लभ्यते। लोपः (१/१), अनन्त्यस्य (६/१)। अन्ते भवः अन्त्यः। न अन्त्यः अनन्त्यः, तस्य इति तत्पुरुषसमासः। रुदादिभ्यः सार्वधातुके इति सूत्रात् सार्वधातुके इति सप्तम्यन्तं पदम् अनुवर्तते सार्वधातुकस्य इति षष्ठ्यन्ततया च विपरिणमते। पदयोजना - लिङः अनन्त्यस्य सार्वधातुकस्य लिङः सस्य लोपः। सूत्रार्थो भवति - सार्वधातुकसंज्ञकः यो लिङादेशः तस्य अनन्त्यस्य सस्य लोपः भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तसूत्रप्रकारेण भव यास्त् इति स्थितौ यास्त् इत्यंशः लिङ् सार्वधातुकसंज्ञकः अस्ति। कथम्। यास्त् इत्यस्मिन् त् इति एव लस्य स्थाने विहितः। यासुट् तस्य आगमः अस्ति। यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इति परिभाषया सागमकस्य यास्त् इति समुदायस्य अपि सार्वधातुकत्वम् भवति। यास्त् इत्यस्य सकारः अन्ते नास्ति। अतः अनन्त्यः अस्ति। अतः प्रकृतसूत्रेण सस्य लोपे प्राप्ते -

[१६.४] अतो येयः॥ (७.२.८०)

सूत्रार्थः - अदन्तादङ्गात् परस्य सार्वाधातुकावयवस्य यास् इत्यस्य इय् स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अतः या इयः इति सूत्रगतपदच्छेदः। अतः (५/१), या इति लुप्तषष्ठ्यैकवचनान्तम् पदम्। इयः (१/१)। अङ्गस्य इति षष्ठ्यन्तस्य अधिकृतस्य अङ्गात् इति पञ्चम्यन्ततया विपरिणामः भवति। रुदादिभ्यः सार्वधातुके इति सूत्रात् सार्वधातुके इति सप्तम्यन्तं पदम् अनुवर्तते, तच्च सार्वधातुकस्य इति षष्ठ्यन्ततया विपरिणमते। एवम् अतः अङ्गस्य सार्वधातुकस्य या इयः इति वाक्ययोजना। अतः अङ्गात् इत्यत्र तदन्तविधिना अदन्तादङ्गात् इति लभ्यते। ततश्च सूत्रार्थः भवति - अदन्ताद् अङ्गात् परस्य सार्वधातुकावयवस्य यास् (याः) इत्यस्य इय् इति आदेशः भवति इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण भव यास्त् इति स्थितिः। तत्र लिङः सलोपोऽनन्त्यस्य इति सूत्रेण यासः सलोपे प्राप्ते यासः स्थाने प्रकृतसूत्रेम इय् इत्यादेशे भव इय् त् इति स्थितिः जायते। तदा -

[१६.५] लोपो व्योर्वलि॥ (६.१.६४)

सूत्रार्थः - व्योः वलि परे लोपः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। लोपः व्योः वलि इति सूत्रगतपदच्छेदः। लोपः (१/१), व्योः (६/२), वलि (७/१)। व् च य् व्यौ, तयोः व्योः इति इतरेतरयोगद्वन्द्वसमासः। ततश्च सूत्रार्थः भवति - वकारयकारयोः लोपो वलि परे इति।

उदाहरणम् - पूर्वसूत्रोक्तप्रकारेण भव इय् त् इति स्थितिः। तत्र इय् इत्यस्य यः वलि तकारे परे अस्ति। अतः लोपो व्योर्वलि इति सूत्रेण यलोपे भव इ त् इति स्थिते अवर्णाद् अकाराद् अचि इकारे परे आद् गुणः इति सूत्रेण गुणे **भवेत्** इति रूपं सिध्यति।

भवेताम् - विध्यादिषु अर्थेषु वर्तमानाद् भूधातोः विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रेण कर्तरि लिङि ङकारेकारयोः लोपे भू ल् इति स्थिते प्रथमपुरुषद्विवचनविवक्षायाम् तिप्-तस्-झि ... इति सूत्रेण तसि अनुबन्धलोपे भू तस् इति स्थिते तस्थस्थमिपां तान्तन्तामः इति सूत्रेण तसः स्थाने तामि सर्वादेशः भू ताम् इति स्थितिर्जायते। लिङः स्थाने विहितस्य तसः स्थाने विहितस्य ताम् इति परस्मैपदस्य यासुट्-आगमे अनुबन्धलोपे भू यास्ताम् इति स्थितिः भवति। अत्र सागमकस्य यास्ताम् इति समुदायस्य तिङ् शित् सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम् कर्तरि शप् इति शपि गुणे अवादेशे च भव यास्ताम् इति स्थितिः जाता। यास्ताम् इत्यस्य अनन्त्यस्य सस्य लिङः सलोपोऽनन्त्यस्य इत्यनेन सस्य लोपे प्राप्ते अतो येयः इति सूत्रेण यास् इत्यस्य स्थाने इय् इत्यादेशे भव इय् ताम् इति जायते। ततश्च वलि परतः यकारस्य लोपो व्योर्वलि इति सूत्रेण लोपे भव इ ताम् इति स्थिते अवर्णाद् अकाराद् अचि इकारे परे आद् गुणः इति सूत्रेण गुणे **भवेताम्** इति रूपं सिध्यति।

[१६.६] झेर्जुस्॥ (३.४.१०८)

सूत्रार्थः - लिङो झेर्जुस् स्यात्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। सूत्रेऽस्मिन् पदद्वयं वर्तते। झेः जुस् इति सूत्रगतपदच्छेदः। झेः (६/१), जुस् (१/१)। लिङः सीयुट् इति सूत्रात् लिङः इति षष्ठ्यन्तं पदमनुवर्तते। तदा वाक्ययोजना भवति - लिङः झेः जुस्। ततश्च सूत्रार्थः भवति - लिङः झेः स्थाने जुस् आदेशः भवतीति। अर्थात् लिङः स्थाने विहितो यो झिप्रत्ययः तस्य स्थाने जुस् इत्यादेशः स्यादिति। जुस् प्रयोगोत्तरं स्थानिवद्भावेन प्रत्ययत्वं लभेत। तदा चुटू इति सूत्रेण प्रत्ययाद्यस्य जकारस्य इत् संज्ञा, तस्य लोपः इति तस्य लोपश्च भवति। जुस् अनेकाल्त्वात् अनेकाल्शित् सर्वस्य इति परिभाषया झेः सर्वस्य स्थाने भवति। जुसः सकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां प्राप्तायां जुसः स्थानिवद्भावेन विभक्तिसंज्ञकत्वात् न विभक्तौ तुस्माः इत्यनेन इत्संज्ञानिषेधो भवति।

उदाहरणम् - भवेयुः।

सूत्रार्थसमन्वयः - विध्यादिषु अर्थेषु वर्तमानाद् भूधातोः कर्तरि लिङि भू ल् इति स्थिते प्रथमपुरुषबहुवचनविवक्षायाम् तिप्-तस्-झि ... इति सूत्रेण झौ भू झि इति स्थिते झेर्जुस् इति प्रकृतसूत्रेण जसि सर्वादेशे चुटू इति सूत्रेण प्रत्ययाद्यस्य जकारस्य इत् संज्ञायां, तस्य लोपः इति तस्य लोपे कृते भू उस् इति स्थितिर्जायते। लिङः स्थाने विहितस्य झिस्थाने विहितस्य जुसः परस्मैपदस्य यासुट्-आगमे अनुबन्धलोपे भू यास् उस् इति स्थितिः भवति। अत्र सागमकस्य यासुस् इति समुदायस्य तिङ् शित् सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम् कर्तरि शप् इति शपि गुणे अवादेशे च भव यासुस् इति स्थितिः जाता। यासुस् इत्यस्य अनन्त्यस्य सस्य लिङः सलोपोऽनन्त्यस्य इत्यनेन सस्य लोपे प्राप्ते अतो येयः इति सूत्रेण यास् इत्यस्य स्थाने इय् इत्यादेशे भव इय् उस् इति स्थिते अवर्णाद् अकाराद् अचि

इकारे परे आद् गुणः इति सूत्रेण गुणे भवेयुस् इति जाते समुदायस्य पदत्वात् रुत्वे विसर्गे **भवेयुः** रूपं सिध्यति।

भवेः - भूधातोः लङि सिपि भू सि इति जाते इतश्च इत्यनेन इलोपे भू स् इति जायते। यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रेण यासुडागमे भू यास् स् इति जाते शपि गुणे अवादेशे भव यास् स् इति जायते। लिङः सलोपोऽनन्त्यस्य इत्यनेन यासः सलोपे प्राप्ते अतो येयः इत्यनेन इय् इत्यादेशे भव इय् स् इति स्थिते वलि परतः यकारस्य लोपो व्योर्वलि इति सूत्रेण लोपे भव इ स् इति स्थिते आद् गुणः इति सूत्रेण गुणे भवेस् इति जाते रुत्वे विसर्गे **भवेः** इति रूपं सिध्यति।

भवेतम् - भूधातोः कर्तरि लिङि भू ल् इति स्थिते तिप्-तस्-झि ... इति सूत्रेण थसि भू थस् इति स्थिते तस्थस्थमिपां तान्तन्तामः इति सूत्रेण थसः स्थाने तमि सर्वादेशः भू तम् इति स्थितिर्जायते। यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रेण यासुट्-आगमे अनुबन्धलोपे भू यास्तम् इति स्थितिः भवति। ततश्च कर्तरि शप् इति शपि गुणे अवादेशे च भव यास्तम् इति स्थितिः जाता। यास्तम् इत्यस्य अनन्त्यस्य सस्य लिङः सलोपोऽनन्त्यस्य इत्यनेन सस्य लोपे प्राप्ते अतो येयः इति सूत्रेण यास् इत्यस्य स्थाने इय् इत्यादेशे भव इय् तम् इति जायते। ततश्च वलि परतः यकारस्य लोपो व्योर्वलि इति सूत्रेण लोपे भव इ तम् इति स्थिते आद् गुणः इति सूत्रेण गुणे **भवेतम्** इति रूपं सिध्यति।

भवेत - भूधातोः लिङि थ-प्रत्यये भू थ इति स्थिते तस्थस्थमिपां तान्तन्तामः इति सूत्रेण थस्थाने तप्रत्यये सर्वादेशे भू त इति स्थिते यासुट्-आगमे शपि गुणे अवादेशे च भव यास्त इति स्थितिः जाता। लिङः सलोपोऽनन्त्यस्य इत्यनेन सस्य लोपे प्राप्ते अतो येयः इति सूत्रेण यास् इत्यस्य स्थाने इय् इत्यादेशे भव इय् त इति जायते। लोपो व्योर्वलि इति सूत्रेण यलोपे भव इ त इति स्थिते आद् गुणः इति सूत्रेण गुणे **भवेत** इति रूपं सिध्यति।

भवेयम् - भूधातोः लिङि मिपि भू मि इति स्थिते तस्थस्थमिपां तान्तन्तामः इति सूत्रेण मिपः स्थाने अम्-प्रत्यये सर्वादेशे भू अम् इति स्थिते यासुट्-आगमे शपि गुणे अवादेशे च भव यास् अम् इति स्थितिः जाता। लिङः सलोपोऽनन्त्यस्य इत्यनेन सस्य लोपे प्राप्ते अतो येयः इति सूत्रेण यास् इत्यस्य स्थाने इय् इत्यादेशे भव इय् अम् इति जाते आद् गुणः इति सूत्रेण गुणे **भवेयम्** इति रूपं सिध्यति।

भवेव, भवेम – भूधातोः द्विवचने वसि, बहुवचने मसि च नित्यं ङितः इत्यनेन अन्त्यस्य सस्य लोपे यासुट्-आगमे शपि गुणे अवादेशे च भव यास् व, भव यास् म इति स्थितिः जाता। लिङः सलोपोऽनन्त्यस्य इत्यनेन सस्य लोपे प्राप्ते अतो येयः इति सूत्रेण यास् इत्यस्य स्थाने इय् इत्यादेशे आद् गुणः इति सूत्रेण गुणे **भवेव, भवेम** इति रूपे सिध्यतः।

भूधातोः विधिलिङि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

विधिलिङ्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	भवेत्	भवेताम्	भवेयुः

मध्यमपुरुषः	भवेः	भवेतम्	भवेत
उत्तमपुरुषः	भवेयम्	भवेव	भवेम

--

अधः केचिद् धातवः दीयन्ते। तेषां रूपाणि एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **पठेत् पठेताम् पठेयुः। पठेः पठेतम् पठेत। पठेयम् पठेव पठेम।**

२) **गद** व्यक्तायां वाचि - **गदेत् गदेताम् गदेयुः। गदेः गदेतम् गदेत। गदेयम् गदेव गदेम।**

३) **अर्च** पूजायाम् - **अर्चेत् अर्चेताम् अर्चेयुः। अर्चेः अर्चेतम् अर्चेत। अर्चेयम् अर्चेव अर्चेम।**

४) **व्रज** गतौ - **व्रजेत् व्रजेताम् व्रजेयुः। व्रजेः व्रजेतम् व्रजेत। व्रजेयम् व्रजेव व्रजेम।**

५) **कटँ** वर्षावरणयोः - **कटेत् कटेताम् कटेयुः। कटेः कटेतम् कटेत। कटेयम् कटेव कटेम।**

६) **क्षि** क्षये - **क्षयेत् क्षयेताम् क्षयेयुः। क्षयेः क्षयेतम् क्षयेत। क्षयेयम् क्षयेव क्षयेम।**

७) **चितीँ** संज्ञाने - **चेतेत् चेतेताम् चेतेयुः। चेतेः चेतेतम् चेतेत। चेतेयम् चेतेव चेतेम।**

८) **तप** सन्तापे - **तपेत् तपेताम् तपेयुः। तपेः तपेतम् तपेत। तपेयम् तपेव तपेम।**

९) **शुच** शोके - **शोचेत् शोचेताम् शोचेयुः। शोचेः शोचेतम् शोचेत। शोचेयम् शोचेव शोचेम।**

पाठगतप्रश्नाः-१

१. को विधिः यत्र लिङ् विधीयते।

२. किं निमन्त्रणम्।

३. किम् आमन्त्रणम्।

४. कः अधीष्टः।

५. कः संप्रश्नः।

६. लिङ् केषु अर्थेषु विधीयते।

७. अतो येयः इति सूत्रेण कस्य स्थाने क आदेशो विधीयते।

८. झेर्जुस् क्व।

९. यासुट् किम् भवति।

१) प्रत्ययः २) आगमः ३) आदेशः ४) अङ्गम्

१०. इतश्च इति सूत्रस्योदाहरणं किम्।

१) भवेः २) भवेताम् ३) भवेयुः ४) भवेयम्

११. यासुट् कुत्र भवति।

१) परस्मैपदेषु २) आत्मनेपदेषु ३) अङ्गे ४) विकरणे

भूधातोः आशीर्लिङि रूपाणि

आशिषि लिङ्लोटौ इति सूत्रेण आशिषि अर्थे भूधातोः लिङि प्रथमपुरुषैकवचनविवक्षायां तिपि भू ति इति स्थिते इतश्च इत्यनेन इलोपे भू त् इति स्थितिर्जायते। तत्र आशिषि विहितस्य लिङः आदेशस्य तिपः लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञा भवति। (सार्वधातुके परे एव शप् भवति। अत्र तदभावे कर्तरि शप् इति न प्रवर्तते) यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रेण यासुडागमे भू यास्त् इति स्थितिर्जाता। (अत्र यास्त् इति न सार्वधातुकम्। अतः लिङः सलोपोऽनन्त्यस्य इति न प्रवर्तते। तेन सार्वधातुकलिङः एव सस्य लोपः क्रियते।) स्कोः संयोगाद्योरन्ते च इति सूत्रेण पदान्ते विद्यमानस्य स्त् इति संयोगस्य आद्यस्य सकारस्य लोपे भू यात् इति स्थितिर्जाता। यात् इत्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य इकः ऊकारस्य गुणः प्राप्तः। तदा -

(**सूत्रम् - स्कोः संयोगाद्योरन्ते च।** - पदस्य अन्ते यः संयोगः, झलि परतो वा यः संयोगः, तदाद्योः सकारककारयोः लोपो भवति।)

[१६.७] किदाशिषि॥ (३.४.१०४)

सूत्रार्थः - आशिषि लिङः यासुट् कित् भवति।

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अनेन सूत्रेण यासुट् कित् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। कित् आशिषि इति सूत्रगतपदच्छेदः। कित् (१/१), आशिषि (७/१)। लिङः सीयुट् इति सूत्राद् लिङः इति षष्ठ्यन्तं पदमनुवर्तते। यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्राद् यासुट् इति प्रथमान्तं पदमनुवर्तते। पदयोजना - आशिषि लिङः यासुट् कित्। सूत्रार्थो भवति - आशीर्वादार्थे विहितस्य लिङः यासुट् कित् स्यात्।

[१६.८] क्ङिति च॥ (१.१.५)

सूत्रार्थः - गित्-किद्-ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण गुणवृद्धिनिषेधः क्रियते। अस्मिन् सूत्रे द्वे पदे स्तः। क्ङिति (७/१), अत्र एषा निमित्तसप्तमी, च इत्यव्ययपदम्। इको गुणवृद्धी इति समग्रं सूत्रम् अनुवर्तते। तत्र इकः इति षष्ठ्यन्तं पदम्। गुणवृद्धी इति प्रथमाद्विवचनान्तं पदम्। न धातुलोप आर्धधातुके इति सूत्रात् न इत्यव्ययमनुवर्तते। ग् च क् च ङ् च इति क्ङः इति इतरेतरयोगद्वन्द्वसमासः। क्ङः इतः यस्य स क्ङित् , तस्मिन् क्ङिति इति बहुव्रीहिसमासः। गुणश्च वृद्धिश्चेति गुणवृद्धी इति इतरेतरयोगद्वन्द्वसमासः। पदयोजना - क्ङिति इकः गुणवृद्धी न च। सूत्रार्थो भवति - गित्-किद्-

ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। इको गुणवृद्धी इति परिभाषया यत्र इकः इति षष्ठ्यन्तम् पदम् उपस्थाप्यते तत्र प्राप्ते गुणवृद्धी इग्लक्षणे इति कथ्यते। येन निमित्तेन इग्लक्षणे गुणवृद्धी प्राप्येते तन्निमित्तं यदि गित् कित् ङित् वा स्यात् तर्हि एते गुणवृद्धी निषिध्येते।

उदाहरणम् - भूयात्।

सूत्रार्थसमन्वयः - भू यात् इति स्थितौ आर्धधातुकत्वात् गुणः प्राप्तः। अत्र किदाशिषि इति सूत्रेण यासुटः कित्त्वात् यात् इति समुदायस्यापि कित्त्वं भवति। अत्र प्राप्तः गुणः इग्लक्षणः, किन्तु तस्य निमित्तम् यात् किदस्ति। अतः क्ङिति च इति सूत्रेण गुणनिषेधो भवति। तेन **भूयात्** इति रूपं सिध्यति।

भूयास्ताम् - आशिषि लिङ्लोटौ इति सूत्रेण आशिषि अर्थे भूधातोः लिङि प्रथमपुरुषद्विवचनविवक्षायां तसि तस्य ताम् इत्यादेशे तत्र आशिषि विहितस्य लिङः आदेशस्य तसः तदादेशस्य तामः च लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञा भवति। यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रेण यासुडागमे भू यास्ताम् इति स्थितिर्जाता। यास्ताम् इत्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य इकः ऊकारस्य गुणे प्राप्ते किदाशिषि इति सूत्रेण यासुटः कित्त्वात् यास्ताम् इति समुदायस्यापि कित्त्वं भवति। अत्र प्राप्तम् इग्लक्षणं गुणं क्ङिति च इति सूत्रेण निषिध्य **भूयास्ताम्** इति रूपं सिध्यति।

भूयासुः - आशिषि अर्थे भूधातोः लिङि प्रथमपुरुषबहुवचनविवक्षायां झौ झेर्जुस् इत्यनेन जुसि लिङाशिषि इति सूत्रेण जुसः आर्धधातुकसंज्ञा भवति। तस्य यासुडागमे भू यासुस् इति स्थितिर्जाता। यासुस् इत्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य इकः ऊकारस्य गुणे प्राप्ते किदाशिषि इति सूत्रेण यासुटः कित्त्वात् यास्ताम् इति समुदायस्यापि कित्त्वं भवति। अत्र प्राप्तस्य इग्लक्षणगुणस्य क्ङिति च इति सूत्रेण निषेधे सस्य रुत्वे विसर्गे **भूयासुः** इति रूपं सिध्यति।

भूयाः - भूधातोः लिङि मध्यममपुरुषैकवचनविवक्षायां सिपि इतश्च इति इलोपे यासुडागमे भू यास् स् इति स्थिते स्कोः संयोगाद्योरन्ते च इति सूत्रेण संयोगाद्यस्य पूर्वसकारस्य लोपे यासुटः कित्त्वात् इग्लक्षणगुणस्य क्ङिति च इति सूत्रेण निषेधे सस्य रुत्वे विसर्गे **भूयाः** इति रूपं सिध्यति।

भूयास्तम् - मध्यमपुरुषद्विवचने धातोः थस्, तस्य तम् आदेशः, तस्य यासुडागमः, यासुटः कित्त्वाद् इग्लक्षणगुणस्य निषेधः च इति एवं **भूयास्तम्** इति रूपं भवति।

भूयास्त - मध्यमपुरुषबहुवचने धातोः थ, तस्य त आदेशः, तस्य यासुडागमः, यासुटः कित्त्वाद् इग्लक्षणगुणस्य निषेधः च इति एवं **भूयास्त** इति रूपं भवति।

भूयासम् - उत्तमपुरुषैकवचने धातोः परं मिप्, तस्य अम् आदेशः, तस्य यासुडागमः, यासुटः कित्त्वाद् इग्लक्षणगुणस्य निषेधः च इति एवं **भूयासम्** इति रूपं भवति।

भूयास्व - उत्तमपुरुषद्विवचने धातोः परं वस्, नित्यं ङितः इति सलोपः, वसः यासुडागमः, यासुटः कित्त्वाद् इग्लक्षणगुणस्य निषेधः च इति एवं **भूयास्व** इति रूपं भवति।

भूयास्म - उत्तमपुरुषबहुवचने धातोः परं मस्, नित्यं ङितः इति सलोपः, मसः यासुडागमः, यासुटः कित्त्वाद् इग्लक्षणगुणस्य निषेधः च इति एवं **भूयास्म** इति रूपं भवति।

भूधातोः आशीर्लिङि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

आशीर्लिङ्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	भूयात्	भूयास्ताम्	भूयासुः
मध्यमपुरुषः	भूयाः	भूयास्तम्	भूयास्त
उत्तमपुरुषः	भूयासम्	भूयास्व	भूयास्म

पाठगतप्रश्नाः-२

१२. यासुट् कित् केन सूत्रेण।

१३. यासुट् कित् क्व।

१४. अतो येयः इति सूत्रम् आशीर्लिङि कुतो न प्रवर्तते।

१५. आशिषि लिङादेशः तिङ् आर्धधातुकसंज्ञः केन सूत्रेण विधीयते।

१६. लिङाशिषि इति सूत्रेण किं क्रियते।

१७. इतश्च इति सूत्रस्योदाहरणं किम्।

१) भूयात् २) भूयास्ताम् ३) भूयासुः ४) भूयास्त

१८. भूयात् इत्यत्र आर्धधातुकनिबन्धनगुणस्य निषेधस्य कारणं किम्।

१) यासुटः कित्त्वम् २) यासुटः ङित्त्वम् ३) तिपः पित्त्वम् ४) धातोः सेट्त्वम्

१९. आशिषि भूधातोः एषु किं रूपं नास्ति।

१) भव २) भवतात् ३) भूयासुः ४) भूयास्वः

२०. आशिषि भूधातोः एषु किं रूपमस्ति।

१) भूयासुः २) भुयासुः ३) भूयासूः ४) भुयासूः

भूधातोः लुङ्-लकारे रूपाणि

[१६.९] लुङ्॥ (३.२.११०)

सूत्रार्थः - भूतार्थे धातोः लुङ् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण लुङ् विधीयते। अस्मिन् सूत्रे लुङ् इति एकमेव प्रथमैकवचनान्तं पदम्। भूते (७/१), धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। सूत्रार्थो भवति - भूते धातोः परः लुङ् प्रत्ययः भवति। अर्थात् धात्वर्थः व्यापारः भूतकालीनः इति विवक्षा चेत् तद्धातोः परं लुङ् लकारः प्रयोक्तव्यः इति। अनद्यतनपरोक्षभूते लिट् अनद्यतनभूते लङ् भूते च लुङ् इति व्यवस्था। लङ् परोक्षे प्रत्यक्षे च भवति। लुङ् भूतसामान्ये अर्थात् अद्यतने अनद्यतने च परोक्षे प्रत्यक्षे च भूते भवति।

उदाहरणम् - अभूत्।

सूत्रार्थसमन्वयः - भूधात्वर्थः व्यापारः भूतकालीनः इति विवक्षिते लुङ् इति सूत्रेण कर्तरि लुङि ङकार-उकारयोः इत्संज्ञायां तयोर्लोपे च भू ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायाम् तिपि अनुबन्धलोपे भू ति इति जाते इतश्च इत्यनेन तिपः इलोपे भू त् इति स्थिते लुङादेशस्य तिङः तिङ् शित् सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण शप् प्राप्तः। तदा -

[१६.१०] च्लि लुङि॥ (३.१.४३)

सूत्रार्थः - लुङि परतः धातोः परः च्लि प्रत्ययः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण च्लि विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। च्लि (१/१), लिङि (७/१)। धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। सूत्रार्थो भवति - लुङि परतः धातोः परः च्लि प्रत्ययः भवति। च्लिप्रत्ययस्य इकारः उच्चारणार्थः। चकारः चुटू इत्यनेन इत्संज्ञकः। च्लिप्रत्ययः धातोः प्राप्तानां शबादीनाम् अपवादः।

उदाहरणं सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तरूपेण भू त् स्थिते शपि प्राप्ते च्लि लुङि इति सूत्रेण च्लिप्रत्यये भू च्लि त् इति स्थितिः जायते।

[१६.११] च्लेः सिच्॥ (३.१.४४)

सूत्रार्थः - च्लिस्थाने सिच् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सिच् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। च्लेः (६/१), सिच् (१/१)। च्लि लुङि इत्यतः लुङि इति सप्तम्यन्तं पदमनुवर्तते। धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। सूत्रार्थो भवति - लुङि धातोः परः च्लेः स्थाने सिच् प्रत्ययः भवति। सिचः चकारस्य हलन्त्यम् इत्यनेन इत्संज्ञा भवति, इकारस्य च उपदेशेऽजनुनासिक इत्

इति सूत्रेण इत्संज्ञा भवति। तयोः लोपे सकारः एव अवशिष्यते। (च्लेः स्थाने यथा सिच् तथा अङ् चङ् क्स इत्यादयोऽपि भवन्ति।)

उदाहरणे सूत्रार्थसमन्वयः - भू च्लि त् इत्यत्र च्लेः स्थाने प्रकृतसूत्रेण सिचि भू स् त् इति जाते लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रेण अङ्गस्य अडागमे अभू स् त् इति स्थितिर्जाता। तदा -

[१६.१२] गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु॥ (२.४.७७)

सूत्रार्थः - गाति-स्था-घु-पा-भूभ्यः सिचः लुक् स्यात् परस्मैपदेषु परेषु।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण लुक् विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। गाति-स्था-घु-पा-भूभ्यः (५/३), सिचः (६/१), परस्मैपदेषु (७/३)। ण्यक्षत्रियार्ष-ञितो यूनि लुगणिञोः इति सूत्राद् लुक् इति प्रथमान्तं पदमनुवर्तते। गातिः च स्थाः च घुः च पाः च भूः च गाति-स्था-घु-पा-भुवः इति इतरेतरयोगद्वन्द्वसमासः। तेभ्यः गाति-स्था-घु-पा-भूभ्यः। सूत्रार्थो भवति - गा-स्था-घु-पा-भू एभ्यः धातुभ्यः परस्य सिचः लुक् स्यात् परस्मैपदेषु प्रत्ययेषु परेषु। इणो गा लुङि इति सूत्रेण इण्-धातोः गा-आदेशः भवति। अयं गा एव अत्र अभिमतः। पा पाने पा रक्षणे चेति द्वौ धातू स्तः। तत्र पानार्थकः पाधातुः अत्र गृह्यते। दाधाघ्वदाप् इति सूत्रेण दारूपाणां धारूपाणां च धातूनां घुसंज्ञा विधीयते। तेन डुदाञ् दाने, डुधाञ् धारणपोषणयोः इत्यनयोः ग्रहणं वेदितव्यम्।

विशेषता - प्रत्ययस्य लुक्-श्लु-लुपः इत्यनेन प्रत्ययस्य अदर्शनस्य लुक् इति संज्ञा भवति। अत्र सिच् प्रत्ययः अस्ति। अतः सिच् इति समग्रस्य प्रत्ययस्य लुक् भवति। तस्मात् अत्र अलोऽन्त्यस्य इति परिभाषा न प्रवर्तते।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण अभू स् त् इति स्थिते गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु इति प्रकृतसूत्रेण सिचः लुकि अभूत् इति स्थिते तिपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य भुवः ऊकारस्य स्थाने गुणः प्राप्तः। तदा -

[१६.१३] भूसुवोस्तिङि॥ (७.३.८८)

सूत्रार्थः - भू सू एतयोः सार्वधातुके तिङि परे गुणो न।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण गुणो निषिध्यते। अस्मिन् सूत्रे द्वे पदे स्तः। भूसुवोः तिङि इति सूत्रगतपदच्छेदः। भूसुवोः (६/२), तिङि (७/१)। नाभ्यस्तस्याचि पिति सार्वधातुके इति सूत्राद् न इत्यव्ययमनुवर्तते। सार्वधातुके इति च सप्तम्यन्तं पदमनुवर्तते। मिदेर्गुणः इति सूत्राद् गुणः इति प्रथमान्तं पदमनुवर्तते। भूः च सूः च भूसुवौ, तयोः भूसुवोः इति इतरेतरयोगद्वन्द्वसमासः। भू सत्तायाम् , षूङ् प्राणिगर्भविमोचने इति एतौ धातू अभिमतौ। सूत्रार्थो भवति - भू सू एतयोः सार्वधातुके तिङि परे गुणो न।

अत्र गुणः इति पदमुच्चार्य गुणः न विधीयते, अपि तु निषिध्यते। अतः इको गुणवृद्धी इति परिभाषा न प्रवर्तते, लिङ्गाभावात्।

उदाहरणम् - अभूत्।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण अभू त् इति स्थितौ गुणे प्राप्ते प्रकृतसूत्रेण गुणनिषेधे **अभूत्** इति रूपं सिध्यति।

अभूताम् - भूधातोः लुङ् इति सूत्रेण लुङि प्रथमपुरुषद्विवचनविवक्षायाम् तस्-प्रत्यये तस्थस्थमिपां तान्तन्तामः इति सूत्रेण तसः स्थाने तामि सर्वादेशे भू ताम् इति स्थितिर्जायते। लुङि परतः च्लि लुङि इति सूत्रेण च्लि-प्रत्यये च्लेः सिच् इत्यनेन सिचि अनुबन्धलोपे भू स् ताम् इति स्थिते गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु इति सूत्रेण सिचः लुकि भू ताम् इति जाते तामः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणः प्राप्तः। तदा -

[१६.१४] सार्वधातुकमपित्॥ (१.२.४)

सूत्रार्थः - अपित् सार्वधातुकं ङिद्वद् भवति।

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अनेन सूत्रेण ङिद्वत्त्वम् अतिदिश्यते। अस्मिन् सूत्रे द्वे पदे स्तः। सार्वधातुकम् (१/१), अपित् (१/१)। गाङ्कुटादिभ्योऽञ्णिन्ङित् इति सूत्रात् ङित् इति प्रथमान्तं पदमनुवर्तते। प् इत् यस्य स पित् , न पित् अपित् इति बहुव्रीहिगर्भ-नञ्-तत्पुरुषः समासः। ङ् इत् यस्य स ङित्। सूत्रार्थो भवति - अपित् सार्वधातकुम् ङिद्वत् भवति। अर्थात् पिद्भिन्नं सार्वधातुकम् ङिद्वद् भवति। यस्य पकारः इत् नास्ति तस्य सार्वधातुकस्य ङकारः इत् अस्ति इव मन्तव्यम्।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण अभू ताम् इति स्थितिः। तत्र इग्लक्षणे गुणे प्राप्ते ताम् इति तसः स्थाने आदेशः। तस् पित् नास्ति, अतः अपित्। तदादेशः ताम् स्वतः अपि अपित् अस्ति, एवञ्च सार्वधातुकसंज्ञकः अपि अस्ति। अतः प्रकृतसूत्रेण ताम् ङिद्वत् भवति। ङिद्वत्त्वात् क्ङिति च इति सूत्रेण इग्लक्षणगुणस्य निषेधे लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रेण अङ्गस्य अडागमे अनुबन्धलोपे आद्यावयवे **अभूताम्** इति रूपं निष्पद्यते।

अभूवन् - भूते भूधातोः लुङ् इति सूत्रेण लुङि प्रथमबहुवचनविवक्षायाम् लुङः झि-आदेशे शपं प्रबाध्य च्लि लुङि इति च्लि-प्रत्यये च्लेः सिच् इति सिचि भू स् झि इति जायते। तदा गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु इति सूत्रेण सिचः लुकि भू झि इति स्थिते लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रेण अङ्गस्य अडागमे अनुबन्धलोपे आद्यावयवे अभू झि इति जायते। तदा झोऽन्तः इत्यनेन अन्तादेशे अभू अन्ति इति जाते इतश्च इत्यनेन इलोपे अभू अन्त् इति स्थिते संयोगान्तस्य लोपः इत्यनेन संयोगान्तस्य तकारस्य लोपे अभू अन् इति स्थिते भुवो वग् लुङ्लिटोः इत्यनेन भुवः वुगागमे कित्त्वाद् अन्त्यावयवे अभूव् अन् इति जाते वर्णमेलनेन **अभूवन्** इति रूपं सिध्यति।

अभूः - भूते भूधातोः लुङ् इति सूत्रेण लुङि मध्यमैकवचनविवक्षायाम् लुङः सिपि आदेशे शपं प्रबाध्य च्लि लुङि इति च्लि-प्रत्यये च्लेः सिच् इति सिचि भू स् सि इति जायते। तदा गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु इति सूत्रेण सिचः लुकि भू सि इति स्थिते लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रेण

भ्वादिप्रकरणे- भूधातोः लिङि लुङि लृङि च रूपसाधनम्

अङ्गस्य अडागमे अनुबन्धलोपे आद्यावयवे अभू सि इति जायते। ततश्च इतश्च इत्यनेन सिपः इलोपे अभू स् इति जाते सिपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे प्राप्ते भूसुवोस्तिङि इति सूत्रेण गुणस्य निषेधे सस्य रुत्वे विसर्गे च कृते **अभूः** इति रूपं सिध्यति।

अभूतम् - मध्यमपुरुषद्विवचनविवक्षायाम् धातोः थस्, तस्य तस्थस्थमिपां तान्तन्तामः इति तम् आदेशः, च्लि लुङि इति च्लि-प्रत्ययः, च्लेः सिच् इति सिच् , इति एवं भू स् तम् इति जायते। तदा गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु इति सूत्रेण सिचः लुकि भू तम् इति जाते इग्लक्षणे गुणे प्राप्ते तमः अपित्त्वात् सार्वधातुकमपित् इति ङिद्वत् भवति। ङिद्वत्त्वात् क्ङिति च इति सूत्रेण इग्लक्षणगुणस्य निषेधे अडागमे **अभूतम्** इति रूपं निष्पद्यते।

अभूत - मध्यमपुरुषबहुवचनविवक्षायाम् धातोः थ, तस्य त-आदेशः, च्लि-प्रत्ययः, तस्य सिच् , इति एवं भू स् त इति जायते। तदा सिचो लुकि ङिद्वत्त्वात् इग्लक्षणगुणस्य निषेधे अडागमे **अभूत** इति रूपं निष्पद्यते।

अभूवम् - उत्तमपुरुषैकवचनविवक्षायाम् धातोः मिप्, तस्य अम् आदेशः, च्लि-प्रत्ययः, तस्य सिच् , इति एवं भू स् अम् इति जायते। तदा सिचो लुकि भुवो वुग् लुङ्लिटोः इति वुगागमे अडागमे च **अभूवम्** इति रूपं निष्पद्यते।

अभूव - उत्तमपुरुषद्विवचनविवक्षायाम् धातोः वस्, नित्यं ङितः इति सलोपः, च्लि-प्रत्ययः, तस्य सिच् , इति एवं भू स् व इति जायते। तदा सिचो लुकि ङिद्वत्त्वात् इग्लक्षणगुणस्य निषेधे अडागमे **अभूव** इति रूपं निष्पद्यते।

अभूम - उत्तमपुरुषबहुवचनविवक्षायाम् धातोः मस्, नित्यं ङितः इति सलोपः, च्लि-प्रत्ययः, तस्य सिच् , इति एवं भू स् म इति जायते। तदा सिचो लुकि ङिद्वत्त्वात् इग्लक्षणगुणस्य निषेधे अडागमे **अभूम** इति रूपं निष्पद्यते।

भूधातोः लुङि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

लुङ्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	अभूत्	अभूताम्	अभूवन्
मध्यमपुरुषः	अभूः	अभूतम्	अभूत
उत्तमपुरुषः	अभूवम्	अभूव	अभूम

[१६.१५] न माङ्योगे॥ (६.४.७४)

सूत्रार्थः - माङः क्रियया योगे अडाटौ न स्तः।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण अट् आट् इति अनयोः प्रयोगः निषिध्यते। अस्मिन् सूत्रे द्वे पदे स्तः। लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रात् अट् इति प्रथमान्तं पदमनुवर्तते। आडजादीनाम् इति सूत्रात् आट् इति प्रथमान्तं पदमनुवर्तते। अङ्गस्य (६/१) इत्यधिकृतम्। माङो योगः माङ्योगः। तस्मिन् माङ्योगे। माङर्थनिषेधस्य क्रियायाम् अन्वयः अत्र माङ्योगशब्दस्य तात्पर्यार्थः। सूत्रार्थो भवति - माङ्योगे अङ्गस्य अट् आट् एतौ न स्तः। अर्थात् माङः प्रयोगे माङर्थनिषेधस्य क्रियायाम् अन्वयः चेत् तत्क्रियावाचकस्य धातोः अट् आट् च एतौ न स्तः।

उदाहरणम् - मा भवान् प्रमादं कार्षीत्। (विवरणम् अग्रिमसूत्रद्वये द्रष्टव्यम्।)

[१६.१६] माङि लुङ्॥ (३.३.१७५)

सूत्रार्थः - माङि उपपदे धातोः लुङ् सर्वलकारापवादः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण लुङ् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। माङि (७/१), लुङ् (१/१)। अत्र धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। सूत्रार्थो भवति - माङि उपपदे सति धातोः परः लुङ् प्रत्ययः भवति। स च सर्वलकारापवादः। अर्थात् माङ् इति निषेधार्थकम् अव्ययम्। यस्याः क्रियायाः निषेधः कर्तव्यः तद्वाचकाधातोः परं लुङ् विधेयः। अयं लुङ् अन्येषां सर्वेषाम् अपि लकाराणां ये अर्थाः सन्ति तेषु अर्थेषु भवति, न केवलं भूते एव।

उदाहरणम् - मा भवान् प्रमादं कार्षीत्।

सूत्रार्थसमन्वयः - कृधातोः लुङि तिपि अकार्षीत् इति रूपं भवति। माङः ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा ततश्च लोपो भवति। न माङ्-योगे इति सूत्रेण अट्-आटौ न भवतः। अतः कार्षीत् इति रूपे अट् न दृश्यते। अत्र प्रमादकरणस्य निषेधः वर्तते। विवक्षानुसारं स सर्वेषु कालेषु प्रकारेषु च वक्तुं शक्यः।

[१६.१७] स्मोत्तरे लङ् च॥ (३.३.१७६)

सूत्रार्थः - स्मोत्तरे माङि लङ् लुङ् च स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण लङ् लुङ् च विधीयेते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। स्मोत्तरे (७/१), लङ् (१/१), च इत्यव्ययम्। माङि लुङ् इत्यतः लुङ् इति प्रथमान्तं च इति पदप्रभावात् अनुकृष्यते। अत्र धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। स्मः उत्तरः परः यस्मात् स स्मोत्तरः इति बहुव्रीहिसमासः। सूत्रार्थो भवति - निषेधार्थकः माङ् इत्यस्मात् परं स्म इत्यस्य प्रयोगश्चेत् यस्याः क्रियायाः निषेधः कर्तव्यः तद्वाचकाधातोः परं लङ् लुङ् च विधेयौ।

उदाहरणम् - मा स्म भवान् भूत्। मा स्म भवत्।

सूत्रार्थसमन्वयः - मा स्म भवान् भूत् इति उदाहरणे भूधातोः लुङि रूपम् अभूत् इति। माङः ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा ततश्च लोपो भवति। न माङ्-योगे इति सूत्रेण अट्-आटौ न भवतः। अतः भूत् इति रूपे अट् न दृश्यते।

मा स्म भवत् इति उदाहरणे भूधातोः लङि रूपम् अभवत् इति। न माङ्-योगे इति सूत्रेण अट्-आटौ न भवतः। अतः भवत् इति रूपे अट् न दृश्यते।

भूधातोः लृङ्-लकारे रूपाणि

[१६.१८] लिङ्-निमित्ते लृङ् क्रियातिपत्तौ॥ (३.३.१३९)

सूत्रार्थः - हेतु-हेतुमद्भावादि लिङ्निमित्तम्, तत्र वर्तमानात् धातोः परः लृङ् प्रत्ययः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण लृङ् विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। लिङ्निमित्ते (७/१), लृङ् (१/१), क्रियातिपत्तौ (७/१)। भविष्यति मर्यादा-वचनेऽवरस्मिन् इति सूत्रात् भविष्यति (७/१) इति पदमनुवर्तते। अत्र धातोः (५/१), प्रत्ययः (१/१), परश्च (१/१) चैषामधिकारः आयाति। लिङो निमित्तं लिङ्निमित्तम्। तस्मिन् लिङ्निमित्ते इति षष्ठीतत्पुरुषसमासः। क्रियायाः अतिपत्तिः अनिष्पत्तिः असिद्धिः अनभिनिवृत्तिः क्रियातिपत्तिः। तस्याम् क्रियातिपत्तौ इति षष्ठीतत्पुरुषसमासः। सूत्रार्थो भवति - हेतु-हेतुमद्भावादि लिङ्निमित्तम्, तत्र वर्तमानात् धातोः परः लृङ् प्रत्ययः स्यात्।

हेतु-हेतुमतोर्लिङ् इत्यादिसूत्रैः लिङ्-प्रयोगस्य कानिचन निमित्तानि अष्टाध्याय्याम् उक्तानि। हेतुः कारणम्। हेतुमत् कार्यं फलम्। इत्थम् हेतुहेतुमद् कारण-फलयोः युग्मं भवति। कारणफलयुग्मेन निर्दिष्टायाः क्रियायाः वैगुण्याद् अतिपत्तिः गम्यते चेत् तत्क्रियावाचकाद् धातोः लृङ् विधीयते।

उदाहरणम् - कृष्णम् अनंस्यत् चेत् सुखम् अयास्यत्। सुवृष्टिः चेद् अभविष्यत् तदा सुभिक्ष्यम् अभविष्यत्। दक्षिणेन चेदायास्यन् न शकटं पर्यभविष्यत्। अभोक्ष्यत भवान् घृतेन यदि मत्समीपम् आगमिष्यत्। गुरुं चेत् प्रणमेत् शास्त्रान्तं गच्छेत्।

सूत्रार्थसमन्वयः - कृष्णम् अनंस्यत् चेत् सुखम् अयास्यत् इत्युदाहरणे कृष्णनमनं हेतुः, सुखलाभः कार्यं फलम्। अत्र हेतुहेतुमद्भावः कारणफलयुग्मम् अस्ति। परन्तु केनचित् प्रमाणेन ज्ञायते यत् नायं नमनं करिष्यति नापि अस्य सुखं यास्यति। अतः कारणफलयुग्मेन निर्दिष्टायाः क्रियायाः असिद्धिः गम्यते। अतः नम्-धातोः याधातोः लृङ् भवति। एवञ्च प्रक्रियया अनंस्यत् अयास्यत् इति रूपाणि भवन्ति, तत्प्रयोगेण वाक्यं च सिध्यति।

कृष्णं नमेत् चेत् सुखं यायात् इत्यपि विधिलिङि प्रयोगः भवति। परन्तु अत्र क्रियातिपत्तिः न अभीष्टा।

भूधातोः लृङि तिपि स्यतासी लृलुटोः इति स्यप्रत्यये तस्य आर्धधातुकत्वात् इडागमे भू इस्य ति इति स्थिते इतश्च इति तिपः इलोपे अङ्गस्य लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रेण अडामगे अभू इस्यत् इति स्थिते स्यस्य सस्य आदेशप्रत्यययोः इत्यनेन मूर्धन्यादेशे अभू इष्यत् इति स्थिते भुवः ऊकारस्य गुणे अवादेशे अभविष्यत् इति रूपं भवति।

अन्येषु उदाहरणेषु एवमेव ऊह्यम्।

भूधातोः लृङि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

लृङ्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अभविष्यत्	अभविष्यताम्	अभविष्यन्
मध्यमपुरुषः	अभविष्यः	अभविष्यतम्	अभविष्यत
उत्तमपुरुषः	अभविष्यम्	अभविष्याव	अभविष्याम

अधः केचिद् धातवः दीयन्ते। तेषां रूपाणि एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **अपठिष्यत् अपठिष्यताम् अपठिष्यन्। अपठिष्यः अपठिष्यतम् अपठिष्यत। अपठिष्यम् अपठिष्याव अपठिष्याम।**

२) **गद** व्यक्तायां वाचि - **अगदिष्यत् अगदिष्यताम् अगदिष्यन्। अगदिष्यः अगदिष्यतम् अगदिष्यत। अगदिष्यम् अगदिष्याव अगदिष्याम।**

३) **अर्च** पूजायाम् - **आर्चिष्यत् आर्चिष्यताम् आर्चिष्यन्। आर्चिष्यः आर्चिष्यतम् आर्चिष्यत। आर्चिष्यम् आर्चिष्याव आर्चिष्याम।**

४) **व्रज** गतौ - **अव्रजिष्यत् अव्रजिष्यताम् अव्रजिष्यन्। अव्रजिष्यः अव्रजिष्यतम् अव्रजिष्यत। अव्रजिष्यम् अव्रजिष्याव अव्रजिष्याम।**

५) **कटँ** वर्षावरणयोः - **अकटिष्यत् अकटिष्यताम् अकटिष्यन्। अकटिष्यः अकटिष्यतम् अकटिष्यत। अकटिष्यम् अकटिष्याव अकटिष्याम।**

६) **क्षि** क्षये - **अक्षयिष्यत् अक्षयिष्यताम् अक्षयिष्यन्। अक्षयिष्यः अक्षयिष्यतम् अक्षयिष्यत। अक्षयिष्यम् अक्षयिष्याव अक्षयिष्याम।**

७) **चितीँ** संज्ञाने - **अचेतिष्यत् अचेतिष्यताम् अचेतिष्यन्। अचेतिष्यः अचेतिष्यतम् अचेतिष्यत। अचेतिष्यम् अचेतिष्याव अचेतिष्याम।**

८) **शुच** शोके - **अशोचिष्यत् अशोचिष्यताम् अशोचिष्यन्। अशोचिष्यः अशोचिष्यतम् अशोचिष्यत। अशोचिष्यम् अशोचिष्याव अशोचिष्याम।**

पाठगतप्रश्नाः-३

२१. लुङ् इति सूत्रस्यार्थं लिखत।

२२. लुङि शबपवादः कः।

२३. च्लेः सिच् कस्मिन् लकारे।

२४. सिचि के इत्संज्ञकाः भवन्ति।

२५. अभूत् इति रूपे सिच् लुक् केन सूत्रेण।

२६. गातिस्था ... इति सूत्रेण किं क्रियते।

२७. अभूत् इतीह सार्वधातुकनिबन्धनगुणः कुतो न।

२८. स्मोत्तरे माङि के लकाराः भवन्ति।

२९. न माङ्योगे, किं न।

३०. मा भवान् भूत् इतीह अङ्गस्य अट् कुतो न।

३१. क्रियातिपत्तिः का।

३२. लृङि किं विकरणम्।

१) शप् २) तास् ३) च्लि ४) स्य

३३. लृङि अङ्गस्य किन्न भवति।

१) अट् २) आट् ३) गुणः ४) अभ्यासः

३४. एषु किं रूपं भूधातोः लुङि नास्ति।

१) अभूताम् २) अभुवन् ३) अभूवम् ४) अभूत

३५. च्लेः स्थाने कः भवति।

१) स्य २) तास् ३) यासुट् ४) सिच्

पाठसारः

अस्मिन् पाठे लिङ् लुङ् लृङ् चेति त्रयो लकाराः उपन्यस्ताः। तेषु विधिलिङ् आशीर्लिङ् इति भेदेन लिङ् द्वेधा।

विध्यादिषु अर्थेषु विधीयमानो लिङ् विधिलिङ् इति कथ्यते। प्रेरणा प्रवर्तना वा मुख्यार्थो विधिलिङः। विधिलिङि तिङ् शप् च विधीयेते। यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रेण परस्मैपदस्य यासुट् विधीयते इति एको विशेषः। यासुटः सस्य लोपः क्वचिद् भवति क्वचिच्च अतो येयः इति सूत्रेण यासः स्थाने इय् इति विधीयते। झेर्जुस् इत्यपि अपरं वैशिष्ट्यं विधिलिङः। ङितो लस्य इतश्च, नित्यं ङितः, तस्थस्थमिपां तान्तन्तामः इत्यादीनि अपि भवन्ति।

आशीर्लिङ् लकारः आशीर्वादार्थे प्रयुज्यते। आशीर्लिङि यासुटः कित्त्वं किदाशिषि इति सूत्रेण विधीयते। तेन क्ङिति च इति सूत्रेण इग्लक्षणगुणवृद्धिनिषेधो भवति।

लुङ् लकारः साहित्यिकानां प्रियः। अस्य लकारस्य प्रयोगं यः करोति तस्य संस्कृतं प्रौढं भवति। अस्य लकारस्य प्रयोगः भूतकालीनां सर्वासाम् अपि क्रियाणां प्रकटनाय व्यवह्रियते। लुङः स्थाने तिङि, शबाद्यपवादत्वेन च्लि, तस्य सिच् इति वैशिष्ट्यानि अत्र पाठे दृष्टानि। इतोऽपि वृद्धिप्रकरणं महत् गुरुत्वपूर्णं चास्ति। तत् अग्रिमेषु पाठेषु प्रदर्शयिष्यते। माङ् प्रयुक्तश्चेत् लुङ् सर्वलकारापवादः भवति। स्मोत्तरः माङ् प्रयुक्तश्चेत् धातोः लुङ् लङ् च भवतः। माङि प्रयुक्ते अङ्गस्य अडाटौ न स्तः।

क्रियायाः अनिष्पतौ गम्यमानायां लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति सूत्रेण लृङ् विधीयते। स्यतासी लृलुटोः इति सूत्रेण लृङि परतः धातोः स्यप्रत्ययः शबाद्यपवादत्वेन प्रयुज्यते। लृङि परतः अङ्गस्य अडाटौ अपि स्तः।

पाठान्तप्रश्नाः

१. विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रं व्याख्यात।

२. ससूत्रं रूपाणि साधयत – भवेत्, भवेताम्, भवेयुः, भवेयम्, भवेम।

३. क्ङिति च इति सूत्रं व्याख्यात।

४. ससूत्रं रूपाणि साधयत – भूयात्, भूयास्ताम्, भूयासुः, भूयासम्, भूयास्म।

५. लुङ् इति सूत्रं व्याख्यात।

६. सार्वधातुकमपित् इति सूत्रं व्याख्यात।

७. ससूत्रं रूपाणि साधयत – अभूत्, अभूवन्, अभूत, अभूवम्, अभूम ,अभविष्यत्, अभविष्यः, अभविष्यम्।

८. स्तम्भयोः स्थितान् परस्परसम्बद्धान् मेलयत। क-स्तम्भे सूत्राणि सन्ति। ख-स्तम्भे कस्मिन्नर्थे तेषां प्रयोगः इत्यस्ति। कस्य सूत्रस्य कस्मिन्नर्थे प्रयोगः भवतीति मेलनीयम्।

क-स्तम्भः	ख-स्तम्भः
१) परोक्षे लिट्	क) क्रियातिपत्तौ
२) अनद्यतने लुट्	ख) भविष्यति
३) लृट् शेषे च	ग) अनद्यतनभविष्यति
४) लोट् च	घ) भूतसामान्ये
५) अनद्यतने लङ्	ङ) अनद्यतनपरोक्षभूते
६) लुङ्	च) अनद्यतनभूते

७) लृङ्	छ) विध्यादौ

सूत्रार्थयोः - १)-ङ), २)-ग), ३)-ख), ४)-छ), ५)-च), ६)-घ), ७)-क)

९. स्तम्भयोः स्थितान् युक्त्या मेलयत। क-स्तम्भे लकारः अस्ति, ख-स्तम्भे तस्य उदाहरणम् अस्ति। कस्य लकारस्य किमुदाहरणमिति मेलनीयम्।

	क-स्तम्भः		ख-स्तम्भः
१)	लट्	क)	अभवत
२)	लिट्	ख)	भवेत
३)	लुट्	ग)	भूयासम्
४)	लृट्	घ)	अभूवन्
५)	लोट्	ङ)	अभविष्यत
६)	लङ्	च)	भवतः
७)	विधिलिङ्	छ)	बभूविथ
८)	आशीर्लिङ्	ज)	भवितास्मि
९)	लुङ्	झ)	भविष्यथ
१०)	लृङ्	ञ)	भवत

लकारोदाहरणयोः - १)-च), २)-छ), ३)-ज), ४)-झ), ५)-ञ), ६)-क), ७)-ख), ८)-ग), ९)-घ), १०)-ङ)

१०. स्तम्भयोः स्थितान् युक्त्या मेलयत। क-स्तम्भे लकारः अस्ति, ख-स्तम्भे तस्य विकरणादि वैशिष्ट्यमस्ति। कस्य लकारस्य किं वैशिष्ट्यमिति मेलनीयम्।

	क-स्तम्भः		ख-स्तम्भः
१)	लिङ्	क)	शप्
२)	लृङ्	ख)	सिच्
३)	लुङ्	ग)	स्य
४)	लुट्	घ)	हि
५)	लङ्	ङ)	अभ्यासः

६)	लिट्	च)	तास्
७)	लोट्	छ)	यासुट्

लकारवैशिष्ट्ययोः - १)-छ), २)-ग), ३)-ख), ४)-च), ५)-क), ६)-ङ), ७)-घ)

११. स्तम्भयोः स्थितान् युक्त्या मेलयत। क-स्तम्भे रूपं यल्लकारस्यास्ति, ख-स्तम्भे तल्लकारस्य रूपाणि सन्ति। स्वलकारस्य रूपाणि मेलनीयानि।

	क-स्तम्भः		**ख-स्तम्भः**
१)	भवतः	क)	भूयास्त
२)	भविता	ख)	अभूवन्
३)	भविष्यतः	ग)	अभवत
४)	भवताम्	घ)	अभविष्यत्
५)	भवेतम्	ङ)	बभूविथ
६)	भूयात्	च)	भवथ
७)	अभूत्	छ)	भवितासि
८)	अभवताम्	ज)	भविष्यावः
९)	अभविष्यत	झ)	भवत
१०)	बभूव	ञ)	भवेत

रूपयोः - १)-च), २)-छ), ३)-ज), ४)-झ), ५)-ञ), ६)-क), ७)-ख), ८)-ग), ९)-घ), १०)-ङ)

पाठगतप्रश्नानाम् उत्तरमाला

उत्तराणि- १

१. वयसा अधिकारेण वर्णेन वा निकृष्टस्य भृत्यादेः प्रवर्तनम् विधिः।

२. अवश्यकर्तव्ये प्रेरणं, नियोगकरणं हि निमन्त्रणम्।

३. कामचारानुज्ञा हि आमन्त्रणम्।

४. सत्कारपूर्वको व्यापारो हि अधीष्टम्। सत्कृत्य प्रवर्तनमित्यर्थः।

५. विचार्य निर्धारणं हि सम्प्रश्नः। संप्रधारणं सम्प्रश्नः।

६. विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु अर्थेषु।

७. अतो येयः इति सूत्रेण यास् इत्यस्य स्थाने इय् आदेशो विधीयते।

८. लिङः।

९. २

१०. १

११. १

उत्तराणि- २

१२. किदाशिषि।

१३. आशिषि।

१४. अदन्तादङ्गात् परस्य सार्वाधातुकावयवस्य यास् इत्यस्य इय् अतो येयः इत्यनेन क्रियते। आशीर्लिङि लिङादेशः तिङ् लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञकः। अतो न प्रवृत्तिः।

१५. लिङाशिषि।

१६. आशिषि लिङादेशः तिङ् लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञकः भवति।

१७. १

१८. १

१९. ४

२०. १

उत्तराणि- ३

२१. भूतार्थे धातोः लुङ् स्यात्।

२२. च्लि।

२३. लुङि।

२४. इचौ।

२५. गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु।

२६. गाति-स्था-घु-पा-भूभ्यः सिचः लुक् क्रियते परस्मैपदेषु परेषु।

२७. भूसुवोस्तिङि इति निषेधात्।

२८. लङ् लुङ् च।

२९. अडाटौ न।

३०. माङ्योगः अस्ति। अतः न माङ्योगे इति निषेधान्नाट्।

३१. क्रियायाः अनिष्पत्तिः असिद्धिः अनभिनिवृत्तिः हि क्रियातिपत्तिः।

३२. ४

३३. ४

३४. २

३५. ४

।।इति भूधातुः।।

॥इति षोडशः पाठः ॥

346sk17

१७

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

प्रस्तावना

एकैकस्य धातोः रूपाणां साधनाय यानि अनतिक्रान्तानि नूतनानि सूत्राणि आवश्यकानि तानि आनीय व्याख्याय च धातोः रूपाणि साध्यन्ते इति क्रमः वैयाकरणसिद्धान्तकौमुदी इत्यादिग्रन्थेषु पुरस्कृतः। तेन एकैकस्य धातोः रूपाणि ज्ञायन्ते परन्तु एकस्य लकारस्य सर्वाणि सूत्राणि विकीर्णानि भवन्ति। एवञ्च समग्रस्य समुदितः बोधः अत्यल्पानामेव भवति। अतः इतः परं परस्मैपदप्रकरणे लकारक्रमेण सूत्राणि उपस्थापयिष्यन्ते। अत्र कानिचन बहुत्र प्रयुक्तानि साधारणसूत्राणि दत्तानि सन्ति। कानिचन तिङन्तप्रकरणे अग्रे आवश्यकानि इति धिया दत्तानि सन्ति।

वैयाकरणसिद्धान्तकौमुदी इत्यादिप्रक्रियाग्रन्थेषु धातूनां कश्चित् क्रमः आदृतः। तथापि लघुसिद्धान्तकौमुद्याम् धातवः चिताः सन्ति। एवमेव अत्रापि प्रक्रियासौकर्याय चितानां धातूनां चितानि स्थलानि एव प्रदर्शितानि, न तस्य धातोः सर्वाणि रूपाणि। अन्यानि रूपाणि विद्यार्थिना स्वयं बोद्धव्यानि। एवञ्च यदि एकैकस्य धातोः सर्वाणि रूपाणि सदा दीयन्ते तर्हि ग्रन्थाकारगौरवम् भवति। अतः अनन्यगतिकतया पन्था अयमवलम्बितः।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य मुख्यानि सूत्राणि बुध्यात्।
- विभिन्नानां धातूनां रूपाणि साधयितुं प्रभवेत्।
- विविधानि सूत्राणि व्याख्यातुम् समर्थो भवेत्।
- पूर्वपाठेषु कृतानां सार्वधातुकम् आर्धधातुकं संज्ञानां रूपेषु प्रभवं जानीयात्।
- भूधातुरूपाणि साधयित्वा अवशिष्टानि बहुषु लकारे एवञ्च विशिष्य लिटि प्रयुक्तानि सूत्राणि अत्र ज्ञास्यति।
- रहस्यमयम् इडागमप्रकरणम् अस्मिन् पाठे पठिष्यति।

लकारक्रमः - लिट्

[१७.१] अत आदेः॥ (७.४.७०)

सूत्रार्थः - अभ्यासस्यादेरतो दीर्घः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण दीर्घः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अतः (६/१), आदेः (६/१)। अत्र लोपोऽभ्यासस्य इति सूत्राद् अभ्यासस्य (६/१) पदमनुवर्तते। दीर्घ इणः किति इति सूत्रात् दीर्घः (१/१) पदमायाति। पदयोजना - अभ्यासस्य आदेः अतः दीर्घः। सूत्रार्थो भवति - अभ्यासस्य आदेः अतो दीर्घो भवति। अभ्यासस्य स्वाभाविकः अत् चेत् दीर्घो भवति। ह्रस्वः इति सूत्रेण ह्रस्वीकृतस्य अनेन दीर्घत्वं न क्रियते।

उदाहरणम् - आत।

सूत्रार्थसमन्वयः - अत सातत्यगमने इति धातोः परोक्षे लिट् इति सूत्रेण लिटि प्रथमपुरुषैकवचनविवक्षायां तिपि तस्य णलि अनुबन्धलोपे अत् अ इति स्थिते लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अत् अत् अ इति जाते पूर्वोऽभ्यासः इति सूत्रेण पूर्वस्य अत् इत्यस्य अभ्याससंज्ञायां हलादिः शेषः इति आदेः हलः अभावे तकारः लुप्यते। तेन अ अत् अ इति जाते अतो गुणे इत्यनेन पररूपे प्राप्ते अत आदेः इति प्रकृतसूत्रेण अभ्यासस्य अतः दीर्घे आकारे आ अत् अ इति स्थितिर्जायते। तदा -

[१७.२] अत उपधायाः॥ (७.२.११६)

सूत्रार्थः - उपधाया अतो वृद्धिः स्याद् ञिति णिति च प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण वृद्धिः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अतः उपधायाः इति सूत्रगतपदच्छेदः। अतः (६/१), उपधायाः (६/१)। मृजेर्वृद्धिः इति सूत्रात् वृद्धिः (१/१) पदमायाति। अचो ञ्णिति इति सूत्रात् ञ्णिति (७/१) पदमायाति। ञ् च ण् च ञ्णौ इति इतरेतरयोगद्वन्द्वसमासः। ञ्णौ इतौ यस्य स ञ्णित्, तस्मिन् ञ्णिति इति बहुव्रीहिसमासः। अङ्गस्य इत्यधिकारे पठितत्वात् प्रत्यये परे एव अङ्गसंज्ञायाः उपपन्नत्वात् प्रत्यये (७/१) इति पदम् आक्षिप्यते। पदयोजना - उपधायाः अतः वृद्धिः ञ्णिति प्रत्यये। सूत्रार्थो भवति - उपधा यः अत् तस्य वृद्धिः भवति ञिति णिति च प्रत्यये परे। अतः स्थाने स्थानेऽन्तरतमः इति परिभाषया स्थानत आन्तर्याद् आकारः वृद्धिः स्यात्।

उदाहरणम् - आत।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण आ अत् अ इति जाते णलः णित्त्वात् उपधायाः अतः वृद्धौ आ आत् अ इति स्थितिः जायते। तदा अकः सवर्णे दीर्घः इति सूत्रेण आकार-आकारयोः दीर्घैकादेशे **आत** इति रूपं सिध्यति।

[१७.३] द्विर्वचनेऽचि॥ (१.१.५९)

सूत्रार्थः - द्वित्वनिमित्तेऽचि अच आदेशो न द्वित्वे कर्तव्ये।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण अचः आदेशः निषिध्यते। अस्मिन् सूत्रे द्वे पदे स्तः। द्विर्वचने अचि इति सूत्रगतपदच्छेदः। द्विर्वचने (७/१), अचि (७/१)। अचः परस्मिन् पूर्वविधौ इति सूत्रात् अचः (६/१) इति पदमनुवर्तते। स्थानिवदादेशोऽनल्विधौ इति सूत्रात् आदेशः (१/१) इति पदमायाति। पदान्तद्विर्वचन° इति सूत्रात् न इत्यव्ययमनुवर्तते। द्विः उच्यते अस्मिन् इति द्विर्वचनम्। अत्र द्विर्वचने इत्यस्य आवृत्तिः भवति। तेन द्विर्वचने द्विर्वचने इति लभ्यते। पदयोजना - द्विर्वचने अचि अचः आदेशः न द्विर्वचने। सूत्रार्थो भवति - द्वित्वे कर्तव्ये द्वित्वनिमित्ते अचि अचः स्थाने आदेशः न भवति।

अर्थात् द्वित्वविधायकसूत्रेण द्वित्वम् कर्तव्यम् अस्ति। परन्तु अन्येन केनचित् सूत्रेण तत्र अचः स्थाने आदेशः प्राप्तः अस्ति। एवञ्च स आदेशः द्वित्वस्य यन्निमित्तम् अर्थात् लिट् तस्य अचं निमित्तीकृत्य प्रवर्तते। अपि च द्वित्वविधायकसूत्राद् अचः आदेशविधायकं सूत्रं बलवद् अस्ति तदा द्विर्वचनेऽचि इति सूत्रेण स आदेशः द्वित्वार्थं निषिध्यते। कृते च द्वित्वे यथासूत्रम् अचः आदेशादिकं पुनः प्रसज्यते। अर्थात् अचः आदेशात् पूर्वं द्वित्वं कर्तव्यम्। ततः परम् अचः आदेशादिकं कर्तव्यम्।

उदाहरणे सूत्रार्थसमन्वयः - क्षयार्थकात् क्षिधातोः परोक्षे लिट् इति सूत्रेण लिटि लस्य स्थाने प्रथमपुरुषैकवचनविवक्षायां तिपि क्षि ति इति स्थिते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपः सर्वादेशे णलि अनुबन्धलोपे क्षि अ इति स्थितिर्जायते।

अत्राधुना लिटि धातोरनभ्यासस्य (६.१.८) इति सूत्रेण धातोः द्वित्वम् प्राप्तम्। परन्तु इको यणचि (६.१.७७) इति सूत्रेण इकः यणादेशः प्राप्तः। तत्रापि णलः णित्त्वात् अचो ञ्णिति (७.१.९१) इति सूत्रेण अजन्ताङ्गस्य वृद्धिः प्राप्ता। तत्रापि पुनः सार्वधातुकार्धधातुकयोः (७.३.८४) इति सूत्रेण इगन्ताङ्गस्य गुणः प्राप्तः। किञ्च विप्रतिषेधे परं कार्यम् इति परिभाषया द्वित्वाद् यणादेशः बलीयान्। यणादेशाद् वृद्धिः बलीयसी। वृद्धेरपि गुणो बलीयान्। अतः द्वित्वात् पूर्वं गुणः प्राप्तः। तत्र णलं निमित्तीकृत्य द्वित्वं प्राप्तम्। तस्य अकारः द्वित्वनिमित्तकः अच् अस्ति। द्विर्वचनेऽचि इति सूत्रेण अस्मिन् अचि परतः अचः आदेशः न स्यात् द्वित्वे कर्तव्ये। अर्थात् प्रथमं द्वित्वं भवति। ततः परम् अचः आदेशादिकं भवति। एवम् लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः क्षि इत्यस्य द्वित्वे क्षि क्षि अ इति जाते द्विरुक्तस्य पूर्वभागस्य क्षि इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे कि क्षि अ इति जायते। तदा -

[१७.४] कुहोश्चुः॥ (७.४.६२)

सूत्रार्थः - अभ्यासकवर्गहकारयोः चवर्गादेशः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण चवर्गः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। कुहोः चुः इति सूत्रगतपदच्छेदः। कुहोः (६/२), चुः (१/१)। अत्र लोपोऽभ्यासस्य इति सूत्रात् अभ्यासस्य (६/१) इति षष्ठ्यन्तपदमनुवर्तते। कुः च ह् च कुहौ, तयोः इति इतरेतरयोगद्वन्द्वसमासः। सूत्रार्थो भवति - अभ्यासस्य कवर्गस्य हकारस्य च स्थाने चवर्गः आदेशः भवति। कुहोः इति स्थानिनः षट्। चुः इति आदेशाः पञ्च। अतः स्थान्यादेशयोः संख्यावैषम्यात् स्थानेऽन्तरतमः इति सूत्रेण गुणकृदान्तर्येण निर्वाहः भवति।

[आन्तरतम्यपरीक्षा - (परीक्षायाः कृते नास्ति)

स्थानेऽन्तरतमः इति परिभाषा यत्र प्रवर्तते तत्र स्थानिना सदृशतमः आदेशः कर्तव्यः। सादृश्यम् स्थानार्थगुणप्रमाणतः चतुर्विधम् अस्ति। सदृशतमस्य आदेशस्य अन्वेषणाय आन्तरतम्यपरीक्षा क्रियते एव। सा च परीक्षा अत्र किञ्चित् प्रदर्श्यते।

स्थानकृद् आन्तर्यमस्ति न वा - स्थानिनः कवर्गस्य हकारस्य उच्चारणस्थानम् अकुहविसर्जनीयानां कण्ठाः इति वचनात् कण्ठः। आदेशेषु चवर्गस्य समेषां उच्चारणस्थानं तालु। अतः स्थानिभिः सदृशतमः तेषु विधीयमानेषु आदेशेषु कोऽपि न लभ्यते।

प्रमाणकृद् आन्तर्यमस्ति न वा - प्रमाणमत्र उच्चारणकालः। स्थानी कवर्गः हकारश्च अर्धमात्रिकाः, आदेशाः चुः च छ ज झ ञ एते पञ्च समेऽपि अर्धमात्रिकाः। अतः तेषु कश्चिदेकः प्रमाणतः अन्तरतमः नास्ति।

अर्थकृद् आन्तर्यमस्ति न वा - वर्णानां न कोऽपि अर्थः अत्र गृह्यते। समुदायो ह्यर्थवान् तस्यैकदेशोऽनर्थकः इति न्यायः। अतः अर्थतः आन्तर्यं न विचार्यते।

गुणकृदान्तर्यमस्ति न वा - गुणशब्दस्यार्थः अत्र बाह्ययत्नः। स्थानिना कवर्गेण हकारेण आदेशेषु यस्य बाह्ययत्नाः समानाः सन्ति स आदेशः चवर्गः सदृशतमः। बाह्ययत्नाः सविस्तरम् अधः प्रदर्श्यन्ते।

	वर्णः	बाह्ययत्नाः			
स्थानी	क	विवारः	श्वासः	अघोषः	अल्पप्राणः
	ख	विवारः	श्वासः	अघोषः	महाप्राणः
	ग	संवारः	नादः	घोषः	अल्पप्राणः
	घ	संवारः	नादः	घोषः	महाप्राणः

	ङ	संवारः	नादः	घोषः	अल्पप्राणः
	ह	संवारः	नादः	घोषः	महाप्राणः
आदेशाः	च	विवारः	श्वासः	अघोषः	अल्पप्राणः
	छ	विवारः	श्वासः	अघोषः	महाप्राणः
	ज	संवारः	नादः	घोषः	अल्पप्राणः
	झ	संवारः	नादः	घोषः	महाप्राणः
	ञ	संवारः	नादः	घोषः	अल्पप्राणः

प्रकरणे साक्षात् स्थानी कः अस्ति इति दृष्ट्वा आदेशेषु यस्य बाह्यप्रयत्नः स्थानिना सदृशतमः स्यात् स आदेशः भवति।

यथा - स्थानी ककारः चेत् आदेशेषु चकारस्य एव बाह्यप्रयत्नाः ककारतुल्याः सन्ति।

स्थानी खकारः चेत् आदेशेषु छकारस्य एव बाह्यप्रयत्नाः खकारतुल्याः सन्ति।

स्थानी गकारः चेत् आदेशेषु जकारस्य एव बाह्यप्रयत्नाः गकारतुल्याः सन्ति।

स्थानी घकारः चेत् आदेशेषु झकारस्य एव बाह्यप्रयत्नाः घकारतुल्याः सन्ति।

स्थानी ङकारः चेत् आदेशेषु ञकारस्य एव बाह्यप्रयत्नाः ङकारतुल्याः सन्ति। यद्यपि ङकारेण तुल्याः जकारस्यापि सन्ति। तथापि ङकारञकारयोः अनुनासिकत्वमस्ति इति हेतोः ङकारस्य स्थाने ञकार एव भवति।

स्थानी हकारः चेत् आदेशेषु झकारस्य एव बाह्यप्रयत्नाः हकारतुल्याः सन्ति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण कि क्षि अ इति स्थितिः जाता। अत्राधुना कुहोश्चुः इति प्रकृतसूत्रेण अभ्यासस्य कवर्गस्य ककारस्य स्थाने चवर्गः कर्तव्यः अस्ति। ककारस्य स्थाने आदेशेषु चवर्गीयेषु कतमः स्यात् इति आन्तरतम्यपरीक्षा उपरि सूत्रव्याख्यायाम् प्रदर्शिता। तत्राधुना स्थानी ककारः। तस्य बाह्यप्रयत्नाः विवारः श्वासः अघोषः अल्पप्राणः चेति। आदेशेषु चकारस्य एव बाह्यप्रयत्नाः विवारः श्वासः अघोषः अल्पप्राणः इति ककारतुल्याः सन्ति। अतः चकार एव आदेशो भवति। तेन चि क्षि अ इति स्थितिः जायते।

[१७.५] अचो ञ्णिति॥ (७.१.९१)

सूत्रार्थः - अजन्ताङ्गस्य वृद्धिः ञिति णिति च प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण वृद्धिः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अचः ञ्णिति इति सूत्रगतपदच्छेदः। अचः (६/१) ञ्णिति (७/१)। अङ्गस्य (६/१) इति अधिकृतम्। मृजेर्वृद्धिः इति सूत्रात् वृद्धिः (१/१) पदमनुवर्तते। ञ् च ण् च ञ्णौ इति इतरेतरयोगद्वन्द्वसमासः। ञ्णौ इतौ यस्य स

ञ्णित्, तस्मिन् ञ्णिति इति बहुव्रीहिसमासः। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। पदयोजना - अचः अङ्गस्य ञ्णिति प्रत्यये वृद्धिः। अचः अङ्गस्य इति समानविभक्तिकत्वात् अचः इत्यस्य विशेषणत्वाच्च तदन्तविधिः भवति। तदन्तविधिना अजन्तस्य अङ्गस्य इति लभ्यते। अजन्ताङ्गस्य इत्यत्रापि अलोऽन्तस्य इति परिभाषया अन्त्यस्य एव अलः वृद्धिः भवति। अत्र अन्त्यः अल् अच् एव। अतः सूत्रार्थो भवति - अजन्ताङ्गस्य अन्त्यस्य अचः वृद्धिः भवति ञिति णिति च प्रत्यये परे।

उदाहरणम् - चिक्षाय।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण चि क्षि अ इति स्थितिः अस्ति। अत्राधुना णलि प्रत्यये परतः चिक्षि इति समुदायस्य अङ्गसंज्ञा भवति। तच्च अङ्गम् अजन्तम् अस्ति। एवञ्च णल् णित् प्रत्ययः अस्ति। अतः अलोऽन्त्यस्य इति परिभाषया अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य अन्त्यस्य अलः इकारस्य स्थाने वृद्धौ स्थानत आन्तर्याद् ऐकारे चिक्षै अ इति स्थितिः भवति। ततश्च एचोऽयवायावः इति सूत्रेण आयादेशे **चिक्षाय** इति रूपं सिध्यति।

--

चिक्षियतुः - क्षयार्थकात् क्षिधातोः परोक्षे लिट् इति सूत्रेण लिटि लस्य स्थाने प्रथमपुरुषद्विवचनविवक्षायां तसि क्षि तस् इति स्थिते तसः सर्वादेशे अतुसि क्षि अतुस् इति स्थितिर्जायते। ततश्च सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य इकारस्य गुणः प्राप्तः। तदा -

[१७.६] असंयोगाल्लिट् कित्॥ (१.२.५)

सूत्रार्थः - असंयोगात् परोऽपिल्लिट् कित् स्यात्।

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अनेन सूत्रेण कित्त्वम् अतिदिश्यते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। असंयोगात् लिट् कित् इति सूत्रगतपदच्छेदः। असंयोगात् (५/१), लिट् (१/१), कित् (१/१)। सार्वधातुकमपित् इति सूत्रात् अपित् (१/१) इति पदमायाति। न संयोगः असंयोगः, तस्मात् असंयोगात् इति नञ्-तत्पुरुषः समासः। प् इत् यस्य स पित् इतिबहुव्रीहिः समासः। न पित् अपित् इति नञ्तत्पुरुषसमासः। पदयोजना - असंयोगात् अपित् लिट् कित्। सूत्रार्थो भवति - असंयोगात् परः अपित् लिट् कित् भवति। अष्टादशसु तिङ्-प्रत्ययेषु तिप् सिप् मिप् त्रय एव पितः सन्ति। अन्ये १५ प्रत्ययाः अपितः एव सन्ति। एवञ्च तिबादीनां स्थाने विहिताः णलादयोऽपि स्वयम् अपितः एव सन्ति। तत्र तिप् सिप् मिप् एषाम् स्थाने विहिताः णल् थल् अ इति एते त्रयः पितः। अतः तद्भिन्नानाम् अपिताम् कित्त्वं भवति।

उदाहरणम् - चिक्षियतुः।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षि अतुस् इति स्थितौ सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य इकः इकारस्य गुणः प्राप्तः। स च इग्लक्षणः गुणः। अत्र लिटः स्थाने विहितो यः तस्-प्रत्ययः, तस्य स्थाने विहितः अतुस् न स्थानिवद्भावाद् नापि स्वतः पित् अस्ति। अतः अपित् अस्ति

लिट् च अस्ति। एवञ्च क्षि इत्यस्य अन्ते इकारः अस्ति, न तु संयोगः। अतः असंयोगात् परः अपित् लिट् अतुस् अस्ति। अतः प्रकृतसूत्रेण अतुसः कित्त्वम् अतिदिश्यते। तेन क्क्ङिति च इति सूत्रेण इग्लक्षणः गुणः निषिध्यते।

ततश्च लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्वववयवस्य एकाचः क्षि इत्यस्य द्वित्वे क्षि क्षि अतुस् इति जाते द्विरुक्तस्य पूर्वभागस्य क्षि इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे कि क्षि अतुस् इति जायते। एवञ्च कुहोश्चुः इति सूत्रेण अभ्याससककारस्य स्थाने चकारे कृते चि क्षि अतुस् इति स्थितिः जाता। ततश्च अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रेण षकारोत्तरस्य इकारस्य स्थाने इयङ् इत्यादेशे अनुबन्धलोपे चि क्षिय् अतुस् इति जाते समुदायस्य तिङन्तत्वेन पदत्वात् सस्य रुत्वे विसर्गे च कृते वर्णमेलने **चिक्षियतुः** इति रूपं सिध्यति।

चिक्षियुः - क्षिधातोः लिटि प्रथमपुरुषबहुवचनविक्षायां झिप्रत्यये तस्य स्थाने उस्-प्रत्यये क्षि उस् इति स्थिते सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते उसः असंयोगाल्लिट् कित् इत्यनेन कित्त्वात् क्क्ङिति च इति सूत्रेण गुणनिषेधे द्वित्वे अभ्यासकार्ये च चि क्षि उस् इति स्थिते अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रेण इकारस्य स्थाने इयङ् इत्यादेशे चि क्षिय् उस् इति जाते समुदायस्य तिङन्तत्वेन पदत्वात् सस्य रुत्वे विसर्गे च कृते वर्णमेलने **चिक्षियुः** इति रूपं सिध्यति।

चिक्षयिथ, चिक्षेथ - क्षिधातोः लिटि सिपि परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण सिपः सर्वादेशे थलि अनुबन्धलोपे क्षि थ इति स्थितिर्जायते। लिट् च इति सूत्रेण लिडादेशस्य सिपः आर्धधातुकत्वात्, तदादेशः थल् अपि आर्धधातुकसंज्ञकः, स्वं वलादिश्च। अतः आर्धधातुकस्येड् वलादेः इति सूत्रेण थलः इडागमः प्राप्तः। तदा -

पाठगतप्रश्नाः-१

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१. अभ्यासस्यादेरतो दीर्घः केन सूत्रेण।

२. अतति इत्यत्रत्यस्य अत्-धातोरर्थः कः।

३. उपधाया अतो वृद्धिः ञिति णिति च प्रत्यये परे केन सूत्रेण भवति।

४. द्विर्वचनेऽचि इति सूत्रस्यार्थं लिखत।

५. क्षिधातोः लिटि चिक्षाय इति रूपे ककारस्य चकारः केन सूत्रेण।

६. क्षिधातोः लिटि चिक्षाय इति रूपे इकारस्य वृद्धिः केन सूत्रेण।

७. चिक्षियतुः इति रूपे आर्धधातुकनिबन्धनगुणस्य अभावः कुतः।

८. चिक्षियतुः इति रूपे यकारः कुतः आगतः।

९. क्षिधातोः लिटि चिक्षाय इति रूपे ककारस्य चकारकरणे कीदृशमान्तर्यम्।

१) स्थानकृद् २) गुणकृद् ३) अर्थकृद् ४) प्रमाणकृद्

[१७.७] एकाच उपदेशेऽनुदात्तात्॥ (७.२.१०)

सूत्रार्थः - उपदेशे यो धातुः एकाच् अनुदात्तश्च तत आर्धधातुकस्य इट् न भवति।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण इड् निषिध्यते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। एकाचः (५/१), उपदेशे (७/१), अनुदात्तात् (५/१)। ऋत इद्धातोः इति सूत्रात् धातोः (५/१) पदमनुवर्तते। नेड् वशि कृति इति सूत्रात् न इत्यव्ययमनुवर्तते, इट् (१/१) इति पदमनुवर्तते। एकः अच् यस्य यस्मिन् वा असौ एकाच्, तस्माद् एकाचः इति बहुव्रीहिसमासः। अनुदात्तः अस्ति अस्य इति अनुदात्तः धातुः (अर्शआदिभ्योऽच् इति अजन्तम् पदम्)। सूत्रार्थो भवति - उपदेशे यो धातुः एकाच् अनुदात्तः च तस्मात् परस्य आर्धधातुकस्य इट् न भवति। यो धातुः उपदेशावस्थायाम् एकाच् अपि अस्ति, अनुदात्तश्चापि अस्ति तस्मात् परस्य आर्धधातुकस्य इड् निषिध्यते इति विशिष्य अवधेयम्। यदि उपदेशे धातुः एकाच् अस्ति परन्तु अनुदात्तः नास्ति तर्हि निषेधः न प्रवर्तते। यदि धातुः उपदेशे अनुदात्तः अस्ति परन्तु एकाच् नास्ति तर्हि निषेधः न भवति। यस्मात् धातोः परस्य आर्धधातुकस्य इडागमः भवति स धातुः सेट् कथ्यते। यस्मात् धातोः परस्य आर्धधातुकस्य इडागमः विकल्पेन भवति स धातुः वेट् कथ्यते। यस्मात् धातोः परस्य आर्धधातुकस्य इडागमः न भवति स धातुः अनिट् कथ्यते। एवम् सेट् वेट् अनिट् इति धातुः त्रेधा इडागमवशात्।

आर्धधातुकस्येड्वलादेः इति सूत्रेण इडागमो विधीयते। तस्य अनेन सूत्रेण निषेधः क्रियते। अतः सूत्रार्थे उक्तं यद् आर्धधातुकस्य इट् न भवतीति।

उपदेशे धातुषु बहुत्र अधिकस्वरः योज्यते, तस्य उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा च भवति। यस्य धातोः अनुदात्तः स्वरः इत्-संज्ञां लभते स धातुः अनुदात्तेत् कथ्यते। यस्य धातोः स्वकीयः स्वरः, यस्य इत्थम् इत्संज्ञा न भवति स धातुः अनुदात्तः कथ्यते। इत्थम् अनुदात्तः अनुदात्तेत् इति पदयोः अर्थे भेदः अस्ति।

पाणिनीयधातुपाठे पाणिनिना धातुस्वराः निर्दिष्टाः सन्ति। तत्र दर्शनेन तज्ज्ञानं भवितुमर्हति। तत्र परिशीलनेन केचित् धातवः निर्देष्टुं शक्यन्ते। अतः कः धातुः अनुदात्तः कश्च न अनुदात्तः इति ज्ञानाय व्यवसिताः धातवः सन्ति। ते अत्र दीयन्ते।

यस्य धातोः एकः अच् भवति स धातुः अजन्तः हलन्तः चेति भेदेन द्विविधो भवति।

तत्रेयम् अजन्तधातुविषयिणी कारिका - (एतत्कारिकास्था अनुदात्ताः न)

ऊदृदन्तैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः।

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः॥

अत्र कारिकायाम् अविद्यमानः, अनुल्लिखितः एकाच् अजन्तः च धातुः अनुदात्तः भवति। कारिकायाम् उल्लिखिताः - ऊदन्तः ऋदन्तः (दीर्घः ऋ), यु रु क्ष्णु शीङ् स्नु क्षु श्वि डीङ् श्रि वृङ् वञ् इति एते। एतान् विहाय अन्यः एकाच् अजन्तः च धातुः अनुदात्तः भवति।

हलन्ताः १०३ धातवः- (अत्रत्याः १०३ अनुदात्ताः)

कान्तेषु शक्लेकः। चान्तेषु पच् मुच् रिच् वच् विच् सिचः षट्। **छान्तेषु** प्रच्छ्येकः।

जान्तेषु त्यज् निजिर् भज् भञ्ज् भुज् भ्रस्ज् मस्ज् यज् युज् रुज् रञ्ज् विजिर् स्वञ्ज् सञ्ज् सृजः पञ्चदश॥

दान्तेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद्य भिद् विद्य विनद् विन्द् शद् सद् स्विद्य स्कन्द् हदः षोडश।

धान्तेषु क्रुध् क्षुध् बुध्य बन्ध् युध् रुध् राध् व्यध् साध् शुध् सिध्या एकादश।

नान्तेषु मन्यहनी द्वौ।

पान्तेषु आप् छुप् क्षिप् तप् तिप् तृप्य दृप्य लिप् लुप् वप् शप् स्वप् सृपस्त्रयोदश।

भान्तेषु यभ् रभ् लभस्त्रयः। **मान्तेषु** गम् नम् यम् रमश्चत्वारः।

शान्तेषु क्रुश् दंश् दिश् दृश् मृश् रिश् रुश् लिश् विश् स्पृशो दश।

षान्तेषु कृष् त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्या एकादश॥

सान्तेषु घस्-वसती द्वौ। **हान्तेषु** दह् दिह् दुह् नह् मिह् रुह् लिह् वहः अष्टौ।

अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम्। १०३ धातवः अनुदात्ताः।

एते एव हलन्ताः अनुदात्ताः धातवः अकारादिक्रमेण अधः चतुरश्रे प्रदत्ताः सन्ति --

क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः
१	अद्		२२	दह्		४३	भिद्		६१	रिश्		८५	शप्
२	आप्		२३	दिश्		४४	भुज्		६२	रुज्		८६	शिष्
३	कृष्		२४	दिह्		४५	भ्रस्ज्		६३	रुध्		८७	शुध्
४	क्रुध्		२५	दुष्		४६	मन्य		६४	रुश्		८८	शुष्
५	क्रुश्		२६	दुह्		४७	मस्ज्		६५	रुह्		८९	श्लिष्य
६	क्षिप्		२७	दृप्य		४८	मिह्		६६	लभ्		९०	सञ्ज्
७	क्षुद्		२८	दृश्		४९	मुच्		६७	लिप्		९१	सद्

क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः
८	क्षुध्		२९	द्विष्		५०	मृश्		६८	लिश्		९२	साध्
९	खिद्		३०	नम्		५१	यज्		६९	लिह्		९३	सिच्
१०	गम्		३१	नह्		५२	यभ्		७०	लुप्		९४	सिध्य
११	घस्		३२	निजिर्		५३	यम्		७१	वच्		९५	सृज्
१२	छिद्		३३	नुद्		५४	युज्		७२	वप्		९६	सृप्
१३	छुप्		३४	पच्		५५	युध्		७३	वस्		९७	स्कन्द्
१४	तप्		३५	पद्य		५६	रञ्ज्		७४	वह्		९८	स्पृश्
१५	तिप्		३६	पिष्		५७	रभ्		७५	विच्		९९	स्वञ्ज्
१६	तुद्		३७	पुष्य		५८	रम्		७६	विजिर्		१००	स्वप्
१७	तुष्		३८	प्रच्छि		५९	राध्		७७	विद्य		१०१	स्विद्य
१८	तृप्		३९	बन्ध्		६०	रिच्		८१	विष्		१०२	हद्
१९	त्यज्		४०	बुध्य		७८	विनद्		८२	व्यध्		१०३	हन्
२०	त्विष्		४१	भज्		७९	विन्द्		८३	शक्लृ			
२१	दश्		४२	भञ्ज्		८०	विश्		८४	शद्			

हलन्तेषु केषाञ्चिद् धातूनां विषये ईषत् विवरणम् अत्र चतुरश्रे दीयते।

अनुक्र.	धातुः - अर्थः	गणः, पदम्
१	शक्लृँ शक्तौ	स्वादि, प.प.
२	पच् डुपचँष् पाके	भ्वादि, उ.प.
३	मुच् मुचॢँ मोक्षणे	तुदा, उ.प.
४	रिच् रिचिर् विरेचने, रिचिर् वियोजनसम्पर्चनयोः	रुधा, उ.प. चुरा, उ.प.
५	वच् वच परिभाषणे , ब्रुवो वचिः इति वच् अपि	अदा, प.प.
६	विच् विचिर् पृथग्भावे	रुधा, उ.प.
७	सिच् षिचँ क्षरणे	तुदा. उ.प.

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

अनुक्र.	धातुः - अर्थः	गणः, पदम्
८	प्रच्छ ज्ञीप्सायाम्	तुदा, प.प.
९	त्यज हानौ	भ्वा, प.प.
१०	निजिर् णिजिर् शौचपोषणयोः	जुहो., उ.प.
११	भजँ सेवायाम्	भ्वा, उ.प.
१२	भञ्ज् भञ्जौँ आमर्दने	रुधा, प.प.
१३	भुज् भुज पालनाभ्यवहारयोः , भुजौँ कौटिल्ये	रुधा, प.प तुदा, प.प.
१४	भ्रस्जँ पाके	तुदा, प.प.
१५	मस्ज् टुमस्जौँ शुद्धौ	तुदा, प.प.
१६	यजँ देवपूजासङ्गतिकरणदानेषु	भ्वा, उ.प.
१७	युज् युजिर् योगे , युजँ समाधौ , युज संयमने	रुधा, उ.प. दिवा, आ.प. चुरा, उ.प.
१८	रुज् रुजौँ भङ्गे	तुदा, प.प.
१९	रञ्जँ रागे	भ्वा, दिवा, उ.प.
२०	विजिर् पृथग्भावे	जुहो, उ.प.
२१	स्वञ्ज् ष्वञ्जँ परिष्वङ्गे	भ्वा, आ.प.
२२	सञ्ज् षञ्ज सङ्गे	भ्वा, प.प.
२३	सृज विसर्गे	दिवा, आ.प.। तुदा, प.प.
२४	अद भक्षणे	अदा, प.प.
२५	क्षुद् क्षुदिर् सम्पेषणे	रुधा, उ.प.
२६	खिद् खिदँ दैन्ये , खिद परिघाते	दिवा, रुधा, आ.प. तुदा, प.प.
२७	छिद् छिदिर् द्वैधीकरणे	रुधा, उ.प.
२८	तुदँ व्यथने	तुदा, उ.प.

अनुक्र.	धातुः - अर्थः	गणः, पदम्
२९	नुद णुद प्रेरणे	तुदा, उ.प.
३०	पद्य पद्ँ गतौ	दिवा, आ.प.
३१	भिद् भिदिर् विदारणे	रुधा, उ.प.
३२	विद्य – विद् - विद्ँ सत्तायाम्	दिवा, आ.प.
३३	विनद् - विद् विद्ँ विचारणे	रुधा, आ.प.
३४	विन्द् - विद् विदॢँ लाभे	तुदा, उ.प.
३५	शद् शदॢँ शातने	भ्वा, तुदा, प.प.
३६	सद् षदॢँ विशरणगत्यवसादनेषु	भ्वा, तुदा, प.प.
३७	स्विद्य स्विद् ञिष्विदाँ गात्रप्रक्षरणे	दिवा, प.प.
३८	स्कन्द् स्कन्दिर् गतिशोषणयोः	भ्वा, प.प.
३९	हदँ पुरीषोत्सर्गे	भ्वा, आ.प.
४०	क्रुध क्रोधे	दिवा, प.प.
४१	क्षुध बुभुक्षायाम्	दिवा, प.प.
४२	बुध्य बुध् बुधँ अवगमने	दिवा, आ.प.
४३	बन्ध बन्धने	क्र्यादि, प.प.
४४	युधँ सम्प्रहारे	दिवा, आ.प.
४५	रुध् रुधिँर् आवरणे, अनु+रुधँ कामे	रुधा, आ.प. दिवा, आ.प.
४६	राध् राध संसिद्धौ राध वृद्धौ	स्वा, प.प. दिवा, प.प.
४७	व्यध ताडने	दिवा, प.प.
४८	शुध शौचे	दिवा, प.प.
४९	साध संसिद्धौ	स्वा, प.प.
५०	सिध्य सिध् षिधुँ संराद्धौ	दिवा, प.प.
५१	मन्य – मन् मनँ ज्ञाने	दिवा, आ.प.

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

अनुक्र.	धातुः - अर्थः	गणः, पदम्
५२	हन हिंसागत्योः	अदा, प.प.
५३	आप् आपॢ व्याप्तौ आपॢ लम्भने	स्वा, प.प. चुरा, उ.प.
५४	क्षिप प्रेरणे	दिवा, प.प.। तुदा, उ.प.
५५	छुप स्पर्शे	तुदा, प.प.
५६	तप् - तप सन्तापे , तपँ ऐश्वर्ये , तप दाहे	भ्वा, प.प. दिवा, आ.प. चुरा, उ.प.
५७	तिप् तिपॢँ क्षरणे	भ्वादि, प.प.
५८	तृप्य तृप् तृप प्रीणने	दिवा, प.प.
५९	दृप्य दृप् दृप हर्षमोहनयोः	दिवा, प.प.
६०	लिपँ उपदेहे	तुदा, उ.प.
६१	लुप् - लुपॢँ छेदने	तुदा, उ.प.
६२	वप् डुवपँ बीजसन्ताने	भ्वादि, उ.प.
६३	शप् शपँ आक्रोशे	भ्वादि, दिवा, उ.प.
६४	स्वप् ञिष्वप् शये	अदा, प.प.
६५	सृप् सृपॢँ गतौ	भ्वादि, प.प.
६६	यभ मैथुने	भ्वादि, प.प.
६७	रभँ राभस्ये	भ्वादि, आ.प.
६८	लभ् डुलभँष् प्राप्तौ	भ्वादि, आ.प.
६९	गम गमॢँ गतौ	भ्वादि, प.प.
७०	नम् णम प्रह्वत्वे शब्दे च	भ्वादि, प.प.
७१	यम् यमुँ उपरमे	भ्वादि, प.प.
७२	रम् रमुँ क्रीडायाम्	भ्वादि, आ.प.
७३	क्रुश आह्वाने रोदने च	भ्वादि, प.प.

अनुक्र.	धातुः - अर्थः	गणः, पदम्
७४	दंश दशने	भ्वादि, प.प.
७५	दिश अतिसर्जने	तुदा, प.प.
७६	दृश् दृशिर् प्रेक्षणे	भ्वादि, प.प.
७७	मृश आमर्शने	तुदा, प.प.
७८	रिश हिंसायाम्	तुदा, प.प.
७९	रुश हिंसायाम्	तुदा, प.प.
८०	लिशँ अल्पीभावे, लिश गतौ	दिवा, आ.प. तुदा, प.प.
८१	विश प्रवेशने	तुदा, प.प.
८२	स्पृश संस्पर्शे	तुदा, प.प.
८३	कृष विलेखने	भ्वादि, तुदा, उ.प.
८४	त्विषँ दीप्तौ	भ्वादि, उ.प.
८५	तुष प्रीतौ	दिवा, प.प.
८६	द्विषँ अप्रीतौ	अदा, उ.प.
८७	दुष वैकृत्ये	दिवा, प.प.
८८	पुष्य – पुष् पुष पुष्टौ	दिवा, प.प.
८९	पिष् पिषॢँ सञ्चूर्णने	रुधा, प.प.
९०	विष् विषॢँ व्याप्तौ, विषुँ सेचने, विष विप्रयोगे	जुहो, उ.प. भ्वादि, प.प. क्र्यादि, प.प.
९१	शिष् शिष हिंसायाम्, शिषॢँ विशेषणे, शिष असर्वोपयोगे	भ्वादि, प.प. रुधा, प.प. चुरा, उ.प.
९२	शुष शोषणे	दिवा, प.प.
९३	श्लिष्य श्लिष् श्लिष आलिङ्गने	दिवा, प.प.
९४	घस् घसॢँ अदने	भ्वादि, प.प.

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

अनुक्र.	धातुः - अर्थः	गणः, पदम्
९५	वसति वस निवासे	भ्वादि, प.प.
९६	दह भस्मीकरणे	भ्वादि, प.प.
९७	दिहँ उपचये	अदा, उ.प.
९८	दुहँ प्रपूरणे	अदा, उ.प.
९९	नह् णहँ बन्धने	दिवा, उ.प.
१००	मिह सेचने	भ्वादि, प.प.
१०१	रुह बीजजन्मनि प्रादुर्भावे च	भ्वादि, प.प.
१०२	लिहँ आस्वादने	अदा, उ.प.
१०३	वहँ प्रापणे	भ्वादि, उ.प.

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षि थ इति स्थिते आर्धधातुकस्येड् वलादेः इति सूत्रेण थलः इडागमः प्राप्तः। क्षिधातुः उपदेशे एकाच् अनुदात्तश्च। (एकाच् अजन्तः प्रथमकारिकायां नास्ति चेद् अनुदात्तः इति सुबोधः नियमः स्मर्तव्यः।) अतः प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः प्राप्तः। तदा -

[१७.८] कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि॥ (७.२.१३)

सूत्रार्थः - क्रादिभ्य एव लिट इण्न स्याद् अन्यस्माद् अनिटोऽपि स्यात्।

सूत्रव्याख्या - नियमसूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। कृसृभृवृस्तुद्रुस्रुश्रुवः लिटि इति सूत्रगतपदच्छेदः। कृसृभृवृस्तुद्रुस्रुश्रुवः (५/१), लिटि (७/१)। नेड्वशि कृति इति सूत्रात् न इति अव्ययमनुवर्तते। आर्धधातुकलिटः इडागमः अत्र भवति। अतः लिटि इत्यस्य लिटः इति षष्ठ्यन्ततया विपरिणामो भवति। सूत्रार्थो भवति - कृ सृ भृ वृ स्तु द्रु स्रु श्रु एभ्यः लिटः इट् न भवति।

अस्मिन् सूत्रे अनुबन्धरहितः कृ डुकृञ् करणे, कृञ् हिंसायाम् इति द्वयोः ग्राहकः।

सृ इत्यनेन सृ गतौ इति धातुः गृह्यते। भृ इति निरनुबन्धकपाठात् भृञ् भरणे डुभृञ् धारणपोषणयोः इति द्वयोः ग्रहणम्। वृ इति निरनुबन्धकपाठेन वृङ सम्भक्तौ वृञ् वारणे इति द्वौ गृह्येते। स्तु इत्यनेन ष्टुञ् स्तुतौ इति धातुः गृह्यते। द्रु स्रु गतौ इति गृह्येते। श्रु श्रवणे गृह्यते।

कथं नियमसूत्रत्वम् - अत्र कृ सृ भृ इति त्रयः एकाचः अनुदात्ताः च। अतः त्रिभ्यः एकाच उपदेशेनुदात्तात् इत्यनेन इडागमो न भवति। वृ धातोश्च (श् र् युकः) श्रयुकः क्किति (श्रिञः एकाच उगन्ताच्च गित्किितोः प्रत्यययोः इट् न) उगन्तत्वात् थलश्च कित्त्वात् इट् न प्राप्नोति। एवमेतेभ्यः चतुर्भ्यः तु क्रादिसूत्रं विनापि इट् नैव भवति। चतुर्भ्यः इडागमस्य निषेधः सिद्धः अस्ति। सिद्धे सति पुनः निषेधाय

सूत्रम् आरब्धम्। अतः तत् नियमाय कल्पते। एवम् तेषामत्र उपादानम् नियमार्थं सिद्ध्यति। सिद्धे सति आरम्भो नियमार्थः। स्तु द्रु स्रु श्रु आदिभ्यः थलः भारद्वाजनियमेन पाक्षिक इट् प्राप्नोति। परन्तु तेभ्यः इट् नैव भवतु इति अत्र सूत्रे उपादानम् कृतम्। एवञ्च पर्यालोचनया सूत्रार्थो भवति - कृ सृ भृ वृ स्तु द्रु स्रु श्रु एभ्यः एव लिटः इट् न भवति, अन्येभ्यः लिटः इट् भवति। अतः अन्येभ्यः एकाच उपदेशेऽनुदात्तात् इत्यनेन इडागमनिषेधः प्राप्तः आसीत्। परन्तु अनेन सूत्रेण तेभ्यः इडागमः पुनः भवति। अनेन सूत्रेण कृतः नियमः क्रादिनियमः इति कथ्यते।

आर्धधातुकस्येड्वलादेः इति सूत्रेण अविशेषेण समेषाम् वलादीनाम् आर्धधातुकानाम् इट् विधीयते। एकाच उपदेशे अनुदात्तात् इति सूत्रेण उपदेशे एकाच्कात् अनुदात्तात् परस्य इट् निषिध्यते अविशिषेण। अत्र येभ्यः निषेधः जातः तेषु क्रादीन् विहाय अन्येभ्यः पुनः इडागमः क्रादिनियमेन भवति। तथा च कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रुवो लिटि इति अनेन क्रादिभ्यः अष्टभ्य एव लिटि इट् निषिध्यते। अन्येभ्यः अनिड्भ्यः अपि इट् विधीयते। अनिटाम् इदं पुनः सेट्त्वं केवलं लिटि एव।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षि थ इति स्थिते आर्धधातुकस्येड् वलादेः इति सूत्रेण थलः इडागमः प्राप्तः। प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः प्राप्तः एवञ्च क्षिधातुः क्रादिषु नास्ति। अतः क्रादिनियमेन क्षिधातोः लिटः थलः पुनः इडागमः प्राप्तः। तदा -

[१७.९] अचस्तास्वत् थल्यनिटो नित्यम्॥ (७.२.६१)

सूत्रार्थः - उपदेशेऽजन्तो यो धातुः तासौ नित्यानिट् ततः थल इट् न।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण इट् निषिध्यते। अस्मिन् सूत्रे पञ्च पदानि सन्ति। अचः तास्वत् थलि अनिटः नित्यम् इति सूत्रगतपदच्छेदः। अचः (५/१), तास्वत् इत्यव्ययम्। थलि (७/१), अनिटः (५/१), नित्यम् इति क्रियाविशेषणम् अव्ययम्। उपदेशेऽत्वतः इति सूत्रात् उपदेशे (७/१) इति पदमनुवर्तते। तासि च क्लृपः इति सूत्रात् तासि (७/१) इति पदमनुवर्तते। गमेरिट् परस्मैपदेषु इति सूत्रात् इट् (१/१) इति पदमनुवर्तते। न वृद्भ्यश्चतुर्भ्यः इति सूत्रात् न इत्यव्ययम् अनुवर्तते। धातोः एव थल् विधीयते। अतः धातोः (५/१) इत्यस्य आक्षेपः क्रियते। तासौ इव तास्वत् इति सप्तम्यन्तात् वतिप्रत्ययः। पदयोजना - उपदेशे अचः धातोः तासि नित्यम् अनिटः तास्वत् थलि इट् न। अचः धातोः इत्यत्र अचः इति धातोः इत्यस्य विशेषणम्। अतः तदन्तविधिना अजन्ताद् धातोः इति लभ्यते। सूत्रार्थो भवति - उपदेशे यो धातुः अजन्तः, स तासौ नित्यम् अनिट् चेत् यथा तासि इडागमः न भवति तथा तस्मात् धातोः थलः इट् न कर्तव्यः। अर्थात् यः धातुः उपदेशे अजन्तः, तस्मात् धातोः तासः यदि नित्यम् इट् न तर्हि थलः अपि इट् न भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्रादिनियमेन क्षिधातोः लिटः थलः पुनः इडागमः प्राप्तः। क्षिधातुः उपदेशे अजन्तः। एवञ्च एकाच उपदेशेऽनुदात्तात् इति सूत्रेण तस्मात् परस्य तासः नित्यम् इडागमः न भवति। अतः स तासि नित्यम् अनिट्। अतः अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्रेण क्षिधातोः थलः इडागमस्य निषेधः प्राप्तः। (यद्यपि अग्रिमसूत्रम् क्षिधातौ नावश्यकम्। तथापि प्रकरणवशाद् अत्रैव उपन्यस्तम्।) तदा - (भारद्वाजनियमः द्रष्टव्यः।)

[१७.१०] उपदेशेऽत्वतः॥ (७.२.६२)

सूत्रार्थः - उपदेशे अकारवतः तासौ नित्यानिटः परस्य थल इट् न स्यात्।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण इट् निषिध्यते। अस्मिन् सूत्रे द्वे पदे स्तः। उपदेशे अत्वतः इति सूत्रगतपदच्छेदः। उपदेशे (७/१), अत्वतः (५/१)। अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्राद् तास्वत् इत्यव्ययम्, थलि (७/१), अनिटः (५/१), नित्यम् इति क्रियाविशेषणम् अव्ययम्। तासि च क्लृपः इति सूत्रात् तासि (७/१) इति पदमनुवर्तते। गमेरिट् परस्मैपदेषु इति सूत्रात् इट् (१/१) इति पदमनुवर्तते। न वृद्भ्यश्चतुर्भ्यः इति सूत्रात् न इत्यव्ययम् अनुवर्तते। धातोः एव थल् विधीयते। अतः धातोः (५/१) इत्यस्य आक्षेपः क्रियते। अत् अस्ति अस्मिन्निति अत्वान्, तस्य अत्वतः। ह्रस्वाकारवान् धातुः इति यावत्। तासौ इव तास्वत् इति सप्तम्यन्तात् वतिप्रत्ययः। पदयोजना - उपदेशे अत्वतः धातोः तासि नित्यम् अनिटः तास्वत् थलि इट् न। सूत्रार्थो भवति - उपदेशे यो धातुः अत्वान् , स तासौ नित्यम् अनिट् चेत् यथा तासि इडागमः न भवति तथा तस्मात् धातोः थलः इट् न कर्तव्यः। अर्थात् यः धातुः उपदेशे अत्वान्, तस्मात् धातोः तासः यदि नित्यम् इट् न तर्हि थलः अपि इट् न भवति।

उदाहरणम् - पच् शक् इत्यादिः अत्वान् धातुः। तेषाम् पपक्थ शशक्थ इत्यादीनि रूपाणि भवन्ति।

[१७.११] ऋतो भारद्वाजस्य॥ (७.२.६३)

सूत्रार्थः - तासौ नित्यानिटः ऋदन्तादेव थलो नेट् भारद्वाजस्य मते। तेन अन्यस्य स्यादेव।

सूत्रव्याख्या - नियमसूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। ऋतः भारद्वाजस्य इति सूत्रगतपदच्छेदः। ऋतः (५/१), भारद्वाजस्य (६/१)। अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्राद् तास्वत् इत्यव्ययम्, थलि (७/१), अनिटः (५/१), नित्यम् इति क्रियाविशेषणम् अव्ययम्। तासि च क्लृपः इति सूत्रात् तासि (७/१) इति पदमनुवर्तते। गमेरिट् परस्मैपदेषु इति सूत्रात् इट् (१/१) इति पदमनुवर्तते। न वृद्भ्यश्चतुर्भ्यः इति सूत्रात् न इत्यव्ययम् अनुवर्तते। धातोः एव थल् विधीयते। अतः धातोः (५/१) इत्यस्य आक्षेपः क्रियते। तासौ इव तास्वत् इति सप्तम्यन्तात् वतिप्रत्ययः। पदयोजना - उपदेशे ऋतः धातोः तासि नित्यम् अनिटः तास्वत् थलि इट् न। ऋतः धातोः इत्यत्र ऋतः इति धातोः इत्यस्य विशेषणम्। अतः तदन्तविधिना ऋदन्ताद् धातोः इति लभ्यते। सूत्रार्थो भवति - उपदेशे यो धातुः ऋदन्तः, स तासौ नित्यम् अनिट् चेत् यथा तासि इडागमः न भवति तथा तस्मात् धातोः थलः इट् न कर्तव्यः। अर्थात् यः धातुः उपदेशे ऋदन्तः, तस्मात् धातोः तासः यदि नित्यम् इट् न तर्हि थलः अपि इट् न भवति।

तत्रायं समुदितः अर्थः -

अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्रेण तासि नित्यानिटः अजन्तात् धातोः परस्य थलः इट् निषिध्यते। तेन तु ऋदन्तात् धातोः अपि इट् निषिध्यते एव। एवम् इटः निषेधः सिद्ध एव। सिद्धे

सत्यपि सूत्रारम्भः कृतः। सिद्धे सति आरम्भः नियमाय कल्पते इति नियमः। अतः इदं नियमसूत्रम् इति आयाति। तेन नियमः भवति यद् भारद्वाजस्य मतेन यदि तासौ नित्यानिटः धातोः इडागमस्य निषेधः तर्हि स ऋदन्ताद् एव धातोः भवति, अन्येभ्यः इडागमस्य निषेधः न भवति। अर्थात् तेभ्यः इडागमः भवति। भारद्वाजभिन्नाः पाणिन्यादिमुनिमतेन अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति द्वाभ्याम् सूत्राभ्याम् इट् निषिध्यते। ऋदन्तात् निषिध्यते एव। परन्तु भारद्वाजस्य मतं यद् ऋदन्ताद् एव अयं इटः निषेधः भवतु, अन्यत्र इडागमः भवतु। तर्हि अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति अत्र इडागमविषये मतद्वयम् अस्ति, एकेन मतेन निषेधः, अपरेण मतेन प्राप्तिः। इत्थं विकल्पः फलति। यतो मतद्वयमपि प्रमाणम्। तेन ऋदन्तात् इडागमनिषेधः सर्वमतेन। अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति उभयत्र विकल्पः। अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति ऋतो भारद्वाजस्य इति त्रीणि अपि सूत्राणि थलः इडागमविषयकाणि एव।

इडागमविषये उक्तार्थं संगृह्णाति इयं कारिका -

अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेडयम्।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्।

उदाहरणे सूत्रार्थसमन्वयः - अचस्तास्वत् थल्यनिटो नित्यम् इति पूर्वसूत्रोक्तप्रकारेण क्षिधातुः उपदेशे अजन्तः। एवञ्च एकाच उपदेशेऽनुदात्तात् इति सूत्रेण तस्मात् परस्य तासः नित्यम् इडागमः न भवति। अतः स तासि नित्यम् अनिट्। अतः अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्रेण क्षिधातोः थलः इडागमस्य निषेधः प्राप्तः। तदा भारद्वाजनियमेन क्षिधातोः थलः विकल्पेन इडागमः भवति। तेन इडागमपक्षे - क्षि इथ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि इथ इति स्थिते गुणे अयादेशे **चिक्षयिथ** इति रूपं सिध्यति। इडभावपक्षे तु क्षि थ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि थ इति स्थिते गुणे **चिक्षेथ** इति रूपं सिध्यति।

चिक्षियथुः - क्षिधातोः लिटि मध्यमपुरुषद्विवचने थस्-प्रत्यये तस्य अथुसादेशे क्षि अथुस् इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि अथुस् इति जायते। ततश्च इकारस्य इयङ् इत्यादेशे रुत्वे विसर्गे **चिक्षियथुः** इति रूपं सिध्यति।

चिक्षिय - क्षिधातोः लिटि मध्यमपुरुषबहुवचने थ-प्रत्यये तस्य अ-आदेशे क्षि अ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि अ इति जायते। ततश्च इकारस्य इयङ् इत्यादेशे **चिक्षिय** इति रूपं सिध्यति।

चिक्षाय, चिक्षय - क्षिधातोः लिटि उत्तमपुरुषैकवचने मिप्-प्रत्यये तस्य णलादेशे अनुबन्धलोपे क्षि अ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि अ इति जायते। णलः णित्त्वात् अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य वृद्धिः प्राप्ता। तदा -

[१७.१२] णलुत्तमो वा॥ (७.१.९१)

सूत्रार्थः - उत्तमो णल् वा णित् स्यात्।

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अनेन सूत्रेण णित्त्वं विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। णल् उत्तमः वा इति सूत्रगतपदच्छेदः। णल् (१/१), उत्तमः (१/१), वा इत्यव्ययपदम्। गोतो णित् इति सूत्राद् णित् (१/१) इति पदमनुवर्तते। सूत्रार्थो भवति - उत्तमः णल् विकल्पेन णित् भवति। अर्थात् उत्तमसंज्ञकस्य णलः विकल्पेन णित्त्वं भवति। णित् विकल्पेन भवति इत्यस्य तात्पर्यं यद् पक्षे णकारस्य इत्संज्ञा भवति, अपरपक्षे तु णकारः नास्ति एव इति। तेन न णित्त्वम् इति।

उदाहरणम् - चिक्षाय, चिक्षय।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षिधातोः णलि चिक्षि अ इति जाते अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य वृद्धिः प्राप्ता। परन्तु यस्मिन् पक्षे णल् णित् गण्यते तदा वृद्धिः भवति, इकारस्य स्थाने च स्थानत आन्तर्याद् ऐकारो भवति। तदा चिक्षै अ इति जाते एचोऽयवायावः इति सूत्रेण आयादेशे **चिक्षाय** इति रूपं सिध्यति। यस्मिन् पक्षे णल् णित् नास्ति तदा तु सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य गुणे इकारस्य एकारे चिक्षे अ इति जाते एचोऽयवायावः इति सूत्रेण अयादेशे **चिक्षय** इति च रूपं सिध्यति।

चिक्षियिव - क्षिधातोः लिटि उत्तमपुरुषद्विवचने वस्-प्रत्यये तस्य व-आदेशे क्षि व इति स्थिते वसादेशस्य व इत्यस्य आर्धधातुकत्वात् वलादित्त्वाच्च आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति सूत्रेण तस्य निषेधः भवति। तदा कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि इति क्रादिनियमेन पुनः इडागमो भवति। तेन क्षि इव इति जाते द्वित्वे अभ्यासकार्ये चिक्षि इव इति जायते। सार्वधातुकार्धधातुकयोः इत्यनेन इकः इकारस्य स्थाने गुणे प्राप्ते असंयोगाल्लिट् कित् इत्यनेन लिटः अपिल्लिटः कित्त्वातिदेशात् क्ङिति च इत्यनेन इग्लक्षणगुणस्य निषेधे इकारस्य इयङ् इत्यादेशे **चिक्षियिव** इति रूपं सिध्यति।

चिक्षियिम - क्षिधातोः लिटि उत्तमपुरुषबहुवचने पूर्वोक्तप्रकारणे **चिक्षियिम** इति रूपं सिध्यति।

क्षि+लिट्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चिक्षाय	चिक्षियतुः	चिक्षियुः
मध्यमपुरुषः	चिक्षयिथ चिक्षेथ	चिक्षियथुः	चिक्षिय
उत्तमपुरुषः	चिक्षाय चिक्षय	चिक्षियिव	चिक्षियिम

पाठगतप्रश्नाः-२

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१०. एकाच उपदेशेऽनुदात्तात् इति सूत्रस्यार्थं लिखत।

११. किंलक्षणाद् धातोः परस्यार्धधातुकस्य इट् न भवति।

१२. ऊदृदन्तैर्यौति ... इति कारिकास्थाः धातवः अनुदात्ताः न वा।

१३. कति हलन्ताः धातवः अनुदात्ताः।

१४. क्रादिनियमः कः।

१५. उपदेशेऽत्वतः इति सूत्रस्यार्थं लिखत।

१६. भारद्वाजमते कस्य इड् नैव भवति।

१७. णलुत्तमो वा इति सूत्रेण किं क्रियते।

१८. क्षिधातोः लिटि मिपि कति रूपाणि कानि च तानि।

१९. चिक्षिय इति रूपे धातोः परं कः तिङ् प्रत्ययः।

१) तिप् २) सिप् ३) थस् ४) थ

२०. चिक्षाय चिक्षय इति रूपयोः कः लकारः, कश्च तिङ् प्रत्ययः।

१) लिट् सिप् २) लुट् मिप् ३) लिट् मिप् ४) लुङ् थ

पाठसारः

अस्मिन् पाठे लिट्-लकारस्य कानिचन मुख्यानि सूत्राणि आलोचितानि। लिट्-लकारे गणीयविकरणं किमपि नास्ति। स्वकीयमपि किमपि विकरणं नास्ति। धातोः द्वित्वम् इत्येव लिटः प्रधानं वैशिष्ट्यम्। एत्वम् अभ्यासलोपः इति अपरं वैशिष्ट्यम्। इडागमव्यवस्था इति अन्यतमम् ईषत् क्लिष्टं प्रकरणम्।

पूर्वपाठेषु भूधातोः लिटि रूपाणि अतिक्रान्तानि। तानि साधयितुम् यावन्ति सूत्राणि अभीष्टानि आसन् तानि तत्रैव उपन्यस्तानि। अत्र अस्मिन् पाठे मुख्यत्वेन इडागमव्यवस्था उक्ता।

अभ्यासस्य आदिः यदि अत् स्यात् तर्हि तस्य दीर्घः अत आदेः इति सूत्रेण भवति। अचो ञ्णिति इति सूत्रेण यथा अजन्ताङ्गस्य वृद्धिः विधीयते तथा उपधायाः अतः वृद्धिः ञिति णिति च अत उपधायाः इति सूत्रेण विधीयते। अचो ञ्णिति इति अत उपाधायाः इति सूत्रद्वयम् एकदलीयम्।

इकः इति षष्ठ्यन्तम् पदम् आनीय यत्र गुणः वृद्धिर्वा विधीयते स गुणः इग्लक्षणगुणः कथ्यते, वृद्धिश्च इग्लक्षणवृद्धिः कथ्यते। क्ङिति च इति सूत्रं किति गिति ङिति च प्रत्यये परे इग्लक्षणगुणस्य इग्लक्षणवृद्धेश्च निषेधं करोति। अतः पाणिनिमुनिः क्वचित् प्रत्ययस्य स्वकीयं कित्त्वं गित्त्वं ङित्त्वं च करोति, क्वचित् अतिदिशति। स्वकीयं कित्त्वं यथा क्तप्रत्ययः, क्तवतुप्रत्ययः यक् प्रत्ययः इत्यादिषु।

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

असंयोगात् परः यः अपित् लिट् तस्य कित्त्वं विधीयते असंयोगाल्लिट् किट् इति सूत्रेण। क्वचित्तु कित्त्वस्य ङित्त्वस्य लाभाय यत् अपित्त्वं तदेव अतिदिशति यथा - सेर्ह्यपिच्च इत्यत्र, आडुत्तमस्य पिच्च इति। लिटि कित्त्वातिदेशस्य इदं सूत्रं यथा तथा सार्वधातुकमपित् इति सूत्रम् अपितः सार्वधातुकस्य ङिद्वत्त्वं विदधाति। अत एव तत्र तत्र स्थलेषु पाणिनिः प्रत्ययं पितम् अपितं वा करोति।

धातोः परं तिङ् कृत् इति द्विविधः एव प्रत्ययः विधीयते। उभयत्र इडागमः सति प्रसङ्गे भवति। तत्र वलादेः आर्धधातुकस्य इट् आर्धधातुकस्येड् वलादेः इति सूत्रेण अविशेषेण तिङि कृति च विधीयते। तत्र यस्य धातोः एकाच्त्वे सति अनुदात्तत्वम् अस्ति तस्मात् धातोः परस्य वलादेः आर्धधातुकस्य इडागमो न भवति। तत्र निषेधकं सूत्रं हि एकाच उपदेशेऽनुदात्तात्। अनेन धातोः परस्य विहितस्य तिङ्-प्रत्ययस्य कृत्-प्रत्ययस्य च इट् निषिध्यते। यस्मात् धातोः परस्य इट् न भवति स धातुः अनिट् कथ्यते। यस्मात् धातोः परस्य इट् भवति स धातुः सेट् कथ्यते। यस्माद् धातोः परस्य इट् विकल्पेन भवति स धातुः वेट् कथ्यते।

एवम् एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः कृतः। लिटि लकारे क्रादिभ्यः एव अष्टभ्यः धातुभ्यः एव अयं निषेधः प्रवर्तते। अन्येभ्यः धातुभ्यः इडागमः भवति। अर्थात् लिल्लकारं विहाय अन्यत्र तेभ्यो धातुभ्यः इडागमः न भवति किन्तु लिटि तु भवति।

तत्र थलि विशेषो वर्तते। येभ्यः धातुभ्यः तास्-प्रत्ययस्य नित्यम् इट् न भवति तेषु ऋदन्तादेव धातोः थलः इट् न भवति, अन्यः यः अजन्तः अकारवान् वा धातुः स्यात् तस्मात् विकल्पेन इट् भवति। अर्थात् अजन्तः अकारवान् वा धातुः यदि तासि नित्यम् अनिट् तर्हि थलि वेट् भवति। ऋदन्तधातुस्तु यदि तासि नित्यम् अनिट् तर्हि थलि अपि अनिट् एव भवति। लिटि थलम् विहाय अन्यत्र क्रादिभिन्नाः सेटः भवन्ति। एवमयमिडाशयः।

पाठान्तप्रश्नाः

१. अचो ञ्णिति इति सूत्रं व्याख्यात।

२. कुहोश्चुः इति सूत्रं व्याख्यात।

३. ससूत्रं रूपाणि साधयत – आत, आतुः, चिक्षाय, चिक्षियतुः, चिक्षयिथ, चिक्षेथः।

४. एकाच उपदेशेऽनुदात्तात् इति सूत्रं व्याख्यात।

५. भारद्वाजनियमं विवृणुत।

६. णलुत्तमो वा इति सूत्रं व्याख्यात।

७. ससूत्रं रूपाणि साधयत – चिक्षेथ, चिक्षयिथ, चिक्षाय, चिक्षय, चिक्षिय।

पाठगतप्रश्नानाम् उत्तरमाला

उत्तराणि- १

१. अभ्यासस्यादेरतो दीर्घः अत आदेः इति सूत्रेण।

२. अतति इत्यत्रत्यस्य अत्-धातोरर्थः सातत्यगमनम्।

३. अत उपधायाः।

४. द्वित्वनिमित्तेऽचि अच आदेशो न द्वित्वे कर्तव्ये।

५. कुहोश्चुः।

६. अचो ञ्णिति।

७. चिक्षियतुः इति रूपे आर्धधातुकनिबन्धनगुणस्य अभावस्य कारणं हि असंयोगाल्लिट् कित् इति सूत्रेण अतुसः कित्त्वं विधीयते।

८. चिक्षियतुः इति रूपे अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रेण इकारस्य स्थाने इयङ् इत्यादेशे कृते यकारः आगतः।

९. २

उत्तराणि- २

१०. उपदेशे यो धातुः एकाच् अनुदात्तश्च तत आर्धधातुकस्य इट् न भवति।

११. उपदेशे यो धातुः एकाच् अनुदात्तश्च तत आर्धधातुकस्य इट् न भवति।

१२. न।

१३. १०३

१४. क्रादिभ्य एव लिट इण्न भवति अन्यस्माद् अनिटोऽपि इडागमः भवतीति क्रादिनियमः।।

१५. उपदेशे अकारवतः तासौ नित्यानिटः परस्य थल इट् न स्यात्।

१६. तासौ नित्यानिटः ऋदन्तादेव थल इट् नैव भवति भारद्वाजस्य मते।

१७. णलुत्तमो वा इति सूत्रेण उत्तमस्य णलः णित्त्वम् अतिदिश्यते।

१८. क्षिधातोः लिटि मिपि चिक्षाय चिक्षय इति द्वे रूपे।

१९. ४

२०. ३

॥ इत् सप्तदशः पाठः ॥

ΩΩΩ

346sk18

१८

भ्वादिप्रकरणे - लिट्-लकारस्य सूत्रशेषः

प्रस्तावना

तिङन्तप्रकरणे भूधातुं प्रस्तूय लकारशः सूत्राणि उपस्थाप्यन्ते। तत्र लिटि लकारे इडागमव्यवस्था अन्यतमः मुख्यो विषयः। स पूर्वपाठे सविस्तरं प्रपञ्चितः। लिटि लकारे अवशिष्टानि कानिचन सूत्राणि अस्मिन् पाठे समावेशितानि सन्ति। केषांचिद् धातूनाम् अभ्यासलोपः, अकारस्य एत्वं च भवतीति एको विषयोऽत्र।

मूलधातुतः अपरं प्रत्ययं विधाय सनाद्यन्ता धातव इति सूत्रेण समुदायस्य धातुसंज्ञा भवति। ते च सनादयः द्वादश। एवञ्च यदि धातुः अनेकाच् भवति तर्हि लिटि तस्माद् धातोः कृ भू अस् इति त्रयाणां धातूनाम् अनुप्रयोगः भवति। अतः अनुप्रयोगः इति लिल्लकारे अपरं वैशिष्ट्यम्। एवञ्चान्यानि अपि कानिचन सूत्राणि यानि अग्रिमेषु प्रकरणेषु उपयोक्ष्यन्ते तानि अपि अस्मिन् पाठे अन्तर्भावितानि।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य लिटि मुख्यानि सूत्राणि बुध्यात्।
- विभिन्नानां धातूनां लिटि रूपाणि साधयितुं सामर्थ्यम् अर्जयेत्।
- विविधानि सूत्राणि व्याख्यातुम् समर्थो भवेत्।
- पूर्वपाठेषु कृतानां सार्वधातुकम् आर्धधातुकं संज्ञानां रूपेषु प्रभवं जानीयात्।
- भूधातुरूपाणि साधयित्वा अवशिष्टानि बहुषु लकारे एवञ्च विशिष्य लिटि प्रयुक्तानि सूत्राणि अत्र ज्ञास्यति।
- रहस्यमयम् इडागमप्रकरणम् अस्मिन् पाठे पठिष्यति।

[१८.१] अत एकहल्मध्येऽनादेशादेर्लिटि॥ (६.४.१२०)

सूत्रार्थः - लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्य असंयुक्तहल्मध्यस्थस्य अतः एत्वम् अभ्यासलोपश्च किति लिटि।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अभ्यासलोपः अत एत्वं च विधीयेते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। अतः एकहल्मध्ये अनादेशादेः लिटि इति सूत्रगतपदच्छेदः। अतः (६/१), एकहल्मध्ये (७/१), अनादेशादेः (६/१), लिटि (७/१)। अङ्गस्य (६/१) इत्यधिकृतम्। घ्वसोरेद्धावभ्यासलोपश्च इति सूत्रात् एत् (१/१), अभ्यासलोपः (१/१), च इत्यव्ययम् इति त्रीणि पदानि अनुवर्तन्ते। गमहनजनखनघसां लोपः क्ङित्यनङि इति सूत्रात् किति (७/१) इति पदमायाति। नास्ति आदेशः आदिः यस्य तद् अनादेशादि अङ्गम्, तस्य अनादेशादेः इति बहुव्रीहिसमासः। एकयोः हलोः मध्ये इति एकहल्मध्ये इति षष्ठीतत्पुरुषः समासः। अत्र लिटि इति पदम् आवर्तते। तेन लिटि लिटि इति लभ्यते। पदयोजना - लिटि अनादेशादेः अङ्गस्य एकहल्मध्ये अतः एत् अभ्यासलोपः च किति लिटि। सूत्रार्थो भवति - लिटि परतः यस्य आदेः न कोपि आदेशः जातः तस्य अङ्गस्य अवयवः अत् यदि एकहल्मध्ये, असंयुक्तहल्मध्ये यदि स्यात् तर्हि अतः एकारादेशो भवति, अभ्यासस्य लोपश्च भवति किति लिटि परतः। असंयोगाल्लिट् कित् इति सूत्रेण असंयोगात् परः अपित् लिट् कित् भवति।

अभ्यासलोपः अतः एत्वम् इति कार्यद्वयम् अनेन सूत्रेण भवति। अङ्गस्य अतः पूर्वं परं वा यदि संयोगः न स्यात् तर्हि तस्य अतः भवति। लिटं निमित्तीकृत्य अङ्गस्य आदेशः यदि न स्यात्। लिटि परतः यानि कार्याणि भवन्ति तेषु हलादिः शेषः इति अत्र गण्यते। एवञ्च अभ्यासे चर्च इत्यनेन यदि आदेशे सत्यपि वैरूप्यं न भवति तर्हि स आदेशः न गण्यते। यथा तप् धातोः अभ्यासे तप् तप् इति स्थितौ अभ्यासे चर्च इति सूत्रेण अभ्यासस्य तकारस्य तकार एव विधीयते। तेन रूपस्य वैरूप्यम् अर्थात् रूपविकारः न भवति। अतः ईदृशः आदेशः अत्र न आदेशः।

उदाहरणम् - नेदतुः। नेदुः।

सूत्रार्थसमन्वयः - णद अव्यक्ते शब्दे इति णोपदेशस्य धातोः धात्वादेः णो नः इति सूत्रेण नकारे नद् इति जायते। ततश्च लिटि तिपि णलि नद् अ इति स्थिते द्वित्वे अभ्यासकार्ये च ननद् अ इति स्थिते अत उपधायाः इति वृद्धौ ननाद इति रूपं सिध्यति।

प्रथमपुरुषद्विवचनस्य तस्-प्रत्यये तस्य स्थाने अतुसि च नद् अतुस् इति स्थितिः। द्वित्वे च नद् नद् अतुस् इति अभ्याससंज्ञायां हलादिशेषे च न नद् अ इति स्थितिः। अत्र लिटं निमित्तीकृत्य कोऽपि आदेशः न जातः। अनभ्यासस्य नद् इत्यस्य अत् असंयुक्तहल्मध्यस्थः। अर्थात् तस्मात् पूर्वं परं च संयोगः नास्ति। अतः प्रकृतसूत्रेण अभ्यासलोपः अतः एत्वं च भवति। तेन नेद् अतुस् इति जाते रुत्वे विसर्गे च कृते **नेदतुः** इति रूपं सिध्यति। एवमन्येषु अपि।

एतस्य सूत्रस्य उदाहरणानि तथा धातुः यस्य हलादिशेषे शिष्टस्य वर्णस्य न कोऽपि आदेशो भवति, एवञ्च धातोः अत् अस्ति इति। यथा पठ् चर् चल् तप् तन् पत् नद् नम् जप् इत्यादयः।

[१८.२] थलि च सेटि॥ (६.४.१२१)

सूत्रार्थः - लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्य असंयुक्तहल्मध्यस्थस्य अतः एत्वम् अभ्यासलोपश्च सेटि थलि।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण एत्वम् अभ्यासलोपः विधीयेते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। थलि (७/१), च इत्यव्ययम्, सेटि (७/१)। अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रात् अतः (६/१), एकहल्मध्ये (७/१), अनादेशादेः (६/१), लिटि (७/१) इति पदानि अनुवर्तन्ते। अङ्गस्य (६/१) इत्यधिकृतम्। ध्वसोरेद्धावभ्यासलोपश्च इति सूत्रात् एत् (१/१), अभ्यासलोपः (१/१), च इत्यव्ययम् इति त्रीणि पदानि अनुवर्तन्ते। इटा सह वर्तते स सेट्, तस्मिन् सेटि। नास्ति आदेशः आदिः यस्य तद् अनादेशादि अङ्गम्, तस्य अनादेशादेः इति बहुव्रीहिसमासः। एकयोः हलोः मध्ये इति एकहल्मध्ये इति षष्ठीतत्पुरुषः समासः। पदयोजना - लिटि अनादेशादेः अङ्गस्य एकहल्मध्ये अतः एत् अभ्यासलोपः च सेटि थलि। सूत्रार्थो भवति - सेटि थलि परतः यस्य आदेः न कोपि आदेशः जातः तस्य अङ्गस्य अवयवः अत् यदि एकहल्मध्ये, असंयुक्तहल्मध्ये यदि स्यात् तर्हि अतः एकारादेशो भवति, अभ्यासस्य लोपश्च भवति सेटि थलि परतः। असंयोगाल्लिट् कित् इति सूत्रेण पित्त्वात् थल् कित् न भवति। अतः नूतनं सूत्रारब्धम्।

उदाहरणम् - नेदिथ।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण नद्-धातोः लिटि सिपि थलि इडागमे द्वित्वे अभ्यासकार्ये च न नद् इथ इति स्थितिः। अनेन सूत्रेण एत्वे अभ्यासलोपे च कृते नेद् इथ इति जाते **नेदिथ** इति रूपं सिध्यति।

पाठगतप्रश्नाः-१

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१. नेद इति रूपे एकारः केन सूत्रेण।

२. नेदिथ इति रूपे एकारः केन सूत्रेण।

३. थलि च सेटि इति सूत्रस्यार्थं लिखत।

४. नेदिथ इत्यत्र कः लकारः, कश्च तिङ्।

१) लिट् थस् २) लट् थ ३) लिट् सिप् ४) लट् थस्

[१८.३] गुपूधूपविच्छिपणिपनिभ्य आयः॥ (३.१.२८)

सूत्रार्थः - गुपूधूपविच्छिपणिपनिभ्य आयः प्रत्ययः स्यात् स्वार्थे॥

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण आयप्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। गुपूधूपविच्छिपणिपनिभ्यः (५/३), आयः (१/१)। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः (५/१) इति पदमायाति। तस्य पञ्चमीबहुवचनान्ततया विपरिणामः भवति। प्रत्ययः (३.१.१), परश्च (३.१.२) सूत्रद्वयम् अत्र अधिकृतम्। गुपूः च धूपः च विच्छिः च पणिः च पनिः च इति गुपूधूपविच्छिपणिपनयः। तेभ्यः गुपूधूपविच्छिपणिपनिभ्यः इति इतरेतरयोगद्वन्द्वसमासः। सूत्रमिदं प्रत्ययाधिकारे पठितम्। तस्मात् आय इति प्रत्ययः। पदयोजना - गुपूधूपविच्छिपणिपनिभ्यः धातुभ्यः आयः प्रत्ययः परः। सूत्रार्थो भवति - गुपूधूपविच्छिपणिपनिभ्यः धातुभ्यः परः आयः प्रत्ययः भवति। आयप्रत्ययः अदन्तः। धातोः विहितः तिङ्भिन्नः शिद्भिन्नः च। अतः आर्धधातुकं शेषः इति सूत्रेण तस्य आर्धधातुकसंज्ञा भवति।

अस्य प्रत्ययस्य अत्र कोऽपि अर्थः न निर्दिष्टः। अतः अयम् अनिदिर्ष्टार्थः प्रत्ययः। अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति इति नियमः। तेन आयप्रत्ययः स्वार्थे भवति, अर्थात् तस्य या प्रकृतिः तदर्थे भवति। अत्र गुप्-धातुतः आयः विहितः चेत् तस्य प्रकृतिः गुप्-धातुः। अतः योऽर्थः गुप्-धातोः तस्मिन्नेवार्थे आयप्रत्ययोऽपि।

सूत्रे गुपूँ रक्षणे - गोपायति (भ्वादिः, प.प.)। धूप सन्तापे - धूपायति (भ्वादिः, प.प.)। विच्छ गतौ विच्छायति (तुदा, प.प.)। पण व्यवहारे स्तुतौ च (भ्वादि, आ.प.), अत्र स्तुत्यर्थकः एव ग्राह्यः, पणायते इति रूपम्। पन स्तुतौ (भ्वादि, आ.प.)।

उदाहरणम् - गोपायति।

सूत्रार्थसमन्वयः - गुपू रक्षणे रक्षणार्थकाद् ऊदितः गुप्-धातोः गुपूधूपविच्छिपणिपनिभ्य आयः इति सूत्रेण स्वार्थे आयप्रत्यये गुप् आय इति स्थितिः जायते। तत्र आयप्रत्ययः धातोः विहितः तिङ्भिन्नः शिद्भिन्नः च। अतः आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञः। पुगन्तलघूपधस्य च इति सूत्रेण गकारोत्तरस्य उकारस्य गुणे स्थानत आन्तर्याद् ओकारे गोप् आय इति वर्णमेलने गोपाय इति शब्दस्वरूपं लभ्यते। आयप्रत्ययः सनादिषु अन्यतमः। स च अन्ते अस्ति गोपाय इति समुदायस्य। अतः सनाद्यन्ता धातव इति सूत्रेण गोपाय इति समुदायस्य धातुसंज्ञा भवति।

ततश्च वर्तमाने लट् इति लटि तिपि शपि गोपाय अ ति इति जाते अतो गुणे इत्यनेन अकाराकारयोः पररूपैकादेशे गोपायति इति रूपं सिध्यति। अन्येषु रूपेषु कोऽपि विशेषो नास्ति।

गुप्-धातोः लटि रूपाणि - गोपायति गोपायतः गोपायन्ति। गोपायसि गोपायथः गोपायथ। गोपायामि गोपायावः गोपायामः।

[१८.४] आयादय आर्धधातुके वा॥ (३.१.३१)

सूत्रार्थः - आर्धधातुकविवक्षायाम् आयादयो वा स्युः।

भ्वादिप्रकरणे - लिट्-लकारस्य सूत्रशेषः

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विकल्पेन आयप्रत्ययो विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। आयादयः आर्धधातुके वा इति सूत्रगतपदच्छेदः। आयादयः (१/३), आर्धधातुके (७/१), वा इत्यव्ययम्। आयः आदिः येषां ते आयादयः इति बहुव्रीहिसमासः। आय ईयङ् णिच् एते त्रयः आयादयः सन्ति। प्रत्ययाधिकारे सूत्रमिदं पठितम्। अतः प्रत्ययः इति पदमायाति किञ्च प्रत्यये इति सप्तम्यन्ततया विपरिणमते। सूत्रार्थो भवति - आर्धधातुकप्रत्ययविवक्षायाम् आयादयः प्रत्ययाः विकल्पेन भवन्ति।

आयविधानात् पूर्वम् आर्धधातुकस्य विधानं न भवति। आर्धधातुकं विना आर्धधातुके परे आयविधानं तु वदतो व्याघातः। अतः अत्र आर्धधातुके इति न परसप्तमी, सा विषयसप्तमी। तेन अग्रे आर्धधातुको विधेयः इति विवक्षा चेत् आयादयः विकल्पेन भवन्ति इति अर्थः फलति।

उदाहरणे सूत्रार्थसमन्वयः - गुप्-धातोः अनद्यनभूतपरोक्षार्थवृत्तित्वविवक्षायां परोक्षे लिट् इति सूत्रेण लिट् विधास्यते। लिट् च इति सूत्रेण लिडादेशः तिङ् आर्धधातुकसंज्ञकः अस्ति। अतः गुप्-धातोः आर्धधातुकविधानस्य विवक्षा अस्ति। अतः आयादय आर्धधातुके वा इति प्रकृतसूत्रेण विकल्पेन आयप्रत्यये गुप् आय इति जायते। तत्र आयप्रत्ययस्य आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञा भवति। पुगन्तलघूपधस्य च इति सूत्रेण गकारोत्तरस्य उकारस्य गुणे स्थानत आन्तर्याद् ओकारे गोप् आय इति वर्णमेलने गोपाय इति शब्दस्वरूपं लभ्यते। आयस्य सनादिषु पाठात् गोपाय इति समुदायस्य सनाद्यन्तत्वात् च सनाद्यन्ता धातव इति सूत्रेण गोपाय इति समुदायस्य धातुसंज्ञा भवति।

ततश्च परोक्षे लिट् इति सूत्रेण गोपाय इति धातुतः लिटि गोपाय लिट् इति स्थितिः जाता। तदा -

कास्यनेकाच आम् वक्तव्यः॥ (वार्तिकम्)

वार्तिकार्थः - कास्-धातोः अनेकाच्-धातोः च आम्-प्रत्ययः भवति लिटि परे।

वार्तिकव्याख्या - अनेन वार्तिकेन कास्-धातोः परम् अनेकाच्-धातोः परं च आम् प्रत्ययः विधीयते यदि तेभ्यः लिट् परः स्यात्। आम् मान्तः अस्ति। यदि हलन्त्यम् इति सूत्रेण तस्य इत्संज्ञा स्यात् तर्हि आम् मित् स्यात्। तेन मिदचोऽन्त्यात् परः इति वार्तिकेन सः अन्त्यात् अचः परः स्यात्। तदा कास् इत्यत्र आकारात् परः स्यात्। तेन का आ स् इति जायेत। तत्र अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घैकादेशे कास् इत्येव लभ्येत। मूलधातुरपि कास् , आम्-विधानोत्तरम् अपि कास् एव। तेन न कोऽपि लाभः। अतः उच्यते यत् अत्र आमः मस्य इत्त्वं न भवति। तेन स मिदचोऽन्त्यात् परः इति परिभाषा न प्रवर्तते। तथाहि पङ्क्तिः - लिटि आस्कासोराम्विधानान्मस्य नेत्त्वम्।

उदाहरणम् - पूर्वसूत्रोक्तप्रकारेण गोपाय लिट् इति स्थितिः। तत्र गोपाय इति अनेकाच् धातुः। ततश्च लिडपि अस्ति। अतः प्रकृतवार्तिकेन आम्-प्रत्यये गोपाय आम् लिट् इति जायते। तदा -

[१८.५] अतो लोपः॥ (६.४.४८)

सूत्रार्थः - आर्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्धधातुके॥

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अतो लोपो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अतः लोपः इति पदच्छेदः। अतः (६/१), लोपः (१/१)। अङ्गस्य (६/१) इति अधिकृतम्। अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति इति सूत्रात् उपदेश इति अनुवर्त्य तस्य सप्तम्यन्ततया विपरिणामः क्रियते। आर्धधातुके (७/१) इति अधिकृतम्। तस्य द्विः आवृत्तिः क्रियते। तेन आर्धधातुके आर्धधातुके इति लभ्यते। सूत्रार्थो भवति - यदा आर्धधातुकस्य उपदेशः क्रियते अर्थात् विधीयते तदा अदन्तस्य अङ्गस्य लोपः भवति यदि अङ्गात् परम् आर्धधातुकं स्यात्। अलोऽन्त्यस्य इति परिभाषया अङ्गस्य अन्त्यस्य अलः अतः एव लोपः भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्ववार्तिकोक्तप्रकारेण गोपाय आम् लिट् इति स्थितिः। अत्र आम् आर्धधातुकम् उपदिश्यते विधीयते। तदा गोपाय इति अदन्तम् अङ्गमस्ति। तस्मादङ्गात् परे लिट् इति आर्धधातुकमस्ति। अतः अतो लोपः इति सूत्रेण अङ्गस्य अन्त्यस्य अलः अतः लोपे गोपाय् आम् लिट् इति स्थितिः जायते। ततश्च गोपायाम् लिट् इति लभ्यते। तदा -

(कृते अकृते च अतो लोपे गोपायाम् इत्येव लभ्यते। अतः अत्र अतो लोपस्य फलं स्पष्टं नास्ति। अन्येषु उदाहरणेषु फलमस्ति।)

[१८.६] आमः॥ (२.४.८१)

सूत्रार्थः - आमः परस्य लुक्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण आमः लुक् विधीयते। अस्मिन् सूत्रे आमः (५/१) इति एकं पदम्। ण्यक्षत्रियार्ष-ञितो यूनि लुगणिञोः इति सूत्राद् लुक् इति प्रथमान्तं पदमनुवर्तते। सूत्रार्थो भवति - आमः परस्य लुक् भवति। प्रत्ययस्य लुक्-श्लु-लुपः इत्यनेन प्रत्ययस्य अदर्शनस्य लुक् इति संज्ञा भवति।

उदाहरणम् - गोपायाम्।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण गोपायाम् लिट् इति स्थितिः। तत्र आमः इति प्रकृतसूत्रेण आमः परस्य लिटः लुकि गोपायाम् इति लभ्यते। लिट् कृदतिङ् इति कृत्संज्ञकः अस्ति। गोपायाम् इत्यस्मात् लिटः लुकि प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रेण प्रत्ययलक्षणं कृत्वा गोपायाम् इति कृदन्तम् अस्ति। तस्य च कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततश्च स्वौजसमौट्° इति सूत्रेण सुबुत्पत्तौ गोपायाम् सु इति स्थिते आमः इति सूत्रेण सोर्लुकि गोपायाम् इति अवशिष्यते। अस्य च पुनः प्रत्ययलक्षणं कृत्वा सुबन्तत्वम्। अतः सुप्तिङन्तं पदमित्यनेन पदसंज्ञापि सिध्यति। गोपायाम् इत्यवस्थायाम् -

[१८.७] कृञ् चानुप्रयुज्यते लिटि॥ (३.१.४०)

सूत्रार्थः - आमन्तात् लिट्पराः कृभ्वस्तयः अनुप्रयुज्यन्ते।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण कृ भू अस् एतेषाम् अनुप्रयोगः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। कृञ् च अनुप्रयुज्यते लिटि इति सूत्रगतपदच्छेदः। कृञ् (१/१), च इत्यव्ययपदम्, अनुप्रयुज्यते इति तिङन्तं पदम्, लिटि (७/१)। कास्प्रत्ययाद् आम् अमन्त्रे लिटि इति सूत्राद् आम् (१/१) इति पदमनुवर्तते। तस्य च आमः इति पञ्चम्यन्ततया विपरिणामः भवति। पदयोजना - आमः कृञ् च अनुप्रयुज्यते लिटि।

आमः प्रत्ययत्वात् प्रत्ययग्रहणे तदन्ता ग्राह्या इति परिभाषया आमन्तात् इति लभ्यते। कृञ् अत्र प्रत्याहारः। अष्टाध्याय्याम् कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इति सूत्रस्थः कृ, कृञो द्वितीयतृतीयशम्बबीजात् कृषौ इति सूत्रस्थेन ञकारेण कृञ् इति भवति। कृञ् इति प्रत्याहारे कृञ् भू अस् ति त्रयो धातवः। सूत्रार्थो भवति - आमन्तात् लिट्पराः कृ भू अस् एते अनुप्रयुज्यन्ते। अर्थात् आमन्तात् लिट्परः कृधातुः, लिट्परः भूधातुः, लिट्परः अस्-धातुश्च प्रयुज्यते। अयम् अनुप्रयोगः कथ्यते।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण गोपायाम् इति स्थितिः। गोपायाम् आमन्तः शब्दः। तस्मात् अनेन सूत्रेण लिट्परः कृञ् अनुप्रयुक्तः चेत् गोपायाम् कृ लिट् इति स्थितिः जायते। गोपायाम् इति शब्दात् तु लिटः लुक् जातः। अत्र पुनः कृधातोः परं लिट् आगतः।

प्रथमपुरुषैकवचनविवक्षायाम् लिटः स्थाने तिपि तस्य णलि च गोपायाम् कृ अ इति स्थितिः जायते। द्वित्वे गोपायाम् कृ कृ अ इति जायते। तदा -

[१८.८] उरत्॥ (७.४.६६)

सूत्रार्थः - अभ्यासऋवर्णस्य अत् स्यात् प्रत्यये।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अभ्यासऋकारस्य अत् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। उः अत् इति पदच्छेदः। उः (६/१), ऋकारस्य इयं षष्ठी, अत् (१/१)। लोपोऽभ्यासस्य इति सूत्रात् अभ्यासस्य (६/१) इति पदमायाति। अत्र अङ्गस्य इति अधिकृतम्। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। पदयोजना - अङ्गस्य अभ्यासस्य उः अत् प्रत्यये। सूत्रार्थो भवति - अभ्यासस्य ऋवर्णस्य स्थाने अत् भवति प्रत्यये परे। ऋवर्णस्य स्थाने उरण् रपरः इति सूत्रेण रपरः सन्नेव प्रवर्तते। अतः अर् आदेशः भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण गोपायाम् कृ कृ अ इति स्थितिः। तत्र णलि प्रत्यये परे कृ इत्यभ्यासस्य ऋकारस्य स्थाने उरत् इति सूत्रेण अत् इत्यादेशे उरण् रपरः इत्यनेन रपरत्वे गोपायाम् कर् कृ अ इति स्थिते हलादिः शेषः इत्यनेन आदेः हलः शेषे गोपायाम् क कृ अ इति जायते। तत्र अभ्यासककारस्य कुहोश्चु इत्यनेन चुत्वे गुणकृदान्तर्यात् चकारे च कृते गोपायाम् च कृ अ इति जायते। णलो णित्त्वात् अचो ञ्णिति इति सूत्रेण वृद्धौ आकारे उरण् रपरः इत्यनेन रपरत्वे गोपायाम् च

कार् अ इति स्थिते वर्णमेलने गोपायाम् चकार इति लभ्यते। गोपायाम् इत्यस्य पदत्वात् मस्य पदान्तत्वात् हलि परतः मोऽनुस्वारः इति सूत्रेण अनुस्वारे **गोपायांचकार** इति रूपं सिध्यति। तत्रापि वा पदान्तस्य इत्यनेन अनुस्वारस्य विकल्पेन परसवर्णे ञकारे कृते **गोपायाञ्चकार** इत्यपि रूपं सिध्यति।

गोपायांचक्रतुः - लिटि प्रथमपुरुषद्विवचनविवक्षायाम् पूर्ववत् गोपायाम् कृ अतुस् इति स्थिते द्वित्वं परत्वात् प्रबाध्य इको यणचि इत्यनेन यणि प्राप्ते द्विर्वचनेऽचि इति सूत्रेण अच आदेशनिषेधे ततः द्वित्वे अभ्यासकार्ये च गोपायाम् चकृ अतुस् इति स्थिते इको यणचि इत्यनेन यणि सस्य रुत्वे विसर्गे च कृते गोपायाम् चक्रतुः इति जाते मस्य अनुस्वारे विकल्पेन परसवर्णे च कृते **गोपायांचक्रतुः गोपायाञ्चक्रतुः** च इति रूपे सिध्यतः।

गोपायांचक्रुः - प्रथमपुरुषबहुवचनविवक्षायाम् उस्-प्रत्यये पूर्ववत् प्रक्रियया **गोपायांचक्रुः गोपायाञ्चक्रुः** इति रूपे सिध्यतः।

गोपायांचकर्थ - मध्यमपुरुषैकवचनविवक्षायां लिटः सिपि तस्य थलि च गोपायाम् कृ थ इति स्थिते आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमः प्राप्तः। कृधातोः उपदेशे एकाच्त्वात् अनुदात्तत्वाच्च एकाच उपदेशेऽनुदात्तात् इति सूत्रेण इडागमस्य निषेधो भवति। ततः द्वित्वे अभ्यासकार्ये च गोपायाम् चकृ थ इति स्थिते सार्वधातुकार्धधातुकयोः इत्यनेन गुणे उरण् रपरः इत्यनेन रपरत्वे च गोपायाम् चकर्थ इति लभ्यते। तत्र मस्य अनुस्वारे विकल्पेन परसवर्णे च कृते **गोपायांचकर्थ, गोपायाञ्चकर्थ** इति रूपे सिध्यतः।

गोपायांचक्रथुः - लिटि मध्यमपुरुषद्विवचनविवक्षायाम् पूर्ववत् गोपायाम् कृ अथुस् इति स्थिते द्वित्वे अभ्यासकार्ये च गोपायाम् चकृ अथुस् इति स्थिते इको यणचि इत्यनेन यणि सस्य रुत्वे विसर्गे च कृते गोपायाम् चक्रथुः इति जाते मस्य अनुस्वारे विकल्पेन परसवर्णे च कृते **गोपायांचक्रथुः गोपायाञ्चक्रथुः** च इति रूपे सिध्यतः।

गोपायांचक्र - मध्यमपुरुषबहुवचनविवक्षायाम् अ-प्रत्यये पूर्ववत् प्रक्रियया **गोपायांचक्र गोपायाञ्चक्र** इति रूपे सिध्यतः।

गोपायांचकार - उत्तमपुरुषैकवचनविवक्षायाम् मिपि तस्य णलि पूर्ववत् प्रक्रियया गोपायाम् चकृ अ इति स्थिते णलुत्तमो वा इति सूत्रेण विकल्पेन णित्त्वात् अचो ञ्णिति इत्यनेन णित्त्वपक्षे वृद्धौ रपरत्वे च **गोपायांचकार** इति रूपं सिध्यति। णित्त्वाभावपक्षे सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणे रपरत्वे **गोपायांचकर** इति रूपं सिध्यति।

गोपायांचकृव गोपायांचकृम – उत्तमस्य द्विवचने बहुवचने च पूर्ववत् प्रक्रियया गोपायां कृ व इत्यादिस्थिते असंयोगाल्लिट् कित् इत्यनेन द्विबहुवचनयोः कित्त्वात् क्ङिति चेति गुणनिषेधे **गोपायांचकृव गोपायांचकृम** इति रूपे सिध्यतः। विकल्पेन अनुस्वारस्य परसवर्णे इतोऽपि **गोपायाञ्चकृव गोपायाञ्चकृम** इति द्वे रूपे सिध्यतः।

अस्-धातोः अनुप्रयोगः - अस्-धातोः अनुप्रयोगे गोपायाम् अस् अ इति स्थिते अस्-धातोः द्वित्वे हलादिशेषे अ अस् अ इति स्थिते अत आदेः इत्यनेन आदेः अतः दीर्घे आ अस् अ इति स्थिते

अकः सवर्णे दीर्घः इत्यनेन आकाराकारयोः दीर्घैकादेशे आस इति लभ्यते। इत्थम् अस्-धातोः अनुप्रयोगे रूपाणि -

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	गोपायामास	गोपायामासतुः	गोपायामासुः
मध्यमपुरुषः	गोपायामासिथ	गोपायामासथुः	गोपायामास
उत्तमपुरुषः	गोपायामास	गोपायामासिव	गोपायामासिम

भू-धातोः अनुप्रयोगः - भू-धातोः अनुप्रयोगे च भूधातोः यथा साधितानि रूपाणि भवन्ति।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	गोपायांबभूव, गोपायाम्बभूव	गोपायांबभूवतुः, गोपायाम्बभूवतुः	गोपायांबभूवुः, गोपायाम्बभूवुः
मध्यमपुरुषः	गोपायांबभूविथ, गोपायाम्बभूविथ	गोपायांबभूवतुः, गोपायाम्बभूवतुः	गोपायांबभूव, गोपायाम्बभूव
उत्तमपुरुषः	गोपायांबभूव, गोपायाम्बभूव	गोपायांबभूविव , गोपायाम्बभूविव	गोपायांबभूविम, गोपायाम्बभूविम

आयाभावपक्षे गुप्-धातोः रूपाणि -

गुप्-धातोः आयपक्षे रूपाणि प्रदर्शितानि। आयाभावपक्षे च प्रदर्श्यन्ते।

जुगोप - गुप्-धातोः आयादय आर्धधातुके वा इति सूत्रेण विकल्पेन आयविधाने आयाभावपक्षे गुप् लिट् इति जाते लिटः तिपि णलि गुप् अ इति जायते। द्वित्वे गुप् गुप् अ इति जाते अभ्याससंज्ञायाम् हलादेः शेषे कुहोश्चुः इत्यनेन गकारस्य जकारे जु गुप् अ इति जायते। पुगन्तलघूपधस्य च इति सूत्रेण लघूपधगुणे **जुगोप** इति रूपं सिध्यति। द्विवचने बहुवचने असंयोगाल्लिट् कित् इत्यनेन लिटः कित्त्वात् क्क्ङिति च इत्यनेन गुणनिषेधो भवति। अन्यानि पूर्ववत् कार्याणि भवन्ति। द्विवचने **जुगुपतुः**, बहुवचने **जुगुपुः** इति रूपे सिध्यतः।

गुप्-धातोः मध्यमपुरुषैकवचनविवक्षायां लिटि सिपि थलि गुप् थ इति जाते आर्धधातुकस्येड् वलादेः इत्यनेन थलः इडागमः प्राप्तः। (गुप्-धातोः अननुदात्तत्वात् इडागमस्य निषेधो न भवति।) तदा -

[१८.९] स्वरतिसूतिसूयतिधूञूदितो वा॥ (७.२.४४)

सूत्रार्थः - स्वरत्यादेः ऊदितश्च परस्य वलादेरार्धधातुकस्य इट् वा स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विकल्पेन इड् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। स्वरतिसूतिसूयतिधूञूदितः वा इति पदच्छेदः। स्वरतिसूतिसूयतिधूञूदितः (५/१), वा इत्यव्ययम्। आर्धधातुकस्येड् वलादेः इति समग्रं सूत्रमनुवर्तते। ऊत् इति यस्य स ऊदित्। स्वरतिः च सूतिः च सूयतिः च धूञ् च ऊदित् च इति स्वरतिसूतिसूयतिधूञूदित् इति समाहारद्वन्द्वसमासः। तस्मात् स्वरतिसूतिसूयतिधूञूदितः इति। सूत्रार्थो भवति - स्वरतिसूतिसूयतिधूञूदिद्भ्यः धातुभ्यः वलादेः आर्धधातुकस्य विकल्पेन इट् भवति।

स्वरति - स्वृ शब्दोपतापयोः (भ्वादि, प.प.)। सूति - षूङ् प्राणिगर्भविमोचने (अदा, आ.प.)। सूयति - षूङ् प्राणिप्रसवे (दिवा, आ.प.)। धूञ् - धूञ् कम्पने (स्वादि, क्र्यादि, उ.प.)। ऊदित् - गुपूँ गाहूँ प्रभृतयः धातवः गृह्यन्ते।

उदाहरणम् - जुगोपिथ। जुगोप्थ।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण लिटि गुप् थ इति जाते आर्धधातुकस्येड् वलादेः इत्यनेन थलः इडागमः प्राप्तः। तत्राधुना प्रकृतसूत्रेण विकल्पेन इडागमः विधीयते। इडागमपक्षे तु गुप् इथ इति जाते द्वित्वे अभ्यासकार्ये जुगुप् इथ इति स्थितिः जायते। लघूपधगुणे कृते **जुगोपिथ** इति रूपं सिध्यति। इडभावपक्षे तु गुप् थ इति स्थिते द्वित्वे अभ्यासकार्ये लघूपधगुणे च **जुगोप्थ** इति रूपं जायते। उत्तमपुरुषस्य वसि मसि च प्रत्ययेऽपि विकल्पेन इडागमे जुगुपिव जुगुप्व, जुगुपिम जुगुप्म इति रूपाणि सिध्यानि। अन्यानि रूपाणि पूर्ववद् बोध्यानि।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	जुगोप	जुगुपतुः	जुगुपुः
मध्यमपुरुषः	जुगोपिथ जुगोप्थ	जुगुपथुः	जुगुप
उत्तमपुरुषः	जुगोप	जुगुपिव जुगुप्व	जुगुपिम जुगुप्म

पाठगतप्रश्नाः-२

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

५. गोपायति इति रूपे आयप्रत्ययः केन सूत्रेण।

६. गोपायति इति रूपे कः सनाद्यन्तः धातुः।

७. गोपायति इति रूपे भूवादयो धातव इत्यनेन कस्य धातुसंज्ञा।

८. आयादयः विकल्पेन कुत्र विधीयन्ते।

भ्वादिप्रकरणे - लिट्-लकारस्य सूत्रशेषः

९. कास्यनेकाच आम् वक्तव्यः इति विहितस्य आमः मकारः इत्संज्ञको न वा।

१०. गोपायाम् इतीह आम्विधानं केन।

११. अतो लोप इति सूत्रस्य वृत्तिं लिखत।

१२. कृञः अनुप्रयोगः केन सूत्रेण।

१३. गोपायाम्बभूव इत्यत्र भूधातोः अनुप्रयोगः केन सूत्रेण।

१४. गुप्-धातोः लिट् किं रूपं नास्ति।

१) जुगोपिथ २) जुगुप्थ ३) जुगुप्म ४) जुगोप्थ

१५. गुप्-धातोः लिट् किं रूपं नास्ति।

१) जुगोपिम २) जुगुप्व ३) जुगुप्म ४) जुगुपिम

[१८.१०] आदेच उपदेशेऽशिति॥ (६.१.४५)

सूत्रार्थः - उपदेशे एजन्तस्य धातोरात्वं न तु शिति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण आत् विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। आत् एचः उपदेशे अशिति इति पदच्छेदः। आत् (१/१), एचः (६/१), उपदेशे (७/१), अशिति (७/१)। लिटि धातोरनभ्यासस्य इति सूत्रात् धातोः (६/१) पदमायाति। श् इत् शित् इति कर्मधारयसमासः। न शित् अशित् , तस्मिन् अशिति इति नञ्-तत्पुरुषः समासः। अत्र प्रसज्यप्रतिषेधः अस्ति। तेन शिति न इति लभ्यते। धातोः इत्यनेन प्रत्यये इति आक्षिप्यते। शिति प्रत्यये न इत्यत्र तदादिविधिना इत्संज्ञकशकारादौ प्रत्यये परे न इति लभ्यते। आत् इति तपरकरणम्। केवलम् आ एव शिष्यते। एचः धातोः इत्यत्र एचः इति धातोः विशेषणम्। अतः तदन्तविधिना एजन्तस्य धातोः इति लभ्यते। सूत्रार्थो भवति - उपदेशे यो धातुः एजन्तः तस्य आत् , तस्य स्थाने आत् आदेशः भवति, परन्तु इत्संज्ञकशकारादौ प्रत्यये परतः न भवति। अलोऽन्त्यस्य इति परिभाषया आदेशः अन्त्यस्य अलः स्थाने भवति।

उदाहरणम् - ग्लायति।

सूत्रार्थसमन्वयः - ग्लै हर्षक्षये इति धातोः लटि तिपि शपि शपः शित्त्वात् नात्र प्रकृतसूत्रस्य प्रवृत्तिः। ततश्च ग्लै अ ति इति स्थिते एचोऽयवायावः इत्यनेन आयादेशे ग्लायति इति रूपं सिध्यति।

ग्लै-धातोः लिटि तिपि णलि ग्लै अ इति स्थितिः। अत्र ग्लैधातोः परम् इत्संज्ञकशकारादिप्रत्ययः नास्ति। अतः प्रकृसूत्रेण ऐकारस्य आत् भवति। तदा ग्ला अ इति जायते। द्वित्वे अभ्यासकार्ये च जग्ला अ इति स्थितिः जायते। तदा -

[१८.११] आत औ णलः॥ (७.१.३४)

सूत्रार्थः - आदन्ताद् धातोः णलः औकारादेशः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण औकारादेशः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। आतः औ णलः इति सूत्रगतपदच्छेदः। आतः (५/१), औ (१/१), णलः (६/१)। अङ्गस्य इति अधिकृतमायाति। तच्च अङ्गात् इति पञ्चम्यन्ततया विपरिणमते। आतः अङ्गात् इत्यत्र आतः इति अङ्गात् इत्यस्य विशेषणम्। अतः तदन्तविधिना आदन्ताद् अङ्गात् इति लभ्यते। सूत्रार्थो भवति - आदन्ताद् अङ्गात् धातोः परस्य णलः औकारादेशः भवति। णलि परतः आदन्तम् अङ्गम् धातुरेव भवति। अतः आदन्ताद् धातोः इत्यपि वक्तुं शक्यते।

उदाहरणम् - जग्लौ।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण जग्ला अ इति स्थितिः। तत्र आदन्तः धातुः ग्ला अस्ति। अतः प्रकृतसूत्रेण णलः औकारादेशे जग्ला औ इति स्थिते वृद्धिरेचि इति सूत्रेण वृद्धौ जग्लौ इति रूपं सिध्यति।

[१८.१२] गमहनजनखनघसां लोपः क्ङित्यनङि॥ (६.४.९८)

सूत्रार्थः - गमहनजनखनघसामुपधाया लोपोऽजादौ क्ङिति न त्वङि।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण उपधालोपः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। गमहनजनखनघसाम् लोपः क्ङिति अनङि इति पदच्छेदः। गमहनजनखनघसाम् (६/३), लोपः (१/१), क्ङिति (७/१), अनङि (७/१)। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रात् अचि (७/१) पदमनुवर्तते। ऊदुपधाया गोह इति सूत्रात् उपाधायाः (६/१) पदमायाति। अङ्गस्य इति अधिकृतम्। तेन अङ्गाक्षिप्तम् प्रत्यये इति पदं लभ्यते। क् च ङ् च क्ङौ। क्ङौ इतौ यस्य स क्ङित्, तस्मिन् क्ङिति इति द्वन्द्वगर्भबहुव्रीहिसमासः। गमः च हनः च जनः च घनः च घस् च इति गमहनजनखनघसः, तेषाम् गमहनजनखनघसाम् इति इतरेतरयोगद्वन्द्वसमासः। गमः इत्यादौ मकारादकारः मुखसुखार्थः। पदयोजना - गमहनजनखनघसाम् उपधायाः लोपः क्ङिति अनङि अचि प्रत्यये। अचि प्रत्यये इत्यत्र तदादिविधिना अजादौ प्रत्यये इति लभ्यते। सूत्रार्थो भवति - गम् हन् जन् खन् घस् एषाम् उपधायाः लोपः भवति अजादौ अङ्-प्रत्ययभिन्ने किति ङिति च प्रत्यये परे।

उदाहरणम् - जग्मतुः।

सूत्रार्थसमन्वयः - गमॢ गतौ इति धातोः लिटि तिपि णलि गम् अ इति स्थिते द्वित्वे अभ्यासकार्ये जगम् अ इति स्थिते उपधावृद्धौ **जगाम** इति रूपं भवति।

गम्-धातोः लिटि तसि अतुसि गम् अतुस् इति स्थिते द्वित्वे अभ्यासकार्ये च जगम् अतुस् इति स्थितिः। अतुसः अपित्त्वात् असंयोगाल्लिट् कित् इत्यनेन कित्त्वं भवति। एवञ्च अङ्-भिन्नः अजादिरपि अतुस् प्रत्ययः। अतः प्रकृसूत्रेण उपधालोपे रुत्वे विसर्गे च **जग्मतुः** इति रूपं सिध्यति।

पाठगतप्रश्नाः-३

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१६. ग्लायति इति रूपे कः धातुः।

१७. जग्लौ इत्यत्र औकारः कथम्।

१८. जग्मतुः इत्यत्र उपधालोपः केन सूत्रेण।

१९. गम्-धातोः लिटि तसि किं रूपम्।

पाठसारः

अस्मिन् पाठे लिल्लकारस्य कानिचन सूत्राणि उपन्यस्तानि। तेषु अभ्यासलोपः अकारस्य एत्वम् इति कार्यस्य विधायकं सूत्रद्वयम्। अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रं किति लिटि प्रवर्तते। थलः कित्त्वाभावेन अस्य तत्र प्रवृत्तिः नास्ति। अतः थलि च सेटि इति सूत्रम् अवतारितम् पाणिनिमुनिना।

गुपूधूपविच्छिपणिपनिभ्य आयः इति सूत्रेण गुपू-आदिधातुभ्यः आयप्रत्ययः स्वार्थे विधीयते। तेन नूतनं शब्दस्वरूपं निष्पद्यते। तस्य सनाद्यन्ता धातव इति सूत्रेण धातुसंज्ञा भवति। ततश्च धातुसंज्ञाश्रितानि कार्याणि फलन्ति। यो धातुः अनेकाच् भवति तस्मात् आम् प्रत्ययः कास्यनेकाच आम् वक्तव्यः इति सूत्रेण विधीयते। आम् मित् नास्ति। इत्थम् लब्धात् आमन्तात् कृञ् चानुप्रयुज्यते लिटि इति सूत्रेण कृ भू अस् इति एते धातवः लिट्पराः अनुप्रयुज्यन्ते। ततश्च गोपायाञ्चकार गोपायामास गोपायाम्बभूव इत्यादीनि रूपाणि सिध्यन्ति।

आर्धधातुकस्य विकल्पेन इड्विधायकं सूत्रं तावत् स्वरतिसूतिसूयतिधूञूदितो वा इति।

उपदेशे यो धातुः एजन्तः तस्य एचः आकारः भवति यदि शित् प्रत्ययः परः न स्यात्। गमहनजनखनघसां लोपः क्ङित्यनङि इति सूत्रेण अजादौ अङ्भिन्ने किति ङिति च प्रत्यये परे गम् हन् जन् खन् घस् एषाम् उपधायाः लोपः भवति।

पाठान्तप्रश्नाः

१. अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रं व्याख्यात।

२. ससूत्रं रूपाणि साधयत – नेदतुः, नेदुः, नेदिथ, नेदिम।

३. कृञ् चानुप्रयुज्यते लिटि इति सूत्रं व्याख्यात।

४. आयादय आर्धधातुके वा इति सूत्रं व्याख्यात।

५. कास्यनेकाच आम् वक्तव्यः इति विहितस्य आमः मकारः इत्संज्ञक कुतो न।

६. ससूत्रं रूपाणि साधयत – गोपायति, गोपायामि, गोपायाञ्चकार, गोपायाम्बभूव, गोपायामास, जुगोप, जुगुपुः, जुगोपिथ।

७. आदेच उपदेशेऽशिति इति सूत्रं व्याख्यात।

८. ससूत्रं रूपाणि साधयत – जग्लौ, जग्मतुः, जगम, जगाम।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि- १

१. अत एकहल्मध्येऽनादेशादेर्लिटि।

२. थलि च सेटि।

३. लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्य असंयुक्तहल्मध्यस्थस्य अतः एत्वम् अभ्यासलोपश्च सेटि थलि।

४. ३

उत्तराणि- २

५. गुपूधूपविच्छिपणिपनिभ्य आयः।

६. गोपाय।

७. गुपू रक्षणे इत्यस्य।

८. आर्धधातुकविवक्षायाम् आयादयो विकल्पेन विधीयन्ते।

९. ५

१०. कास्यनेकाच आम् वक्तव्यः।

११. आर्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्धधातुके।

१२. कृञ् चानुप्रयुज्यते लिटि।

१३. कृञ् चानुप्रयुज्यते लिटि।

१४. २

१५. १

उत्तराणि- २

१६. ग्लै हर्षक्षये।

१७. आत औ णलः इति सूत्रेण णलः औकारः।

१८. गमहनजनखनघसां लोपः क्ङित्यनङि।

१९. जग्मतुः।

॥ इति अष्टदशः पाठः ॥

346sk19

१९

भ्वादिप्रकरणे - लिङ् लुङ् एतयोः सूत्रशेषः

प्रस्तावना

पूर्वपाठेषु भूधातुम् आदाय रूपाणि साधितानि। ततः धातुक्रमं त्यक्त्वा मुख्यप्रक्रियाम् अवलमब्य सूत्राणि प्रदर्शितानि। अस्मिन् पाठे लिङ्-लकारस्य उदाहरणमादाय अकृत्सार्वधातुकयोर्दीर्घः इति सूत्रम् उपन्यस्तम्। अस्य सूत्रेषु अत्रान्यत्र चापि प्रयोगबाहुल्यम् परिलक्ष्यते। अतः तत्सूत्रमत्र आनीतम्।

लुङ् लकारः सर्वविधभूतकालप्रदर्शनाय प्रयुज्यते। लुङि रूपाणि बहुविधानि भवन्ति। ईडागमः इडागमः सिचः लोपः इत्यादीनि कानिचन कार्याणि अत्र उपात्तानि। एवञ्च लुङि च्लि भवति। च्लेः सिच् अङ् चङ् इत्यादयः आदेशा भवन्ति। एवञ्च सिचि परस्मैपदे परतः वृद्धिः भवति। अस्मिन् पाठे इदं वृद्धिप्रकरणं मुख्यत्वेन उपन्यस्तमस्ति।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य लिङि लुङि च सूत्राणि बुध्यात्।
- लुङि कठिनानि धातुरूपाणि साधयितुं क्षमः भविष्यति।
- लुङ्लकारस्य सूत्राणि व्याख्यातुम् जानीयात्।
- लुङि वृद्धिप्रकरणस्य स्पष्टं ज्ञानं प्राप्स्यति।
- वृद्धिप्रकरणे बहूनां सूत्राणां बाध्यबाधकभावं च ज्ञास्यति।
- लुङ्लकारस्य रूपाणि व्यवहारे प्रयोक्तुं शक्तः भविष्यति।

लिङ्

[१९.१] अकृत्सार्वधातुकयोर्दीर्घः॥ (७.४.२५)

सूत्रार्थः - अजन्ताङ्गस्य दीर्घो यादौ प्रत्यये न तु कृत्सार्वधातुकयोः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अजन्ताङ्गस्य दीर्घो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अकृत्सार्वधातुकयोः दीर्घः इति सूत्रगतपदच्छेदः। अकृत्सार्वधातुकयोः (७/२), दीर्घः (१/१)। अयङ् यि क्ङिति इति सूत्रात् यि (७/१) इति पदमायाति। अङ्गस्य (६/१) इति अधिकृतम्। अस्मिन् सूत्रे स्थानी साक्षात् नोल्लिखितः। एवञ्च दीर्घः इति विधेयपरं शब्दम् उच्चार्य अच् विधीयते। अतः अचश्च इति परिभाषयाऽत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते। कृत् च सार्वधातुकं च कृत्सार्वधातुके इति इतरेतरयोगद्वन्द्वसमासः। न कृत्सार्वधातुके अकृत्सार्वधातुके, तयोः अकृत्सार्वधातुकयोः इति नञ्-तत्पुरुषः समासः। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। पदयोजना - अचः अङ्गस्य दीर्घः यि प्रत्यये अकृत्सार्वधातुकयोः।

अचः अङ्गस्य इत्यत्र अचः इति विशेषणम्। अतः तदन्तविधिना अजन्ताङ्गस्य इति लभ्यते। ततश्च अलोऽन्त्यस्य इति परिभाषया अजन्ताङ्गस्य अन्त्यस्य अलः स्थाने आदेशः भवति।

यि प्रत्यये इति पदद्वयमपि सप्तम्यन्तम्। अतः तदादिविधिः भवति। तेन यादौ प्रत्यये परे इति लभ्यते।

सूत्रार्थो भवति - अजन्ताङ्गस्य अन्त्यस्य दीर्घः भवति यादौ प्रत्यये परे। अयं दीर्घः कृत्प्रत्यये परे, सार्वधातुकप्रत्यये परे च न भवति।

उदाहरणम् - क्षीयात्।

सूत्रार्थसमन्वयः - क्षयार्थकात् क्षिधातोः आशिषि लिङ्लोटौ इति सूत्रेण आशिषि लिङि तिपि यासुडागमे इतश्च इति तिपः इकारलोपे च क्षि यास् त् इति स्थितिर्जायते। सार्वधातुकार्धधातुकयोः इत्यनेन इग्लक्षणे गुणे प्राप्ते किदाशिषि इत्यनेन कित्त्वात् क्ङिति च इति गुणनिषेधो भवति। तत्राधुना लिङाशिषि इत्यनेन आशिषि लिङः तिङ् आर्धधातुकसंज्ञकः भवति। यासुडागमसहितस्य एव तिपः प्रत्ययत्वात् यास्त् इति प्रत्ययः, स च यादिरपि अस्ति। अतः अकृत्सार्वधातुकयोर्दीर्घः इति प्रकृतसूत्रेण षकारोत्तस्य इकारस्य दीर्घे **क्षीयात्** इति रूपं सिध्यति।

आशीर्लिङि क्षिधातोः रूपाणि - क्षीयात् क्षीयास्ताम् क्षीयासुः। क्षीयाः क्षीयास्तम् क्षीयास्त। क्षीयासम् क्षीयास्व क्षीयास्म।

[१९.२] अस्तिसिचोऽपृक्ते॥ (७.३.९६)

सूत्रार्थः - विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण ईट् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अस्तिसिचः (५/१), अपृक्ते (७/१)। उतो वृद्धिर्लुकि हलि इति सूत्रात् हलि (७/१) इति पदमनुवर्तते। ब्रुव ईट् इति सूत्रात् ईट् (१/१) इति पदमायाति। अस्तिश्च सिच् च अस्तिसिचौ, तस्माद् अस्तिसिचः इति समाहारद्वन्द्वसमासः। अत्र अस्तिः इति इक्-श्तिपौ धातुनिर्देशे इत्यनेन अस भुवि इति अदादिगणीयधातोः निर्देशोऽस्ति। अपृक्त एकाल् प्रत्ययः इति सूत्रेण एकालात्मकस्य प्रत्ययस्य अपृक्तसंज्ञा विधीयते। सूत्रार्थो भवति - विद्यमानात् सिचः अस्तेः च परस्य अपृक्तस्य हलः ईडागमः भवति। टित्त्वाद् ईट् आद्यन्तौ टकितौ इति परिभाषया आद्यावयवः भवति।

अस्मिन् सूत्रे अस्तिसिचः इति पञ्चम्यन्तम् पदम्। अपृक्ते इति सप्तम्यन्तं पदम्। अतः परस्य कार्यं वा भवेत् पूर्वस्य वा इति अनियमः जायते। अनियमे नियमकारिणी अस्ति काचित् परिभाषा अत्र। उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इति सा परिभाषा। तदर्थो हि यथा प्रकृते पञ्चम्यन्तं पदम् सप्तम्यन्तं च पदमस्ति। अयमेव उभयनिर्देशः। तदा अनया परिभाषया पञ्चमीनिर्देशस्य बलीयस्त्वम् उच्यते। अर्थात् पञ्चमीनिर्दिष्टात् परस्य कार्यं भवतीति।

उदाहरणे सूत्रार्थसमन्वयः - अत्-धात्वर्थः व्यापारः भूतकालीनः इति विवक्षिते लुङ् इति सूत्रेण कर्तरि लुङि अत् ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायाम् तिपि अत् ति इति जायते। ततश्च इतश्च इत्यनेन तिपः इलोपे अत् त् इति स्थिते कर्तरि शप् इति सूत्रेण शपि प्राप्ते च्लि लुङि इति सूत्रेण च्लिप्रत्यये अत् च्लि त् इति जाते च्लेः सिच् इति सूत्रेण सिचि अत् स् त् इति जायते। ततश्च आडजादीनाम् इति सूत्रेण अङ्गस्य आडागमे आ अत् स् त् इति आटश्च इति सूत्रेण वृद्धौ आत् स् त् इति जायते। सिचः आर्धधातुकत्वात् वलादित्वात् च आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे आद्यावयवे आत् इस् त् इति स्थितिः जाता। अत्र तिपः तकारः एकाल् प्रत्ययश्च। अतः अपृक्तसंज्ञकः। एवञ्च स विद्यमानात् सिचः परः। अत एव प्रकृतसूत्रेण ईडागमे कृते अनुबन्धलोपे टित्त्वाद् आद्यावयवे आत् इस् ईत् इति स्थितिः जायते। तदा -

[१९.३] इट ईटि॥ (८.२.२८)

सूत्रार्थः - इटः परस्य सस्य लोपः स्याद् ईटि परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सलोपः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। इटः (५/१), ईटि (७/१)। रात्सस्य इति सूत्रात् सस्य (६/१) इति पदमायाति। संयोगान्तस्य लोपः इति सूत्रात् लोपः (१/१) पदमनुवर्तते। सूत्रार्थो भवति - इटः परस्य सस्य लोपः स्याद् ईटि परे। अर्थात् इट् ईट् इत्यनयोः मध्यगतस्य सकारस्य लोपः भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण आत् इस् ईत् इति स्थितौ इटः परः सकारः ईटि परतः अस्ति। अतः इट ईटि इति प्रकृतसूत्रेण सस्य लोपे आत् इ ईत् इति स्थितिः जायते। अत्र इकारात् परम् ईकारः अस्ति। तेन च अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घः कर्तव्यः अस्ति। परन्तु इट ईटि (८.२.२८) इति सूत्रम् असिद्धकाण्डीयमस्ति। तेन अकः सवर्णे दीर्घः इति सपादसप्ताध्यायीस्थं सूत्रम् प्रति इट ईटि इति सूत्रम् असिद्धम्। तेन सलोपं न पश्यति। अत **वार्तिकम् - सिज्लोप एकादेशे सिद्धो वाच्यः।** अर्थात् एकादेशः कर्तव्यः चेत् इट ईटि इति एवं सिचः लोपः सिद्धः इति मन्तव्यम्। एवम् आत् इ ईत् इति स्थितौ अकः सर्वणे दीर्घः इति सूत्रं प्रवर्तते। तेन पूर्वपरयोः इकार-ईकारयोः सवर्णदीर्घैकादेशे ईकारे **आतीत्** इति रूपं सिध्यति।

आतिष्टाम् - अत्-धातोः पूर्ववत् लुङि प्रथमपुरुषद्विचनविवक्षायां तस्-प्रत्यये तस्य तामादेशे च्लौ च्लेः सिचि इडागमे अङ्गस्य आडागमे वृद्धौ च आत् इस् ताम् इति स्थितिः भवति। तत्र आदेशप्रत्यययोः इति सूत्रेण इणः इकारात् परस्य अपदान्तस्य आदेशभूतस्य सकारस्य मूर्धन्यादेशे आत् इष् ताम् इति स्थिते ष्टुना ष्टुः इति सूत्रेण तकारस्य ष्टुत्वे टकारे आत् इष् टाम् इति जाते वर्णमेलने **आतिष्टाम्** इति रूपं सिध्यति।

आतिषुः - पूर्ववत् अत्-धातोः लुङि प्रथमपुरुषबहुवचनविवक्षायां झि-प्रत्यये, च्लौ च्लेः सिचि इडागमे अङ्गस्य आडागमे वृद्धौ च आत् इस् झि इति जायते। तदा -

[१९.४] सिजभ्यस्तविदिभ्यश्च॥ (३.४.१०९)

सूत्रार्थः - सिचोऽभ्यस्ताद् विदेश्च परस्य ङित्संबन्धिनो झेर्जुस्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण जुस् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। सिजभ्यस्तविदिभ्यः च इति पदच्छेदः। सिजभ्यस्तविदिभ्यः (५/३), च इत्यव्ययम्। नित्यं ङितः इति सूत्रात् ङितः (६/१) इति पदमनुवर्तते। लस्य (६/१) इति अधिकृतम्। झेर्जुस् इति समग्रं सूत्रमनुवर्तते। तत्र झेः (६/१), जुस् (१/१)। सिच् च अभ्यस्तं च विदिश्च सिजभ्यस्तविदयः, तेभ्यः सिजभ्यस्तविदिभ्यः इति इतरेतरयोगद्वन्द्वसमासः। सूत्रार्थो भवति - सिच् अभ्यस्तसंज्ञकम् विद्-धातुः च एभ्यः परस्य ङिद्-लकाराणां झेः जुस् आदेशः भवति।

विदधातुः धातुपाठे पञ्चसु स्थलेषु विद्यते। यथा -

१) विद ज्ञाने (अदादिः परस्मैपदी) वेत्ति वित्तः विदन्ति

२) विद सत्तायाम् (दिवादिः आत्मनेपदी) विद्यते विद्येते विद्यन्ते

३) विद विचारणे (रुधादिः आत्मनेपदी) विन्ते विन्दाते विन्दते

४) विदॢ लाभे (तुदादिः उभयपदी) विन्दति/ विन्दते

५) विद चेतनाख्यानविवासेषु (चुरादिः, आत्मनेपदी) वेदयते

एषु विद ज्ञाने इत्येव धातुः अत्र ग्राह्यः।

उदाहरणम् - आतिषुः।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण आत् इस् झि इति स्थितौ झिस्थाने सिजभ्यस्तविदिभ्यश्च इति सूत्रेण जुसादेशे अनेकाल्त्वात् सर्वादेशे अनुबन्धलोपे आत् इस् उस् इति स्थिते आदेशप्रत्यययोः इत्यनेन आदेशात्मकस्य सस्य मूर्धन्यादेशे आतिषुस् इति जाते सस्य रुत्वे विसर्गे च **आतिषुः** इति रूपं सिध्यति।

अत-धातोः अन्यानि रूपाणि स्वयमूह्यानि।

अत्-धातोः लुङि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

अत्+लुङ्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	आतीत्	आतिष्टाम्	आतिषुः
मध्यमपुरुषः	आतीः	आतिष्टम्	आतिष्ट
उत्तमपुरुषः	आतिषम्	आतिष्व	आतिष्म

पाठगतप्रश्नाः-१

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१. क्षीयात् इत्यत्र ईकारः दीर्घः केन सूत्रेण।

२. अस्तिसिचोऽपृक्ते इति सूत्रस्यार्थं लिखत।

३. इडीटोः मध्यपातिनः सिचः लुक् केन सूत्रेण।

४. अत्-धातोः लुङि तिपि अत् इ स् ईत् इति स्थिते सिज्लोपः केन सूत्रेण।

५. आतिषुः इत्यत्र झेर्जुस् केन सूत्रेण।

६. क्षीयात् इति कस्मिन् लकारे रूपम्।

१) विधिलिङ् २) लृट् ३) आशीर्लिङ् ४) लट्

७. अत्-धातोः लुङि इदं रूपं नास्ति।

१) आतिषुः २) आतीत् ३) आतीषुः ४) आतीः

८. कति विद्-धातवः सन्ति।

१) ३ २) ४ ३) ५ ४) ६

[१९.५] सिचि वृद्धिः परस्मैपदेषु॥ (७.२.१)

सूत्रार्थः - इगन्ताङ्गस्य वृद्धिः स्यात् परस्मैपदे सिचि।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण वृद्धिः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। सिचि (७/१), वृद्धिः (१/१), परस्मैपदेषु (७/३)। अङ्गस्य (६/१) इति अधिकृतम्। साक्षात् स्थानी न निर्दिष्टः किञ्च वृद्धिः इति विधेयपरं वृद्धिपदम् उच्चार्य वृद्धिः विधीयते। अतः इको गुणवृद्धी इति परिभाषया इकः इति षष्ठ्यन्तं पदमत्रोपस्थाप्यते। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। तस्य प्रत्ययेषु इति सप्तमीबहुवचनान्ततया विपरिणामः क्रियते। तदा पदयोजना भवति - इकः अङ्गस्य वृद्धिः सिचि परस्मैपदेषु प्रत्ययेषु इति।

अत्र इकः अङ्गस्य चेति समानविभक्तिकं पदद्वयम् अस्ति। अङ्गस्य इति पदं विशेष्यम् अस्ति, इकः इति पदम् तस्य विशेषणम् अस्ति। अतः येन विधिस्तदन्तस्य इत्यनेन तदन्तविधिना इगन्ताङ्गस्य इत्यर्थः लभ्यते। इगन्ताङ्गस्य इत्यत्र अल्समुदायबोधकात् स्थानषष्ठी श्रूयते। एवञ्च आदेशः वृद्धिः एकाल् अस्ति। अतः अलोऽन्त्यस्य इति परिभाषया इगन्ताङ्गस्य अन्त्यस्य इकः वृद्धिः भवति। ततश्च सूत्रार्थो भवति – परस्मैपदप्रत्यये परतः सिचि परे इगन्ताङ्गस्य अन्त्यस्य अलः स्थाने वृद्धिः स्यात् इति। अत्र इगन्ताङ्गस्य अन्त्यः अल् इक् एव। अतः इकः स्थाने एव वृद्धिः भवति। एवञ्च यदा इगन्ताङ्गम् + सिच् + परस्मैपदम् इति स्थितिः स्यात् तदा इगन्ताङ्गस्य वृद्धिः स्यात्।

उदाहरणे सूत्रार्थसमन्वयः - क्षयार्थकात् क्षिधातोः लुङि तिपि इतश्च इति इलोपे च्लिप्रत्यये च्लेः सिचि क्षि स् त् इति स्थितिर्जायते। ततश्च लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रेण अङ्गस्य अडागमे आर्धधातुकस्येड् वलादेः इत्यनेन सिचः इडागमे प्राप्ते क्षिधातोः उपदेशे अनुदात्तत्वात् एकाच उपदेशेऽनुदात्तात् इत्यनेन इडागमनिषेधे अक्षि स् त् इति स्थितिः जायते। अत्र विद्यमानात् सिचः परस्य अपृक्तस्य अस्तिसिचोऽपृक्ते इति सूत्रेण ईडागमे अक्षि स् ईत् इति स्थितिः जायते। तत्र सिचः आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन सूत्रेण इगन्ताङ्गस्य गुणः प्राप्तः। अत्र इगन्ताङ्गम् अक्षि, ततः सिच्, ततः परस्मैपदम् च अस्ति। अतः सिचि वृद्धिः परस्मैपदेषु इति सूत्रेण इगन्ताङ्गस्य अन्त्यस्य इकः इकारस्य वृद्धौ स्थानत आन्तर्याद् ऐकारे अक्षै स् ईत् इति स्थिते आदेशप्रत्यययोः इत्यनेन सस्य मूर्धन्यादेशे **अक्षैषीत्** इति रूपं सिध्यति।

क्षि-धातोः लुङि रूपाणि अधः चतुरश्रे प्रदर्शितानि -

क्षि+लुङ्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अक्षैषीत्	अक्षैष्टाम्	अक्षैषुः
मध्यमपुरुषः	अक्षैषीः	अक्षैष्टम्	अक्षैष्ट
उत्तमपुरुषः	अक्षैषम्	अक्षैष्व	अक्षैष्म

[१९.६] वदव्रजहलन्तस्याचः॥ (७.२.३)

सूत्रार्थः - वद-व्रज-हलन्तानाम् अचो वृद्धिः सिचि परस्मैपदेषु।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण वृद्धिः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। वद-व्रज-हलन्तस्य (६/१), अचः ६/१)। सिचि वृद्धिः परस्मैपदेषु इति सूत्रात् सिचि (७/१), वृद्धिः (१/१), परस्मैपदेषु (७/३) इति त्रीणि अपि पदानि अनुवर्तन्ते। अङ्गस्य (६/१) इति अधिकृतम्। वदश्च व्रजश्च हलन्तश्च वदव्रजहलन्तम् इति समाहारद्वन्द्वसमासः। तस्य वदव्रजहलन्तस्याचः इति। वद व्रज इत्यनयोः अन्त्यः अकारः मुखसुखार्थः। अङ्गाक्षिप्तम् प्रत्यये इत्यस्य प्रत्ययेषु इति सप्तमीबहुवचनान्ततया विपरिणामः भवति। सूत्रार्थो भवति - वदधातोः व्रजधातोः हलन्तस्य च अङ्गस्य अचः स्थाने वृद्धिः भवति सिचि परस्मैपदेषु प्रत्ययेषु। इयं वृद्धिः हलन्तलक्षणा वृद्धिः कथ्यते।

वदव्रजयोः सूत्रे उपादानस्य प्रयोजनम् - वस्तुतस्तु हलन्तस्य अचः वृद्धिः इत्यनेनैव वद् व्रज् इति अनयोः हलन्तधात्वोः अपि वृद्धिः स्यात्। अतः सूत्रे तयोः पृथक् ग्रहणस्य किं कारणम्। तत्रोच्यते - इयं वृद्धिः सिच् इडादिः अस्ति चेत्, इडादिः नास्ति चेदपि भवति। परन्तु अग्रे नेटि इति सूत्रेण इडादौ सिचि हलन्तस्य अचः वृद्धेः निषेधः भवति। वद् व्रज् द्वौ अपि सेटौ। अतः तत्र इडादिः सिच् लभ्यते। तेन नेटि इति सूत्रेण वृद्धिनिषेधः प्रसज्यते। परन्तु वद् व्रज् इत्यनयोः धात्वोः वृद्धिरेव इष्टा न तु वृद्धिनिषेधः। अतः सूत्रे द्वयोः विशेषतया ग्रहणं कृतं पाणिनिना। तेन च तयोः वृद्धिः निर्बाधा भवति। अतः वदव्रजयोः नेटि इत्यनेन वृद्धिनिषेधस्य वारणं तयोः उपादानस्य प्रयोजनम्।

--

कटँ वर्षावरणयोः। अस्य एकारः उपदेशेऽजनुनासिक इत् इत्यनेन इत्संज्ञकः अस्ति। अतः अयम् एदित् धातुः। कट् इति शिष्यते। तथापि मुखसुखार्थः अकारप्रश्लेषः क्रियते। तेन बहुत्र कट इति अकारान्तत्वेन प्रकटितो दृश्येत। कटति। चकाट। कटिता। कटिष्यति। कटतु। अकटत्। कटेत्। कट्यात्। इति पूर्वलकारेषु प्रतीकरूपाणि सन्ति।

उदाहरणे सूत्रार्थसमन्वयः - कट्-धातोः लुङि

वर्षावरणयोः विद्यमानाद् कट्-धातोः लुङि तिपि इतश्च इति इलोपे च्लिप्रत्यये च्लेः सिचि कट् स् त् इति स्थितिर्जायते। ततश्च लुङ्-लङ्-लृङ्क्ष्वडुदात्तः इति सूत्रेण अङ्गस्य अडागमे आर्धधातुकस्येड् वलादेः इत्यनेन सिचः इडागमे अकट् इस् त् इति स्थितिः जायते। अत्र विद्यमानात् सिचः परस्य अपृक्तस्य हलः तिपः तकारस्य अस्तिसिचोऽपृक्ते इति सूत्रेण ईडागमे अकट् इस् ईत् इति स्थितिः जायते। अत्र हलन्तम् अकट् इति, ततः इट्सहितः सिच्, ततः परस्मैपदम् च अस्ति। अतः वदव्रजहलन्तस्याचः इति सूत्रेण अचः ककारोत्तरस्य अकारस्य स्थाने वृद्धिः प्राप्ता। तदा -

[१९.७] नेटि॥ (७.२.४)

सूत्रार्थः - इडादौ सिचि हलन्तस्य वृद्धिर्न।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण वृद्धिः निषिध्यते। अस्मिन् सूत्रे द्वे पदे स्तः। न इत्यव्ययम्, इटि (७/१)। वदव्रजहलन्तस्याचः इति सूत्रात् हलन्तस्य (६/१) इति पदमायाति। सिचि वृद्धिः परस्मैपदेषु इति सूत्रात् सिचि (७/१), वृद्धिः (१/१), परस्मैपदेषु (७/३) इति त्रीणि अपि पदानि अनुवर्तन्ते। अङ्गस्य (६/१) इति अधिकृतम्। अङ्गाक्षिप्तम् प्रत्यये इत्यस्य प्रत्ययेषु इति सप्तमीबहुवचनान्ततया विपरिणामः भवति। पदयोजना - इटि सिचि परस्मैपदेषु प्रत्ययेषु हलन्तस्य अङ्गस्य वृद्धिः न। इटि सिचि इति सप्तम्यन्तं पदद्वयम्। एवञ्च इट् इति अल्बोधकात् शब्दात् सप्तमी श्रूयते। तेन तदादिविधिः भवति। एवञ्च इडादौ सिचि इत्यर्थो लभ्यते। ततश्च सूत्रार्थो भवति - इडादौ सिचि परस्मैपदेषु प्रत्ययेषु हलन्तस्य अङ्गस्य वृद्धिः न भवति। अर्थात् एवं स्थितौ हलन्तलक्षणा वृद्धिः निषिध्यते।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण अकट् इस् ईत् इति स्थितौ हलन्तलक्षणा वृद्धिः प्राप्ता। परन्तु अत्र सिच् इडादिः अस्ति। अत एव नेटि इति सूत्रेण वृद्धिनिषेधः प्राप्तः। तदा -

[१९.८] अतो हलादेर्लघोः॥ (७.२.७)

सूत्रार्थः - हलादेः लघोः अकारस्य वृद्धिर्वा इडादौ परस्मैपदे सिचि।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विकल्पेन वृद्धिः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अतः (६/१) हलादेः (६/१), लघोः (६/१)। नेटि इति सूत्रात् नेटि (७/१) इति पदमनुवर्तते। सिचि वृद्धिः परस्मैपदेषु इति सूत्रात् सिचि (७/१), वृद्धिः (१/१), परस्मैपदेषु (७/३) इति त्रीणि अपि पदानि अनुवर्तन्ते। ऊर्णोतेर्विभाषा इति सूत्रात् विभाषा (१/१) इति पदमायाति। अङ्गस्य (६/१) इति अधिकृतम्। अङ्गाक्षिप्तम् प्रत्यये इत्यस्य प्रत्ययेषु इति सप्तमीबहुवचनान्ततया विपरिणामः भवति। पदयोजना - इटि सिचि परस्मैपदेषु प्रत्ययेषु हलादेः अङ्गस्य लघोः अतः वृद्धिः विभाषा। इटि सिचि इत्यत्र तदादिविधिना इडादौ सिचि इत्यर्थो लभ्यते। ततश्च सूत्रार्थो भवति - इडादौ सिचि परस्मैपदेषु प्रत्ययेषु हलादेः अङ्गस्य लघोः अकारस्य स्थाने विकल्पेन वृद्धिः भवति।

ह्रस्वं लघु इति सूत्रेण लघुसंज्ञा विधीयते। एवञ्च संयोगे परे असति पूर्वः ह्रस्वः लघुसंज्ञकः भवतीति सारः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण अकट् इस् ईत् इति स्थितौ हलन्तलक्षणा वृद्धिः प्राप्ता। परन्तु नेटि इति सूत्रेण वृद्धिनिषेधः प्राप्तः। अत्र हलादि अङ्गम् अस्ति, ककारोत्तरः अकारः लघुसंज्ञकः अस्ति। इडादिः सिच् च परे अस्ति। अतः अतो हलादेर्लघोः इति सूत्रेण लघोरकारस्य विकल्पेन वृद्धिः प्राप्ता। तदा -

[१९.९] ह्म्यन्त-क्षणश्वसजागृ-णिश्व्येदिताम्॥ (७.२.५)

सूत्रार्थः - हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण वृद्धिनिषेधो विधीयते। अस्मिन् सूत्रे ह्म्यन्त-क्षणश्वसजागृ-णिश्व्येदिताम् ६/३) इति एकम् पदम्। ह् च म् च य् च इति ह्म्यः इति इतरेतरयोगद्वन्द्वसमासः। ह्म्यन्तो येषां ते ह्म्यन्ताः इति बहुव्रीहिसमासः। एत् इत् यस्य स एदित् इति बहुव्रीहिसमासः। ह्म्यन्ताः च क्षण् च श्वस् च जागृ च णिश्च श्विश्च एदित् चेति ह्म्यन्तक्षणश्वसजागृणिश्व्येदितः, तेषाम् इति इतरेतरयोगद्वन्द्वसमासः। अत्र णि इति प्रत्ययग्रहणेन प्रत्ययग्रहणे तदन्तग्रहणम् इति परिभाषया तदन्तविधिना ण्यन्तस्य ग्रहणं भवति। सिचि वृद्धिः परस्मैपदेषु इति सूत्रात् सिचि (७/१), वृद्धिः (१/१), परस्मैपदेषु (७/३) इति त्रीणि अपि पदानि अनुवर्तन्ते। अङ्गस्य (६/१) इति अधिकृतम्। तस्य षष्ठीबहुवचनान्ततया विपरिणामो भवति। अङ्गाक्षिप्तम् प्रत्यये इत्यस्य प्रत्ययेषु इति सप्तमीबहुवचनान्ततया विपरिणामः भवति। तदा सूत्रार्थो भवति - हमयान्तस्य क्षणधतोः श्वसधातोः जागृधातोः ण्यन्तस्य श्वयतेः एदितश्च अङ्गस्य वृद्धिः न इडादौ सिचि परस्मैपदेषु प्रत्ययेषु परेषु। अर्थात् येषाम् अङ्गानाम् अन्ते हकारः मकारः यकारः क्षण् श्वस् जागृ ण्यन्तधातुः श्विधातुः एदित् धातुः चास्ति तस्य अङ्गस्य वृद्धिः न भवति यदि परतः इडादिः सिच् परस्मैपदे परे स्यात्।

उदाहरणम् - अकटीत्।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण अकट् इस् ईत् इति स्थितौ अतो हलादेर्लघोः इति सूत्रेण लघोरकारस्य विकल्पेन वृद्धिः प्राप्ता। तत्र कटँ इति धातुः एदित्। अतः ह्म्यन्त-क्षणश्वसजागृ-णिश्व्येदिताम् इति सूत्रेण वृद्धिः निषिध्यते। तत्र इट ईटि इति सूत्रेण इटः परस्य ईटि परतः सस्य लोपे सिज्लोप एकादेशे सिद्धो वाच्यः इति वार्तिकेन सिज्लोपस्य सिद्धत्वात् अकट् इ ईत् इति स्थितौ अकः सवर्णे दीर्घः इति सूत्रेण ईकारैकारयोः स्थाने ईकाररूपसवर्णदीर्घैकादेशे **अकटीत्** इति रूपं सिध्यति।

कट्-धातोः लुङि रूपाणि अधः तालिकायां सन्ति।

कट्+लुङ्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	अकटीत्	अकटिष्टाम्	अकटिषुः
मध्यमपुरुषः	अकटीः	अकटिष्टम्	अकटिष्ट
उत्तमपुरुषः	अकटिषम्	अकटिष्व	अकटिष्म

अयमत्र वृद्धिसंग्रहः -

इडादिः सिच् अनिडादिः वा सिच् भवतु - सिचि वृद्धिः परस्मैपदेषु इत्यनेन इगन्ताङ्गस्य वृद्धिः विधीयते।

तथैव हलन्तानामपि धातूनाम् अचः वृद्धिः वदव्रजहलन्तस्याचः इति सूत्रेण विधीयते। तत्रापि इडादिः सिच् अनिडादिः वा सिच् भवतु - हलन्तलक्षणा वृद्धिः विहिता।

इडादौ सिचि परस्मैपदेषु हलन्तलक्षणा वृद्धिः नेटि इति सूत्रेण निषिध्यते। हलादेः लघोः अकारस्य विकल्पेन वृद्धि अतो हलादेर्लघोः इति सूत्रेण भवति। नेटि इत्यनेन सस्य निषेधः प्राप्तः तद् यदि हलादि लघ्वकारवत् स्यात् तर्हि तस्य वृद्धिविकल्पः अतो हलादेर्लघोः इति सूत्रेण विधीयते।

एवम् केषाञ्चित् इगन्तलक्षणा, हलन्तलक्षणा च वृद्धिः विधीयते। पुनः इडादौ सिचि हलन्तलक्षणा वृद्धिः निषिध्यते। केषाञ्चिद् विकल्पेन वृद्धिः फलति। एतेष्वपि येषाम् अङ्गानाम् अन्ते हकारः मकारः यकारः क्षण् श्वस् जागृ ण्यन्तधातुः श्विधातुः एदित् धातुः चास्ति तेषाम् अङ्गानाम् वृद्धिः ह्म्यन्त-क्षणश्वसजागृ-णिश्व्येदिताम् इति सूत्रेण निषिध्यते।

तत्र 'हलन्तस्य अचः' इत्यनेनैव वदव्रजयोः धात्वोः वृद्धिः सिद्ध्यति। तथापि पृथग् उपादानम् सप्रयोजनम्। नेटि इति सूत्रेण इडादौ सिचि हलन्तस्य वृद्धिः निषिद्ध्यते। तेन वदव्रजयोः अपि सेट्त्वात् वृद्धिनिषेधः प्राप्तः। अतो हलादेर्लघोः इत्यनेन विकल्पेन हलादेः लघोः अतः वृद्धिः भवति। तेन वदव्रजयोः अपि विकल्पेन वृद्धौ प्राप्तायां वदव्रजहलन्तस्याचः इति सूत्रे उपादानम्। तेन तयोः नित्यं वृद्धिर्भवति।

[१९.१०] पुषादिद्युताद्यॄदितः परस्मैपदेषु॥ (३.१.५५)

सूत्रार्थः - श्यन्विकरणपुषादेः द्युतादेः लृदितश्च च्लेः अङ् परस्मैपदेषु।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अङ् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। पुषादिद्युताद्यॄदितः (५/१), परस्मैपदेषु (७/१)। पुष आदिः येषां ते पुषादयः इति बहुव्रीहिसमासः। द्युत् आदिः येषां ते द्युतादयः इति बहुव्रीहिसमासः। लृत् इत् यस्य स लृदित् इति बहुव्रीहिसमासः। पुषादयश्च द्युतादयश्च लृदित् च एषां समाहारः पुषादिद्युताद्यॄदित् इति समाहारद्वन्द्वसमासः। तस्मात् पुषादिद्युताद्यॄदितः। च्लेः सिच् इति सूत्रात् च्लेः (६/१) इति पदमनुवर्तते। अस्यतिवक्तिख्यातिभ्योऽङ् इति सूत्रात् अङ् (१/१) इति पदमनुवर्तते। सूत्रार्थो भवति - पुषादेः द्युतादेः लृदितः च धातोः परे च्लिस्थाने अङ् आदेशः स्यात् परस्मैपदे परे।

पुषादयः धातवः भ्वादिगणे दिवादिगणे क्र्यादिगणे चुरादिगणे च पठिताः सन्ति। परन्तु व्याख्यानाधारणे केवलं श्यन्विकरणाः दिवादिगणीयाः धातव एव गृह्यन्ते।

उदाहरणम् - अगमत्।

सूत्रार्थसमन्वयः - गमॢ गतौ इति लृदितः गत्यर्थकाद् गम्धातोः लुङि एकवचनविवक्षायाम् तिपि च्लि लुङि इति शबपवादत्वेन च्लिप्रत्यये च्लेः सिच् इति सिचि प्राप्ते गम्-धातोः लृदित्त्वात् पुषादिद्युताद्यॄदितः परस्मैपदेषु इति सूत्रेण सिजपवादत्वेन अङ्-प्रत्यये ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति लोपे च कृते गम् अ ति इति स्थिते इतश्च इति इकारलोपे लुङ्-लङ्-

लृङ्क्ष्वडुदात्तः इति सूत्रेण अङ्गस्य अडागमे आद्यवयवे अगम् अ त् इति स्थिते वर्णमेलने **अगमत्** इति रूपं सिध्यति।

गम्-धातोः लुङि रूपाणि - अगमत् अगमताम् अगमन्। अगमः अगमतम् अगमत। अगमम् अगमाव अगमाव।

अधः केचिद् धातवः दीयन्ते। तेषां रूपाणि एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि -

(वृद्ध्यभावपक्षे) **अपठीत् अपठिष्टाम् अपठिषुः। अपठीः अपठिष्टम् अपठिष्ट। अपठीषम् अपठिष्व अपठिष्म।**

(वृद्धिपक्षे) **अपाठीत् अपाठिष्टाम् अपाठिषुः। अपाठीः अपाठिष्टम् अपाठिष्ट। अपठीषम् अपाठिष्व अपाठिष्म।**

२) **जप** व्यक्तायां वाचि - (वृद्ध्यभावपक्षे) **अजपीत् अजपिष्टाम् अजपिषुः। अजपीः अजपिष्टम् अजपिष्ट। अजपीषम् अजपिष्व अजपिष्म।**

(वृद्धिपक्षे) **अजापीत् अजापिष्टाम् अजापिषुः। अजापीः अजापिष्टम् अजापिष्ट। अजपीषम् अजापिष्व अजापिष्म।**

३) **गद** व्यक्तायां वाचि - (वृद्ध्यभावपक्षे) **अगदीत् अगदिष्टाम् अगदिषुः। अगदीः अगदिष्टम् अगदिष्ट। अगदिषम् अगदिष्व अगदिष्म।**

(वृद्धिपक्षे) **अगादीत् अगादिष्टाम् अगादिषुः। अगादीः अगादिष्टम् अगादिष्ट। अगदीषम् अगादिष्व अगादिष्म।**

४) **टु नदिँ** समृद्धौ - **अनन्दीत् अनन्दिष्टाम् अनन्दिषुः। अनन्दीः अनन्दिष्टम् अनन्दिष्ट। अनन्दिषम् अनन्दिष्व अनन्दिष्म।**

५) **व्रज** गतौ - **अव्राजीत् अव्राजिष्टाम् अव्राजिषुः। अव्राजीः अव्राजिष्टम् अव्राजिष्ट। अव्राजीषम् अव्राजिष्व अव्राजिष्म।**

पाठगतप्रश्नाः-२

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

९. इडादौ सिचि परस्मैपदपरे इगन्ताङ्गस्य वृद्धिः केन सूत्रेण।

१०. अनिडादौ सिचि परस्मैपदपरे इगन्ताङ्गस्य वृद्धिः केन सूत्रेण।

भ्वादिप्रकरणे - लिङ् लुङ् एतयोः सूत्रशेषः

११. अनिडादौ सिचि परस्मैपदपरे अदन्ताङ्गस्य वृद्धिः केन सूत्रेण।

१२. इडादौ सिचि परस्मैपदपरे हलन्तस्य अचः वृद्धिः कस्य धातोः।

१३. सिचि वृद्धिः परस्मैपदेषु इत्यस्य अपवादः कः।

१४. इडादौ सिचि परस्मैपदपरे हलन्तस्य अचः वृद्धिः केन सूत्रेण निषिध्यते।

१५. नेटि इत्यनेन कृतस्य वृद्धिनिषेधस्य नित्यापवादः किं सूत्रम्।

१६. कट्-धातोः अर्थं लिखत।

१७. अगमत् इत्यत्र च्लेः अङ् केन सूत्रेण।

१८. अगमत् इति रूपं गम्-धातोः कस्मिन् लकारे।

१) लङ् २) लुङ् ३) लृङ् ४) लुट्

१९. अगमत् इति रूपे च्लेः स्थाने किं भवति।

१) अङ् २) चङ् ३) सिच् ४) सक्

२०. अकटीत् इति रूपे च्लेः स्थाने किं भवति।

१) अङ् २) चङ् ३) सिच् ४) सक्

पाठसारः

अस्मिन् पाठे लिङ्-लकारस्य लुङ्-लकारस्य च चितानि सूत्राणि एव उपन्यस्तानि। तत्रादौ अकृत्सार्वधातुकयोर्दीर्घः इति सूत्रं यादौ प्रत्यये परे अजन्ताङ्गस्य अन्त्यस्य दीर्घं विदधाति। अयं दीर्घः कृत्प्रत्यये परे, सार्वधातुकप्रत्यये परे च न भवति। तेन क्षीयात् इत्यादिरूपं सिध्यति।

लुङि लकारे परतः विद्यमानात् सिचः परस्य, अस्-धातोश्च परस्य अपृक्तस्य हलः ईडागमः अस्तिसिचोऽपृक्ते इति सूत्रेण विधीयते। इडीटोः मध्ये यदि सिच् स्यात् तस्य लोपः इट ईटि इति सूत्रेण भवति। सिज्लोप एकादेशे सिद्धो वाच्यः इति वार्तिकेन सिज्लोपस्य सिद्धत्वात् अकः सवर्णे दीर्घः इति सूत्रं प्रवर्तते। लुङि सिचः परस्य झेर्जुस् सिजभ्यस्तविदिभ्यश्च इति सूत्रेण विधीयते। एवं विविधानि कार्याणि अस्मिन् पाठे प्रदर्शितानि।

पाठान्तप्रश्नाः

१. अकृत्सार्वधातुकयोर्दीर्घः इति सूत्रं व्याख्यात।

२. अस्तिसिचोऽपृक्ते इति सूत्रं व्याख्यात।

३. ससूत्रं रूपाणि साधयत – क्षीयात्, क्षीयास्ताम्,क्षीयासुः। आतीः, आतीत्, आतिषुः, आतिष्टाम्।

४. सिचि वृद्धिः परस्मैपदेषु इति सूत्रं व्याख्यात।

५. वदव्रजहलन्तस्याचः इति सूत्रं व्याख्यात।

६. अतो हलादेर्लघोः इति सूत्रं व्याख्यात।

७. लिङि सिचि वृद्धिप्रकरणस्य सारं संगृह्णीत।

८. ससूत्रं रूपाणि साधयत – अकटीत्, कटिष्टाम्, कटीः, अकटीष्म ।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि- १

१. अकृत्सार्वधातुकयोर्दीर्घः।

२. विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः।

३. इट ईटि।

४. इट ईटि।

५. सिजभ्यस्तविदिभ्यश्च।

६. ३

७. ३

८. ३

उत्तराणि- २

९. सिचि वृद्धिः परस्मैपदेषु।

१०. सिचि वृद्धिः परस्मैपदेषु।

११. न केनापि सूत्रेण।

१२. वद् व्रज् हान्तः मान्तः यान्तः क्षण् श्वस् एदित् एषां धातूनाम्।

१३. ह्म्यन्त-क्षणश्वसजागृ-णिश्व्येदिताम् इत्यत्रस्थः जागृधातुः ण्यन्तधातुः श्विश्च।

भ्वादिप्रकरणे - लिङ् लुङ् एतयोः सूत्रशेषः

१४. नेटि।

१५. ह्म्यन्त-क्षणश्वसजागृ-णिश्व्येदिताम्।

१६. वर्षाक्षरणयोः कट् धातुः वर्तते।

१७. पुषादिद्युताद्यॄदितः परस्मैपदेषु।

१८. २

१९. १

२०. ३

॥इति नवदशः पाठः॥

346sk20

२०

भ्वादिप्रकरणे आत्मनेपदप्रकरणम्

प्रस्तावना

धातुः परस्मैपदात्मनेपदभेदेन द्विविध इति पूर्वस्मिन् पाठे अस्माभिः आलोचितम्। परस्मैपदिनां केषाञ्चिद् धातूनां पाठः पूर्वं कृतः। अस्मिन् पाठे अस्माभिः आत्मनेपदिनः एध्-धातोः पाठः उपादीयते। अयं नायकधातुरस्ति। अस्य सर्वेषु लकारेषु रूपाणि प्रदर्शयिष्यन्ते। तज्ज्ञाने आत्मनेपदिनां बहूनां धातूनां रूपाणि साधयितुं शक्यन्ते। आत्मनेपदत्वात् पूर्वप्रकरणपठितानि सूत्राणि विहाय अपि भिन्नानां केषाञ्चन सूत्राणाम् आवश्यकता भवति। अत्र पाठान्तर्भावितानि एतान्येव सूत्राणि सर्वत्र आत्मनेपदधातुषु उपयोगाय कल्पन्ते। अत्रापि पूर्ववत् सूत्रव्याख्यायां प्रत्येकं पदानां किं विभक्तिसमासादिकम् अस्ति। अत्र (१/१) इति प्रकारेण प्रदत्तमस्ति। एतस्यार्थः प्रथमायाम् एकवचने अस्तीति तत्र तत्र बोद्धव्यम्।

उद्देश्यानि

एतं पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य आत्मनेपदप्रकरणस्थानि सूत्राणि बुध्यात्।
- धातोः परम् आत्मनेपदप्रत्ययस्य प्रयोगे क्षमः भवेत्।
- एध्-धातुवत् अन्यधातुरूपाणि साधयितुं योग्यः भवेत्।
- सूत्राणि व्याख्यातुम् अर्हः भवेत्।
- आत्मनेपदधातूनां रूपाणि वैशिष्ट्यानि च जानीयात्।
- आत्मनेपदधातूनां रूपाणि स्वस्य भाषायाम् प्रक्रियाज्ञानपुरःसरं व्यवहर्तुं कुशलः भवेत्।

एध्-धातोः लटि रूपाणि

एधँ वृद्धौ इत्याकारेण धातुरयं धातुप्रकरणे पठितोऽस्ति। तेन वृद्ध्यर्थकः अयं धातुः इति। अयं धातुः अनुदात्तेत्। अत एव अनुदात्तङित आत्मनेपदम् इत्यनेन सूत्रेण आत्मनेपदी। अस्य धातोः वैशिष्ट्यानि तावत् अयं धातुः भ्वादिगणपठितः वृद्ध्यर्थवाची आत्मनेपदी अकर्मकः अनुदात्तेत् सेट् इति।

[२०.१] टित आत्मनेपदानां टेरे॥ (३.४.७९)

सूत्रार्थः - टितो लस्य आत्मनेपदानां टेरेत्वम्।

सूत्रव्याख्या - विधिसूत्रमिदम्। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। टितः(६/१), आत्मनेपदानाम् (६/३), टेः(६/१), ए (१/१) इति पदच्छेदः। लस्य इति अधिकृतम्। अचोऽन्त्यादि टि इति सूत्रेण टिसंज्ञा विधीयते। सूत्रार्थो भवति - टित्-लकाराणां स्थाने विहितानाम् आत्मनेपदसंज्ञकानां टेः स्थाने एकारः भवति। दशलकारेषु टित्-लकाराः षट् सन्ति। ते हि लट् लिट् लुट् लृट् लेट् लोट्। एतेषु लकारेषु यदा रूपाणि भवन्ति तदा अनेन सूत्रेण टेः एकारो भवति।

उदाहरणम् - एधते।

सूत्रार्थसमन्वयः - वृद्ध्यर्थकाद् एध्-धातोः वर्तमाने लट् इति सूत्रेण लटि एध्-धातोः अनुदात्तेत्त्वात् अनुदात्तङित आत्मनेपदम् इत्यनेन आत्मनेपदसंज्ञकेषु प्रत्ययेषु प्राप्तेषु प्रथमपुरुषैकवचनविवक्षायाम् एध् त इति स्थिते तप्रत्ययस्य तिङ्त्वेन धातोरिति विहितत्वाच्च कर्तरि शप् इत्यनेन धातोः शपि अनुबन्धलोपे एध् अ त इति स्थितिः जायते। अत्र त इति आत्मनेपदम् टितः लकारस्य स्थाने विहितम् अस्ति। अतः प्रकृतसूत्रेण तप्रत्ययस्य टेः अकारस्य स्थाने एकारो भवति तेन **एधते** इति रूपं सिध्यति।

एधेते - एध्- धातोः लटि प्रथमद्विवचनविवक्षायाम् आत्मनेपदसंज्ञके आताम्-प्रत्यये कर्तरि शपि अनुबन्धलोपे एध् अ आताम् इति स्थितिः जाता। तदा -

[२०.२] आतो ङितः॥ (७.२.८१)

सूत्रार्थः - अतः परस्य ङितामाकारस्य इय् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। आतः (६/१), ङितः (६/१) इति पदद्वयात्मकं सूत्रमिदम्। अतः (५/१), इयः (१/१) इति पदद्वयम् अतो येयः इति सूत्रादनुवर्तते। ङकारः इत् यस्य स ङित्। अङ्गस्य इति सूत्रस्य अधिकार आयाति। अङ्गस्य इति पदम् पञ्चम्यन्ततया विपरिणमते। पदयोजना - अतः अङ्गात् ङितः आतः इय्। अतः इति पदम् अङ्गात् इत्यस्य विशेषणम्। तेन अदन्तात् अङ्गात् इत्यर्थो लभ्यते। सूत्रार्थो भवति - अदन्ताद् अङ्गात् परस्य ङिताम् आकारस्य स्थाने इय् भवति। अत्र आताम् इत्यादिप्रत्ययानाम् स्वयं ङित्त्वं नास्ति। तथापि सार्वधातुकमपित् इत्यनेन सूत्रेण तेषां ङित्त्वम् विधीयते।

उदाहरणम् - एधेते।

सूत्रार्थसमन्वयः - एध् अ आताम् इति स्थिते सार्वधातुकमपित् इत्यनेन सूत्रेण आतामः ङित्त्वे आतो ङितः इति सूत्रेण आतामः आकारस्य इय् इत्यादेशे एध् अ इय् ताम् इति स्थिते लोपो व्योर्वलि इति सूत्रेण इयः अवयवस्य यकारस्य लोपो भवति। ततः अकारस्य इकारस्य च स्थाने गुणैकादेशे एकारे एधेताम् इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण टेः एत्वे **एधेते** इति रूपं सिध्यति।

एधन्ते - एध्-धातोः लटि प्रथमपुरुषबहुवचने झ-प्रत्यये झोऽन्तः इत्यनेन अन्तादेशे कर्तरि शप् इति शपि एध् अ अन्त इति स्थिते अतो गुणे इत्यनेन अकाराकारयोः स्थाने पररूपैकादेशे अकारे टित आत्मनेपदानां टेरे इति सूत्रे टेः अन्त इत्यस्य तकारोत्तरस्य अकारस्य एत्वे **एधन्ते** इति रूपं सिध्यति।

एधसे - एध्-धातोः लटि मध्यमपुरुषैकवचने थास्-प्रत्यये एध् थास् इति स्थितिः जाता। तदा -

[२०.३] थासः से॥ (३.४.८०)

सूत्रार्थः - टितो लस्य थासः से स्यात्।

सूत्रव्याख्या - विधिसूत्रम्। सूत्रेऽस्मिन् थासः (६/१) इति से (१/१) इति द्वे पदे स्तः। टित आत्मनेपदानां टेरे इति सूत्रात् टितः (६/१) इति पदमनुवर्तते। लस्य इत्यधिकृतम्। सूत्रार्थो भवति - टिल्लकारस्य स्थाने आदिष्टः यः थास् तस्य स्थाने से इति आदेशः स्यादिति। से इत्यादेशस्य अनेकाल्त्वात् से सर्वादेशो भवति।

उदाहरणम् - एधसे।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण एध् थास् इति स्थिते थासः से इत्यनेन सूत्रेण थासः स्थाने से अनेकाल्त्वात् सर्वादेशे कर्तरि शप् इति शपि एध् अ से इति स्थिते वर्णमेलने **एधसे** इति रूपं सिध्यति।

एधेथे - एध्- धातोः लटि मध्यमपुरुषद्विवचनविवक्षायाम् आत्मनेपदसंज्ञके आथाम्-प्रत्यये कर्तरि शपि अनुबन्धलोपे एध् अ आथाम् इति स्थितिः जाता। तत्र सार्वधातुकमपित् इत्यनेन सूत्रेण आथामः ङित्त्वे आतो ङितः इति सूत्रेण आथामः आकारस्य इय् इत्यादेशे एध् अ इय् थाम् इति स्थिते लोपो व्योर्वलि इति सूत्रेण इयः अवयवस्य यकारस्य लोपो भवति। ततः अकारस्य इकारस्य च स्थाने गुणैकादेशे एकारे एधेथाम् इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण टेः एत्वे **एधेथे** इति रूपं सिध्यति।

एधध्वे - एध्-धातोः लटि मध्यमपुरुषबहुवचने ध्वम्-प्रत्यये कर्तरि शप् इति शपि एध् अ ध्वम् स्थिते टित आत्मनेपदानां टेरे इति सूत्रे ध्वमः टेः अम् इत्यस्य एत्वे **एधध्वे** इति रूपं सिध्यति।

एधे - एध्-धातोः लटि उत्तमपुरुषैकवचने इट्-प्रत्यये एध् इ इति जाते कर्तरि शप् इति शपि एध् अ इ इति जाते टित आत्मनेपदानां टेरे इति सूत्रेण इ इत्यस्य टेः इकारस्य स्थाने एत्वे एध् अ ए इति स्थिते अतो गुणे इति सूत्रेण अकारैकारयोः स्थाने पररूपैकादेशे एकारे **एधे** इति रूपं सिध्यति।

एधावहे - एध्-धातोः लटि उत्तमपुरुषद्विवचने वहि-प्रत्यये कर्तरि शप् इति शपि एध् अ वहि इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण वहेः टेः इकारस्य एत्वे एध् अ वहे इति स्थिते अतो दीर्घो यञि इति सूत्रेण दीर्घे **एधावहे** इति रूपं सिध्यति।

एधामहे - एध्-धातोः लटि उत्तमपुरुषबहुवचने महि-प्रत्यये कर्तरि शप् इति शपि एध् अ महि इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण महेः टेः इकारस्य एत्वे एध् अ महे इति स्थिते अतो दीर्घो यञि इति सूत्रेण दीर्घे **एधामहे** इति रूपं सिध्यति।

एवं प्रकारेण अन्येषामपि आत्मनेपदिनां धातूनां लट्लकारे रूपाणि अपि साधयितुं शक्यन्ते।

एध्-धातोः लट्लकारे रूपाणि तावत् -

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधते	एधेते	एधन्ते
मध्यमपुरुषे	एधसे	एधेथे	एधध्वे
उत्तमपुरुषे	एधे	एधावहे	एधामहे

पाठगतप्रश्नाः-१

१. एध्-धातोः अर्थः कः।

२. एध्-धातोः धातुपाठे कीदृशः पाठः।

३. एध्-धातुः उदात्तोऽनुदात्तः स्वरितो वा।

४. एध्-धातुः आत्मनेपदी परस्मैपदी वा। उत्तरं समर्थयत।

५. एध्-धातोः आत्मनेपदित्वे किं सूत्रं प्रमाणम्।

६. एध्-धातोः तिबादयो नव प्रत्ययाः कुतो न उत्पद्यन्ते।

७. एध्-धातुः सेट् अनिट् वा।

८. एध्-धातुः सकर्मको वा अकर्मको वा।

९. एध्-धातो लटि तप्रत्यये शपि प्रक्रियाकार्ये एधत इति स्थिते एकारविधायकं सूत्रं किम्।

१०. टिसंज्ञा कस्य।

११. एध्-धातोः लटि रूपाणि लिखत।

१२. आताम्-प्रत्ययः केन सूत्रेण ङित्।

१३. आतामः आकारस्य इय् केन सूत्रेण विधीयते।

१४. आतो ङितः इति सूत्रस्य कोऽर्थः।

एध्-धातोः लिटि रूपाणि

[२०.४] इजादेश्च गुरुमतोऽनृच्छः॥ (३.१.३६)

सूत्रार्थः - इजादिर्यो धातुः गुरुमान् ऋच्छत्यन्यः तत आम् स्याल्लिटि।

सूत्रावतरणम् - एध्-धातोः भूतानद्यतनपरोक्षार्थक्रियावृत्तेः लिट्-लकारे अनुबन्धलोपे लस्य स्थाने प्रथमैकवचनविवक्षायां तप्रत्यये एध त इति स्थिते इदं सूत्रं प्रवर्तते।

सूत्रव्याख्या - विधिसूत्रमिदम्। सूत्रेऽस्मिन् इजादेः (५/१), च (अव्ययम्), गुरुमतः (५/१), अनृच्छः (५/१) इति चत्वारि पदानि सन्ति। धातोः इति पञ्चम्यन्तं पदं धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ् इति सूत्रात् अनुवर्तते। आम् (१/१) इति विधेयबोधकं पदं लिटि (७/१) इति च पदं कास्प्रत्ययादामन्त्रणे लिटि इति सूत्रात् अनुवर्तेते। प्रत्ययः परश्च इति द्वयोः सूत्रयोः अधिकारे सूत्रमिदं पठितम् अस्ति। इच् आदिर्यस्य स इजादिः, तस्माद् इजादेः इति बहुव्रीहिसमासः। गुरुः अस्ति अस्मिन् इति गुरुमान्, तस्माद् गुरुमतः। न ऋच्छ् अनृच्छ्, तस्माद् अनृच्छः। पदयोजना - इजादेः च गुरुमतः अनृच्छः धातोः आम् प्रत्ययः परः च लिटि। सूत्रार्थो भवति - इजादिः यो धातुः गुरुमान् ऋच्छतिभिन्नः, तस्माद् धातोः लिटि परे आम् प्रत्ययः भवति। यो धातुः इजादिरपि अस्ति, गुरुमान् चापि अस्ति तस्माद् धातोः आम् भवति।

उदाहरणे सूत्रार्थसमन्वयः - एध्-धातोः भूतानद्यतनपरोक्षार्थक्रियावृत्तेः परोक्षे लिट् इति लिट्-लकारे एध् लिट् इति स्थिते एध्-धातोः एकारादित्वात् इजादित्त्वमस्ति। दीर्घं चेति सूत्रेण एकारः गुरुसंज्ञकः। अतः एध्-धातुः गुरुमान् अपि अस्ति। अत एव तस्माद्धातोः प्रकृतसूत्रेण आम्प्रत्ययः भवति। तेन एध् आम् लिट् इति स्थिते वर्णमेलने एधाम् लिट् इति आयाति। तदा आमः इति सूत्रेण लिटः लुक् भवति। लिट् कृदतिङ् इति कृत्संज्ञकः अस्ति। एधाम् इत्यस्मात् लिटः लुकि प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रेण प्रत्ययलक्षणं कृत्वा एधाम् इति कृदन्तम् अस्ति। तस्य च कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततश्च स्वौजसमौट्° इति सूत्रेण सुबुत्पत्तौ एधाम् सु इति स्थिते आमः इति सूत्रेण सोर्लुकि एधाम् इति अवशिष्यते। अस्य च पुनः प्रत्ययलक्षणं कृत्वा सुबन्तत्वम्। अतः सुप्तिङन्तं पदमित्यनेन पदसंज्ञापि सिध्यति।

एधाम् इत्यस्य आमन्तत्वात् कृञ्चानुप्रयुज्यते लिटि इति सूत्रेण एधाम् इत्यस्मात् परं लिट्परकाणां कृ भू अस् एषां धातूनां प्रयोगो भवति। अत्र आदौ कृधातोः अनुप्रयोगं कृत्वा एधाम् कृ लिट् इति स्थितिः आयाति।

सूत्रावतरणम् - एधाम् कृ लिट् इति स्थिते लस्य स्थाने आत्मनेपदं वा परस्मैपदं वा भवेत् इति शंका समुदेति। तत्र आत्मनेपदविधायकम् इदं सूत्रं प्रवर्तते।

[२०.५] आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य॥ (१.३.६३)

सूत्रार्थः - आमप्रकृत्या तुल्यमनुप्रयुज्यमानात् कृञोऽप्यात्मनेपदम्।

सूत्रव्याख्या - विधिसूत्रमिदम्। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। तत्र आम्प्रत्ययवत् इति अव्ययपदम्, कृञः इति षष्ठ्यन्तं पदम्, अनुप्रयोगस्य इति षष्ठ्यन्तं पदम्। आत्मनेपदम् इति प्रथमान्तं पदम् अनुदात्तङित आत्मनेपदम् इति सूत्रात् अनुवर्तते। आम् प्रत्ययो यस्मात् (विहितः) स आम्प्रत्ययः। आम्प्रत्ययेन तुल्यम् आम्प्रत्ययवत् इति। अत्र अतद्गुणसंविज्ञानबहुव्रीहिः अस्ति। अर्थात् आम्प्रत्ययः इति शब्देन यस्माद् आम् प्रत्ययः विधीयते तस्यैव ग्रहणं कर्तव्यं न तु आम्-प्रत्ययसहितस्य। सूत्रार्थो भवति - आम्प्रत्ययः यस्मात् ततः आमः प्रकृत्या इव अनुप्रयुज्यमानात् कृञः अपि आत्मनेपदं भवतीति। अत्र एध्-धातोः आम्-प्रत्ययो विहितः। तेन एधाम् इति लभ्यते। आम्प्रत्ययः इति पदेन एध् इति आमः प्रकृतिरेव गृह्यते। आमः प्रकृतितः यदि आत्मनेपदं भवति तर्हि आमन्तात् परो यः अनुप्रयुक्तः कृधातुः, तस्माद् परम् लिटः स्थाने आत्मनेपदं भवति। मूलधातुतः यदि आत्मनेपदं भवति तर्हि अनुप्रयुक्ताद् कृधातोः अपि आत्मनेपदं भवतीति सरलार्थः।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण एधाम् कृ लिट् इति स्थितिः। अत्र एधाम् इत्यत्र आम् प्रत्ययः एध्-धातोः विहितः। अतः आमः प्रकृतिः एध्-धातुः। एध्-धातुतः आत्मनेपदं भवति। अतः अनुप्रयुक्तात् कृधातोः प्रकृतसूत्रेण आत्मनेपदस्य विधानात् प्रथमपुरुषैकवचनविवक्षया एधाम् कृ त इति स्थितिः समापन्ना। तदा -

[२०.६] लिटस्तझयोरेशिरेच्॥ (३.४.८१)

सूत्रार्थः - लिडादेशयोः तझयोः एश् इरेच् एतौ स्तः।

सूत्रव्याख्या - विधिसूत्रमिदम्। तत्र लिटः (६/१), तझयोः (६/२), एशिरेच् (१/१) इति त्रीणि पदानि सन्ति। तश्च झश्च तझौ तयोः तझयोः, इतरेतरयोगद्वन्द्वः। एश् च इरेच् इति एशिरेच् इति समाहारद्वन्द्वसमासः। अत्र यथासंख्यमनुदेशः समानाम् इति परिभाषासूत्रं प्रवर्तते। तेन तस्य स्थाने एश् तथा च झस्य स्थाने इरेच् इति विधीयेते। एशः शित्त्वात् तथा इरेचः अनेकाल्त्वात् अनेकाल्शित् सर्वस्य इति परिभाषाबलेन सर्वस्य स्थाने आदेशो भवति। सूत्रार्थो भवति - लिटः स्थाने विहितौ यो त झ इति एतौ तयोः स्थाने एश् इरेच् एतौ क्रमात् स्तः। इरेच् इत्यस्य चस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति। ततश्च लोपो भवति।

उदाहरणम् - एधाञ्चक्रे।

सूत्रार्थसमन्वयः - एधाम् कृ त इति स्थिते प्रकृतसूत्रेण त-प्रत्ययस्य स्थाने एशादेशे अनुबन्धलोपे एधाम् कृ ए इति स्थिते लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अभ्यासकार्ये (उरत् इति सूत्रेण अ, उरण् रपरः इति रपरः, हलादिः शेषः इति हलादिशेषे, कुहोश्चुः इति अभ्यासककारस्य चकारः) एधाम् च कृ ए इति स्थिते इको यणचि इति यणि कृते एधाम् चक्रे इति स्थितिः समायाति। ततः मोऽनुस्वारः इति सूत्रेण पदान्तमकारस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन

परसवर्णे स्थानत आन्तर्यात् ञकारे एधाञ्चक्रे इति रूपं सिध्यति। परसवर्णाभावे एधांचक्रे इति च रूपं सिध्यति।

एधांचक्राते - एध्-धातोः भूतानद्यतनपरोक्षार्थक्रियावृत्तेः परोक्षे लिट् इति लिट्-लकारे एध् लिट् इति स्थिते एध्-धातोः इजादेश्च गुरुमतोऽनृच्छः इति सूत्रेण आमि एधाम् लिट् इति स्थिते आमः इति सूत्रेण आमः परस्य लुकि एधाम् इति स्थितिः जायते। एधाम् इत्यस्य आमन्तत्वात् कृञ्चानुप्रयुज्यते लिटि इति सूत्रेण एधाम् इत्यस्मात् लिट्परस्य कृञः अनुप्रयोगे एधाम् कृ लिट् इति स्थिते आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य इति सूत्रेण एध्-धातुतः आत्मनेपदे प्रथमपुरुषद्विवचनविवक्षया एधाम् कृ आताम् इति स्थितिः जाता। तदा लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अभ्यासकार्ये एधाम् च कृ आताम् इति स्थिते इको यणचि इति यणि कृते एधाम् चक्राताम् इति स्थितिः समायाति। टित आत्मनेपदानां टेरे इति सूत्रेण आतामः टेः आमः एत्वे एधाम् चक्राते इति स्थिते ततः मोऽनुस्वारः इति सूत्रेण पदान्तमकारस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे स्थानत आन्तर्यात् ञकारे एधाञ्चक्राते इति रूपं सिध्यति। परसवर्णाभावे एधांचक्राते इति च रूपं सिध्यति।

एधांचक्रिरे - एध्-धातोः भूतानद्यतनपरोक्षार्थक्रियावृत्तेः परोक्षे लिट् इति लिट्-लकारे एध् लिट् इति स्थिते एध्-धातोः एकारादित्वात् इजादित्त्वमस्ति अतः इजादेश्च गुरुमतोऽनृच्छः इति सूत्रेण आमि एधाम् लिट् इति स्थिते आमः इति सूत्रेण आमः परस्य लुकि एधाम् इति स्थितिः जायते। एधाम् इत्यस्य आमन्तत्वात् कृञ्चानुप्रयुज्यते लिटि इति सूत्रेण एधाम् इत्यस्मात् लिट्परस्य कृञः अनुप्रयोगे एधाम् कृ लिट् इति स्थिते आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य इति सूत्रेण एध्-धातुतः आत्मनेपदे प्रथमपुरुषबहुवचनविवक्षया एधाम् कृ झ इति स्थितिः जाता।

तत्र झस्य स्थाने लिटस्तझयोरेशिरेच् इति सूत्रेण इरेच् इत्यादेशे अनुबन्धलोपे एधाम् कृ इरे इति स्थिते लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अभ्यासकार्ये एधाम् च कृ इरे इति स्थिते इको यणचि इति यणि कृते एधाम् चक्रिरे इति स्थितिः समायाति। ततः मोऽनुस्वारः इति सूत्रेण पदान्तमकारस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे स्थानत आन्तर्यात् ञकारे **एधाञ्चक्रिरे** इति रूपं सिध्यति। परसवर्णाभावे **एधांचक्रिरे** इति च रूपं सिध्यति।

एधांचकृषे - एध्-धातोः पूर्ववत् लिटि आमि कृञः अनुप्रयोगे एधाम् कृ लिट् इति स्थिते आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य इति सूत्रेण एध्-धातुतः आत्मनेपदे मध्यमपुरुषैकवचनविवक्षया एधाम् कृ थास् इति स्थितिः जाता। थासः से इति सूत्रेण थासः स्थाने से इति सर्वादेशे आर्धधातुकस्येड् वलादेः इति सूत्रेण से इति प्रत्ययस्य इडागमः प्राप्तः। कृधातोः उपदेशे एकाच्त्वात् अनुदात्तत्वाच्च एकाच उपदेशेऽनुदात्तात् इति सूत्रेण इडागमस्य निषेधो भवति। ततः लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अभ्यासकार्ये एधाम् च कृ से इति स्थिते आदेशप्रत्यययोः इत्यनेन सकारस्य षकारे एधाम् चकृषे इति स्थिते मोऽनुस्वारः इति सूत्रेण पदान्तमकारस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे स्थानत आन्तर्यात् ञकारे **एधाञ्चकृषे** इति रूपं सिध्यति। परसवर्णाभावे **एधांचकृषे** इति च रूपं सिध्यति।

एधांचक्राथे - एध्-धातोः पूर्ववत् लिटि आमि कृञः अनुप्रयोगे एधाम् कृ लिट् इति स्थिते मध्यमपुरुषद्विवचनविवक्षया एधाम् कृ आथाम् इति स्थितिः जाता। ततश्च द्वित्वे अभ्यासकार्ये एधाम् च कृ आथाम् इति स्थिते इको यणचि इति यणि कृते एधाम् चक्राथाम् इति स्थितिः समायाति। टित आत्मनेपदानां टेरे इति सूत्रेण आथामः टेः आमः एत्वे एधाम् चक्राथे इति स्थिते ततः मोऽनुस्वारे अनुस्वारस्य विकल्पेन परसवर्णे **एधाञ्चक्राथे** इति परसवर्णाभावे **एधांचक्राथे** इति च रूपे सिध्यतः।

एधांचकृढ्वे - एध्-धातोः पूर्ववत् लिटि आमि कृञः अनुप्रयोगे एधाम् कृ लिट् इति स्थिते मध्यमपुरुषबहुवचनविवक्षया एधाम् कृ ध्वम् इति स्थितिः जाता। ततश्च द्वित्वे अभ्यासकार्ये एधाम् च कृ ध्वम् इति स्थितिः जाता। तदा -

[२०.७] इणः षीध्वंलुङ्लिटां धोऽङ्गात्॥ (८.३.७८)

सूत्रार्थः - इण्णन्तादङ्गात् परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। इणः (५/१), षीध्वम्-लुङ्-लिटाम् (६/३), धः (६/१), अङ्गात् (५/१) इति चत्वारि पदानि सन्ति। अपदान्तस्य मूर्धनस्य इति सूत्रात् मूर्धन्यः इति प्रथमान्तं पदमनुवर्तते। षीध्वं लुङ् च लिट् इति षीध्वंलुङ्लिटः, तेषां षीध्वंलुङ्लिटाम् इति इतरेतरयोगद्वन्द्वसमासः। अपदान्तस्य मूर्धन्यः इति सूत्रात् मूर्धन्यः (१/१) इति पदमायाति। पदयोजना - इणः अङ्गात् षीध्वंलुङ्लिटां धः मूर्धन्यः। अत्र इणः इति विशेषणमतः। तदन्तविधिना इण्णन्तात् अङ्गात् इति अर्थः आयाति। सूत्रार्थो भवति - इण्णन्तात् अङ्गात् परेषां षीध्वम् लुङ् लिट् एषां स्थाने मूर्धन्यः आदेशो भवति इति।

उदाहरणम् - एधाञ्चकृढ्वे।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण एधाम् चकृ ध्वम् इति स्थितौ इण्-अन्तम् अङ्गम् चकृ इति, ततश्च लिटः धकारः अस्ति। अतः प्रकृतसूत्रेण धस्य मूर्धन्यादेशे गुणतः आन्तर्याद् ढकारे एधाम् चकृढ्वम् इति जाते टित आत्मनेपदानां टेरे इति सूत्रेण टेः अमः एत्वे एधाम् चकृढ्वे इति स्थिते ततः मोऽनुस्वारे अनुस्वारस्य विकल्पेन परसवर्णे **एधाञ्चकृढ्वे** इति परसवर्णाभावे **एधांचकृढ्वे** इति च रूपे सिध्यतः।

एधांचक्रे - एध्-धातोः पूर्ववत् लिटि आमि कृञः अनुप्रयोगे एधाम् कृ लिट् इति स्थिते उत्तमपुरुषैकवचनविवक्षया एधाम् कृ इ इति स्थितिः जाता। ततश्च द्वित्वे अभ्यासकार्ये एधाम् च कृ इ इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण आथामः टेः इकारस्य एत्वे एधाम् चकृ ए इति जाते इको यणचि इति यणि कृते एधाम् चक्रे इति स्थिते ततः मोऽनुस्वारे अनुस्वारस्य विकल्पेन परसवर्णे **एधाञ्चक्रे** इति परसवर्णाभावे **एधांचक्रे** इति च रूपे सिध्यतः।

एधांचकृवहे, एधांचकृमहे - एध्-धातोः पूर्ववत् लिटि आमि कृञः अनुप्रयोगे एधाम् कृ लिट् इति स्थिते उत्तमपुरुषद्विवचनविवक्षया एधाम् कृ वहि इति स्थितिः जाता। पूर्ववत् द्वित्वे अभ्यासकार्ये एधाम् च कृ वहि इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण आथामः टेः इकारस्य एत्वे एधाम् चकृ

वहे इति जाते मोऽनुस्वारे अनुस्वारस्य विकल्पेन परसवर्णे **एधाञ्चकृवहे** इति परसवर्णाभावे **एधांचकृवहे** इति च रूपे सिध्यतः। एवमेव उत्तमबहुवचने प्रक्रिया भवति। तेन **एधाञ्चकृमहे, एधांचकृमहे** द्वे रूपे सिध्यतः।

एध्-धातोः आमि ततश्च भूधातोः अनुप्रयोगे भूधातोः परं लिटः स्थाने परस्मैपदमेव भवति। अनुप्रयुक्तात् परस्मैपदं वा आत्मनेपदं वा इति विचारस्तु केवलं कृधातोरेव वर्तते। भूधातोः लिटि रूपसाधनप्रक्रिया तु पूर्ववदेव भवति। अतः विस्तरवारणाय नात्र प्रदर्श्यते। एवम् अस्-धातोः अनुप्रयोगविषयेऽपि।

कृ भू अस् एषाम् अनुप्रयोगेण निष्पन्नानि रूपाणि अधः प्रदत्तानि सन्ति।

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधाञ्चक्रे	एधाञ्चक्राते	एधाञ्चक्रिरे
मध्यमपुरुषे	एधाञ्चकृषे	एधाञ्चक्राथे	एधाञ्चकृढ्वे
उत्तमपुरुषे	एधाञ्चक्रे	एधाञ्चकृवहे	एधाञ्चकृमहे

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधाम्बभूव	एधाम्बभूवतुः	एधाम्बभूवुः
मध्यमपुरुषे	एधाम्बभूविथ	एधाम्बभूवथुः	एधाम्बभूव
उत्तमपुरुषे	एधाम्बभूव	एधाम्बभूविव	एधाम्बभूविम

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधामास	एधामासतुः	एधामासुः
मध्यमपुरुषे	एधामासिथ	एधामासथुः	एधामास
उत्तमपुरुषे	एधामास	एधामासिव	एधामासिम

पाठगतप्रश्नाः

१५. इजादेश्च गुरुमतोऽनृच्छ इति सूत्रस्य वृत्तिं लिखत।

१६. इजादेश्च गुरुमतोऽनृच्छ इति सूत्रेण किं विधीयते।

१७. आम्प्रत्ययः इत्यत्र कीदृशो बहुव्रीहिः।

१८. एध्-धातोः लिटि भूधातोः अनुप्रयोगे भूधातोः परं परस्मैपदम् आत्मनेपदं वा विधीयते।

१९. आमः इति सूत्रेण कस्य लुक् विधीयते।

२०. लिटस्तझयोरेशिरेच् इत्यत्र तस्य स्थाने एश् झस्य स्थाने च इरेच् इति किं सूत्रं नियमयति।

२१. एध्-धातोः लिटि प्रथमैकवचने कानि रूपाणि भवन्ति।

२२. एध्-धातोः लिटि अस्-धातुम् अनुप्रयुज्य रूपाणि लिखत।

२३. एधाञ्चकृढ्वे इत्यत्र ध्वमः धस्य ढविधायकं सूत्रं किम्।

एध्-धातोः लुटि रूपाणि

एध्-धातोः लुटि प्रथमपुरुषाणां रूपेषु न कोऽपि विशेषः अस्ति। तानि रूपाणि पूर्वसूत्रैरेव भवन्ति। तत्र स्यतासी लृलुटोः, लुटः प्रथमस्य डारौरसः, तासस्त्योर्लोपः रि च इति सूत्राणि प्रयुज्यन्ते। यथा -

एधिता - एध्-धातोः लुटि प्रथमपुरुषैकवचनविवक्षायां त-प्रत्यये एध् त इति स्थिते कर्तरि शप् इत्यनेन शपि प्रसक्ते स्यतासी लृलुटोः इत्यनेन शपं प्रबाध्य तास्-प्रत्यये एध् तास् त इति स्थिते तासः आर्धधातुकत्वाद् वलादित्वाच्च आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे आद्यावयवे एध् इतास् त इति स्थिते लुटः प्रथमस्य डा-रौ-रसः इति सूत्रेण तप्रत्ययस्य स्थाने डा इति सर्वादेशे अनुबन्धलोपे एध् इतास् आ इति स्थिते डित्त्वसामर्थ्याद् अभस्यापि टेर्लोपे एध् इत् आ इति स्थिते वर्णमेलने **एधिता** इति रूपं सिध्यति।

एवम् अन्येषु रूपेषु अपि ऊह्यम्। तत्र मध्यमपुरुषबहुवचने ध्वम्-प्रत्यये रूपे विशेषो विद्यते।

पूर्ववत् एध्-धातोः लुटि मध्यमपुरुषबहुवचने एध् इतास् ध्वम् इति स्थितिः जायते। तदा -

[२०.८] धि च॥ (८.२.२५)

सूत्रार्थः - धादौ प्रत्यये पर सस्य लोपः।

सूत्रव्याख्या - विधिसूत्रम् इदम्। सूत्रेऽस्मिन् द्वे पदे स्तः। धि इति सप्तम्यन्तं पदम्। च इति अव्ययपदम्। रात्सस्य इति सूत्रात् सस्य इति षष्ठ्यन्तं पदमायाति। संयोगान्तस्य लोपः इत्यस्मात् लोपः इति प्रथमान्तं पदमनुवर्तते। अत्र प्रत्यये इति अध्याहार्यम्। पदयोजना - सस्य लोपः धि प्रत्यये। धि प्रत्यये इत्यत्र तदादिविधिना धकारादौ प्रत्यये इत्यर्थः आयाति। सूत्रार्थो भवति - धादौ प्रत्यये सस्य लोपः भवति।

उदाहरणम् - एधिताध्वे।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण एधितास् ध्वम् इति स्थितौ ध्वमिति धादिप्रत्ययः परः अस्ति। अतः धि च इति सूत्रेण तासः अवयवस्य सकारस्य लोपे एधिताध्वम् इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण टेः एत्वे **एधिताध्वे** इति रूपं सिध्यति।

--

पूर्ववत् एध्-धातोः लुटि उत्तमपुरुषबहुवचने एध् इतास् इ इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण टेः एत्वे एधितास् ए इति स्थितिः जायते। तदा -

[२०.९] ह एति॥ (७.४.५२)

सूत्रार्थः - तासस्त्योः सस्य हः स्यादेति परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। ह (१/१) इति एति (७/१) इति द्वे पदे स्तः। तासस्त्योः इति षष्ठ्यन्तं पदं तासस्त्योर्लोपः इति सूत्रात् अनुवर्तते। सः इति षष्ठ्यन्तं पदं सः स्यार्धधातुके इति सूत्रात् अनुवर्तते। पदयोजना - तासस्त्योः सः ह एति। तासस्त्योः सः इति अवयवषष्ठी वर्तते। तेन तासस्त्योरवयवस्य इति अर्थः समायाति। सूत्रार्थो भवति - तासः अस्-धातोः अवयवः यः सः, तस्य एति परे हकारः स्यादिति।

उदाहरणम् - एधिताहे।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण एधितास् ए इति स्थितौ सकारस्य ह एति इति हकारे कृते **एधिताहे** इति रूपं सिद्धम्।

अन्येषु रूपेषु अपि प्रक्रिया स्वयमूह्या।

एधितास्वहे, एधितास्महे - एध्-धातोः पूर्ववत् प्रक्रियया उत्तमपुरुषद्विवचने वहि-प्रत्यये एधितास् वहि इति स्थिते टित आत्मनेपदानां टेरे इति सूत्रेण टेः एत्वे एधितास् वहे इति वर्णमेलने **एधितास्वहे** इति रूपं सिध्यति। एवमेव उत्तमबहुवचने **एधितास्महे** इति रूपं सिध्यति।

अस्य धातोः लुटि रूपाणि तावत् -

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधिता	एधितारौ	एधितारः
मध्यमपुरुषे	एधितासे	एधितासाथे	एधिताध्वे
उत्तमपुरुषे	एधिताहे	एधितास्वहे	एधितास्महे

एध्-धातोः लृटि रूपाणि

एध्-धातोः लृटि रूपेषु नूतनं किमपि सूत्रं नावश्यकम्। तानि रूपाणि पूर्वसूत्राणि आश्रित्य भवन्ति। अस्मिन् लकारे अत्र कानिचन कार्याणि यथा - लृटि स्यतासी लृलुटोः इति सूत्रेण स्यप्रत्ययः, आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमः, आदेशप्रत्यययोः इत्यनेन स्यस्य षकारः, टित आत्मनेपदानां टेरे इति एत्वम् इति भवति।

एधिष्यते - एध्-धातोः वर्धनरूपव्यापारः भविष्यत्काले विवक्षितः तदा एध्-धातोः लृटि त-प्रत्यये शपं प्रबाध्य स्यप्रत्यये इडागमे स्यस्य सकारस्य मूर्धन्यादेशे एधिष्यत इति स्थिते टित आत्मनेपदानां टेरे इत्यनेन एत्वे **एधिष्यते** इति रूपं सिध्यति। एवमन्यानि रूपाणि ऊह्यानि।

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधिष्यते	एधिष्येते	एधिष्यन्ते
मध्यमपुरुषे	एधिष्यसे	एधिष्येथे	एधिष्यध्वे
उत्तमपुरुषे	एधिष्ये	एधिष्यावहे	एधिष्यामहे

एध्-धातोः लोटि रूपाणि

सूत्रावतरणम् - एध्-धातोः लोटि लोटः स्थाने प्रथमैकवचनविवक्षायां त-प्रत्यये शपि कृते अनुबन्धलोपे टित आत्मनेपदानां टेरे इत्यनेन एत्वे एधते इति स्थितिः जायते। तदा - एकारस्य स्थाने आम्-विधानार्थं सूत्रमिदमारभ्यते।

[२०.१०] आमेतः॥ (३.४.९०)

सूत्रार्थः - लोट एकारस्य आम् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। आम् (१/१) एतः (६/१) इति पदद्वयमस्ति अस्मिन् सूत्रे। लोटो लङ्वत् इति सूत्रात् लोटः इति षष्ठ्यन्तं पदमनुवर्तते। लोटः इति एतः इति अवयवषष्ठी। सूत्रार्थो भवति - लोटः अवयवस्य एकारस्य आम् स्यात्।

उदाहरणम् - एधताम् एधेताम् एधन्ताम् एधेथाम्।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तरूपेण एधते इति स्थिते आमेतः इति सूत्रेण ते इति लोटः अवयवस्य एकारस्य स्थाने आम् इत्यादेशे एधताम् इति रूपं सिध्यति। प्रथमद्विवचने एधेते इति स्थिते एकारस्य आम्-विधानेन एधेताम् इति रूपम् सिध्यति। प्रथमबहुवचने एधन्ते इति स्थिते आमि विहिते

एधन्ताम् इति रूपं सिध्यति। तथैव मध्यमपुरुषद्विवचने एधेथे इति स्थिते आमि कृते एधेथाम् इति रूपं सिध्यति।

एधस्व - एध्-धातोः मध्यमपुरुषैकवचने थासि थासः से इत्यादेशे शपि एधसे इति स्थिते आमेतः इति सूत्रेण एकारस्य स्थाने आमादेशः प्राप्तः। तदा -

[२०.११] सवाभ्यां वामौ॥ (३.४.९१)

सूत्रार्थः - सवाभ्यां परस्य लोडेतः क्रमाद् वामौ स्तः।

सूत्रव्याख्या - विधिसूत्रमिदम्। सवाभ्याम् (५/२), वामौ (१/२) इति पदद्वयं सूत्रेऽस्मिन् वर्तते। लोटो लङ्वत् इति सूत्रात् लोटः इति षष्ठ्यन्तं पदमनुवर्तते। आमेतः इति सूत्रात् एतः इति षष्ठ्यन्तं पदमनुवर्तते। वश्च अम् च वामौ इति इतरेतरयोगद्वन्द्वः। ताभ्याम् सवाभ्याम्। सूत्रार्थो भवति - सकारात् वकाराच्च परस्य लोटः एकारस्य स्थाने क्रमेण व इति अम् इति आदेशः भवति।

उदाहरणम् - एधस्व, एधध्वम्।

सूत्रार्थसमन्वयः - पूर्वोक्तरूपेण एधसे इति स्थितौ से इत्यस्मिन् सकारात् परस्य एकारस्य स्थाने प्राप्तम् आम्-आदेशम् प्रबाध्य अनेन प्रकृतसूत्रेण एकारस्य स्थाने व इत्यादेशे कृते **एधस्व** इति रूपं भवति।

एधध्वम् - एध्-धातोः मध्यमपुरुषबहुवचने ध्वमि शपि टेरेत्वे एधध्वे इति स्थिते आमेतः इति सूत्रेण एकारस्य स्थाने आमादेशः प्राप्तः। तत्र ध्वे इत्यस्मिन् वकारात् परस्य एकारस्य स्थाने प्राप्तम् आम्-आदेशम् प्रबाध्य अनेन प्रकृतसूत्रेण एकारस्य स्थाने अम् इत्यादेशे कृते **एधध्वम्** इति रूपं भवति।

एधै - एध्-धातोः उत्तमपुरुषैकवचने इ-प्रत्यये शपि टेरेत्वे एध ए इति स्थिते आमेतः इति सूत्रेण एकारस्य स्थाने आमादेशः प्राप्तः। तदा -

[२०.१२] एत ऐ॥ (३.४.९३)

सूत्रार्थः -लोडुत्तमस्य एतः ऐ स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। एतः (६/१), ऐ (१/१) इति पदद्वयं सूत्रेऽस्मिन् विद्यते। लोटो लङ्वत् इति सूत्रात् लोटः इति षष्ठ्यन्तं पदमनुवर्तते। आडुत्तमस्य पिच्च इति सूत्रात् उत्तमस्य इति षष्ठ्यन्तं पदमनुवर्तते। सूत्रार्थो भवति - लोडवयवस्य एत ऐ स्यादिति।

उदाहरणम् - एधै एधावहै एधामहै।

सूत्रार्थसमन्वयः - ऊर्ध्वमुक्तरूपेण एध ए इति स्थिते एत ऐ इति सूत्रेण प्रत्ययस्य एकारस्य स्थाने ऐकारादेशे एध ऐ इति स्थितिः जायते। ततश्च आडुत्तमस्य पिच्च इति सूत्रेण आडागमे एध आ ऐ इति जाते आटश्च इति सूत्रेण आ+ऐ इति अनयोः स्थाने वृद्धौ एकादेशे ऐकारे एध ऐ इति जाते वृद्धिरेचि इति सूत्रेण अकार-ऐकारयोः स्थाने वृद्धौ एकादेशे ऐकारे **एधै** इति रूपं सिध्यति। उत्तमपुरुषद्विवचने एध्

अ वहि इत्यत्र एत्वे एत ऐ इत्यनेन ऐत्वे आडागमे एध् अ आवहै इति स्थिते अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घैकादेशे **एधावहै** इति रूपं सिध्यति। एवमेव **एधामहै** इति रूपमपि भवति।

एध्-धातोः लोटि रूपाणि -

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधताम्	एधेताम्	एधन्ताम्
मध्यमपुरुषे	एधस्व	एधेथाम	एधध्वम्
उत्तमपुरुषे	एधै	एधावहै	एधामहै

एध्-धातोः लङि रूपाणि

एध्-धातोः लङि रूपाणि साधयितुम् किमपि नूतनं सूत्रं नावश्यकम्। एकं नायकरूपम् अधः प्रदर्श्यते। अन्यानि रूपाणि स्वयमूह्यानि। लङि कार्याणि तावत् लङः ङित्त्वात् टित्त्वाभावात् टित आत्मनेपदानां टेरे इति नैव प्रवर्तते। आत्मनेपदविधानं शप् इत्यादीनि एव कार्याणि। एध्-धातोः अजादित्वात् लुङ्लृङ्लङ्क्ष्वडुदात्तः इत्यस्य बाधकतया आडजादीनामिति सूत्रं प्रवर्तते।

ऐधत - एध्-धातोः अनद्यतनभूतार्थे लङि एध् ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायां त-प्रत्यये एध् त इति स्थिते कर्तरि शप् इति शपि एध् अ त इति स्थिते लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अटि प्राप्ते अस्य धातोः अजादित्वात् अटं प्रबाध्य आडजादीनामित्यनेन सूत्रेण आटि आद्यावयवे आ ए आटश्च इत्यनेन आकार-एकारयोः स्थाने वृद्धौ एकादेशे **ऐधत** इति रूपं सिध्यति। अन्येषु रूपेषु विशेषः तावद् यथा - उत्तमपुरुषे एकवचने इट् शप् आट् भवति, तदा आ एध् अ इ इति स्थितिः। अ इ इत्यनयोः गुणः। आ ए इत्यनयोः आटश्च इति वृद्धिः। द्विवचने आ एध् अ वहि इति स्थिते अतो दीर्घो यञि इति विशेषकार्यमत्र भवति। तेन ऐधावहि ऐधामहि इति रूपे भवतः।

एध्-धातोः अनद्यतनभूतार्थे लङि रूपाणि तावत् -

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	ऐधत	ऐधेताम्	ऐधन्त
मध्यमपुरुषे	ऐधथाः	ऐधेथाम्	ऐधध्वम्
उत्तमपुरुषे	ऐधे	ऐधावहि	ऐधामहि

एध्-धातोः विधिलिङि रूपाणि

अधुना धातोरस्य लिङि रूपाणि प्रदर्श्यन्ते। लिङ् विधिलिङ् आशीर्लिङ् इति भेदेन द्विविधमिति ज्ञायते एव। तत्रादौ विधिलिङि रूपाणि दर्श्यन्ते।

[२०.१३] लिङः सीयुट्॥ (३.४.१०२)

सूत्रार्थः - लिङः सीयुडागमः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। सूत्रेऽस्मिन् द्वे पदे स्तः। लिङः इति षष्ठ्यन्तं पदम्, सीयुट् इति प्रथमान्तं पदम्। सीयुटि उकारः उच्चारणार्थकः तथा टकारः इत्संज्ञकः। आद्यन्तौ टकितौ इति नियमेन सीयुट् लिङः आद्यावयवो भवति। यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रेण यासुट् परस्मैपदस्य विहितः अस्ति। अतः पारिशेष्यात् सीयुट् आत्मनेपदस्य लिङः भवति।

उदाहरणम् - एधेत। एधेयाताम्।

सूत्रार्थसमन्वयः - एध्-धातोः विधिलिङि प्रथमपुरुषैकवचने तप्रत्यये एध् त इति स्थिते लिङः सीयुट् इति सूत्रेण तप्रत्ययस्य सीयुडागमे टित्त्वात् आद्यावयवे एध् सीय् त इति स्थिते कर्तरि शप् इति शपि अनुबन्धलोपे एध् अ सीय् त इति स्थितिः निष्पन्ना। इदानीं लिङः सलोपोऽनन्त्यस्य इति सूत्रेण अनन्त्यस्य सीयुडवयवस्य सकारस्य लोपे एध् अ ईय् त इति स्थिते लोपो व्योर्वलि इति सूत्रेण तकाररूपे वलि परे यकारस्य लोपे अकारस्य ईकारस्य च स्थाने गुणैकादेशे एकारे कृते **एधेत** इति रूपं सिद्धम्।

एध्-धातोः विधिलिङि प्रथमपुरुषद्विवचने आताम्-प्रत्यये एध् आताम् इति स्थिते लिङः सीयुट् इति सूत्रेण आतामः सीयुडागमे टित्त्वात् आद्यावयवे एध् सीय् आताम् इति स्थिते कर्तरि शप् इति शपि अनुबन्धलोपे एध् अ सीय् आताम् इति स्थितिः निष्पन्ना। तत्र लिङः सलोपोऽनन्त्यस्य इति सूत्रेण अनन्त्यस्य सीयुडवयवस्य सकारस्य लोपे एध् अ ईय् आताम् इति स्थिते अकारस्य ईकारस्य स्थाने गुणैकादेशे एकारे कृते **एधेयाताम्** इति रूपं सिद्धम्।

एध्-धातोः विधिलिङि प्रथमपुरुषबहुवचने झ-प्रत्यये एध् झ इति स्थितिः जाता। तदा -

[२०.१४] झस्य रन्॥ (३.४.१०५)

सूत्रार्थः - लिङो झस्य रन् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। झस्य (६/१) इति रन् (१/१) इति पदद्वयं सूत्रेऽस्मिन् विद्यते। लिङः सीयुट् इति सूत्रात् लिङः इति षष्ठ्यन्तं पदमनुवर्तते। झस्य इति स्थानषष्ठी। रन् हि अनेकाल्। अत एव अनेकाल्शित् सर्वस्य इति परिभाषया सम्पूर्णस्य झस्य स्थाने भवति। सूत्रार्थो भवति - लिङः स्थाने विहितस्य झस्य स्थाने रन् इत्यादेशो भवति।

उदाहरणम् - एधेरन्।

सूत्रार्थसमन्वयः - ऊर्ध्वमुक्तप्रकारेण एध् झ इति स्थितिः। तत्र झस्य रन् इति सूत्रेण रन्प्रत्यये नस्य इत्संज्ञायां कर्तव्यायां न विभक्तौ तुस्माः इति सूत्रनियमात् नस्य इत्संज्ञालोपयोरभावे एध् रन् इति स्थिते लिङः सीयुट् इति सूत्रेण रनः सीयुडागमे टित्त्वात् आद्यावयवे एध् सीय् रन् इति स्थिते कर्तरि शप् इति शपि अनुबन्धलोपे एध् अ सीय् रन् इति स्थितिः निष्पन्ना। तत्र लिङः सलोपोऽनन्त्यस्य इति सूत्रेण अनन्त्यस्य सीयुडवयवस्य सकारस्य लोपे एध् अ ईय् रन् इति स्थिते अकारस्य ईकारस्य स्थाने गुणैकादेशे एकारे कृते लोपो व्योर्वलि इति यलोपे **एधेरन्** इति रूपं सिद्धम्।

एधेथाः - एध्-धातोः मध्यमपुरुषैकवचने थास्-प्रत्यये एध् थास् इति स्थिते पूर्ववत् थासः सीयुट्, शप्, सीयुटः सययोः लोपः, अ+ई इत्यनयोः गुणः, पदान्तस्य सस्य रुत्वम् विसर्गः च इति कार्याणि भवन्ति। तदा **एधेथाः** इति रूपं निष्पद्यते।

एधेयाथाम् - एध्-धातोः मध्यमपुरुषद्विवचने आथाम्-प्रत्यये एध् आथाम् इति स्थिते पूर्ववत् आथामः सीयुट्, शप्, सीयुटः सलोपः, अ+ई इत्यनयोः गुणः च इति कार्याणि भवन्ति। तदा **एधेयाथाम्** इति रूपं निष्पद्यते।

एधेध्वम् - एध्-धातोः मध्यमपुरुषबहुवचने ध्वम्-प्रत्यये एध् ध्वम् इति स्थिते पूर्ववत् ध्वमः सीयुट्, शप्, सीयुटः सययोर्लोपः, अ+ई इत्यनयोः गुणः च इति कार्याणि भवन्ति। तदा **एधेध्वम्** इति रूपं निष्पद्यते।

एधेय - एध्-धातोः उत्तमपुरुषैकवचने इट्-प्रत्यये एध् इ इति स्थितिः जायते। तदा -

[२०.१५] इटोऽत्॥ (३.४.१०६)

सूत्रार्थः - लिङादेशस्य इटः अत् स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। इटः (६/१), अत् (१/१) इति पदद्वयमस्ति अस्मिन् सूत्रे। लिङः सीयुट् इति सूत्रात् लिङः इति षष्ठ्यन्तं पदमनुवर्तते। अत्र तकार उच्चारणार्थः। अत्र इटः इति स्थानषष्ठी वर्तते। अत एव तस्य स्थाने इट् इति समायाति। सूत्रार्थो भवति - लिङः स्थाने विहितस्य इटः अ इत्यादेशः स्यात्।

उदाहरणम् - एधेय।

सूत्रार्थसमन्वयः - उपरि उक्तरूपेण एध् इ इति स्थिते लिङः स्थाने विहितस्य इटः स्थाने अ इत्यादेशे एध् अ इति स्थितिः जायते। ततश्च पूर्ववत् अप्रत्ययस्य सीयुट्, शप्, सीयुटः सलोपः, अ+ई इत्यनयोः गुणः च इति कार्याणि भवन्ति। तदा **एधेय** इति रूपं निष्पद्यते।

एधेवहि - एध्-धातोः उत्तमपुरुषद्विवचने वहि-प्रत्यये एध् वहि इति स्थिते पूर्ववत् वहेः सीयुट्, शप्, सीयुटः सययोर्लोपः, अ+ई इत्यनयोः गुणः च इति कार्याणि भवन्ति। तदा **एधेवहि** इति रूपं निष्पद्यते। तथैव उत्तमबहुवचने **एधेमहि** इति रूपं सिध्यति।

	एकवचने	द्विवचने	बहुवचने
प्रथमपुरुषे	एधेत	एधेयाताम्	एधेरन्
मध्यमपुरुषे	एधेथाः	एधेयाथाम्	एधेध्वम्
उत्तमपुरुषे	एधेय	एधेवहि	एधेमहि

एध्-धातोः आशीर्लिङि रूपाणि

इदानीम् आशीर्लिङि रूपाणि साध्यते। अत्र बहूनि कार्याणि विधिलिङि यथा तथा एव। तथापि अस्य लिङाशिषि इति सूत्रेण लकारस्य अस्य आर्धधातुकत्वात् विशेषाः केचन सन्ति।

एध्-धातोः आशिषि लिङ्लोटौ इति सूत्रेण आशिषि लिङि प्रथमपुरुषैकवचने तप्रत्यये एध् त इति स्थिते लिङः सीयुट् इति सूत्रेण तप्रत्ययस्य सीयुडागमे टित्त्वात् आद्यावयवे एध् सीय् त इति स्थितिः जाता। तदा -

[२०.१६] सुट् तिथोः॥ (३.४.१०७)

सूत्रार्थः - लिङ्ङवयवयोः तथयोः सुट् स्यात्।

सूत्रव्याख्या - विधिसुत्रमिदम्। सूत्रेऽस्मिन् द्वे पदे स्तः। तत्र सुट् इति विधेयबोधकं प्रथमान्तं पदम्। तिथोः इति षष्ठीद्विवचनान्तं पदम्। तिश्च थ् च इति तिथौ, तयोः तिथोः इति इतरेतरयोगद्वन्द्वसमासः। तकारथकारयोरिति तदर्थः। अत्र अवयवषष्ठी विद्यते। अतः लिङः अवयवस्य तकारस्य थकारस्य इत्यर्थो लभ्यते। सूत्रार्थो भवति - लिङः अवयवस्य तकारस्य थकारस्य च सुट् आगमः भवति। सुट् टित्करणात् लिङ्गात् तिथोः आद्यावयवः इति सिध्यति।

उदाहरणम् - एधिषीष्ट।

सूत्रार्थसमन्वयः - एध्-धातोः आशीर्लिङि तप्रत्यये एध् सीय् त इति स्थितिः निष्पन्ना। अत्र लिङवयवस्य तकारस्य अनेन सूत्रेण सुटि आद्यावयवत्वे च एध् सीय् स् त इति स्थितिः भवति। यदागमपरिभाषया अत्र सीय्+स्+त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय्+स्+त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे आद्यावयवे एध् इ सीय् स् त इति स्थितिः जायते। तदा लोपो व्योर्वलि इत्यनेन सीयुटः यकारस्य लोपे एधि सी स् त इति स्थिते सीयुटः सकारस्य तथा सुटः सकारस्य यथाक्रम् इकाररूपात् ईकाररूपाच्च इणः परत्वात् अपदान्तत्वात् प्रत्ययावयवत्वात् आदेशप्रत्ययययोः इति सूत्रेण मूर्धन्यादेशे षकारे एधिषीष् त इति स्थिते ष्टुना ष्टुः इत्यनेन तकारस्य ष्टुत्वे टकारे **एधिषीष्ट** इति रूपं सिध्यति। अस्मिन् लकारे लिङादेशस्य आर्धधातुकत्वात् कर्तरि शप् इति शप् न भवति। सकारः सार्वधातुकावयवः नास्ति, अतः लिङः सलोपोऽनन्त्यस्य इति सलोपो न भवति।

एधिषीयास्ताम् - एध्-धातोः आशीर्लिङि प्रथमपुरुषद्विवचने आताम्-प्रत्यये एध् आताम् इति स्थितिः। ततः सीयुडागमे सुडागमे च एध् सीय् आस्ताम् इति स्थिते सीय्+आस्ताम् इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे आद्यावयवे एध् इ सीय् आस्ताम् इति स्थितिः जायते। ततश्च सीयुटः सकारस्य मूर्धन्यादेशे षकारे एधिषीय् आस्ताम् इति स्थिते वर्णमेलने **एधिषीयास्ताम्** इति रूपं सिध्यति।

एधिषीरन् - एध्-धातोः आशीर्लिङि प्रथमपुरुषबहुवचने झ-प्रत्यये एध् झ इति स्थितिः। ततः झस्य रन्, लिङः सीयुट् , इडागमः भवन्ति। तदा एध् इसीय् रन् इति स्थिते यलोपे कृते सीयुटः सकारस्य मूर्धन्यादेशे षकारे एधिषी रन् इति स्थिते वर्णमेलने **एधिषीरन्** इति रूपं सिध्यति।

एधिषीष्ठाः - एध्-धातोः मध्यमपुरुषैकवचने थास्-प्रत्यये एध् थास् इति स्थितिः। ततः थासः सीयुट्, इडागमः च भवतः। तदा एध् इसीय् थास् इति स्थिते सुट् तिथोः इति सुटि एध् इसीय् स् थास् इति जाते यलोपे कृते सीयुटः सकारस्य, सुटः सस्य च मूर्धन्यादेशे षकारे एधिषीष् थास् इति स्थिते ष्टुना ष्टुः इत्यनेन थासः थस्य ष्टुत्वे ठकारे एधिषीष्ठास् इति स्थिते रुत्वे विसर्गे च कृते **एधिषीष्ठाः** इति रूपं सिध्यति।

एधिषीयास्थाम् - एध्-धातोः आशीर्लिङि मध्यमपुरुषद्विवचने आथाम्-प्रत्यये एध् आथाम् इति स्थितिः। पूर्ववत् सीयुट् इट् सुट् सीयुटः सकारस्य षकारः इति कार्याणि भवन्ति। तदा **एधिषीयास्थाम्** इति रूपं सिध्यति।

एधिषीढ्वम् - एध्-धातोः आशीर्लिङि मध्यमपुरुषबहुवचने ध्वम्-प्रत्यये एध् ध्वम् इति स्थितिः। पूर्ववत् सीयुट् इट् सीयुटः सकारस्य षकारः इति कार्याणि भवन्ति। तदा एधिषीध्वम् इति स्थिते इणः षीध्वंलुङ्लिटां धोऽङ्गात् इति सूत्रेण धस्य ढत्वे **एधिषीढ्वम्** इति रूपं सिध्यति।

एधिषीय - एध्-धातोः उत्तमपुरुषैकवचने इट्-प्रत्यये एध् इ इति स्थितिः। ततः इटोऽत् इति इटः अत् , तस्य सीयुट्, इडागमः, सीयुटः सस्य मूर्धन्यः षकारः इति कार्याणि भवन्ति। तदा **एधिषीय** इति रूपं सिध्यति।

एधिषीवहि, एधिषीमहि - एध्-धातोः उत्तमपुरुषद्विवचने वहि-प्रत्यये एध् वहि इति स्थितिः। ततः वहेः सीयुट्, इडागमः, सीयुटः सस्य मूर्धन्यः षकारः इति कार्याणि भवन्ति। तदा **एधिषीवहि** इति रूपं सिध्यति। बहुवचने च एवमेव **एधिषीमहि** इति रूपं सिध्यति।

एध्-धातोः आशीर्लिङि नव रूपाणि तावत् निम्नलिखितानि -

	एकवचने	**द्विवचने**	**बहुवचने**
प्रथमपुरुषे	एधिषीष्ट	एधिषीयास्ताम्	एधिषीरन्
मध्यमपुरुषे	एधिषीष्ठाः	एधिषीयास्थाम्	एधिषीढ्वम्
उत्तमपुरुषे	एधिषीय	एधिषीवहि	एधिषीमहि

एध्-धातोः लुङि रूपाणि

ऐधिष्ट - भूते एध्-धात्वर्थव्यापारः इति विवक्षायां लुङ् इति सूत्रेण लुङि लुङः स्थाने प्रथमैकवचनविवक्षायां तप्रत्यये एध् त इति स्थिते च्लि लुङि इति च्लिप्रत्यये च्लेः च्लेः सिच् इति सिचि अनुबन्धलोपे एध् स् त इति स्थितिः भवति। सिचः आर्धधातुकत्वात् स्वयं वलादित्वात् आर्धधातुकस्येड् वलादेः इति इटि आद्यावयवे एध् इस् त इति जायते। एधः अजादित्वात् आडजादीनाम् इत्यनेन आडागमे अनुबन्धलोपे आ एध् इस् त इति जाते आकार-एकारयोः स्थाने आटश्च इति वृद्धौ एकादेशे ऐधिस् त इति स्थिते सकारस्य आदेशप्रत्यययोः इति सूत्रेण मूर्धन्यादेशे षकारे तकारस्य च ष्टुना ष्टुः इति सूत्रेण ष्टुत्वे टकारे **ऐधिष्ट** इति रूपं सिध्यति। एवमेव प्रथमपुरुषद्विवचने आताम्-प्रत्यये प्रक्रियाकार्ये **ऐधिषाताम्** इति रूपं सिध्यति।

ऐधिषत - एध्-धातोः लुङि प्रथमपुरुषबहुवचनविवक्षायाम् झप्रत्यये एध् झ इति स्थिते च्लौ च्लेः सिचि सिचः इडागमे एध् इस् झ इति स्थिते झोऽन्तः इत्यनेन झस्य स्थाने अन्तादेशः प्राप्तः। तदा -

[२०.१७] आत्मनेपदेष्वनतः॥ (७.१.५)

सूत्रार्थः - अनकारात् परस्य आत्मनेपदेषु झस्य अत् इत्यादेशः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। आत्मनेपदेषु (७/३), अनतः (५/१) इति च पदद्वयम् अस्मिन् सूत्रे विराजते। झः इति षष्ठ्यन्तं पदं झोऽन्तः इति सूत्रादायाति। अत् इति प्रथमान्तं पदम् अदभ्यस्तात् इति सूत्रात् अनुवर्तते। अनतः इति न अत् अनत् तस्मात् अनतः इति नञ्-तत्पुरुषसमासः। सूत्रार्थो भवति - अद्भिन्नात् वर्णात् परस्य आत्मनेपदसंज्ञकस्य झकारस्य स्थाने अत् इति आदेशो भवतीति। सूत्रमिदम् झोऽन्तः इत्यस्य अपवादः। तेन अकारः केवलस्य झकारस्य स्थाने भवति। तेन झकारोत्तरः अकारः यथायथं श्रूयते एव।

उदाहरणम् - ऐधिषत।

सूत्रार्थसमन्वयः - ऊर्ध्वमुक्तरूपेण एध् इस् झ इति स्थिते झोऽन्तः इत्यनेन झस्य स्थाने अन्तादेशः प्राप्तः। तत्र झकारस्य अनकारात् सकारात् परोऽस्ति। अतः प्रकृतसूत्रेण झकारस्य स्थाने अत् इत्यादेशे एध् इस् अत् अ इति स्थितिः भवति। ततश्च सस्य आदेशप्रत्यययोः इत्यनेन मूर्धन्यादेशे एध् इष् अत् इति स्थिते आडजादीनाम् इति आडागमे आटश्च इति वृद्धौ **ऐधिषत** इति रूपं सिध्यति।

ऐधिष्ठाः - एध्-धातोः लुङि मध्यमपुरुषैकवचनविवक्षायाम् थास्-प्रत्यये एध् थास् इति स्थिते च्लौ च्लेः सिचि सिचः इडागमे एध् इस् थास् इति स्थिते अङ्गस्य आडागमे आटश्चेति वृद्धौ सिचः सस्य मूर्धन्यादेशे षकारे ऐधिष् थास् इति स्थिते ष्टुना ष्टुः इति सूत्रेण थासः थकारस्य ष्टुत्वे ठकारे पदान्तस्य सस्य रुत्वे विसर्गे एधिष्ठाः इति रूपं सिध्यति।

एध्-धातोः लुङ्लकारे अधोरूपाणि -

	एकवचने	द्विवचने	बहुवचने
प्रथमपुरुषे	ऐधिष्ट	ऐधिषाताम्	ऐधिषत
मध्यमपुरुषे	ऐधिष्ठाः	ऐधिषाथाम्	ऐधिढ्वम्
उत्तमपुरुषे	ऐधिषि	ऐधिष्वहि	ऐधिष्महि

एध्-धातोः लृङि रूपाणि

लृङि साधनार्थं न किमपि इतोऽपि नूतनं सूत्रमपेक्षितम्। अत्र धातोः अजादित्वात् लुङ्लङ्लृङ्ष्वडुदात्तः इति सूत्रं बाधित्वा आडजादीनाम् इति सूत्रं प्रवर्तते। तथा च स्यतासी लृलुटोः इति सूत्रेण स्यप्रत्ययः भवति।

एध्-धातोः लृङि तप्रत्यये स्यतासी लृलुटोः इति स्यप्रत्यये तस्य आर्धधातुकत्वात् इडागमे एध् इस्य त इति स्थिते अङ्गस्य आडजादीनाम् इति सूत्रेण आडागमे आटश्च इति वृद्धौ ऐध् इस्यत इति स्थिते स्यस्य सस्य आदेशप्रत्यययोः इत्यनेन मूर्धन्यादेशे ऐध् इष्यत इति स्थिते वर्णमेलने ऐधिष्यत इति रूपं भवति।

अस्य धातोः लृङि रूपाणि तावत् -

	एकवचने	द्विवचने	बहुवचने
प्रथमपुरुषे	ऐधिष्यत	ऐधिष्येताम्	ऐधिष्यन्त
मध्यमपुरुषे	ऐधिष्यथाः	ऐधिष्येथाम्	ऐधिष्यध्वम्
उत्तमपुरुषे	ऐधिष्ये	ऐधिष्यावहि	ऐधिष्यामहि

पाठगतप्रश्नाः३

२४. एधिता इत्यत्र इड्विधायकं सूत्रं किम्।

२५. धि च इत्यत्र धादौ प्रत्यये इत्यर्थः कथम् आगच्छति।

२६. धि च इत्यत्र प्रत्यये इति कस्मात् सूत्रात् आगच्छति।

२७. एधिताहे इत्यत्र तासः सस्य हकारः केन विधीयते।

२८. लोटः एकारस्य आम्विधायकं सूत्रं किम्।

२९. एधताम् इत्यत्र केन सूत्रेण आम् विधीयते।

३०. एधस्व इत्यत्र एकारस्य वविधायकं सूत्रं किम्।

३१. एध्-धातोः लोटि उत्तमपुरुषैकवचने एधे इति स्थिते किं सूत्रं प्रवर्तते।

३२. एध्-धातोः आडागमः केन सूत्रेण विधीयते।

३३. आ एध् ल् इति स्थिते वृद्धिविधायकं सूत्रम् किम्।

३४. लिङि झस्य रन्-विधायकं सूत्रं किम्।

३५. एधेरन् इत्यत्र झेर्जुस् कथं न भवति।

३६. एधिषीष्ट इत्यत्र सस्य षकारः केन सूत्रेण विधीयते।

३७. एध्-धातोः लुङि ध्वमि किं रूपं भवति।

३८. आत्मनेपदेष्वनतः इति सूत्रेण किं विधीयते।

पाठसारः

अस्मिन् पाठे मुख्यः विषयः हि आत्मनेपदिनां धातूनां रूपाणि तथा आत्मनेपदिधातूनां रूपाणां साधनार्थं यानि सूत्राणि अपेक्षितानि तानि च सूत्राणि। अत्र एध्-धातुः अत्र प्रतीकरूपेण उपस्थापितः। अस्य ज्ञानेन बहूनां तादृशानाम् आत्मनेपदिधातूनां रूपाणि साधयितुं शक्यन्ते।

एध्-धातुः एधृँ वृद्धौ इत्याकारेण अयं धातुपाठे पठितः अस्ति। वृद्ध्यर्थकः अयं धातुः अनुदात्तेत्, तेन अनुदात्तङित आत्मनेपदम् इति सूत्रेण तस्मात् धातोः आत्मनेपदसंज्ञकाः प्रत्ययाः विधीयन्ते। अकर्मकोऽयं धातुः। कर्तरि भावे च प्रत्यया विधीयन्ते न तु कर्मणि। अयं धातुः सेट्।

अत्र आदितः लडादीनां दशलकाराणां रूपाणि एव साधितानि सन्ति। तत्र लटि त्रीणि नूतनानि सूत्राणि सन्ति। तत्र टित आत्मनेपदानां टेरे इति सूत्रं टिल्लकारेषु प्रवर्तते। आतो ङितः इति सूत्रेण ङिताम् आकारस्य इय् इति आदेशो भवति। तृतीयं सूत्रं थासः से इति टिल्लकारेषु विधीयमानोऽयं से। तस्य अनेकाल्त्वात् अनेकाल्शित्सर्वस्य इति सूत्रेण सर्वस्य स्थाने आदेशो विधीयते।

एध्-धातुः गुरुमान् इजादिश्च। अतः अस्माद् धातोः लिटि वैशिष्ट्यम् यद् एध् धातोः आम्-प्रत्ययः भवति। तेन कृभ्वस्धातूनाम् अनुप्रयोगो भवति। आमः प्रकृतिभूताद् धातोः यदि आत्मनेपदं विधीयते तर्हि अनुप्रयुज्यमानात् कृधातोः परमपि आत्मनेपदमेव विधीयते। तत्र आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य इति सूत्रं विधायकम्। लिटः स्थाने विहितस्य तप्रत्ययस्य एश् इति

झप्रत्ययस्य इरेच् इति आदेशौ लिटस्तझयोरेशिरेच् इति सूत्रेण भवतः। लिटि मध्यमबहुवचने इणः षीध्वंलुङ्लिटां धोऽङ्गात् इति सूत्रेण धस्य मूर्धन्यादेशो विधीयते।

लुटि रूपेषु स्यतासी लृलुटोः इति तास्प्रत्ययो भवति। तथा च आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमो भवतीति सर्वेषु रूपेषु साधारणम्। धादौ प्रत्यये पर सस्य लोपः धि च इति सूत्रेण भवति। एति परे तासस्त्योः सस्य हकारो ह एति इति सूत्रेण विधीयते।

लृटि रूपेषु स्यतासी लृलुटोः इति स्यप्रत्ययो भवति। अत्रापि आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमो भवतीति सर्वेषु रूपेषु साधारणम्। अन्यः कोऽपि विशेषो न विद्यते।

लोटि रूपाणां साधनार्थं त्रीणि सूत्राणि अत्र आगतानि। तत्र आमेतः इति एकारस्य आम्-विधानार्थम् सूत्रम्। सवाभ्यां वामौ इति सूत्रेण लोटः स्थाने विहितस्य सकारात् परस्य एकारस्य स्थाने व इति वकारात् परस्य एकारस्य स्थाने अम् इति विधयेते। उत्तमपुरुषे एकारस्य ऐकारविधानार्थम् एत ऐ इति सूत्रमायाति।

लङि तु लुङ्लङ्लृङ्क्ष्वडुदात्त इति सूत्रं बाधित्वा एध्-धातोः अजादित्वात् आडजादीनाम् इति सूत्रं प्रवर्तते। ततश्च आटश्च इति विशेषसूत्रेण वृद्धिर्विधीयते।

विधिलिङि सीयुडागमो विशेषो विद्यते। तत्र अनन्त्यस्य सकारस्य लिङः सलोपोऽनन्त्यस्य इति सूत्रेण सकारस्य लोपो भवति। झप्रत्यये च झेर्जुस् इत्यस्य अपवादतया झस्य रन् इति सूत्रं प्रवर्तते। इटोऽत् इति सूत्रेण लिङादेशस्य इटः अ विधीयते।

आशीर्लिङि सुट् तिथोः इति सूत्रेण तकारस्य थकारस्य च सुट् इति आगमो भवति।

लुङ्लकारस्य झस्य स्थाने अत् विधीयते। सर्वत्र आडागमः च्लिः च्लेः स्थाने सिच् सिचश्च इडागमः सिचः मूर्धन्यादेशः इत्यादीनि कार्याणि भवन्ति।

लृङि रूपसाधनेषु स्यतासी लृलुटोः इत्यनेन स्यप्रत्ययः, अङ्गस्य अट् आट् इति विधानम्, स्यस्य इडागमः, स्यस्य सस्य षकारः इति कार्याणि भवन्ति।

योग्यतावर्धनम्

अत्र पाठे केचन विशेषविषयाः सूत्रगताः प्रक्रियागता वा सन्ति। ते च अत्र आलोच्यन्ते।

अचोऽन्त्यादि टि इति टिसंज्ञाविधायकं सूत्रम्। एकस्मिन् पदे बहूनि अचः भवन्ति। तत्र अच्सु यः अन्तिमः सः आदिः यस्य भागस्य स टिसंज्ञको भवति। यथा एधत इत्यत्र तकारोत्तरः अकारः अन्तिमः अच् सः टिसंज्ञको भवति। तस्मात् परं कोऽपि हल्वर्णः भवति चेत् स एको वा भवतु एकाधिको वा भवतु सर्वं मिलित्वा टिसंज्ञां प्राप्नोति।

सार्वधातुकमपित् इति अतिदेशसूत्रम्। अपित् अर्थात् पिद्भिन्नः यः सार्वधातुकः सः ङिद्वत् भवति। अर्थात् वस्तुतः अपित् सार्वधातुकः ङित् नास्ति। तथापि अनेन सूत्रेण विशेषेण आदिष्टत्वात् सः ङित् भवति।

तद्गुणसंविज्ञानबहुव्रीहिः अतद्गुणसंविज्ञानबहुव्रीहिः इति बहुव्रीहिसमासस्य भागद्वयम् अवश्यं ज्ञातव्यम्। तच्च समासप्रकरणे अस्माभिः अवश्यं द्रष्टुं शक्यते। बहुव्रीहिः अन्यपदार्थप्रधानः। तथापि यत्र समस्यमानपदानाम् अन्वयः सम्बन्धो वा अर्थो प्राप्यते तत्र तद्गुणसंविज्ञानबहुव्रीहिः। यत्र स सम्बन्धः न प्राप्यते तत्र अतद्गुणसंविज्ञानबहुव्रीहिः भवति।

अनेकाल्शित्सर्वस्य इत्येतत् सूत्रं परिभाषा सूत्रम्। अनेन सूत्रेण यः अनेकाल् शित् च आदेशः स सर्वस्य स्थाने भवतीति इदं सूत्रं नियमयति। अत्र लिटस्तझयोरेशिरेच् इत्यत्र तस्य सम्पूर्णस्य स्थाने एश् इति आदेशो भवति यतः एश् इति पदम् अनेकाल्।

पाठान्तप्रश्नाः

१. टित आत्मनेपदानां टेरे इति सूत्रं व्याख्यात।

२. आतो ङितः इति सूत्रं व्याख्यात।

३. आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य इति सूत्रं व्याख्यात।

४. आमेतः इति सूत्रं व्याख्यात।

५. इटोऽत् इति सूत्रं व्याख्यात।

६. सुट् तिथोः इति सूत्रं व्याख्यात।

७. आत्मनेपदेष्वनतः इति सूत्रं व्याख्यात।

८. आत्मनेपदप्रकरणस्य सारं संगृह्णीत।

९. ससूत्रं रूपाणि साधयत – एधते एधाते एधन्ते एधसे एधे एधामहे। एधाञ्चक्रे एधाञ्चकृषे एधांचकढ्वे एधाञ्चकृमहे। एधाम्बभूव। एधामास। एधिता एधिताध्वे। एधिताहे। एधिष्यते। एधताम् एधस्व एधध्वम् एधै। ऐधत ऐधे ऐधामहि। एधेत एधेरन् एधेय। एधिषीष्ट एधिषीष्ठाः एधिषीय। ऐधिष्ट एधिषत एधिषि।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि- १

१. एध्-धातोः अर्थः वृद्धिः।

२. एधँ वृद्धौ इत्याकारेण धातुरयं धातुप्रकरणे पठितोऽस्ति।

३. एध्-धातुः अनुदात्तः।

४. एध्-धातुः आत्मनेपदी। तस्य धातोः अनुदात्तेत्वात् आत्मनेपदत्वम्।

५. एध्-धातोः आत्मनेपदत्वे अनुदात्तङित आत्मनेपदम् इति सूत्रं प्रमाणम्

६. एध्-धातुः आत्मनेपदी। अतः तस्मात् धातोः तिबादि नव प्रत्यया नोत्पद्यन्ते।

७. एध्-धातुः सेट्।

८. एध्-धातुः अकर्मकः।

९. एध्-धातो लटि तप्रत्यये शपि प्रक्रियाकार्ये एधत इति स्थिते एकारविधायकं सूत्रं टित आत्मनेपदानां टेरे इति।

१०. अचां मध्ये यः अन्त्यः स आदिर्यस्य तस्य सम्पूर्णस्य टिसंज्ञा भवति।

११. (पुस्तकं द्रष्टव्यम्।)

१२. आताम्-प्रत्ययः सार्वधातुकमपित् इति सूत्रेण ङित्।

१३. आतामः आकारस्य इय् आतो ङित इति सूत्रेण विधीयते।

१४. आतोः ङितः इति सूत्रस्य अतः परस्य ङितामाकारस्य इय् स्यादिति अर्थः।

उत्तराणि- २

१५. इजादेश्च गुरुमतोऽनृच्छ इति सुत्रस्य वृत्तिः हि इजादिर्यो धातुः गुरुमान् ऋच्छत्यन्यस्तत आम् स्याल्लिटि।

१६. इजादेश्च गुरुमतोऽनृच्छ इति सूत्रेण आम् विधीयते।

१७. आम्प्रत्ययः इत्यत्र कीदृशो आम्प्रत्ययः यस्मात् इति अतद्गुणसंविज्ञानबहुव्रीहिः।

१८. परस्मैपदम्।

१९. आमः इति सूत्रेण आमः परस्य विद्यमानस्य लुक् विधीयते।

२०. लिटस्तझयोरेशिरेच् इत्यत्र तस्य स्थाने एश् झस्य स्थाने च इरेच् इति यथासंख्यमनुदेशः समानाम् इति सूत्रं नियमयति।

२१. (पुस्तकं द्रष्टव्यम्।)

२२. (पुस्तकं द्रष्टव्यम्।)

२३. एधाञ्चकृढ्वे इत्यत्र ध्वमः धस्य ढविधायकं सूत्रं हि इणः षीध्वं लुङ्लिटां धोऽङ्गात्।

उत्तराणि- ३

२४. एधिता इत्यत्र इड्विधायकं सूत्रं हि आर्धधातुकस्येड् वलादेः इति।

२५. धि च इत्यत्र धादौ प्रत्यये इत्यर्थः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधिना आगच्छति।

२६. धि च इत्यत्र प्रत्यये इति प्रत्यये इति अधिकारस्थत्वात् आगच्छति।

२७. एधिताहे इत्यत्र तासः सस्य हकारः ह एति इति सूत्रेण विधीयते।

२८. लोटः एकारस्य आम्विधायकं सूत्रं हि सवाभ्यां वामौ इति।

२९. एधताम् इत्यत्र आमेतः इति सूत्रेण आम् विधीयते।

३०. एधस्व इत्यत्र एकारस्य वविधायकं सूत्रं सवाभ्यां वामौ इति।

३१. एध्-धातोः लोटि उत्तमपुरुषैकवचने एधे इति स्थिते एत ऐ इति सूत्रं प्रवर्तते।

३२. एध्-धातोः आडागमः आडजादीनाम् इति सूत्रेण विधीयते।

३३. आ एध् ल् इति स्थिते वृद्धिविधायकं सूत्रं हि आटश्च इति।

३४. लिङि झस्य रन्-विधायकं सूत्रं झस्य रन्।

३५. एधेरन् इत्यत्र झस्य रन् इत्यस्य अपवादसूत्रस्य सत्त्वात् झेर्जुस् न प्रवर्तते।

३६. एधिषीष्ट इत्यत्र सस्य षकारः आदेशप्रत्यययोः इति सूत्रेण विधीयते।

३७. एध्-धातोः लुङि ध्वमि ऐधिढ्वम् इति रूपं भवति।

३८. आत्मनेपदेष्वनतः इति सूत्रेण झस्य अदादेश विधीयते।

॥ इति विंशः पाठः ॥

346sk21

२१

अदादितः दिवादिपर्यन्तम् - अद् हु दिव् धातवः

प्रस्तावना

भवन्तः पूर्वं भ्वादिप्रकरणस्य परिचयं प्राप्तवन्तः। भ्वादिप्रकरणमेव तिङन्तप्रकरणस्य हृदयम्। यतो हि धातुरूपप्रक्रियायां यानि मूलस्थानीयानि सूत्राणि सन्ति तानि तस्मिन् आलोचितानि सन्ति। भवन्तः जानन्ति एव यत् व्याकरणं ससोपानक्रमं पठनीयं शास्त्रम्। अतः यदि मूलभूतम् इदं प्रकरणं सम्यक् अधिगतं भवति तर्हि अन्यगणीयधातुरूपप्रक्रियायां न क्लेशः। अस्मिन् पाठे अदादिगणः, जुहोत्यादिगणः, दिवादिगणः चेति गणत्रयस्य आलोचना विधास्यते। तिङ्प्रत्यये परे सति धातोः ये शबादयः प्रत्ययाः विधीयन्ते तेषां विकरणसंज्ञा भवतीति प्राचीनाचार्याणां मतम्। अतः शप्, श्यन्, श इत्यादीनि विकरणानि। प्रतिगणं विकरणभेदोऽस्तीति भवन्तो जानन्ति एव। विकरणभेदात् कथं रूपभेदो भवति इति भवन्तः अग्रे द्रक्ष्यन्ति। यथा अद् + शप् (लुक्) + ति = अत्ति, हु + शप् (श्लु) + ति = जुहोति, दिव् + श्यन् + ति = दिव्यति। बहुत्र धातुरूपाणि विना प्रक्रियां लेखिष्यन्ते। तत्र कारणमिदमस्ति यत् भवन्तः भ्वादिप्रकरणकज्ञानमादाय तत्प्रक्रियां लेखितुम् शक्नुयुः इति भावयामि। भवतां बोधसौकर्याय प्रतिगणं प्रथमधातोः सर्वाणि रूपाणि प्रदत्तानि सन्ति, तानि च कण्ठस्थीयानि येन गणपरिचयः सुष्ठु स्यात्। धात्वन्तराणि ग्रन्थान्तरे द्रष्टव्यानि। यद्यपि प्राक्तनेषु नवसु भ्वादिप्रकरणकपाठेषु यानि सूत्राणि चर्चितानि सन्ति, तेषु केषाञ्चित् साधारणसूत्रत्वात् अग्रिमेषु अदाद्यादिपाठेषु अपेक्षास्ति। तथापि तेषां व्याख्यानं नैव करिष्यते पाठविस्तरभयात्। किञ्च प्रति धातुं सर्वाणि रूपाणि अपि न प्रदर्शयिष्यन्ते। अप्रदर्शितानि रूपाणि स्वयं साधनीयानि।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- प्रतिगणं कीदृशं विकरणं भवति तज्ज्ञास्यति।
- विकरणविधायकसूत्रार्थं ज्ञास्यति।
- तत्र तत्र व्याख्यातानि विशेषसूत्राणि अवगमिष्यति।

- अद्-धातुरूपाणि साधयितुं शक्नुयात्।
- हु-धातुरूपाणि साधयितुं पारयेत्।
- दिव्-धातुरूपाणि साधयितुम् अर्हेत्।
- एतज्ज्ञात्वा च अन्यानि अपि धातुरूपाणि साधयितुं प्रभवेत्।
- तत्र तत्र प्रदर्शितानि वैकल्पिकरूपाणि अपि ज्ञास्यति।

अदादिगणः

भक्षणार्थे वर्तमानात् अदादिगणे पठितत्वात् भूवादयो धातवः इत्यनेन धातुसंज्ञकात् सकर्मकात् अनिटः अन्ताकारोदात्तेतः अद्-धातोः लः कर्मणि च भावे चाकर्मकेभ्यः इत्यनेन कर्तरि दश लकाराः पर्यायेण प्राप्ताः। एषु कतमेनात्र भाव्यमित्याकाङ्क्षायां वर्तमानक्रियावृत्तित्वविवक्षायां वर्तमाने लट् इति अद्धातोः **लटि** उपदेशेऽजनुनासिक इत् इत्यनेन अकारस्य, हलन्त्यम् इत्यनेन च टकारस्य इत्संज्ञायां तस्य लोपः इति तयोर्लोपे च कृते लशक्वतद्धिते इत्यनेन लस्य इत्संज्ञायां प्राप्तायाम् उच्चारणसामर्थ्यात् लस्य इत्त्वाभावे अद् ल् इति स्थिते लस्य इत्यधिकृत्य तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्वम्-इड्वहिमहिङ् इत्येते अष्टादश लादेशाः प्राप्ताः। तेषां समेषां लः परस्मैपदम् इत्यनेन परस्मैपदसंज्ञायां प्राप्तायां तङानावात्मनेपदम् इत्यनेन अपवादत्वेन तङ्प्रत्याहारान्तःपातिनां नवानाम् आत्मनेपदसंज्ञा सञ्जाता। एषु सर्वेषु तिङ्प्रत्ययेषु प्राप्तेषु परस्मैपदसंज्ञका आहोस्वित् आत्मनेपदसंज्ञकाः प्रत्ययाः स्युरिति सन्देहे अद्धातोः आत्मनेपदनिमित्तहीनत्वात् शेषात् कर्तरि परस्मैपदम् इत्यनेन कर्तरि परस्मैपदसंज्ञकाः नव प्राप्ताः। तत्र च तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः इत्यनेन क्रमात् त्रयाणां त्रिकाणां प्रथममध्यमोत्तमसंज्ञासु जातासु मध्यमोत्तमयोः अविषयत्वात् शेषे प्रथमः इत्यनेन प्रथमसंज्ञकाः त्रयः प्राप्ताः। तत्रापि तान्येकवचनद्विवचनबहुवचनान्येकशः इत्यनेन लब्धप्रथमादिसंज्ञानां तिङां त्रयाणाम् एकशः एकवचनद्विवचनबहुवचनसंज्ञाः विहिताः। तत्रापि कर्तुः एकत्वविवक्षायां द्व्येकयोर्द्विवचनैकवचने इत्यनेन एकवचनसंज्ञके तिप्-प्रत्यये हलन्त्यम् इत्यनेन पकारस्य इत्संज्ञायां तस्य लोप इति तल्लोपे अद् ति इति जाते तिपः तिङ्त्वात् धात्वधिकारोक्तत्वाच्च तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायां कर्तरि शप् इत्यनेन शपि अद् शप् ति इति स्थिते सूत्रमिदमारभ्यते -

[२१.१] अदिप्रभृतिभ्यः शपः॥ (२.४.७२)

सूत्रार्थः - अदिप्रभृतिभ्यः शपः लुक् स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। अदिप्रभृतिभ्यः (५/३) शपः (६/१) इति सूत्रगतपदच्छेदः। अदिः प्रभृतिः (आदिः) येषां ते अदिप्रभृतयः इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः अदिप्रभृतिभ्यः। ण्यक्षत्रियार्षञितो यूनि लुगणिञोः इत्यतः लुक् (१/१) इति पदम् अनुवर्तते। दशसु धातुगणेषु अदादिः द्वितीयः धातुगणः। सूत्रार्थस्तावत् - अदादिगणपठितधातुभ्यः विहितस्य शपः लुक्

स्यात् इति। प्रत्ययस्य लुक्-श्लु-लुपः इति सूत्रेण प्रत्ययादर्शनस्य लुक् भवति।लुक्-लोपयोः प्रत्ययादर्शनरूपसमानफलकत्वेऽपि लोप इति तु नोक्तम् सूत्रकृता पाणिनिना। लोपो भवति इति उच्यते चेत् प्रत्ययलोपे प्रत्ययलक्षणम् (१.१.६२) इति प्रत्ययलक्षणेन इतः वित्तः इत्यादौ शब्निमित्तकगुणः प्राप्तः स्यात्। अतः तद्वारणाय लुक् इत्येव उक्तम्। तथा सति न लुमताङ्गस्य (१.१.६३) इत्यनेन प्रत्ययलक्षणनिषेधे न शब्निमित्तकगुणः।

उदाहरणे सूत्रार्थसमन्वयः - उपरि उक्तप्रकारेण अद्-धातोः तिपि शपि अदिप्रभृतिभ्यः शपः इत्यनेन शपः लुकि अद् ति इति जाते खरि च इत्यनेन दकारस्य स्थाने चर्त्वे तकारादेशे **अत्ति** इति रूपं सिध्यति। एवमेव प्रथमपुरुषद्विवचने तसि शपि तस्य च लुकि अत् तस् इति जाते समुदायस्य तिङन्तत्वेन पदसंज्ञायां ससजुषो रुः इत्यनेन पदान्तसकारस्य रुत्वे अनुबन्धलोपे रेफस्य खरवसानयोर्विसर्जनीयः इत्यनेन विसर्गे वर्णसम्मेलने च **अत्तः** इति रूपम्। बहुवचने झप्रत्यये झकारस्य स्थाने अन्त् इत्यादेशे अद् अन्त् इ इति जाते सर्वर्णसम्मेलने च **अदन्ति** इति रूपम्। सिपि, थसि, थे च प्रत्यये चर्त्वं भवत्येव। उत्तमपुरुषे खर्-परत्वाभावात् नैव चर्त्वम्।

तथा हि **लटि** परस्मैपदे रूपाणि - **अत्ति, अत्तः, अदन्ति। अत्सि, अत्थः, अत्थ। अद्मि, अद्वः, अद्मः।**

{सूत्रम्. **खरि च** (८.४.५५) = खरि झलां चरः स्युः।}

लिटि अद् लिट् इति दशायाम् अग्रिमसूत्रमारभ्यते -

[२१.२] लिट्यन्यतरस्याम्॥ (२.४.४०)

सूत्रार्थः - अदः घसॢ वा स्यात् लिटि।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। लिटि अन्यतरस्याम् इति सूत्रगतपदच्छेदः। लिटि इति सप्तम्येकवचनान्तम्। अन्यतरस्यामिति सप्तमीविभक्तिप्रतिरूपकमव्ययम्। अदो जग्धिर्ल्यप्ति किति इति सूत्रतः अदः (६/१) इत्यस्य, लुङ्सनोर्घसॢ इत्यतः घसॢ (१/१) इत्यस्य चानुवृत्तिर्भवति। लृकारः इत्संज्ञकः, अनुनासिकत्वात्। अतः घस्मात्रमवशिष्यते। लृदित्करणस्य प्रयोजनं पुषादिद्युताद्यॢदितः इति सूत्रेण च्लेः अङादेशविधानम्। घसॢ इत्यादेशः अनेकाल् अस्ति। अनेकाल्त्वात् च अनेकाल्शित्सर्वस्य इति परिभाषया अयं सर्वादेशो भवति।

उदाहरणे सूत्रार्थसमन्वयः - अद्-धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वविवक्षायाम् परोक्षे लिटि इति कर्तरि **लिटि** प्रथमपुरुषैकवचनविवक्षायाम् तिपि अनुबन्धलोपे अद् ति इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपो सर्वादेशे णलि अनुबन्धलोपे अद् अ इति स्थिते अनेकाल्शित्सर्वस्य इति परिभाषासहयोगेन अदः सम्पूर्णस्य स्थाने लिट्यन्यतरस्याम् इति प्रकृतसूत्रेण घसॢ-इत्यादेशो भवति। ततः घस् अ इति जाते लिटि धातोरनभ्यासस्य इत्यनेन द्वित्वे घस् घस् अ इति जायते। ततः द्विरुक्तस्य पूर्वभागस्य घस् इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्यासंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे घ घस् अ इति जाते कुहोश्चुः इत्यनेन चुत्वे अभ्यासस्य

घकारस्य स्थाने झकारादेशे अभ्यासे चर्च इत्यनेन जश्त्वे जकारे जघस् अ इति जायते। ततः अत उपधायाः इत्यनेन उपधासंज्ञकस्य घकारोत्तरवर्तिनः अकारस्य वृद्धौ जघास् अ इति जाते वर्णसम्मेलने च **जघास** इति रूपं सिध्यति।

लिटि प्रथमपुरुषद्विवचने तसि तसः स्थाने अतुसि अदः घसॢ-इत्यादेशे लिटि धातोनभ्यासस्य (६.१.८) इत्यनेन द्वित्वस्य तथा गमहनजनखनघसां लोपः क्ङित्यनङि (६.४.९८) इत्यनेन उपधालोपस्य च युगपत् प्राप्तौ परत्वात् प्राप्तस्य उपधालोपस्य द्विर्वचनेऽचि इत्यनेन निषेधे द्वित्वमेव आदौ भवति। ततः कुहोश्चुः इत्यनेन अभ्यासघकारस्य झकारे झकारस्य जश्त्वे जकारे हलादिशेषे जघस् अतुस् इत्यवस्थायाम् उपधालोपे ज घ् स् अतुस् इति जायते। ततः सकारः न प्रत्ययावयवः न वा आदेशरूप इति कृत्वा आदेशप्रत्यययोः इत्यनेन घकारोत्तरवर्तिनः सकारस्य षत्वे अप्राप्ते आरभ्यते -

[२१.३] शासिवसिघसीनां च॥ (८.३.६०)

सूत्रार्थः - शासिवसिघसीनाम् इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। शासिवसिघसीनाम् (६/३) च इति सूत्रगतपदच्छेदः। इण्कोः (५/१) इत्यधिक्रियते। सहेः साडः सः इत्यतः सः (६/१) इत्यस्य, अपदान्तस्य मूर्धन्यः इत्यतः मूर्धन्यः (१/१) इत्यस्य चानुवृत्तिर्भवति। इण् इति प्रत्याहारः। तत्र णकारः लण् इति परसूत्रस्थः न तु अइउण् इति पूर्वसूत्रस्थः। कुः इत्यनेन कवर्गस्य ग्रहणम्। सूत्रार्थो हि शासिवसिघसीनाम् इण्प्रत्याहारस्थवर्णात् अथवा कवर्गस्थवर्णात् परस्य सस्य षकारः भवति इति। ईषद्विवृतयत्नवतः सकारस्य स्थाने ईषद्विवृतयत्नवान् षकार एव मूर्धन्यादेशो भवति नान्यः।

उदाहरणे सूत्रार्थसमन्वयः - उपरि उक्तप्रकारेण अद्-धातोः लिटि तसि अतुसि ज घ् स् अतुस् इति जाते घसः सकारस्य प्रकृतसूत्रेण षकारे ज घ् ष् अतुस् इति जायते। ततः खरि च इत्यनेन घकारस्य स्थाने चर्त्वे ककारादेशे ज क् ष् अतुस् इति जाते अतुसः सकारस्य रुत्वे रेफस्य च विसर्गे **जक्षतुः** इति रूपं सिध्यति। एवमेव जक्षुः इत्यत्र प्रक्रिया।

लिटि मध्यमपुरुषैकवचनविवक्षायाम् सिपि थलि घस् थ इति जाते आर्धधातुकस्येड्वलादेः इत्यनेन इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः प्राप्तः। परन्तु क्रादिनियमानुसारं नित्यम् इडागमे द्वित्वादिकार्ये जघसिथ इति रूपं भवति। एवम् वसि (वे) मसि (मे)च इडागमो बोध्यः।

तिप्-सिप्-मिप् इत्येतान् प्रत्ययान् विहाय अन्यत्र असंयोगाल्लिट् कित् इत्यनेन किद्वद्भावो भवति। अतः तत्र गमहनजनखनघसां लोपः क्ङित्यनङि इत्यनेन उपधालोपे जक्ष् इति भवति। उत्तमपुरुषैकवचने मिपि णलि णलः विकल्पेन णित्त्वात् णित्त्वपक्षे अत उपधायाः इति वृद्धौ **जघास** इति रूपम्, णित्त्वाभावपक्षे न वृद्धिः। तेन **जघस** इति रूपम्।

एवञ्च **लिटि** परस्मैपदे घसॢ-इत्यादेशपक्षे रूपाणि - **जघास, जक्षतुः, जक्षुः। जघसिथ, जक्षथुः, जक्ष। जघास-जघस, जक्षिव, जक्षिम।**

घसॢ-आदेशाभावपक्षे अत आदेः इत्यनेन अभ्यासस्य अकारस्य दीर्घे आकारे अकः सवर्णे दीर्घः इति सवर्णदीर्घे च **आद, आदतुः, आदुः** इत्येवं रूपाणि सिध्यन्ति।

{सूत्रम्. **अत आदेः** (७.४.७०) = अभ्यासस्यादेरतो दीर्घः स्यात्।}

सिपि थलि अद् थ इति स्थिते अदः दकारान्तानुदात्तेषु पाठात् इण्निषेधो भवति। किन्तु क्रादिनियमेन पुनः इट् प्राप्तः। ततः उपदेशेऽत्वतः इत्यनेन थलि इण्निषेधे ऋतो भारद्वाजस्य इत्यनेन विकल्पेन इट् प्राप्तः। किन्तु थलि नित्यम् इड्विधानमभीष्टमस्ति। अतः सूत्रमिदमारभ्यते -

[२१.४] इडत्त्यर्तिव्ययतीनाम्॥ (७.२.६६)

सूत्रार्थः - अद् ,ऋ, व्येञ् एभ्यस्थलः नित्यम् इट् स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। इट् अत्यर्तिव्ययतीनाम् इति सूत्रगतपदच्छेदः। इट् इति प्रथमैकवचनान्तम्। अत्यर्तिव्ययतीनाम् इति षष्ठीबहुवचनान्तम्। अचस्तास्वत्थल्यनिटो नित्यम् इति योगात् थलि इत्यनुवर्तते। तस्य च षष्ठ्येकवचनान्ततया विभक्तविपरिणामः। अद् , ऋ, व्येञ् इत्येतेभ्यः इक्श्तिपौ धातुनिर्देशे इत्यनेन श्तिप्प्रत्ययः। तेन अत्तिश्च अर्तिश्च व्ययतिश्च तेषाम् अत्यर्तिव्ययतीनाम् इति इतरेतरयोगद्वन्द्वः। इटः टकारः इत्संज्ञकः। तेन आद्यन्तौ टकितौ इति परिभाषया इट् थलः आद्यावयवो भवति। सूत्रार्थः - अद् ,ऋ, व्येञ् इत्येतेभ्यः धातुभ्यः परस्य थलः नित्यम् इडागमो भवति।

उदाहरणम् - ऋधातोः उदाहरणम् - आरिथ। व्येञः उदाहरणम्- विव्ययिथ। अदः उदाहरणम् - **आदिथ**। प्रसङ्गवशात् एतदेव उदाहरणम् अधुना आलोच्यते।

सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण अद् थ इति स्थिते अदः परं थल्प्रत्ययोऽस्ति। अतः प्रकृतसूत्रेण नित्यम् इडागमे द्वित्वे हलादिशेषे अत आदेः इत्यनेन अभ्यासस्याकारस्य दीर्घे सवर्णदीर्घे वर्णसम्मेलने **आदिथ** इति रूपं सिध्यति।

एवञ्च **लिटि** घसॢ इत्यादेशाभावपक्षे - **आद, आदतुः, आदुः। आदिथ, आदथुः, आद। आद, आदिव, आदिम** इत्येवं रूपाणि भवन्ति। पाठविस्तरभयात् न सर्वाणि सूत्राणि प्रयज्य रूपसिद्धिः प्रदर्श्यते।

भविष्यत्यनद्यतनार्थक्रियावृत्तित्वविवक्षायाम् अनद्यतने लुट् इति कर्तरि **लुटि** प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे तिङ्शित्सार्वधातुकम् इति तिपः सार्वधातुकसंज्ञायां तस्मिन् परे कर्तरि शप् इति सूत्रेण प्राप्तम् शपम् अपवादत्वेन प्रबाध्य स्यतासी लृलुटोः इति सूत्रेण धातोः तासिप्रत्यये अद् तास् ति इति जाते यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन लुटः प्रथमस्य डारौरसः इति सूत्रेण तिपः स्थाने डादेशे अनुबन्धलोपे टेः इति सूत्रेण अद् तास् इत्यस्य अभस्यापि टेः आसः लोपे अद् त् आ इति जाते खरि च इत्यनेन चर्त्वे दकारस्य तकारे **अत्ता** इति रूपं सिध्यति। अत्र लुटि शप्प्रत्ययापवादस्य तासः आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधः। एवमग्रेऽपि बोध्यम्।

तथा च **लुटि** परस्मैपदे रूपाणि - **अत्ता, अत्तारौ, अत्तारः। अत्तासि, अत्तास्थः, अत्तास्थ। अत्तास्मि, अत्तास्वः, अत्तास्मः।** लुटि सर्वत्रैव एकाच उपदेशेऽनुदात्तात् इत्यनेन इण्निषेधः।

भविष्यदर्थात् अत्तेः क्रियार्थायां क्रियायाम् असत्याम् लृट् शेषे च इति कर्तरि **लृटि** प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे तिङ्शित्सार्वधातुकम् इति तिपः सार्वधातुकसंज्ञायां तस्मिन् परे कर्तरि शप् इति सूत्रेण प्राप्तम् शपम् अपवादत्वेन प्रबाध्य स्यतासी लृलुटोः इति सूत्रेण धातोः स्यप्रत्यये अद् स्य ति इति जाते शप्प्रत्ययापवादस्य स्यस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधः। ततः खरि च इति चर्त्वे दकारस्य तकारे **अत्स्यति** इति रूपम्। अग्रेऽपि इत्थं प्रक्रिया।

तथा च लृटि परस्मैपदे रूपाणि - **अत्स्यति, अत्स्यतः, अत्स्यन्ति। अत्स्यसि, अत्स्यथः, अत्स्यथ। अत्स्यामि, अत्स्यावः, अत्स्यामः।**

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु अर्थेषु वृत्तित्वविवक्षायां लोट् च इति सूत्रेण कर्तरि **लोटि** प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे शपि शपः लुकि अत् ति इति जाते तेः इकारस्य उत्त्वे खरि च इति अतः तकारस्य चर्त्वे तकारे वर्णसम्मेलने **अत्तु** इति रूपं, पक्षे 'ङिच्च' इति सूत्रापेक्षया परत्वेन अनेकाल्शित् सर्वस्य इति सूत्रेण परिभाषारूपेण परिष्कृतेन तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् इति सूत्रेण तोः तातङि सर्वादेशे अनुबन्धलोपे संयोगे **अत्ताम्** इत्यपि रूपम्। तसि - लोटो लङ्वत् इति सूत्रेण लोटो लङ इव कार्यातिदेशेन तस्थस्थमिपां तान्तन्तामः इति सूत्रेण तसः स्थाने यथाक्रमं ताम् इति सर्वादेशे वर्णसम्मेलने **अत्ताम्** इति रूपम्। झिप्रत्यये झकारस्य स्थाने अन्त् इत्यादेशे **अदन्तु** इति रूपं भवति। ततः मध्यमपुरुषैकवचने सिपि अनुबन्धलोपे सेर्ह्यपिच्च इत्यनेन सिपः हि इत्यादेशे शपो लुकि अद् हि इति स्थिते अग्रिमसूत्रमिदं प्रवर्तते -

[२१.५] हु-झल्भ्यो हेर्धिः॥ (६.४.१०१)

सूत्रार्थः - होः झलन्तेभ्यश्च हेः धिः स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। हुझल्भ्यः हेः धिः इति सूत्रगतपदच्छेदः। हुश्च झलश्च तेषाम् इतरेतरयोगद्वन्द्वः हुझलः, तेभ्यो हुझल्भ्यः इति पञ्चमीबहुवचनान्तम्। हेः इति षष्ठ्येकवचनान्तम्। धिः इति प्रथमैकवचनान्तम्। अङ्गस्य (६/१) इत्यधिक्रियते। तस्य च झल्भ्यः इति विशेषणम् अतः तदन्तविधौ झलन्तेभ्य इत्यर्थलाभः। धि इत्यनेकाल् अस्ति। अतः अनेकाल्शित्सर्वस्य इति परिभाषया हेः स्थाने धि इति सर्वादेशः। हु इति जुहोत्यादिगणीयः प्रथमः धातुः। सूत्रार्थस्तावत् - हुधातोः परस्य झलन्तेभ्यश्च परस्य हेः स्थाने धि इत्यादेशो भवति इति।

उदाहरणम् - हुधातोः उदाहरणम् अग्रे वक्ष्यते। अत्र झलन्तस्य उदाहरणम् आलोच्यते। पूर्वोक्तप्रकारेण अद् हि इति स्थिते अद्-धातुः झलन्तः। ततः परम् हि इत्यपि अस्ति। अतः प्रकृतसूत्रेण हेः धि इति सर्वादेशे **अद्धि** इति रूपं सिध्यति, पक्षे तातङि **अत्तात्** इत्यपि। एवञ्च मध्यमपुरुषे **अद्धि-अत्तात्, अत्तम्, अत्त** इति रूपाणि।

उत्तमपुरुषप्रथमैकवचने मिपि अनुबन्धलोपे शपि शपो लुकि मेर्निः इत्यनेन मेः नि इत्यादेशे आडुत्तमस्य पिच्च इत्यनेन आडागमे **अदानि** इति रूपं सिध्यति। वसि **अदाव**, मसि **अदाम**। नित्यं ङितः इति सकारलोपः।भूतानद्यतनक्रियावृत्तित्वविवक्षायाम् अनद्यतने लङ् इति कर्तरि लङि आडजादीनाम् इत्यनेन आडागमे प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे शपि शपो लुकि इतश्च इत्यनेन इकारलोपे आ अद् त् इति स्थिते अग्रिमसूत्रं प्रवर्तते -

[२१.६] अदः सर्वेषाम्॥ (३.४.१११)

सूत्रार्थः - अदः परस्य अपृक्तसार्वधातुकस्य अट् स्यात् सर्वमतेन।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। अदः इति पञ्चम्येकवचनान्तम्। सर्वेषाम् इति षष्ठीबहुवचनान्तम्। अस्तिसिचोऽपृक्ते इत्यतः अपृक्ते इति पदम् अनुवर्तते। तस्य च विभक्तविपरिणामेन अपृक्तस्य इति षष्ठ्येकवचनान्ततया विपरिणामः। तुरुस्तुशम्यमः सार्वधातुके इत्यतः सार्वधातके इति पदमनुवर्तते। तस्य च विभक्तिविपरिणामेन सार्वधातुकस्य इति षष्ठ्येकवचनान्ततया विपरिणामः। अङ् गार्ग्यगालवयोः इत्यस्मात् अट् (१/१) इत्यस्यानुवृत्तिर्भवति। अदः इति पञ्चम्यन्तम् पदम् । अतः तस्मादित्युत्तरस्य इति परिभाषा प्रवर्तते। तेन च उत्तरस्य इत्यर्थलाभः। तथा च अद्-धातोः उत्तरस्य अपृक्तस्य सार्वधातुकप्रत्ययस्य अडागमो भवति इत्यस्मिन् विषये सर्वेषाम् आचार्याणाम् ऐकमत्यम् अस्ति इति सूत्रार्थः। टित्करणात् अट् आद्यन्तौ टकितौ इति परिभाषया अपृक्तसार्वधातुकस्य आद्यावयवो भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण आ अद् त् इति जाते त् इति अपृक्तोऽस्ति अपृक्त एकाल्प्रत्ययः इत्यनेन। किञ्च तिङ्शित्सार्वधातुकम् इति सार्वधातुकमपि अस्ति। अतः प्रकृतसूत्रेण अडागमे आद्यन्तौ टकितौ इति परिभाषासहयोगेन च अनुबन्धलोपे आ अद् अ त् इति जायते। ततः आटश्च इत्यनेन वृद्धौ वर्णसम्मेलने च **आदत्** इति रूपं सिध्यति। तसि झौ थसि थे वसि मसि च न अट् एकाल्प्रत्ययाभावात्। अद्धातोः झौ प्रक्रियया आदन्त् इति समुदायस्य तिङन्तत्वात् पदसंज्ञायाम् संयोगान्तस्य लोपः इति सूत्रेण अन्त्यस्य तकारस्य लोपे **आदन्**। अदः सिपि प्रक्रियया आद् अ स् इति जाते सिपः सस्य रुत्वे रेफस्य च विसर्गे कृते **आदः** इति रूपम्। इति। वसि मसि च सकारलोपः नित्यं ङितः इति योगेन।

तथा च लुङि परस्मैपदे रूपाणि - **आदत्, आत्ताम्, आदन्। आदः, आत्तम्, आत्त। आदम्, आद्व, आद्म।**

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनार्थवृत्तित्वविवक्षायाम्

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् इति योगेन अद्-धातोः कर्तरि **विधिलिङि** प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे शपि शपो लुकि अद् ति इति जाते यासुट् परस्मैपदेषूदात्तो ङिच्च इत्यनेन तेः यासुडागमे अनुबन्धलोपे अद् यास् ति इति जाते सुट्तिथोः इति तिपः तकारस्य सुडागमे अनुबन्धलोपे अद् यास् स् ति इति जाते लिङः सार्वधातुकत्वात् लिङः सलोपोऽनन्त्यस्य इत्यनेन

अनन्त्यस्य सकारद्वयस्य लोपे इतश्च इति तेः इकारलोपे वर्णसम्मेलने च **अद्यात्** इति रूपं भवति। झौ अद् या उस् इत्यवस्थायाम् उस्यपदान्तात् इत्यनेन पररूपम्। लोटो लङ्वत् इति सूत्रेण लोटो लङ इव कार्यातिदेशेन तस्थस्थमिपां तान्तन्तामः इति सूत्रेण तसः स्थाने तामादेशः, थसः स्थाने तमादेशः, थस्य स्थाने च तादेशः। वसि मसि च नित्यं ङितः इति सकारलोपः। तथा च लिङि रूपाणि - **अद्यात्, अद्याताम्, अद्युः। अद्याः, अद्यातम्, अद्यात। अद्याम्, अद्याव, अद्याम।**

आशीर्वादार्थे आशिषि लिङ्लोटौ इति कर्तरि **आशीर्लिङि** तिपि यासुटि सुटि इतश्च इति इकारलोपे अद् यास् स् त् इति स्थिते (लिङाशिषि इत्यनेन आशीर्लिङः आर्धधातुकत्वात् लिङः सलोपोऽनन्त्यस्य इत्यनेन सकारस्य लोपो न भवति।) स्त् इत्यस्य हलोऽनन्तराः संयोगः इति संयोगसंज्ञायाम् स्कोः संयोगाद्योरन्ते च इत्यनेन संयोगादिसकारलोपे अद् यास् त् इति जाते पुनः संयोगादिसकारलोपे अद्यात् इति रूपं सिध्यति। तसि तसः तामि अद् यास् स् ताम् इति जाते स्स् इत्यस्य संयोगसंज्ञायाम् स्कोः संयोगाद्योरन्ते च इत्यनेन झल्परत्वात् संयोगादिसकारलोपे अद्यास्ताम् इति रूपम्। एवम् अग्रेऽपि। आशीर्लिङि रूपाणि तावत् - **अद्यात्, अद्यास्ताम्, अद्यासुः। अद्याः, अद्यास्तम्, अद्यास्त। अद्यासम्, अद्यास्व, अद्यास्म।**

लुङि घसॢ इत्यादेशविधानाय सूत्रमिदमारभ्यते -

[२१.७] लुङ्सनोर्घसॢ॥ (२.४.३७)

सूत्रार्थः - अदः घसॢ स्यात् लुङि सनि च।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। लुङ्सनोः घसॢ इति सूत्रगतपदच्छेदः। लुङ् च सन् च तयोरितरेतरयोगद्वन्द्वे लुङ्सनौ, तयोः लुङ्सनोः। लुङ्सनोः इति सप्तमीद्विवचनान्तम्। घसॢ इति प्रथमैकवचनान्तम् (अविभक्तिको निर्देशः)। अदो जग्धिर्ल्यप्ति किति इत्यतः अदः (६/१) इत्यस्यानुवृत्तिर्भवति। घसॢ इत्यत्र ऌकारस्य अनुनासिकत्वात् घस्मात्रं शिष्यते। घसॢ इति अनेकाल् अस्ति। अतः अनेकाल्शित्सर्वस्य इति परिभाषया घसॢ इति सर्वादेशो भवति। सूत्रार्थो हि अदः स्थाने घसॢ इत्यादेशः स्यात् लुङि सनि च परतः। ऌदित्करणस्य फलं तु उक्तमेव अस्ति।

उदाहरणे सूत्रार्थसमन्वयः - अद्-धातोः भूतार्थक्रियावृत्तित्वविक्षायाम् लुङ् इति योगेन कर्तरि लुङि प्रथमपुरुषैकवचने तिपि इकारलोपे प्रकृतसूत्रेण अदः स्थाने घसॢ इति सर्वादेशे अनुबन्धलोपे घस् त् इति जायते। ततः प्राप्तं शपं प्रबाध्य च्लि लुङि इत्यनेन च्लौ पुषादिद्युताद्यॢदितः परस्मैपदेषु इति सूत्रेण च्लेः स्थाने अङादेशे लुङ्लङ्लृङ्क्ष्वडुदात्तः इत्यनेन घस अङ्गस्य अडागमे अनुबन्धलोपे च अ घस् अ त् इति जाते वर्णसम्मेलने च **अघसत्** इति रूपं सिध्यति। अत्र अङः वलादित्वाभावात् नैव इडागमप्रसक्तिः। गमहनजनखनघसां लोपः क्ङित्यनङि इत्यनेन अनङि इति निषेधः उक्तः। तेन प्रकृते अङि परे उपधालोपो न।

(बहुत्र 'इति योगेन' इति शब्दः प्रयोगः अस्ति। सूत्रमेव योगः कथ्यते। अतः इति योगेन इत्यस्य इति सूत्रेण इत्यर्थो बोद्धव्यः।)

अदादितः दिवादिपर्यन्तम् - अद् हु दिव् धातवः

एवञ्च लुङि परस्मैपदे रूपाणि - **अघसत्, अघसताम्, अघसन्। अघसः, अघसतम्, अघसत। अघसम्, अघसाव, अघसाम।**

सनः उदाहरणं तु ग्रन्थान्तरे द्रष्टव्यम्।

क्रियायाः अनिष्पतौ गम्यमानायां लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति अदः कर्तरि **लृङि** आडजादीनाम् इति आडागमे आटश्च इत्यनेन वृद्धौ प्रथमपुरुषैकवचने तिपि इकारलोपे शप्-अपवादभूते स्यप्रत्यये अनुबन्धलोपे च आ अद् स्य त् इति जाते शप्प्रत्ययापवादस्य स्यस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधः। ततः आटश्च इत्यनेन वृद्धौ खरि च इति चर्त्वे दकारस्य तकारे **आत्स्यत्** इति रूपम् सिध्यति। एवम् तसादौ उह्यम्।

लृङि रूपाणि तावत् - **आत्स्यत्, आत्स्यताम्, आत्स्यन्। आत्स्यः, आत्स्यतम्, आत्स्यत। आत्स्यम्, आत्स्याव, आत्स्याम।**

।।इति अदादिगणः।।

पाठगतप्रश्नाः-१

३९. कति धातुगणाः भवन्ति।

४०. शपो लुक् केन विधीयते।

४१. अघसत् इत्यत्र घसॢ इत्यादेशः केन भवति।

४२. अदः सर्वेषाम् इत्यस्य कोऽर्थः।

४३. अद्धि इत्यत्र धि इत्यादेशः केन।

४४. जक्षुः इत्यत्र षत्वं केन।

४५. जघास इत्यत्र घसॢ इत्यादेशः केन।

४६. अदिप्रभृतिभ्यः शपः इत्यत्र प्रभृतिशब्दस्य कोऽर्थः।

४७. अद्-धातोः कोऽर्थः।

४८. अद्-धातोः लिटि प्रथमपुरुषैकवचने कति रूपाणि भवन्ति, तानि च कानि।

अथ जुहोत्यादिगणः

हु दानादनयोः इति सकर्मकात् परस्मैपदिनः अनिटः जुहोत्यादिगणीयात् धातोः **लटि** प्रथमपुरुषैकवचने तिपि तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि हु शप् ति इति जाते सूत्रमिदं प्रवर्तते -

[२१.८] जुहोत्यादिभ्यः श्लुः॥ (२.४.७५)

सूत्रार्थः - शपः श्लुः स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। जुहोत्यादिभ्यः (५/३), श्लुः (६/१) इति सूत्रगतपदच्छेदः। जुहोतिः आदिः येषां ते जुहोत्यादयः, तेभ्यः जुहोत्यादिभ्यः। जुहोत्यादिः दशसु धातुगणेषु तृतीयः। जुहोतिः इति हु-धातोः धातुनिर्देशाय इक्-श्तिपौ धातुनिर्देशे इत्यनेन श्तिपि रूपम्। अदिप्रभृतिभ्यः शपः इत्यतः शपः (६/१) इति पदमनुवर्तते। ततः जुहोत्यादिभ्यः शपः श्लुः इति पदयोजना। तेन जुहोत्यादिभ्यः विहितस्य शपः श्लुः स्यात् इति सूत्रार्थः। श्लुः अपि प्रत्ययादर्शनस्य संज्ञा भवति। यथा अदादिगणे लुक् अपि प्रत्ययादर्शनं मन्यते। प्रत्ययस्य लुक्-श्लु-लुपः इत्यनेन प्रत्ययस्य अदर्शनस्यैव लुक् श्लु लुप् इति संज्ञात्रयं भवति। तेन हु-आदिधातुभ्यः विहितस्य शपः अदर्शनम् भवति इति फलितम्। श्लुः लुप् इत्यनयोः प्रत्ययादर्शनरूपसमानफलकत्वेऽपि सूत्रे श्लुः इत्येव उक्तं न तु लुप्। यतो हि श्लु इत्युच्यते चेत् प्रत्ययलोपे प्रत्ययलक्षणम् इत्यनेन प्राप्तस्य प्रत्ययलक्षणकार्यस्य न लुमताङ्गस्य इत्यनेन निषेधो भवति। किञ्च लोपे सति स्थानिवद्भावो भवति, श्लुकरणे तु न स्थानिवद्भावः। श्लुसंज्ञायाः किं फलम् तद् अग्रिमे सूत्रे ज्ञास्यते।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण हु शप् ति इति स्थिते प्रकृतसूत्रेण शपो श्लौ हु ति इति जाते सूत्रमिदमारभ्यते -

[२१.९] श्लौ॥ (६.१.१०)

सूत्रार्थः - धातोः द्वे स्तः श्लौ परे।

सूत्रव्याख्या - श्लौ (७/१) इति एकपदमिदं सूत्रम्। सूत्रमिदं विधिसूत्रम्। लिटि धातोरनभ्यासस्य इत्यतः धातोः (६/१) इति पदस्य, एकाचो द्वे प्रथमस्य इत्यतः द्वे (१/२) इति पदस्य च अनुवृत्तिर्भवति। तथा च श्लौ धातोः द्वे इति पदयोजना। तेन श्लौ परे धातोः द्वित्वं भवति इति सूत्रार्थः सिध्यति।

उदाहरणे सूत्रार्थसमन्वयः - उपरि उक्तप्रकारेण हुधातोः तिपि शपि शपो श्लौ हु ति इति जाते श्लौ इति प्रकृतसूत्रेण हु इति धातोः द्वित्वे हु हु ति इति जायते। ततः पूर्वोऽभ्यासः इत्यनेन प्रथमभागस्य अभ्याससंज्ञायाम् अभ्यासस्य हु इत्यस्य हकारस्य कुहोश्चुः इत्यनेन चुत्वे गुणत आन्तर्याद् झकारे

तत्स्थाने अभ्यासे चर्च इत्यनेन जश्त्वे जकारे जु हु ति इति जायते। ततः तिपः सार्वधातुकत्वात् होः उकारस्य सार्वधातुकार्धधातुकयोः इत्यनेन गुणे ओकारे **जुहोति** इति रूपं सिध्यति।

तिप् सिप् मिप् इत्येतान् प्रत्ययान् विहाय अन्येषां प्रत्ययानां सार्वधातुकमपित् इत्यनेन ङिद्वद्भावे क्ङिति च इत्यनेन गुणनिषेधः। अत एव प्रथमपुरुषद्विवचने न गुणः। तेन **जुहुतः** इति रूपं भवति।

प्रथमपुरुषबहुवचने झिप्रत्यये शपि श्लौ द्वित्वादिकार्ये जु हु झि इति जाते झोऽन्तः इत्यनेन झस्य अन्तादेशे प्राप्ते सूत्रमिदमारभ्यते -

[२१.१०] अदभ्यस्तात्॥ (७.१.४)

सूत्रार्थः - अभ्यस्तात् झस्य अत् स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। अत् (१/१) अभ्यस्तात् (५/१) इति सूत्रगतपदच्छेदः। आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इत्यतः अनुवृत्तस्य प्रत्ययादीनाम् इत्यस्य प्रत्ययादेः इति षष्ठ्येकवचनान्ततया विपरिणामः। झोऽन्तः इत्यतः झः (६य१) इत्यस्यानुवृत्तिः। अभ्यस्तम् इति एका संज्ञा सा च उभे अभ्यस्तम् (६.१.५) इत्यनेन विधीयते। अष्टाध्याय्याम् षाष्ठिक-आष्टमिकभेदेन शब्दस्य द्वित्वविधानार्थम् प्रकरणद्वयमस्ति। तत्र षाष्ठिकस्य कृतद्वित्वस्य शब्दस्वरूपस्य उभे अभ्यस्तम् इति सूत्रेण अभ्यस्तसज्ञा। सूत्रार्थो हि अभ्यस्तसंज्ञकात् धातोः परस्य प्रत्ययावयवस्य झकारस्य स्थाने अत् इत्यादेशो भवति। विभक्तिसंज्ञकस्य झेः झस्य स्थाने विधीयमानः अत् इत्यादेशोऽपि विभक्तिंसज्ञको भवति। अतः हलन्त्यम् इत्यनेन प्राप्ता तकारस्य इत्संज्ञा न विभक्तौ तुस्माः इत्यनेन निषेधात् न भवति।

{सूत्रम्. **उभे अभ्यस्तम्** (६.१.५) = षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः।}

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण जुहु झि इति स्थिते जुहु इत्यस्य उभे अभ्यस्तम् इत्यनेन अभ्यस्तसंज्ञा भवति। ततः अदभ्यस्तात् इति प्रकृतसूत्रेण झेः झकारस्य स्थाने अत् इत्यादेशे जु हु अत् इ इति जाते इको यणचि इत्यनेन यणि प्राप्ते तं बाधित्वा अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन उवङि प्राप्ते तं बाधित्वा हुश्नुवोः सार्वधातुके इति अग्रिमपाठे वक्ष्यमाणेन सूत्रेण द्वितीय-होः उकारस्य वकारादेशे जुह् व् अति इति जाते वर्णसम्मेलने च **जुह्वति** इति रूपं भवति। तिपि सिपि मिपि च गुणः। अन्यत्र तसादौ अपित्त्वात् सार्वधातुकमपित् इति ङिद्वद्भावे क्ङिति च इति गुणनिषेधः।

हुधातोः लटि परस्मैपदे रूपाणि - **जुहोति, जुहुतः, जुह्वति। जुहोषि, जुहुथः, जुहुथ। जुहोमि, जुहुवः, जुहुमः।**

लिटि विशेषाय सूत्रमिदमारभ्यते -

[२१.११] भीह्रीभृहुवां श्लुवच्च॥ (३.१.३९)

सूत्रार्थः - भी-ह्री-भृ-हुधातुभ्यः लिटि आम् वा स्याद्, आमि श्लाविव कार्यं च।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। भीह्रीभृहुवाम् (६/३) श्लुवत् च इति सूत्रगतपदच्छेदः। श्लुवत् च इत्युभयमपि अव्ययपदम्। भीश्च ह्रीश्च भा च हुश्च तेषामितरेतरयोगद्वन्द्वे भीह्रीभृहुवः, तेषां भीह्रीभृहुवाम्। भीह्रीभृहुवाम् इत्यत्र पञ्चम्यर्थे षष्ठीप्रयोगः। श्लौ इव इति श्लुवत्, तत्र तस्येव इति योगेन सप्तम्यन्ताद् वतिप्रत्ययः। कास्प्रत्ययादाममन्त्रे लिटि इत्यतः लिटि (७/१), आम् (१/१) इत्यनयोः, तथा च उषविदजागृभ्योऽन्यतरस्याम् इत्यतः अन्यतरस्याम् (७/१) इत्यस्य च अनुवृत्तिर्भवति। प्रत्ययः (१/१) परः (१/१) इत्युभयम् अधिक्रियते। सूत्रस्याशयस्तावत् - लिटि परे भी-ह्री-भृ-हुधातुभ्यः परम् आम्प्रत्ययो भवति, किञ्च स आम्प्रत्ययः श्लुवत् भवति। श्लौ परतः यथा द्वित्वादिकार्यं भवति, तथा आमि परतः अपि भवति इति तात्पर्यम्। किन्तु सर्वमेतत् कार्यं विकल्पेन भवति।

उदाहरणे सूत्रार्थसमन्वयः - प्रसङ्गवशात् अत्र हुधातोरेव उदाहरणम् प्रदर्श्यते। धात्वन्तराणाम् उदाहरणम् ग्रन्थान्तरे द्रष्टव्यम्। पूर्वोक्तप्रकारेण हुधातोः लिटि अनुबन्धलोपे च हु ल् इति स्थिते प्रकृतसूत्रेण हुधातोः आम्प्रत्यये तस्य च श्लुवद्भावे श्लौ इत्यनेन धातोः द्वित्वे द्विरुक्तस्य पूर्वभागस्य अभ्याससंज्ञायां कुहोश्चुः इत्यनेन चुत्वे झकारे तत्स्थाने अभ्यासे चर्च इत्यनेन जश्त्वे जकारे जु हु आम् ल् इति जायते। ततः आमः तिङ्शिद्भिन्नत्वात् आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां सार्वधातुकार्धधातुकयोः इत्यनेन हकारोत्तरवर्तिनः उकारस्य गुणे ओकारे अवादेशे जुहवाम् इति जायते। ततः आमः इति सूत्रेण आमः परस्य लिटः लुकि धात्वधिकारे विहितत्वात् तिङ्शिद्भिन्नत्वाच्च कृदतिङ् इति सूत्रेण लिटः कृत्संज्ञायां जुहवाम् इत्यस्य प्रत्ययलक्षणेन कृदन्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां ङ्याप्प्रातिपदिकात् इति सूत्रेण सु-प्रत्यये जुहवाम् सु इति स्थिते आमः इति सूत्रेण सुलुकि जुहवाम् इत्यस्य सुबन्तत्वात् सुप्तिङन्तं पदम् इति पदसंज्ञा भवति। ततः जुहवाम् इत्यस्य आमन्तत्वात् कृञ्चानुप्रयुज्यते लिटि इति सूत्रेण लिट्परकस्य कृञः अनुप्रयोगे जुहवाम् कृ लिट् इति जाते अनुबन्धलोपे जुहवाम् कृ ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायां तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्वम्-इड्वहिमहिङ् इति सूत्रेण लस्य तिपि अनुबन्धलोपे जुहवाम् कृ ति इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपः सर्वादेशे णलि अनुबन्धलोपे जुहवाम् कृ अ इति जाते लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः कृ इत्यस्य द्वित्वे जुहवाम् कृ कृ अ इति जाते द्विरुक्तस्य पूर्वभागस्य कृ इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च जुहवाम् कर् कृ अ इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे जुहवाम् क कृ अ इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे जुहवाम् च कृ अ इति जाते णलो णित्त्वात् अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य कृञः ऋकारस्य वृद्धौ आकारे उरण् रपरः इति रपरत्वे च जुहवाम् च कार् अ इति जाते जुहवाम् इति मान्तस्य पदस्य हल्परत्वात् मोऽनुस्वारः इति मस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे **जुहवाञ्चकार** इति रूपम्। परसवर्णाभावे **जुहवांचकार** इति साकल्येन रूपद्वयं सिद्ध्यति।

अदादितः दिवादिपर्यन्तम् - अद् हु दिव् धातवः

अत्र विशेषः - आम्प्रत्ययस्य प्रकृतिः हुधातुः परस्मैपदी अस्ति इति हेतोः लिटि अनुप्रयुज्यमानः कृधातुरपि परस्मैपदी एव भवति। भूधातोः अस्धातोश्च अनुप्रयोगे तयोः परस्मैपदित्वात् न आत्मनेपदसम्भवः।

अत्रैव भूधातोरनुप्रयोगे **जुहवाम्बभूव, जुहवांबभूव** इति रूपद्वयम्। आस्धातोरनुप्रयोगे **जुहवामास** इति रूपम्। अग्रे **कृ भू अस्** एषाम् अनुप्रयोगेण निष्पन्नानि रूपाणि प्रदर्शयिष्यन्ते।

आमभावपक्षे हु-धातोः लिटि तिपि णलि अनुबन्धलोपे च हु अ इति स्थिते लिटि धातोरनभ्यासस्य इत्यनेन द्वित्वे अभ्यासस्य होः हकारस्य चुत्वे झकारे झस्य च जश्त्वे जकारे जुहु अ इति जाते अचो ञ्णिति इत्यनेन वृद्धौ आवादेशे वर्णसम्मेलने च **जुहाव** इति रूपं सिध्यति। अजादौ प्रत्यये परतः अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन होः उकारस्य स्थाने उवङादेशे **जुहुवतुः, जुहुवुः, जुहुवथुः** इत्यादिरूपाणि सिध्यन्ति। हुधातोः सिपि थलि आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधे प्राप्ते तं बाधित्वा क्रादिनियमानुसारं नित्यम् इटि प्राप्ते तस्यापि अचस्तास्वत्थल्यनिटो नित्यम् इत्यनेन निषेधः प्राप्तः। तदा तं बाधित्वा भारद्वाजनियमात् वैकल्पिके इटि **जुहोथ/जुहविथ** इति रूपद्वयं भवति। उत्तमपुरुषस्य एकवचने णलुत्तमो वा इत्यनेन विकल्पेन णलः णित्त्वात् वृद्ध्यभावपक्षे **जुहव**, अचो ञ्णिति इति वृद्धिपक्षे **जुहाव** इति साकल्येन रूपद्वयं भवति। वसि मसि च क्रादिनियमानुसारं नित्यम् इडागमे उवङि **जुहुविव, जुहुविम** इत्येवं रूपाणि भवन्ति।

तथा च आमभावपक्षे लिटि रूपाणि **जुहाव, जुहुवतुः, जुहुवुः। जुहोथ/जुहविथ, जुहुवथुः, जुहुव। जुहाव/जुहव, जुहुविव, जुहुविम।**

एवञ्च लिटि प्रथमपुरुषैकवचने तिपि साकल्येन **षट्** रूपाणि - **जुहाव, जुहवांचकार/जुहवाञ्चकार, जुहवांबभूव/जुहवाम्बभूव, जुहवामास।**

मिपि साकल्येन **जुहाव/जुहव, जुहवांचकार/जुहवांचकर-जुहवाञ्चकार/जुहवाञ्चकर, जुहवांबभूव/जुहवाम्बभूव, जुहवामास** इति **नव** रूपाणि।

कृ भू अस् एषाम् अनुप्रयोगेण निष्पन्नानि रूपाणि अधः प्रदत्तानि सन्ति।

	एकवचने	**द्विवचने**	**बहुवचने**
प्र.पु.	जुहवाञ्चकार	जुहवाञ्चक्रतुः	जुहवाञ्चक्रुः
म.पु.	जुहवाञ्चकर्थ	जुहवाञ्चक्रथुः	जुहवाञ्चक्र
उ.पु.	जुहवाञ्चकार/जुहवाञ्चकर	जुहवाञ्चकृव	जुहवाञ्चकृम

	एकवचने	**द्विवचने**	**बहुवचने**
प्र.पु.	जुहवांचकार	जुहवांचक्रतुः	जुहवांचक्रुः
म.पु.	जुहवांचकर्थ	जुहवांचक्रथुः	जुहवांचक्र
उ.पु.	जुहवांचकार/जुहवांचकर	जुहवांचकृव	जुहवांचकृम

	एकवचने	द्विवचने	बहुवचने
प्र.पु.	जुहवाम्बभूव	जुहवाम्बभूवतुः	जुहवाम्बभूवुः
म.पु.	जुहवाम्बभूविथ	जुहवाम्बभूवथुः	जुहवाम्बभूव
उ.पु.	जुहवाम्बभूव	जुहवाम्बभूविव	जुहवाम्बभूविम

	एकवचने	द्विवचने	बहुवचने
प्र.पु.	जुहवांबभूव	जुहवांबभूवतुः	जुहवांबभूवुः
म.पु.	जुहवांबभूविथ	जुहवांबभूवथुः	जुहवांबभूव
उ.पु.	जुहवांबभूव	जुहवांबभूविव	जुहवांबभूविम

	एकवचने	द्विवचने	बहुवचने
प्र.पु.	जुहवामास	जुहवामासतुः	जुहवामासुः
म.पु.	जुहवामासिथ	जुहवामासथुः	जुहवामास
उ.पु.	जुहवामास	जुहवामासिव	जुहवामासिम

लुटि प्रथमपुरुषैकवचने तिपि शबपवादे तासि तासः तिङ्शिद्भिन्नत्वात् आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां सार्वधातुकार्धधातुकयोः इत्यनेन होः उकारस्य गुणे ओकारे हो तास् ति इति जाते तेः स्थाने डादेशे डित्त्वसामर्थ्यात् अभस्यापि टिसंज्ञकस्य आसः लोपे हो त् आ इति जाते **होता** इति रूपं भवति। एवमग्रेऽपि विद्यार्थिना स्वयम् ऊह्यम्। लुटि शबपवादस्य तासः आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधः।

तथा च लुटि परस्मैपदे रूपाणि - **होता, होतारौ, होतारः। होतासि, होतास्थः, होतास्थ। होतास्मि, होतास्वः, होतास्मः।**

लृटि प्रथमपुरुषैकवचने तिपि शबपवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन होः उकारस्य गुणे आदेशप्रत्यययोः इति सकारस्य षकारे - **होष्यति**। लृटि शबपवादस्य स्यस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधः। एवम् अग्रेऽपि बोध्यम्।

तथा हि परस्मैपदे रूपाणि - **होष्यति, होष्यतः, होष्यन्ति। होष्यसि, होष्यथः, होष्यथ। होष्यामि, होष्यावः, होष्यामः।**

लोटि प्रथमपुरुषैकवचने तिपि शपि शपः श्लौ धातोः द्वित्वे अभ्यासादिकार्ये जु हु ति इति जाते तिपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन होः उकारस्य गुणे ओकारे एरुः इत्यनेन

इकारस्य उकारे **जुहोतु** इति रूपं भवति, तातङ्पक्षे **जुहुतात्** इत्यपि। तसि - **जुहुताम्**, झौ - **जुह्वतु**। सिपि हुझल्भ्यो हेर्धिः इत्यनेन हिस्थाने धि इति सर्वादेशे **जुहुधि** - (तातङि) **जुहुतात्, जुहुतम्, जुहुत**। उत्तमपुरुषे आडुत्तमस्य पिच्च इत्यनेन आटि, अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७) इति उवङादेशापेक्षया हुश्नुवोः सार्वधातुके (६.४.८७) इत्यस्य परत्वात् यणि प्राप्ते, तस्मादपि परत्वात् सार्वधातुकार्धधातुकयोः (७.३.८४) इत्यनेन गुणे ओकारे अवादेशे **जुहवानि, जुहवाव, जुहवाम** इति रूपाणि भवन्ति।

तथा हि परस्मैपदे लोटि रूपाणि - **जुहोतु/जुहुतात्, जुहुताम्, जुह्वतु। जुहुधि/जुहुतात्, जुहुतम्, जुहुत। जुहवानि, जुहवाव, जुहवाम।**

लङि अडागमे प्रथमपुरुषैकवचने तिपि शपि शपः श्लौ धातोर्द्वित्वे अभ्यासादिकार्ये होः उकारस्य गुणे ओकारे इतश्च इत्यनेन तिपः इकारस्य लोपे **अजुहोत्** इति रूपं भवति। तसि - **अजुहुताम्**। झौ झस्य स्थाने अत् इत्यादेशे प्राप्ते अभ्यस्तसंज्ञकत्वात् तं बाधित्वा सिजभ्यस्तविदिभ्यश्च इत्यनेन झेः जुसादेशे अनुबन्धलोपे अजुहु उस् इति स्थिते हुश्नुवोः सार्वधातुके इत्यनेन यणि प्राप्ते अग्रिमसूत्रं प्रवर्तते-

{सूत्रम्. **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९) = सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्सम्बन्धिनो झेर्जुस्।}

[२१.१२] जुसि च॥ (७.३.८३)

सूत्रार्थः- इगन्ताङ्गस्य गुणोऽजादौ जुसि।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। जुसि (७/१) च इति सूत्रगतपदच्छेदः। क्ससयाचि इत्यतः अचि (७/१) इत्यस्य अनुवृत्तिर्भवति। किञ्च मिदेर्गुणः इत्यतः गुणः (१/१) इति पदमनुवर्तते। अङ्गस्य इत्यधिक्रियते। इको गुणवृद्धी इति परिभाषया इकः इति पदं लभ्यते। तच्च अङ्गस्य इत्यस्य विशेषणमस्ति, अतः तदन्तविधौ इगन्तस्य अङ्गस्य इत्यर्थलाभः। अचि इति जुसि इत्यस्य विशेषणमस्ति। अतः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधौ अजादौ जुसि इत्यर्थलाभः। सूत्रार्थो हि अजादौ जुसि परतः इगन्तस्य अङ्गस्य स्थाने गुणो भवति। अलोऽन्त्यस्य इति परिभाषया अयं गुणः इगन्ताङ्गस्य अन्त्यस्य इकः स्थाने भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण अ जुहु उस् इति जाते अजादिः उस् परोऽस्ति। अतः जुसि च इति प्रकृतसूत्रेण इगन्ताङ्गस्य अन्त्यस्य इकः उकारस्य गुणे ओकारे अवादेशे उसः सकारस्य रुत्वे रेफस्य च विसर्गे **अजुहवुः** इति रूपं सिध्यति। अग्रेऽपि इत्थं बोध्यम्।

तथा च परस्मैपदे लङि रूपाणि - **अजुहोत्, अजुहुताम्, अजुहवुः। अजुहोः, अजुहुतम्, अजुहुत। अजुहवम्, अजुहुव, अजुहुम।**

विधिलिङि हुधातोः तिपि तिपः सार्वधातुकत्वात् शपि शपः श्लौ धातोः द्वित्वे अभ्यासादिकार्ये यासुट् परस्मैपदेषूदात्तो ङिच्च इत्यनेन तिपः यासुडागमे टित्त्वात् आद्यावयवे जु हु यास् ति इति जायते। ततः सुट्तिथोः इत्यनेन तकारस्य सुडागमे जुहुयास् स् ति इति जाते लिङः स लोपोऽनन्त्यस्य इत्यनेन

सकारद्वयस्यापि लोपः। ततः यासुटः ङिद्वद्भावात् गुणनिषेधे तिपः इकारस्य लोपे **जुहुयात्** इति रूपं भवति। तसादौ न कश्चित् विशेषः।

तथा हि परस्मैपदे विधिलिङि रूपाणि - **जुहुयात् जुहुयाताम्, जुहुयुः। जुहुयाः, जुहुयातम्, जुहुयात। जुहुयाम्, जुहुयाव, जुहुयाम।**

आशीर्लिङि हु-धातोः तिपि यासुटि सुटि च हु यास् स् ति इति जाते किदाशिषि इत्यनेन यासुटः कित्त्वं भवति। ततः यासुटः लिङाशिषि इत्यनेन आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते किदाशिषि इति यासुटः कित्त्वात् क्ङिति च इत्यनेन तन्निषेधः। ततः तिपः इकारस्य लोपे हु यास् स् त् इति जाते स्कोः संयोगाद्योरन्ते च इत्यनेन संयोगादिसकारलोपे अकृत्सार्वधातुकयोर्दीर्घः इत्यनेन होः उकारस्य दीर्घे **हूयात्** इति रूपं भवति। एवमग्रेऽपि।

तथा च आशीर्लिङि परस्मैपदे रूपाणि - **हूयात्, हूयास्ताम्, हूयासुः। हूयाः, हूयास्तम्, हूयास्त। हूयासम्, हूयास्व, हूयास्म इत्येवं रूपाणि भवन्ति।** अत्र तु शपः प्राप्तिरेव नास्ति, तस्मादेव श्लुरपि न भवति, अतः द्वित्वादिरपि न भवति।

लुङि हुधातोः अटि तिपि शबपवादे च्लौ सिजादेशे इकारलोपे अपृक्तहलः ईडागमे अनुबन्धलोपे अ हु स् ईत् इति जायते। सिचः आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधः। ततः सिचि वृद्धिः परस्मैपदेषु इत्यनेन होः उकारस्य वृद्धौ अ हौ स् ईत् इति जायते। ततः सकारस्य षत्वे वर्णसम्मेलने च **अहौषीत्** इति रूपं सिध्यति। ईडागमः तिपि सिपि च भवति, अन्यत्र तु वृद्धौ सस्य षत्वे टुत्वादिकार्ये च रूपाणि भवन्ति।

तथा च लुङि रूपाणि - **अहौषीत्, अहौष्टाम्, अहौषुः। अहौषीः, अहौष्टम्, अहौष्ट। अहौषम्, अहौष्व, अहौष्म।**

लृङि अटि प्रथमपुरुषैकवचने तिपि इकारलोपे शपि प्राप्ते तम् अपवादत्वेन प्रबाध्य स्यतासी लृलुटोः इत्यनेन स्यप्रत्यये अनुबन्धलोपे च अ हु स्य त् इति जाते स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन होः उकास्य गुणे ओकारे आदेशप्रत्यययोः इत्यनेन स्य इत्यस्य प्रत्ययावयवस्य सकारस्य षत्वे **अहोष्यत्** इति रूपं सिध्यति। लृङि शबपवादस्य स्यस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधः। तसादौ रूपाणि स्वयं साध्यानि।

तथा च लृङि परस्मैपदे रूपाणि - **अहोष्यत् अहोष्यताम्, अहोष्यत। अहोष्यः, अहोष्यतम्, अहोष्यत। अहोष्यम्, अहोष्याव, अहोष्याम**।

।।इति जुहोत्यादिगणः।।

पाठगतप्रश्नाः-२

४९. जुसि च इत्यस्य उदाहरणम् एकं प्रदर्शयत।

५०. भीह्रीभृहुवां श्लुवच्च इत्यस्य कोऽर्थः।

५१. हुधातोः कोऽर्थः।

५२. श्लौ इत्यस्य कोऽर्थः।

५३. हुधातोः लिटि प्रथमपुरुषैकवचने कति रूपाणि भवन्ति।

५४. शपः श्लुविधायकं सूत्रं किम्।

५५. अदभ्यस्तात् इत्यस्य कोऽर्थः।

५६. हुधातोः विधिलिङि प्रथमपुरुषैकवचने किं रूपम्।

५७. हुधातोः आशीर्लिङि प्रथमपुरुषैकवचने किं रूपम्।

५८. भीह्रीभृहुवां श्लुवच्च इति सूत्रेण विधीयमानं कार्यं नित्यम् अनित्यं वा।

अथ दिवादिगणः

दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु इति सेटः परस्मैपदिनः उदित्-धातोः वर्तमानक्रियावृत्तित्वविवक्षायां **लटि** प्रथमपुरुषैकवचनविवक्षायां तिपि अनुबन्धलोपे दिव् ति इति जायते। ततः तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदमारभ्यते -

[२१.१३] दिवादिभ्यः श्यन्॥ (३.१.६९)

सूत्रार्थः - कर्तृवाचके सार्वधातुके परे दिवादिगणीयधातुभ्यः श्यन्-प्रत्ययो भवति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। दिवादिभ्यः (५/३), श्यन् (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदस्य, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदस्य च अनुवृत्तिर्भवति। दिव् आदिः येषां ते दिवादयः, तेभ्यः दिवादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिसमासः। प्रत्ययः (१/१), परः (१/१) इति द्वयम् अधिकृतम्। धातोः (६/१)

इत्यस्य अधिकारः आयाति। अधिकृतस्य च धातोः धातुभ्यः (६/३) इति षष्ठीबहुवचनान्तत्वेन विपरिणामः। सार्वधातुके इति प्रत्ययसंज्ञा एव। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। पदयोजना - दिवादिभ्यः धातुभ्यः श्यन् प्रत्ययः परः कर्तरि सार्वधातके प्रत्यये। दिवादिः दशसु धातुगणेषु चतुर्थः। कर्त्रर्थके सार्वधातुके प्रत्यये परे दिवादिगणपठितधातुभ्यः श्यन् प्रत्ययः परो भवति इति सूत्रार्थः। सूत्रमिदं कर्तरि शप् इत्यस्यापवादभूतम्। श्यनः शकारस्य लशक्वतद्धिते इत्यनेन इत्संज्ञा, नकारस्य च हलन्त्यम् इत्यनेन इत्संज्ञा भवति। तेन 'य' इति शिष्यते। शकारानुबन्धः तिङ्शित्सार्वधातुकम् इति सार्वधातुकसंज्ञार्थः। नकारानुबन्धश्च ञ्नित्यादिर्नित्यम् इत्यनेन आद्युदात्तस्वरार्थः। शकारस्य लशक्वतद्धिते इत्यनेन इत्संज्ञा भवति।

अत्र विशेषः - श्यनः शित्त्वात् तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञा। किञ्च सार्वधातुकसंज्ञकस्य अस्य श्यन्प्रत्ययस्य अपित्त्वात् सार्वधातुकमपित् इत्यनेन ङिद्वद्भावः। यस्य फलम् अस्ति गुणनिषेधः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण दिव् ति इति स्थिते कर्त्रर्थकः सार्वधातुकः परोऽस्ति इति हेतोः प्रकृतसूत्रेण शपं प्रबाध्य श्यनि अनुबन्धलोपे दिव् य ति इति जायते। ततः श्यनः तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञायां लघूपधगुणे प्राप्ते सार्वधातुकमपित् इत्यनेन श्यनः ङित्त्वात् तन्निषेधः। ततः अलोऽन्त्यात् पूर्व उपधा इत्यनेन दिवः इकारस्य उपधासंज्ञायाम् अग्रिमसूत्रम् प्रारभ्यते -

[२१.१४] हलि च॥ (८.२.७७)

सूत्रार्थः - रेफवान्तस्य धातोः उपधाया इको दीर्घो हलि।

सुत्रव्याख्या- विधिसूत्रेऽस्मिन् पदद्वयमस्ति। हलि (७/१) च इति सूत्रगतपदच्छेदः। सिपि धातो रुर्वा इत्यतः धातोः (६/१) इत्यस्य, र्वोरुपधाया दीर्घ इकः इत्यतः र्वोः (६/२), उपधायाः (६/१), दीर्घः (१/१), इकः (६/१) इत्येतेषामनुवृत्तिर्भवति। र् च व् च र्वौ तयोः र्वोः इति इतरेतरयोगद्वन्द्वः। र्वोः इति धातोः विशेषणमस्ति अतः तदन्तविधौ रेफान्तस्य वान्तस्य च धातोः इत्यर्थलाभः। रेफान्तधातोः वकारान्तधातोः च उपधायाः इकः स्थाने दीर्घादेशो भवति हलि परतः इति सूत्रार्थः।

उदाहरणम् - रेफान्तस्य उदाहरणं विस्तीर्णम् इति। दीव्यति इति वकारान्तस्य उदाहरणम्। एतदेव प्रकृते आलोच्यम्।

सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण दिव् य ति इति जाते हल् परोऽस्ति इति कृत्वा हलि च इति प्रकृतसूत्रेण उपधादीर्घे **दीव्यति** इति रूपं सिध्यति। अग्रे प्रक्रिया पूर्ववत् । तसादौ रूपाणि स्वयम् साधनीयानि। तथा हि **लटि** परस्मैपदे रूपाणि - **दीव्यति, दीव्यतः, दिव्यन्ति। दीव्यसि, दीव्यथः, दीव्यथ। दीव्यामि, दीव्यावः, दीव्यामः**।

अदादितः दिवादिपर्यन्तम् - अद् हु दिव् धातवः

लिटि न तथा विशेषः। धातोः सेट्त्वात् वलादिलक्षणः इडागमो भवत्येव। पित्प्रत्ययेषु लघूपधगुणो भवति। किन्तु अपित्सु न भवति, असंयोगाल्लिट् कित् इत्यनेन कित्त्वविधानेन क्ङिति च इति तन्निषेधात्। अत्र प्रक्रिया स्वयं बोद्धव्या।

तथा हि लिटि परस्मैपदे रूपाणि - **दिदेव, दिदिवतुः, दिदिवुः। दिदेविथ, दिदिवथुः, दिदिव। दिदेव, दिदिविव, दिदिविम**।

लुटि प्रथमपुरुषैकवचने तिपि श्यन्-अपवादे तासि इटि अनुबन्धलोपे दिव् इ तास् ति इति स्थिते इतास् इति सागमकस्य आर्धधातुकसंज्ञायाम् तस्मिन् परतः लघूपधगुणे देव् इ तास् ति इति जायते। ततः तिपः डादेशे डित्त्वसामर्थ्यात् अभस्यापि टेः लोपे देव् इ त् आ इति जाते वर्णसम्मेलने च **देविता** इति रूपं सिध्यति। एवम् अग्रेऽपि।

तथा हि लुटि परस्मैपदे रूपाणि - **देविता, देवितारौ, देवितारः। देवितासि, देवितास्थः, देवितास्थ। देवितास्मि, देवितास्वः, देवितास्मः।**

लृटि प्रथमपुरुषैकवचने तिपि श्यन्-अपवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् इडागमे दिवः इकारस्य पुगन्तलघूपधस्य च इत्यनेन गुणे एकारे सकारस्य षत्वे **देविष्यति** इति रूपं सिध्यति। अत्र न कश्चित् विशेषः। तथा हि परस्मैपदे लृटि रूपाणि - **देविष्यति देविष्यतः, देविष्यन्ति। देविष्यसि, देविष्यथः, देविष्यथ। देविष्यामि, देविष्यावः, देविष्यामः**।

लोटि श्यनि हलि च इति उपधादीर्घे रूपाणि सिध्यन्ति। तथा च रूपाणि - **दीव्यतु** - (तातङि) **दीव्यतात्, दीव्यताम्, दीव्यन्तु। दीव्य** – (तातङि) **दीव्यतात्, दीव्यतम्, दीव्यत। दीव्यानि, दीव्याव, दीव्याम**।

लङि अटि श्यनि उपधादीर्घे रूपाणि सिध्यन्ति। रूपाणि च - **अदीव्यत्, अदीव्यताम्, अदीव्यन्। अदीव्यः, अदीव्यतम्, अदीव्यत। अदीव्यम्, अदीव्याव, अदीव्याम**।

विधिलिङि तिपि इकारलोपे श्यनि उपधादीर्घे यासुटि सुटि लिङः सलोपोऽनन्त्यस्य इत्यनेन सकारद्वयलोपे अनुबन्धलोपे दीव् य त् इति जाते अतो येयः इत्यनेन इयादेशे दीव् य इय् त् इति जाते लोपो व्योर्वलि इत्यनेन तकारपूर्ववर्तिनः यकारस्य लोपे दीव् य इ त् इति जाते आद्गुणः इति गुणे एकारे **दीव्येत्** इति रूपं सिध्यति। अग्रेऽपि इत्थं प्रक्रिया।

तथा च परस्मैपदे रूपाणि - **दीव्येत् दीव्येताम्, दीव्येयुः। दीव्येः, दीव्येतम्, दीव्येत। दीव्येयम्, दीव्येव, दीव्येम**।

आशीर्लिङि यासुटः कित्त्वात् लघूपधगुणनिषेधः। हलि च इति उपधादीर्घः। तथा हि रूपाणि - **दीव्यात्, दीव्यास्ताम्, दीव्यासुः। दीव्याः, दीव्यास्तम्, दीव्यास्त। दीव्यासम्, दीव्यास्व, दीव्यास्म।**

लुङि अटि तिपि इकारलोपे श्यन्-अपवादे च्लौ च्लेः सिचि सिचः सकारस्य आर्धधातुकं शेषः इत्यनेन आर्धधातुकंसज्ञायाम् आर्धधातुकस्येड्वलादेः इत्यनेन इडागमे टित्त्वात् आद्यावयवे अनुबन्धलोपे अ दिव् इ स् त् इति जाते तकारस्य अपृक्तसंज्ञायाम् अस्तिसिचोऽपृक्ते इत्यनेन तकारस्य ईडागमे

अनुबन्धलोपे अ दिव् इ स् ई त् इति जाते इट ईटि इत्यनेन सिचः सकारस्य लोपे सवर्णदीर्घे अ दिव् ई त् इति जाते सागमकस्य ईत् इत्यस्य सार्वधातुकसंज्ञकत्वे तस्मिन् परतः पुगन्तलघूपधस्य च इत्यनेन उपधागुणे एकारे वर्णसम्मेलने **अदेवीत्** इति रूपं सिध्यति। तसादौ रूपाणि स्वयम् साधनीयानि। अत्र आदेशप्रत्यययोः इति षत्वम्। तसि थसि थे च ष्टुना ष्टुः इति ष्टुत्वे टकारः।

तथा हि लुङि परस्मैपदे रूपाणि - **अदेवीत् अदेविष्टाम्, अदेविषुः। अदेवीः, अदेविष्टम्, अदेविष्ट। अदेविषम्, अदेविष्व, अदेविष्म**।

लृङि अटि प्रथमपुरुषैकवचने तिपि इकारलोपे श्यन्-अपवादभूते स्यप्रत्यये अ दिव् स्य त् इति जाते स्यस्य आर्धधातुकत्वात् इडागमे पुगन्तलघूपधस्य च इत्यनेन उपधागुणे सस्य षत्वे **अदेविष्यत्** इति रूपम्। अत्र सर्वत्र आदेशप्रत्यययोः इति षत्वम्। तसः थसः थस्य च स्थाने यथाक्रमम् तस्थस्थमिपां तान्तन्तामः इति ताम् तम् त अम् इत्यादेशाः। वसि मसि च सकारलोपः। तसादौ प्रक्रियाः स्वयम् बोद्धव्याः।

तथा च लृङि परस्मैपदे रूपाणि - **अदेविष्यत् अदेविष्यताम्, अदेविष्यन्। अदेविष्यः, अदेविष्यतम्, अदेविष्यत। अदेविष्यम्, अदेविष्याव, अदेविष्याम।**

।।इति दिवादिगणः।।

पाठगतप्रश्नाः-३

५९. दिवादिगणीयधातुभ्यः कः विकरणप्रत्ययो भवति।

६०. श्यन्विकरणविधायकसूत्रं लिखत।

६१. दिव्-धातोः कः अर्थः।

६२. दीव्यति इत्यत्र दीर्घः केन भवति।

६३. दिवादिगणः धातुगणेषु कतमो भवति।

६४. श्यन्प्रत्ययः कस्य अपवादः।

पाठसारः

अस्मिन् पाठे अदादिगणः, जुहोत्यादिगणः, दिवादिगणः इति गणत्रयस्य आलोचना विहिता। तेषु आदौ अदादिगणीयस्य प्रथमधातोः अर्थात् अद्-धातोः विषये आलोचनं कृतम्। तत्र अद्-धातोर्विषये अदिप्रभृतिभ्यः शपः, लिट्यन्यतरस्याम्, शासिवसिघसीनां च, इडत्यर्तिव्ययतीनाम्, हु-झल्भ्यो हेर्धिः,

अदादितः दिवादिपर्यन्तम् - अद् हु दिव् धातवः

अदः सर्वेषाम् लुङ्सनोर्घस्लृ इत्येतानि सूत्राणि व्याख्यातानि। ततः जुहोत्यादिगणीयस्य हुधातोः विषये आलोचनं कृतम्। तत्र हु-धातोः विषये जुहोत्यादिभ्यः श्लुः, श्लौ, अदभ्यस्तात्, भीह्रीभृहुवां श्लुवच्च, जुसि च इत्येतानि सूत्राणि व्याख्यातानि। ततः दिव्-धातुः आलोचितः। तत्र च दिवादिभ्यः श्यन् इति श्यन्विकरणविधायकसूत्रं व्याख्यातम्। ततः हलि च इति उपधादीर्घविधायकसूत्रमपि व्याखातं येन दीव्यति इति सिध्यति। अत्र च पाठे लुक् श्लु लुप् इत्येतेषाम् वैशिष्ट्यम् प्रदर्शितम्। तत्र तत्र विशेषरूपाणां प्रक्रियाः प्रदर्शिताः। पाठेऽस्मिन् न समेषां रूपाणां ससूत्रं प्रक्रियाः प्रदर्शिताः, ताः स्वयं साध्याः।

पाठान्तप्रश्नाः

१. लिट्यन्यतरस्याम् इति सूत्रं सोदाहरणं व्याख्यात।

२. शासिवसिघसीनां च इति सूत्रं सोदाहरणं व्याख्यात।

३. हु-झल्भ्यो हेर्धिः इति सूत्रं सोदाहरणं व्याख्यात।

४. लुङ्सनोर्घस्लृ इति सूत्रं सोदाहरणं व्याख्यात।

५. जुहोति इति रूपं साधयत।

६. भीह्रीभृहुवां श्लुवच्च इति सूत्रं सोदाहरणं व्याख्यात।

७. दिवादिभ्यः श्यन् इति श्यन्विकरणविधायकसूत्रं व्याख्यात।

८. अदेवीत् इति रूपं साधयत।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि- १

१. दश।

२. अदिप्रभृतिभ्यः शपः।

३. लुङ्सनोर्घस्लृ।

४. अदः परस्य अपृक्तसार्वधातुकस्य अट् स्यात् सर्वमतेन।

५. हुझल्भ्यो हेर्धिः।

६. शासिवसिघसीनां च।

७. लिट्यन्यतरस्याम्।

८. आदिः।

९. भक्षणम्।

१०. जघास, आद इति रूपद्वयम्।

उत्तराणि- २

११. अजुहवुः।

१२. भी-ह्री-भृ-हुधातुभ्यः लिटि आम् वा स्याद्, आमि श्लाविव कार्यं च।

१३. दानं भक्षणं च।

१४. धातोः द्वे स्तः।

१५. जुहाव, जुहवांचकार-जुहवाञ्चकार , जुहवांबभूव-जुहवाम्बभूव , जुहवामास इति षट् रूपाणि।

१६. जुहोत्यादिभ्यः श्लुः।

१७. अभ्यस्तसंज्ञकात् धातोः परस्य प्रत्ययावयवस्य झकारस्य स्थाने अत् इत्यादेशो भवति।

१८. जुहुयात्।

१९. हूयात्।

२०. अनित्यम्।

उत्तराणि- ३

२१. श्यन्।

२२. दिवादिभ्यः श्यन्।

२३. क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतयः दिवः अर्थाः।

२४. हलि च।

२५. चतुर्थः।

२६. शपः।

॥ इति एकविंशः पाठः ॥

346sk22

२२

स्वादितः रुधादिपर्यन्तम्-
सु तुद् रुध् धातवः

प्रस्तावना

भवन्तः इतः पूर्वस्मिन् पाठे अदादिगणः, जुहोत्यादिगणः, दिवादिगणः च इति गणत्रयस्य परिचयं प्राप्तवन्तः। अधुना स्वादिगणः, तुदादिगणः, रुधादिगणः च इति गणत्रयं ज्ञास्यति। पूर्ववत् अत्रापि प्रतिगणं विकरणभेदः अस्ति, विकरणभेदात् च रूपभेदो भवति। यथा स्वादिगणीयधातुभ्यः श्नुविकरणप्रत्ययः, तुदादिगणीयधातुभ्यः शविकरणप्रत्ययः, रुधादिगणीयधातुभ्यः श्नाविकरणप्रत्ययः च भवति। विकरणभेदात् रूपभेदः, तद्यथा सु-धातोः श्नुविकरणे सुनोति इति रूपम्, तुद्-धातोः शविकरणे तुदति इति रूपम्, रुध्-धातोः श्नाविकरणे रुणद्धि इति रूपं भवति। अस्मिन् पाठे न सर्वाणि रूपाणि ससूत्रं प्रदर्शयिष्यन्ते अन्यथा पाठपरिमाणम् एधेत। पूर्वतनपाठवत् अस्मिन् पाठेऽपि प्रतिगणं प्रथमधातुरेव आलोचयिष्यते। धात्वन्तरस्य प्रक्रियाः तु स्वयं बोद्धव्याः।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- प्रतिगणं कीदृशं विकरणं भवति तज्ज्ञास्यति।
- विकरणविधायकसूत्रार्थम् अवगमिष्यति।
- तत्र तत्र व्याख्यातानि विशेषसूत्राणि ज्ञास्यति।
- सु-धातुरूपाणि साधयितुं शक्नुयात्।
- तुद्-धातुरूपाणि साधयितुं पारयेत्।
- रुध्-धातुरूपाणि साधयितुम् अर्हेत्।
- एतज्ज्ञात्वा च अन्यानि अपि धातुरूपाणि साधयितुं प्रभवेत्।
- तत्र तत्र प्रदर्शितानि वैकल्पिकरूपाणि अपि अवगमिष्यति।

अथ स्वादिगणः

षुञ् अभिषवे इति उभयपदिनः अनिटः स्वादिगणीयधातोः वर्तमानक्रियावृत्तित्वविवक्षायां कर्तरि **लटि** परस्मैपदसंज्ञके तिपि सु ति इति जाते कर्तरि शप् इति शपि प्राप्ते सूत्रमिदमारभ्यते -

[२२.१] स्वादिभ्यः श्नुः॥ (३.१.७३)

सूत्रार्थः - स्वादिगणपठितधातुभ्यः श्नुप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। स्वादिभ्यः (५/३), श्नुः (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिकृतम्। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः श्नुः प्रत्ययः परः इति। स्वादिगणः दशसु धातुगणेषु पञ्चमः। सुः आदिः येषाम् (धातूनाम्) ते स्वादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः स्वादिभ्यः। सूत्रार्थो हि कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः स्वादिगणपठितधातुभ्यः श्नुप्रत्ययः परो भवति। श्नुप्रत्ययस्य शकारः इत्संज्ञकः लशक्वतद्धिते इत्यनेन। अतः नु-मात्रम् शिष्यते। योगोऽयम् कर्तरि शप् इत्यस्य अपवादः।

अत्र विशेषः - श्नुप्रत्ययस्य शित्त्वात् तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञा। अपि च सार्वधातुकसंज्ञकस्य अस्य श्नुप्रत्ययस्य अपित्त्वात् सार्वधातुकमपित् इत्यनेन ङिद्वद्भावः। यस्य फलम् अस्ति गुणनिषेधः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सु ति इति स्थिते प्राप्तं शपं प्रबाध्य प्रकृतसूत्रेण श्नुप्रत्ययो भवति। यतो हि अत्र ति इति कर्त्रर्थकसार्वधातुकप्रत्ययः परोऽस्ति। ततः सु नु ति इति जाते नु इत्यस्य तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञायां सार्वधातुकार्धधातुकयोः इत्यनेन सोः उकारस्य गुणः प्राप्तः। तदा श्नुप्रत्ययः अपित् सार्वधातुकम् च अस्ति इति हेतोः सार्वधातुकमपित् इत्यनेन ङिद्वद्भावो भवति। तेन क्ङिति च इत्यनेन गुणनिषेधः। ततः तिप्रत्ययस्य सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन नोः उकारस्य गुणे ओकारे **सुनोति** इति रूपं सिध्यति। द्विवचने तसि तसः अपित्त्वात् सार्वधातुकत्वात् च ङिद्वद्भावे न नोः उकारस्य गुणः। ततः सकारस्य रुत्वे रेफस्य च विसर्गे **सुनुतः** इति रूपम्। बहुवचने झिप्रत्यये अन्तादेशे सु नु अन्ति इति जाते नोः उकारस्य स्थाने इको यणचि इति यणि प्राप्ते तं बाधित्वा अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन उवङि प्राप्ते सूत्रमिदमारभ्यते -

[२२.२] हुश्नुवोः सार्वधातुके॥ (६.४.८७)

सूत्रार्थः - हुश्नुवोरनेकाचोऽसंयोगपूर्वस्योवर्णस्य यण् स्यादचि सार्वधातुके।

सूत्रव्याख्या - विधिसूत्रमिदम् पदद्वयात्मकम्। सूत्रेण अनेन यणादेशो विधीयते। हुश्नुवोः (६/२), सार्वधातुके (७/१) इति सूत्रगतपदच्छेदः। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यतः अचि (७/१)

इत्यस्य, एरनेकाचोऽसंयोगपूर्वस्य इत्यतः अनेकाचः (६/१), असंयोगपूर्वस्य (६/१) इत्यनयोः, ओः सुपि इत्यतः ओः (६/१) इत्यस्य, इणो यण् इत्यतः यण् (१/१) इत्यस्य च अनुवृत्तिर्भवति। अङ्गस्य (६/१) इत्यधिकृतम्। अचि सार्वधातुके हुश्नुवोः अनेकाचः अङ्गस्य असंयोगपूर्वस्य ओः यण् इति पदयोजना। सार्वधातुके इत्यस्य विशेषणम् अचि इति। अतः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधौ अजादौ सार्वधातुके इत्यर्थलाभः। श्नुः प्रत्ययः अतः प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया श्नु इत्यनेन श्नुप्रत्ययान्तस्य ग्रहणम्। अनेकाचः इति पदम् श्नुप्रत्ययान्तेन अङ्गेन सह सम्बद्धम्। नास्ति संयोगः पूर्वः यस्मात् असौ इति बहुव्रीहिसमासे असंयोगपूर्वः, तस्य असंयोगपूर्वस्य। असंयोगपूर्वस्य इति पदम् ओः इत्यस्यैव विशेषणम् न तु श्नु इत्यस्यापि। हुश्च श्नुश्च तयोः इतरेतरयोगद्वन्द्वे हुश्नुवौ, तयोः हुश्नुवोः। सूत्रार्थस्तावत् - अजादौ सार्वधातुके परतः जुहोतेः श्नुप्रत्ययान्तस्य अनेकाचः अङ्गस्य च असंयोगपूर्वस्य उकारस्य स्थाने यणादेशः स्यात् इति। स्थानेऽन्तरतमः इति परिभाषया उकारस्य स्थाने वकारादेशः भवति। योगोऽयम् अचि श्नुधातु...इत्यादिना प्राप्तस्य उवङः अपवादः।

उदाहरणे सूत्रार्थसमन्वयः -

पूर्वोक्तप्रकारेण सु नु अन्ति इति स्थिते अचि श्नुधातु...इत्यादिना योगेन प्राप्तम् उवङादेशं बाधित्वा हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने यणादेशो भवति। यतो हि सुनु इति श्नुप्रत्ययान्तः अनेकाच् अङ्गमस्ति। तस्य च अङ्गस्य अवयवः उकारः असंयोगपूर्वः अपि अस्ति। ततः वर्णसम्मेलने **सुन्वन्ति** इति रूपं भवति। सिपि मिपि च सुनोति इति रूपवत् प्रक्रिया बोद्धव्या। सिपि षत्वम् आदेशप्रत्यययोः इति योगेन। उत्तमपुरुषद्विवचने वसि सुनु वस्, उत्तमपुरुषबहुवचने मसि सुनु मस् इति स्थिते अग्रिमसूत्रमारभ्यते -

[२२.३] लोपश्चास्यान्यतरस्यां म्वोः॥ (६.४.१०७)

सूत्रार्थः - असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः परयोः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पञ्च पदानि सन्ति। लोपः (१/१), च (अव्ययम्) अस्य (६/१), अन्यतरस्याम् (७/१), म्वोः (७/२) इति सूत्रगतपदच्छेदः। सूत्रस्थेन अस्य इति पदेन उतश्च प्रत्ययादसंयोगपूर्वात् (६.४.१०६) इत्यस्य परामर्शः। उतश्च प्रत्ययादसंयोगपूर्वात् इत्यतः उतः (५/१), प्रत्ययात् (५/१), असंयोगपूर्वात् (५/१) इत्येतेषाम् अनुवृत्तिर्भवति। तेषां त्रयाणामपि षष्ठ्येकवचनान्ततया विपरिणामो भवति। अङ्गस्य इत्यधिकृतम्। असंयोगपूर्वस्य प्रत्ययस्य उतः अङ्गस्य म्वोः अन्यतरस्याम् लोपः इति पदयोजना। अधिकृतस्य अङ्गस्य इत्यस्य उतः इति पदम् विशेषणम्। अतः तदन्तविधौ उदन्तस्य अङ्गस्य इत्यर्थलाभः। असंयोगपूर्वः यः प्रत्ययः (प्रत्ययावयवः) उकारः तदन्तस्य अङ्गस्य लोपो वा स्यात् म्वोः परयोः इति सूत्रार्थः। अलोऽन्त्यस्य इति परिभाषया अयमादेशः उदन्ताङ्गस्य अन्त्यस्यैव अलः उकारस्य स्थाने भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सुनु वस् इत्यत्र सुनु मस् इत्यत्र च उकारः श्नुप्रत्ययावयवः अस्ति। अपि च उकारात् पूर्वम् संयोगवर्णः नास्ति। तस्मात् उकारः असंयोगपूर्वः। किञ्च

सुनु इति उकारान्तम् अङ्गम् अपि अस्ति। अपि च तस्मात् उकारान्तात् अङ्गात् परे (वसः) वकारः, (मसः) मकारः च अस्ति। अतः प्रकृतसूत्रेण श्नुप्रत्ययावयवस्य उकारस्य विकल्पेन लोपे यथाक्रमम् **सुन्वः, सुन्मः** इति रूपे भवतः। लोपाभावपक्षे च **सुनुवः, सुनुमः** इति रूपे भवतः।

तथा हि **लटि** परस्मैपदे रूपाणि - **सुनोति, सुनुतः, सुन्वन्ति। सुनोषि, सुनुथः, सुनुथ। सुनोमि, सुन्वः-सुनुवः, सुन्मः-सुनुमः**।

अत्र अवधेयम् - (षुञ्) सुधातोः ञित्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे सुधातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इति परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले तादिषु न कोऽपि पित्-प्रत्ययः। अतः सार्वधातुकमपित् इत्यनेन तादिः सर्वोऽपि प्रत्ययः ङित् भवति। तस्मात् सर्वत्रैव नोः उकारस्य गुणनिषेधः। किञ्च श्नुप्रत्ययस्य ङित्त्वात् न सोः उकारस्य गुणः इत्यपि अवधेयम्। वहिप्रत्यये महिङ्प्रत्यये च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन नोः उकारस्य विकल्पेन लोपः। अत्र अचि परे हुश्नुवोः सार्वधातुके इत्यनेन यण् भवति। किञ्च टित आत्मनेपदानां टेरे इत्यनेन एत्त्वं भवति। सोः थासि सुनु थास् इति स्थिते थासः से इत्यादेशे सुनु से इति जाते आदेशप्रत्यययोः इति सकारस्य षत्वम्। उत्तमपुरुषैकवचने इटि सुनु इ इति जाते नोः उकारस्य हुश्नुवोः सार्वधातुके इति यणि वकारे टेः एत्वे सुन्वे इति रूपम्। वहौ महिङि च लोपश्चास्यान्यतरस्यां म्वोः इति विकल्पेन उकारलोपः।

तथा हि आत्मनेपदे लटि रूपाणि - **सुनुते, सुन्वाते, सुन्वते। सुनुषे, सुन्वाथे, सुनुध्वे। सुन्वे, सुन्वहे-सुनुवहे, सुन्महे-सुनुमहे**।

लिटि द्वित्वादिकार्ये कृते सति आदेशप्रत्ययोः इत्यनेन द्वितीयसकारस्य षत्वम्। लिट् च इति योगेन लिडादेशः तिङ् आर्धधातुकः। अतः अजादिप्रत्ययेषु परतः हुश्नुवोः सार्वधातुके (६.४.८७) इत्यस्य अप्रवृत्तौ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७) इत्यनेन उवङ् भवति। थलि आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधे प्राप्ते तं बाधित्वा क्रादिनियमानुसारं नित्यम् इटि प्राप्ते तस्यापि अचस्तास्वत्थल्यनिटो नित्यम् इत्यनेन निषेधः प्राप्तः। तदा तं बाधित्वा भारद्वाजनियमेन वैकल्पिकः इडागमः। ततः इड्भावे इडभावे चेति पक्षद्वयेऽपि गुणः। वसि मसि तु क्रादिनियमानुसारम् नित्यम् इडागमः। मिपि णलुत्तमो वा इति णित्त्वविकल्पः।

तथा हि लिटि परस्मैपदे रूपाणि - **सुषाव, सुषुवतुः, सुषुवुः। सुषविथ-सुषोथ, सुषुवथुः, सुषुव। सुषाव-सुषव, सुषुविव, सुषुविम**।

आत्मनेपदस्थलेऽपि अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७) इत्यनेन उवङ् भवति। लिटि तप्रत्यये लिटस्तझयोरेशिरेच् इत्यनेन तकारस्य स्थाने एशादेशे सु ए इति जाते लिटि धातोरनभ्यासस्य इत्यनेन सु इत्यस्य द्वित्वे सु सु ए इति जाते अनभ्यासस्य सोः उकारस्य उवङि अनुबन्धलोपे सु स् उव् ए इति जाते अनभ्यासस्य सकारस्य आदेशप्रत्ययोः इति षत्वे **सुषुवे** इति रूपम्। झप्रत्यये झस्य स्थाने लिटस्तझयोरेशिरेच् इति सूत्रेण इरेच् इत्यादेशे अनुबन्धलोपे द्वित्वादिकार्ये विहिते सति सुषु इरे इति जाते

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति उवङादेशे **सुषुविरे** इति रूपम्। ध्वमि प्रक्रियया सुषुव् इ ध्वे इति जाते वकारः इण् अस्ति। तस्मात् परम् इट् अस्ति। अतः इटः परस्य लिडादेशस्य ध्वमः धस्य स्थाने विकल्पेन ढत्वम् विभाषेटः इत्यनेन। अत्र लिटि हुश्नुवोः सार्वधातुके इति न प्रवर्तते लिटः आर्धधातुकत्वात्। तप्रत्ययं, झप्रत्ययं, थास्प्रत्ययं च विहाय अन्यत्र टित आत्मनेपदानां टेरे इत्यनेन एत्त्वं भवति। थासि ध्वमि वहौ महिङि च क्रादिनियमानुसारम् नित्यम् इडागमः।

तथा हि आत्मनेपदे रूपाणि – **सुषुवे, सुषुवाते, सुषुविरे। सुषुविषे, सुषुवाथे, सुषुविढ्वे-सुषुविध्वे। सुषुवे, सुषुविवहे, सुषुविमहे**।

{सूत्रम्. **विभाषेटः** (८.३.७९) = इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा ढः।}

लुटि प्राप्तस्य श्नुप्रत्ययस्य अपवादस्य तासः आर्धधातुकं शेषः इति आर्धधातुकसंज्ञा अस्ति। अतः तासि परे सर्वत्रैव सार्वधातुकार्धधातुकयोः इति गुणे सो इति भवति। रूपाणाम् प्रक्रिया भूधातुवत् ज्ञेया। अत्र लुटि श्नुप्रत्ययापवादस्य तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपेदेशेऽनुदात्तात् इत्यनेन तन्निषेधः।

तथा हि परस्मैपदे रूपाणि - **सोता, सोतारौ, सोतारः। सोतासि, सोतास्थः, सोतास्थ। सोतास्मि, सोतास्वः, सोतास्मः।**

प्रथमपुरुषे उभयविधस्थले समानम् रूपम्। यतो हि स्थानिभेदे सत्यपि आदेशसाम्यम् अत्र अस्ति। तद्यथा परस्मैपदस्थले लुटः प्रथमस्य डारौरसः इत्यनेन तिप् तस् झि इत्येतेषाम् स्थाने यथाक्रमम् डा रौ रस् इत्यादेशा विधीयन्ते। आत्मनेपदस्थले त आताम् झ इत्येतेषाम् स्थाने यथाक्रमम् डा रौ रस् इत्यादेशा विधीयन्ते इति आदेशसाम्यम् स्पष्टम् एव। थासि तासि थासः से इत्यादेशे सोतास् से इति स्थिते तासस्त्योर्लोपः इति तासः सकारलोपः। ध्वमि सोतास् ध्वम् इति स्थिते धि च इति तासः अवयवस्य सकारस्य लोपः। उत्तमपुरुषैकवचने इटि सोतास् इ इति स्थितौ सकारस्य ह एति इति हकारः। थासं विहाय आथामादौ टित आत्मनेपदानां टेरे इति टेः एत्वम्। पूर्ववत् इण्निषेधः।

तथा हि आत्मनेपदे रूपाणि - **सोता, सोतारौ, सोतारः। सोतासे, सोतासाथे, सोताध्वे। सोताहे, सोतास्वहे, सोतास्महे।**

लृटि प्राप्तस्य श्नुप्रत्ययस्य अपवादस्य स्यस्य आर्धधातुकसंज्ञा अस्ति। अतः तस्मिन् परे सर्वत्रैव गुणो भवति। किञ्च आदेशप्रत्यययोः इत्यनेन षत्वमपि भवति। आत्मनेपदस्थले टित आत्मनेपदानां टेरे इत्यनेन एत्त्वं भवति। श्नुप्रत्ययापवादस्य स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपेदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। ततः परस्मैपदे रूपाणि - **सोष्यति, सोष्यतः, सोष्यन्ति। सोष्यसि, सोष्यथः, सोष्यथ। सोष्यामि, सोष्यावः, सोष्यामः।**

आत्मनेपदस्थले थासं विहाय टित आत्मनेपदानां टेरे इति टेः एत्वम्। इण्निषेधः पूर्ववत्। आत्मनेपदे रूपाणि च - **सोष्यते, सोष्येते, सोष्यन्ते। सोष्यसे, सोष्येथे, सोष्यध्वे। सोष्ये, सोष्यावहे, सोष्यामहे।**

लोटि परस्मैपदे रूपाणि - **सुनोतु** - (तातङि) **सुनुतात्, सुनुताम्, सुन्वन्तु**। सिपि सु नु सि इति स्थिते सेर्ह्यपिच्च इत्यनेन सेः स्थाने हि इत्यादेशे सु नु हि इति जाते सूत्रमिदमारभ्यते -

[२२.४] उतश्च प्रत्ययादसंयोगपूर्वात्॥ (६.४.१०६)

सूत्रार्थः - असंयोगपूर्वात् प्रत्ययोतो हेर्लुक्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदचतुष्टयम् अस्ति। सूत्रेणानेन हेर्लुक् विधीयते। उतः (५/१), च (अव्ययम्), प्रत्ययात् (५/१), असंयोगपूर्वात् (५/१) इति सूत्रगतपदच्छेदः। अतो हेः इत्यतः हेः (६/१) इत्यस्य, चिणो लुक् इत्यतः लुक् (१/१) इत्यस्य च अनुवृत्तिर्भवति। अङ्गस्य (६/१) इत्यधिकृतम्। तस्य च पञ्चम्येकवचनान्ततया विपरिणामः। नास्ति संयोगः पूर्वः यस्मात् असौ असंयोगपूर्वः इति बहुव्रीहिसमासः, तस्मात् असंयोगपूर्वात्। अङ्गात् इत्यस्य विशेषणमस्ति उतः इति। अतः तदन्तविधौ उदन्तात् अङ्गात् इत्यर्थलाभः। असंयोगपूर्वः यः प्रत्ययः (प्रत्ययावयवः) उकारः तदन्तात् अङ्गात् परस्य हेर्लुक् स्यात् इति सूत्रार्थः। प्रत्ययस्य लुक्श्लुलुपः इत्यनुसारम् प्रत्ययादर्शनस्यैव लुक्संज्ञा विधीयते। अतः हेः लुक् भवति इत्युक्ते सम्पूर्णस्य हेः अदर्शनम् भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सुनु हि इति जाते उतश्च प्रत्ययादसंयोगपूर्वात् इति प्रकृतसूत्रेण हेः लुकि **सुनु** इति रूपं भवति। तातङ्पक्षे **सुनुतात्** इति रूपमपि जायते। मिपि सुनु मि इति जाते मेर्निः इति मिस्थाने नि इत्यादेशे सुनु नि इति आडुत्तमस्य पिच्च इति आडागमे सुनु आ नि इति जाते नोः उकारस्य गुणे ओकारे अवादेशे वर्णसम्मेलने **सुनवानि** इति रूपम्। सुनु वस्, सुनु मस् इत्यत्र आडुत्तमस्य पिच्च इति आडागमे सागमकस्य वसः मसश्च पिद्वद्भावे सार्वधातुकमपित् इति ङित्त्वम् न भवति। तेन क्ङिति च इति गुणनिषेधोऽपि न। ततः नित्यं ङितः इति सकारलोपे **सुनवाव, सुनवाम** इति रूपम्। नित्यं ङितः इति सकारलोपः।

तथा हि लोटि परस्मैपदे रूपाणि - **सुनोतु-सुनुतात्, सुनुताम्, सुन्वन्तु। सुनु-सुनुतात्, सुनुतम्, सुनुत। सुनवानि, सुनवाव, सुनवाम।**

आत्मनेपदस्थले उत्तमपुरुषं विहाय अन्यत्र सार्वधातुकमपित् इति ङिद्वद्भावः। उत्तमपुरुषे तु आडुत्तमस्य पिच्च इत्यनेन पिद्वद्भावे सार्वधातुकमपित् इति न ङित्त्वम्। तेन क्ङिति च इति गुणवृद्धिनिषेधोऽपि न। प्रथमपुरुषैकवचने तप्रत्यये एत्वे सुनु ते इति जाते आमेतः इति एकारस्य स्थाने आम्-आदेशे **सुनुताम्** इति रूपम्। आतामि सुनु आताम् इति जाते टेः आमः एत्वे सुनु आते इति जाते आमेतः इति एकारस्य आम्-आदेशे सुनु आताम् इति जाते हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने यणि वकारे **सुन्वाताम्** इति रूपम्। आथामि एवमेव प्रक्रिया। झे प्रक्रियया सुनु झ इति स्थिते झोऽन्तः इत्यस्य आत्मनेपदेष्वनतः इति अपवादसूत्रेण केवलस्य झकारस्य स्थाने अत् इत्यादेशे सुनु अत् अ इति जाते टेः अकारस्य एकारे सुनु अत् ए इति जाते आमेतः इति एकारस्य स्थाने आमादेशे सुनु अत् आम् इति जाते हुश्नुवोः सार्वधातुके इति नोः उकास्य स्थाने यणि वकारे सुन् व् अत् आम् इति जाते वर्णसम्मेलने **सुन्वताम्** इति रूपम्। थासि सुनु थास् इति स्थिते थासः से इत्यादेशे सुनु से इति जाते सकारात् परस्य एकारस्य सवाभ्यां वामौ इति एकारस्य वकारादेशे आदेशप्रत्यययोः इति सकारस्य षकारे

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

कृते **सुनुष्व** इति रूपम्। ध्वमि सुनु ध्वम् इति स्थिते टेः अमः एत्वे सुनु ध्वे इति जाते वकारात् परस्य एकारस्य सवाभ्यां वामौ इति अमादेशे **सुनुध्वम्** इति रूपम्। इटि सु नु इ इति स्थिते टिसंज्ञकस्य इकारस्य एत्वे एत ऐ इति सूत्रेण प्रत्ययस्य एकारस्य स्थाने ऐकारादेशे सुनु ऐ इति जाते आडुत्तमस्य पिच्च इति आडागमे सागमकस्य ऐ इत्यस्य पित्त्वात् सार्वधातुकमपित् इति न ङित्त्वम्। तेन क्ङिति च इति न गुणनिषेधः। अतः सार्वधातुकार्धधातुकयोः इत्यनेन नोः उकारस्य गुणे ओकारे अवादेशे सुन् अव् आ ऐ इति जाते आटश्च इति योगेन आ ऐ इत्यनयोः स्थाने वृद्धौ एकादेशे ऐकारे सुनो ऐ इति जाते ओकारस्य स्थाने अवादेशे **सुनवै** इति रूपम्। वहौ महिङि च एवमेव प्रक्रिया।

तथा हि लोटि आत्मनेपदे रूपाणि - **सुनुताम्, सुन्वाताम्, सुन्वताम्। सुनुष्व, सुन्वाथाम्, सुनुध्वम्। सुनवै, सुनवावहै, सुनवामहै**।

लङि अटि प्रथमपुरुषैकवचने तिपि श्नुप्रत्यये इकारलोपे तिपः सार्वधातुकत्वात् नोः उकारस्य गुणे **असुनोत्** इति रूपं भवति। एवम् सिपि मिपि च गुणः। तसादौ सार्वधातुकमपित् इति ङिद्वद्भावात् न नोः उकारस्य गुणः। वसि मसि च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन नोः उकारस्य विकल्पेन लोपः।

तथा च परस्मैपदे रूपाणि - **असुनोत्, असुनुताम्, असुन्वन्। असुनोः, असुनुतम्, असुनुत। असुनवम्, असुन्व-असुनुव, असुन्म-असुनुम**।

आत्मनेपदस्थले तप्रत्ययादेः सार्वधातुकमपित् इति अपित्त्वात् ङिद्वद्भावे गुणाभावः। सोः झे प्रक्रियया अ सुनु झ इति स्थिते आत्मनेपदेष्वनतः इति झस्य अत् इत्यादेशे अ सुनु अत् अ इति जाते हुश्नुवोः सार्वधातुके इति नोः उकारस्य स्थाने यणि वकारे **असुन्वत** इति रूपम्। वहिप्रत्यये महिङ्प्रत्यये च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन नोः उकारस्य विकल्पेन लोपः। लङि आत्मनेपदे झे, आतामि, आथामि, झे, इटि च परतः हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने वकारादेशः।

तथा च आत्मनेपदे रूपाणि - **असुनुत, असुन्वाताम्, असुन्वत। असुनुथाः, असुन्वाथाम्, असुनुध्वम्। असुन्वि, असुन्वहि-असुनुवहि, असुन्महि-असुनुमहि**।

विधिलिङि तिपि श्नुप्रत्यये इकारलोपे यासुटि सुटि सु नु यास् स् त् इति जाते लिङः स लोपोऽनन्त्यस्य इत्यनेन सकारद्वयस्यापि लोपे **सुनुयात्** इति रूपं जायते। तसादौ रूपाणि स्वयं बोद्धव्यानि।

तथा हि **विधिलिङि** परस्मैपदे रूपाणि - **सुनुयात्, सुनुयाताम्, सुनुयुः। सुनुयाः, सुनुयातम्, सुनुयात। सुनुयाम्, सुनुयाव, सुनुयाम**।

विधिलिङि आत्मनेपदस्थले प्रथमैकवचने तप्रत्यये श्नुप्रत्यये लिङः सीयुट् इत्यनेन सीयुडागमे सुटि सु नु सीय् स् त इति जाते लिङः सलोपोऽनन्त्यस्य इत्यनेन सीयुटः सकारलोपे सुटः च सकारलोपे सु नु ईय् त इति जाते हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने यणि वकारे लोपो व्योर्वलि इत्यनेन यकारस्य लोपे **सुन्वीत** इति रूपं भवति। एवम् अग्रेऽपि ऊह्यम्। आत्मनेपदस्थले सर्वत्रैव अजादिसार्वधातुकपरत्वात् हुश्नुवोः सार्वधातुके इति यणि वकारे सुन्वी इति भवति।

तथा हि विधिलिङि आत्मनेपदे रूपाणि - **सुन्वीत, सुन्वीयाताम्, सुन्वीरन्। सुन्वीथाः, सुन्वीयाथाम्, सुन्वीध्वम्। सुन्वीय, सुन्वीवहि, सुन्वीमहि**।

आशीर्लिङः आर्धधातुकत्वात् न श्नुप्रत्ययः। अकृत्सार्वधातुकयोर्दीर्घः इत्यनेन दीर्घः। हुधातुवत् रूपाणि साध्यन्ताम्। तथा च परस्मैपदे रूपाणि - **सूयात्, सूयास्ताम्, सूयासुः। सूयाः, सूयास्तम्, सूयास्त। सूयासम्, सूयास्व, सूयास्म**।

आत्मनेपदस्थले तप्रत्यये सीयुटि सुटि सु सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय् स् त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय् स् त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति तन्निषेधः। ततः लोपो व्योर्वलि इति यकारलोपे आशीर्लिङः आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे ओकारे षत्वे तकारस्य ष्टुत्वे टकारे **सोषीष्ट** इति रूपम्। थासि एवमेव प्रक्रिया। ध्वमि विभाषेटः इति ध्वमः धकारस्य विकल्पनेन ढकारः। अत्र सर्वत्र आदेशप्रत्यययोः इति सीयुटः सकारस्य षत्वम्। उत्तमपुरुषैकवचने इटि सोषीय् इ इति स्थिते इटोऽत् इति इकारस्य अत्त्वे सोषीय् अ इति जाते वर्णसम्मेलने **सोषीय** इति रूपम्।

तथा हि आत्मनेपदे आशीर्लिङि रूपाणि - **सोषीष्ट, सोषीयास्ताम्, सोषीरन्। सोषीष्ठाः, सोषीयास्थाम्, सोषीढ्वम्। सोषीय, सोषीवहि, सोषीमहि**।

लुङि अटि प्रथमपुरुषैकवचने तिपि श्नुप्रत्ययापवादे च्लौ सिचि तिपः इकारलोपे अ सु स् त् इति जाते अस्तिसिचोऽपृक्ते इत्यनेन ईडागमे अ सु स् ई त् इति जाते सिचः आर्धधातुकत्वात् वलादित्वात् च आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधे सूत्रमिदमारभ्यते -

[२२.५] स्तुसुधूञ्भ्यः परस्मैपदेषु॥ (७.२.७२)

सूत्रार्थः - स्तुसुधूञ्भ्यः सिच इट् स्यात् परस्मैपदेषु।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। स्तुसुधुञ्भ्यः (५/३), परस्मैपदेषु (७/३) इति सूत्रगतपदच्छेदः। स्तुश्च सुश्च धूञ् च तेषामितरेतरयोगद्वन्द्वः, तेभ्यः स्तुसुधूञ्भ्यः। अञ्नेः सिचि इत्यतः सिचि (७/१) इत्यनुवर्तते तस्य च षष्ठ्येकवचनान्ततया विपरिणामः। इडत्यर्तिव्ययतीनाम् इत्यतः इट् (१/१) इत्यनुवर्तते। स्तुसुधूञ्भ्यः इति पञ्चम्यन्तम् अतः तस्मादित्युत्तरस्य इति परिभाषया उत्तरस्य इत्यर्थलाभः। सूत्रार्थस्तावत् - परस्मैपदस्थले स्तु, सु, धूञ् इत्येतेभ्यः धातुभ्यः उत्तरस्य सिच इडागमः स्यात्। सुस्तुधात्वोः अनिट्त्वात् आभ्याम् धातुभ्याम् परस्य सिचः इण्निषेधः प्राप्तः। अपि च स्वरतिसूतिसूयतिधूञूदितो वा इति योगेन धूञ्धातोः परस्य सिचः विकल्पेन इडागमः प्राप्तः। अतः निषेधविकल्पौ बाधित्वा सिचः नित्यम् इड्विधानार्थः प्रकृतसूत्रारम्भः। टित्त्वात् इट् सिचः आद्यावयवो भवति आद्यन्तौ टकितौ इति परिभाषया।

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सुधातोः लुङि तिपि अ सु स् ई त् इति जाते परस्मैपदस्थलत्वात् प्रकृतसूत्रेण सिचः इडागमः। ततः अ सु इ स् ईत् इति जाते सिचि वृद्धिः परस्मैपदेषु इत्यनेन सोः उकारस्य वृद्धौ औकारे आवादेशे अ साव् इ स् ईत् इति जाते इट ईटि इत्यनेन सकारस्य लोपे सवर्णदीर्घे **असावीत्** इति रूपं भवति। सिपि अपि एवमेव प्रक्रिया। परस्मैपदस्थले सर्वत्रैव इगन्ताङ्गत्वात् सिचिः वृद्धिः परस्मैपदेषु इति वृद्धिः बोद्धव्या। तसि थसि थे च ष्टुना ष्टुः इति ष्टुत्वम् बोध्यम्। वसि मसि च नित्यं ङितः इति सकारलोपः।

तथा हि परस्मैपदे रूपाणि - **असावीत्, असाविष्टाम्, असाविषुः। असावीः, असाविष्टम्, असाविष्ट। असाविषम्, असाविष्व, असाविष्म**।

आत्मनेपदसंज्ञकतप्रत्ययस्थले लुङि अटि तप्रत्यये श्नुप्रत्ययापवादे च्लौ सिचि अ सु स् त इति जाते सिचः आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे ओकारे सिचः सकारस्य षत्वे तकारस्य ष्टुत्वे टकारे **असोष्ट** इति रूपम्। एवमेव थासि ऊह्यम्। सोः झप्रत्यये प्रक्रियया अ सु स् झ इति जाते आत्मनेपदेष्वनतः इति झस्य अत् इत्यादेशे अ सु स् अत् अ इति जाते सोः उकारस्य गुणे ओकारे सिचः सस्य षत्वे **असोषत** इति रूपम् सिध्यति। ध्वमि इणः षीध्वंलुङ्लिटां धोऽङ्गात् इति ध्वमः धकारस्य ढत्वम्।

तथा च आत्मनेपदे रूपाणि - **असोष्ट, असोषाताम्, असोषत। असोष्ठाः, असोषाथाम्, असोढ्वम्। असोषि, असोष्वहि, असोष्महि।**

{सूत्रम्. **इणः षीध्वंलुङ्लिटां धोऽङ्गात्** (८.३.७८) = इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात्।}

लृङि अटि तिपि इकारलोपे श्नुप्रत्ययापवादभूते स्यप्रत्यये स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे ओकारे सस्य षत्वे **असोष्यत्** इति रूपं भवति। लृङि उभयविधस्थले सर्वत्रैव आदेशप्रत्यययोः इति षत्वम्। उत्तमपुरुषैकवचने असोष्य अम् इति स्थिते अमि पूर्वः इति पूर्वरूपैकादेशे **असोष्यम्** इति रूपम्। वसि मसि च नित्यं ङितः इति सकारलोपः। श्नुप्रत्ययापवादस्य स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपेदेशेऽनुदात्तात् इत्यनेन तन्निषेधः।

तथा हि लुङि परस्मैपदे रूपाणि - **असोष्यत्, असोष्यताम्, असोष्यन्। असोष्यः, असोष्यतम्, असोष्यत। असोष्यम्, असोष्याव, असोष्याम।**

लृङि आत्मनेपदस्थले पूर्ववत् प्रक्रिया। तथा च आत्मनेपदे रूपाणि - **असोष्यत, असोष्येताम्, असोष्यन्त। असोष्यथाः, असोष्येथाम्, असोष्यध्वम्। असोष्ये, असोष्यावहि, असोष्यामहि।**

।।इति स्वादिगणः।।

पाठगतप्रश्नाः-१

१. स्वादिगणीयधातुभ्यः कः विकरणप्रत्ययो विधीयते।

२. स्तुसुधूञ्भ्यः परस्मैपदेषु इति सूत्रं किं विदधाति।

३. सुधातोः श्नुप्रत्ययविधायकसूत्रं किम्।

४. स्वादिगणीयस्य सुधातोः कोऽर्थः।

५. सुधातोः परस्मैपदे लुङि प्रथमपुरुषैकवचने किं रूपम्।

६. सुधातोः आत्मनेपदे लटि उत्तमपुरुषबहुवचने किं रूपम्।

७. सुधातोः परस्मैपदे लिटि मध्यमपुरुषैकवचने किं रूपम्।

८. श्नुप्रत्ययस्य शकारस्य इत्संज्ञायाः किं प्रयोजनम्।

९. आशीर्लिङि किमर्थं श्नुप्रत्ययः न भवति।

१०. सूयात् इत्यत्र सोः उकारस्य दीर्घः केन सूत्रेण।

अथ तुदादिगणः

तुद व्यथने इति स्वरितेतः अनिटः तुदादिगणीयधातोः वर्तमानक्रियावृत्तित्वविवक्षायाम् कर्तरि **लटि** परस्मैपदसंज्ञके तिपि तुद् ति इति जाते तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदमारभ्यते -

[२२.६] तुदादिभ्यः शः॥ (३.१.७७)

सूत्रार्थः - तुदादिगणपठितधातुभ्यः शप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। तुदादिभ्यः (५/३), शः (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिकृतम्। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः शः प्रत्ययः परः इति। तुदादिगणः दशसु धातुगणेषु षष्ठः। तुद् आदिः येषाम् (धातूनाम्) ते तुदादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः तुदादिभ्यः। सूत्रार्थस्तावत् - कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

परतः तुदादिगणपठितधातुभ्यः शप्रत्ययः परो भवति। लशक्वतद्धिते इत्यनेन शप्रत्ययस्य शकारस्य इत्संज्ञा भवति। अतः अ-मात्रम् शिष्यते। शप्रत्ययस्य शित्त्वात् तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञा। किञ्च सार्वधातुकसंज्ञकस्य अस्य शप्रत्ययस्य अपित्त्वात् सार्वधातुकमपित् इत्यनेन ङिद्वद्भावः। यस्य फलम् अस्ति गुणनिषेधः। शप्प्रत्ययः पित् भवति, शप्रत्ययः अपित् भवति इति शप्-शयोः पार्थक्यम्। शपः पित्त्वात् अनुदात्तौ सुप्पितौ इति अनुदात्तस्वरः। शे तु आद्युदात्तश्च इति उदात्तस्वरः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण तुद् ति इति जाते तुदादिभ्यः शः (३.१.७७) इति शबपवादस्य शप्रत्ययस्य प्राप्तिः। किञ्च पुगन्तलघूपधस्य च (७.३.८६) इति लघूपधगुणस्य प्राप्तिः इत्युभयोः युगपत् प्राप्तौ परत्वात् लघूपधगुणः प्राप्तः। तदा गुणे कृते अकृते च शस्य प्राप्तत्वात् कृताकृप्रसङ्गी नित्यः इति परिभाषया शः नित्यः। किन्तु शप्रत्यये कृते तस्य अपित्त्वात् सार्वधातुकत्वात् च सार्वधातुकमपित् इति ङिद्वद्भावात् परोऽपि लघूपधगुणो न प्रवर्तते क्ङिति च इति निषेधात्। अतः परान्नित्यं बलवत् इति परिभाषया आदौ शप्रत्यये कृते न लघूपधगुणस्य प्राप्तिः। एवञ्च शप्रत्यये अनुबन्धलोपे तुद् अ ति इति जाते वर्णसम्मेलने च **तुदति** इति रूपं सिध्यति। एवम् तसादौ अपि।

तथा हि लटि परस्मैपदे रूपाणि - **तुदति, तुदतः, तुदन्ति। तुदसि, तुदथः, तुदथ। तुदामि, तुदावः, तुदामः**।

अत्र अवधेयम् - तुद् धातोः स्वरितेत्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे तुदः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इति परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले शप्रत्ययस्य सार्वधातुकसंज्ञकत्वात् अपित्त्वात् च सार्वधातुकमपित् इति ङिद्वद्भावे पुगन्तलघूपधस्य च इति प्राप्तस्य लघूपधगुणस्य क्ङिति च इति निषेधः। किञ्च तादीनाम् नवानाम् अपित्त्वात् सार्वधातुकत्वात् च सार्वधातुकमपित् इति ङिद्वद्भावः। तुदः आतामि ङिद्वद्भावे आतामः आकारस्य इयादेशे यकारलोपे तुद् अ इ ताम् इति स्थितौ आद्गुणः इति गुणैकादेशे एकारे तुद् ए ताम् इति जाते टेः आमः एत्वे **तुदेते** इति रूपम् सिध्यति। आथामि एवमेव। तुदः थासि शे टित आत्मनेपदानां टेरे इति सूत्रापवादेन थासः से इति सूत्रेण थासः स्थाने से इत्यादेशः। उत्तमपुरुषैकवचने इटि इकारे शे टिसंज्ञकस्य इकारस्य एत्वे तुद् अ ए इति जाते अतो गुणे इति पररूपैकादेशः। तुदः वहौ महिङि च शविकरणप्रत्यये अतो दीर्घो यञि इति दीर्घैकादेशः। थासम् विना अन्यत्र टित आत्मनेपदानां टेरे इति एत्त्वम् बोध्यम्।

तथा च आत्मनेपदे लटि रूपाणि - **तुदते, तुदेते, तुदन्ते। तुदसे, तुदेथे, तुदध्वे। तुदे, तुदावहे, तुदामहे**।

लिटि णलि (तिपि), थलि (सिपि), णलि (मिपि) च द्वित्वे हलादिशेषे लघूपधगुणः। अन्यत्र लिटः आर्धधातुकत्वात् सार्वधातुकमपित् इति न प्रवर्तते। किन्तु असंयोगाल्लिट् कित् (१.२.५) इति कित्त्वात् क्ङिति च लघूपधगुणनिषेधः। थलि आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच

उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधे क्रादिनियमानुसारम् थलि नित्यम् इडागमः। तेन थल्यादौ आर्धधातुकस्येड्वलादेः इत्यनेन इडागमो भवत्येव। आत्मनेपदस्थलेऽपि क्रादिनियमानुसारम् इडागमः।

तथा च परस्मैपदे लिटि रूपाणि - **तुतोद, तुतुदतुः, तुतुदुः। तुतोदिथ, तुतुदथुः, तुतुद। तुतोद, तुतुदिव, तुतुदिम**।

आत्मनेपदस्थले तुदः लिटि तप्रत्यये लिटस्तझयोरेशिरेच् इत्यनेन तकारस्य स्थाने एशादेशे तुद् ए इति जाते लिटि धातोरनभ्यासस्य इत्यनेन तुद् इत्यस्य द्वित्वे हलादिशेषे तु तुद् ए इति जाते वर्णसम्मेलने **तुतुदे** इति रूपं सिध्यति। आतामादौ रूपाणि स्वयं साध्यन्ताम्। थासि, ध्वमि, वहौ, महिङि च पूर्ववत् इडागमः। तं, थासं झं च विहाय अन्यत्र टित आत्मनेपदानां टेरे इति एत्वम् बोध्यम्।

तथा हि लिटि आत्मनेपदे रूपाणि - **तुतुदे, तुतुदाते, तुतुदिरे। तुतुदिषे, तुतुदाथे, तुतुदिध्वे। तुतुदे, तुतुदिवहे, तुतुदिमहे**।

{सूत्रम्. **असंयोगाल्लिट् कित्** (१.२.५) = असंयोगात्परोऽपिल्लिट् कित् स्यात्।}

लुटि इण्निषेधः। प्रथमपुरुषैकवचने तिपि शप्रत्ययापवादे तासि डित्त्वसामर्थ्यात् अभस्यापि टेः आसः लोपे तासः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन तुदः उकारस्य गुणे ओकारे तोद् त् आ इति जायते। ततः खरि च इति योगेन तासः तकारे परतः तुदः दकारस्य चर्त्वे तकारे **तोत्ता** इति रूपं सिध्यति। तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। एवम् अग्रेऽपि ऊह्यम्। अत्र प्रक्रियायै भूधातुरूपाणि दृश्यन्ताम्।

तथा च परस्मैपदे लटि रूपाणि - **तोत्ता, तोत्तारौ, तोत्तारः। तोत्तासि, तोत्तास्थः, तोत्तास्थ। तोत्तास्मि, तोत्तास्वः, तोत्तास्मः**।

आत्मनेपदस्थलेऽपि पूर्ववत् प्रक्रिया। अत्र रूपाणाम् प्रक्रियायै एध्धातुरूपाणि अवलोक्यन्ताम्। तथा च आत्मनेपदे रूपाणि - **तोत्ता, तोत्तारौ, तोत्तारः। तोत्तासे, तोत्तासाथे, तोत्ताध्वे। तोत्ताहे, तोत्तास्वहे, तोत्तास्महे**।

लृटि प्रथमपुरुषैकवचने तिपि शप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् पुगन्तलघूपधस्य च इति लघूपधगुणे खरि च इति दकारस्य चर्त्वे तकारे **तोत्स्यति** इति रूपं सिध्यति। स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। एवम् अन्यत्रापि विद्यार्थिना ऊह्यम्।

एवञ्च परस्मैपदे लृटि रूपाणि - **तोत्स्यति, तोत्स्यतः, तोत्स्यन्ति। तोत्स्यसि, तोत्स्यथः, तोत्स्यथ। तोत्स्यामि, तोत्स्यावः, तोत्स्यामः**।

आत्मनेपदस्थलेऽपि पूर्ववत् प्रक्रिया। थासं विना सर्वत्रैव टेः एत्वम्। तथा हि आत्मनेपदे रूपाणि - **तोत्स्यते, तोत्स्येते, तोत्स्यन्ते। तोत्स्यसे, तोत्स्येथे, तोत्स्यध्वे। तोत्स्ये, तोत्स्यावहे, तोत्स्यामहे**।

लोटि उभयविधस्थलेऽपि न कश्चित् विशेषः। तथा च परस्मैपदे रूपाणि - **तुदतु - (तातङि) तुदतात्, तुदताम्, तुदन्तु। तुद - (तातङि) तुदतात्, तुदतम्, तुदत। तुदानि, तुदाव, तुदाम**।

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

आत्मनेपदे एध्-धातुवत् प्रक्रिया ज्ञेया। तथा च रूपाणि - **तुदताम्, तुदेताम्, तुदन्ताम्। तुदस्व, तुदेथाम्, तुदध्वम्। तुदै, तुदावहै, तुदामहै**।

लङि अटि तिपि शप्रत्यये इकारलोपे **अतुदत्** इति रूपं सिध्यति। शप्रत्ययस्य सार्वधातुकमपित् इति ङिद्वद्भावात् न लघूपधगुणः। दशमकक्षायाः सन्धिप्रकरणे अधीताः केचित् योगाः अत्र प्रवर्तन्ते। तथाहि - अतुदत् इति तिङन्तत्वात् पदम्। झलां जशोऽन्ते इति सूत्रेण अन्त्यस्य तकारस्य स्थाने स्थानत आन्तर्याद् जश्त्वे दकारे अतुदद् इति स्थितिः जायते। ततश्च वाऽवसाने इति सूत्रेण विकल्पेन चर्त्वे तकारे कृते अतुदत् इत्यपि शब्दः निष्पद्यते। इत्थम् **अतुदद् अतुदत्** इति द्विविधमपि रूपं साधु। एवमन्यत्रापि विद्यार्थिना स्वयमूह्यम्।

तथा च लङि परस्मैपदे रूपाणि- **अतुदत्, अतुदताम्, अतुदन्। अतुदः, अतुदतम्, अतुदत। अतुदम्, अतुदाव, अतुदाम।**

आत्मनेपदस्थलेऽपि पूर्ववत् लघूपधगुणनिषेधः। तथा च आत्मनेपदे रूपाणि - **अतुदत, अतुदेताम्, अतुदन्त। अतुदथाः, अतुदेथाम्, अतुदध्वम्। अतुदे, अतुदावहि, अतुदामहि।**

विधिलिङि तिपि शप्रत्यये यासुटि सुटि इकारलोपे तुद् अ यास् स् त् इति जाते सकारद्वयलोपे अते येयः इत्यनेन या इत्यस्य स्थाने तुद् अ इय् त् इति जाते लोपो व्योर्वलि इत्यनेन यकारस्य लोपे आद्गुणः इति अकार-इकारयोः स्थाने गुणे एकारे **तुदेत्** इति रूपं जायते। अत्र न कश्चित् विशेषः। अन्येषां प्रक्रियायै भूधातुरूपाणि वीक्ष्यन्ताम्।

तथा च परस्मैपदे रूपाणि - **तुदेत्, तुदेताम्, तुदेयुः। तुदेः, तुदेतम्, तुदेत। तुदेयम्, तुदेव, तुदेम।** आत्मनेपदे च एध्धातुवत् रूपाणि - **तुदेत, तुदेयाताम्, तुदेरन्। तुदेथाः, तुदेयाथाम्, तुदेध्वम्। तुदेय, तुदेवहि,तुदेमहि।**

आशीर्लिङः लिङाशिषि इत्यनेन आर्धधातुकत्वात् न शप्रत्ययस्य प्रवृत्तिः। प्रथमैकवचने तिपि यासुटि सुटि इकारलोपे तुद् यास् स् त् इति जाते स्कोः संयोगाद्योरन्ते च इत्यनेन सकारद्वयस्यापि लोपे तुद् यात् इति स्थितौ आर्धधातुकत्वात् गुणः प्राप्तः। तदा किदाशिषि इति सूत्रेण यासुटः कित्त्वात् यात् इति समुदायस्यापि कित्त्वं भवति इति कृत्वा क्ङिति च इति गुणनिषेधः। तेन **तुद्यात्** इति रूपम् सिध्यति। सिपि तुद्यास् स् इति जाते यासुटः सकारस्य स्कोः संयोगाद्योरन्ते च इत्यनेन लोपः। सिपः सस्य तु रुत्वे विसर्गे **तुद्याः** इति रूपम्। एवमेव अग्रेऽपि स्वयम् ऊह्यम्।

तथा हि आशीर्लिङि परस्मैपदे रूपाणि - **तुद्यात्, तुद्यास्ताम्, तुद्यासुः। तुद्याः, तुद्यास्तम्, तुद्यास्त। तुद्यासम्, तुद्यास्व, तुद्यास्म।**

आत्मनेपदस्थलेऽपि न शप्रत्ययस्य प्राप्तिः आशीर्लिङः आर्धधातुकत्वात्। एवञ्च तप्रत्यये सीयुटि सुटि तुद् सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय् स् त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय् स्त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति

तन्निषेधः। ततः लोपो व्योर्वलि इत्यनेन यकारस्य लोपे आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन तुदः उकारस्य गुणे प्राप्ते सूत्रमिदमारभ्यते -

[२२.७] लिङ्सिचावात्मनेपदेषु॥ (१.२.११)

सूत्रार्थः - इक्समीपाद्धलः परौ झलादिलिङात्मनेपदपरः सिच्चेत्येतौ कितौ स्तः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। लिङ्सिचौ (१/२), आत्मनेपदेषु (७/३) इति सूत्रगतपदच्छेदः। लिङ् च सिच् च तयोः इतरेतरयोगद्वन्द्वे लिङ्सिचौ इति। इको झल् इत्यतः झल् (१/१), हलन्ताच्च इत्यतः हलन्तात् (५/१), असंयोगाल्लिट् कित् इत्यतः कित् (१/१) इत्येतेषां पदानाम् अनुवृत्तिर्भवति। झल् इति लिङ्सिचौ इत्यस्य विशेषणं भवति, हलन्तात् इत्यत्र अन्तपदस्य समीपम् इत्यर्थः। तेन हलन्तात् इत्यस्य हलः समीपात् इत्यर्थः। सूत्रार्थस्तावत् - इकः समीपे यो हल् वर्तते तस्मात् परं झलादिलिङ् झलादिसिच् च किद्वद् भवति आत्मनेपदप्रत्यये परतः इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण तुद् सीय् त इति स्थिते आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन प्राप्तस्य गुणस्य क्ङिति च इत्यनेन निषेधः। यतो हि लिङ्सिचावात्मनेपदेषु इति प्रकृतसूत्रेण सागमकस्य तप्रत्ययस्य कित्त्वं विधीयते, झलादिलिङ्त्वात्। ततः लोपो व्योर्वलि इति यकारलोपे सुडागमे षत्वे ष्टुत्वे टकारे तुत्सीष्ट इति रूपं भवति। एवम् अन्यत्रापि स्वयं बोद्धव्यम्।

तथा च आशीर्लिङि आत्मनेपदे रूपाणि - **तुत्सीष्ट, तुत्सीयास्ताम्, तुत्सीरन्। तुत्सीष्ठाः, तुत्सीयास्थाम्, तुत्सीध्वम्। तुत्सीय, तुत्सीवहि, तुत्सीमहि।**

लुङि तुदः अटि तिपि शप्रत्ययापवादे च्लौ सिचि इकारलोपे अतुद् स् त् इति जाते सिचः आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधे अस्तिसिचोऽपृक्ते इत्यनेन ईडागमे अतुद् स् ईत् इति जाते वदव्रजहलन्तस्याचः इत्यनेन तुदः उकारस्य वृद्धौ औकारे खरि च इति दकारस्य चर्त्वे **अतौत्सीत्** इति रूपं सिध्यति। तसि तसः तामादेशे च्लौ सिचि अतुद् स् ताम् इति जाते वदव्रजहलन्तस्याचः इत्यनेन तुदः उकारस्य वृद्धौ अतौद् स् ताम् इति जायते। ततः सकारस्य झलो झलि इत्यनेन सकारस्य लोपे खरि च इत्यनेन दकारस्य चर्त्वे तकारे वर्णसम्मेलने **अतौत्ताम्** इति रूपं भवति। तामि, तमि, ते, थासि, ध्वमि च सकारस्य झलो झलि इति लोपः।

तथा हि लुङि परस्मैपदे रूपाणि - **अतौत्सीत्, अतौत्ताम्, अतौत्सुः। अतौत्सीः, अतौत्तम्, अतौत्त। अतौत्सम्, अतौत्स्व, अतौत्स्म।**

वदव्रजहलन्तस्याचः इति सूत्रं परस्मैपदस्थले प्रवर्तते इत्यतः आत्मनेपदस्थले न वृद्धिः। किञ्च लिङ्सिचावात्मनेपदेषु इति सूत्रेण सिचः कित्त्वात् लघूपधगुणनिषेधः। तेन न गुणवृद्धी स्तः। तथा च आत्मनेपदे रूपाणि - **अतुत्त, अतुत्साताम्, अतुत्सत। अतुत्थाः, अतुत्साथाम्, अतुद्ध्वम्। अतुत्सि, अतुत्स्वहि, अतुत्स्महि।**

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

लृङि अटि तिपि शप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन लघूपधगुणे ओकारे खरि च इति चर्त्वे तिपः इकारलोपे **अतोत्स्यत्** इति रूपं भवति। स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। एवम् अन्यत्रापि विद्यार्थिना ऊह्यम्।

एवञ्च परस्मैपदे रूपाणि तावत् - **अतोत्स्यत्, अतोत्स्यताम्, अतोत्स्यन्। अतोत्स्यः, अतोत्स्यतम्, अतोत्स्यत। अतोत्स्यम्, अतोत्स्याव, अतोत्स्याम।**

आत्मनेपदस्थले न कश्चित् विशेषः। रूपाणां प्रक्रियायै एध्धातुरूपाणि द्रष्टुम् शक्यानि। तथा च आत्मनेपदे रूपाणि - **अतोत्स्यत, अतोत्स्येताम्, अतोत्स्यन्त। अतोत्स्यथाः, अतोत्स्येथाम्, अतोत्स्यध्वम्। अतोत्स्ये, अतोत्स्यावहि, अतोत्स्यामहि।**

।।इति तुदादिगणः।।

पाठगतप्रश्नाः-२

११. तुदादिगणीयधातुभ्यः कः विकरणप्रत्ययो विधीयते।

१२. लिङ्सिचावात्मनेपदेषु इति सूत्रस्य कोऽर्थः।

१३. तुद्-धातोः शप्रत्ययविधायकसूत्रं किम्।

१४. तुद्-धातोः कोऽर्थः।

१५. तुद्-धातोः लुङि तिपि किम् रूपम्।

१६. तुद्-धातोः आत्मनेपदे आशीर्लिङि मध्यमपुरुषैकवचने किम् रूपम्।

१७. तुद्-धातोः आत्मनेपदे लिटि मध्यमपुरुषबहुवचने किम् रूपम्।

१८. शप्रत्ययस्य शकारस्य इत्संज्ञायाः किं प्रयोजनम्।

१९. तुदः आशीर्लिङि तप्रत्यये किं रूपम्।

२०. तुदति इत्यत्र लघूपधगुणो कुतो न।

अथ रुधादिगणः

(रुधिँर् आवरणे इति धातोः इर इत्संज्ञा वाच्या इति वार्तिकेन इरः इत्संज्ञायां तस्य लोपः इत्यनेन तस्य लोपे रुध् इत्येव शिष्यते। इरितः प्रयोजनम् इरितो वा इति सूत्रेण लुङि विकल्पेन अङ्विधानम्।) रुधिर् आवरणे इति स्वरितेतः उभयपदिनः अनिटः सकर्मकात् इरितः रुधादिगणीयात्

धातोः वर्तमानक्रियावृत्तित्वविवक्षायां **लटि** परस्मैपदसंज्ञके तिपि अनुबन्धलोपे रुध् ति इति जाते कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदं प्रारभ्यते -

[२२.८] रुधादिभ्यः श्नम्॥ (३.१.७८)

सूत्रार्थः - रुधादिगणपठितधातुभ्यः श्नम्-प्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। रुधादिभ्यः (५/३), श्नम् (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिक्रियते। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः श्नम् प्रत्ययः परः इति। रुधादिगणः दशसु धातुगणेषु सप्तमः। रुध् आदिः येषाम् (धातूनाम्) ते रुधादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः रुधादिभ्यः। सूत्रार्थस्तावत् - कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः रुधादिगणपठितधातुभ्यः श्नम्प्रत्ययः परो भवति। श्नम्प्रत्ययस्य शकारस्य इत्संज्ञा लशक्वतद्धिते इत्यनेन भवति। मकारश्च हलन्त्यम् इत्यनेन इतसंज्ञकः। अतः न इत्येव शिष्यते। श्नमः शित्त्वात् सार्वधातुकत्वे सार्वधातुकमपित् इति (गुणवृद्धिनिषेधाय) ङिद्वद्भावे सत्यपि नैतद् शित्करणस्य प्रयोजनम्। यतः गुणवृद्धिप्रसक्तिरेव नास्ति। कारणं हि श्नम् मित्त्वात् मिदचोऽन्त्यात्परः इति परिभाषया अन्त्याद् अचः परो भवति। अतः श्नमि सति नैव कुत्रचित् इगन्ताङ्गम् लभ्यते येन गुणवृद्धिप्रसक्तिः स्यात्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण रुध् ति इति जाते रुधादिभ्यः श्नम् (३.१.७८) इति शबपवादस्य श्नम्-प्रत्ययस्य प्राप्तिः। किञ्च पुगन्तलघूपधस्य च (७.३.८६) इति लघूपधगुणस्य प्राप्तिः इत्युभयोः युगपत् प्राप्तौ परत्वात् लघूपधगुणः प्राप्तः। तदा गुणे कृते अकृते च शस्य प्राप्तत्वात् कृताकृतप्रसङ्गी नित्यः इति परिभाषया श्नम् नित्यः। किन्तु श्नमि कृते सति लघूपधत्वाभावात् न गुणप्रसक्तिः। तस्मात् रुधादिभ्यः श्नम् इत्यनेन शप्प्रत्ययापवादः श्नम्-प्रत्ययो भवति। स च श्नम् मित्त्वात् मिदचोऽन्त्यात्परः इति परिभाषया अन्त्याद् अचः परो भवति। तेन रु न ध् ति इति जाते अग्रिमसूत्रमारभ्यते -

[२२.९] झषस्तथोर्धोऽधः॥ (८.२.४०)

सूत्रार्थः - झषः परयोस्तथोर्धः स्यान्न तु दधातेः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् चत्वारि पदानि सन्ति। झषः (५/१), तथोः (६/२), धः (१/१), अधः (५/१) इति सूत्रगतपदच्छेदः। धः इत्यत्र धकारात् अकारः उच्चारणार्थः। न धाः अधाः तस्मात् अधः इति विश्वपः इति शब्दवत्। झष् इति प्रत्याहारः। एवञ्च झष्प्रत्याहारस्थवर्णात् परयोः तकारथकारयोः स्थाने धकारादेशो भवति धा-धातुं विना इति सूत्रार्थः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण रु न ध् ति इति जाते तेः पूर्वम् यः धकारः अस्ति सः झष्प्रत्याहारस्थवर्णः। किञ्च तस्मात् धकारात् परम् तेः तकारः अस्ति इति कृत्वा प्रकृतसूत्रेण

तकारस्य स्थाने धकारादेशो भवति। ततः झलां जश् झशि इत्यनेन धातोः धकारस्य जश्त्वे दकारे अट्कुप्वाङ्नुम्व्यवायेऽपि इत्यनेन नकारस्य णत्वे **रुणद्धि** इति रूपं सिध्यति।

तसि श्नमि रु न ध् तस् इति जाते तसः अपित्त्वात् सार्वधातुकमपित् इत्यनेन तसः ङिद्वद्भावे सूत्रमिदमारभ्यते -

[२२.१०] श्नसोरल्लोपः॥ (६.४.१११)

सूत्रार्थः - श्नस्यास्तेश्चाकारस्य लोपः स्यात् सार्वधातुके क्ङिति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। श्नसोः (६/२), अल्लोपः (१/१) इति द्विपदं सूत्रम्। श्नश्च अस् च तयोरितरेतरयोगद्वन्द्वः श्नसौ (शकन्ध्वादिपररूपम्)। अतः लोपः अल्लोपः इति षष्ठीतत्पुरुषसमासः। सूत्रेऽस्मिन् अत उत्सार्वधातुके इत्यतः सार्वधातुके इत्यस्य, गमहनजनखनघसां लोपः क्ङित्यनङि इत्यतः क्ङिति इत्यस्य च अनुवृत्तिर्भवति। सार्वधातुके किति ङिति च परतः श्नस्य असः च अतः लोपो भवति इति सूत्रार्थः। श्न इति श्नम्-प्रत्ययैकदेशस्य ग्रहणम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण रुध्-धातोः तसि तसः सार्वधातुकत्वात् ङित्त्वात् च श्नसोरल्लोपः इत्यनेन श्नमः अकारस्य लोपे रुन् ध् तस् इति जाते झषस्तथोर्धोऽधः इत्यनेन तसः तकारस्य धकारे रुन् ध् धस् इति जाते झरो झरि सवर्णे इत्यनेन विकल्पेन प्रथमधकारस्य लोपे रुन् ध स् इति जाते अट्कुप्वाङ्नुम्व्यवायेऽपि इत्यनेन नकारस्य णत्वं प्राप्तं किञ्च नश्चापदान्तस्य झलि इत्यनेन अनुस्वारोऽपि प्राप्तः। उभयमपि त्रिपादीस्थं सूत्रं किन्तु अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२) इति णत्वविधायकसूत्रस्य परत्रिपादीत्वात् (८.३.२४) इति अनुस्वारविधायकपूर्वत्रिपादीस्थसूत्रं प्रति णत्वस्य असिद्धत्वात् अनुस्वार एव भवति। तस्य च अनुस्वारस्य अनुस्वारस्य ययि परसवर्णः इत्यनेन परसवर्णे नकारे सकारस्य रुत्वे रेफस्य च विसर्गे कृते **रुन्धः** इति रूपं भवति। यदा तु धकारस्य लोपाभावः तदा प्रथमधकारस्य जश्त्वे दकारे **रुन्द्धः** इति रूपं भवति। एवमेव थसि थे च प्रक्रिया ज्ञेया।

{सूत्रम्. **झरो झरि सवर्णे** (८.४.६५) = हलः परस्य झरो वा लोपः सवर्णे झरि।}

बहुवचने झिप्रत्यये झस्य अन्तादेशे श्नमि अनुबन्धलोपे रुनध् अन्ति इति जाते सार्वधातुकमपित् इत्यनेन अन्ति इति ङित् अस्ति। अतः श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपे रुन् ध् अन्ति इति जाते नश्चापदान्तस्य झलि इत्यनेन नकारस्य अनुस्वारे तस्य च परसवर्णे नकारे **रुन्धन्ति** इति रूपं भवति।

सिपि श्नमि रुनध् सि इति जाते सिपः पित्त्वात् सार्वधातुकमपित् इत्यस्याप्रवृत्तौ श्नसोरल्लोपः इत्यस्यापि अप्रवृत्तिः। नकारस्य णत्वे धकारस्य जश्त्वे दकारे रुणद् सि इति जाते सकारपरकत्वात् दकारस्य स्थाने खरि च इत्यनेन चर्त्वे तकारादेशे रुणत् सि इति जाते वर्णसम्मेलने **रुणत्सि** इति रूपं भवति।

मिपि श्नमि रुनध् मि इति जाते मिपः पित्त्वात् सार्वधातुकमपित् इत्यस्याप्रवृत्तौ श्नसोरल्लोपः इत्यस्यापि अप्रवृत्तिः। नकारस्य णत्वे धकारस्य जश्त्वे दकारे रुणद् मि इति जाते वर्णसम्मेलने **रुणद्मि** इति रूपं भवति।

वसि श्नमि रुनध् वस् इति जाते सार्वधातुकमपित् इत्यनेन वसः ङित्त्वात् श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपे नश्चापदान्तस्य झलि इत्यनेन नकारस्य अनुस्वारे अनुस्वारस्य ययि परसवर्णः इत्यनेन अनुस्वारस्य परसवर्णे नकारे सकारस्य रुत्वे रेफस्य च विसर्गे कृते **रुन्ध्वः** इति रूपं सिध्यति। एवमेव मसि बोद्धव्यम्।

तथा हि लटि परस्मैपदे रूपाणि - **रुणद्धि, रुन्धः/रुन्द्धः, रुन्धन्ति। रुणत्सि, रुन्धः/रुन्द्धः, रुन्ध/रुन्द्ध। रुणद्मि, रुन्ध्वः, रुन्ध्मः।**

अत्र अवधेयम् - रुध्-धातोः स्वरितेत्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे रुध्-धातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले न कोऽपि पित्प्रत्ययः। अतः सार्वधातुकमपित् इत्यनेन नवानाम् अपि आत्मनेपदप्रत्ययानां ङिद्वद्भावः। तेन श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपः। प्रथमपुरुषैकवचने तप्रत्यये प्रक्रियया रुन् ध् ते इति जाते झषस्तथोर्धोऽधः इत्यनेन तकारस्य स्थाने धकारादेशे रुन् ध् धे इति जाते झरो झरि सवर्णे इत्यनेन विकल्पेन प्रथमधकारलोपे नस्य अनुस्वारे तस्य च परसवर्णे **रुन्धे** इति रूपम्। धकारलोपाभावपक्षे प्रथमधकारस्य जश्त्वे दकारे **रुन्द्धे** इति रूपम् सिध्यति। बहुवचने झप्रत्यये प्रक्रियया रु न् ध् झ इति जाते आत्मनेपदेष्वनतः इत्यनेन झस्य अत् इत्यादेशे रु न् ध् अत् अ इति जाते टेः एत्वे **रुन्धते** इति रूपम् सिध्यति। अन्येषाम् प्रक्रियाः स्वयं बोद्धव्याः।

तथा हि लटि आत्मनेपदे रूपाणि - **रुन्धे/रुन्द्धे, रुन्धाते, रुन्धते। रुन्त्से, रुन्धाथे, रुन्ध्वे/रुन्द्ध्वे। रुन्धे, रुन्ध्वहे, रुन्ध्महे।**

लिटि तिपि णलि धातोर्द्वित्वे हलादिशेषे लिटः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन रुध् इत्यस्य रेफोत्तरवर्तिनः उकारस्य गुणे ओकारे **रुरोध** इति रूपं भवति। सिपि थलि प्रक्रियया रु रोध् थ इति जाते आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधे क्रादिनियमानुसारम् नित्यम् इडागमे **रुरोधिथ** इति रूपम् सिध्यति। एवमेव वसि मसि च इडागमः। अत्र प्रक्रियार्थम् तुद्धातुरूपाणि द्रष्टव्यानि।

तथा च परस्मैपदे रूपाणि - **रुरोध, रुरुधतुः, रुरुधुः। रुरोधिथ, रुरुधथुः, रुरुध। रुरोध, रुरुधिव, रुरुधिम।**

आत्मनेपदस्थले च न कश्चित् विशेषः। तथा च रूपाणि – **रुरुधे, रुरुधाते, रुरुधिरे। रुरुधिषे, रुरुधाथे, रुरुधिध्वे। रुरुधे, रुरुधिवहे, रुरुधिमहे।**

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

लुटि तिपि श्नम्-अपवादे तासि तासः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन लघूपधगुणे रोध् तास् आ इति जाते ङित्त्वसामर्थ्यात् अभस्यापि टेर्लोपे रोध् त् आ इति जाते तासः तकारस्य स्थाने झषस्तथोर्धोऽधः इत्यनेन धकारादेशे पूर्वधकारस्य जश्त्वे वर्णसम्मेलने **रोद्धा** इति रूपं भवति। एवम् अग्रेऽपि परस्मैपदे रूपाणि स्वयं साधनीयानि। अत्र तासः आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः।

तथा हि परस्मैपदे रूपाणि - **रोद्धा, रोद्धारौ, रोद्धारः। रोद्धासि, रोद्धास्थः, रोद्धास्थ। रोद्धास्मि, रोद्धास्वः, रोद्धास्मः।**

आत्मनेपदे रूपाणि च - **रोद्धा, रोद्धारौ, रोद्धारः। रोद्धासे, रोद्धासाथे, रोद्धाध्वे। रोद्धाहे, रोद्धास्वहे, रोद्धास्महे।**

लृटि श्नम्प्रत्ययापवादः तास्प्रत्ययो भवति। तस्य च आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। पुनः तासः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इति लघूपधगुणे ओकारः। किञ्च खरि च इति रुधः धकारस्य चर्त्वे तकारः।

तथा च परस्मैपदे रूपाणि - **रोत्स्यति, रोत्स्यतः, रोत्स्यन्ति। रोत्स्यसि, रोत्स्यथः, रोत्स्यथ। रोत्स्यामि, रोत्स्यावः, रोत्स्यामः।**

आत्मनेपदे रूपाणि च – **रोत्स्यते, रोत्स्येते, रोत्स्यन्ते। रोत्स्यसे, रोत्स्येथे, रोत्स्यध्वे। रोत्स्ये, रोत्स्यावहे, रोत्स्यामहे।**

लोटि परस्मैपदस्थले एरुः इत्यनेन उत्वे धत्वे जश्त्वे णत्वे **रुणद्धु** इति रूपम्, (तातङि) **रुन्धात्/रुन्द्धात्** इति रूपाणि। सिपि सेर्ह्यपिच्च इत्यनेन सेः हि इत्यादेशो भवति स अपित्, ततः हुझल्भ्यो हेर्धिः इत्यनेन हेः स्थाने धि इत्यादेशो भवति सोऽपि अपित्। ततः धेः सार्वधातुकमपित् इत्यनेन ङिद्वद्भावे श्नसोरल्लोपः इत्यनेन श्नस्य अकारस्य लोपे रु न् ध् धि इति जाते पूर्वधकारस्य झरो झरि सवर्णे इति वैकल्पिकलोपे अपदान्तनकारस्य अनुस्वारे परसवर्णे च कृते **रुन्धि** इति रूपम्, धलोपाभावपक्षे पूर्वधकारस्य जश्त्वे **रुन्द्धि** इति रूपम्, तातङ्पक्षे च **रुन्धात्, रुन्द्धात्** इति रूपद्वयम् इति साकल्येन चत्वारि रूपाणि। उत्तमपुरुषे आडुत्तमस्य पिच्च इत्यनेन आडागमे तस्य च पित्त्वात् ङिद्वद्भावो न भवति। अतः अकारलोपो न भवति।

तथा च परस्मैपदे रूपाणि - **रुणद्धु/रुन्धात्/रुन्द्धात्, रुन्धाम्/रुन्द्धाम्, रुन्धन्तु। रुन्धि/रुन्द्धि/रुन्धात्/रुन्द्धात्, रुन्धम्/रुन्द्धम्, रुन्ध/रुन्द्ध। रुणधानि, रुणधाव, रुणधाम।**

आत्मनेपदे रूपाणि च स्वयं साध्यन्ताम् – **रुन्धाम्/रुन्द्धाम्, रुन्धाताम्, रुन्धताम्। रुन्त्स्व, रुन्धाथाम्, रुन्ध्वम्/रुन्द्ध्वम्। रुणधै, रुणधावहै, रुणधामहै।**

लङि अटि तिपः श्नमि नकारस्य णत्वे इतश्च इत्यनेन तेः इकारस्य लोपे अरुणध् त् इति जाते हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इत्यनेन अपृक्ततकारलोपे पदान्तस्य धकारस्य झलां जशोऽन्ते इत्यनेन जश्त्वे दकारे वाऽवसाने इत्यनेन दकारस्य विकल्पेन चर्त्वे तकारे **अरुणत्,** चर्त्वाभावपक्षे

अरुणद् इति साकल्येन रूपद्वयं भवति। एवमेव सिपि प्रक्रिया ज्ञेया। परन्तु अत्र सिपि अस्ति कश्चित् विशेषः तं प्रदर्शयितुमिदं सूत्रमारभ्यते -

[२२.११] दश्च॥ (८.२.७५)

सूत्रार्थः - धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। दः (६/१), च इति सूत्रगतपदच्छेदः। सूत्रेऽस्मिन् सिपि धातो रुर्वा इति सूत्रमनुवर्तते। सिपि (७/१) धातोः (६/१) रुः (१/१) वा(अव्ययम्) इति तस्य पदच्छेदः। पदस्य (६/१) इत्यपि अधिक्रियते। दः इति धातोः विशेषणमस्ति, अतः तदन्तविधौ दकारान्तस्य धातोः इत्यर्थलाभः। तथा च सूत्रार्थस्तावत् दकारान्तस्य पदसंज्ञकस्य धातोः स्थाने विकल्पेन रु इत्यादेशो भवति सिपि परे। अलोऽन्त्यस्य इति परिभाषया अयमादेशः दकारान्तधातोः अन्त्यस्यैव अलः स्थाने अर्थात् दकारस्य स्थाने भवति।

उदाहरणे सूत्रार्थसमन्वयः - रुध्-धातोः लङि अटि सिपि श्नमि नस्य णत्वे सेः इकारलोपे अपृक्तसकारलोपे पदान्तधकारस्य झलां जशोऽन्ते इत्यनेन जश्त्वे दकारे वाऽवसाने इत्यनेन दकारस्य विकल्पेन चर्त्वे तकारे **अरुणत्** इति रूपम्, चर्त्वाभावपक्षे **अरुणद्** इति रूपम्। अरुणद् इत्यस्य तिङन्तत्वात् पदसंज्ञायाम् दश्च इत्यनेन पदान्तदकारस्य रुत्वे **अरुणः** इति रूपमपि भवति एवञ्च सिपि साकल्येन रूपत्रयं भवति। अन्यत्र तथा विशेषो नास्ति।

तथा च लङि परस्मैपदे रूपाणि - **अरुणत्/अरुणद्, अरुन्धाम्/अरुन्द्धाम्, अरुन्धन्। अरुणः/अरुणत्/अरुणद्, अरुन्धम्/अरुन्द्धम्, अरुन्ध/अरुन्द्ध। अरुणधम्, अरुन्ध्व, अरुन्ध्म।**

आत्मनेपदे रूपाणि च - **अरुन्ध/अरुन्द्ध, अरुन्धाताम्, अरुन्धत। अरुन्धाः/अरुन्द्धाः, अरुन्धाथाम्, अरुन्ध्वम्/अरुन्द्ध्वम्। अरुन्धि, अरुन्ध्वहि, अरुन्ध्महि।**

विधिलिङि तिपि श्नम्प्रत्यये यासुटि सुटि इकारलोपे रु न ध् यास् स् त् इति जाते तिपः ङित्त्वात् सार्वधातुकत्वात् च श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपे लिङः स लोपोऽनन्त्यस्य इत्यनेन सकारद्वयस्यापि लोपे **रुन्ध्यात्** इति रूपं सिध्यति। एवम् अग्रेऽपि। अत्र आत्मनेपदे रूपाणां प्रक्रियायै सुधातुरूपाणि द्रष्टुम् शक्यानि।

तथा च परस्मैपदे रूपाणि - **रुन्ध्यात्, रुन्ध्याताम्, रुन्ध्युः। रुन्ध्याः, रुन्ध्यातम्, रुन्ध्यात। रुन्ध्याम्, रुन्ध्याव, रुन्ध्याम।**

आत्मनेपदे च रूपाणि – **रुन्धीत, रुन्धीयाताम्, रुन्धीरन्। रुन्धीथाः, रुन्धीयाथाम्, रुन्धीध्वम्। रुन्धीय, रुन्धीवहि, रुन्धीमहि।**

आशीर्लिङः लिङाशिषि इत्यनेन आर्धधातुकत्वात् श्नम् न भवति। अपि च लिङः स-लोपोऽनन्त्यस्य इत्यपि न प्रवर्तते। तथा च परस्मैपदे रूपाणि - **रुध्यात्, रुध्यास्ताम्, रुध्यासुः। रुध्याः, रुध्यास्तम्, रुध्यास्त। रुध्यासम्, रुध्यास्व, रुध्यास्म।**

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

आत्मनेपदस्थले प्रथमपुरुषैकवचनविवक्षायाम् तप्रत्यये लिङः सीयुट् इति सीयुडागमो भवति। ततः सुट्तिथोः इति सुडागमो भवति। ततः रुध् सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय् स् त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय् स् त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति तन्निषेधः। ततः लोपो व्योर्वलि इति सीयुटः यकारलोपे रुध् सी स् त इति जाते आदेशप्रत्यययोः इति सीयुटः सकारस्य षत्वे तकारस्य ष्टुत्वे टकारे सीयुटः सकारस्य खर्त्वात् तस्मिन् परे खरि च इत्यनेन रुधः धकारस्य तकारे **रुत्सीष्ट** इति रूपं भवति। एवम् अन्यत्रापि स्वयं बोद्ध्यम्।

तथा हि आत्मनेपदे रूपाणि - **रुत्सीष्ट, रुत्सीयास्ताम्, रुत्सीरन्। रुत्सीष्ठाः, रुत्सीयास्थाम्, रुत्सीध्वम्। रुत्सीय, रुत्सीवहि, रुत्सीमहि।**

लुङि परस्मैपदस्थले अटि तिपि श्नमपवादे च्लौ च्लेः सिच् इति सिचि प्राप्ते तं प्रबाध्य इरितो वा इत्यनेन च्लेः स्थाने विकल्पेन **अङादेशे** अ रुध् अ ति इति जाते तिपः इकारस्य लोपे **अरुधत्** इति रूपं भवति। अत्र ङित्त्वात् न लघूपधगुणः। किञ्च अङः वलादित्वाभावात् न इडागमः। अपि च अपृक्तकारस्य ईडागमोऽपि न सिजभावात्। अग्रे तसादौ न कोऽपि विशेषः। आत्मनेपदस्थले तु **इरितो वा** इति न प्रवर्तते तस्य परस्मैपदस्थले एव विधानात्।

तथा च परस्मैपदे अङादेशे रूपाणि - **अरुधत् अरुधताम्, अरुधन्। अरुधः, अरुधतम्, अरुधत। अरुधम्, अरुधाव, अरुधाम।**

अङभावपक्षे च्लेः स्थाने सिचि वदव्रजहलन्तस्याचः इत्यनेन वृद्धौ धकारस्य चर्त्वे - **अरौत्सीत्, अरौद्धाम्, अरौत्सुः। अरौत्सीः, अरौद्धम्, अरौद्ध। अरौत्सम्, अरौत्स्व, अरौत्स्म।** अत्र सिचः आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः।

आत्मनेपदस्थले लिङ्सिचावात्मनेपदेषु इत्यनेन सिचः कित्त्वात् न लघूपधगुणः। प्रथमपुरुषैकवचने तप्रत्यये प्रक्रियया अ रुध् स् त इति जाते झलो झलि इति सकारलोपः। ततः तकारस्य धकारे अ रुध् ध इति जाते पूर्वधकारस्य जश्त्वे दकारे **अरुद्ध** इति रूपम् सिध्यति। एवम् अन्यत्रापि विद्यार्थिना स्वयम् ऊह्यम्। तथा च आत्मनेपदे रूपाणि - **अरुद्ध, अरुत्साताम्, अरुत्सत। अरुद्धाः, अरुत्साथाम्, अरुद्ध्वम्। अरुत्सि, अरुत्स्वहि, अरुत्स्महि।**

लृङि अटि तिपि श्नमपवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन गुणे ओकारे धकारस्य चर्त्वे तकारे तिपः इकारलोपे **अरोत्स्यत्** इति रूपं भवति। लुङि श्नम्प्रत्ययापवादः स्यप्रत्ययो भवति। तस्य च आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। अत्र उभयविधस्थलेऽपि न तथा विशेषः।

तथा च परस्मैपदे रूपाणि - **अरोत्स्यत्, अरोत्स्यताम्, अरोत्स्यन्। अरोत्स्यः, अरोत्स्यतम्, अरोत्स्यत। अरोत्स्यम्, अरोत्स्याव, अरोत्स्याम।**

आत्मनेपदे रूपाणि च – **अरोत्स्यत, अरोत्स्येताम्, अरोत्स्यन्त। अरोत्स्यथाः, अरोत्स्येथाम्, अरोत्स्यध्वम्। अरोत्स्ये, अरोत्स्यावहि, अरोत्स्यामहि।**

।।इति रुधादिगणः।।

पाठगतप्रश्नाः-३

२१. रुधादिगणीयधातुभ्यः कः विकरणप्रत्ययो विधीयते।

२२. दश्च इति सूत्रस्य कोऽर्थः।

२३. रुध्-धातोः शप्रत्ययविधायकसूत्रं किम्।

२४. रुध्-धातोः कोऽर्थः।

२५. रुणद्धि इत्यत्र णत्वं केन।

२६. अरुधत् इत्यत्र च्लेः स्थाने अङ् चङ् इत्यनयोः कः आदेशो भवति।

२७. रुध्-धातोः परस्मैपदे लङि सिपि कति रूपाणि।

२८. श्नमः मित्करणेन किं भवति।

२९. रुध्धातोः परस्मैपदे लुङि तिपि कति रूपाणि।

३०. श्नसोरल्लोपः इत्यस्य कोऽर्थः।

पाठसारः

अस्मिन् पाठे स्वादिगणः, तुदादिगणः, रुधादिगणः इति गणत्रयस्य आलोचना विहिता। तत्रादौ सु-धातोः विषये आलोचनं विहितम्। तत्रापि आदौ सु-धातोर्विषये स्वादिभ्यः श्नुः इति विकरणप्रत्ययविधायकं सूत्रमालोचितम्। ततः हुश्नुवोः सार्वधातुके, लोपश्चास्यान्यतरस्यां म्वोः, उतश्च प्रत्ययादसंयोगपूर्वात् इत्यादीनि सूत्राणि व्याख्यातानि। अनन्तरम् सुधातोः लुङि तिपि असावीत् इति रूपसाधनकाले स्तुसुधूञ्भ्यः परस्मैपदेषु इति सूत्रं व्याख्यातम्। ततः तुद्-धातोः विषये आलोचनं कृतम्। तत्र तुद्-धातोः विषये तुदादिभ्यः शः इति शविकरणविधायकसूत्रस्य व्याख्यानं विहितम्। ततः लिङ्सिचावात्मनेपदेषु इति सूत्रं व्याख्यातम्। तेन तुत्सीष्ट इति रूपं सिध्यति। ततः रुध्धातोः आलोचना कृता। तत्र च आदौ रुधादिभ्यः श्नम् इति श्नम् - विकरणविधायकसूत्रस्य व्याख्या कृता। ततः झषस्तथोर्धोऽधः इति सूत्रम् व्याख्यातम्। सार्वधातुके क्ङिति श्नस्य अकारलोपविधायकं श्नसोरल्लोपः इति सूत्रं व्याख्यातम्। अग्रे रुध्धातोः लङि सिपि विशेषं प्रदर्शयितुं दश्च इति सूत्रस्य व्याख्यानं विहितम्।

तेन् अरुणः-अरुणत्-अरुणद् इति रूपत्रयं सिध्यति। पाठेऽस्मिन् न समेषां रूपाणां ससूत्रं प्रक्रियाः प्रदर्शिताः, ताः स्वयं साध्याः। किञ्च अस्मिन् तत्तद्गणीयः प्रथमः धातुरेव यथासम्भवं सविस्तरं व्याख्यातोऽस्ति। तेन तत्तद्गणीयानाम् अन्येषामपि धातूनाम् रूपसिद्धिं कर्तुम् प्रभवेत्। भवन्तः दृष्टवन्तः कस्माचित् धातोः शप्रत्ययः, कस्माच्चित् वा श्नुप्रत्ययः, कस्माच्चिद्वा श्नम्प्रत्ययो भवति। इमे सर्वेऽपि प्रत्ययाः अपितो भवन्ति। शितोऽपि सन्ति। तस्मात् सार्वधातुकमपित् इत्यनेन एषां ङिद्वद्भावः भवति। अस्य किं फलमिति तु पूर्वम् उक्तमेवास्ति।

पाठान्तप्रश्नाः

१. स्तुसुधूञ्भ्यः परस्मैपदेषु इति सूत्रं सोदाहरणं व्याख्यात।

२. हुश्नुवोः सार्वधातुके इति सूत्रं सोदाहरणं व्याख्यात।

३. लोपश्चास्यान्यतरस्यां म्वोः इति सूत्रं सोदाहरणं व्याख्यात।

४. उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रं सोदाहरणं व्याख्यात।

५. तुदति इति धातुरूपस्य प्रक्रिया लेख्या।

६. तुत्सीष्ट इति धातुरूपस्य प्रक्रिया लेख्या।

७. अतौत्ताम् इति धातुरूपस्य प्रक्रिया लेख्या।

८. तुद्याः इति धातुरूपस्य प्रक्रिया लेख्या।

९. लिङ्सिचावात्मनेपदेषु इति सूत्रं सोदाहरणं व्याख्यात।

१०. श्नसोरल्लोपः इति सूत्रं सोदाहरणं व्याख्यात।

११. सुनोति इति धातुरूपस्य प्रक्रिया लेख्या।

१२. अतौत्सीत् तुत्सीष्ट इति धातुरूपस्य प्रक्रिया लेख्या।

१३. सुन्वन्ति इति धातुरूपस्य प्रक्रिया लेख्या।

१४. सुधातोः परस्मैपदे लिटि थलि कति रूपाणि तेषां सिद्धिः कार्या।

१५. सुन्वः, सुनुवः इत्यनयोः रूपसिद्धिः कार्या।

१६. असोढ्वम् इति धातुरूपस्य सिद्धिः कार्या।

१७. रुणद्धि इति धातुरूपस्य प्रक्रिया लेख्या।

१८. रुध्-धातोः लङि सिपि कति रूपाणि भवन्ति तेषां प्रक्रियाः लेख्याः।

१९. रुध्-धातोः लुङि तिपि कति रूपाणि भवन्ति तेषां प्रक्रियाः लेख्याः।

२०. रुधादिभ्यः श्नम् इति योगम् सोदाहरणं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि- १

१. श्नु इति विकरणप्रत्ययः।

२. सिचः इडागमं विदधाति।

३. अभिषवः।

४. स्वादिभ्यः श्नुः।

५. असावीत्।

६. सुन्महे/सुनुमहे।

७. सुषविथ/सुषोथ।

८. तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञा यथा स्यात्।

९. आशीर्लिङः आर्धधातुकत्वात्।

१०. अकृत्सार्वधातुकयोर्दीर्घः इत्यनेन।

उत्तराणि- २

११. श इति विकरणप्रत्ययः।

१२. इक्समीपाद्धलः परौ झलादिलिङात्मनेपदपरः सिच्चेत्येतौ कितौ स्तः।

१३. तुदादिभ्यः शः।

१४. व्यथनम्।

१५. अतौत्सीत्।

१६. तुत्सीष्ठाः।

१७. तुतुदिध्वे।

१८. तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञाविधानम्।

१९. तुत्सीष्ट।

२०. शप्रत्ययस्य अपित्त्वात् सार्वधातुकमपित् इत्यनेन ङित्त्वात् क्ङिति च इति गुणनिषेधः।

उत्तराणि- ३

२१. श्नम्-विकरणप्रत्ययः।

२२. धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा।

२३. रुधादिभ्यः श्नम्।

२४. आवरणम्।

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

२५. अट्कुप्वाङ्नुम्व्यवायेऽपि।

२६. अङ्।

२७. अरुणः/अरुणत्/अरुणद् इति रूपत्रयम्।

२८. मित्त्वात् मिदचोऽन्त्यात्परः इति परिभाषया अन्त्याद् अचः परो भवति

२९. (अङि) अरुधत् - (सिचि) अरौत्सीत्।

३०. श्नस्यास्तेश्चाकारस्य लोपः स्यात् सार्वधातुके क्ङिति।

॥ इति द्वाविंशः पाठः ॥

346sk23

२३

तनादितः चुरादिपर्यन्तम्-
तन् कृ क्री चुर् धातवः

प्रस्तावना

भवन्तः इतः पूर्वस्मिन् पाठे स्वादिगणः, तुदादिगणः, रुधादिगणः च इति गणत्रयस्य परिचयं प्राप्तवन्तः। अधुना तनादिगणः, क्र्यादिगणः, चुरादिगणः चेति अन्तिमं गणत्रयं ज्ञास्यति। अत्रापि प्रतिगणं विकरणभेदः अस्ति, विकरणभेदात् च रूपभेदो भवति। यथा तनादिगणीयधातुभ्यः उप्रत्ययः, क्र्यादिगणीयधातुभ्यः श्नाप्रत्ययः। विकरणभेदात् रूपभेदः, तद्यथा तन्-धातोः उप्रत्यये तनोति इति रूपं, क्री-धातोः श्नाप्रत्यये क्रीणाति इति रूपम्। चुरादिगणस्तु सर्वेभ्यो विलक्षणः। अन्येषु गणेषु भवन्तः दृष्टवन्तः यत् धातुप्रत्यययोः मध्ये शबादिविकरणाः भवन्ति। चुरादिगणीयप्रकरणे तु न मूलधातोः कोऽपि विकरणो भवति। धातोः परे स्वार्थे णिच्प्रत्यये कृते ण्यन्तस्य सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञायां ततः तिबादिप्रत्ययो भवति, अनन्तरम् शप्-विकरणः भवति इति चुरादिगणीयधातोः वैशिष्ट्यम्। अत्र पाठे न सर्वाणि रूपाणि ससूत्रं प्रदर्शयिष्यन्ते। अस्मिन् पाठे तनादिगणीयस्य तन्धातोः कृधातोः च आलोचनं विधास्यते। ततः क्र्यादिगणीयस्य क्रीधातोः, चुरादिगणीयस्य चुर्-धातोः च आलोचना भविष्यति। धात्वन्तरस्य प्रक्रियाः स्वयं साधनीयाः।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- प्रतिगणं कीदृशं विकरणं भवति तज्ज्ञास्यति।
- विकरणविधायकसूत्रार्थं ज्ञास्यति।
- तत्र तत्र व्याख्यातानाम् विशेषसूत्राणाम् परिचयम् लप्स्यते।
- तन्धातोः कृधातोश्च रूपाणि साधयितुं शक्नुयात्।
- क्री-धातुरूपाणि साधयितुं पारयेत्।
- चुर्-धातुरूपाणि साधयितुम् अर्हेत्।
- चुरादिगणीयधातोः वैशिष्ट्यम् ज्ञास्यति।
- एतज्ज्ञात्वा च अन्यानि अपि धातुरूपाणि साधयितुं प्रभवेत्।

➢ तत्र तत्र प्रदर्शितानि वैकल्पिकरूपाणि अपि ज्ञास्यति।

अथ तनादिगणः

तनुँ विस्तारे इति स्वरितेतः उभयपदिनः सेटः तनादिगणीयात् धातोः कर्तरि **लटि** प्रथमैकवचनविवक्षायां परस्मैपदसंज्ञके तिपि तन् ति इति जाते तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदमारभ्यते -

[२३.१] तनादिकृञ्भ्य उः॥ (३.१.७९)

सूत्रार्थः - तनादिधातुभ्यः उ-प्रत्ययो भवति कर्तृवाचिनि सार्वधातुके।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। तनादिकृञ्भ्यः (५/३), उः (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिक्रियते। धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः उः प्रत्ययः परः इति। तनादिगणः दशसु धातुगणेषु अष्टमः। तन् आदिः येषाम् (धातूनाम्) ते तनादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः तनादिभ्यः। तनादयश्च कृञ् च तेषाम् इतरेतरयोगद्वन्द्वः, तनादिकृञः, तेभ्यः तनादिकृञ्भ्यः। सूत्रार्थस्तावत् - कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः तनादिगणपठितधातुभ्यः कृधातोश्च उप्रत्ययः परो भवति इति। सूत्रेणानेन उप्रत्ययो विधीयते। उ इति विकरणस्य शित्त्वाभावात् न सार्वधातुकसंज्ञा। किन्तु आर्धधातुकं शेषः इति आर्धधातुकसंज्ञा।

उदाहरणम् - पूर्वोक्तप्रकारेण तन् ति इति जाते प्राप्तं शपं प्रबाध्य प्रकृतसूत्रेण उप्रत्ययो भवति यतो हि तिप् सार्वधातुकप्रत्ययः तन्धातोः परः अस्ति। ततः तन् उ ति इति जाते तिप् सार्वधातुकप्रत्ययोऽस्ति इति कृत्वा तस्मिन् परतः सार्वधातुकार्धधातुकयोः इत्यनेन उकारस्य गुणे ओकारे तन् ओ ति इति जाते वर्णसम्मेलने **तनोति** इति रूपं भवति। एवमेव प्रक्रिया सिपि मिपि च ज्ञेया।

अपित्प्रत्ययेषु तसादिषु सार्वधातुकमपित् इत्यनेन ङिद्वद्भावे क्ङिति च इत्यनेन गुणनिषेधः। तेन तसादौ न गुणः। बहुवचने झिप्रत्यये प्रक्रियया तनु अन्ति इति जाते इको यणचि इत्यनेन इकः स्थाने यणि वकारादेशे **तन्वन्ति** इति रूपं भवति।

अत्र अवधेयम् - तन्-धातोः स्वरितेत्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे तनः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

वसि मसि वहौ महिङि च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन उकारस्य विकल्पेन लोपो भवति। तेन – तन्वः/तनुवः, तन्मः/तनुमः, तन्वहे/तनुवहे, तन्महे/तनुमहे इत्येवं रूपाणि सिध्यन्ति। सिपि

उतश्च प्रत्ययादसंयोगपूर्वात् इत्यनेन हेः लोपो भवति। आत्मनेपदस्थले तादीनाम् समेषाम् अपित्त्वात् सर्वत्रैव गुणनिषेधः।

तथा हि लटि परस्मैपदे रूपाणि - **तनोति, तनुतः, तन्वन्ति। तनोषि, तनुथः, तनुथ। तनोमि, तन्वः/तनुवः, तन्मः/तनुमः।** आत्मनेपदे रूपाणि च - **तनुते, तन्वाते, तन्वते। तनुषे, तन्वाथे, तनुध्वे। तन्वे, तन्वहे/तनुवहे, तन्महे/तनुमहे।**

लिटि तनः परे तिपि णलि द्वित्वे हलादिशेषे ततन् अ इति जाते अत उपधायाः इत्यनेन उपधावृद्धौ ततान् अ इति जाते वर्णसम्मेलने **ततान** इति रूपं सिध्यति। एवमेव मिपि ऊह्यम्। तसि झौ थसि थे वसि मसि च असंयोगाल्लिट् कित् इत्यनेन कित्त्वे अत एकहल्मध्येऽनादेशादेर्लिटि इत्यनेन अभ्याससंज्ञकस्य प्रथमतकारस्य लोपे तनः तकारोत्तरवर्तिनः अकारस्य स्थाने एकारः भवति। सिपि सिपः स्थाने विधीयमानः थल् कित् न भवति इति हेतोः थलि च सेटि इत्यनेन एत्त्वाभ्यासलोपौ भवतः। आत्मनेपदस्थले सर्वत्रैव एत्वाभ्यासलोपौ भवतः। सिपि वसि मसि च इति परस्मैपदस्थले, थासि ध्वमि वहौ महिङि च इति आत्मनेपदस्थले च आर्धधातुकस्येड्वलादेः इति इडागमः। आत्मनेपदस्थले तप्रत्ययं झप्रत्ययं थास्प्रत्ययं च विहाय अन्यत्र टेः एत्वम् बोध्यम्।

तथा च लिटि परस्मैपदे रूपाणि - **ततान, तेनतुः, तेनुः। तेनिथ, तेनथुः, तेन। ततान/ततन, तेनिव, तेनिम।**

आत्मनेपदे रूपाणि च - **तेने, तेनाते, तेनिरे। तेनिषे, तेनाथे, तेनिध्वे। तेने, तेनिवहे, तेनिमहे।**

लुटि तिपि उप्रत्ययापवादभूते तासि तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे डादेशे डित्त्वसामर्थ्यात् अभस्यापि टेर्लोपे **तनिता** इति रूपम्। एवम् अग्रे बोद्धव्यम्। लुटि परस्मैपदस्थले आत्मनेपदस्थले च सर्वत्रैव इडागमः भवति। उभयविधस्थलेऽपि प्रथमपुरुषे समानम् रूपम्। लुटि आत्मनेपदस्थले थासं विहाय अन्यत्र टेः एत्वम् भवति।

तथा हि परस्मैपदे रूपाणि - **तनिता, तनितारौ, तनितारः। तनितासि, तनितास्थः, तनितास्थ। तनितास्मि, तनितास्वः, तनितास्मः।**

आत्मनेपदे रूपाणि च - **तनिता, तनितारौ, तनितारः। तनितासे, तनितासाथे, तनिताध्वे। तनिताहे, तनितास्वहे, तनितास्महे।**

लृटि प्रथमपुरुषैकवचने तिपि उप्रत्ययापवादभूते स्यप्रत्यये स्यस्य आर्धधातुकत्वात् इडागमे आदेशप्रत्यययोः इत्यनेन प्रत्ययावयवस्य सकारस्य षत्वे **तनिष्यति** इति रूपं भवति, तप्रत्यये **तनिष्यते** इति रूपम्। लृटि अपि आत्मनेपदे थास्प्रत्ययं विहाय अन्यत्र टेः एत्वम् भवति। अपि च लृटि सर्वत्रैव इडागमः भवति। आत्मनेपदे रूपाणाम् सिद्धये एध्-धातोः प्रक्रिया द्रष्टुम् शक्या।

तथा च लृटि परस्मैपदे रूपाणि - **तनिष्यति, तनिष्यतः, तनिष्यन्ति। तनिष्यसि, तनिष्यथः, तनिष्यथ। तनिष्यामि, तनिष्यावः, तनिष्यामः।**

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

आत्मनेपदे रूपाणि च - **तनिष्यते, तनिष्येते, तनिष्यन्ते। तनिष्यसे, तनिष्येथे, तनिष्यध्वे। तनिष्ये, तनिष्यावहे, तनिष्यामहे।**

लोटि प्रथमपुरुषैकवचने तिपि उप्रत्यये तिपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन उकारस्य गुणे ओकारे तिपः इकारस्य उकारे तनोतु इति रूपं भवति, तातङि तनुतात् इत्यपि। अग्रे रूपाणि स्वयं साध्यन्ताम्।

तथा च परस्मैपदे रूपाणि - **तनोतु/तनुतात्, तनुताम्, तन्वन्तु। तनु/तनुतात्, तनुतम्, तनुत। तनवानि, तनवाव, तनवाम।**

आत्मनेपदे रूपाणाम् सिद्धये स्वादिगणीयसु-धातुरूपाणि द्रष्टुम् शक्यानि। तथा हि रूपाणि - **तनुताम्, तन्वाताम्, तन्वताम्। तनुष्व, तन्वाथाम्, तनुध्वम्। तनवै, तनवावहै, तनवामहै।**

लङि परस्मैपदस्थले आत्मनेपदस्थले च स्वादिगणीयधातुरूपवत् प्रक्रिया ज्ञेया। तथा च परस्मैपदे रूपाणि - **अतनोत्, अतनुताम्, अतन्वन्। अतनोः, अतनुतम्, अतनुत। अतनवम्, अतन्व/अतनुव, अतन्म/अतनुम।** आत्मनेपदे रूपाणि च – **अतनुत, अतन्वाताम्, अतन्वत। अतनुथाः, अतन्वाथाम्, अतनुध्वम्। अतन्वि, अतन्वहि/अतनुवहि, अतन्महि/अतनुमहि।**

विधिलिङि अपि परस्मैपदस्थले आत्मनेपदस्थले च स्वादिगणीयसुधातुरूपवत् प्रक्रिया ज्ञेया। तथा हि परस्मैपदे रूपाणि - **तनुयात्, तनुयाताम्, तनुयुः। तनुयाः, तनुयातम्, तनुयात। तनुयाम्, तनुयाव, तनुयाम।** आत्मनेपदे रूपाणि च - **तन्वीत, तन्वीयाताम्, तन्वीरन्। तन्वीथाः, तन्वीयाथाम्, तन्वीध्वम्। तन्वीय, तन्वीवहि, तन्वीमहि।**

आशीर्लिङि तिपि लिङाशिषि इत्यनेन तिपः आर्धधातुकसंज्ञायां तनादिकृञ्भ्य उः इत्यनेन उप्रत्ययस्याप्राप्तिः। ततः यासुटि अनुबन्धलोपे सुट्तिथोः इत्यनेन सुडागमे तिपः इकारस्य लोपे तन् यास् स् त् इति जाते स्कोः संयोगाद्योरन्ते च इत्यनेन सकारद्वयस्यापि लोपे **तन्यात्** इति रूपं भवति। अग्रे प्रक्रियाः स्वयं साध्याः। तथा च परस्मैपदे रूपाणि - **तन्यात्, तन्यास्ताम्, तन्यासुः। तन्याः, तन्यास्तम्,तन्यास्त। तन्यासम्, तन्यास्व, तन्यास्म।**

आत्मनेपदस्थले एध्-धातुवत् रूपाणि भवन्ति। अत्र केवलम् प्रथमपुरुषैकवचने रूपम् प्रदर्श्यते। तद्यथा - तन्-धातोः आशीर्लिङि तप्रत्यये सीयुटि सुटि तन् सीय् स् त इति स्थितिः भवति। यदागमपरिभाषया अत्र सीय्+स्+त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय्+स्+त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे आद्यावयवे तन् इ सीय् स् त इति स्थितिः जायते। तदा लोपो व्योर्वलि इत्यनेन सीयुटः यकारस्य लोपे तनि सी स् त इति स्थिते सीयुटः सकारस्य तथा सुटः सकारस्य यथाक्रमं इकाररूपात् ईकाररूपाच्च इणः परत्वात् अपदान्तत्वात् प्रत्ययावयवत्वात् आदेशप्रत्यययोः इति सूत्रेण मूर्धन्यादेशे षकारे तनिषीष् त इति स्थिते ष्टुना ष्टुः इत्यनेन तकारस्य ष्टुत्वे टकारे **तनिषीष्ट** इति रूपं सिध्यति। आतामादौ रूपाणि स्वयम् बोद्धव्यानि।

तथा च आत्मनेपदे आशीर्लिङि रूपाणि - **तनिषीष्ट, तनिषीयास्ताम्, तनिषीरन्। तनिषीष्ठाः, तनिषीयास्थाम्, तनिषीध्वम्। तनिषीय, तनिषीवहि, तनिषीमहि।**

लुङि प्रथमपुरुषैकवचने अटि तिपि इकारलोपे प्राप्तम् उप्रत्ययम् बाधित्वा च्लौ सिचि सिचः आर्धधातुकं शेषः इत्यनेन आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन सिचः इडागमे अ तन् इ स् त् इति जाते अस्तिसिचोऽपृक्ते इत्यनेन ईडागमे अ तन् इ स् ई त् इति जाते वदव्रजहलन्तस्याचः इति हलन्तलक्षणायाम् वृद्धौ प्राप्तायाम् नेटि इति तन्निषेधे अतो हलादेर्लघोः इत्यनेन विकल्पेन तनः अकारस्य वृद्धौ आकारे इट ईटि इत्यनेन सकारस्य लोपे सवर्णदीर्घे वर्णसम्मेलने **अतानीत्** इति रूपम्। वृद्ध्यभावपक्षे **अतनीत्** इत्यपि रूपम् इति साकल्येन रूपद्वयम् भवति।

तथा च वृद्धिपक्षे - **अतानीत्, अतानिष्टाम्, अतानिषुः। अतानीः, अतानिष्टम्, अतानिष्ट। अतानिषम्, अतानिष्व, अतानिष्म।**

वृद्ध्यभावपक्षे - **अतनीत्, अतनिष्टाम्, अतनिषुः। अतनीः, अतनिष्टम्, अतनिष्ट। अतनिषम्, अतनिष्व, अतनिष्म।** इति एतानि रूपाणि भवन्ति।

तनः **लुङि** अटि आत्मनेपदसंज्ञकतप्रत्यये प्राप्तम् उप्रत्ययम् बाधित्वा च्लौ सिचि अ तन् स त इति जाते सिचः सकारस्य विकल्पेन लुग्विधातुम् सूत्रमिदमारभ्यते -

[२३.२] तनादिभ्यस्तथासोः॥ (२.४.७९)

सूत्रार्थः - तनादेः सिचो वा लुक्स्यात्तथासोः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। तनादिभ्यः (५/३), तथासोः (७/२) इति सूत्रगतपदच्छेदः। तन् आदिः येषां ते तनादयः इति बहुव्रीहिसमासः, तेभ्यः तनादिभ्यः। तश्च थाश्च तयोः इतरेतरयोगद्वन्द्वे तथासौ, तयोः तथासोः। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इत्यतः सिचः (६/१) इत्यस्य, ण्यक्षत्रियार्षञितो यूनि लुगणिञोः इत्यतः लुक् (१/१) इत्यस्य, विभाषा घ्राधेट्शाच्छासः इत्यतः विभाषा इत्यस्य च अनुवृत्तिर्भवति। सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् इति परिभाषया प्रथमपुरुषैकवचनस्य तप्रत्ययस्यैव अत्र सूत्रे ग्रहणं न तु तस्थस्थमिपां तान्तन्तामः इति सूत्रेण विधीयमानस्य तादेशस्य ग्रहणम्। एवञ्च सूत्रार्थस्तावत् - तनादिगणपठितधातुभ्यः परस्य सिचः विकल्पेन लुक् भवति त-थासोः प्रत्ययोः परतः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण अ तन् स त इति स्थिते प्रकृतसूत्रेण सिचः सकारस्य विकल्पेन लुक् भवति। यतो हि अत्र तप्रत्ययः परोऽस्ति। ततः अतन् त इति जाते अग्रिमम् सूत्रमारभ्यते -

[२३.३] अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति॥ (६.४.३७)

सूत्रार्थः - अनुनासिकान्तानामेषां वनतेश्च लोपः स्यात् झलादौ किति ङिति च परे।

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदचतुष्टयमस्ति।अनुदात्तोपदेशवनतितनोत्यादीनाम् (६/३), अनुनासिक (६/३), लोपः (१/१), झलि (७/१), क्ङिति (७/१) इति सूत्रगतपदच्छेदः। अनुनासिक इति लुप्तविभक्तिको निर्देशः। अनुदात्त उपदेशे येषां ते अनुदात्तोपदेशाः इति बहुव्रीहिसमासः। तनोतिः आदिः येषां ते तनोत्यादयः। अनुदात्तोपदेशाश्च वनतिश्च तनोत्यादयश्च तेषाम् अनुदात्तोपदेशवनतितनोत्यादीनाम्। अनुनासिक इति लुप्तषष्ठ्यन्तं पदम् अनुदात्तोपदेशानाम् इत्यस्य तथा तनोत्यादीनाम् इत्यस्य विशेषणमस्ति अतः तदन्तविधौ अनुनासिकान्तानाम् इत्यर्थलाभः। क् च ङ् च क्ङौ, तौ इतौ यस्य स क्ङित् तस्मिन् क्ङिति द्वन्द्वगर्भबहुव्रीहिसमासः। झलि इति पदं क्ङिति इत्यस्य विशेषणमस्ति। अतः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधौ झलादौ क्ङिति इत्यर्थो लभ्यते। एवञ्च सूत्रार्थस्तावत् - अनुनासिकान्तानाम् अनुदात्तोपदेशधातूनाम्, अनुनासिककान्तानां तनोत्यादिधातूनां, वन्धातोः च लोपो भवति झलादौ क्ङिति च परे। अयञ्च लोपः अलोऽन्त्यस्य इति परिभाषया अन्त्यस्यैव वर्णस्य अर्थात् अनुनासिकवर्णस्य भवति।

उदाहरणम् - यमि रमि नमि गमि हनि मन्यतयोऽनुदात्तोपदेशाः। तनु, क्षणु, क्षिणु, ऋणु, तृणु, घृणु, वनु, मनु-तनोत्यादयः। एवञ्च साकल्येन पञ्चदशानां धातूनाम् उदाहरणानि अत्र प्रदर्श्यन्ते -

१. यम् (रोकना) - यतः (क्त), यतवान् (क्तवतु), यत्वा (क्त्वा),

२. रम् (खेलना) - रतः (क्त), रतवान् (क्तवतु), रत्वा (क्त्वा),

३. नम् (झुकना) - नतः, नत्वा, नतवान्।

४. गम् (जाना) - गतः, गत्वा, गतवान्।

५. हन् (मारना) - हतः, हत्वा, हतवान्।

६. मन्य (मानना-जानना) - मतः, मत्वा, मतवान्।

७. वन् (शब्द करना, सेवा करना, हिंसा करना) - वतिः (क्तिन्)।

८. तन् (विस्तार करना) - ततः, तत्वा, ततवान्। अतत, अतथाः।

९. क्षणु (हिंसा करना) - क्षतः, क्षत्वा, क्षतवान्। अक्षत, अक्षथाः।

१०. क्षिणु (हिंसा करना) - क्षितः, क्षित्वा, क्षितवान्। अक्षित, अक्षिथाः।

११. ऋणु (जाना) - ऋतः, ऋत्वा, ऋतवान्। आर्तः, आर्थाः।

१२. तृणु (खाना) - तृतः, तृत्वा, तृतवान्। अतृत, अतृथाः।

१३. घृणु (चमकना) - घृतः, घृत्वा, घृतवान्। अघृत, अघृथाः।

१४. वनु (मागना) - वतः, वत्वा, वतवान्। अवत, अवथाः।

१५. मन् (जानना) - मतः, मत्वा, मतवान्। अमत, अमथाः।

पूर्वोक्तप्रकारेण अतन् त इति जाते सार्वधातुकमपित् इत्यनेन तप्रत्ययस्य ङिद्वद्भावः। स च तप्रत्ययः झलादिरपि अस्ति। तस्मात् प्रकृतसूत्रेण नकारलोपो भवति। यतो हि तनः नकारात् परं यः

तप्रत्ययः स झलादिः ङित् अस्ति। ततः वर्णसम्मेलने **अतत** इति रूपं सिध्यति। सिचः **लुगभावपक्षे** इडागमे अ तन् इ स् त इति जाते सिचः सकारस्य षत्वे ष्टुना ष्टुः इति ष्टुत्वे तकारस्य टकारे **अतनिष्ट** इति रूपम् अपि भवति इति प्रथमपुरुषैकवचने रूपद्वयम् भवति। ध्वमि प्रक्रियया अ तन् इ स् ध्वम् इति जाते धि च इति योगेन सकारस्य लोपे अ तन् इ ध्वम् इति जाते अतन्+इ इति समुदायस्य ध्वमि परतः अङ्गसंज्ञाविज्ञानात् इणः षीध्वंलुङ्लिटां धोऽङ्गात् इति सूत्रेण धकारस्य ढत्वे अतनिढ्वम् इति रूपम्। सर्वत्रैव आदेशप्रत्यययोः इति षत्वम्। अन्यानि रूपाणि स्वयम् बोद्धव्यानि।

तथा च आत्मनेपदे रूपाणि- **अतत/अतनिष्ट, अतनिषाताम्, अतनिषत। अतथाः/अतनिष्ठाः, अतनिषाथाम्, अतनिढ्वम्। अतनिषि, अतनिष्वहि, अतनिष्महि।**

लृङि अटि तिपि उप्रत्ययापवादभूते स्यप्रत्यये स्यस्य आर्धधातुकत्वात् वलादित्वाच्च आर्धधातुकस्येड्वलादेः इति इडागमे सकारस्य षत्वे तिपः इकारस्य लोपे वर्णसम्मेलने **अतनिष्यत्** इति रूपम्। तप्रत्यये तु **अतनिष्यत** इति रूपम् सिध्यति। अत्र तथा विशेषो नास्ति।

तथा हि परस्मैपदे रूपाणि - **अतनिष्यत्, अतनिष्यताम्, अतनिष्यन्। अतनिष्यः, अतनिष्यतम्, अतनिष्यत। अतनिष्यम्, अतनिष्याव, अतनिष्याम।**

आत्मनेपदे च रूपाणि - **अतनिष्यत, अतनिष्येताम्, अतनिष्यन्त। अतनिष्यथाः, अतनिष्येथाम्, अतनिष्यध्वम्। अतनिष्ये, अतनिष्यावहि, अतनिष्यामहि।**

।।इति तनादिगणे तन्-धातुः।।

अथ कृधातुः

अधुना **कृधातुः** आलोच्यते।

कृ (डुकृञ् करणे) इति उभयपिदनः अनिटः सकर्मकात् तनादिगणीयात् धातोः कर्तरि **लटि** तिपि कृ ति इति जाते शपि प्राप्ते तं बाधित्वा तनादिकृञ्भ्य उः इति योगेन उप्रत्यये कृ उ ति इति जाते उप्रत्ययस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन ऋकारस्य गुणे अकारे उरण् रपरः इत्यनेन रपरत्वे कर् उ ति इति जायते। ततः तिपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन उकारस्य गुणे ओकारे वर्णसम्मेलने च करोति इति रूपं भवति। एवमेव सिपि मिपि च बोध्यम्।

तसि प्राप्तम् शपं बाधित्वा उप्रत्यये कृ उ तस् इति जाते ऋकारस्य गुणे अकारे रपरत्वे कर् उ तस् इति जाते तसः सार्वधातुकमपित् इति ङिद्वद्भावे उकारस्य गुणनिषेधो भवति। ततः अग्रे विशेषम् प्रदर्शयितुम् सूत्रमिदमारभ्यते -

[२३.४] अत उत्सार्वधातुके॥ (६.४.११०)

सूत्रार्थः - उप्रत्ययान्तस्य कृञोऽकारस्य उः स्यात्, सार्वधातुके क्ङिति।

सूत्रव्याख्या - विधिसूत्रमिदम् पदत्रयात्मकम्। अतः (६/१), उत् (१/१), सार्वधातुके (७/१) इति सूत्रगतपदच्छेदः। नित्यं करोतेः इत्यतः करोतेः (५/१) इति पदमनुवर्तते। तस्य च षष्ठ्येकवचनान्ततया विपरिणामः। गमहनजनखनघसां लोपः क्ङित्यनङि इति सूत्रात् क्ङिति इति पदम् अनुवर्तते। उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रतः उतः (५/१) इत्यस्य, प्रत्ययात् (५/१) इत्यस्य च अनुवृत्तिर्भवति। अनुवृत्तयोः तयोः षष्ठ्येकवचनान्ततया विपरिणामः। तदा करोतेः इत्यस्य विशेषणत्वात् तदन्तविधौ उप्रत्ययान्तस्य करोतेः इत्यर्थलाभः। क्ङिति इत्यस्य सार्वधातुके इत्यत्र अन्वयः। तेन सार्वधातुके किति, सार्वधातुके ङिति इत्यर्थलाभः। सूत्रार्थो हि उप्रत्ययान्तस्य कृधातोः अतः स्थाने उत् इत्यादेशो भवति सार्वधातुके किति ङिति च प्रत्यये परतः इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कर् उ तस् इति जाते तसः ङित्त्वात् सार्वधातुकत्वात् च अत उत्सार्वधातुके इति प्रकृतसूत्रेण ककारोत्तरवर्तिनः अकारस्य स्थाने उकारादेशे तसः सकारस्य रुत्वे रेफस्य च विसर्गे कृते **कुरुतः** इति रूपं सिध्यति।

झौ झेरन्तादेशे कृ इत्यस्य ऋकारस्य गुणे अकारे रपरत्वे कर् उ अन्ति इति जाते करः अकारस्य उकारे कुर् उ अन्ति इति जाते इको यणचि इत्यनेन प्रत्ययस्य उकारस्य यणि वकारादेशे कुर् व् अन्ति इति जायते। ततः हलि च इत्यनेन उपधादीर्घे प्राप्ते सूत्रमिदमारभ्यते -

[२३.५] न भकुर्छुराम्॥ (८.२.७९)

सूत्रार्थः - भस्य कुर्छुरोरुपधाया न दीर्घः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। न (अव्ययम्), भ-कुर्-छुराम् (६/३) इति सूत्रगतपदच्छेदः। र्वोरुपधाया दीर्घ इकः इति सूत्रात् उपधायाः (६/१), दीर्घः (१/१) इत्यनयोः पदयोः अनुवृत्तिर्भवति। भं च कुर् च छुर् च भकुर्छुरः, तेषाम् भकुर्छुराम् इति इतरेतरयोगद्वन्द्वः। भ इति एका संज्ञा। सा च यचि भम् इत्यनेन विधीयते। सूत्रार्थस्तावत् - भसंज्ञकस्य उपधायाः, कुरः उपधायाः, छुरः च उपधायाः दीर्घो न भवति इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कुर् व् अन्ति इत्यत्र हलि च इति प्राप्तस्य उपधादीर्घस्य प्रकृतसूत्रेण निषेधः। ततः वर्णसम्मेलने **कुर्वन्ति** इति रूपं सिध्यति। एवम् अग्रे ऊह्यम्।

उत्तमपुरुषस्य द्विवचने वसि उप्रत्यये प्रक्रियया कुर् उ वस् इति जाते लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन विकल्पेन प्रत्ययस्य उकारस्य लोपे प्राप्ते सूत्रमिदमारभ्यते -

[२३.६] नित्यं करोतेः॥ (६.४.१०८)

सूत्रार्थः - करोतेः प्रत्ययोकारस्य नित्यं लोपो म्वोः परयोः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। नित्यम् (२/१), करोतेः (५/१) इति सूत्रगतपदच्छेदः। नित्यम् इति क्रियाविशेषणम्। उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रतः उतः (५/१) इत्यस्य, प्रत्ययात् (५/१) इत्यस्य च अनुवृत्तिर्भवति। अनुवृत्तयोः तयोः षष्ठ्येकवचनान्ततया

विपरिणामः। लोपश्चास्यान्यतरस्यां म्वोः इत्यतः म्वोः (७/२), लोपः (१/१) इत्यनयोः पदयोः अनुवृत्तिर्भवति। सूत्रार्थो हि कृधातोः परस्य प्रत्ययस्य उकारस्य नित्यं लोपो भवति मकारे अथवा वकारे परतः। सूत्रमिदं लोपश्चास्यान्यतरस्यां म्वोः इत्यस्य अपवादभूतम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कुर् उ वस् इति जाते कृधातोः परम् उकारोऽस्ति, किञ्च वकारः तस्मात् उकारात् परोऽपि अस्ति। अतः प्रकृतसूत्रेण उकारस्य नित्यं लोपो भवति। तेन कुर् वस् इति जाते सकारस्य रुत्वे रेफस्य च विसर्गे **कुर्वः** इति रूपं सिध्यति। मसि अनया एव प्रक्रियया **कुर्मः** इति रूपं सिध्यति।

अत्र अवधेयम् - (डुकृञ्) कृ-धातोः ञित्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे कृधातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले तु सर्वत्रैव ङिद्वद्भावात् न प्रत्ययस्य उकारस्य गुणः। किञ्च अत उत्सार्वधातके इत्यनेन सर्वत्रैव अकारस्य उकारो भवति।

तथा च लटि परस्मैपदे रूपाणि - **करोति, कुरुतः, कुर्वन्ति। करोषि, कुरुथः, कुरुथ। करोमि, कुर्वः, कुर्मः।**

आत्मनेपदे च रूपाणि – **कुरुते, कुर्वाते, कुर्वते। कुरुषे, कुर्वाथे, कुरुध्वे। कुर्वे, कुर्वहे, कुर्महे।**

{सूत्रम्. **लोपश्चास्यान्यतरस्यां म्वोः** (६.४.१०७) = असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा स्यात्।}

लिटि प्रथमपुरुषैकवचनविवक्षायाम् तिपि कृ ति इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपो सर्वादेशे णलि अनुबन्धलोपे कृ अ इति जाते लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः कृ इत्यस्य द्वित्वे कृ कृ अ इति जाते द्विरुक्तस्य पूर्वभागस्य कृ इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्यासंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च कर् कृ अ इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे क कृ अ इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे च कृ अ इति जाते णलो णित्त्वात् अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य कृञः ऋकारस्य वृद्धौ आकारे उरण् रपरः इति रपरत्वे च च कार् अ इति जाते वर्णसम्मेलने चकार इति रूपम् सिध्यति। थलि गुणः भवति। मिपि णलुत्तमो वा इति विकल्पेन मिबादेशस्य णलः णित्त्वं विधीयते तेन णित्त्वपक्षे अचो ञ्णिति इति वृद्धौ चकार इति रूपम्। णित्त्वाभावपक्षे सार्वधातुकार्धधातुकयोः इति गुणे चकर इति रूपम्। अतुसादौ तु असंयोगाल्लिट् कित् इत्यनेन किद्वद्भावे क्ङिति च इति गुणनिषेधः। तेन अतुसादौ अजादिप्रत्यये इको यणचि इति यण् भवति इत्यवधेयम्।

आत्मनेपदे रूपाणाम् प्रक्रियायै एध्धातोः लिटि रूपाणि द्रष्टव्यानि। तत्र सर्वेषाम् रूपाणाम् प्रक्रियाः प्रदर्शिताः। अत्र भवताम् बोधसौकर्याय केवलम् प्रथमपुरुषैकवचने रूपम् प्रदर्श्यते। तथा च प्रथमपुरुषैकवचनविवक्षायां त-प्रत्यये कृ त इति स्थिते लिटस्तझयोरेशिरेच् इति लिडादेशस्य त इत्यस्य स्थाने एश् इति सर्वादेशे अनुबन्धलोपे कृ ए इति जाते सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

ऋकारस्य गुणे प्राप्ते असंयोगाल्लिट् कित् इति सूत्रेण लिडादेशस्य त-प्रत्ययस्य कित्त्वे क्ङिति च इति गुणनिषेधे लिटि धातोरनभ्यासस्य इति अस्मात् परत्वात् इको यणचि इति यणि प्राप्ते द्विर्वचनेऽचि इति द्वित्वार्थम् अचः यणादेशनिषेधे लिटि धातोरनभ्यासस्य इति सूत्रेण धातोर्द्वित्वे कृ कृ ए इति जाते पूर्वोऽभ्यासः इति सूत्रेण द्विरुक्तस्य पूर्वभागस्य अभ्याससंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च कर् कृ ए इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे क कृ ए इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे च कृ ए इति जाते इको यणचि इति सूत्रेण ऋकारस्य यणि रेफे च क्र ए इति जाते वर्णसम्मेलने चक्रे इति रूपम् सिध्यति। अन्येषाम् रूपाणाम् प्रक्रियाः स्वयम् साधनीयाः। लिटि थलादौ आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः।

तथा च परस्मैपदे रूपाणि - **चकार, चक्रतुः, चक्रुः। चकर्थ, चक्रथुः, चक्र। चकार/चकर, चकृव, चकृम।**

आत्मनेपदे रूपाणि च - **चक्रे, चक्राते, चक्रिरे। चकृषे, चक्राथे, चकृढ्वे। चक्रे, चकृवहे, चकृमहे।**

लुटि पूर्ववत् इण्निषेधः। उप्रत्ययापवादस्य तासः आर्धधातुकत्वात् आर्धधातुके परे सार्वधातुकार्धधातुकयोः इति गुणः। इतोऽपि विशेषो अत्र नास्ति।

तथा च परस्मैपदे रूपाणि - **कर्ता, कर्तारौ, कर्तारः। कर्तासि, कर्तास्थः, कर्तास्थ। कर्तास्मि, कर्तास्वः, कर्तास्मः।**

आत्मनेपदे रूपाणि च – **कर्ता, कर्तारौ, कर्तारः। कर्तासे, कर्तासाथे, कर्ताध्वे। कर्ताहे, कर्तास्वहे, कर्तास्महे।**

लृटि तिपि कृ ति इति जाते उप्रत्ययापवादे स्यप्रत्यये कृ स्य ति इति जाते उप्रत्ययापवादस्य स्यप्रत्ययस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। ततः ऋद्धनोः स्ये इत्यनेन स्यस्य इडागमे टित्त्वात् आद्यन्तौ टकितौ इति परिभाषया स्यस्य आद्यावयवे कृ इ स्य ति इति जायते। ततः स्यस्य आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां कृ इत्यस्य ऋकारस्य सार्वधातुकार्धधातुकयोः इत्यनेन गुणे उरण् रपरः इत्यनेन रपरत्वे इकारात्परस्य सकारस्य षत्वे वर्णसम्मेलने **करिष्यति** इति रूपं भवति। तप्रत्यये पूर्ववत् प्रक्रियया **करिष्यते** इति रूपम् भवति। आत्मनेपदस्थले अत्र थासम् विहाय टेः एत्वम् भवति इति अवधेयम्।

तथा च परस्मैपदे रूपाणि - **करिष्यति, करिष्यतः, करिष्यन्ति। करिष्यसि, करिष्यथः, करिष्यथ। करिष्यामि, करिष्यावः, करिष्यामः।**

आत्मनेपदे रूपाणि च – **करिष्यते, करिष्येते, करिष्यन्ते। करिष्यसे, करिष्येथे, करिष्यध्वे। करिष्ये, करिष्यावहे, करिष्यामहे।**

लोटि न कश्चित् विशेषः। तथा हि परस्मैपदे रूपाणि - **करोतु/कुरुतात्, कुरुताम्, कुर्वन्तु। कुरु/कुरुतात्, कुरुतम्, कुरुत। करवाणि, करवाव, करवाम।**

आत्मनेपदे रूपाणि च - **कुरुताम्, कुर्वाताम्, कुर्वताम्। कुरुष्व, कुर्वाथाम्, कुरुध्वम्। करवै, करवावहै, करवामहै।**

लङि अपि न कोऽपि विशेषः। तथा हि परस्मैपदे रूपाणि - **अकरोत्, अकुरुताम्, अकुर्वन्। अकरोः, अकुरुतम्, अकुरुत। अकरवम्, अकुर्व, अकुर्म।**

आत्मनेपदे रूपाणि च – **अकुरुत, अकुर्वाताम्, अकुर्वत। अकुरुथाः, अकुर्वाथाम्, अकुरुध्वम्। अकुर्वि, अकुर्वहि, अकुर्महि।**

{सूत्रम्. **ऋद्धनोः स्ये** (७.२.७०) = ऋतो हन्तेश्च स्यस्य इट् स्यात्।}

विधिलिङि कृधातोः तिपि उप्रत्यये यासुटि सुटि गुणे रपरत्वे उत्वे तिपः इकारलोपे कुर् उ यास् स् त् इति जाते लिङः सलोपोऽनन्त्यस्य इति योगेन सकारद्वयस्य लोपे कुर् उ या त् इति जाते सूत्रमिदमारभ्यते -

[२३.७] ये च॥ (६.४.१०९)

सूत्रार्थः - कृञ उलोपो यादौ प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। ये (७/१), च इति सूत्रगतपदच्छेदः। यकारात् अकारः उच्चारणार्थः। नित्यं करोतेः इत्यतः करोतेः (५/१), इत्यस्यानुवृत्तिर्भवति, उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रतः उतः (५/१) इत्यस्य, प्रत्ययात् (५/१) इत्यस्य च अनुवृत्तिर्भवति। अनुवृत्तयोः तयोः षष्ठ्येकवचनान्ततया विपरिणामः। लोपश्चास्यान्यतरस्यां म्वोः इत्यतः लोपः (१/१) इति पदस्य च अनुवृत्तिर्भवति। अङ्गस्य इत्यधिकृतमस्ति, अतः प्रत्यये इत्यस्याध्याहारो भवति। ततः प्रत्यये इत्यस्य विशेषणं भवति ये इति, तेन तदादिविधौ यादौ प्रत्यये इत्यर्थलाभः। सूत्रार्थो हि कृधातोः परस्य प्रत्ययस्य उकारस्य लोपो भवति यादौ प्रत्यये परे इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण कुर् उ या त् इति जाते यात् इति यकारादिप्रत्ययः विद्यमानः अस्ति, अतः प्रकृतसूत्रेण कृधातोः परस्य उकारस्य लोपो भवति। ततः वर्णसम्मेलने **कुर्यात्** इति रूपं भवति। एवम् अग्रे ऊह्यम्।

तथा हि परस्मैपदे रूपाणि - **कुर्यात्, कुर्याताम्, कुर्युः। कुर्याः, कुर्यातम्, कुर्यात। कुर्याम्, कुर्याव, कुर्याम।**

आत्मनेपदे रूपाणि च – **कुर्वीत, कुर्वीयाताम्, कुर्वीरन्। कुर्वीथाः, कुर्वीयाथाम्, कुर्वीध्वम्। कुर्वीय, कुर्वीवहि, कुर्वीमहि।**

आशीर्लिङि तिपि यासुटि सुटि कृ यास् स् त् इति जाते सकारद्वयस्यापि स्कोः संयोगाद्योरन्ते च इत्यनेन लोपे यात् यकाराद्यार्धधातुकः लिङ् अस्ति। अतः रिङ् शयग्लिङक्षु इत्यनेन कृधातोः ऋकारस्य स्थाने रिङ्-आदेशे अनुबन्धलोपे क् रि या त् इति जाते वर्णसम्मेलने च **क्रियात्** इति रूपं सिध्यति। सूत्रेऽस्मिन् रीङ् ऋतः इत्यतः रीङ् इत्यस्य अनुवर्तमाने पुनः रिङ्-विधानसामर्थ्यात् अकृत्सार्वधातुकयोर्दीर्घः इति रेः इकारस्य दीर्घो न इत्यवधेयम्। एवम् अन्यत्रापि ऊह्यम्।

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

तथा च परस्मैपदे रूपाणि - **क्रियात्, क्रियास्ताम्, क्रियासुः। क्रियाः, क्रियास्तम्, क्रियास्त। क्रियासम्, क्रियास्व, क्रियास्म।**

आत्मनेपदस्थले उश्च इत्यनेन झलादिलिङः कित्त्वम् विधीयते। अतः ऋकारस्य स्थाने नैव गुणादेशः। प्रथमपुरुषैकवचने तप्रत्यये सीयुटि सुटि कृ सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय्+स्+त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय्+स्+त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति तन्निषेधः। ततः लोपो व्योर्वलि इति सीयुटः यकारलोपे कृ सी स् त इति जाते आदेशप्रत्यययोः इति सीयुटः सकारस्य षत्वे तकारस्य ष्टुत्वे टकारे वर्णसम्मेलने **कृषीष्ट** इति रूपम् सिध्यति।

तथा हि आत्मनेपदे रूपाणि – **कृषीष्ट, कृषीयास्ताम्, कृषीरन्। कृषीष्ठाः, कृषीयास्थाम्, कृषीढ्वम्। कृषीय, कृषीवहि, कृषीमहि।**

{सूत्रम्. **रिङ् शयग्लिङक्षु** (७.४.२८) = शे यकि यादावार्धधातुके लिङि च ऋतः रिङादेशः स्यात्।}

{सूत्रम्. **उश्च** (१.२.१२) = ऋवर्णात् परौ झलादी लिङ् तङ्परः सिच्चेत्येतौ कितौ स्तः।}

लुङि तिपि इकारलोपे अडागमे उप्रत्ययापवादे च्लौ सिचि अपृक्तहलः ईडागमे अकृ स् ईत् इति जाते सिचः आर्धधातुकत्वात् प्राप्तस्य वलादिलक्षणस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। ततः सिचि वृद्धिः परस्मैपदेषु इत्यनेन कृ इत्यस्य ऋकारस्य वृद्धौ अकार् स् ईत् इति जाते सकारस्य षत्वे वर्णसम्मेलने **अकार्षीत्** इति रूपं भवति। एवमग्रेऽपि। तथा च परस्मैपदे रूपाणि - **अकार्षीत्, अकार्ष्टाम्, अकार्षुः। अकार्षीः, अकार्ष्टम्, अकार्ष्ट। अकार्षम्, अकार्ष्व, अकार्ष्म।**

आत्मनेपदस्थले प्रथमपुरुषैकवचने तप्रत्यये अडागमे उप्रत्ययापवादे च्लौ सिचि अ कृ स् त इति जाते तनादिभ्यस्तथासोः इत्यनेन विकल्पेन सकारस्य लुकि **अकृत** इति रूपं सिध्यति। लुगभावपक्षे **ह्रस्वादङ्गात्** इत्यनेन झलि परे सिचः सकारस्य लोपे **अकृत** इति समानमेव रूपं सिध्यति। झल् परो नास्ति चेत् सकारोलोपोऽपि न भवति तेन **अकृषाताम् ,अकृषाथाम्** इत्यादीनि रूपाणि सिध्यन्ति।

तथा च लुङि आत्मनेपदे रूपाणि - **अकृत, अकृषाताम्, अकृषत। अकृथाः, अकृषाथाम्, अकृढ्वम्। अकृषि, अकृष्वहि, अकृष्महि।**

{सूत्रम्. **ह्रस्वादङ्गात्** (८.२.२७) = (ह्रस्वान्तात् अङ्गात्) सिचो लोपो झलि।}

लृङि उप्रत्ययापवादस्य स्यस्य आर्धधातुकत्वात् प्राप्तस्य वलादिलक्षणस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधेऽपि ऋद्धनोः स्ये इति इडागमो भवत्येव। किञ्च स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इति इग्लक्षणः गुणः भवति। उभयविधस्थले प्रक्रिया तु स्वयम् बोद्धव्या।

तथा हि परस्मैपदे रूपाणि - **अकरिष्यत्, अकरिष्यताम्, अकरिष्यन्। अकरिष्यः, अकरिष्यतम्, अकिरष्यत। अकरिष्यम्, अकरिष्याव, अकरिष्याम।**

आत्मनेपदे रूपाणि च – **अकरिष्यत, अकरिष्येताम्, अकरिष्यन्त। अकरिष्यथाः, अकरिष्येथाम्, अकरिष्यध्वम्। अकरिष्ये, अकरिष्यावहि, अकरिष्यामहि।**

।।इति कृधातुः।।

पाठगतप्रश्नाः-१

१. तनादिगणीयधातुभ्यः कः विकरणप्रत्ययो भवति।

२. कृधातोः कः विकरणप्रत्ययो भवति।

३. तनादिभ्यस्तथासोः इत्यस्य कोऽर्थः।

४. ये च इत्यस्य कोऽर्थः।

५. नित्यं करोतेः इत्यस्य कोऽर्थः।

६. अनुदात्तोपदेशादिसूत्रं पूरयत।

७. तन्-धातोः लटि उत्तमपुरुषद्विवचने आत्मनेपदे किम् रूपम्।

८. कृधातोः आशीर्लिङि प्रथमपुरुषैकवचने परस्मैपदे किम् रूपम्।

९. करिष्यति इत्यत्र इडागमः केन।

१०. तन्धातोः लङि प्रथमपुरुषैकवचने आत्मनेपदस्थले कति रूपाणि भवन्ति। तानि च कानि।

अथ क्र्यादिगणः

क्री (डुक्रीञ् द्रव्यविनिमये) इति उभयपदिनः अनुदात्तेतः अनिटः सकर्मकात् क्र्यादिगणीयधातोः वर्तमानक्रियावृत्तित्वविवक्षायां **लटि** परस्मैपदसंज्ञके तिपि क्री ति इति जाते कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदमारभ्यते -

[२३.८] क्र्यादिभ्यः श्ना॥ (३.१.८१)

सूत्रार्थः - क्र्यादिगणपठितधातुभ्यः श्ना-प्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। क्र्यादिभ्यः (५/३), श्ना (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिक्रियते। धातोरेकाचो हलादेः

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

क्रियासमभिव्याहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः श्ना-प्रत्ययः परः इति। क्र्यादिगणः दशसु धातुगणेषु नवमः। क्री आदिः येषाम् (धातूनाम्) ते क्र्यादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः क्र्यादिभ्यः। सूत्रार्थो हि कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः क्र्यादिगणपठितधातुभ्यः श्नाप्रत्ययः परो भवति इति। श्नाप्रत्ययस्य शकारस्य इत्संज्ञा लशक्वतद्धिते इत्यनेन भवति। अतः ना इत्येव शिष्यते। श्नाप्रत्ययः अपित् अस्ति। शित्त्वात् सार्वधातुकसंज्ञकोऽपि। अतः श्नाप्रत्ययस्य सार्वधातुकत्वात् अपित्त्वात् च सार्वधातुकमपित् इति ङिद्वद्भावः।

उदाहरणम्- पूर्वोक्तप्रकारेण क्री ति इति जाते प्राप्तं शपं प्रबाध्य प्रकृतसूत्रेण श्नाप्रत्यये अनुबन्धलोपे च क्री ना ति इति जाते श्नाप्रत्ययस्य सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे प्राप्ते सार्वधातुकमपित् इत्यनेन श्नाप्रत्ययस्य ङिद्वद्भावे क्ङिति च इति गुणनिषेधः।ततः नकारस्य अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णत्वे वर्णसम्मेलने च **क्रीणाति** इति रूपं सिध्यति। तसि क्री ना तस् इति जाते सूत्रमिदमारभ्यते -

[२३.९] ई हल्यघोः॥ (६.४.११३)

सूत्रार्थः - श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि, न तु घुसंज्ञकस्य।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। ई (लुप्तप्रथमैकवचनान्तम् पदम्), हलि (७/१), अघोः (६/१) इति सूत्रगतपदच्छेदः। श्नाभ्यस्तयोरातः इति सूत्रमनुवर्तते। तस्य च सूत्रस्य श्नाभ्यस्तयोः (६/२), आतः (६/१) इति पदच्छेदः। अत उत्सार्वधातुके इत्यतः सार्वधातुके (७/१) इति पदमनुवर्तते। गमहनजनखनघसां लोपः क्ङित्यनङि इत्यतः क्ङिति (७/१) इति पदमनुवर्तते। श्नाभ्यस्तयोः आतः ईत् हलि क्ङिति सार्वधातुके अघोः इति पदयोजना। हलि इति सार्वधातुके इत्यस्य विशेषणमस्ति अतः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधौ हलादौ सार्वधातुके इत्यर्थलाभः। क्ङिति इत्यस्य सार्वधातुके इत्यत्र अन्वयः। तेन किति ङिति च सार्वधातुके इत्यर्थलाभः। सूत्रार्थो हि श्ना इत्यस्य आकारस्य, अभ्यस्तसंज्ञकस्य आकारस्य च ईत् स्यात् किति ङिति च हलादौ सार्वधातुके परतः। घुसंज्ञकस्य धातोः आकारस्य तु न इति। सूत्रमिदम् श्नाभ्यस्तयोरातः इति वक्ष्यमाणस्य सूत्रस्य अपवादभूतम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण क्री ना तस् इति स्थिते तसः सार्वधातुकमपित् इत्यनेन ङित्त्वात् हलादित्वात् सार्वधातुकत्वात् च तस्मिन् परतः ई हल्यघोः इति प्रकृतसूत्रेण ना इत्यस्य आकारस्य ईकारादेशे क्री नी तस् इति जाते नकारस्य णत्वे सकारस्य रुत्वे रेफस्य च विसर्गे **क्रीणीतः** इति रूपं सिध्यति।

बहुवचने झिप्रत्यये झेरन्तादेशे क्री ना अन्ति इति जाते सूत्रमिदमारभ्यते -

[२३.१०] श्नाभ्यस्तयोरातः॥ (६.४.११२)

सूत्रार्थः - श्नाभ्यस्तयोः आतो लोपः स्यात् क्ङिति सार्वधातुके।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। श्नाभ्यस्तयोः (६/२), आतः (६/१) इति सूत्रगतपदच्छेदः। श्नसोरल्लोपः इत्यतः लोपः (१/१) इति पदम् अनुवर्तते। अत उत्सार्वधातुके इत्यतः सार्वधातुके (७/१) इति पदमनुवर्तते। गमहनजनखनघसां लोपः क्ङित्यनङि इत्यतः क्ङिति (७/१) इति पदमनुवर्तते। श्नाभ्यस्तयोः आतः लोपः क्ङिति सार्वधातुके इति पदयोजना। क्ङिति इत्यस्य सार्वधातुके इत्यत्र अन्वयः। तेन किति ङिति च सार्वधातुके इत्यर्थलाभः। सूत्रार्थो हि श्ना इत्यस्य आकारस्य, अभ्यस्तसंज्ञकस्य आकारस्य च लोपः स्यात् किति ङिति च सार्वधातुके परतः इति।

अत्र विशेषः - अत्र श्नाभ्यस्तयोरातः इति उत्सर्गसूत्रम्। ई हल्यघोः इति अपवादसूत्रम्। श्नाभ्यस्तयोरातः इति सूत्रस्य सामान्यतया **अजादौ हलादौ** च किति ङिति च सार्वधातुके परतः प्राप्तिरस्ति। किन्तु **हलादौ** किति ङिति च सार्वधातुके परतः ई हल्यघोः इति सूत्रस्य प्रवृत्तेः ई हल्यघोः इत्ययं योगः श्नाभ्यस्तयोरातः इत्यस्य अपवादः। तेन हलादौ किति ङिति च सार्वधातुके परतः श्नाभ्यस्तयोरातः इत्यस्य न प्रवृत्तिः। अतः अजादौ किति ङिति च सार्वधातुके श्नाभ्यस्तयोरातः इत्यस्य प्रवृत्तिः बोध्या।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण क्री ना अन्ति इति जाते अन्ति इति अजादिः ङित् सार्वधातुकम् च अस्ति। अतः प्रकृतसूत्रेण नकारोत्तरवर्तिनः आकारस्य लोपे नस्य णत्वे वर्णसम्मेलने **क्रीणन्ति** इति रूपम्। एवमेव अग्रे हलादौ ङिति सार्वधातके परे ईत्त्वम्, अजादौ ङिति सार्वधातुके परे आकारलोपः ज्ञेयः।

अत्र अवधेयम् - (डुक्रीञ्) क्री-धातोः ञित्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे क्रीधातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

तथा हि लटि परस्मैपदे रूपाणि - **क्रीणाति, क्रीणीतः, क्रीणन्ति। क्रीणासि, क्रीणीथः, क्रीणीथ। क्रीणामि, क्रीणीवः, क्रीणीमः।**

आत्मनेपदे रूपाणि च - **क्रीणीते, क्रीणाते, क्रीणते। क्रीणीषे, क्रीणाथे, क्रीणीध्वे। क्रीणे, क्रीणीवहे, क्रीणीमहे।**

लिटि परस्मैपदसंज्ञके तिपि णलि अनुबन्धलोपे क्री अ इति जाते क्री इत्यस्य द्वित्वे हलादिशेषे की क्री अ इति जायते। ततः ह्रस्वः इत्यनेन अभ्यासस्य ईकारस्य स्थाने ह्रस्वे इकारादेशे कि क्री अ इति जाते कुहोश्चुः इत्यनेन चुत्वे चकारे चि क्री अ इति जाते णलः णित्त्वात् अचो ञ्णिति इत्यनेन क्री इत्यस्य ईकारस्य वृद्धौ ऐकारे चिक्रै अ इति जाते ऐकारस्य स्थाने आयादेशे वर्णसम्मेलने **चिक्राय** इति रूपं सिध्यति। अतुसादौ असंयोगाल्लिट् कित् इत्यनेन कित्त्वात् गुणनिषेधः। क्रीधातोः अतुसि प्रक्रियया चिक्री अतुस् इति जाते अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन ईकारस्य स्थाने इयङ्-आदेशे चिक् र् इय् अतुस् इति जाते सकारस्य रुत्वे रेफस्य च विसर्गे वर्णसम्मेलने **चिक्रियतुः** इति रूपं सिध्यति। एवम्

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

अग्रेऽपि ऊह्यम्। थलि आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधे प्राप्ते तं बाधित्वा क्रादिनियमानुसारं नित्यम् इटि प्राप्ते तस्यापि अचस्तास्वत्थल्यनिटो नित्यम् इत्यनेन निषेधः प्राप्तः। तदा तं बाधित्वा भारद्वाजनियमेन वैकल्पिकः इडागमः। ततः इड्भावे इडभावे चेति पक्षद्वयेऽपि गुणः। वसि मसि च क्रादिनियमानुसारम् नित्यम् इडागमः।विभाषेटः इत्यनेन ध्वमः धस्य विकल्पेन ढत्वम् भवति तेन ध्वमि रूपद्वयम् भवति। ध्वमि वहौ महिङि च क्रादिनियमानुसारम् नित्यम् इडागमः। किञ्च अजादौ प्रत्यये परतः अनभ्यासस्य क्री इत्यस्य ईकारस्य इयङादेशो भवति इत्यवधेयम्। इयङादेशः तिपि सिपि मिपि च न भवति। गुणस्तु अतुसादौ न भवति यतो हि असंयोगाल्लिट् कित् इति किद्वद्भावेन क्ङिति च इति गुणनिषेधः।

तथा च परस्मैपदे रूपाणि - **चिक्राय, चिक्रियतुः, चिक्रियुः। चिक्रयिथ/चिक्रेथ, चिक्रियथुः, चिक्रिय। चिक्राय/चिक्रय, चिक्रियिव, चिक्रियिम।**

आत्मनेपदे रूपाणि च – **चिक्रिये, चिक्रियाते, चिक्रियिरे। चिक्रियिषे, चिक्रियाथे, चिक्रियिढ्वे/चिक्रियिध्वे । चिक्रिये, चिक्रियिवहे, चिक्रियिमहे।**

{सूत्रम्. **विभाषेटः** (८.३.७९) = इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्।}

लुटि श्नाप्रत्ययावपवादः तास्प्रत्ययो भवति। तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन। अपि च तासः आर्धधातुकसंज्ञकत्वात् तस्मिन् परे सर्वत्रैव सार्वधातुकार्धधातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे एकारो भवति। इतोऽपि विशेषः अत्र नास्ति।

तथा च परस्मैपदे रूपाणि - **क्रेता, क्रेतारौ, क्रेतारः। क्रेतासि, क्रेतास्थः, क्रेतास्थ। क्रेतास्मि, क्रेतास्वः, क्रेतास्मः।**

आत्मनेपदे रूपाणि च - **क्रेता, क्रेतारौ, क्रेतारः। क्रेतासे, क्रेतासाथे, क्रेताध्वे। क्रेताहे, क्रेतास्वहे, क्रेतास्महे।**

लृटि प्रथमपुरुषैकवचने तिपि श्नाप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे एकारे सकारस्य षत्वे क्रेष्यति इति रूपं सिध्यति। तप्रत्यये क्रेष्यति इति रूपम्। एवम् अन्यत्रापि ऊह्यम्। अत्र लृटि स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन।

तथा च परस्मैपदे रूपाणि - **क्रेष्यति, क्रेष्यतः, क्रेष्यन्ति। क्रेष्यसि, क्रेष्यथः, क्रेष्यथ। क्रेष्यामि, क्रेष्यावः, क्रेष्यामः।**

आत्मनेपदे रूपाणि च - **क्रेष्यते, क्रेष्येते, क्रेष्यन्ते। क्रेष्यसे, क्रेष्येथे, क्रेष्यध्वे। क्रेष्ये, क्रेष्यावहे, क्रेष्यामहे।**

लोटि उत्तमपुरुषे आडागमः पित् भवति। अतः सार्वधातुकमपित् इत्यनेन ङिद्वद्भावो न भवति। ङित्त्वाभावे च न ईत्त्वं न वा आकारलोपः इत्यवधेयम्। तद्यथा - वसि मसि च आडुत्तमस्य पिच्च इत्यनेन आडागमे सति आकारव्यवधानम् भवति इति हेतोः श्ना इत्यस्मात् परे हल् न लभ्यते तस्मात् ई हल्यघोः इत्यनेन ईत्त्वं न भवति। अपि च आडागमस्य पित्त्वात् आकारलोपोऽपि न। ततः सवर्णदीर्घे **क्रीणाव, क्रीणाम** इत्येवं रूपं भवति।

तथा हि परस्मैपदे रूपाणि - **क्रीणातु/क्रीणीतात्, क्रीणीताम्, क्रीणन्तु। क्रीणीहि/क्रीणीतात्, क्रीणीतम्, क्रीणीत। क्रीणानि, क्रीणाव, क्रीणाम।**

आत्मनेपदे रूपाणि च - **क्रीणीताम्, क्रीणाताम्, क्रीणताम्। क्रीणीष्व, क्रीणाथाम्, क्रीणीध्वम्। क्रीणै, क्रीणावहै, क्रीणामहै।**

लङि परस्मैपदे रूपाणि - **अक्रीणात्, अक्रीणीताम्, अक्रीणन्। अक्रीणाः, अक्रीणीतम्, अक्रीणीत। अक्रीणाम्, अक्रीणीव, अक्रीणीम।**

आत्मनेपदे रूपाणि च - **अक्रीणीत, अक्रीणाताम्, अक्रीणत। अक्रीणीथाः, अक्रीणाथाम्, अक्रीणीध्वम्। अक्रीणि, अक्रीणीवहि, अक्रीणीमहि।**

विधिलिङि यासुटः ङित्त्वात् सर्वत्रैव ईत्त्वं भवति।

तथा च परस्मैपदे रूपाणि - **क्रीणीयात्, क्रीणीयाताम्, क्रीणीयुः। क्रीणीयाः, क्रीणीयातम्, क्रीणीयात। क्रीणीयाम्, क्रीणीयाव, क्रीणीयाम।**

आत्मनेपदस्थले तु सर्वत्रैव अजादिः ङित्प्रत्ययः परो भवति। अतः आकारलोपो भवति।

तथा च आत्मनेपदे रूपाणि – **क्रीणीत, क्रीणीयाताम्, क्रीणीरन्। क्रीणीथाः, क्रीणीयाथाम्, क्रीणीध्वम्। क्रीणीय, क्रीणीवहि, क्रीणीमहि।**

आशीर्लिङि परस्मैपदे रूपाणि - **क्रीयात्, क्रीयास्ताम्, क्रीयासुः। क्रीयाः, क्रीयास्तम्, क्रीयास्त। क्रीयासम्, क्रीयास्व, क्रीयास्म।**

आत्मनेपदरूपाणि च – **क्रेषीष्ट, क्रेषीयास्ताम्, क्रेषीरन्। क्रेषीष्ठाः, क्रेषीयास्थाम्, क्रेषीढ्वम्। क्रेषीय, क्रेषीवहि, क्रेषीमहि।**

लुङि अटि प्रथमपुरुषैकवचने तिपि इकारलोपे श्नाप्रत्ययापवादे च्लौ सिचि अपृक्तहलः तकारस्य ईडागमे अ क्री स् ईत् इति जाते सिचि वृद्धिः परस्मैपदेषु इत्यनेन क्री इत्यस्य ईकारस्य वृद्धौ ऐकारे सकारस्य षत्वे **अक्रैषीत्** इति रूपं सिध्यति। एवम् अग्रेऽपि विद्यार्थिना स्वयम् ऊह्यम्। अत्र लुङि सिचः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन।

तथा हि परस्मैपदे रूपाणि - **अक्रैषीत्, अक्रैष्टाम्, अक्रैषुः। अक्रैषीः, अक्रैष्टम्, अक्रैष्ट। अक्रैषम्, अक्रैष्व, अक्रैष्म।**

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

सार्वधातुकार्धधातुकयोः इति आर्धधातुकलक्षणगुणे आत्मनेपदे रूपाणि - **अक्रेष्ट, अक्रेषाताम्, अक्रेषत। अक्रेष्ठाः, अक्रेषाथाम्, अक्रेढ्वम्। अक्रेषि, अक्रेष्वहि, अक्रेष्महि।**

लृङि तिपि इकारलोपे श्नाप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य निषेधः एकाच उपदेशेऽनुदात्तात् इत्यनेन। पुनः स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन क्री इत्यस्य ईकारस्य गुणे एकारे सस्य षत्वे **अक्रेष्यत्** इति रूपम्। त-प्रत्यये पूर्ववत् प्रक्रियया **अक्रेष्यत** इति रूपम् सिध्यति।

तथा च परस्मैपदे रूपाणि - **अक्रेष्यत्, अक्रेष्यताम्, अक्रेष्यन्। अक्रेष्यः, अक्रेष्यतम्, अक्रेष्यत। अक्रेष्यम्, अक्रेष्याव, अक्रेष्याम।**

आत्मनेपदे रूपाणि च - **अक्रेष्यत, अक्रेष्येताम्, अक्रेष्यन्त। अक्रेष्यथाः, अक्रेष्येथाम्, अक्रेष्यध्वम्। अक्रेष्ये, अक्रेष्यावहि, अक्रेष्यामहि।**

।।इति क्र्यादिगणः।।

पाठगतप्रश्नाः-२

११. क्रीधातोः कः विकरणप्रत्ययो भवति।

१२. श्नाविकरणविधायकसूत्रं लिखत।

१३. क्रीधातोः लिटि मध्यमपुरुषैकवचने परस्मैपदे किम् रूपम्।

१४. लिटि आत्मनेपदस्थले मध्यमपुरुषबहुवचने किं रूपं भवति।

१५. क्रीणन्ति इत्यत्र आकारलोपः केन।

१६. क्रीधातोः कोऽर्थः।

१७. क्रीधातुः उभयपदी अस्ति न वा।

अथ चुरादिगणः

अत्र अवधेयम् - दशसु धातुगणेषु चुरादिगणः अन्तिमः। अन्यस्मात् गणाद् अयं विलक्षणोऽपि। णिच् द्विविधो भवति -१. स्वार्थिकः, २. हेतुमान् च इति। धातोः लकारविधानात् पूर्वं यदा स्वार्थे णिच् भवति तदा तस्य ण्यन्तस्य सनाद्यन्ता धातव इत्यनेन धातुसंज्ञायां लकारः, शप् इत्यादि भवति। प्रकृतेरेव अर्थं परिपोषयति इति हेतोः अयं णिच् स्वार्थिक इत्युच्यते - अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति इति

परिभाषाबलात्। यदा च हेत्वर्थे णिच् भवति तदा स हेतुमाण्णिच् इत्युच्यते। तत्रापि ण्यन्तस्य सनाद्यन्ता धातव इत्यनेन धातुसंज्ञा भवति। अयं विषयः अग्रे णिजन्तप्रकरणे ज्ञास्यते।

चुर स्तेये इति धातोः स्वार्थे णिच्-विधानाय सूत्रमिदमारभ्यते -

[२३.११] सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्॥ (३.१.२५)

सूत्रार्थः - सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच् स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। सत्यापपाश-रूपवीणा-तूलश्लोक-सेनालोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यः (५/३), णिच् (१/१) इति सूत्रगतपदच्छेदः। चुर् आदिः येषां ते चुरादयः इति बहुव्रीहिसमासः। सत्यापश्च पाशश्च रूपश्च वीणा च तूलञ्च श्लोकश्च सेना च लोम च त्वचश्च वर्म च वर्णञ्च चूर्णञ्च चुरादयश्च तेषामितरेतरयोगद्वन्द्वे सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादयः, तेभ्यः सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यः इति बहुव्रीहिगर्भो द्वन्द्वसमासः। प्रत्ययः (१/१), परः (१/१) इत्युभयमधिक्रियते। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इत्यतः धातोः (५/१) इत्यनुवर्तते। एवञ्च सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्णादिनामधातुभ्यः तथा चुरादिगणपठितधातुभ्यः स्वार्थे णिच्-प्रत्ययः परो भवति इति सूत्रार्थः। णिचः णकारस्य चुटू इत्यनेन इत्संज्ञा। चकारस्य तु हलन्त्यम् इत्यनेन। तेन इ-मात्रम् शिष्यते।

उदाहरणे सूत्रार्थसमन्वयः- चुर्-धातोः लट्-विधानात् पूर्वमेव प्रकृतसूत्रेण स्वार्थे णिचि अनुबन्धलोपे चुर् इ इति जाते णिचः तिङ्शिद्भिन्नत्वात् आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां पुगन्तलघूपधस्य च इत्यनेन लघूपधगुणे ओकारे चोरि इति जायते। ततः अस्य समुदायस्य सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञायां कर्तृत्वविवक्षायां लटि लस्य स्थाने आत्मनेपदप्रत्ययपरस्मैपदप्रत्ययोः मध्ये कतरत् स्यात्। तदा उच्यते - शेषात् कर्तरि परस्मैपदम् इति सूत्रेण परस्मैपदप्रत्ययः एव स्यात्। किन्तु लोके कर्त्रभिप्राये क्रियाफले आत्मनेपदस्यापि प्रयोगो दृश्यते। अतः तस्यापि सिद्ध्यर्थम् अग्रिमसूत्रमारभ्यते -

[२३.१२] णिचश्च॥ (१.३.७४)

सूत्रार्थः - णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। णिचः (५/१), च (अव्ययम्) इति सूत्रगतपदच्छेदः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् (१/१) इत्यस्यानुवृत्तिर्भवति। स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यतः कर्त्रभिप्राये (७/१), क्रियाफले (७/१) इत्यनयोः पदयोः अनुवृत्तिर्भवति। णिच् इति एकः प्रत्ययः, तेन प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया तदन्तविधौ

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

णिजन्तात् इत्यर्थलाभः। णिजन्तात् धातोः आत्मनेपदं भवति कर्तृगामिनि क्रियाफले इति सूत्रार्थः। एवञ्च चुरादिधातुभ्यः कर्तृगामिनि क्रियाफले आत्मनेपदं भवति, क्रियाफलस्य परगामित्वे तु परस्मैपदम्। सूत्रस्य अस्य बोधसौकर्याय स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यस्य व्याख्यानम् द्रष्टुम् शक्यम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण चोरि ल् इति जाते क्रियाफलस्य कर्तृगामित्वविवक्षायाम् प्रकृतसूत्रेण लस्य स्थाने आत्मनेपदप्रत्ययस्य विधानम् क्रियते। ततः प्रथमपुरुषैकवचनविवक्षायाम् तप्रत्यये चोरि त इति जाते तप्रत्ययस्य सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि शपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन णिचः इकारस्य गुणे एकारे अयादेशे टेः एत्वे वर्णसम्मेलने च **चोरयते** इति रूपं सिध्यति।

क्रियाफलस्य परगामित्वे शेषात्कर्तरि परस्मैपदम् इत्यनेन लस्य स्थाने परस्मैपदप्रत्ययो भवति। ततः प्रथमपुरुषैकवचने तिपि चोरि ति इति जाते तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि शपः सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन णिचः इकारस्य गुणे एकारे अयादेशे वर्णसम्मेलने च **चोरयति** इति रूपं सिध्यति।

चुर्-धातोः आर्धधातुके लिटि विवक्षिते आदौ स्वार्थे सत्यापादिसूत्रेण णिचि चुर् इ इति जाते णिचः इकारस्य आर्धधातुकं शेषः इत्यनेन आर्धधातुकसंज्ञायां पुगन्तलघूपधस्य च इत्यनेन चुरः उपधाभूतस्य उकारस्य गुणे स्थानत आन्तर्यात् ओकारे चोरि इति जायते। तस्य च समुदायस्य सनाद्यन्ता धातवः इत्यनेन धातुसंज्ञा भवति। ततः भूतानद्यतनपरोक्षार्थवृत्तित्वविवक्षायाम् लिट्लकारे विहिते चोरि ल् इति स्थिते चोरि-धातोः अनेकाच्त्वात् कास्यनेकाच आम् वक्तव्यो लिटि इति वार्तिकेन आम्-प्रत्यये चोरि आम् ल् इति जाते अयामन्ताल्वाय्येत्न्विष्णुषु इत्यनेन चोरि इत्यस्य णेः इकारस्य अयादेशे चोर् अय् आम् ल् इति जायते। ततः आमः इति सूत्रेण आमः परस्य लिटः लुकि धात्वधिकारे विहितत्वात् तिङ्शिद्भिन्नत्वाच्च कृदतिङ् इति सूत्रेण लिटः कृत्संज्ञायां चोरयाम् इत्यस्य प्रत्ययलक्षणेन कृदन्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां ङ्याप्प्रातिपदिकात् इति सूत्रेण सु-प्रत्यये चोरयाम् सु इति स्थिते आमः इति सूत्रेण सुलुकि चोरयाम् इत्यस्य सुबन्तत्वात् सुप्तिङन्तं पदं इति पदसंज्ञा भवति। ततः चोरयाम् इत्यस्य आमन्तत्वात् कृञ्चानुप्रयुज्यते लिटि इति सूत्रेण लिट्परकस्य कृञः अनुप्रयोगे चोरयाम् कृ लिट् इति जाते अनुबन्धलोपे चोरयाम् कृ ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायां तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्वम्-इड्वहिमहिङ् इति सूत्रेण लस्य स्थाने तिपि अनुबन्धलोपे चोरयाम् कृ ति इति जाते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपो सर्वादेशे णलि अनुबन्धलोपे चोरयाम् कृ अ इति जाते लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्वववयवस्य एकाचः कृ इत्यस्य द्वित्वे चोरयाम् कृ कृ अ इति जाते द्विरुक्तस्य पूर्वभागस्य कृ इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्यासंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च चोरयाम् कर् कृ अ इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे चोरयाम् क कृ अ इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे चोरयाम् च कृ अ इति जाते णलो णित्त्वात् अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य कृञः ऋकारस्य वृद्धौ आकारे उरण् रपरः इति

रपरत्वे च चोरयाम् च कार् अ इति जाते चोरयाम् इति मान्तस्य पदस्य हल्परत्वात् मोऽनुस्वारः इति मस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे स्थानत आन्तर्यात् ञकारे **चोरयाञ्चकार** इति रूपं सिध्यति। परसवर्णाभावे **चोरयांचकार** इति रूपम् भवति।

{सूत्रम्- **अयामन्ताल्वाय्येत्न्विष्णुषु** (६.४.५५) = आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात्।}

आम्प्रत्ययस्य प्रकृतिः ण्यन्तः चोरिधातुः उभयपदी अस्ति इति हेतोः लिटि अनुप्रयुज्यमानः कृधातुरपि उभयपदी भवति। तस्मात् आत्मनेपदमपि भवति। अतः प्रथमपुरुषैकवचने तप्रत्यये **चोरयाञ्चक्रे** इति रूपम् सिध्यति। प्रक्रिया - पूर्ववत् प्रक्रियया चोरयाम् कृ लिट् इति जाते अनुबन्धलोपे चोरयाम् कृ ल् इति स्थिते प्रथमपुरुषैकवचनविवक्षायां त-प्रत्यये चोरयाम् कृ त इति स्थिते लिटस्तझयोरेशिरेच् इति लिडादेशस्य त इत्यस्य स्थाने एश् इति सर्वादेशे अनुबन्धलोपे चोरयाम् कृ ए इति जाते सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य ऋकारस्य गुणे प्राप्ते असंयोगाल्लिट् कित् इति सूत्रेण लिडादेशस्य त-प्रत्ययस्य कित्त्वे क्ङिति च इति गुणनिषेधे लिटि धातोरनभ्यासस्य इति अस्मात् परत्वात् इको यणचि इति यणि प्राप्ते द्विर्वचनेऽचि इति द्वित्वार्थम् अचः यणादेशनिषेधे लिटि धातोरनभ्यासस्य इति सूत्रेण धातोर्द्वित्वे चोरयाम् कृ कृ ए इति जाते पूर्वोऽभ्यासः इति सूत्रेण द्विरुक्तस्य पूर्वभागस्य अभ्याससंज्ञायाम् उरत् इति सूत्रेण अभ्यासऋकारस्य अत्त्वे उरण् रपरः इति रपरत्वे च चोरयाम् कर् कृ ए इति जाते हलादिः शेषः इति सूत्रेण आदेः हलः शेषे चोरयाम् क कृ ए इति जाते कुहोश्चुः इति अभ्यासककारस्य चुत्वे चकारे च चोरयाम् कृ ए इति जाते इको यणचि इति सूत्रेण ऋकारस्य यणि रेफे चोरयाम् च क्र ए इति जाते चोरयाम् इति मान्तस्य पदस्य हल्परत्वात् मोऽनुस्वारः इति मस्य अनुस्वारे वा पदान्तस्य इति सूत्रेण अनुस्वारस्य विकल्पेन परसवर्णे स्थानत आन्तर्यात् ञकारे **चोरयाञ्चक्रे** इति रूपं सिध्यति। परसवर्णाभावे **चोरयांचक्रे** इति रूपम् भवति। भूधातोः अस्धातोश्च अनुप्रयोगे तु तयोः परस्मैपदित्वात् न आत्मनेपदसम्भवः।

चुरादिगणीयेभ्यः सर्वेभ्यः धातुभ्यः णिच् भवति इति हेतोः ते णिजन्तधातवः अनेकाचो भवन्ति। ततः कास्यनेकाच आम्वक्तव्यो लिटि इति वार्तिकेन सर्वेभ्यः चुरादिगणीयधातुभ्यः लिटि आम्प्रत्ययो भवति किञ्च कृ-भू-अस् इत्येतेषाम् अनुप्रयोगो भवति।

एवञ्च लिटि रूपाणि (**कृ**-धातोः अनुप्रयोगे)

चोरयाञ्चकार, चोरयाञ्चक्रतुः, चोरयाञ्चक्रुः, चोरयाञ्चकर्थ, चोरयाञ्चक्रथुः, चोरयाञ्चक्र। चोरयाञ्चकार/चोरयाञ्चकर, चोरयाञ्चकृव, चोरयाञ्चकृम।

चोरयांचकार, चोरयांचक्रतुः, चोरयांचक्रुः, चोरयांचकर्थ, चोरयांचक्रथुः, चोरयांचक्र। चोरयांचकार/चोरयांचकर, चोरयांचकृव, चोरयांचकृम।

चोरयाञ्चक्रे, चोरयाञ्चक्राते, चोरयाञ्चक्रिरे। चोरयाञ्चकृषे, चोरयाञ्चक्राथे, चोरयाञ्चकृढ्वे। चोरयाञ्चक्रे, चोरयाञ्चकृवहे, चोरयाञ्चकृमहे।

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

चोरयांचक्रे, चोरयांचक्राते, चोरयांचक्रिरे। चोरयांचकृषे, चोरयांचक्राथे, चोरयांचकृढ्वे। चोरयांचक्रे, चोरयांचकृवहे, चोरयांचकृमहे।

भू-धातोः अनुप्रयोगे - **चोरयाम्बभूव, चोरयाम्बभूवतुः, चोरयाम्बभूवुः। चोरयाम्बभूविथ, चोरयाम्बभूवथुः, चोरयाम्बभूव। चोरयाम्बभूव, चोरयाम्बभूविव, चोरयाम्बभूविम।**

चोरयांबभूव, चोरयांबभूवतुः, चोरयांबभूवुः। चोरयांबभूविथ, चोरयांबभूवथुः, चोरयांबभूव। चोरयांबभूव, चोरयांबभूविव, चोरयांबभूविम।

अस्-धातोः अनुप्रयोगे - **चोरयामास, चोरयामासतुः, चोरयामासुः।चोरयामासिथ, चोरयामासथुः, चोरयामास। चोरयामास, चोरयामासिव, चोरयामासिम।** एतेषां प्रक्रियाज्ञानाय लिटि एध्धातुरूपाणि द्रष्टव्यानि।

चुरादिगणीयधातुभ्यः णिच्प्रत्यये विहिते सति निष्पन्नानां णिजन्तानाम् अनेकाच्त्वात् ते सेटो भवन्ति। तस्मात् **लुटि** तासः इडागमः सुलभः। यथा - तिपि शप्-प्रत्ययापवादे तासि इडागमे णिचः इकारस्य गुणे अयादेशे डादेशे टिलोपे चोरयिता इति रूपं भवति। अग्रे रूपाणि स्वयं साधनीयानि।

तथा च **लुटि** परस्मैपदे रूपाणि - **चोरयिता, चोरयितारौ, चोरयितारः। चोरयितासि, चोरयितास्थः, चोरयितास्थ। चोरयितास्मि, चोरयितास्वः, चोरयितास्मः।**

तथा च आत्मनेपदे रूपाणि - **चोरयिता, चोरयितारौ, चोरयितारः। चोरयितासे, चोरयितासाथे, चोरयिताध्वे। चोरयिताहे, चोरयितास्वहे, चोरयितास्महे।**

इतः परं लृटि लोटि लङि विधिलिङि च रूपाणि स्वयं साधयत। अधः केवलं रूपाणि प्रदीयन्ते।

लृटि परस्मैपदे रूपाणि - **चोरयिष्यति, चोरयिष्यतः, चोरयिष्यन्ति। चोरयिष्यसि, चोरयिष्यथः, चोरयिष्यथ। चोरयिष्यामि, चोरयिष्यावः, चोरयिष्यामः।**

तथा च आत्मनेपदे रूपाणि - **चोरयिष्यते, चोरयिष्येते, चोरयिष्यन्ते। चोरयिष्यसे, चोरयिष्येथे, चोरयिष्यध्वे। चोरयिष्ये, चोरयिष्यावहे, चोरयिष्यामहे।**

लोटि परस्मैपदे रूपाणि - **चोरयतु-चोरयतात्, चोरयताम्, चोरयन्तु। चोरय-चोरयतात्, चोरयतम्, चोरयत। चोरयाणि, चोरयाव, चोरयाम।**

तथा च आत्मनेपदे रूपाणि - **चोरयताम्, चोरयेताम्, चोरयन्ताम्। चोरयस्व, चोरयेथाम्, चोरयध्वम्। चोरये, चोरयावहै, चोरयामहै।**

लङि परस्मैपदे रूपाणि - **अचोरयत्, अचोरयताम्, अचोरयन्। अचोरयः, अचोरयतम्, अचोरयत। अचोरयम्, अचोरयाव, अचोरयाम।**

तथा च आत्मनेपदे रूपाणि - **अचोरयत, अचोरयेताम्, अचोरयन्त। अचोरयथाः, अचोरयेथाम्, अचोरयध्वम्। अचोरये, अचोरयावहि, अचोरयामहि।**

विधिलिङि परस्मैपदे रूपाणि - **चोरयेत्, चोरयेताम्, चोरयेयुः। चोरयेः, चोरयेतम्, चोरयेत। चोरयेय, चोरयेवहि, चोरयेमहि।**

तथा च आत्मनेपदे रूपाणि - **चोरयेत, चोरयेयाताम्, चोरयेरन्। चोरयेथाः, चोरयेयाथाम्, चोरयेध्वम्। चोरये, चोरयेवहि, चोरयेमहि।**

आशीर्लिङि तिपि चोरि यास् स् त् इति जाते यास् स् त् इति समुदायस्य आर्धधातुकत्वं तु अस्ति परन्तु वलादित्वं नास्ति। अतः नेट्। णेः इकारस्य णेरनिटि इत्यनेन लोपे चोर् यास् त् इति जाते सकारद्वयलोपे **चोर्यात्** इति रूपं सिध्यति। एवमेव अग्रे ऊह्यम्। तथा च आशीर्लिङि परस्मैपदस्थले इडागमो न भवति किन्तु आत्मनेपदस्थले भवति इत्यवधेयम्।

तथा च परस्मैपदे रूपाणि - **चोर्यात्, चोर्यास्ताम्, चोर्यासुः। चोर्याः, चोर्यास्तम्, चोर्यास्त। चोर्यासम्, चोर्यास्व, चोर्यास्म।**

तथा च आत्मनेपदे रूपाणि - **चोरयिषीष्ट, चोरयिषीयास्ताम्, चोरयिषीरन्। चोरयिषीष्ठाः, चोरयिषीयास्थाम्, चोरयिषीढ्वम्-चोरयिषीध्वम्। चोरयिषीय, चोरयिषीवहि, चोरयिषीमहि।**

चुर्-धातोः पूर्ववत् प्रक्रियया चोरि इति जाते **लुङि** अडागमे तिपि इकारलोपे अ चोरि त् इति जाते शप्-प्रत्ययापवादे च्लौ च्लेः स्थाने सिजादेशे प्राप्ते तं बाधित्वा **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** इत्यनेन च्लेः स्थाने चङ्-आदेशे अनुबन्धलोपे अ चोरि अ त् इति जाते **णेरनिटि** इत्यनेन णेः इकारस्य लोपे अ चोर् अ त् इति जाते **णौ चङ्युपधाया ह्रस्वः** इत्यनेन चोर् इत्यस्य उपधाभूतस्य ओकारस्य ह्रस्वे उकारे अ चुर् अ त् इति जायते। ततः **चङि** इत्यनेन चुर् इत्यस्य द्वित्वे अ चुर् चुर् अ त् इति जाते द्विरुक्तस्य पूर्वभागस्य पूर्वोऽभ्यासः इत्यनेन अभ्यासंज्ञायाम् हलादिः शेषः इत्यनेन अभ्यासस्य आदेः हलः शेषे अ चु चुर् अ त् इति जाते प्रत्ययलोपे प्रत्ययलक्षणम् इत्यनेन णिः लभ्यते। तेन चङ्परे णौ अचुचुर् इति अङ्गम् लभ्यते। तस्य च अङ्गस्य चु इति अभ्याससंज्ञकः लघुपरश्च वर्तते। अतः **सन्वल्लघुनि चङ्परेऽनग्लोपे** इत्यनेन चोः सन्वद्भावे अभ्यासस्य चोः उकारस्य **दीर्घो लघोः** इत्यनेन दीर्घे ऊकारे वर्णसम्मेलने अचूचुरत् इति रूपम् सिध्यति। आत्मनेपदस्थले तु तप्रत्यये अचूचुरत इति रूपम् सिद्ध्यति। एवम् अन्यत्र बोद्धव्यम्।

{सूत्रम्- **णिश्रिद्रुस्रुभ्यः कर्तरि चङ्** (३.१.४८) = ण्यन्तात् श्यादिभ्यश्च च्लेश्चङ् स्यात् कर्त्रर्थे लुङि परे।}

{सूत्रम्. **णेरनिटि** (६.४.५१) = अनिडादावार्धधातुके परे णेर्लोपःस्यात्।}

{सूत्रम्. **णौ चङ्युपधाया ह्रस्वः** (७.४.१) = चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात्।}

{सूत्रम्. **चङि** (६.१.११) = चङि परेऽनभ्यासधात्वववयवस्यैकाचः प्रथमस्य द्वेस्तोऽजादेस्तु द्वितीयस्य।}

{सूत्रम्. **सन्वल्लघुनि चङ्परेऽनग्लोपे** (७.४.९३) = चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरः तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति।}

{सूत्रम्. **दीर्घो लघोः** (७.४.९४) = लघोरभ्यासस्य दीर्घः स्यात् सन्वद्भावविषये।}

तथा हि परस्मैपदे रूपाणि - **अचूचुरत्, अचूचुरताम्, अचूचुरन्। अचूचुरः, अचूचुरतम्, अचूचुरत। अचूचुरम्, अचूचुराव, अचूचुराम।**

तनादितः चुरादिपर्यन्तम्- तन् कृ क्री चुर् धातवः

तथा च आत्मनेपदे रूपाणि - **अचूचुरत, अचूचुरेताम्, अचूचुरन्त। अचूचुरथाः, अचूचुरेथाम्, अचूचुरध्वम्। अचूचुरे, अचूचुरावहि, अचूचुरामहि।**

तथा हि परस्मैपदे रूपाणि - **अचोरयिष्यत्, अचोरयिष्यताम्, अचोरयिष्यन्। अचोरयिष्यः, अचोरयिष्यतम्, अचोरयिष्यत। अचोरयिष्यम्, अचोरयिष्याव, अचोरयिष्याम।**

तथा हि आत्मनेपदे रूपाणि - **अचोरयिष्यत, अचोरयिष्येताम्, अचोरयिष्यन्त। अचोरयिष्यथाः, अचोरयिष्येथाम्, अचोरयिष्यध्वम्। अचोरयिष्ये, अचोरयिष्यावहि, अचोरयिष्यामहि।**

।।इति चुरादिगणः।।

पाठगतप्रश्नाः-३

१८. चुर्-धातोः यः णिच्प्रत्ययो भवति स स्वार्थिकः हेतुमान् वा।

१९. चुरादिधातुभ्यः स्वार्थे णिच्प्रत्ययविधायकसूत्रं लिखत।

२०. चोरयति-चोरयते इत्यत्र उभयपदविधानं केन सूत्रेण।

२१. चुर्-धातोः लिटि प्रथमपुरुषैकवचने कति रूपाणि

२२. सत्यापादिसूत्रं पूरयत।

२३. चोरयति इत्यत्र कः विकरणप्रत्ययः।

पाठसारः

अस्मिन् पाठे तनादिगणः, क्र्यादिदिगणः, चुरादिगणः चेति इति गणत्रयस्य आलोचना विद्यते। तत्रादौ तनादिगणीयस्य तन्-धातोः कृधातोः च आलोचनं विहितम्। तत्र तन्-धातोर्विषये तनादिकृञ्भ्य उः, तनादिभ्यस्तथासोः, अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति, कृधातोः विषये अत उत्सार्वधातुके, न भकुर्छुराम्, नित्यं करोतेः, ये च इत्येतानि सूत्राणि व्याख्यातानि। ततः क्र्यादिगणीयस्य क्रीधातोः विषये आलोचनं कृतम्। तत्र क्री-धातोः विषये क्र्यादिभ्यः श्ना इति श्नाविकरणविधायकम् सूत्रम् आलोचितम्। ततः ई हल्यघोः, श्नाभ्यस्तयोरातः इति सूत्रे व्याख्याते। तदनन्तरम् चुर्-धातुः आलोचितः। तत्र चुर्-धातोः कथं णिच्प्रत्ययो भवति, कश्च विकणप्रत्ययो भवति इत्यादि आलोचितम्। किञ्च लुङि सन्वद्भावो भवति इति विशेषोऽपि प्रक्रियासहयोगेन प्रदर्शितः। पाठेऽस्मिन् न समेषां रूपाणां ससूत्रं प्रक्रियाः प्रदर्शिताः, ताः स्वयं साध्याः।

भ्वादितः चुरादिगणं यावत् दश गणाः सन्ति। अतः अस्य समग्रस्य प्रकरणस्य नाम यथा तिङन्तं प्रकरणं तथैव दशगणी इत्यपि व्याकरणतन्त्रे केचित् व्यवहरन्ति।

पाठान्तप्रश्नाः

१. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् इति सूत्रं सोदाहरणं व्याखात।

२. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति इति सूत्रं सोदाहरणं व्याखात।

३. तनादिभ्यस्तथासोः इति सूत्रं सोदाहरणं व्याखात।

४. तन्-धातोः लटि परस्मैपदे आत्मनेपदे च सविकल्पं रूपाणि लेख्यानि।

५. कृ-धातोः लटि परस्मैपदे आत्मनेपदे च सविकल्पं रूपाणि लेख्यानि।

६. क्री-धातोः लटि परस्मैपदे आत्मनेपदे च रूपाणि लेख्यानि।

७. चुर्-धातोः लटि परस्मैपदे आत्मनेपदे च रूपाणि लेख्यानि।

८. चुर्-धातोः लिटि कृञः अनुप्रयोगे निष्पन्नानि सविकल्पं सर्वाणि रूपाणि लिखत।

९. चुर्-धातोः लिटि भूधातोः अनुप्रयोगे निष्पन्नानि सर्वाणि रूपाणि लिखत।

१०. अचूचुरत् इत्यस्य प्रक्रिया लेख्या।

११. अक्रैषीत् इत्यस्य प्रक्रिया लेख्या।

१२. अकृत इत्यस्य प्रक्रिया लेख्या।

१३. चक्रे चकार इत्यनयोः प्रक्रिया लेख्या।

१४. कुरुतः इत्यस्य प्रक्रिया लेख्या।

१५. चोरयति चोरयते इत्यनयोः प्रक्रिया लेख्या।

१६. चोरयाञ्चकार इत्यस्य प्रक्रिया लेख्या।

१७. चोरयाञ्चक्रे इत्यस्य प्रक्रिया लेख्या।

१८. क्रीधातोः लिटि परस्मैपदे आत्मनेपदे च रूपाणि लिखत।

१९. कृधातोः लिटि परस्मैपदे आत्मनेपदे च रूपाणि लिखत।

२०. अतानीत् अतनीत् इत्यनयोः प्रक्रिया लेख्या।

२१. अतत अतनिष्ट इत्यनयोः प्रक्रिया लेख्या।

२२. चिक्राय इत्यस्य प्रक्रिया लेख्या।

२३. कुर्वन्ति इत्यस्य प्रक्रिया लेख्या।

२४. नित्यं करोतेः इति सूत्रस्य ससन्दर्भं व्याख्या कार्या।

२५. ये च इति सूत्रस्य व्याख्या कार्या।

२६. ई हल्यघोः इति सूत्रस्य व्याख्या कार्या।

२७. श्नाभ्यस्तयोरातः इति सूत्रस्य व्याख्या कार्या।

२८. अत उत्सार्वधातुके इति सूत्रस्य व्याख्या कार्या।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि- १

१. उ-प्रत्ययः।

२. उ-प्रत्ययः।

३. तनादेः सिचो वा लुक्स्यात्तथासोः।

४. कृञ उलोपो यादौ प्रत्यये परे।

५. करोतेः प्रत्ययोकारस्य नित्यं लोपो म्वोः परयोः।

६. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति।

७. तन्वहे, तनुवहे।

८. क्रियात्।

९. ऋद्धनोः स्ये।

१०. अतत, अतनिष्ट इति रूपद्वयम्।

उत्तराणि- २

११. श्ना।

१२. क्र्यादिभ्यः श्ना।

१३. चिक्रयिथ-चिक्रेथ।

१४. चिक्रियिध्वे-चिक्रियिढ्वे।

१५. श्नाभ्यस्तयोरातः।

१६. द्रव्यविनिमयः।

१७. उभयपदी अस्ति।

उत्तराणि- ३

१८. स्वार्थिकः

१९. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्।

२०. णिचश्च।

२१. चोरयाञ्चकार, चोरयाम्बभूव, चोरयामास इति रूपत्रयम्।

२२. सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्।

२३. शप्।

॥इति त्रयोविंशः पाठः ॥

२४

346sk24

णिजन्तप्रकरणम्

प्रस्तावना

भवन्तः पूर्वं दशगणीयधातूनां विषये परिचयं प्राप्तवन्तः। इदानीं णिजन्तप्रकरणम् आरभ्यते। णिच् एकः प्रत्ययः। णिच् यस्य अन्ते भवति स शब्दः णिजन्त इत्युच्यते। णिच्प्रत्ययो द्विविधो भवति। तद्यथा चुरादिगणीयधातुभ्यः यः णिच्प्रत्ययो भवति स तु प्रकृतेरेव अर्थं परिपोषयति इति हेतोः स्वार्थिको भवति, अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति इति परिभाषाबलात् इत्येकम्। अपरं तावत् दशगणीयधातुभ्यः प्रेरणा (कराना) इत्यर्थेऽपि णिच् प्रत्ययो भवति। स एव अत्र आलोच्यविषयः। यथा हिन्दीभाषायां पढना – पढाना, लिखना– लिखाना, खाना– खिलाना, पीना–पिलाना इत्यादिप्रयोगा भवन्ति। एवं संस्कृतेऽपि यथा खादति–खादयति, लिखति–लेखयति, पिबति–पाययति इत्यादयः प्रयोगाः। अत्र दशगणीयधातुभ्यः णिच्प्रत्ययं कृत्वा प्रेरणावाचकः नूतनः धातुः निर्मीयते। यथा पठ्–धातोः अर्थः पढना (हिन्दी) इति, अस्मात् धातोः णिच्प्रत्यये कृते पाठि इति नूतनो धातुः भवति, तस्यार्थः पढाना (हिन्दी) इति। तथा च पाठयति इति रूपं भवति। णिचश्च (१.३.७४) इति योगेन कर्तृगामिनि क्रियाफले आत्मनेपदम्, अकर्त्रभिप्राये क्रियाफले तु शेषात् कर्तरि परस्मैपदम् (१.३.७८) इत्यनेन परस्मैपदं भवति इति णिजन्तधातोः उभयपदविधानं भवति इति साधारणनियमः। तेन पाठ्यते इति रूपमपि भवति। यद्यपि क्वचित् अकर्त्रभिप्राये क्रियाफलेऽपि आत्मनेपदं भवति यथा भीस्म्योर्हेतुभये (१.३.६८) इत्यत्र। पाठयति इत्यत्र मूलस्य पठ् इत्यस्य भूवादयो धातवः (१.३.१) इत्यनेन धातुसंज्ञा भवति, पाठि इति णिजन्तस्य तु सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति इति ज्ञेयम्। व्याकरणशास्त्रं ससोपानक्रमं पठनीयम्। तस्मादेव अस्य प्रकरणस्य कृते भ्वादिप्रकरणादिज्ञानमावश्यकम्। अतः प्राक्तनपाठानां ज्ञानं समासाद्य अग्रिमपाठाः पठनीयाः।

उद्देश्यानि

इमं पाठं पठित्वा भवताम् –

- णिच्प्रत्ययस्य कः अर्थः कथञ्च तस्य प्रयोगः इति ज्ञानं भविष्यति।
- णिच्प्रत्ययविधायकसूत्रार्थज्ञानं भविष्यति।
- णिच्प्रत्ययान्तरूपाणां प्रक्रियाज्ञानं भविष्यति।
- तत्तत्स्थलेषु विशेषसूत्राणां ज्ञानं भविष्यति।
- णिजन्तपदप्रयोगाय सामर्थ्यं स्यात्।

वाक्ये विविधानि कारकाणि भवन्ति। परन्तु यत् विना क्रियासिद्धिः नैव भवति तत् कर्तृकारकम् उच्यते इति भवन्तः कारकप्रकरणेषु अधीतवन्तः इति भावयामि। यथा रामः पठति इत्यत्र पठनक्रियासिद्धिः रामं विना नैव सम्भवति। क्रियायां कर्ता एव स्वतन्त्रतया विवक्षितो भवति। कर्मादि तु कर्त्रपेक्षितत्वात् स्वतन्त्रं भवितुं नार्हति। यथा क्रियया कर्तुः इष्टतमस्य कर्मसंज्ञा, क्रियायां कर्तुः प्रकृष्टोपकारकस्य करणसंज्ञा, दानादिक्रियया कर्तुः अभिप्रेतस्य सम्प्रदानसंज्ञा, कर्तुः अवधेः अपादानसंज्ञा, कर्तुः आधारस्य अधिकरणसंज्ञा भवति। तदेतत् सर्वं कारकं क्रियायां कर्त्रा विवक्षितं भवति। कर्ता तु न कस्यापि अधीनः। अतः स्वातन्त्र्येण विवक्षितस्य कारकस्य कर्तृसंज्ञा भवति, स्वतन्त्रः कर्ता इति योगेन। एतादृशस्यैव कर्तुः प्रेरकस्य कर्तृसंज्ञां हेतुसंज्ञां च विधातुम् अग्रिमसूत्रमारभ्यते-

[२४.१] तत्प्रयोजको हेतुश्च॥ (१.४.५५)

सूत्रार्थः – कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्।

सूत्रव्याख्या – संज्ञासूत्रमिदं पदत्रयात्मकम्। तत्प्रयोजकः (१/१), हेतुः (१/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। तत्पदेन स्वतन्त्रः कर्ता (१.४.५४) इति पूर्वसूत्रात् कर्तृपदं गृह्यते। तस्य = कर्तुः प्रयोजकः तत्प्रयोजकः इति षष्ठी तत्पुरुषसमासः। यः प्रेरयति स प्रयोजकः प्रेरकः प्रवर्तयिता वा इति कथ्यते। यश्च प्रेरितो भवति स प्रयोज्यः प्रेरितः प्रवर्तितो वा इत्युच्यते। यथा यज्ञदत्तो देवदत्तेन ओदनं पाचयति इत्यत्र पाकक्रियायां यज्ञदत्तेन देवदत्तः प्रेरितो भवति, अतः स प्रयोज्य इति कथ्यते, यज्ञदत्तस्तु प्रेरयति, अतः स प्रयोजक इत्युच्यते। अस्य प्रयोजकस्यैव कर्तृसंज्ञा हेतुसंज्ञा च अनेन सूत्रेण विधीयते। हेतुसंज्ञायाः फलं – हेतुमति च (३.१.२६) इति सूत्रेण प्रयोजकव्यापारे णिच्प्रत्ययसिद्धिः। कर्तृसंज्ञायाः फलं तु – लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण कर्तरि लडादिसिद्धिः। एवञ्च कर्तुः प्रयोजकस्य हेतुसंज्ञा कर्तृसंज्ञा च भवति इति सूत्रार्थः फलति।

अत्र विशेषः – णिजन्तस्थले प्रयोजककर्ता प्रयोज्यकर्ता च इति द्विविधः कर्ता भवति। व्यापारवान् कर्ता प्रयोज्यकर्ता भवति, प्रेरककर्ता च प्रयोजककर्ता भवति। देवदत्तः पचति, तं यज्ञदत्तः प्रेरयति– इत्यत्र पच्धातोः पाकानुकूलव्यापारः अर्थः, स च व्यापारः देववदत्तेऽस्ति। अतः देवदत्तः पाकानुकूलव्यापारवान्। अतः स कर्ता भवति किन्तु णिजन्तस्थले स प्रयोज्यकर्ता भवति। यतो हि अयं कर्ता प्रेरकेण प्रयोज्यो भवति। यज्ञदत्ते तु तादृशव्यापारो नास्ति अतः स कर्ता भवितुं नार्हति। तस्मात् तत्प्रयोजको हेतुश्च इत्यनेन यज्ञदत्तस्य हेतुसंज्ञया सह कर्तृसंज्ञापि विधीयते। अतः णिजन्तस्थले स कर्ता प्रयोजककर्ता इत्युच्यते। हेतुसंज्ञायाः फलं भियो हेतुभये षुक् इत्यादेः प्रवृत्तिः। कर्तृसंज्ञायाः फलं तु प्रयोजके वाच्ये सति लः कर्मणि च भावे चाकर्मकेभ्यः (३.४.६९)इत्यनेन कर्तरि लकारविधानम्।

अधुना हेतुसंज्ञायाः फलं प्रदर्श्यते–

[२४.२] हेतुमति च (३.१.२६)

सूत्रार्थः – प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकं वर्तते। हेतुमति (७/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। हेतुः (प्रयोजकः) आधारतया अस्य अस्ति इति मतुप्प्रत्यये हेतुमान्, तस्मिन् हेतुमति। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (३.१.२२) इत्यतः धातोः, सत्याप–पाश–रूप–वीणा–तूल–श्लोक–सेना–लोम–त्वच–वर्म–वर्ण–चूर्ण–चुरादिभ्यो णिच् (३.१.२५) इत्यतः णिच् इति पदमनुवर्तते। प्रत्ययः परश्च इत्युभयमधिकृतम्। हेतुमत्–शब्देन हेतोः (प्रयोजकस्य) व्यापारः अभिप्रेतोऽस्ति। स च व्यापारः प्रेरणादिः। एवञ्च प्रयोजककर्तुः प्रेरणादिव्यापारे वाच्ये सति धातोः णिच्प्रत्ययो भवति इति सूत्रार्थः सम्पद्यते। णिचः णकारचकारौ इतौ स्तः। अतः इकारमात्रं शिष्यते। सूत्रेणानेन णिच्प्रत्ययो विधीयते।

अत्र विशेषः – वस्तुतः भ्वादितः चुराद्यन्तं यावत् ये दशगणीया धातवो वर्तन्ते, तेभ्यः णिजन्तधातुः पृथक् नास्ति, अपि तु तेभ्यः णिच्प्रत्यये कृते सति ते नूतनरूपतां लभन्ते, तस्मात् ते एव णिजन्ताः इत्युच्यते। णिजन्तधातोः णिचश्च (१.३.७४) इत्यनेन उभयपदविधानं भवति इति ध्येयम्।

उदाहरणम् – भावयति ।

सूत्रार्थसमन्वयः – भवन्तं प्रेरयति इत्यर्थे भूधातोः णिचि अनुबन्धलोपे भू इ इति जाते णिचः णित्त्वात् अचो ञ्णिति (७.२.११५) इत्यनेन अजन्तलक्षणावृद्धौ औकारे एचोऽयवायावः (६.१.७८) इत्यनेन आवादेशे वर्णसम्मेलने च भावि इति जायते। तस्य च समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां कर्तृत्वविवक्षायां च वर्तमाने लट् (३.२.१२३) इति योगेन लटि भावि ल् इति स्थितिः उत्पन्ना। ततः प्रथमपुरुषैकवचनविवक्षायां णिचश्च (१.३.७४) इति सूत्रेण परस्मैपदात्मनेपदयोः युगपत् प्राप्तयोः क्रियाफलस्य परगामित्वे शेषात् कर्तरि परस्मैपदम् (१.३.७८) इत्यनेन परस्मैपदविधानात् तिप्तस्झिसिप्थस्थमिब्वस्मस्–तातांझथासाथांध्वमिड्वहिमहिङ् (३.४.७८) इति योगेन लस्य स्थाने परस्मैपदसंज्ञकेषु तिबादिषु नवसु प्रत्ययेषु प्राप्तेषु प्रथमपुरुषैकवचनविवक्षायां तिपि अनुबन्धलोपे भावि ति इति जाते कर्तरि शप् (३.१.६८) इत्यनेन शपि अनुबन्धलोपे भावि अ ति इति जाते शपः शित्त्वात् तिङ्शित्सार्वधातुकम् (३.४.११३) इत्यनेन सार्वधातुकसंज्ञायां सार्वधातुकार्धधातुकयोः (७.४.८४) इत्यनेन इगन्ताङ्गस्य भावि इत्यस्य इकारस्य गुणे एकारे एचोऽयवायावः (६.१.७८) इत्यनेन एकारस्य स्थाने अयादेशे भाव् अय् अ ति इति जाते भावयति इति रूपं सिध्यति। कर्तृगामिनि क्रियाफले तु आत्मनेपदप्रत्ययः। तेन भावयते इत्यपि रूपं भवति इति णिजन्तस्थले द्विविधं रूपं भवति इति सम्यक् अवधार्यताम्।

अधुना भवतां सुबोधाय भूधातोः प्रत्येकं लकारेषु एकैकम् उदाहरणम् अधः प्रदर्श्यन्ते–

लिटि – भावयाञ्चकार–भावयाञ्चक्रे। भावयामास। भावयाम्बभूव।

लुटि – (परस्मै) भावयिता, भावयितारौ, भावयितारः। **भावयितासि**।

(आत्मने.) भावयिता, भावयितारौ, भावयितारः। **भावयितासे**।

लृटि – (परस्मै.) भावयिष्यति। (आत्मने.) भावयिष्यते।

लोटि – (परस्मै.) भावयतु–भावयतात्। (आत्मने.) भावयताम्।

लङि – (परस्मै.) अभावयत्। (आत्मने.) अभावयत।

विधिलिङि – (परस्मै.) भावयेत्। (आत्मने.) भावयेत।

आशीर्लिङि – (परस्मै.) भाव्यात्। (आत्मने.) भावयिषीष्ट।

भूधातोः णिचि लुङि अडागमे तिपि इतश्च (३.४.१००) इत्यनेन तिपः इकारस्य लोपे च्लौ अ भू इ च्लि त् इति जायते। ततः च्लेः स्थाने सिजादेशे प्राप्ते तं बाधित्वा णिश्रिद्रुस्रुभ्यः कर्तरि चङ् (३.१.४८) इत्यनेन ण्यन्तधातुत्वात् च्लेः स्थाने चङ्–आदेशे अनुबन्धलोपे अभू इ अ त् इति जाते **णिच्यच आदेशो न द्वित्वे कर्तव्ये** इति परिभाषया चङि (६.१.११) इत्यनेन भू इत्यस्य द्वित्वे पूर्वोऽभ्यासः (६.१.४) इत्यनेन च पूर्वभागस्य अभ्याससंज्ञायां ह्रस्वः (७.४.५९) इत्यनेन आद्यस्य भू इत्यस्य ऊकारस्य ह्रस्वे अभ्यासे चर्च (८.४.५४) इत्यनेन जश्त्वे अ बु भू इ अत् इति जायते। ततः द्वितीयस्य भू इत्यस्य ऊकारस्य अचो ञ्णिति (७.२.११५) इति योगेन वृद्धौ भौ इति जाते एचोऽयवायावः (६.१.७८) इत्यनेन आवादेशे अ बु भाव् इ अ त् इति जायते। ततः णौ चङ्युपधाया ह्रस्वः (७.४.१) इत्यनेन भाव् इत्यस्य उपधाभूतस्य आकारस्य ह्रस्वे अ बु भव् इ अ त् इति जाते णेरनिटि (६.४.५१) इत्यनेन णिचः इकारस्य लोपे अ बु भव् अ त् इति जाते सन्वल्लघुनि चङ्परेऽनग्लोपे (७.४.९३) इत्यनेन सन्वद्भावे अग्रिमसूत्रमारभ्यते –

[२४.३] ओः पुयण्ज्यपरे॥ (३.४.८०)

सूत्रार्थः – सनि परे यदङ्गं तदवयवाभ्यासस्योकारस्य इत् स्यात् पवर्ग–यण्–जकारेषु अवर्णपरेषु परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। ओः (६/१), पुयण्जि (७/१), अपरे (७/१) इति सूत्रगतपदच्छेदः। पुश्च (पवर्गश्च) यण् च ज् च पुयण्ज् इति समाहारद्वन्द्वः, तस्मिन् पुयण्जि। अः (अकारः) परो यस्मात् स अपरः इति बहुव्रीहिः, तस्मिन् अपरे। अत्र लोपोऽभ्यासस्य (७.४.५८) इत्यतः अभ्यासस्य इति पदस्य, भृञामित् (७.४.७६) इत्यतः इत् इति पदस्य, सन्यतः (७.४.७९) इत्यतः सनि इति पदस्य च अनुवृत्तिर्भवति। अङ्गस्य (६.४.१) इत्यधिक्रियते। अङ्गस्य इति अवयवषष्ठी। पुयण्जि इति विशेष्यस्य अपरे इति विशेषणम्। उकारस्य षष्ठ्यन्तं रूपं भवति ओः इति। इत् इत्यस्य अर्थः ह्रस्वः इकारः। तथा च सनि परतः यदङ्गं भवति तस्य अवयवस्य अभ्यासस्य उकारस्य स्थाने इकारादेशः स्यात् पवर्गयण्जकारेषु अवर्णपरेषु परतः। सूत्रेणानेन इत्त्वं विधीयते।

उदाहरणम् – अबीभवत्।

सूत्रार्थसमन्वयः – तथा च अ बु भव् अ त् इति जाते ओः पुयण्ज्यपरे इति प्रकृतसूत्रेण बु इत्यस्य उकारस्य इत्त्वं भवति। यतो हि अत्र अभ्यासस्थः उकारोऽस्ति। किञ्च भकारः पवर्गीयवर्णः अकारपरकश्चास्ति। अपि च अत्र अङ्गं सन्परकमपि अस्ति। ततः दीर्घो लघोः (७.४.९४) इत्यनेन बेः इकारस्य दीर्घे सर्ववर्णसम्मेलने च अबीभवत् इति रूपं सिध्यति।

सूत्रस्यास्य अन्यानि उदाहरणानि ग्रन्थान्तरे द्रष्टव्यानि।

पाठगतप्रश्नाः-१

१. कर्तुः प्रयोजकस्य कर्तुसंज्ञा भवति किम्।

२. हेतुसंज्ञा कस्य भवति।

३. णिच्प्रत्ययः कस्मिन्नर्थे भवति।

४. स्वार्थे णिच्प्रत्ययो भवति किम्।

५. हेतुमति च (३.१.२६) इति सूत्रे हेतुमत्–शब्देन किं विवक्षितम्।

६. णिचश्च (१.३.७४) इति योगेन किं भवति।

७. ओः पुयण्ज्यपरे इति योगस्य कोऽर्थः।

८. ओः पुयण्ज्यपरे इति सूत्रस्य किम् उदाहरणम्।

तिष्ठन्तं प्रेरयति इति विग्रहे ष्ठा गतिनिवृत्तौ इति धातोः णिचि स्था + इ इति स्थिते सूत्रमिदमारभ्यते –

[२४.४] अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ॥ (७.३.३६)

सूत्रार्थः – ऋ, ह्री, व्ली, री, क्नूयी, क्ष्मायी इत्येतेभ्यो धातुभ्यः आकारन्तधातुभ्यश्च पुगागमो भवति णिचि परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकम्। अर्तिह्वीव्लीरीक्नूयीक्ष्माय्याताम् (६/३), पुक् (१/१), णौ (७/१) इति सूत्रगतपदच्छेदः। अर्तिश्च ह्रीश्च व्लीश्च रीश्च क्नूयीश्च क्ष्मायीश्च आच्च तेषामितरेतरयोगद्वन्द्वे अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातः, तेषाम् अर्तिह्वीव्लीरीक्नूयीक्ष्माय्याताम्। पुकः ककार इत्संज्ञकः उकारश्च उच्चारणार्थकः, अतः प्–मात्रमवशिष्यते। कित्त्वात् आद्यन्तौ टकितौ (१.१.४६) इति परिभाषया पुक् अन्त्यावयवो भवति। अङ्गस्य (६.४.१) इत्यधिक्रियते। एवञ्च सूत्रार्थस्तावत्– ऋ, ह्री, व्ली, री, क्नूयी, क्ष्मायी इत्येतेभ्यो धातुभ्यः आकारन्तधातुभ्यश्च पुगागमो भवति णिच्प्रत्यये परतः। तथा च सूत्रेणानेन पुक्–आगमो विधीयते।

उदाहरणम् – स्थापयति।

सूत्रार्थसमन्वयः – तथा च स्थाधातोः णिचि स्था इ इति जाते प्रकृतसूत्रेण पुगागमो भवति। यतो हि स्थाधातुः आकारान्तधातुः अस्ति किञ्च ततः णिच्प्रत्ययोऽपि विहितोऽस्ति। ततः पुकः अनुबन्धलोपे स्थापि इति जाते सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि गुणे एकारे अयादेशे स्थापयति इति रूपं सिध्यति, पक्षे स्थापयते इत्यपि भवति। अन्यानि उदाहरणानि–

१. ऋ गतौ–अर्पयति, अर्पयते।

२. ह्री लज्जायाम्–ह्रेपयति, ह्रेपयते।

३. व्ली वरणे–व्लेपयति, व्लेपयते।

४. री गतिरेषणयोः–रेपयति, रेपयते।

५. क्नुयी शब्दे उन्दने च–क्नोपयति, क्नोपयते।

६. क्ष्मायी विधूनने–क्ष्मापयति, क्ष्मापयते।

अधः स्थाधातोः सर्वेषु लकारेषु उदाहरणानि प्रदर्श्यन्ते–

लिटि – स्थापयाञ्चकार–स्थापयाञ्चक्रे। स्थापयामास। स्थापयाम्बभूव।

लुटि – (परस्मै) स्थापयिता, स्थापयितारौ, स्थापयितारः। **स्थापयितासि**।

(आत्मने.) स्थापयिता, स्थापयितारौ, स्थापयितारः। **स्थापयितासे**।

लृटि – (परस्मै.) स्थापयिष्यति। (आत्मने.) स्थापयिष्यते।

लोटि – (परस्मै.) स्थापयतु–स्थापयतात्। (आत्मने.) स्थापयताम्।

लङि – (परस्मै.) अस्थापयत्। (आत्मने.) अस्थापयत।

विधिलिङि – (परस्मै.) स्थापयेत्। (आत्मने.) स्थापयेत।

आशीर्लिङि – (परस्मै.) स्थाप्यात्। (आत्मने.) स्थापयिषीष्ट।

लृङि – (परस्मै.) अस्थापयिष्यत्। (आत्मने.) अस्थापयिष्यत।

स्था–धातोः लुङि णिचि पुगागमे लुङि प्रथमपुरुषैकवचने तिपि च्लौ चङि णिलोपे अ स्थाप् अ त् इति स्थिते विशेषं दर्शयितुं सूत्रमिदमारभ्यते –

[२४.५] तिष्ठतेरित्॥ (७.४.५)

सूत्रार्थः – उपधाया इदादेशः स्याच्चङ्परे णौ।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। तिष्ठतेः (६/१), इत् (१/१) इति सूत्रगतपदच्छेदः। णौ चङ्युपधाया ह्रस्वः (७.४.५९) इत्यतः णौ, चङि, उपधायाः इत्येतेषां पदानाम् अनुवृत्तिर्भवति। तेन चङ्परके णिच्प्रत्यये परतः स्थाधातोः उपधायाः इकारादेशो भवति इति सूत्रार्थः सिध्यति।

उदाहरणम् – अतिष्ठिपत् ।

सूत्रार्थसमन्वयः – तथा च अ स्थाप् अ त् इति स्थिते स्थाप् इत्यत्र उपधाभूतस्य आकारस्य स्थाने इकारादेशे अ स्थिप् अ त् इति जायते। ततः चङि (६.१.११) इत्यनेन स्थिपः द्वित्वे हलादिः शेषः (७.४.६०) इत्यस्य बाधकेन शर्पूर्वाः खयः (७.४.६१) इत्यनेन थकारशेषे चर्त्वे च अ ति स्थिप् अ त् इति जाते आदेशप्रत्यययोः (८.३.५९) इत्यनेन सकारस्य षकारे अतिष्ठिपत् इति रूपं सिध्यति।

ज्ञानार्थकात् ज्ञापनार्थकात् च चुरादिगणीयात् ज्ञप्–धातोः कर्तृत्वविवक्षायां सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् इति स्वार्थिकणिचि, पुनश्च हेतमण्णिचि ज्ञप् इ इ इति जायते। ततः णेरनिटि (६.४.५१) इति स्वार्थकणिचः लोपे उपधावृद्धौ च ज्ञाप् इ इति जायते। तत्र ज्ञप मिच्च इति निर्देशात् ज्ञप्–धातोः मित्त्वम् अतिदिश्यते। तेन ज्ञप्–धातुः मित् भवति। अधुना मित्करणफलं प्रदर्शयितुम् अग्रिमसूत्रमारभ्यते –

[२४.६] मितां ह्रस्वः॥ (६.४.९२)

सूत्रार्थः – घटादीनां ज्ञपादीनां चोपधायाः ह्रस्वः स्याण्णौ।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। मिताम् (६/३), ह्रस्वः (१/१) इति सूत्रगतपदच्छेदः। ऊदुपधाया गोहः (६.४.८९), इत्यतः उपधायाः इति पदस्य, दोषो णौ (६.४.९०) इत्यतः णौ इति पदस्य च अनुवृत्तिर्भवति। तत्र ये मितः सन्ति ते धातुपाठे परिगणिताः सन्ति। ज्ञपादयो घटादयश्च मितो भवन्ति इति धातुपाठे दृश्यते। तत्र मित्त्वम् अतिदिश्यते इति अवधार्यताम्, न तु मकारः इत् यस्य धातोः स धातुः मित् इति ग्राह्यम्। यथा घट चेष्टायाम् इति धातौ घटादयो मितः इत्यनेन मित्त्वमतिदिश्यते। किञ्च ज्ञप मिच्च इति कथनेन ज्ञप्धातौ मित्त्वमतिदिश्यते। मित्त्वस्य फलं तु मितां ह्रस्वः (६.४.९२) इत्येकम्। अपरं तु चिण्णमुलोर्दीर्घोऽन्यतरस्याम् (६.४.९३) इत्यनेन विकल्पेन दीर्घादेशविधानं अघटि–अघाटि इत्यादौ।

उदाहरणम् – घटयति। ज्ञपयति।

सूत्रार्थसमन्वयः - एवञ्च ज्ञाप् इ इति जाते कित्त्वातिदेशे प्रकृतसूत्रेण ह्रस्वादेशे ज्ञपि इति जायते। ततः ज्ञपि इति समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि गुणे अयादेशे ज्ञपयति इति रूपं भवति। लुङि तु च्लेः चङि द्वित्वे णिलोपे सन्वद्भावे सन्यतः इति इत्त्वे अजिज्ञपत् इति रूपं भवति।

एवमेव घटयति इत्यत्रापि ज्ञेयम्। लुङि तु दीर्घो लघोः (७.४.९४) इत्यस्य प्रवृत्तिः। तेन अजीघटत्, अजीघटत इति सिध्यति।

अधः ज्ञप्–धातोः सर्वेषु लकारेषु उदाहरणानि प्रदर्श्यन्ते–

लिटि – ज्ञपयाञ्चकार–ज्ञपयाञ्चक्रे। ज्ञपयामास। ज्ञपयाम्बभूव।

लुटि – (परस्मै) ज्ञपयिता, ज्ञपयितारौ, ज्ञपयितारः। **ज्ञपयितासि**।

(आत्मने.) ज्ञपयिता, ज्ञपयितारौ, ज्ञपयितारः। **ज्ञपयितासे**।

लृटि – (परस्मै.) ज्ञपयिष्यति। (आत्मने.) ज्ञपयिष्यते।

लोटि – (परस्मै.) ज्ञपयतु–ज्ञपयतात्। (आत्मने.) ज्ञपयताम्।

लङि – (परस्मै.) अज्ञपयत्। (आत्मने.) अज्ञपयत।

विधिलिङि – (परस्मै.) ज्ञपयेत्। (आत्मने.) ज्ञपयेत।

आशीर्लिङि – (परस्मै.) ज्ञप्यात्। (आत्मने.) ज्ञपयिषीष्ट।

लृङि – (परस्मै.) अज्ञपयिष्यत्। (आत्मने.) अज्ञपयिष्यत।

लुङि – (परस्मै.) अजिज्ञपत्, (आत्मने.) अजिज्ञपत।

पाठगतप्रश्नाः-२

९. तिष्ठतेरित् इति सूत्रस्य कोऽर्थः।

१०. अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति सूत्रेण किं विधीयते।

११.घटयति इत्यत्र उपधाह्रस्वः केन विधीयते।

१२.मितां ह्रस्वः इत्यस्य कोऽर्थः।

१३.ज्ञप्–धातोः मित्त्वं कथं भवति।

टु ओ श्वि गतिवृद्ध्योः धातोः णिचि लुङि प्रथमपुरुषैकवचने तिपि चङि अडागमे अश्वि इ अ त् इति जाते सूत्रमिदमारभ्यते–

[२४.७] णौ च संश्चङोः॥ (६.१.३१)

सूत्रार्थः – सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात्।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। णौ (७/१) च (अव्ययम्) संश्चङोः (७/२) इति सूत्रगतपदच्छेदः। सन् च चङ् च संश्चङौ तयोः संश्चङोः इति इतरेतरयोगद्वन्द्वः। विभाषा श्वेः (६.१.३०) इति सूत्रस्य, ष्यङः सम्प्रसारणम् (६.१.१३) इत्यतश्च सम्प्रसारणम् इति पदस्य च अनुवृत्तिर्भवति। संश्चङोः णौ इत्यस्य विशेषणमस्ति। एवञ्च सन्परकः चङ्परकः च णिच् इत्यर्थः। ततः सन्परके णौ अथवा चङ्परके णौ श्विधातोः विकल्पेन सम्प्रसारणं भवति इति सूत्रार्थः। सूत्रेणानेन वैकल्पिकं सम्प्रसारणं विधीयते। श्विधातोः वकारः सम्प्रसारणी अस्ति, तस्य सम्प्रसारणे उकारो भवति, ततः सम्प्रसारणाच्च (६.१.१०८) इत्यनेन पूर्वरूपैकादेशे शु इति जायते इति ध्येयम्।

उदाहरणम् – अशूशवत् ।

सूत्रार्थसमन्वयः – एवञ्च अ श्वि इ अ त् इत्यवस्थायां वृद्धिसम्प्रसारणयोः युगपत् प्राप्तयोः **सम्प्रसारणं तदाश्रयं च कार्यं बलवत्** इति परिभाषया आदावेव सम्प्रसारणं भवति, अतः णौ च संश्चङोः इत्यनेन विकल्पेन सम्प्रसारणे उकारे अ शु इ इ अ त् इति जाते सम्प्रसारणाच्च (६.१.१०८) इत्यनेन पूर्वरूपैकादेशे अ शु इ अ त् इति जाते शु इत्यस्य चङि (६.१.११) इत्यनेन द्वित्वे दीर्घो लघोः (७.४.९४) इत्यनेन अभ्यासस्य दीर्घे अ शू शु इ अ त् इति जाते द्वितीयशोः उकारस्य अचो ञ्णिति (७.२.११५) इत्यनेन वृद्धौ एचोऽयवायावः (६.१.७८) इत्यनेन औकारस्य आवादेशे अ शू शाव् इ अ त्

इति जाते णौ चङ्युपधाया ह्रस्वः (७.४.१) इत्यनेन उपधाह्रस्वे, णेरनिटि (६.४.५१) इत्यनेन णिलोपे सर्ववर्णसम्मेलने च अशूशवत् इति रूपं सिध्यति।

दिवादिगणीयस्य शो तनूकरणे इति धातोः श्यन्तं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इत्यनेन णिचि धातोः उकारस्य स्थाने आदेच उपदेशेऽशिति (६.१.४५) इत्यनेन आकारादेशे शा इ इति जाते अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इत्यनेन पुगागमे प्राप्ते सूत्रमिदमारभ्यते –

[२४.८] शाच्छासाह्वाव्यावेपां युक्॥ (७.३.३७)

सूत्रार्थः – प्राप्तात्त्वानां शो–छो–षो–ह्वे–व्ये इत्येतेषां धातूनां किञ्च वेपाधात्वोः युगागमो भवति णिचि परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। शाच्छासाह्वाव्यावेपाम् (६/३), युक् (१/१) इति सूत्रगतपदच्छेदः। शाश्च छाश्च साश्च ह्वाश्च व्याश्च वेश्च पाश्च तेषामितरेतिरयोगद्वन्द्वे शाच्छासाह्वाव्यावेपाः, तेषाम् शाच्छासाह्वाव्यावेपाम्। युकः ककारः इत् अस्ति। अतः य्–इत्येव शिष्यते। कित्त्वात् आद्यन्तौ टकितौ (१.१.४६) इति परिभाषया अन्त्यावयवो भवति इति स्मर्तव्यम्। तथा च सूत्रेणानेन युक्–आगमो विधीयते। सूत्रमिदम् अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इत्यस्यापवादभूतम्।

उदाहरणम् – शाययति , शाययते।

सूत्रार्थसमन्वयः – एवञ्च शा इ इत्यवस्थायां प्रकृतसूत्रेण युकि अनुबन्धलोपे शाय् इ इति जाते समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि गुणे एकारे अयादेशे शाययति, तप्रत्यये तु शाययते इति रूपद्वयं भवति।

भ्वादिगणायात् ओदितः ओ वै शोषणे इति धातोः वायन्तं प्रेरयति इत्यर्थे णिचि आदेच उपदेशेऽशिति (६.१.४५) इति सूत्रेण आत्त्वे वा इ इति स्थिते अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुगागमे प्राप्ते सूत्रमिदमारभ्यते–

[२४.९] वो विधूनने जुक्॥ (७.३.३८)

सूत्रार्थः– वातेर्जुक् स्यात् णौ कम्पेऽर्थे।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। वः (६/१), विधूनने (७/१), जुक् (१/१) इति सूत्रगतपदच्छेदः। सूत्रेऽस्मिन् अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगात् णौ इति पदस्यानुवृत्तिर्भवति। औ वै शोषणे इति धातोः ऐकारस्य आत्त्वे वा इति जाते तस्य षष्ठ्येकवचनान्तं रूपं वः इति। जुकः ककारः इत्संज्ञकः उकारश्च उच्चारणार्थः तस्मात् ज्–मात्रं शिष्यते। अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगस्य अपवादभूतोऽयं योगः। विधूननं कम्पः। एवञ्च कम्पार्थे वैधातोः जुगागमो भवति णिच्प्रत्यये परतः इति सूत्रार्थः फलति। सूत्रेणानेन जुगागमो विधीयते।

उदाहरणम् – वाजयति, वाजयते ।

सूत्रार्थसमन्वयः – एवञ्च वायन्तं प्रेरयति इत्यर्थे वैधातोः ऐकारस्य आत्त्वे प्राप्तं पुगागमं बाधित्वा वो विधूनने जुक इति सूत्रेण जुगागमे अनुबन्धलोपे च वा ज् इ इति जाते प्रथमपुरुषैकवचनविवक्षायां तिपि शपि गुणे एकारे अयादेशे वाजयति इति रूपं सिध्यति, पक्षे वाजयते इत्यपि।

ण्यन्तस्थले कर्त्रभिप्राये क्रियाफले णिचश्च (१.३.७४) इत्यनेन आत्मनेपदं सिद्धमस्ति । किन्तु शेषात् कर्तरि परस्मैपदम् (१.३.७८) इत्यनेन अकर्त्रभिप्राये क्रियाफले परस्मैपदे प्राप्ते तत्रापि आत्मनेपदं भवतु इत्येतदर्थमयं योगः आरभ्यते–

[२४.१०] लियः सम्माननशालीनीकरणयोश्च॥ (१.३.७०)

सूत्रार्थः– लीङ्लियोः ण्यन्तयोः आत्मनेपदं स्यात् अकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे।

सूत्रव्याख्या –विधिसूत्रेऽस्मिन् पदत्रयमस्ति। लियः (५/१), सम्माननशालीनकरणयोः (७/२), च (अव्ययम्) इति सूत्रगतपदच्छेदः। सम्माननं च शालीनीकरणं च सम्माननशालीनीकरणे इति इतरेतरयोगद्वन्द्वः, तयोः सम्माननशालीनीकरणयोः। अनुदात्तङित आत्मनेपदम् (१.३.१२) इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति, णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने (१.३.६७) इत्यतः णौ इत्यस्य चानुवृत्तिर्भवति। किञ्च चकारेण गृधिवञ्च्योः प्रलम्भने (१.३.६९) इत्यतः प्रलम्भने इत्यस्यानुकर्षणं भवति, लियः इत्यनेन लीलिङ्धात्वोः ग्रहणं भवति। अत्र सम्माननम् पूजा, शालीनीकरणम् अभिभवः, प्रलम्भनं वञ्चनम्। एवञ्च पूजाभिभववञ्चनार्थेषु ण्यन्तस्य लियः आत्मनेपदं स्यात् अकर्तृगेऽपि फले । तथा च सूत्रेणानेन आत्मनेपदं विधीयते।

उदाहरणम् – जटाभिः लापयते ।

सूत्रार्थसमन्वयः – प्रलम्भनाभिभवपूजासु लियो नित्यमात्त्वमशिति वाच्यम् इति वार्तिकेन लीधातोः पूजार्थे नित्यम् आत्त्वे णिचि परे च पुगागमे, लापि इत्यवस्थायां णिचश्च (१.३.७४) इत्यनेन उभयपदे प्राप्ते तं बाधित्वा लियः सम्माननशालीनीकरणयोश्च इति योगेन केवले आत्मनेपदे प्रथमपुरुषैकवचनविवक्षायां लटि तप्रत्यये शपि गुणे एकारे अयादेशे लापयते इति रूपं सिध्यति । जटाभिः लापयते – पूजाम् अधिगच्छति इत्यर्थः।

अभिभवार्थे– श्येनो वर्तिकाम् उल्लापयते, अभिभवतीत्यर्थः।

प्रलम्भनार्थे– बालम् उल्लापयते, वञ्चयतीत्यर्थः।

[२४.११] लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने॥ (७.३.३९)

सूत्रार्थः– लीयतेः लातेश्च क्रमात् नुग्लुकौ आगमौ वा स्तः णौ स्नेहद्रवे।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् चत्वारि पदानि सन्ति। लीलोः (६/२), नुग्लुकौ (१/२), अन्यतरस्याम् (सप्तमीविभक्तिप्रतिरूपमकमव्ययम्), स्नेहनिपातने (७/१) इति सूत्रगतपदच्छेदः। ली च ला च इति इतरेतरयोगद्वन्द्वे लीलौ, तयोः लीलोः। स्नेहस्य निपातनम् स्नेहनिपातनम् इति षष्ठीतत्पुरुषः। अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगात् णौ इत्यस्यानुवृत्तिर्भवति , अङ्गस्य (६.४.१) इत्यधिक्रियते। एवञ्च सूत्रार्थस्तावत् – स्नेहद्रवे ली इत्यङ्गस्य, ला इत्यङ्गस्य च यथासङ्ख्यं नुगागमः लुगागमश्च भवति णिचि परतः। नुक् लुक् इत्युभयत्रापि ककारौ इत्संज्ञकौ, उकारौ उच्चारणार्थकौ। अतः क्रमशः न् ल् इत्येव शिष्यते। तथा च सूत्रेणानेन नुग्लुकौ आगमौ विधीयेते।

उदाहरणम् – विलीनयति, विलाययति। विलालयति, विलापयति वा घृतम् इत्यत्र वि – उपसर्गपूर्वकलीधातोः विभाषा लीयतेः (६.१.५१) इत्यनेन विकल्पेन आत्त्वं भवति इति अस्मिन् पक्षे – विपूर्वकात् लीधातोः हेतुमति च (३.१.२६) इति योगेन णिचि आत्त्वे लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने (७.३.३९) इति योगेन लुकि विलालि इति जाते तिपि शपि गुणे एकारे अयादेशे विलालयति - विलालयते इति रूपं भवति, आत्त्वाभावपक्षे तु नुगागमे विलीनयति - विलीनयते इति रूपं सिध्यति।

स्नेहनिपातनार्थभिन्नार्थे तु न नुग्लुकौ भवतः किन्तु पुगागमः। एवञ्च विभाषा लीयतेः (६.१.५१) इत्यनेन आत्त्वविकल्पे अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुकि वि-लापि इत्यस्य धातुसंज्ञायां विलापयति -विलापयते इति रूपं सिध्यति। किञ्च आत्त्वाभावपक्षे णिचि परे ली इत्यस्य ईकारस्य अचो ञ्णिति (७.२.११५) इत्यनेन वृद्धौ ऐकारादेशे आयादेशे वि-लायि इत्यस्य धातुसंज्ञायां विलाययति -विलाययते इति रूपं सिध्यति।

पाठगतप्रश्नाः ३

१४.श्यन्तं प्रेरयति इत्यर्थे किं रूपं भवति।

१५.लियः सम्माननशालीनकरणयोश्च इति सूत्रेण किं विधीयते।

१६.बालमुल्लापयते इत्यस्य कोऽर्थः।

१७.श्येनो वर्तिकामुल्लापयते इत्यस्य कोऽर्थः।

१८.लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने इति शास्त्रव्याख्यानावसरे साकल्येन कति रूपाणि प्रदर्शितानि सन्ति।

१९.वाजयति इत्यत्र मूलधातुः कः, णिजन्तधातुश्च कः।

ण्यन्तधातुभ्यः कर्त्रभिप्रायक्रियाफले णिचश्च (१.३.७४) इत्यनेन आत्मनेपदे सिद्धे अकर्त्रभिप्राये क्रियाफलेऽपि आत्मनेपदं भवति न तु परस्मैपदमिति नियमार्थमिदं सूत्रमारभ्यते–

[२४.१२] भीस्म्योर्हेतुभये (१.३.६८)

सूत्रार्थः – प्रयोजकात् यदि भयस्मयौ गम्येते तर्हि ण्यन्ताभ्यां भीस्मिधातुभ्याम् आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकम्। भीस्म्योः (६/२), हेतुभये (७/१) इति सूत्रगतपदच्छेदः। भीश्च स्मिश्च भीस्मी, तयोः भीस्म्योः। हेतोः भयम् इति पञ्चमीतत्पुरुषे हेतुभयम्, तस्मिन् हेतुभये। अनुदात्तङित आत्मनेपदम् (१.३.१२) इत्यस्मात् आत्मनेपदमनुवर्तते, किञ्च णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने (१.३.६७) इत्यतः णेः इत्यस्यानुवृत्तिर्भवति। एवञ्च पूर्वोक्तसूत्रार्थः फलति। सूत्रे भयग्रहणम् धात्वर्थस्योपलक्षणार्थम्। तेन भयशब्देन स्मयार्थस्यापि ग्रहणं भवति। तथा च सूत्रेणानेन आत्मनेपदं विधीयते।

उदाहरणम् – मुण्डो भापयते।

सूत्रार्थसमन्वयः – बिभ्यन्तं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इत्यनेन भीधातोः णिचि भी इ इति स्थिते बिभेतेर्हेतुभये (६.१.५६) इति योगेन धातोः ईकारस्य स्थाने विकल्पेन आकारादेशे भा इ इति जाते अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुगागमे भापि इति जाते कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्तं किञ्च अकर्त्रभिप्राये क्रियाफले परस्मैपदं प्राप्तमिति उभयत्रापि आत्मनेपदं विहितं भीस्म्योर्हेतुभये (१.३.६८) इति योगेन। एवञ्च भापि इत्यस्मात् लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि गुणे अयादेशे **भापयते** इति रूपं भवति। यदा तु बिभेतेर्हेतुभये (६.१.५६) इत्यनेन आकारादेशो न भवति तस्मिन्पक्षे अग्रिमसूत्रमारभ्यते–

[२४.१३] भियो हेतुभये षुक्॥ (७.३.४०)

सूत्रार्थः – ईकारान्तस्य भियः षुक् आगमः स्यात् णौ हेतुभये।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकम्। भियः (६/१), हेतुभये (७/१) षुक् (१/१) इति सूत्रगतपदच्छेदः। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इत्यतः णौ इत्यनुवर्तते। भी ई इति ईकारः प्रश्लिष्यते। एवञ्च ईकारान्तावस्थायां स्थितस्य भीधातोः षुगागमो भवति णिच्प्रत्यये परे। सूत्रमिदम् अचो ञ्णिति (७.२.११५) इति सूत्रस्य बाधकमस्ति। सूत्रमिदम् भीधातोः आत्तावस्थायां न प्रवर्तते। तथा च सूत्रेणानेन षुगागमो विधीयते।

उदाहरणम् – भीषयते।

सूत्रार्थसमन्वयः – एवञ्च हेतुभयार्थे गम्यमाने भीधातोः हेतुमण्णिचि भी इ इति जाते प्राप्तवृद्धिं बाधित्वा भियो हेतुभये षुक् इत्यनेन षुकि भीषि इति जायते। ततः भीस्म्योर्हेतुभये (१.३.६८) इत्यनेन कर्त्रभिप्रायाकर्त्रभिप्रायक्रियाफले आत्मनेपदं भवति, तेन भीषि इत्यस्मात् आत्मनेपदप्रत्यये प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये शपि गुणे एकारे अयादेशे टित आत्मनेपदानां टेरे (३.४.७९) इत्यनेन टेः एत्त्वे भीषयते इति रूपं भवति। यदि च प्रयोजकात् भयं न प्रतीयते तदा न आत्मनेपदं, न

आत्त्वम्, न वा षुगागमः, आत्त्वाभावे पुगपि न भवति। तेन भी इ इति स्थिते तिपि शपि वृद्धौ आयादेशे भाययति कुञ्चिकया इति सिध्यति इत्येवंक्रमेण रूपत्रयं सिध्यति।

[२४.१४] नित्यं स्मयतेः॥ (६.१.५७)

सूत्रार्थः – स्मयतेः एचः नित्यम् आत्त्वं स्यात् णौ हेतोः स्मये।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। नित्यम् (१/१) स्मयतेः (६/१) इति सूत्रगतपदच्छेदः। आदेच उपदेशेऽशिति (६.१.४५) इत्यतः आत् एच् इत्यनयोः अनुवृत्तिर्भवति। चिस्फुरोर्णौ (६.१.५४) इत्यतः णौ इत्यस्य तथा बिभेतेर्हेतुभये (६.१.५६) इत्यतः हेतुभये इत्यस्य चानुवृत्तिर्भवति। स च हेतुभयशब्दः हेतुस्मयार्थस्यापि उपलक्षणमस्ति। तदनुसारं नित्यं स्मयतेः (६.१.५७) इत्यत्र स्मिधातोः सत्त्वात् हेतुभये इति शब्दस्य हेतुस्मये इत्यर्थो भवति। यतो हि स्मिधातोः भयार्थो भवितुं नार्हति। एवञ्च स्मिधातोः एचः स्थाने नित्यम् आकारादेशो भवति णिच्प्रत्यये परतः। विभाषा लीयतेः (६.१.५१) इत्यतः विभाषापदस्यानुवृत्तिः मास्तु इत्येतदर्थं सूत्रेऽस्मिन् नित्यम् इति पदमुपात्तम्। बिभेतेर्हेतुभये (६.१.५६) नित्यं स्मयतेः (६.१.५७) इति सूत्रद्वयाभ्यां विधीयमानमात्त्वं, भीस्म्योर्हेतुभये (१.३.६८) इत्यनेन विधीयमानमात्मनेपदं च प्रयोजकात् यदि भयं गम्यते तदैव भवति इति स्मर्तव्यम्।

उदाहरणम्– जटिलो **विस्मायते** । विस्मयमानं प्रेरयति इत्यर्थे विपूर्वकात् स्मिङ् ईषद्धसने इति धातोः णिचि वि स्मि इ इति जाते धातोः इकारस्य अचो ञ्णिति (७.२.११५) इत्यनेन वृद्धौ ऐकारे आयादेशे नित्यं स्मयतेः (६.१.५७) इत्यनेन नित्यम् आकारादेशे वि स्मा इ इति जायते। ततः आकारान्तत्वात् अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ इत्यनेन पुगागमे वि स्मापि इति जाते भीस्म्योर्हेतुभये (१.३.६८) इत्यनेन नित्यम् आत्मनेपदे प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये शपि गुणे एकारे विस्मापयते इति रूपं सिध्यति। यदि च हेतोः (प्रयोजकात्) भयं न गम्यते तर्हि नैव नित्यम् आत्मनेपदात्त्वं भवति, आत्त्वाभावे च न पुगागमः तेन स्माययति, स्मायते कुञ्चिकया एनम् इति प्रयोगो भवति।

षिधु संराद्धौ इति दिवादिगणीयधातोः सिध्यन्तं प्रेरयतीत्यर्थे णिचि सिध् इ इति स्थिते उपधागुणे सेध् इ इति जाते अग्रिमसूत्रमारभ्यते–

[२४.१५] सिध्यतेरपारलौकिके॥ (६.१.४९)

सूत्रार्थः – ऐहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरेच आत्त्वं स्याण्णौ।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकस्ति। सिध्यतेः (६/१), अपारलौकिके (७/१) इति सूत्रगतपदच्छेदः। आदेच उपदेशेऽशिति (६.१.४५) इत्यतः आत् एचः इत्यनयोः, क्रीङ्जीनां णौ

इत्यतश्च णौ इत्यस्यानुवृत्तिर्भवति। एवञ्च परलोकासम्बन्ध्यर्थे अर्थात् इहलोकार्थे विद्यमाने सिध्–धातोः एचः स्थाने आकारादेशो भवति णिचि परे इति सूत्रार्थः। सूत्रेणानेन आत्त्वं विधीयते।

उदाहरणम् – अन्नं **साधयति**, निष्पादयीत्यर्थः।

सूत्रार्थसमन्वयः – तथा च सेध् इ इत्यत्र उपधाभूतस्य एकारस्य स्थाने आकारादेशो भवति अपारलौकिकार्थस्य गम्यमानत्वात् सिध्यतेरपारलौकिके (६.१.४९) इत्यनेन। तथा च साधि इत्यस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचविवक्षायां तप्रत्यये शपि गुणे एकारे अयादेशे साधयते, तिपि तु साधयति इति रूपं सिध्यति।

यदि च पारलौकिकार्थस्य प्रतीतिर्भवति तदा नास्य सूत्रस्य प्रवृत्तिर्भवति तेन सेधयते इत्येव रूपम्। तथा च प्रयोगः– तापसः सिध्यति तत्त्वं निश्चिनोति। तं प्रेरयति सेधयति तापसं तपः।

दुष वैकृत्ये इति दिवादिगणीयधातोः दुष्यन्तं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इत्यनेन णिचि दुष् इ इति जाते पुगन्तलघूपधस्य च (७.३.८६) इत्यनेन लघूपधागुणे प्राप्ते सूत्रमिदमारभ्यते–

[२४.१६] दोषो णौ (६.४.९०)।

सूत्रार्थः – दुष्धातोः उपधायाः स्थाने ऊत् इत्यादेशो णिच्प्रत्यये परतः।

सूत्रव्याख्या –विधिसूत्रमिदं पदद्वयात्मकमस्ति। दोषः (६/१), णौ (७/१) इति सूत्रगतपदच्छेदः। दोषः दुष्धातोः लघूपधगुणनिर्देशः। ऊदुपधाया गोहः (६.४.८९) इत्यतः ऊत् , उपधायाः इत्यनयोरनुवृत्तिर्भवति। एवञ्च सूत्रार्थः सिध्यति। सूत्रेणानेन ऊदादेशो विधीयते।

उदाहरणम् – दूषयते, दूषयति।

सूत्रार्थसमन्वयः – तथा च दुष्धातोः णिचि लघूपधगुणे प्राप्ते तं बाधित्वा दोषो णौ इत्यनेन उपधाभूतह्रस्व–उकारस्य स्थाने दीर्घ–ऊकारे दूषि जाते ततः तिपि शपि गुणे एकारे अयादेशे दूषयति , तप्रत्यये तु दूषयते इति रूपम् इत्याहत्य रूपद्वयं सिध्यति।

चित्तविरागार्थे तु विकल्पेन अयम् ऊदादेशो भवति। तेन चित्तं दूषयति, दोषयति वा कामः इत्यत्र तु चित्तविरागार्थोऽस्ति इति हेतोः वा चित्तविरागे (६.४.९१) इत्यनेन विकल्पेन दुष्धातोः उपधायाः स्थाने उकास्य ऊत् इति दीर्घादेशे दूषयति इति रूपं सिध्यति, यदा तु न ऊदादेशः तदा दुष्धातोः णिचि दुष् इ इति जाते गुणे ओकारे तिपि शपि गुणे अयादेशे दोषयति इति रूपं भवति इति साकल्येन रूपद्वयं सिध्यति।

अदादिगणीयात् इण् गतौ इति धातोः अयन्तं प्रेरयति इत्यर्थे णिचि इ इ इति जाते सूत्रमिदमारभ्यते –

[२४.१७] णौ गमिरबोधने॥ (२.४.४६)।

सूत्रार्थः – अबोधनार्थे गम्यमाने इण्धातोः स्थाने गमि इत्यादेशो भवति णिचि परे।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। णौ (७/१), गमिः (१/१), अबोधने (७/१) इति सूत्रगतपदच्छेदः। न बोधनम् इति नञ्तत्पुरुषे अबोधनम् , तस्मिन् अबोधने। इणो गा लुङि (२.४.४५) इत्यतः इणः इति पदमनुवर्तते। तेन सूत्रार्थः सिध्यत्येव। गमेः इकार उच्चारणार्थः, गम्मात्रं शिष्यते। बोधनार्थे अयमादेशो न भवति इति धेयम्। तथा च सूत्रेणानेन गमि इत्यादेशो विधीयते।

उदाहरणम् – गमयति।

सूत्रार्थसमन्वयः – तथा च इण्धातोः णिचि णौ गमिरबोधने इत्यनेन गमि इत्यादेशे अनुबन्धलोपे च गम् इ इति जायते। ततः अत उपधायाः (७.२.११६) इत्यनेन उपधाभूतस्य अकारस्य वृद्धौ जनीजृष्क्नसुरञ्जोऽमन्ताश्च इति गणसूत्रेण मित्संज्ञायां मिद्वद्भावे वा मितां ह्रस्वः (६.४.९२) इत्यनेन उपधाभूतस्य आकारस्य ह्रस्वे गमि इत्यस्यैव सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां तिपि शपि गुणे एकारे अयादेशे गमयति इति रूपं सिध्यति, पक्षे गमयते इत्यपि भवति।
बोधनार्थे तु नायमादेशः तेन प्रत्याययति इत्येव रूपम्, पक्षे प्रत्याययते इत्यपि भवति।

नित्यमधिपूर्वकात् इङ् अध्ययने इति अदादिगणीयधातोः अधीयमानं प्रेरयति इत्यर्थे हेतुमति च (३.१.२६) इति णिचि अधि इ इ इति स्थिते अग्रिमसूत्रमिदमारभ्यते–

[२४.१८] क्रीङ्जीनां णौ (६.१.४८)।

सूत्रार्थः – क्री–इङ्–जिधातुभ्यः एचः स्थाने आकारादेशो भवति णिचि परतः।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। क्रीङ्जीनाम् (६/३) , णौ (७/१) इति सूत्रगतपदच्छेदः। क्रीश्च इङ् च जिश्च तेषामितरेतरयोगद्वन्द्वे क्रीङ्जयः तेषां क्रीङ्जीनाम्। आदेच उपदेशेऽशिति (६.१.४५) इत्यस्मात् आत्, एचः इति पदद्वयस्यानुवृत्तिर्भवति। एवं सूत्रार्थः सिध्यति।

उदहरणम् – अध्यापयति।

सूत्रव्याख्या – एवञ्च अधिपूर्वकात् इङ्धातोः णिचि अधि इ इ इति स्थिते धातोः इकारस्य क्रीङ्जीनां णौ इत्यनेन आत्त्वे अधि आ इ इति जाते अर्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (७.३.३६) इति योगेन पुगागमे अनुबन्धलोपे अधि आपि इति जाते ततः यणि अध्यापि इति समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि गुणे एकारे तस्य च अयादेशे अध्यापयति इति रूपं सिध्यति, पक्षे अध्यापयते इत्यपि भवति।

एवमेव क्रीणन्तं क्रयमाणं वा प्रेरयति इत्यर्थे डुक्रीञ् द्रव्यविनिमये इति धातोः णिचि आत्त्वे पुगागमे तिपि शपि गुणे एकारे अयादेशे क्रापयति इति रूपं सिध्यति, पक्षे क्रापयते इत्यपि भवति। जि जये धातोः जयन्तं प्रेरयति इत्यर्थे णिचि आत्त्वे पुगागमे तिपि शपि गुणे एकारे अयादेशे जापयति इति रूपं सिध्यति, पक्षे जापयते इत्यपि भवति।

बोधसौकर्याय अत्र कानिचित् णिजन्तरूपाणि लटि लुङि च अधः तालिकया प्रदर्श्यन्ते –

धातुः	ण्यन्तार्थः	सामान्यरूपाणि	णि.लटि रूपाणि	णि.लुङि.रूपाणि
अद्	खिलाना	अत्ति	आदयति	आदिदत्
कृ	कराना	करोति	कारयति	अचीकरत्
क्री	खरीदवाना	क्रीणाति	क्रापयति	अचिक्रपत्
क्रीड्	खेलाना	क्रीडति	क्रीडयति	अचिक्रीडत्
खाद्	खिलाना	खादति	खादयति	अचीखदत्
गम्	भिजवाना	गच्छति	गमयति	अजीगमत्
ग्रह्	ग्रहण करवाना	गृह्णाति	ग्राहयति	अजिग्रहत्
चल्	चलाना	चलति	चालयति	अचीचलत्
जन्	पैदा करना	जायते	जनयति	अजीजनत्
जीव्	जिलाना	जीवति	जीवयति	अजिजीवत्
ज्ञा	बोध करना	जानाति	ज्ञापयति	अजिज्ञपत्
तुष्	प्रसन्न करना	तुष्यति	तोषयति	अतूतुषत्
त्यज्	छुडाना	त्यजति	त्याजयति	अतित्यजत्
दा	दिलवाना	ददाति	दापयति	अदीदपत्
दृश्	दिखाना	पश्यति	दर्शयति	अदीदृशत्
नम्	झुकाना	नमति	नामयति	अनीनमत्
नश्	नष्ट कराना	नश्यति	नाशयति	अनीनशत्
पच्	पकवाना	पचति	पाचयति	अपीपचत्
पठ्	पढाना	पठति	पाठयति	अपीपठत्
पा	पिलाना	पिबति	पाययति	अपीपबत्
पुष्	पुष्ट करना	पुष्यति	पोषयति	अपूपुषत्
बोध्	बोध कराना	बुध्यति	बोधयति	अबूबुधत्
मिल्	मिलाना	मिलति	मेलयति	अमीमिलत्
मुद्	प्रसन्न करना	मोदते	मोदयति	अमूमुदत्

यज्	यज्ञ करवाना	यजति	याजयति	अयीयजत्
युज्	मिलवाना	युनक्ति	योजयति	अयूयुजत्
रुद्	रुलाना	रोदिति	रोदयति	अरूरुदत्
लभ्	प्राप्त कराना	लभते	लम्भयति	अललम्भत्
लिख्	लिखाना	लिखति	लेखयति	अलीलिखत्
वच्	कहलवाना	वक्ति	वाचयति	अवीवचत्
वस्	वास कराना	वसति	वासयति	अवीवसत्
वृध्	बढाना	वर्धते	वर्धयति	अवीवृधत्
शी	सुलाना	शेते	शाययति	अशीशयत्
श्रु	सुनाना	श्रृणोति	श्रावयति	अशुश्रवत्
स्मृ	स्मरण करना	स्मरति	स्मारयति	असस्मरत्
हन्	मरवाना	हन्ति	घातयति	अजीघतत्
हस्	हसाना	हसति	हासयति	अजीहसत्

पाठगतप्रश्नाः-४

२०.भापयते इत्यत्र आत्त्वं कुतः।

२१.सिध्यतेरपारलौकिके इत्यस्य उदाहरणं किम्।

२२.दुष्यन्तं प्रेरयति इत्यर्थे णिचि किं रूपम्।

२३.इण् गतौ धातोः अबोधनार्थे बोधनार्थे च णिचि किं रूपम्।

२४.अधीयमानं प्रेरयति इत्यर्थे किं रूपं भवति।

२५.क्रापयति इत्यस्य कोऽर्थः इति लिखत।

२६.नित्यं स्मयतेः (६.१.५७) इत्यस्य किम् उदाहरणम्।

२७.विस्माययति कुञ्चिकया एनम् इत्यादौ कुतो न नित्यम् आत्त्वम्।

पाठसारः

समासेन अस्य पाठस्य मुख्यविषयः अत्र उपन्यस्यते। भ्वादितः चुरादिं यावत् ये धातवः वर्तन्ते तेषां भूवादयो धातवः (१.३.१) इत्यनेन धातुसंज्ञा भवति। ते धातवः दशसु गणेषु विभक्ताः सन्ति इति हेतोः ते दशगणीया धातवः इत्युच्यन्ते। तेभ्य एव धातुभ्यो प्रेरणार्थे णिच्प्रत्यये कृते सति तेषां नूतनानां शब्दानां धातुसंज्ञा सनाद्यन्ता धातव (३.१.३२)इत्यनेन भवति इति पार्थक्यं सम्यक् अवधेयम्। अपरञ्च णिच्प्रत्ययः स्वार्थ–प्रेरणार्थभेदेन द्विविधोऽस्ति। अत्र तु स्वार्थकणिच् नैव चर्चाविषयः, अपि तु प्रेरणार्थक एव इत्यपि सम्यक् ज्ञेयम्। किञ्च णिच्प्रत्ययः नित्य एव भवति इत्येवं नियमो नास्ति। अतः पक्षे वाक्यमपि साधु भवति। तस्मात् पठ्धातोः णिच्प्रत्यये यथा पाठयति इति पदं साधु तथैव पठितुं प्रेरयति इति वाक्यमपि साधु। अस्मिन् पाठे आदौ णिच्प्रत्ययान्तरूपं कथं निष्पद्यते इति ससूत्रं प्रदर्श्य णिजन्तधातोः लुङि विशेषाय ओः पुयण्ज्यपरे इति योगो व्याख्यातः। ततः पुक्–युक्–जुक्–आगमविधायकसूत्राणि सोदाहरणं व्याख्यातानि। ततः णिच्परे सति कदाचित् धातोः उपाधायाः दीर्घो भवति, कदाचिद्वा उपधायाः ह्रस्वो भवति, कदाचिच्च उपधाया ऊत्त्वं भवति इत्यादिविषयाः तत्तत्सूत्राणाम् तत्तदुदाहरणेषु प्रदर्शिताः सन्ति। ततः ली–लाधात्वोः विषये , भी–स्मिधात्वोः विषये च दीर्घचर्चा विहिता। ततः साधयति, दूषयति, अध्यापयति, वाजयति, गमयति इत्येतेषां अस्मद्व्यवहृतशब्दानां प्रक्रिया अपि तत्तत्सूत्रेषु प्रदर्शिताः सन्ति।

पाठान्तप्रश्नाः

१. भावयति इति रूपं साधयत।

२. तनोर्यकि इति सूत्रं सोदाहरणं व्याख्यात।

३. ओः पुयण्ज्यपरे इति योगो व्याख्येयः।

४. णौ च संश्चङोः इति शास्त्रं व्याख्यात।

५. क्रीङ्जीनां णौ इति न्यासस्य उदाहरणानां प्रक्रियाः प्रदर्शनीयाः।

६. गमयति इति रूपं ससूत्रं व्याख्यात।

७. भीधातुरूपविषये टिप्पणी लेखनीया।

८. सिध्यति इति रूपं साधयत।

९. दोषो णौ इति सूत्रस्थोदाहरणानि विशदीकरणीयानि।

१०. पाठप्रदर्शितलीलाधातुरूपविषये टिप्पणी लेखनीया।

११. स्तम्भयोः स्थितान् परस्परसम्बद्धान् मेलयत।

	क-स्तम्भः		ख-स्तम्भः

१	तत्प्रयोजको हेतुश्च	a	उपधाह्रस्वः
२	क्रीङ्जीनां णौ	b	तायते
३	प्रत्याययति	c	बोधयति
४	भीस्म्योर्हेतुभये	d	उभयपदविधानम्
५	शाच्छासाह्वाव्यावेपां युक्	e	शाययति
६	शालीनीकरणम्	f	उपधावृद्धिनिषेधः
७	नोदात्तोपदेशस्य मान्तस्यानाचामेः	g	अभिभवः
८	तनोर्यकि	h	आत्मनेपदम्
९	मितां ह्रस्वः	i	अध्यापयति
१०	णिचश्च	j	कर्तृसंज्ञा

पाठगतप्रश्नानामुत्तराणि

उत्तराणि–१

१. आम्, भवति।

२. कर्तुः प्रयोजकस्य।

३. प्रेरणार्थे।

४. आम्, भवति।

५. प्रयोजककर्तुः व्यापारः।

६. परस्मैपदात्मनेपदविधानं भवति।

७. सनि परे यदङ्गं तदवयवाभ्यासस्योकारस्य इत् स्यात् पवर्ग–यण्–जकारेषु अवर्णपरेषु परतः।

८. अबीभवत्।

उत्तराणि–२

९. चङ्परके णौ परे सति स्थाधातोः उपधायाः इकारादेशो भवति।

१०. पुगागमः।

११. मितां ह्रस्वः।

१२. घटादीनां ज्ञपादीनां चोपधायाः ह्रस्वः स्याण्णौ।

१३. ज्ञप मिच्च इति निर्देशात्।

उत्तराणि – ३

१४. शाययति, शाययते।

१५. आत्मनेपदम्।

१६. बालं वञ्चयति।

१७. श्येनः वर्तिकाम् अभिभवति।

१८. अष्टौ।

१९. ओ वै शोषणे इति मूलधातुः, वाजि इति णिजन्तधातुः।

उत्तराणि – ४

२०. बिभेतेर्हेतुभये (६.१.५६)।

२१. अन्नं साधयति, निष्पादयतीत्यर्थः।

२२. दूषयति, दोषयति।

२३. अबोधनार्थे-गमयति। बोधनार्थे तु प्रत्याययति।

२४. अध्यापयति।

२५. क्रीणन्तं क्रयमाणं वा प्रेरयति।

२६. जटिलो विस्मायते ।

२७. हेतोः भयं न गम्यते इति कारणात्।

स्तम्भप्रश्नानाम् सूचकोत्तराणि –

१०.१-j, २-i, ३-c, ४-h, ५-e, ६-g, ७-f, ८-b, ९-a, १०-d

॥इति चतुर्विंशः पाठः ॥

२५

346sk25

सन्नन्तप्रकरणम्

प्रस्तावना

सन् इति एकः प्रत्ययः। सन् अन्ते यस्य धातोः स धातुः सन्नन्तो भवति । तेषां धातूनां प्रकरणम् व्याकरणे सन्नन्तप्रकरणम् इति शब्देन व्यवह्रियते। सन्नन्तधातुः भ्वादिधातुभ्यः पृथक् कश्चित् धातुः नास्ति, अपि तु भ्वादितः चुरादिं यावत् ये दशगणीया धातवो वर्तन्ते तेभ्य एव परं यदा इच्छार्थे सन्प्रत्ययो भवति तदा ते एव धातवः सन्नन्तरूपतां लभन्ते। तेषां च सन्नन्तशब्दानां सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। यथा पठ व्यक्तायां वाचि इति भ्वादिगणीयो धातुः वर्तते, तस्मात् धातोः परं यदा सन्प्रत्ययो भवति तदा सः पिपठिष इति नूतनरूपतां लभते, स च सन्नन्तधातुरित्युच्यते। एवञ्च पिपठिष इति सन्नन्तस्य धातुसंज्ञा सनाद्यन्ता धातव (३.१.३२) इत्यनेन भवति, तस्य मूलस्य पठ् इत्यस्य तु भूवादयो धातव (१.३.१) इत्यनेन धातुसंज्ञा इति पार्थक्यं सम्यक् विज्ञेयम्।

उद्देश्यानि

इमं पाठं पठित्वा भवान् –

- सन्नन्तधातोः कथं निष्पत्तिर्भवति इति ज्ञास्यति।
- सन्प्रत्ययविधायकसूत्रस्य अर्थमधिगमिष्यति।
- पिपठिषतीति रूपसिद्धिं ज्ञास्यति तज्ज्ञात्वा च अन्यदपि रूपं साधयितुं शक्ष्यति।
- सनि परतः तत्तत्स्थलेषु कानिचित् विशेषकार्याणि भवन्ति, तज्ज्ञास्यति।
- लोकव्यवहारोपयोगिशब्दानां प्रक्रिया अपि तत्तत्सूत्रेषु दत्ताः सन्ति, तज्ज्ञास्यति।

[२५.१] सनाद्यन्ता धातवः॥ (३.१.३२)

सूत्रार्थः– सनादयः णिङन्ताः प्रत्ययाः अन्ते येषां ते धातुसंज्ञकाः भवन्ति।

सूत्रव्याख्या– संज्ञासूत्रेऽस्मिन् पदद्वयमस्ति। सनाद्यन्ताः (१/३), धातवः (१/३) इति सूत्रगतपदच्छेदः। सन् आदिः येषां ते सनादयः इति बहुव्रीहिसमासः। सनादयः अन्ते येषां ते सनाद्यन्ताः इति बहुव्रीहिसमासः।

सन्–क्यच्–काम्यच्–क्यङ्–क्यषोऽथाचारक्विब्–णिज्–यङस्तथा।

यगायेयङ्–णिङ् चेति द्वादशाऽमी सनादयः।।

सन् क्यच् काम्यच् क्यङ् क्यष् आचारक्विप् णिच् यङ् यक् आय ईयङ् णिङ् इति एषाम् आदिः सन् अस्ति। अतः एते सनादयः। एते यस्य अन्ते भवन्ति स सनाद्यन्तः भवति। यथा कमेर्णिङ् इति सूत्रेण कम्–धातुतः णिङ् प्रत्ययः विधीयते। तदा कम्+णिङ् इति जाते प्रक्रियया कामि इति शब्दः निष्पद्यते। अस्य अन्ते णिङ् अस्ति। अतः अयं सनाद्यन्तः शब्दः। तस्य अनेन सूत्रेण धातुः इति संज्ञा विधीयते। सनादयः णिङन्ताः प्रत्ययाः अन्ते येषां ते धातुसंज्ञकाः भवन्तीति सूत्रस्यास्यार्थः।

[२५.२] धातोः कर्मणः समानकर्तृकादिच्छायां वा॥ (३.१.७)

सूत्रार्थः– इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पञ्च पदानि सन्ति। धातोः (५/१), कर्मणः (५/१), समानकर्तृकात् (५/१), इच्छायाम् (७/१), वा (अव्ययम्) इति सूत्रगतपदच्छेदः। समानः कर्ता यस्य सः समानकर्तृकः इति बहुव्रीहिसमासः, तस्मात् समानकर्तृकात्। गुप्तिज्किद्भ्यः सन् (३.१.५) इत्यतः सन् इति पदम् अनुवर्तते।

इष्–धातोः अर्थः इच्छा, अतः इष्–धातुः इच्छार्थकोऽस्ति। तस्य च इष्धातोः कर्म अस्ति यो धातुः अर्थात् इच्छार्थक–इष्धातुकर्मीभूतात् धातोः, किञ्च इच्छायाः यः कर्ता सैव कर्ता यस्य धातोः, तादृशधातोः अर्थात् इच्छासमानकर्तृकात् धातोः परं सन्प्रत्ययो भवति इच्छार्थे। स च प्रत्ययो विकल्पेन विधीयते। एवञ्च कस्माच्चित् धातोः परं तदैव सन्प्रत्ययो भवति यदा इमौ विषयौ तत्र वर्तेयाताम्। प्रथमं हि यस्माद्धातोः परं सन्प्रत्ययो भवति अवश्यमेव स धातुः इष्धातोः कर्म भवेत्। अपरं तु इष्–धातोः यः कर्ता सैव कर्ता इष्धातुकर्मीभूतधातोरपि भवेत्। पश्यतु – देवदत्तः पठितुम् इच्छति इत्यत्र इष्धातोः यः कर्ता (देवदत्तः) सैव कर्ता पठ्धातोरपि। किञ्च, पठ्धातुः इष्धातोः कर्मापि अस्ति। अतः पठ्धातोः सन्प्रत्ययो विधीयते चेत् पिपठिषति इति रूपं भवति। सूत्रेऽस्मिन् विकल्पार्थकवा–ग्रहणात् विकल्पेन सन् प्रत्ययो विधीयते अतः सन्प्रत्ययाभावे पठितुम् इच्छति इति वाक्यमपि साधु भवति।

उदाहरणम् – पिपठिषति।

सूत्रार्थसमन्वयः – पठितुम् इच्छति इति विग्रहे पठ्धातोः धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सूत्रेण सन्प्रत्ययो भवति। यतः इष्धातोः यः कर्ता सैव कर्ता पठ्धातोरपि अस्ति किञ्च पठ्धातुः इष्धातोः कर्मापि अस्ति। ततः सनः नकारस्य हलन्त्यमिति सूत्रेण इत्संज्ञायां तस्य लोपः इत्यनेन लोपे पठ् स इति जाते धातोः इत्यधिकारे सन्प्रत्ययस्य पठितत्वात् धातोः विहितत्वात् च आर्धधातुकं शेषः इत्यनेन सनः आर्धधातुकत्वे आर्धधातुकस्येड्वलादेः इत्यनेन इडागमे अनुबन्धलोपे च पठ् इस इति जाते अग्रिमसूत्रमारभ्यते–

[२५.३] सन्यङोः॥ (६.१.९)

सूत्रार्थः – सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तः अजादेस्तु द्वितीयस्य।

सूत्रव्याख्या – विधिसूत्रमिदं एकपदात्मकमस्ति। सन्यङोः इति षष्ठीद्विवचनान्तम्। सन् च यङ् च तयोः इतरेतरयोगद्वन्द्वे सन्यङौ, तयोः सन्यङोः। एकाचो द्वे प्रथमस्य इति अजादेर्द्वितीयस्य इति च सूत्रे अधिक्रियेते। सन् यङ् इत्युभौ प्रत्ययौ। अतः प्रत्ययग्रहणे तदन्ता ग्राह्याः इति नियमेन सन् इत्यनेन सन्नन्तं गृह्यते, यङ् इत्यनेन च यङन्तं गृह्यते। सन्नन्तस्य यङन्तस्य च प्रथम-एकाच्-भागस्य द्वित्वं भवति यदि धातुः अजादिर्भवति तर्हि द्वितीय-एकाच्-भागस्य द्वित्वं भवति इति सूत्रस्य अर्थः। अर्थात् हलादिधातुषु प्रथमैकाचो द्वित्वं भवति, अजादिधातुषु तु द्वितीयैकाचो द्वित्वम् इति पार्थक्यम्। एवञ्च सूत्रेणानेन द्वित्वं विधीयते।

अत्र विशेषः – सन्नन्तरूपस्य कृते आदौ सन्प्रत्ययस्य निर्णयः करणीयः। ततः इड्विषये चिन्ता कार्या। यदि मूलधातुः सेट् भवति तर्हि इड्भवति। अन्यथा न। सन् आर्धधातुकप्रत्यय इति न विस्मर्तव्यम्। इड्विधानात्परं सन्नन्तसमुदायस्य धातुसंज्ञां कृत्वा द्वित्वविधानं मुख्यं कार्यम्। यदि मूलधातुः परस्मैपदी भवति तर्हि सन्नन्तात् परमपि परस्मैपदमेव भवति। किञ्च यदि मूलधातुः आत्मनेपदी भवति तदा सन्नन्तात् परमपि आत्मनेपदमेव भवति।

उदाहरणम् – पिपठिषति।

सूत्रार्थसमन्वयः – तथा च पठ् इ स इति स्थिते सन्यङोः इत्यनेन प्रथमैकाचः पठ् इत्यस्य द्वित्वं भवति। यतः पठ्धातुः हलादिः अस्ति। ततः पठ् पठ् इ स इति जाते पूर्वोऽभ्यास इत्यनेन प्रथमस्य पठ् इत्यस्य अभ्याससंज्ञायां हलादिः शेषः इत्यनेन हलादिशेषे अर्थात् प्रथमठकारस्य लोपे पपठ् इस इति जायते। ततः सन्यतः इत्यनेन अभ्याससंज्ञकप्रथम-पकारात् परस्य अकारस्य इकारादेशे पिपठ् इ स इति जाते द्वितीय-इकारात् परस्य सकारस्य आदेशप्रत्यययोः इत्यनेन षत्वे पिपठ इ ष इति जाते वर्णसम्मेलने च पिपठिष इति जायते। ततः अस्य समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। ततः लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिपि शपि अनुबन्धलोपे पिपठिष अ ति इति स्थिते अतो गुणः इत्यनेन पररूपे पिपठिषति इति रूपं सिध्यति। एवमेव भवितुम् इच्छति इत्यर्थे बुभूषति इत्यादिरूपं साधयितुं शक्यति।

अत्तुम् इच्छति इत्यर्थे अद्-धातोः सन्प्रत्यये लुङ्सनोर्घस्लृ इत्यनेन घस्लृ इत्यादेशे घस् स इति स्थिते सूत्रमिदं प्रस्तूयते-

[२५.४] सः स्यार्धधातुके॥ (७.४.४९)

सूत्रार्थः – सस्य तः स्यात् सादावार्धधातुके।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। सः (६/१), सि (७/१) आर्धधातुके (७/१) इति सूत्रगतपदच्छेदः। अच उपसर्गात्तः इत्यतः तः इत्यस्यानुवृत्तिर्भवति। तकारात् अकारः उच्चारणार्थः। सि इति आर्धधातुके इत्यस्य विशेषणमस्ति। अतः यस्मिन् विधिस्तदादावल्ग्रहणे इति

परिभाषया तदादिविधौ सकारादौ आर्धधातुके इत्यर्थो लभ्यते। एवञ्च सकारादौ आर्धधातुके परे सकारस्य स्थाने तकारादेशो भवति इति सूत्रार्थः फलति।

उदाहरणम् – जिघत्सति।

सूत्रार्थसमन्वयः – एवञ्च घस् स इत्यत्र आर्धधातुकः सकारो विद्यमानः। अतः प्रकृतसूत्रेण सकारस्य स्थाने तकारादेशे घत्स इति भवति। ततः प्रथम–एकाज्भागस्य सन्यङोः इत्यनेन द्वित्वे घत् घत् स इति जायते। ततः हलादिशेषे घ घत् स इति जाते प्रथमघकारस्य चर्त्वे झकारे अभ्यासे चर्च इत्यनेन जश्त्वे जकारे सन्यतः इत्यनेन जकारात् परस्य अकारस्य इत्वे जिघत्स इति जायते। ततः लटि तिपि शपि पररूपैकादेशे जिघत्सति इति रूपं सिध्यति।

कर्तुम् इच्छति इत्यर्थे डुकृञ् करणे इति धातोः धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सूत्रेण सन्प्रत्यये कृ स इति स्थिते सनः आर्धधातुकत्वात् इडागमे प्राप्ते तं बाधते एकाच उपदेशेऽनुदात्तात् इति योगः। ततः दीर्घविधानार्थं शास्त्रमिदमारभ्यते –

[२५.५] अज्झनगमां सनि॥ (६.४.१६)

सूत्रार्थः – अजन्तानां हन्तेरजादेशगमेश्च दीर्घो झलादौ सनि।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। अज्झनगमाम् (६/३), सनि (७/१) इति सूत्रगतपदच्छेदः। अच् च हन् च गम् च तेषामितरेतरयोगद्वन्द्वे अज्झनगमः, तेषाम् अज्झनगमाम्। नोपधाया इत्यतः उपधाया इति पदस्य, अनुनासिकस्य क्विझलोः क्ङिति इत्यतः झलि इत्यस्य, ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यतः दीर्घ इति पदस्य च अनुवृत्तिर्भवति। अङ्गस्य इत्यधिक्रियते। अच् इति अङ्गस्य विशेषणं भवति इत्यतः तदन्तविधौ अजन्तस्य अङ्गस्य इत्यर्थो लभ्यते। झलि इति सनि इत्यस्य विशेषणम्। अतः तदादिविधौ झलादौ सनि इत्यर्थो भवति। इङश्च इत्यनेन विहितस्य अजादेशस्य गम्–धातोरेव स्वीकारः न तु गम्लृ गतौ इति धातोः। यत्र दीर्घादिः विधीयते तत्रैव अचश्च इति परिभाषया अचः स्थाने इत्यर्थो लभ्यते। अनुवृत्त्या लब्धस्य उपधायाः इत्यस्य हन्–गम्–धातुभ्यामेव सह अन्वयो भवति न तु अचा सह, यतो हि अजन्तधातुषु दीर्घयोग्यः उपधावर्णो नास्ति। एवञ्च सूत्रार्थस्तावत् – अजन्तधातोः, हन्धातोः किञ्च अजादेशगम्धातोः अचः स्थाने दीर्घ आदेशो भवति झलादौ सनि परे।

उदाहरणम् – चिकीर्षति।

सूत्रार्थसमन्वयः – एवञ्च कृ स इत्यत्र इण्निषेधे सन् झलादिरस्ति किञ्च अत्र कृ इति अजन्तम् अङ्गम् अपि अस्ति। अतः प्रकृतसूत्रेण दीर्घे कृ स इति जायते।

एवञ्च कृ स इति स्थिते सनः आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते सूत्रमिदमारभ्यते–

[२५.६] इको झल्॥ (१.२.९)

सूत्रार्थः – इगन्ताज्झलादिः सन् कित् स्यात्।

सूत्रव्याख्या – अतिदेशसूत्रमिदं पदद्वयात्मकम्। इकः (५/१), झल् (१/१) इति सूत्रगतपदच्छेदः। असंयोगाल्लिट्कित् इत्यतः कित् इति पदस्य , रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इत्यतः सन् इति पदस्य चानुवृत्तिर्भवति। सन्प्रत्ययः धातोरेव विधीयते अतः सन् इत्यनेन धातुः आक्षिप्यते। आक्षिप्तस्य च धातोः इति विशेष्यस्य विशेषणम् इकः इति । ततः तदन्तविधौ इगन्तात् धातोः इत्यर्थो लभ्यते। किञ्च झल् इत्यस्य विशेषणं सन् इति। अतः तदादिविधौ झलादौ सनि इत्यर्थो लभ्यते। एवञ्च इगन्तधातोः परस्य झलादिसन्प्रत्ययस्य किद्वद्भावो भवति इति सूत्रार्थः। तथा च सूत्रेणानेन किद्वद्भावो विधीयते। किद्वद्भावस्य तु प्रयोजनं गुणनिषेधः।

उदाहरणम् – चिकीर्षति।

सूत्रार्थसमन्वयः – एवञ्च कृ स इति स्थिते प्रकृतसूत्रेण कित्त्वं भवति। यतो हि कृ इति इगन्तधातुः अस्ति। किञ्च स इति झलादिः सन् अस्ति। तथा च कित्त्वात् क्ङिति च इत्यनेन गुणनिषेधे ऋत इद्धातोः इत्यनेन ऋकारस्य इत्त्वे रपरत्वे हलि च इत्यनेन उपधादीर्घे आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे कीर्ष इति जायते। ततः सन्यङोः इत्यनेन सन्नन्तधातोः प्रथमैकाचः कीर् इत्यस्य द्वित्वे हलादिशेषे ह्रस्वे कुहोश्चुः इत्यनेन ककारस्य स्थाने चवर्गादेशे चकारे चिकीर्ष इति सन्नन्तरूपं भवति। ततः सनाद्यन्ता धातव (३.१.३२) इत्यनेन तस्य धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपे चिकीर्षति इति रूपं सिध्यति।

कर्त्रभिप्राये क्रियाफले तु आत्मनेपदप्रत्यये चिकीर्षते इति रूपं भवति।

पाठगतप्रश्नाः-१

१. पिपठिषति इत्यत्र मूलधातुः कः सन्नन्तधातुश्च कः।

२. पिपठिषति इत्यत्र सन्नन्तस्य धातुसंज्ञा केन भवति।

३. सन्प्रत्ययः कस्मिन्नर्थे भवति।

४. सन्धातुः किं नित्यं भवति।

५. पिपठिषति इत्यस्य इत्यस्य कोऽर्थः।

६. सः स्यार्धधातुके इत्यस्य उदाहरणं किम्।

७. चिकीर्षति इति दीर्घः केन।

८. सनः किद्वद्भावस्य एकं प्रयोजनं लिखत।

९. के सनादयः इति लिखत।

१०. भवितुमिच्छति इत्यर्थे किं रूपं भवति।

भवितुम् इच्छति इत्यर्थे भूधातोः सन्प्रत्यये भू स इति स्थिते भूधातुः ऊदन्तत्वात् सेट् अस्ति इति कृत्वा सनः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्येन इडागमे प्राप्ते निषेधसूत्रमिदमारभ्यते –

[२५.७] सनि ग्रहगुहोश्च॥ (७.२.१२)

सूत्रार्थः – ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात्।

सूत्रव्याख्या – निषेधसूत्रमिदं पदत्रयात्मकम्। सनि (७/१), ग्रहगुहोः (६/२) च (अव्ययम्) इति सूत्रगतपदच्छेदः। ग्रहश्च गुह् च तयोरितरेतरयोगद्वन्द्वे ग्रहगुहौ, तयोर्ग्रहगुहोः, पञ्चम्यर्थे षष्ठी। नेड् वशि कृति इत्यतः न, इट् इत्यनयोरनुवृत्तिर्भवति। चकारेण श्युकः किति इत्यतः उकः इत्यस्यानुकर्षणं भवति। इडागमः सनः भवति न तु धातोः। अतः सनि इत्यस्य षष्ठ्यन्ततया विपरिणामः क्रियते। एवमेव ग्रहगुहोः इत्यस्य, उकः इत्यस्य च पञ्चम्यन्ततया विपरिणामः क्रियते। अङ्गस्य इत्यधिक्रियते तस्य उकः इति विशेषणम्। अतः तदन्तविधौ उगन्तात् अङ्गात् इत्यर्थो लभ्यते। एवञ्च ग्रह्–गुहधातुभ्यां तथा उगन्तादङ्गात् परस्य सनः इडागमो न भवतीति सूत्रार्थः। तथा च सूत्रेणानेन इडागमाभावो विधीयते।

उदाहरणम् – बुभूषति।

सूत्रार्थसमन्वयः – एवञ्च भूधातोः सनि भू स इति स्थिते भूधातुः उगन्तो वर्तते इति हेतोः प्रकृतसूत्रेण सनः इडागमो न भवति। ततः सन्यङोः इत्यनेन द्वित्वे हलादिशेषे ह्रस्वे च भु भू स इति जायते। ततः सार्वधातुकार्धधातुकयोः इत्यनेन आर्धधातुके गुणे प्राप्ते इको झल् इत्यनेन झलादिसनः कित्त्वात् क्ङिति च इत्यनेन गुणनिषेधो भवति। ततः अभ्यासे चर्च इत्यनेन अभ्यासस्य भकारस्य जश्त्वे आदेशप्रत्यययोः इत्यनेन सनः सकारस्य षत्वे बुभूष इति जायते। ततः तस्य सन्नन्तसमुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपे बुभूषति इति रूपं सिध्यति। बुभूषतः बुभूषन्ति इत्यादौ समानैव प्रक्रियास्ति इति ज्ञेयम्।

ग्रह्धातोः उदाहरणं जिघृक्षति। गुह्धातोः उदाहरणं जुघुक्षति।

इण् गतौ इति धातोः एतुमिच्छति इत्यर्थे सन्प्रत्यये इ स इति स्थिते सूत्रमिदमारभ्यते –

[२५.८] सनि च॥ (२.४.४७)

सूत्रार्थः – इणः गमिः स्यात् सनि, न तु बोधने।

सूत्रव्याख्या – विधिसूत्रमिदं द्विपदात्मकम्। सनि (७/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। इणो गा लुङि इत्यतः इणः इति पदस्य, णौ गमिरबोधने इत्यतः गमिः इति पदस्य, अबोधने इति पदस्य चानुवृत्तिर्भवति। तथा च इण्धातोः स्थाने गमि इत्ययमादेशो भवति सन्प्रत्यये परतः। किन्तु बोधनार्थे स आदेशो न भवति। गमि इत्यत्र इकार इत्संज्ञकः, अतः गम्मात्रमवशिष्यते। तथा च सूत्रेणानेन गमि इत्यादेशो विधीयते।

उदाहरणम् – जिगमिषति।

सूत्रार्थसमन्वयः – एवञ्च इण्धातोः सन्प्रत्यये इ स इति स्थिते प्रकृतसूत्रेण गमि इत्यादेशो भवति। यतो हि अत्र इण्धातुरस्ति किञ्च बोधनार्थोऽपि नास्ति। ततः अनुबन्धलोपे गम् स इति स्थिते गमेरिट् परस्मैपदेषु इत्यनेन सकाराद्यार्धातुकप्रत्ययस्य सनः इडागमे धातोः द्वित्वे हलादिशेषे अभ्यासजश्त्वे जगम् इस इति जायते। ततः सन्यतः इत्यनेन अभ्यास–अकारस्य इत्त्वे सनः सकारस्य षत्वे जिगमिष इति जाते ततः लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपे जिगमिषति इति रूपं सिध्यति। एवमेव जिगमिषतः, जिगमिषन्ति इत्यादौ समाना प्रक्रिया।

प्रति–उपसर्गपूर्वकात् इण्धातोः सनि प्रतीषिषति इति यद्रूपं भवति तत्र इण्धातोः गमि इत्यादेशो न भवति। यतो हि अत्र बोधनार्थः अस्ति।

लेखितुमिच्छति इत्यर्थे लिख्धातोः सन्प्रत्यये सनः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन इडागमे लिख् इस इति स्थिते सन्यङोः इत्यनेन धातोर्द्वित्वे लिख् लिख् इस इति जायते। ततः हलादिशेषे अभ्यासह्रस्वे लि लिख् इस इति जाते लघूपधगुणे प्राप्ते तं बाधितुं सूत्रमिदमारभ्यते –

[२५.९] रलो व्युपधाद्धलादेः संश्च॥ (१.२.२६)

सूत्रार्थः – उश्च इश्च वी। ते उपधे यस्य तस्माद्धलादे रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः।

सूत्रव्याख्या – अतिदेशसूत्रेऽस्मिन् पञ्च पदानि सन्ति। रलः (५/१) व्युपधात् (५/१) हलादेः (५/१) सन् (१/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। उश्च इश्च वी, ते उपधे यस्य स व्युपधः तस्मात् व्युपधात्, द्वन्द्वगर्भो बहुव्रीहिः। हल् आदिर्यस्य स हलादिः तस्माद् हलादेः, बहुव्रीहिः। नोपधात्फान्ताद्वा इत्यतः वा इत्यस्य , न क्त्वा सेट् इत्यतः सेट् इत्यस्य, असंयोगाल्लिट् कित् इत्यतः कित् इत्यस्य, पूङः क्त्वा च इत्यतः क्त्वा इत्यस्य चानुवृत्तिर्भवति। एवञ्च धातोः उपधायां यदि इकारः अथवा उकारो भवति, किञ्च धातोः अन्ते रल्प्रत्याहारस्थः कोऽपि वर्णः स्यात्, अपि च धातुः हलादिः स्यात्, किञ्च क्त्वः सनो वा इडागमो विहितो भवति चेत् तयोः क्त्वासनोः विकल्पेन कित्त्वं विधीयते इति सूत्रस्य सम्पूर्णार्थः। तथा च सूत्रेणानेन वैकल्पिकं कित्त्वं विधीयते।

उदाहरणम् –

इकारोपधस्य उदाहरणम् – लिलिखिषति, लिलेखिषति।

उकारोपधस्योदाहरणम् - रुरुचिषते , रुरोचिषते।

सूत्रार्थसमन्वयः – लिख अक्षरविन्यासे इति धातुः इकारोपधः, हलादिः, रलन्तः च अस्ति। अतः लिख् धातोः सनि द्वित्वादिकार्ये लि लिख् इस इति स्थिते प्रकृतसूत्रेण इस इत्यस्य विकल्पेन कित्त्वाभावे लघूपधगुणनिषेधे लिलिखिस इति जायते। ततः आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे लि लिखिष इति भवति। ततः तस्य धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि लिलिखिषति इति रूपं भवति। कित्त्वाभावपक्षे तु लघूपधगुणो भवति। तदा लिलेखिषति इति रूपमपि भवति।

अधुना उकारोपधधातुविषये उच्यते। रुच दीप्तावभिप्रीतौ च इति धातुः आत्मनेपदी, उकारोपधः, हलादिः, रलन्तः च अस्ति। रोचितुमिच्छति इत्यर्थे रुच्धातोः सनि इडागमे धातोः द्वित्वे हलादिशेषे रुरुच् इस इति जाते प्रकृतसूत्रेण विकल्पेन किद्वद्भावे लघूपधगुणनिषेधे आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे रुरुचिष इति जायते। ततः धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये शपि पररूपे रुरुचिषते इति रूपं सिध्यति। कित्त्वाभावपक्षे तु लघूपधगुणो भवत्येव । तदा रुरोचिषते इति रूपमपि भवति।

भेत्तुमिच्छति इत्यर्थे भिदिर् विदारणे इति धातोः सन्प्रत्यये भिद् स इति जायते। ततः अयं धातुः अनिट् अस्ति इति हेतोः इडागमो न भवति। ततः भिदः द्वित्वे हलादिशेषे अभ्यासजश्त्वादिकार्ये कृते सति बिभिद् स इति जायते। ततः सनः आर्धधातुकत्वात् लघूपधगुणे प्राप्ते अतिदेशसूत्रमिदमारभ्यते –

[२५.१०] हलन्ताच्च॥ (१.२.१०)

सूत्रार्थः – इक्समीपाद्धलः परो झलादिः सन् कित् स्यात्।

सूत्रव्याख्या – अतिदेशसूत्रमिदं पदद्वयात्मकम्। हलन्तात् (५/१) च इति सूत्रगतपदच्छेदः। इको झल् इति समग्रं सूत्रमनुवर्तते। किञ्च असंयोगाल्लिट् कित् इत्यतः कित् इत्यस्यानुवृत्तिर्भवति। अपि च रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इत्यतः सन् इत्यस्यापि अनुवृत्तिर्भवति। तेन इकः समीपे विद्यमानात् हलः परः झलादिः सन् कित् भवति इति सूत्रार्थः। सूत्रे अन्तपदस्य समीपे इत्यर्थः। तथा च सूत्रेणानेन कित्त्वं विधीयते।

उदाहरणम् – बिभित्सति , बिभित्सते।

सूत्रार्थसमन्वयः – एवञ्च भिद् धातोः सन्प्रत्यये द्वित्वादिकार्ये कृते सति बिभिद् स इति स्थिते प्रकृतसूत्रेण झलादिसनः किद्वद्भावो भवति। यतो हि अत्र इक् अस्ति इकारः, तत्समीपवर्ती हल् भवति दकारः। ततः क्ङिति च इत्यनेन लघूपधगुणनिषेधो भवति, ततः खरि च इत्यनेन चर्त्वे बिभित्स इति जायते। ततः धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपैकादेशे बिभित्सति इति रूपं सिध्यति।

मूलधातुः उभयपदी अस्ति इति हेतोः सन्नन्तधातुरपि उभयपदी भवति। अतः पक्षे बिभित्सते इत्यपि भवति।

तुदादिगणीय–कृ–गृ–धातुभ्यां इट् सनि वा इत्यनेन विकल्पेन इट् प्राप्तः किञ्च दृङ्–धृङ्–प्रच्छ–धातुभ्यः एकाच उपदेशेऽनुदात्तात् इत्यनेन आर्धधातुकस्य इण्निषेधः प्राप्तः। तदेतत् सर्वं बाधित्वा इडागमविधानार्थं सूत्रमिदमारभ्यते–

[२५.११] किरश्च पञ्चभ्यः॥ (७.२.७५)

सूत्रार्थः – कृ–गृ–दृङ्–धृङ्–प्रच्छधातुभ्यः विहितस्य सनः इडागमो भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। किरः (५/१) च पञ्चभ्यः (५/३) इति सूत्रगतपदच्छेदः। इडत्यर्तिव्ययतीनाम् इत्यतः इट् इत्यस्य, स्मिपूङ्रञ्ज्वशां सनि इत्यतः सनि इत्यस्य चानुवृत्तिर्भवति। एवञ्च कृ–गृ–दृङ्–धृङ्–प्रच्छधातुभ्यः विहितस्य सनः इडागमो भवति।

उदाहरणम् – जिगरिषति, जिगलिषति।

सूत्रार्थसमन्वयः – तथा च गरितुं गलितुं वा इच्छति इत्यर्थे गृ निगरणे धातोः सनि सनः आर्धधातुकत्वात् आर्धधातकस्येड्वलादेः इत्यनेन इडागमे प्राप्ते सनि ग्रहगुहोश्च इति तन्निषेधः प्राप्तः। पुनः तं बाधित्वा इट् सनि वा इत्यनेन विकल्पेन इटि प्राप्ते तमपि बाधित्वा किरश्च पञ्चभ्यः इत्यनेन नित्यम् इडागमो भवति। यतो हि अत्र कृधातुः अस्ति। किञ्च तस्माद्विहितः सन् अपि अस्ति। ततः गृ इत्यस्य द्वित्वे गृ गृ इस इति जाते उरत् इत्यनेन अभ्यासस्य ऋकारस्य अकारादेशे रपरत्वे ज गृ इस इति जाते वृतो वा इत्यनेन विकल्पेन इटः इकारस्य विकल्पेन दीर्घे प्राप्ते चास्येटो दीर्घत्वं नेच्छन्ति इति वचनात् तस्य बाधो भवति। ततः सार्वधातुकार्धधातुकयोः इत्यनेन ऋकारस्य गुणे जगर् इस इति जाते अभ्यासस्य अकारस्य इत्त्वे आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे जिगरिष इति जायते। ततः लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपैकादेशे जिगरिषति इति रूपं सिध्यति । इटि परे सर्वत्र रेफस्य लत्वं विधीयते अचि विभाषा इति योगेन। अतः जिगलिषति इति रूपमपि सिध्यति।

एवमेव करितुम् (करीतुम्) इच्छति इत्यर्थे कृ-विक्षेपे इति धातोः सनादिकार्ये कृते सति चिकरिषति इति रूपमपि सिध्यति।

दृङ्धातोरुदाहरणम् - दिदरिषते - दर्तुमिच्छति इत्यर्थे दृङ् आदरे इति धातोः सनि इटि प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः प्राप्तः। ततः किरश्च पञ्चभ्यः इत्यनेन नित्यं इडागमो भवति। ततः धातोः द्वित्वादिकार्ये सति दिदरिषते इति रूपं सिध्यति।

एवमेव धर्तुमिच्छति इत्यर्थे धृङ् अनवस्थाने इति धातोः सनादिकार्ये कृते सति दिधरिषते इति रूपं सिध्यति।

प्रच्छ ज्ञीप्सायामिति धातोः प्रष्टुमिच्छति इत्यर्थे सनि धातोः अनिट्त्वात् इटि अप्राप्ते किरश्च पञ्चभ्यः इति विशेषसूत्रेण नित्यम् इडागमे द्वित्वादिकार्ये च कृते सति पिपृच्छति इति रूपं सिध्यति।

अध्येतुम् इच्छति इत्यर्थे नित्यमधिपूर्वकात् इङ् अध्ययने इति अदादिगणीयधातोः धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सनि इ स इति स्थिते अग्रिमसूत्रमिदमारभ्यते -

[२५.१२] इङश्च॥ (२.४.४८)

सूत्रार्थः – इङो गमिः स्यात् सनि।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। इङः (५.१) च इति सूत्रगतपदच्छेदः। णौ गमिरबोधने इत्यतः गमिः इत्यस्य , सनि च इत्यतः सनि इत्यस्य चानुवृत्तिर्भवति। तथा च सनि परे सति

इङ्धातोः स्थाने गमि इत्यादेशो भवति इति सूत्रार्थः। गमि इत्यत्र इकारस्य इत्संज्ञकत्वात् गम्मात्रमवशिष्यते।

उदाहरणम् – अधिजिगांसते।

सूत्रार्थसमन्वयः – एवञ्च नित्यमधिपूर्वकात् इङ् धातोः सनि इङश्च इत्यनेन गमि इत्यादेशे अनुबन्धलोपे अधि गम् स इति जायते। ततः अज्झनगमां सनि इत्यनेन उपधादीर्घे गाम् स इति जायते। ततः मूलधातुः ङित् अस्ति इति हेतोः अनुदात्तङित आत्मनेपदम् इत्यनेन स आत्मनेपदी भवति। फलतः पूर्ववत्सनः इत्यनेन सन्नन्तरूपमपि आत्मनेपदं भवति। ततः धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे सन्यतः इत्यनेन अभ्यास–अकारस्य इत्त्वे मकारस्य अनुस्वारे अधि जिगांस इति स्थिते तप्रत्यये कृते सति अधिजिगांसते इति रूपं सिध्यति।

पाठगतप्रश्नाः-२

११. इङश्च इति सूत्रस्य कोऽर्थः।

१२. सनि च इत्यस्य कोऽर्थः।

१३. प्रष्टुमिच्छति इत्यर्थे प्रच्छधातोः सनि किं रूपं भवति।

१४. किरश्च पञ्चभ्यः इत्यनेन किं भवति।

१५. हलन्ताच्च इत्यनेन किं विधीयते।

१६. ग्रह्धातोः सनि किम् उदाहरणम्।

१७. गुह्धातोः सनि किम् उदाहरणम्।

१८. रलो व्युपधाद्धलादेः संश्च इत्येनन विधीयमानं कित्त्वं किं नित्यम् उत अनित्यम्।

तनितुम् इच्छति इत्यर्थे तनु विस्तारे इति उभयपदिनः धातोः सन्प्रत्यये तन् स इति स्थिते तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः इति वार्तिकेन विकल्पेन इट्पक्षे तन् इ स इति जाते धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे अभ्यासाकारस्य इत्त्वे तितांस इति सन्नन्तरूपं भवति। ततः तस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि पररूपैकादेशे तितनिषति इति रूपं जायते, तप्रत्यये तु तितनिषते इति रूपम्। यदा तु इडभावः तदा तन् स इति स्थिते सूत्रमिदमारभ्यते -

[२५.१३] तनोतेर्विभाषा॥ (६.४.१७)

सूत्रार्थः – तनोतेरुपधाया दीर्घो वा स्यात् झलादौ सनि।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। तनोतेः (५/१) विभाषा (अव्ययम्) इति सूत्रगतपदच्छेदः। नोपधायाः इत्यतः उपधायाः इत्यस्य अनुवृत्तिर्भवति, ङ्लोपे पूर्वस्य दीर्घोऽणः इत्यतः

दीर्घः इत्यस्य, अज्झनगमां सनि इत्यतः सनि इत्यस्य चानुवृत्तिर्भवति। तथा च तन्धातोः उपधाया विकल्पेन दीर्घो भवति झलादौ सनि इति सूत्रार्थः।

उदाहरणम् – तितांसति, तितंसति।

सूत्रार्थसमन्वयः - एवञ्च तन्-धातोः सनि तन् स इति जाते तनोतेर्विभाषा इत्यनेन उपधाभूत-अकारस्य दीर्घे तान् स इति जायते। ततः धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे अभ्यास-अकारस्य इत्त्वे तितान् स इति जाते नकारस्य नश्चापदान्तस्य झलि इत्यनेन नकारस्य अनुस्वारे तितांस इति जायते। ततः लटि तिपि शपि पररूपैकादेशे तितांसति इति रूपं भवति, तप्रत्यये तु तितांसते इति रूपं सिध्यति। दीर्घाभावपक्षे तु तन् स इति स्थिते द्वित्वादिकार्ये तितंस इति जायते। ततः लटि तिपि शपि पररूपैकादेशे तितंसति इति रूपं सिध्यति, तप्रत्यये तु तितंसते इति रूपम् इति साकल्येन षट् रूपाणि भवन्ति।

देवितुमिच्छति इत्यर्थे दिवु क्रीडाविजिगीषाव्यवहारस्तुतिमोदमदस्वप्नकान्तिगतिषु इति धातोः सनि दिव् स इति स्थिते सूत्रमिदमारभ्यते –

[२५.१४] सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्॥ (७.२.४९)

सूत्रार्थः – इवन्तेभ्य ऋधादिभ्यश्च सन इड् वा स्यात्।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। सनि (७/१) इवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् (६/३) इति सूत्रगतपदच्छेदः। इव् अन्ते येषां ते इवन्ताः, इवन्ताश्च ऋधश्च भ्रस्जश्च दम्भुश्च श्रिश्च स्वृश्च युश्च ऊर्णुश्च भरश्च ज्ञपिश्च सन् च तेषामितरेतरयोगद्वन्द्वे इवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनः तेषां इवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्, बहुव्रीहिगर्भो द्वन्द्वः। सूत्रेऽस्मिन् स्वरतिसूतिसूयतिधूञूदितो वा इत्यतः वा इत्यस्य, इण्निष्ठायाम् इत्यतः इट् इत्यस्य चानुवृत्तिर्भवति। यस्य धातोः अन्ते इव् अस्ति स धातुः इवन्त इत्युच्यते यथा दिव् सिव् इत्यादि। तथा च इवन्तधातुभ्यः तथा ऋध्–भ्रस्ज्–दम्भ्–श्रि–स्वृ–यु–ऊर्णु–भर–ज्ञप्–सन्–धातुभ्यः परस्य सनः विकल्पेन इडागमो भवति इति सूत्रार्थः फलति। सूत्रेणानेन वैकल्पिकः इडागमो विधीयते। प्रकृतसूत्रेण यदा इट् न भवति। तदा हलन्ताच्च इत्यनेन किद्वद्भावात् गुणनिषेधो भवति इति विज्ञेयम्।

उदाहरणम् – अधुना क्रमश उदाहरणानि आलोच्यन्ते–

इवन्तः – दिव्धातोः सनि प्रकृतसूत्रेण वैकल्पिके इडागमे दिव् इस इति जाते दिव्धातोः द्वित्वे हलादिशेषे दिदिव् इस इति जायते। ततः लघूपधगुणे सनः सकारस्य षत्वे ततः लटि तिपि शपि पररूपैकादेशे दिदेविषति इति रूपं सिध्यति। इडभावपक्षे तु हलन्ताच्च इत्यनेन सनः किद्वद्भावात् गुणनिषेधे च्छ्वोः शूडनुनासिके च इत्यनेन धातोः वकारस्य ऊठादेशे दि ऊ स इति जाते इको यणचि इत्यनेन यणि अज्झनगमां सनि इत्यनेन दीर्घे द्यू स इति जायते। ततः द्यू इत्यस्य द्वित्वे हलादिशेषे अभ्यासस्य ऊकारस्य ह्रस्वे सकारस्य षत्वे तिबादिकार्ये कृते सति दुद्यूषति इति रूपं सिध्यति।

ऋध्धातोः उदाहरणम् - अर्धितुमिच्छति ईर्त्सति, अर्दिधिषति।

भ्रस्जधातोः उदाहरणम् - बिभ्रज्जिषति, बिभर्जिषति, बिभ्रक्षति, बिभर्क्षति।

दम्भधातोः उदाहरणम् - धिप्सति, धीप्सति, दिदम्भिषति।

श्रिधातोः उदाहरणम् - शिश्रीषति, शिश्रयिषति।

स्वृधातोः उदाहरणम् - सुस्वूर्षति, सिस्वरिषति।

युधातोः उदाहरणम् - युयूषति, यियविषति।

ऊर्णुधातोः उदाहरणम् - ऊर्णुनूषति, ऊर्णुनुविषति, ऊर्णुनविषति।

भृधातोः उदाहरणम् - बुभूर्षति, बिभरिषति।

ज्ञप्धातोः उदाहरणम् - ज्ञीप्सति, जिज्ञपयिषति।

सन्धातोः उदाहरणम् - सिषासति, सिसनिषति।

हलन्ताच्च इत्यनेन किद्वद्भावे गुणनिषेधे प्राप्ते तस्यापि निषेधार्थं सूत्रमिदमारभ्यते –

[२५.१५] मुचोऽकर्मकस्य गुणो वा॥ (७.४.५७)

सूत्रार्थः – सादौ सनि अकर्मकस्य मुच्धातोः विकल्पेन गुणो भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदचतुष्टयात्मकमस्ति। मुचः (६/१) अकर्मकस्य (६/१) गुणः (१/१) वा इति सूत्रगतपदच्छेदः। सः स्यार्धधातुके इत्यतः सि इत्यस्य, सनि मीमाघुरभलभशकपतपदामच इस् इत्यतः सनि इत्यस्य, सूत्रे गुणशब्दमुच्चार्य गुणो विधीयते। अतः इको गुणवृद्धी इति परिभाषाबलात् इकः इत्यस्योपस्थितिर्भवति। सकारादिः सन् इत्यस्य तात्पर्यं भवति इट्–रहितः सन्प्रत्ययः। एवञ्च अकर्मकस्य मुच्धातोः इकः विकल्पेन गुणो भवति सकारादौ सन्प्रत्यये परे इति सूत्रार्थः।

उदाहरणम् – मोक्षते, मुमुक्षते वा वत्सः स्वयमेव।

सूत्रार्थसमन्वयः – मुच्लृ मोक्षणे इति धातुः सकर्मकः अस्ति किन्तु कर्मकर्तृत्वात् अथवा कर्माविवक्षायाम् अयं धातुः अकर्मको भवति। एवञ्च मोक्तुमिच्छति स्वयमेव इत्यर्थे मुच्धातोः प्रकृतसूत्रेण विकल्पेन उकारस्य गुणे मोच् स इति भवति। यतो हि अत्र अकर्मकः मुच्धातुरस्ति अपि च सकारादिसन्प्रत्ययोऽस्ति। ततः धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे अत्र लोपोऽभ्यासस्य इत्यनेन सम्पूर्णाभ्यासलोपे मोच् स इति जाते चोः कुः इत्यनेन कुत्वे सकारस्य षत्वे मोक्षः इति भवति । तस्य च सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। कर्मकर्तृत्वात् धातुः स्वतः आत्मनेपदी अस्ति । एवञ्च पूर्वत्सनः इति नियमेन लटि तप्रत्यये शपि पररूपैकादेशे मोक्षते इति रूपं भवति। गुणाभावपक्षे मुमुक्षते इति रूपम् इत्येवं रूपद्वयं भवति।

हलन्ताच्च इत्यनेन रुद्–विद्–मुष्धातुभ्यः सनः कित्त्वे सिद्धे, रलो व्युपधाद्धलादेः संश्च इत्यनेन विकल्पेन कित्त्वे सिद्धे उभयोः बाधनार्थम् अर्थात् प्रतिप्रसवार्थमिदं सूत्रमारभ्यते।

किञ्च ग्रहधातोः न क्त्वा सेट् इत्यनेन प्राप्तनिषेधं बाधितुमग्रिमसूत्रं प्रवर्तते।

अपि च यद्यपि स्वप्–प्रच्छधातुभ्यां परस्य क्त्वः कित्त्वमस्ति तथापि सनः कित्त्वं नास्ति इति हेतोः अप्राप्तकित्त्वविधानार्थमिदं शास्त्रमारभ्यते–

[२५.१६] रुदविदमुषग्रहिस्वपिप्रच्छः संश्च॥ (१.२.८)।

सूत्रार्थः – रुद्–विद्–मुष्–ग्रह्–स्वप्–प्रच्छधातुभ्यः परौ सन् क्त्वा च कितौ स्तः।

सूत्रव्याख्या – अतिदेशसूत्रमिदं पदत्रयात्मकमस्ति। रुदविदमुषग्रहिस्वपिप्रच्छः (५/१) सन् (१/१) च इति सूत्रगतपदच्छेदः। रुषश्च विदश्च मुषश्च ग्रहिश्च स्वपिश्च प्रच्छ् च तेषां समाहारद्वन्द्वे रुदविदमुषग्रहिस्वपिप्रच्छ्, तस्मात् रुदविदमुषग्रहिस्वपिप्रच्छः। चकारः समुच्चयार्थः। पूर्वसूत्रात् अर्थात् मृडमृदगुधकुषक्लिशवदवसः क्त्वा इत्यतः क्त्वा इत्यस्य समुच्चयः। असंयोगाल्लिट् कित् इत्यतः कित् इत्यस्यानुवृत्तिर्भवति। तथा च पूर्वोक्तः सूत्रार्थः सिध्यति। एवञ्च सूत्रेणानेन कित्त्वं विधीयते।

उदाहरणम् – रुरुदिषति।

सूत्रार्थसमन्वयः – रोदितुम् इच्छति इत्यर्थे रुदिर् अश्रुविमोचने इति धातोः सनि इडागमे रुदः द्वित्वे हलादिशेषे रु रुद् इस इति जायते। ततः सन्यतः इत्यनेन अभ्यासस्य अकारस्य इत्त्वे रु रुद् इस इति जाते सनः आर्धधातुकत्वात् तदागमस्यापि यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इति परिभाषया आर्धधातुकत्वमस्ति इति हेतोः पुगन्तलघूपधस्य च इत्यनेन गुणे प्राप्ते प्रकृतसूत्रेण सनः किद्वद्भावे क्ङिति च इति गुणनिषेधो भवति। ततः आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे रुरुदिष इति जायते तस्य च रुरुदिष इति समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपैकादेशे रुरुदिषति इति रूपं सिध्यति।

एवमेव वेदितुं वेत्तुम् वा इच्छति इत्यर्थे विद्धातोः सनि विविदिषति, मोषितुमिच्छति इत्यर्थे मुष स्तेये इति धातोः सनि मुमुषिषति इत्युभयत्रापि बोध्यम्।

ग्रहीतुमिच्छति इत्यर्थे ग्रह उपादाने इति धातोः सनि जिघृक्षति इति रूपं भवति। अत्र सनः किद्वद्भावस्य फलं ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च इति रेफस्य सम्प्रसारणम्।

स्वप्तुमिच्छति इत्यर्थे ञि ष्वप शये धातोः सनि सुषुप्सति इति रूपं भवति। अत्र सनः कित्त्वस्य फलं तावत् वचिस्वपियजादीनां किति इत्यनेन वकारस्य सम्प्रसारणं भवति।

अधुना भवतां बोधसौकर्याय लटि कानिचित् सन्नन्तरूपाणि अधः तालिकया प्रदर्श्यन्ते-

धातुः	सन्नन्तार्थः	सामान्यरूपाणि	लटि सन्नन्तरूपाणि
अर्च्	पूजने की इच्छा करना	अर्चति	अर्चिचिषति
आप्	पाने की इच्छा करना	आप्नोति	ईप्सति
अधि-इङ्	पढने की इच्छा करना	अधीते	अधिजिगांसते
कथ्	कहने की इच्छा करना	कथयति	चिकथयिषति-ते

कृ	करने की इच्छा करना	करोति	चिकीर्षति
खाद्	खाने की इच्छा करना	खादति	चिखादिषति
गम्	जाने की इच्छा करना	गच्छति	जिगमिषति
गृ	निगलने की इच्छा करना	गिरति, गिलति	जिगरिषति, जिगलिषति
ग्रह्	ग्रहण करने की इच्छा करना	गृह्णाति	जिघृक्षति-ते
घ्रा	सूँघने की इच्छा करना	जिघ्रति	जिघ्रासति
चल्	चलने की इच्छा करना	चलति	चिचलिषति
चि	चयन करने की इच्छा करना	चिनोति	चिचीषति
छिद्	काटने की इच्छा करना	छिनत्ति	चिच्छित्सति-ते
चुर्	चुराने की इच्छा करना	चोरयति	चुचोरयिषति-ते
जि	जीतने की इच्छा करना	जयति	जिगीषते
ज्ञा	जानने की इच्छा करना	जानाति	जिज्ञासते
तॄ	तरने की इच्छा करना	तरति	तितीर्षति
दृश्	देखने की इच्छा करना	पश्यति	दिदृक्षते
पच्	पकाने की इच्छा करना	पचति	पिपक्षति-ते
पा	पीने की इच्छा करना	पिबति	पिपासति
बुध्	जानने की इच्छा करना	बुध्यते	बुभुत्सते
भुज्	खाने की इच्छा करना	भुञ्जते	बुभुक्षते
भू	होने की इच्छा करना	भवति	बूभूषति
मुच्	छुटने की इच्छा करना	मुञ्चते	मुमुक्षते
मृ	मरनेकी इच्छा करना	म्रियते	मुमूर्षते
लभ्	पाने की इच्छा करना	लभते	लिप्सते

पाठगतप्रश्नाः-३

१९. तन्धातोः सनि कति रूपाणि कानि च तानि।

२०. स्वमुमिच्छति इत्यर्थे स्वप्धातोः सनि किं रूपम्

२१. रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इत्यनेन किं विधीयते।

२२. रुरुदिषति इत्यस्य कोऽर्थः।

२३. सनीवन्तार्धधातुसूत्रं पूरयत।

२४. एतुमिच्छति इत्यर्थे इधातोः सनि किं रूपम्।

२५. सनि च इति कीदृशं सूत्रम्। अतिदेशसूत्रं विधिसूत्रं वा।

पाठसारः

भ्वादितः चुरादिं यावत् ये दशगणीया धातवो वर्तन्ते तेभ्यो धातुभ्यः इच्छार्थे सन्प्रत्ययो भवति। तदा तस्य सन्नन्तशब्दस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। यथा पठ् व्यक्तायां वाचि इति मूलधातोः सनि पिपठिषति इति रूपं भवति। अत्र पिपठिष इत्यस्य धातुसंज्ञा। मूलस्य पठ् इत्यस्य तु भूवादयो धातव (१.३.१) इत्यनेन धातुसंज्ञा भवति इति विशेषः ज्ञेयः। सनि परे अथवा सनः नानाविधानि कार्याणि सन्ति। यथा इगन्तधातोः परस्य झलादिसन्प्रत्ययस्य किद्वद्भावो भवति तेन चिकीर्षति इत्यादौ गुणनिषेधः। क्वचित् सनः इडागमो न भवति तेन जुघुक्षति , जिघृक्षति इत्यादौ न गुणः। अकर्मकस्य मुच्धातोः इकः विकल्पेन गुणो भवति सकारादौ सन्प्रत्यये परे तेन मोक्षते, मुमुक्षते वा वत्सः स्वयमेव इति सिध्यति। तन्धातोः उपधाया दीर्घो वा स्यात् झलादौ सनि तेन तितांसति, तितंसति, तितनिषति इति रूपत्रयं सिध्यति। गत्यर्थे इण्धातोः गमिरादेशः स्यात् सनि स्यात् न तु बोधने इत्युच्यते तेन जिगमिषति इति रूपं सिध्यति। किञ्च इङ्धातोः स्थाने गमि इत्यादेशे अधिजिगांसते इति रूपं सिध्यति। तत्र भवतां प्रक्रियासौकर्याय पठितुम् इच्छति इति विग्रहे पठ्धातोः सनि पिपठिषति इति रूपनिष्पत्तिः कथं भवति इत्येतत् सर्वमत्र स्पष्टमालोचितमस्ति।

पाठान्तप्रश्नाः

१. सनाद्यन्ता धातव इति सूत्रं व्याख्यात।

२. पिपठिषति इति सन्नन्तधातुरूपसिद्धिः कथं भवति इति व्याख्यात।

३. धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सूत्रं सोदाहरणं व्याख्यात।

४. अधिजिगांसते इति सन्नन्तधातुरूपं सोदाहरणं व्याख्यात।

५. सनि ग्रहगुहोश्च इति सूत्रं सोदाहरणं व्याख्यात।

६. रलो व्युपधाद्धलादेः संश्च इति सूत्रं व्याख्यात।

७. किरश्च पञ्चभ्यः इति सूत्रस्थानि उदाहरणानि व्याख्येयानि।

८. सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् इति सूत्रं व्याख्यात।

९. मुचोऽकर्मकस्य गुणो वा इति सूत्रं सोदाहरणं व्याख्यात।

१०. रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इति सूत्रं सोदाहरणं व्याख्यात।

पाठगतप्रश्नोत्तराणि

उत्तराणि–१

१. मूलधातुः-पठ्, सन्नन्तधातुः-पिपठिष।

२. सनाद्यन्ता धातवः।

३. इच्छार्थे।

४. न।

५. पठितुम् इच्छति।

६. जिघत्सति।

७. अज्झनगमां सनि।

८. गुणनिषेधः।

९. सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाचारक्विब्-णिज्-यङौ तथा।
यगायेयङ्–णिङ् चेति द्वादशाऽमी सनादयः।।

१०. बुभूषति।

उत्तराणि–२

११. सनि परे सति इङ्धातोः स्थाने गमि इत्यादेशो भवति इत्यर्थः।

१२. इण्धातोः स्थाने गमि इत्यादेशो भवति सन्प्रत्यये परे सति। न तु बोधनार्थे।

१३. पिपृच्छति।

१४. इडागमो भवति।

१५. किद्वद्भावः।

१६. जिघृक्षति।

१७. जुघुक्षति।

१८. अनित्यम्।

उत्तराणि – ३

१९. तितांसति, तितंसति, तितनिषति इति रूपत्रयम्।

२०. सुषुप्सति।

२१. सन्-क्त्वा इत्यनयोः कित्त्वम्।

२२. रोदितुमिच्छति।

२३. सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्।

२४. जिगमिषति।

२५. विधिसूत्रम्।

॥इति पञ्चविंशः पाठः ॥

346sk26

२६

परस्मैपदात्मनेपदप्रकरणम्।

प्रस्तावना

पूर्वं भवन्तः भ्वादिप्रकरणेषु लकारपरिचयं प्राप्तवन्तः। तत्र धातोः विहितस्य लकारस्य स्थाने परस्मैपदम् आत्मनेपदं चेति द्विविधः तिङ्प्रत्ययः आदेशरूपेण विधीयते। केभ्यो धातुभ्यः परस्मैपदं केभ्यो वा आत्मनेपदं भवति इति अस्मिन् पाठे स्पष्टीक्रियते। अनुदात्तङित आत्मनेपदम् इति सूत्रम् अनुदात्तेत्धातुभ्यः ङित्धातुभ्यश्च आत्मनेपदं विदधाति। किञ्च कर्तृगामिनि क्रियाफले स्वरितेत्–धातुभ्यः ञित्–धातुभ्यश्च आत्मनेपदं विधीयते स्वरितञितः कर्त्रभिप्राये क्रियाफले इति योगेन। एवञ्च शेषात् अर्थात् आत्मनेपदार्थं निमित्तं नास्ति यो धातुः तस्माद्धातोः परस्मैपदं भवति, शेषात् कर्तरि परस्मैपदमिति शास्त्रेण। अर्थभेदेन उपसर्गादियोगेन च कुत्रचित् परस्मैपदं क्वचित् वा आत्मनेपदं भवति इत्यतः अस्मिन् पाठे विशेषस्थलानि प्रदर्शयितुं परस्मैपदात्मनेपदविधानम् आलोच्यते। तत्रादौ आत्मनेपदविधानमालोच्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवताम् –

- किम् आत्मनेपदं किञ्च परस्मैपदमिति ज्ञानं भविष्यति।
- क्वचित् आत्मनेपदे प्राप्तेऽपि न भवति इति विवको भविष्यति।
- क्वचित् परस्मैपदे प्राप्तेऽपि न भवति इति बोधो भविष्यति।
- क्वचित् अर्थभेदेन परस्मैपदात्मनेपदं भवति, क्वचित् वा उपसर्गबलेन इति विषये विस्पष्टं ज्ञानं स्यात्।

आत्मनेपदप्रकरणम्

आत्मनेपदप्रकरणवशात् मूलं सूत्रम् आदौ आलोच्यते–

[२६.१] अनुदात्तङित आत्मनेपदम्॥ (१.३.१२)

सूत्रार्थः – अनुदात्तेतः उपदेशे यो ङित्तदन्ताच्च धातोः लस्य स्थाने आत्मनेपदं स्यात्।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पदद्वयमस्ति। अनुदात्तङितः (५/१), आत्मनेपदम् (१/१) इति सूत्रगतपदच्छेदः। अनुदात्तश्च ङ् च अनुदात्तङौ, तौ इतौ यस्य स अनुदात्तङित्, तस्मात् अनुदात्तङितः। भूवादयो धातवः इत्यत्रत्यप्रथमान्तस्य धातवः इत्यस्य पञ्चम्येकवचनान्ततया विपरिणामेन धातोः इत्यस्यानुवृत्तिर्भवति। एवञ्च अनुदात्तेत्–धातोः ङित्–धातोश्चेति आत्मनेपदम् अर्थात् तङ्प्रत्याहारस्थाः त–आताम्–झादिप्रत्यया भवन्ति। अतः अनुदात्तङित आत्मनेपदम् इति सूत्रसम्बन्धिधातवः आत्मनेपदिन धातव इत्युच्यन्ते।

उदाहरणम् – ङित्धातुः–शीङ् स्वप्ने इति धातोः ङकार इत्संज्ञकः तस्मात् प्रकृतसूत्रेण आत्मनेपदं भवति। ततः प्रथमपुरुषैकवचने शेते इति रूपं भवति।

बाधृ लोडने (प्रतिघाते) इति धातुः अनुदात्तेत्, अतः प्रकृतसूत्रेण आत्मनेपदे प्रथमपुरुषैकवचने बाधते इति रूपं भवति, किञ्च एध वृद्धौ इति धातुः अपि अनुदात्तेत् अस्ति तस्मात् प्रकृतसूत्रेण आत्मनेपदे प्रथमपुरुषैकवचने तप्रत्यये एधते इति रूपं भवति। एतेषां प्रक्रिया भ्वादिप्रकणेषु द्रष्टव्या।

भावार्थे कर्मार्थे च आत्मनेपदं भवति इति दर्शयितुं सूत्रमिदमारभ्यते –

[२६.२] भावकर्मणोः॥ (१.३.१३)

सूत्रार्थः – भावकर्मणोः अर्थयोः धातोः विहितस्य लकारस्य स्थाने आत्मनेपदप्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रमिदम् एकपदात्मकमस्ति। लः कर्मणि च भावे चाकर्मकेभ्यः इत्यतः लः इति पदम्, अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदं च अनुवर्तते। भावकर्मणोः इति सप्तमीद्विवचनान्तम्। भावः च कर्म च तयोः इतरेतरयोगद्वन्द्वे भावकर्मणी, तयोः भावकर्मणोः। भावार्थे कर्मार्थे च धातोः विहितस्य लकारस्य स्थाने आत्मनेपदप्रत्ययो भवति इति सूत्रार्थः सिध्यति। एवञ्च भाववाच्ये कर्मवाच्ये च आत्मनेपदं भवति, परस्मैपदं कदापि न भवति। तत्र धातुः आत्मनेपदी परस्मैपदी उभयपदी वा भवतु भाववाच्ये कर्मवाच्ये च आत्मनेपदमेव भवति।

उदाहरणम् – भावार्थस्य उदाहरणम्–बभुवे। कर्मार्थस्य उदाहरणम्–अनुबभूवे। एतयोः सविस्तरं व्याख्यानं भावकर्मप्रकरणे पश्यत।

क्रियाविनिमयार्थेऽपि धातोः आत्मनेपदं प्रदर्शयितुं सूत्रमिदमारभ्यते–

[२६.३] कर्तरि कर्मव्यतिहारे॥ (१.३.१४)

सूत्रार्थः – क्रियाविनिमये द्योत्ये कर्तरि आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पदद्वयमस्ति। कर्तरि (७/१), कर्मव्यतिहारे (७/१) इति सूत्रगतपदच्छेदः। कर्तरि इति सप्तम्येकवचनान्तम्। कर्मव्यतिहारे इत्यपि तथा। कर्मणः व्यतिहारः इति षष्ठीतत्पुरुषे कर्मव्यतिहारः, तस्मिन् कर्मव्यतिहारे। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदमनुवर्तते। सूत्रेऽस्मिन् कर्मपदार्थः क्रिया। व्यतिहारपदार्थश्च विनिमयः। ततः कर्मव्यतिहारः इत्यस्य क्रियाविनिमय इत्यर्थः। कर्तृपदार्थश्च कर्तृवाच्यम्। एवञ्च क्रियाया विनिमये द्योत्ये कर्तृवाच्ये आत्मनेपदं भवतीति सूत्रार्थः।

अत्र विशेषः– कर्मव्यतिहारार्थस्य प्रकटनार्थं धातोः पूर्वं प्रायः वि–अति इति उपसर्गद्वयं प्रयुज्यते। कुत्रचित् तं विना अथवा अन्योपसर्गयोगेन व्यतिहारार्थः प्रकट्यते। यथा प्रियामुखं किंपुरुषश्चुचुम्बे (कालिदासः)।

उदाहरणम् – ब्राह्मणः क्षेत्रं व्यतिलुनीते (अन्यस्य योग्यां छेदनक्रियाम् अन्यः करोति)।

सूत्रार्थसमन्वयः – वि–अति पूर्वकात् लूञ् छेदने इति क्र्यादिगणीयात् उभयपदिनः धातोः प्रकृतसूत्रेण आत्मनेपदं विधीयते, छेदनक्रियाया व्यतिहारार्थस्य सत्त्वात्। अस्मात् धातोः ञित्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इति योगेन पक्षे परगामिनि क्रियाफले परस्मैपदे प्राप्ते तं बाधित्वा केवलम् आत्मनेपदं विधातुमिदमारब्धम्।

पूर्वसूत्रेण यद् आत्मनेपदं विहितम्, तस्यैव अपवादं प्रदर्शयितुमयं योग आरभ्यते –

[२६.४] न गतिहिंसार्थेभ्यः॥ (१.३.१५)

सूत्रार्थः – गमनार्थकधातुभ्यः हिंसार्थकधातुभ्यः च क्रियाया विनिमयार्थे द्योत्ये आत्मनेपदं न भवति।

सूत्रव्याख्या – निषेधसूत्रेऽस्मिन् पदद्वयमस्ति। न (अव्ययम्), गतिहिंसार्थेभ्यः (५/३) इति सूत्रगतपदच्छेदः। गतिश्च हिंसा च गतिहिंसे, गतिहिंसे अर्थौ येषां ते गतिहिंसार्थाः तेभ्यः गतिहिंसार्थेभ्यः इति द्वन्द्वगर्भबहुव्रीहिसमासः। कर्तरि कर्मव्यतिहारे इत्यतः कर्मव्यतिहारे इति पदस्य, अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्य चानुवृत्तिर्भवति। गतिहिंसार्थेभ्यः कर्मव्यतिहारे आत्मनेपदं न इति वाक्ययोजना। तथा च गमनार्थकधातुभ्यः हिंसार्थकधातुभ्यः च क्रियाया विनिमयार्थे द्योत्ये आत्मनेपदं न भवति इति सूत्रार्थः फलति।

उदाहरणम् – व्यतिगच्छन्ति।

सूत्रार्थसमन्वयः – वि–अति उपसर्गपूर्वकात् गमनार्थकात् गम् (गम्लृ गतौ. भ्वा.परस्मै) धातोः कर्मव्यतिहारार्थे कर्तरि कर्मव्यतिहारे इति सूत्रेण आत्मनेपदं प्राप्तम्। किन्तु प्रकृतसूत्रेण तन्निषेधो भवति गमनार्थकधातोः सत्त्वात्। ततः शेषात् कर्तरि परस्मैपदम् इत्यनेन परस्मैपदमेव भवति।

विश निवेशने इति तुदादिगणीयपरस्मैपदिधातोः आत्मनेपदमप्राप्तम् किन्तु नि इति उपसर्गयोगेन आत्मनेपदं यथा स्यात्, अतः सूत्रमिदमारभ्यते–

[२६.५] नेर्विशः॥ (१.३.१७)

सूत्रार्थः – निपूर्वकात् विश्–धातोः परम् आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। नेः (५/१), विशः (५/१) इति सूत्रगतपदच्छेदः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। तेन सूत्रार्थः सिध्यति।

उदाहरणम्– निविशते ।

सूत्रार्थसमन्वयः – अत्र निपूर्वकः विश्–धातुः अस्ति। शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदे प्राप्ते प्रकृतसूत्रेण आत्मनेपदं विधीयते। यतो हि अत्र निपूर्वकः विश्धातुः अस्ति। नैषधीयकारस्य श्रीहर्षस्यापि प्रयोगः अस्ति– निविशते यदि शूकशिखा पदे (४.११)।

डुक्रीञ् द्रव्यविनिमये इति धातोः ञित्त्वात् पक्षे परगामिनि क्रियाफले शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदे प्राप्ते अपवादसूत्रमिदमारभ्यते–

[२६.६] परिव्यवेभ्यः क्रियः॥ (१.३.१८)

सूत्रार्थः – परि, वि, अव इति उपसर्गेभ्यः परः यः क्रीधातुः तस्मात् आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। परिव्यवेभ्यः (५/३), क्रियः (५/१) इति सूत्रगतपदच्छेदः। परिश्च विश्च अवश्च तेषामितरेतरयोगद्वन्द्वे परिव्यवाः, तेभ्यः परिव्यवेभ्यः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। परि, वि, अव इति उपसर्गेभ्यः परः यः क्रीधातुः तस्मात् आत्मनेपदं भवति इत्येवं पूर्वोक्तः अर्थः सिध्यति। स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन कर्तृगामिनि क्रियाफले आत्मनेपदं प्राप्तम्। किन्तु प्रकृतसूत्रेण अकर्तृगामिनि क्रियाफलेऽपि आत्मनेपदमेव यथा स्यात्, किन्तु परस्मैपदं न स्यात्। अतः सूत्रमिदमारब्धम्।

उदाहरणम् – परिक्रीणीते इत्यत्र परिपूर्वकः क्रीधातुरस्ति। विक्रीणीते इत्यत्र विपूर्वकः क्रीधातुरस्ति। अवक्रीणीते इत्यत्र अवपूर्वकः क्रीधातुरस्ति।

जि जये इति परस्मैपदिनः भ्वादिगणीयधातोः शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदे प्राप्ते विशिष्टोपसर्गयोगेन आत्मनेपदविधानार्थमयं योग आरभ्यते –

[२६.७] विपराभ्यां जेः॥ (१.३.१९)

सूत्रार्थः – वि–उपसर्गपूर्वकात् परा–उपसर्गपूर्वकात् च परस्य जिधातोः आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पदद्वयमस्ति। विपराभ्याम् (५/२), जेः (५/१) इति सूत्रगतपदच्छेदः। विश्च पराश्च विपरौ, ताभ्यां विपराभ्याम्, इति इतरेतरयोगद्वन्द्वः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। तथा च प्रागुक्तार्थः सिध्यति।

अत्र विशेषः – केवलः जिधातुस्तु परस्मैपदी भवति किन्तु वि–परा इत्युपसर्गद्वययोगेन जिधातुः आत्मनेपदं भवति। एवञ्च सूत्रमिदं शेषात्कर्तरि परस्मैपदम् इत्यस्यापवादभूतमस्ति।

उदाहरणम् – विजयते इत्यत्र विपूर्वकः जिधातुरस्ति। पराजयते इत्यत्र परापूर्वकः जिधातुः वर्तते।

ष्ठा गतिनिवृत्तौ (भ्वादि.परस्मै.)धातोः शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदे प्राप्ते विशिष्टोपसर्गयोगेन आत्मनेपदविधानार्थम् अयं योग आरभ्यते–

[२६.८] समवप्रविभ्यः स्थः॥ (१.३.२२)

सूत्रार्थः – सम्पूर्वकात् अवपूर्वकात् प्रपूर्वकात् विपूर्वकात् च स्थाधातोः आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। समवप्रविभ्यः (५/३), स्थः (५/१) इति सूत्रगतपदच्छेदः। सम् च अवश्च प्रश्च विश्च समवप्रविभ्यः तेभ्यः समवप्रविभ्यः, इति इतरेतरयोगद्वन्द्वः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। एवञ्च पूर्वोक्तार्थः सिध्यति।

उदाहरणम् – सम्–स्था–सन्तिष्ठते। अव–स्था–अवतिष्ठते। प्र–स्था–प्रतिष्ठते। वि–स्था–वितिष्ठते।

पाठगतप्रश्नाः-१

१. कः कर्मव्यतिहारः।

२. सम्पूर्वकस्थाधातोः आत्मनेपदं भवति किम्। भवति चेत् किं रूपम्।

३. विपराभ्यां जेः इत्यस्य उदाहरणं किम्।

४. आत्मनेपदप्रत्ययविधायकसूत्रं लिखत।

५. व्यतिगच्छन्ति इत्यत्र आत्मनेपदं कुतो न।

६. नेर्विशः इत्यस्य उदाहरणं किम्।

७. विक्रीणीते विक्रीणाति इत्यनयोः कतरत् साधु।

८. व्यतिलुनीते इत्यस्य कोऽर्थः।

ज्ञा अवबोधने (क्र्या.परस्मै) धातोः शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदे प्राप्ते आत्मनेपदविधानार्थं सूत्रमिदमारभ्यते –

[२६.९] अपह्नवे ज्ञः॥ (१.३.४४)

सूत्रार्थः – अपलापे अर्थे ज्ञाधातोः परम् आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। अपह्नवे (७/१), ज्ञः (५/१) इति सूत्रगतपदच्छेदः। अपह्नवे इति सप्तम्येकवचनान्तम्। ज्ञः इति पञ्चम्येकवचनान्तम्। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। अपह्नवः अपलापः। तथा च अपलापार्थे गम्यमाने ज्ञाधातोः आत्मनेपदमेव भवति इति सिध्यति।

अत्र विशेषः – उपसर्गरहितावस्थायां ज्ञाधातोः अपलापः अर्थो नास्ति। अयमर्थस्तु अप इति उपसर्गयोगेन लभ्यते। अतः अपपूर्वकज्ञाधातोः अस्मिन्नर्थे क्रियाफलस्य कर्तृगामिनि परगामिनि वा आत्मनेपदं भवति।

उदाहरणम् – शतम् अपजानीते। अस्य वाक्यस्य शतम् अपलपतीत्यर्थः। अत्र अपपूर्वकज्ञाधातुः अपलापे अर्थे वर्तते।

चर गतौ भक्षणे च (भ्वा.परस्मै) धातोः शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदे प्राप्ते आत्मनेपदार्थमयं योग आरभ्यते–

[२६.१०] समस्तृतीयायुक्तात्॥ (१.३.५४)

सूत्रार्थः – तृतीयान्तपदेन युक्तात् समः परस्मात् चर्–धातोः आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। समः (५/१), तृतीयायुक्तात् (५/१) इति सूत्रगतपदच्छेदः। तृतीयया युक्तः तृतीयायुक्तः तस्मात् तृतीयायुक्तात् इति तृतीयातत्पुरुषः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। उदश्चरः सकर्मकात् इत्यतः चर इत्यस्यानुवृत्तिर्भवति। एवं सूत्रार्थः सिध्यति।

उदाहरणम् – रथेन सञ्चरते।

सूत्रार्थसमन्वयः – रथेन इति तृतीयान्तपदेन युक्तः धातुरस्ति सम्पूर्वकः चर् इति। अतः प्रकृतसूत्रेण चर्–धातोः आत्मनेपदं विधीयते। तेन सञ्चरते इति रूपं सिध्यति। तथा च कालिदासस्य प्रयोगः – क्वचित् पथा सञ्चरते सुराणाम् (रघु. १३.१९)। यदा तृतीयान्तपदाभावः तदा तु आत्मनेपदं न भवति यथा – उभौ लोकौ सञ्चरसि इमं चामुं च देवल। (काशिका)।

दाण् दाने (भ्वा.परस्मै)धातोः शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदे प्राप्ते अपवादसूत्रमिदमारब्धम्–

[२६.११] दाणश्च सा चेच्चतुर्थ्यर्थे॥ (१.३.५५)

सूत्रार्थः – तृतीयान्तपदेन युक्तात् सम्पूर्वकात् दाण्धातोः आत्मनेपदं भवति यदि तृतीया चतुर्थ्याः अर्थे प्रयुक्ता भवति।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पञ्च पदानि सन्ति। दाणः (५/१), च (अव्ययम्) सा (१/१) चेत् (अव्ययम्) चतुर्थ्यर्थे (७/१) इति सूत्रगतपदच्छेदः।चतुर्थ्याः अर्थः चतुर्थ्यर्थः, तस्मिन् चतुर्थ्यर्थे इति षष्ठीतत्पुरुषः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। समस्तृतीयायुक्तात् इति सूत्रमनुवर्तते। एवञ्च तृतीयान्तपदेन युक्तात् सम्पूर्वकात् दाण्धातोः आत्मनेपदं भवति यदि तृतीया चतुर्थ्याः अर्थे प्रयुक्ता भवति। चतुर्थ्याः अर्थे तृतीया तु अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्या इति वार्तिकेन विधीयते इति कारकप्रकरणे ज्ञास्यति।

अत्र विशेषः – समस्तृतीयायुक्तात् (१.३.५४), दाणश्च सा चेच्चतुर्थ्यर्थे (१.३.५५) इति सूत्रद्वयम् अपरेण केनचित् उपसर्गेन व्यवहितेऽपि प्रवर्तते। यथा – धर्मम् उदाचरते इत्यत्र उत् –चर् इत्यनयोर्मध्ये आङ् इत्युपसर्गः वर्तते तदापि प्रकृतसूत्रेण आत्मनेपदं भवति।

उदाहरणम् – दास्या संयच्छते कामुकः।

सूत्रार्थसमन्वयः – दास्या संयच्छते कामुकः इत्यत्र दास्या सह कामुकसम्पर्क एव अत्र अशिष्टव्यवहारशब्देन उच्यते। दास्यीमुद्दिश्य एव तादृशसम्पर्कः क्रियते। अतः दासी अत्र सम्प्रदानम्। तेन सम्प्रदाने चतुर्थी इत्यनेन चतुर्थी प्राप्तास्ति किन्तु अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्या इत्यनेन चतुर्थीं बाधित्वा तृतीया विधीयते। एवञ्च प्रकृतसूत्रस्य अवकाशः लब्धः। अतः आत्मनेपदप्रयोगः।

सन्नन्तादात्मनेपदविधानार्थं सूत्रमिदमारभ्यते–

[२६.१२] पूर्ववत्सनः॥ (१.३.६२)

सूत्रार्थः – सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। पूर्ववत् (अव्ययम्), सनः (५/१) इति सूत्रगतपदच्छेदः। पूर्वेण इव पूर्ववत्। तेन तुल्यं क्रिया चेद्वतिः इति पूर्वशब्दात् वतिप्रत्ययः। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। सन्प्रत्ययात् पूर्वं यः आत्मनेपदी धातुः तेन तुल्यं सन्नन्तधातोरपि आत्मनेपदं भवति।

अत्र विशेषः – यदि केनचित् उपसर्गयोगेन कश्चित् धातुः आत्मनेपदं भवति तदा तस्मिन् उपसर्गे सति सन्नन्तात्परमपि तस्मात् धातोः आत्मनेपदं भवति यथा– निविविक्षते। अत्र नेर्विशः इति सूत्रेण निपूर्वकविश्धातोः आत्मनेपदं विधीयते। एवमेव सन्नन्तादपि विश्धातोः आत्मनेपदं भवति।

उदाहरणम् – शिशयिषते।

सूत्रार्थसमन्वयः – शीङ् स्वप्ने इति धातोः ङित्त्वात् आत्मनेपदी अस्ति। अतः अस्मात् धातोः सन्प्रत्यये विहिते सति शिशयिषते इति रूपं सिध्यति। एवमेव एध वृद्धौ इति धातुः अनुदात्तेत् अस्ति इति हेतोः आत्मनेपदी अस्ति। तस्मात् सन्प्रत्ययात् परमपि अर्थात् सन्नन्तात् एध्धातोरपि आत्मनेपदं भवति। तेन एदिधिषते इति रूपं सिध्यति। डुकृञ् करणे इति धातुः ञित्त्वात् आत्मनेपदी भवति कर्तृगामिनि क्रियाफले सति। अतः सन्नन्तात् परमपि आत्मनेपदं भवति। अतः चिकीर्षते इति रूपं सिध्यति। परगामिनि क्रियाफले तु चिकीर्षति इति रूपं सिध्यति। यदा तु धातुः आत्मनेपदनिमित्तहीनः तदा तु

सन्नन्तात्परमपि परस्मैपदमेव भवति न तु आत्मनेपदं, यथा– भूधातोः बुभूषति इति रूपं भवति, गम्धातोः जिगमिषति इति रूपं भवति।

डुकृञ् करणे इति तनादिगणीयधातोः कर्तृगामिनि क्रियाफले आत्मनेपदं भवति। परगामिनि क्रियाफले तु परस्मैपदं भवति इति भवन्तः जानन्ति एव। तत्र परगामिनि क्रियाफलेऽपि आत्मनेपदविधानार्थं सूत्रमिदमारभ्यते –

[२६.१३] गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१.३.३२)

सूत्रार्थः – गन्धनम्, अवक्षेपणं, सेवनं, साहसिक्यं, प्रतियत्नः, प्रकथनम्, उपयोगः इत्येतेषु अर्थेषु कृधातोः आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु (७.३), कृञः (५/१) इति सूत्रगतपदच्छेदः। गन्धनञ्च अवक्षेपणञ्च सेवनञ्च साहसिक्यञ्च प्रतियत्नञ्च प्रकथनञ्च उपयोगश्च तेषामितरेतरयोगद्वन्द्वे गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगाः तेषु गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु। अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदस्यानुवृत्तिर्भवति। गन्धनं सूचनं , गन्धनम् अपकारप्रयुक्तं हिंसात्मकं कर्म इति काशिका। अवक्षेपणं भर्त्सनम्। बलेन प्रवृत्तस्य कर्म साहसिक्यमित्युच्यते। प्रतियत्नः उत्पादनम्। प्रकर्षेण कथनं प्रकथनम्। एवञ्च गन्धनम्, अवक्षेपणं, सेवनं, साहसिक्यं, प्रतियत्नः, प्रकथनम्, उपयोगः इत्येतेषु अर्थेषु कृधातोः आत्मनेपदं भवति इति सूत्रार्थः सिध्यति।

उदाहरणानि–

१. **गन्धनम्** – स तमुत्कुरुते। स तं सूचयति इति वाक्यार्थः।
२. **अवक्षेपणम्** – श्येनो वर्तिकाम् उदाकुरुते। श्येनो वर्तिकां भर्त्सयति इति वाक्यार्थः। एवमेव दुर्वृत्तान् अवकुरुते।
३. **सेवनम्** – हरिम् उपकुरुते भक्तः। हरिं सेवते भक्तः इति वाक्यार्थः।
४. **साहसिक्यम्** – परदारान् प्रकुरुते कामुकः। परदारेषु बलेन प्रवर्तते कामुकः इति वाक्यार्थः।
५. **प्रतियत्नः** – एधोदकस्य उपस्कुरुते। गुणम् आधत्ते इत्यर्थः।
६. **प्रकथनम्** – गाथाः प्रकुरुते गायकः। प्रकथयति इत्यर्थः।
७. **उपयोगः** – शतं प्रकुरुते वणिक्। शतं व्ययीकरोति इत्यर्थः

एतद्भिन्नार्थे तु आत्मनेपदं न भवति यथा कटं करोति इति। किन्तु अत्र कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवितुमर्हति। एवम् आत्मनेपदप्रक्रिया समाप्ता।

पाठगतप्रश्नाः-२

९. शतम् अपजानीते इति वाक्यस्य कोर्थः।

१०. अपजानीते इत्यत्र अपपूर्वकज्ञाधातुः कस्मिन्नर्थेऽस्ति।

११. समस्तृतीयायुक्तात् इत्यस्य किमुदाहरणम्।

१२. गन्धनादिसूत्रं पूरयत।

१३. उत्कुरुते इति पदस्य कोऽर्थः।

१४. पूर्ववत्सनः इत्यस्य कोऽर्थः।

१५. प्रकुरुते इत्यस्य कोऽर्थः।

१६. दास्या संयच्छते कामुकः इत्यत्र आत्मनेपदं केन भवति।

अथ परस्मैपदप्रक्रिया

धातोः विहितस्य लकारस्य स्थाने परस्मैपदात्मनेपदाख्यः द्विविधः तिङ्प्रत्ययः आदेशरूपेण विधीयते इति भवन्तः पूर्वं ज्ञातवन्त एव। तत्र आत्मनेपदविषयेऽपि ज्ञातवन्तः। अधुना परस्मैपदविषये उच्यते। परस्मैपदविधानविषयकं मुख्यं सूत्रद्वयमस्ति। स्वरितञितः कर्त्रभिप्राये क्रियाफले इति एकम् अपरं तावत् शेषात् कर्तरि परस्मैपदम् इति। आद्येन तु परगामिनि क्रियाफले परस्मैपदं विधीयते इति आत्मनेपदप्रकरणस्यारम्भे उक्तमेवास्ति। आत्मेपदविधानार्थं यावन्ति निमित्तानि सन्ति तन्निमित्तहीनात् धातोः परस्मैपदं विधीयते यथा भवति, पठति, वदति इत्यादि। किन्तु अयं साधारणः नियमः। अधुना विशेषनियम उच्यते। तत्र उभयपदिधातुभ्यः कर्त्रभिप्राये क्रियाफले प्राप्तस्य आत्मनेपदस्य बाधः क्रियते अथवा आत्मनेपदिधातुभ्यः प्राप्तस्य आत्मनेपदस्य साक्षात् बाधो विधीयते। तानि सूत्राणि अत्र व्याख्यायन्ते।

कृधातोः ञित्त्वात् परगामिनि क्रियाफले परस्मैपदं सिद्धमस्ति, कर्तृगामिनि क्रियाफले च आत्मनेपदमपि सिद्धमस्ति। किन्तु कर्तृगामिनि क्रियाफलेऽपि विशिष्टोपसर्गयोगेन परस्मैपदमात्रविधानार्थं विधिसूत्रमिदमारभ्यते –

[२६.१४] अनुपराभ्यां कृञः॥ (१.३.७९)

सूत्रार्थः – अनु इत्युपसर्गपूर्वकात् परा इत्युपसर्गपूर्वकात् च कृधातोः परस्मैपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। अनुपराभ्याम् (५/२) कृञः (५/१) इति सूत्रगतपदच्छेदः। अनुश्च पराश्च तयोरितरेतरयोगद्वन्द्वे अनुपरौ ताभ्याम् अनुपराभ्याम्। शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि परस्मैपदम् इत्यनयोः अनुवृत्तिः भवति। अनु इत्युपसर्गपूर्वकात् परा

इत्युपसर्गपूर्वकात् च कृधातोः परस्मैपदं भवति इति सूत्रार्थः। कृधातुः ञित् अस्ति अतः परगामिनि क्रियाफले परस्मैपदं प्राप्तमस्ति एव । तस्मात् कर्तृगामिनि क्रियाफले परस्मैपदविधानार्थम् इदं सूत्रम्। किञ्च गन्धनम्, अवक्षेपणं, सेवनं, साहसिक्यं, प्रतियत्नः, प्रकथनम्, उपयोगः इत्येतेषु अर्थेषु परगामिनि क्रियाफले कृधातोः यदात्मनेपदं प्राप्तं तस्यापि अपवादोऽयं योगः।

अत्र विशेषः – सूत्रेऽस्मिन् शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि इति पदस्यानुवृत्तिर्भवति। अतः कर्तृवाच्ये एवायं प्रयोगः। कर्मवाच्ये तु भावकर्मणोः इति आत्मनेपदं भवति। यथा–अनुक्रियते साध्वी पद्धतिः। पराक्रियते समुपस्थिता बाधा।

उदाहरणम् – अनुकरोति, पराकरोति। अत्र अनु परा इत्युपसर्गपूर्वकः कृधातुरस्ति।

क्षिप प्रेरणे इति स्वरितेतः धातोः कर्तृगामिनि क्रियाफले आत्मनेपदे प्राप्ते तं बाधितुं परस्मैपदविधानार्थं सूत्रमिदमारभ्यते –

[२६.१५] अभिप्रत्यतिभ्यः क्षिपः॥ (१.३.८०)

सूत्रार्थः – अभि–उपसर्गपूर्वकात् प्रति–उपसर्गपूर्वकात् अति–उपसर्गपूर्वकात् च क्षिप्–धातोः परस्मैपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। अभिप्रत्यतिभ्यः (५/३) क्षिपः (५/१) इति सूत्रगतपदच्छेदः। अभिश्च प्रतिश्च अतिश्च तेषामितरेतरयोगद्वन्द्वे अभिप्रत्यतयः, तेभ्यः अभिप्रत्यतिभ्यः। शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि, परस्मैपदम् इत्यनयोः अनुवृत्तिः भवति। तथा च पूर्वोक्तार्थः सिध्यति।

अत्र विशेषः – तुदादिगणीयः अयं धातुः स्वरितेत् अस्ति। अतः कर्तृगामिनि क्रियाफले आत्मनेपदं प्राप्तम्। किन्तु तद्बाधनार्थमयं योगः आरभ्यते। अभि–प्रति–अति इत्युपसर्गस्थले केवलं परस्मैपदं भवतु अन्यत्र तु उभयपदी अयं धातुः स्यादिति नियमयितुमिदमारभ्यते।

उदाहरणम् – अभिक्षिपति। प्रक्षिपति।अतिक्षिपति।

वह्–धातोः उभयपदित्वात् कर्तृगामिनि क्रियाफले आत्मनेपदे प्राप्ते विशिष्टोपसर्गयोगेन तत्रापि परस्मैपदविधानार्थमयं योग आरभ्यते –

[२६.१६] प्राद्वहः॥ (१.३.८१)।

सूत्रार्थः – प्र–उपसर्गपूर्वकात् वह्–धातोः परस्मैपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। प्रात् वहः इति सूत्रगतपदच्छेदः। प्रात् वहः इत्युभयमपि पञ्चम्येकवचनान्तम्। शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि परस्मैपदम् इत्यनयोः पदयोः अनुवृत्तिः भवति। तेन प्रागुक्तार्थः सिध्यति।

उदाहरणम् – प्रवहति।

मृष्धातोः कर्त्रभिप्राये क्रियाफले परस्मैपदविधानार्थं सूत्रमिदमारभ्यते –

[२६.१७] परेर्मृषः॥ (१.३.८१)

सूत्रार्थः – परि–उपसर्गपूर्वकात् मृष्धातोः परस्मैपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। परेः मृषः इति सूत्रगतपदच्छेदः। परेः मृषः इत्युभयमपि पञ्चम्येकवचनान्तम्। शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि परस्मैपदम् इत्यनयोः अनुवृत्तिः भवति। तेन प्रागुक्तार्थः सिध्यति।

उदाहरणम् – परिमृष्यति।

सूत्रार्थसमन्वयः – मृष तितिक्षायाम् इति दिवादिगणीयधातुः स्वरितेत् अस्ति। अतः स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्तम्। तद् बाधित्वा परेर्मृषः इति सूत्रेण परस्मैपदे परिमृष्यति इति रूपं सिध्यति।

भ्वादिगणीयात् मृषु सहने इति धातोः परि–उपसर्गपूर्वकात् प्रकृतसूत्रेण परस्मैपदे परिमर्षति इति रूपं भवति।

रम्–धातोः परस्मैपदविधानार्थं विधिसूत्रमिदमारभ्यते –

[२६.१८] व्याङ्परिभ्यो रमः॥ (१.३.८३)

सूत्रार्थः – वि–उपसर्गपूर्वकात् आङ्–उपसर्गपूर्वकात् परि–उपसर्गपूर्वकात् च रम्–धातोः परस्मैपदं विधीयते।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। व्याङ्परिभ्यः (५/३), रमः (५/१) इति सूत्रगतपदच्छेदः। विश्च आङ् च परिश्च तेषामितरेतरयोगद्वन्द्वे व्याङ्परयः तेभ्यः व्याङ्परिभ्यः। शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि परस्मैपदम् इत्यनयोः अनुवृत्तिः भवति। तेन प्रागुक्तार्थः सिध्यति।

उदाहरणम् – विरमति । आरमति। परिरमति।

उप–उपसर्गपूर्वकात् रम्–धातोरपि परस्मैपदविधानार्थं सूत्रमिदमारभ्यते–

[२६.१९] विभाषाकर्मकात्॥ (१.३.८५)

सूत्रार्थः –उप–उपसर्गपूर्वक–रम्धातोः विकल्पेन परस्मैपदं विधीयते अकर्मकस्थले।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। विभाषा (अव्ययम्) अकर्मकात् (५/१) इति सूत्रगतपदच्छेदः। उपाच्च इत्यतः उपात् इत्यस्यानुवृत्तिर्भवति। व्याङ्परिभ्यो रमः इत्यतः रमः इत्यस्य, शेषात् कर्तरि परस्मैपदम् इत्यतः परस्मैपदम् इत्यस्य चानुवृत्तिर्भवति। तेन पूर्वोक्तार्थः सिध्यति।

उदाहरणम् – उपरमति, उपरमते।

सूत्रार्थसमन्वयः – उपरमति इत्यत्र निवृत्तो भवति इत्यर्थोऽस्तीति हेतोः उप–रम् धातुः अकर्मकावस्थायां वर्तते। अतः प्रकृतसूत्रेण विकल्पेन परस्मैपदं भवति, पक्षे तु उपरमते इत्यात्मनेपदमपि भवति।

णिचश्च इत्यनेन परस्मैपदात्मनेपदयोः प्राप्तयोः केवलं परस्मैपदविधानार्थं सूत्रमिदमारभ्यते –

[२६.२०] बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ (१.३.८४)

सूत्रार्थः–बुध–युध–नश–जन–इङ–प्रु–द्रु–स्रु इत्येतेभ्यो धातुभ्यः परस्मैपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यः (५/३), णेः (५/१) इति सूत्रगतपदच्छेदः। बुधश्च युधश्च नशश्च जनश्च इङ् च प्रुश्च द्रुश्च स्रुश्च तेषामितरेतरयोगद्वन्द्वे बुधयुधनशजनेङ्प्रुद्रुस्रुवः तेभ्यः बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यः। शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि परस्मैपदम् इत्यनयोः अनुवृत्तिः भवति। णिः इत्यनेन णिजन्तो गृह्यते। एवञ्च सूत्रार्थस्तावत् – बुध–युध–नश–जन–इङ–प्रु–द्रु–स्रु इत्येतेभ्यो ण्यन्तेभ्यः धातुभ्यः परस्मैपदं भवति इति।

अत्र विशेषः – पूर्वोक्तेभ्यो धातुभ्यो यदि णिच्प्रत्ययो भवति तदा णिचश्च इत्यनेन परगामिनि क्रियाफले विवक्षिते परस्मैपदं भवति, कर्तृगामिनि क्रियाफले विवक्षिते आत्मनेपदं भवति इति अवस्थायां कर्तृगामिनि क्रियाफलेऽपि परस्मैपदं भवतु इत्येतदर्थं सूत्रमिदमारभ्यते। अतः योगोऽयं णिचश्च इति सूत्रस्यापवादः।

उदाहरणम्– बोधयति पद्मम्। योधयति काष्ठानि। नाशयति दुःखम्। जनयति सुखम्। अध्यापयति वेदम्। प्रावयति प्रापयतीत्यर्थः। द्रावयति विलापयतीत्यर्थः। स्रावयति स्यन्दयतीत्यर्थः।

णिचश्च इत्यनेन उभयोः पदयोः प्राप्तयोः केवलं परस्मैपदविधानार्थं सूत्रमिदमारभ्यते –

[२६.२१] निगरणचलनार्थेभ्यश्च॥ (१.३.८७)

सूत्रार्थः – भक्षणार्थकेभ्यः चलनार्थकेभ्यः च ण्यन्तेभ्यो धातुभ्यः कर्तृगामिनि क्रियाफलेऽपि परस्मैपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकस्ति। निगरणचलनार्थेभ्यः (५/३) च इति सूत्रगतपदच्छेदः। निगरणं च चलनं च निगरणचलने इति इतरेतरयोगद्वन्द्वः, तौ अर्थौ येषां ते निगरणचलनार्थाः तेभ्यः निगरणचलनार्थेभ्यः। शेषात् कर्तरि परस्मैपदम् इत्यतःकर्तरि परस्मैपदम् इत्यस्य च अनुवृत्तिः भवति। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः इत्यतः णेः इत्यस्यानुवृत्तिर्भवति। भक्षणार्थकेभ्यः चलनार्थकेभ्यः च ण्यन्तेभ्यो धातुभ्यः कर्तृगामिनि क्रियाफलेऽपि परस्मैपदं भवति इति प्रागुक्तार्थः सिध्यति।

उदाहरणम् – निगारयति। आशयति। आदयति। खादयति। भोजयति। चलयति। कम्पयति।

कर्तृगामिनि क्रियाफले आत्मनेपदे प्राप्ते तत्र परस्मैपदविधानार्थं, परगामिनि क्रियाफले च परस्मैपदविधानार्थम् इत्युभयत्रापि परस्मैपदविधानार्थं सूत्रमिदमारभ्यते –

[२६.२२] अणावकर्मकाच्चित्तवत्कर्तृकात्॥ (१.३.८८)

सूत्रार्थः – अणावकर्मकाच्चित्तवत्कर्तृकात् ण्यन्तात् परस्मैपदं स्यात्।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। अणौ (७/१), अकर्मकात् (५/१), चित्तवत्कर्तृकात् (५/१) इति सूत्रगतपदच्छेदः। न णिः अणिः तस्मिन् अणौ। न विद्यते कर्म यस्य स अकर्मकः, तस्मात् अकर्मकात्, बहुव्रीहिः। चित्तम् अस्य अस्तीति चित्तवान्। चित्तवान् कर्ता यस्य स चित्तवत्कर्तृकः तस्मात् चित्तवत्कर्तृकात्, बहुव्रीहिः। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः इत्यतः णेः इत्यस्य, शेषात् कर्तरि परस्मैपदम् इत्यतः परस्मैपदम् इत्यस्य च अनुवृत्तिर्भवति। एवञ्च अण्यन्तावस्थायां यः धातुः अकर्मकः चित्तवत्कर्तृकः च भवति तस्मात् धातोः ण्यन्तावस्थायां कर्तृगामिनि क्रियाफलेऽपि परस्मैपदं भवति इति सूत्रस्य सम्पूर्णार्थः।

विशेषः – सूत्रमिदं णिचशच इति योगस्य अपवादभूतम्।

उदाहरणम् – शेते कृष्णः, तं गोपी शाययति।

सूत्रार्थसमन्वयः – शीङ् स्वप्ने इति धातुः अण्यन्तावस्थायाम् अकर्मक एवास्ति। किञ्च अण्यन्तावस्थायां कर्ता कृष्णः चित्तवान् अस्ति। अतः शीधातुरपि चित्तवत्कर्तृकः अस्ति। ततः शीधातोः णिचि वृद्धौ आयादेशे शायी इति णिजन्तधातोः णिचश्च इत्यनेन कर्तृगामिनि क्रियाफले आत्मनेपदे प्राप्ते अणावकर्मकाच्चित्तवत्कर्तृकात् इति प्रकृतसूत्रेण केवलं परस्मैपदं विधीयते। तेन शाययति इत्येव रूपं भवति।

अधुना कर्तृगामिनि क्रियाफलेऽपि परस्मैपदे प्राप्ते तं बाधितुं सूत्रमिदमारभ्यते –

[२६.२३] न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ (१.३.८९)

सूत्रार्थः – पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ण्यन्तात् परस्मैपदं न भवति।

सूत्रव्याख्या – निषेधसूत्रेऽस्मिन् पदद्वयमस्ति। न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः (५/१) इति सूत्रगतपदच्छेदः। आङ्–पूर्वो यम आङ्यमः, आङ्–पूर्वो यस आङ्यसः, परिपूर्वो मुहः परिमुहः। पाश्च दमिश्च आङ्यमश्च आङ्यसश्च परिमुहश्च रुचिश्च नृतिश्च वदश्च वस् च तेषां समाहारद्वन्द्वे पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवस्, तस्मात् पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः इत्यतः णेः इत्यस्य, शेषात् कर्तरि परस्मैपदम् इत्यतः परस्मैपदम् इत्यस्य च अनुवृत्तिर्भवति। एवञ्च पा, दम्, आङ्पूर्वकः यम्, आङ्पूर्वकः यस्, परिपूर्वकः यस्, परिपूर्वकः मुह्, रुच्, नृत्, वद्, वस् इत्येतेभ्यः धातुभ्यः ण्यन्तेभ्यः परस्मैपदं न भवति इति सूत्रार्थः।

पा पाने इति भ्वादिगणीयधातोः निगरणार्थः। अतः निगरणचलनार्थेभ्यश्च इत्येनन कर्तृगामिनि क्रियाफले परस्मैपदे प्राप्ते तन्निषेधार्थमिदं सूत्रम्।

अत्र विशेषः – णिचश्च इति योगेन कर्तृगामिनि क्रियाफले आत्मनेपदे सिद्धे तत्तद्विशेषावस्थायां बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः, अणावकर्मकाच्चित्तवत्कर्तृकात् , निगरणचलनार्थेभ्यश्च इति सूत्रत्रयेण कर्तृगामिनि क्रियाफलेऽपि परस्मैपदं विहितम् इति इदं सूत्रत्रयं णिचश्च इति योगस्य अपवादभूतम्। अधुना प्रकृतसूत्रेण अणावकर्मकाच्चित्तवत्कर्तृकात् , निगरणचलनार्थेभ्यश्च इति सूत्रद्वयेन कर्तृगामिनि क्रियाफले प्राप्तस्य परस्मैपदस्य निषेधो विधीयते। इदानीमुच्यते– किं स निषेधः परगामिनि क्रियाफले प्राप्तस्य परस्मैपदस्य कृतेऽपि। तदा उच्यते– तत्र नायं निषेधः। केवलं कर्तृगामिनि क्रियाफले प्राप्तस्य परस्मैपदस्य एव निषेधः। स्वतः कर्तृगामिनि क्रियाफले आत्मनेपदं, परगामिनि च परस्मैपदं भवति एव इति असन्देहः। तेन पाययति वत्सान् पयः इत्यादिप्रयोगः साधु भवति।

उदाहरणम् – पाययते। दमयते। आयामयते। आयासयते। परिमोहयते। रोचयते। नर्तयते। वादयते। वासयते।

सूत्रार्थसमन्वयः –

१. **पाययते** – इत्यत्र भ्वादिगणीयः पा पाने इति धातुः अस्ति। तस्मात् णिचि शाच्छासाह्वाव्यावेपां युक् इत्यनेन युगागमे अनुबन्धलोपे पायि इति जायते। ततः निगरणार्थकत्वात् कर्तृगामिनि क्रियाफले णिचश्च इत्यनेन प्राप्तम् आत्मनेपदं निगरणचलनार्थेभ्यश्च इत्येनन बाधित्वा केवले परस्मैपदे प्राप्ते तस्य प्रकृतसूत्रेण निषेधे पाययते इति रूपं भवति।

२. **दमयते** – दमु उपशमे इति दिवादिगणीयधातोः णिचि उपधावृद्धौ दाम् इ इति जाते जनीजृष्क्नसुरञ्जोऽमन्ताश्च इति गणसूत्रेण मिद्वद्भावे मितां ह्रस्वः इत्यनेन उपधाह्रस्वे दमि इति जायते। ततः णिचश्च इत्येनन प्राप्तम् आत्मनेपदं बाधित्वा अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन दमयते इति रूपं सिध्यति।

३. **आयामयते** – आङ्–उपसर्गपूर्वकात् यम उपरमे इति भ्वादिगणीयधातोः णिचि उपधावृद्धौ आयामि इति जायते। ततः णिचश्च इत्येनन प्राप्तम् आत्मनेपदं बाधित्वा अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन आयामयते इति रूपं जायते।

४. **आयासयते** – आङ्–उपसर्गपूर्वकात् यसु प्रयत्ने इति दिवादिगणीयधातोः णिचि उपधावृद्धौ आयासि इति जायते। ततः णिचश्च इत्येनन प्राप्तम् आत्मनेपदं बाधित्वा अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन आयासयते इति रूपं जायते।

५. **परिमोहयते**– परि–उपसर्गपूर्वकात् मुह वैचित्ये इति दिवादिगणायधातोः णिचि लघूपधगुणे परिमोहि इति जायते। ततः णिचश्च इत्येनन प्राप्तम् आत्मनेपदं बाधित्वा

अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन परिमोहयते इति रूपं जायते।

६. **रोचयते**– रुच दीप्तावभिप्रीतौ च इति भ्वादिगणीयधातोः णिचि लघूपधगुणे रोचि इति णिजन्तधातोः णिचश्च इत्येनन प्राप्तम् आत्मनेपदम् अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन रोचयते इति रूपं जायते।

७. **नर्तयते**– नृती गात्रविक्षेपे इति दिवादिगणायधातोः णिचि लघूपधगुणे रोचि इति णिजन्तधातोः णिचश्च इत्येनन प्राप्तम् आत्मनेपदं बाधित्वा अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन नर्तयते इति रूपं जायते।

८. **वादयते**– वद व्यक्तायां वाचि इति भ्वादिगणीयधातोः णिचि उपधावृद्धौ वादि इति णिजन्तधातोः णिचश्च इत्येनन प्राप्तम् आत्मनेपदं बाधित्वा अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन वादयते इति रूपं जायते।

९. **वासयते**– वस निवासे इति वसगणीयधातोः णिचि उपधावृद्धौ वासि इति णिजन्तधातोः णिचश्च इत्येनन प्राप्तम् आत्मनेपदं बाधित्वा अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येनन केवले परस्मैपदे प्राप्ते प्रकृतसूत्रेण तस्य निषेधः। तेन वासयते इति रूपं जायते।

पाठगतप्रश्नाः-३

१७. निगरणचलनार्थेभ्यश्च इति सूत्रस्य कोऽर्थः।

१८. उपरमति इत्यत्र परस्मैपदविधायकसूत्रं किम्।

१९. व्याङ्परिभ्यो रमः इत्यस्य उदाहरणानि लिखत।

२०. प्राद्वहः इत्यनेन किं विधीयते परस्मैपदम् आत्मनेपदं वा।

२१. न पादम्याङ् इत्यादिसूत्रं पूरयत।

२२. अणावकर्मकाच्चित्तवत्कर्तृकात् इत्यस्य उदाहरणं किम्।

पाठसारः

अनुदात्तेत्धातोः, ङित्धातोः च आत्मनेपदं भवति। पुनः स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्येनन क्रियाफलस्य कर्तृगामित्वे आत्मनेपदं भवति , क्रियाफलस्य परगामित्वे तु परस्मैपदं भवति इत्युच्यते। किञ्च शेषात्कर्तरि परस्मैपदम् इत्यनेन आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् इति सामान्येन परस्मैपदात्मनेपदविधानमुक्त्वा ततः विशेषार्थं पाठोऽयमारब्धः इति ज्ञेयम्। क्रियाया विनिमयार्थे द्योत्ये आत्मनेपदं भवति व्यतिलुनीते इत्यादौ, क्वचिच्च तस्य निषेधः न गतिहिंसार्थेभ्यः

इत्यनेन, व्यतिगच्छन्ति इत्यादौ। क्वचित् उपसर्गयोगेन परस्मैपदिधातोरपि आत्मनेपदं भवति। कुत्रचित् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन परगामिनि क्रियाफले प्राप्तं परस्मैपदं बाधित्वा आत्मनेपदं विधीयते विक्रीणीते इत्यादौ। किञ्च सन्प्रत्ययात् पूर्वं यः आत्मनेपदी धातुः, तेन तुल्यं सन्नन्तधातोरपि आत्मनेपदं भवति। परगामिनि क्रियाफलेऽपि आत्मनेपदविधानं भवति तथा च सूत्रं– गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। कृधातुः ञित् अस्ति, अतः परगामिनि क्रियाफले परस्मैपदं प्राप्तमस्ति अत एव कर्तृगामिनि क्रियाफले परस्मैपदविधानार्थम् अनुपराभ्यां क्रियः इति सूत्रमारभ्यते। पुनः परस्मैपदप्रकरणे एको विशेषः ज्ञेयः यत् शेषात् कर्तरि परस्मैपदम् इत्यतः कर्तरि इत्यपि पदम् अनुवर्तते। तस्मात् परस्मैपदप्रकरणस्थसूत्रैः परस्मैपदविधानरूपो यो विशेष उच्यते स तु कर्तृवाच्ये भवति, तेन भावकर्मस्थले आत्मनेपदं भवति इति न संशयः इति सम्यक् अवधार्यताम्। तत्र कर्तृगामिनि क्रियाफलेऽपि परस्मैपदविधानार्थं बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः, निगरणचलनार्थेभ्यश्च, अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येतत्सूत्रत्रयमारब्धम्। पुनः तन्निषेधसूत्रमपि आरब्धम्, न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः इति। एवं तत्र तत्र विशेषा ज्ञेयाः।

पाठान्तप्रश्नाः

१. गन्धनावक्षेपण इति सूत्रं प्रपूर्य व्याख्यात।

२. कर्तरि कर्मव्यतिहारे इति सूत्रं सोदाहरणं व्याख्यात।

३. विपराभ्यां जेः इति सूत्रं सोदाहरणं व्याख्यात।

४. पूर्ववत्सनः इति सूत्रं सोदाहरणं व्याख्यात।

५. दाणश्च सा चेच्चतुर्थ्यर्थे इति सूत्रं सोदाहरणं व्याख्यात।

६. अनुपराभ्यां कृञः इति सूत्रं सोदाहरणं व्याख्यात।

७. बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः इति सूत्रं सोदाहरणं व्याख्यात।

८. अभिप्रत्यतिभ्यः क्षिपः इति सूत्रं सोदाहरणं व्याख्यात।

९. न पादम्याङ् इत्यादिसूत्रं प्रपूर्य व्याख्यात।

१०. अणावकर्मकाच्चित्तवत्कर्तृकात् इति सूत्रं सोदाहरणं व्याख्यात।

पाठगतप्रश्नोत्तराणि

उत्तराणि–१

१. क्रियाविनिमयः।

२. भवति। सन्तिष्ठते।

३. विजयेत। पराजयते।

४. अनुदात्तङित आत्मनेपदम् ।

५. न गतिहिंसार्थेभ्य इति निषेधात्।

६. निविशते।

७. विक्रीणीते।

८. अन्यस्य योग्यछेदनक्रियाम् अन्यः करोति इत्यर्थः।

उत्तराणि–२

९. शतम् अपलपति।

१०. अपलापेऽर्थे।

११. रथेन सञ्चरते।

१२. गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः।

१३. सूचयति।

१४. सन्प्रत्ययात् पूर्वं यः आत्मनेपदी धातुः तेन तुल्यं सन्नन्तधातोरपि आत्मनेपदं भवति।

१५. प्रकथयति।

१६. दाणश्च सा चेच्चतुर्थ्यर्थे।

उत्तराणि–३

१७. भक्षणार्थकेभ्यः चलनार्थकेभ्यः च ण्यन्तेभ्यो धातुभ्यः कर्तृगामिनि क्रियाफलेपि परस्मैपदं भवति।

१८. विभाषाकर्मकात्।

१९. विरमति । आरमति। परिरमति।

२०. परस्मैपदम् ।

२१. न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः।

२२. शेते कृष्णः, तं गोपी शाययति।

॥ इति षड्विंशः पाठः ॥

२७

346sk27

भावकर्मप्रकरणम्

प्रस्तावना

संस्कृते तु कर्तृवाच्यं कर्मवाच्यं भाववाच्यं चेति वाच्यत्रयमस्ति। क्रियया यदा प्राधान्येन कर्ता वाच्यो भवति तदा कर्तृवाच्यं भवति। अत्र तु कर्तरि प्रथमाविभक्तिः भवति, कर्त्रनुसारं क्रियायां वचनपुरुषा भवन्ति यथा रामः पठति, तौ विद्यालयं गच्छतः इत्यादिवाक्येषु कर्त्रनुसारं वचनपुरुषाः सन्ति। यदा च क्रियया प्राधान्येन कर्म वाच्यं भवति तदा कर्मवाच्यं भवति। अत्र तु कर्मानुसारं क्रियायां वचनपुरुषा भवन्ति, किञ्च कर्मणि प्रथमाविभक्तिः कर्तरि च तृतीयाविभक्तिः भवति। तद्यथा–रामेण पुस्तकं पठ्यते, ताभ्यां विद्यालयः गम्यते इत्यादिवाक्येषु कर्मानुसारं वचनपुरुषाः सन्ति। अकर्मकधातुस्थले तु क्रियाया एव प्राधान्यं भवति न तु कर्तुः इति हेतोः तद्भाववाच्यमित्युच्यते। अत्र तु कर्तरि तृतीयाविभक्तिः भवति, क्रियायां तु प्रथपुरुषैकवचनमात्रमेव भवति। लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रे कर्ता, कर्म, भावः च इति लकारार्थत्रयमुक्तमस्ति। सकर्मकेभ्यः अकर्मकेभ्यश्च धातुभ्यः कर्तरि लकारा भवन्ति इति भवन्तः पूर्वं ज्ञातवन्तः। अधुना सकर्मकेभ्यः धातुभ्यः कर्मणि अकर्मकेभ्यश्च धातुभ्यः भावे लकारा भवन्ति इति प्रदर्शयितुं प्रकरणमिदमारभ्यते। अत इदं प्रकरणं भावकर्मप्रक्रिया इत्यच्युते। भाववाच्ये केवलं प्रथमपुरुषः एकवचनं च भवति किन्तु यदा धातुः सकर्मकतां लभते तदा कर्मवाच्ये सर्वे पुरुषाः सर्वाणि च वचनानि भवन्ति इत्येतत् सर्वम् अग्रे स्पष्टं भविष्यति।

(कर्तृवाच्यम् कर्मवाच्यम् प्रेष्टार्थप्रतिपादनाय इत्यादिशब्दाः व्याकरणेन व्युत्पादयितुं न शक्याः। सम्प्रति प्रादेशिकभाषासु अस्य बहुलप्रयोगः वर्तते। अतः तथा प्रकटितम्। परन्तु कर्तरि प्रयोगः – कर्तृवाच्यम्, कर्णणि प्रयोगः – कर्मवाच्यम् इति व्यवहारः भवति। यथासम्भवम् कर्तृवाच्यादिपदानां व्यवहारः वरम्।)

उद्देश्यानि

इमं पाठं पठित्वा भवान् –

- भावपदार्थं ज्ञास्यति स च कस्यार्थो भवति इत्यपि ज्ञास्यति।
- भाववाच्यं कर्मवाच्यं च किं भवतीति ज्ञास्यति।
- भाववाच्यकर्मवाच्ययोः को विशेष इति ज्ञास्यति।
- तत्तत्स्थलेषु विशेषसूत्राणां कार्यं ज्ञास्यति।
- भूधातोः भावे प्रत्येकं लकारस्य रूपं ज्ञास्यति।
- सर्वोपरि भावे कर्मणि च प्रयोगपरिवर्तनं कर्तुं प्रभवेत्।

भाववाच्ये कर्मवाच्ये च धातुभ्यः परस्मैपदात्मनेपदयोः कतरत् पदं भवति इति दर्शयितुं विधिसूत्रमिदमारभ्यते-

[२७.१] भावकर्मणोः॥ (१.३.१३)

सूत्रार्थः – लस्य आत्मनेपदं भवति।

सूत्रव्याख्या – विधिसूत्रमिदम् एकपदात्मकमस्ति। लः कर्मणि च भावे चाकर्मकेभ्यः इत्यतः लः इति, अनुदात्तङित आत्मनेपदम् इत्यतः आत्मनेपदम् इति पदमनुवर्तते। भावः च कर्म च तयोः इतरेतरयोगद्वन्द्वे भावकर्मणी, तयोः भावकर्मणोः इति सप्तमीद्विवचनान्तम्। एवञ्च भावार्थे कर्मार्थे च धातोः विहितस्य लकारस्य स्थाने आत्मनेपदप्रत्ययो भवति इति सूत्रार्थः। एवञ्च भाववाच्ये कर्मवाच्ये च आत्मनेपदमेव भवति, परस्मैपदं तु कदापि न भवति। तत्र धातुः आत्मनेपदी परस्मैपदी उभयपदी वा भवतु भाववाच्ये कर्मवाच्ये च आत्मनेपदमेव भवति इति निश्चप्रचम्।

अत्र विशेषः – फलं व्यापारश्चेति धातोः अर्थद्वयं भवति। तत्र व्यापारो नाम क्रिया भावो वा। व्यापाराश्रयः कर्ता, फलाश्रयः च कर्म भवति। यदा कर्तरि एव फलव्यापारौ निहितौ भवतः तदा स धातुः अकर्मक इत्युच्यते। यथा देवदत्तः एधते इत्यत्र एध वृद्धौ इति धातुः अकर्मकोऽस्ति। अत्र वृद्धिरूपफलस्य तज्जनकक्रियायाः च आश्रयः देवदत्तः एव। अतः अयं धातुः अकर्मक इत्युच्यते। अत्र प्रश्नः – यदि धातोरेव अर्थः भावो भवति तदा लः कर्मणि च भावे चाकर्मकेभ्यः इत्यनेन किमर्थं भावार्थे लकारो भवति इति कथ्यते। तथा प्रश्ने सति उद्यते – भावः धातोरेव अर्थः किन्तु भावार्थकलकारेण केवलम् सोऽर्थः अनूद्यते न तु तदर्थस्य विधानं भवति। तर्हि एतावता स्पष्टं यत् यदा कर्म न भवति तदैव भाववाच्यं (impersonal voice) भवति। सकर्मकस्थले तु कर्मवाच्यं (passive voice) भवति। भावे लकारे सति कर्तृरूपेण युष्मद्–शब्देन अस्मद्–शब्देन सह वा सामान्याधिकरण्यं न भवति इति हेतोः केवलः प्रथमपुरुष एव भवति। मध्यमपुरुषार्थं युष्मद्शब्देन सह सामानाधिकरण्यमावश्यकम्, उत्तमपुरुषार्थम् अस्मद्–शब्देन सह सामानाधिकरण्यमावश्यकम्। भाववाच्ये तु ताभ्यां द्वाभ्यां सामानाधिकरण्यं न सम्भवति तस्मात् मध्यमोत्तमपुरुषौ न भवतः। फलतः केवलः प्रथमपुरुष एव भवति। यथा आस्यते त्वया, आस्यते मया।

अनयोः वाक्ययोः भावस्यैव प्राधान्यं भवति। स च भावः तिङ्वाच्यः एव, न तु युष्मदर्थः, अस्मदर्थो वा भवति। अतः नैव सामानाधिकरण्यमस्ति। तिङ्वाच्यभावो द्रव्यरूपो नास्ति। अतः द्वित्वादिप्रतीतिः नैव भवति। तस्मात् द्विवचनादिः नैव भवति किन्तु उत्सर्गतः एकवचनमेव भवति, एकवचनमुत्सर्गतः करिष्यते इति भाष्यवचनात्। द्वित्वादेः प्रतीतिः द्रव्ये एव सम्भवति यत्र लिङ्गसंख्याभ्यामन्वयो न भवति तत् अद्रव्यमित्युच्यते। एवञ्च भावस्य अद्रव्यरूपत्वात् द्वित्वादिसंख्या प्रतीता न भवति इति हेतोः उत्सर्गतः एकवचनं भवति। यतः संख्याया अविवक्षायामपि पदसाधुत्वार्थं सुप्तिङ्प्रत्यययोः यः कश्चित् स्यादेव। यतो हि नियमोऽस्ति अपदं न प्रयुञ्जीत। भावार्थे लकारे सति भाव उक्तो भवति कर्ता च अनुक्तो भवति, अतः अनभिहिते कर्तरि कर्तृकरणयोस्तृतीया इत्यनेन तृतीयाविभक्तिर्भवति– त्वया मया अन्यैर्वा भूयते इत्यादौ।

उदाहरणम् – भूयते। एतस्य प्रक्रिया अग्रे स्पष्टा भविष्यति।

पूर्वं भ्वादिप्रकरणेषु भवन्तः दृष्टवन्तः यत् तत्र तत्र शप्–श्यन्–श्लुः इत्यादिविकरणानि भवन्ति। किन्तु तत् कर्तृवाच्ये एव भवति। यथा कर्तरि शप् इत्यनेन विधीयमानं शप्–विकरणं कर्तरि एव भवति। तर्हि कर्मवाच्ये भाववाच्ये च कीदृशं विकरणं भवति इति पृच्छायाम् नूतनविकरणं प्रदर्शयितुं सूत्रमिदमारभ्यते–

[२७.२] सार्वधातुके यक्॥ (३.१.६७)

सूत्रार्थः – धातोः यक् भावकर्मवाचिनि सार्वधातुके।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकस्ति। सार्वधातुके (७/१), यक् (१/१) इति सूत्रगतपदच्छेदः। चिण्भावकर्मणोः इत्यतः भावकर्मणोः इति पदस्य, धातोरेकाचो हलादेः संश्च इत्यतः धातोः इति पदस्य च अनुवृत्तिर्भवति, प्रत्ययः परश्च इत्युभयमधिक्रियते। एवञ्च भावार्थे कर्मार्थे च सार्वधातुके प्रत्यये परतः धातोः यक्प्रत्ययो भवति इति सूत्रार्थः। यकः ककारः इत्संज्ञकः। अतः य इत्येव शिष्यते।

अत्र विशेषः– यकः कित्त्वस्य फलत्रयमस्ति।

१. सार्वधातुकार्धधातुकयोः इति गुणनिषेधः यथा भूयते इत्यत्र।

२. अपरं सम्प्रसारणम्। यथा– यजति इत्यस्य भावे इज्यते इति रूपम्। अत्र वचिस्वपियजादीनां किति इति सम्प्रसारणं भवति।

३. यकः कित्करणात् आद्यन्तौ टकितौ इति परिभाषया अन्त्यावयवो भवति।

उदाहरणम् – भूयते।

सूत्रार्थसमन्वयः – भूधातोः भावार्थे वर्तमानक्रियावृत्तित्वविवक्षायां वर्तमाने लट् इति लट्लकारे तत्स्थाने भावकर्मणोः इत्यनेन आत्मनेपदं विहितम्। तत्र भावेऽर्थे औत्सर्गिकम् एकवचनं भवति इति हेतोः तप्रत्यये भू त इति स्थिते तिङ्शित्सार्वधातुकम् इत्यनेन तप्रत्ययस्य सार्वधातुकसंज्ञायां सार्वधातुके यक् इति प्रकृतसूत्रेण यक् भवति। यतो हि अत्र भावार्थः सार्वधातुकप्रत्ययश्च अस्ति। यकः कित्त्वात् आद्यन्तौ टकितौ इति परिभाषया अन्त्यावयवे भू य त इति जाते सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते क्ङिति च इति गुणनिषेधे त इत्यत्रत्यस्य अकारस्य अचोऽन्त्यादि टि इत्यनेन टिसंज्ञायां टित आत्मनेपदानां टेरे इत्यनेन एत्त्वे भूयते इति रूपं सिध्यति।

भूधातोः भावे लुटि तादेशे यगपवादभूते तास्प्रत्यये भू तास् त इति स्थिते अग्रिमसूत्रमारभ्यते–

[२७.३] स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च॥ (६.४.६२)

सूत्रार्थः – उपदेशे योऽच् तदन्तानां हनादीनां च चिणीव अङ्गकार्यं वा स्यात् स्यादिषु भावकर्मणोर्गम्यमानयोः, स्यादीनामिडागमश्च।

सूत्रव्याख्या – अस्मिन् विधिसूत्रे अष्टौ पदानि सन्ति। स्यसिच्सीयुट्तासिषु (७/३), भावकर्मणोः (७/२), उपदेशे (७/१), अज्झनग्रहदृशां (६/३), वा (अव्ययम्), चिण्वत् (अव्ययम्), इट् (१/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। स्यश्च सिच्च सीयुट् च तासिश्च तेषामितरेतरयोगद्वन्द्वे स्यसिच्सीयुट्तासयः, तेषु स्यसिच्सीयुट्तासिषु। भावश्च कर्म च तयोः इतरेतरयोगद्वन्द्वे भावकर्मणी, भावकर्मणी तयोर्भावकर्मणोः। अच्च हनश्च ग्रहश्च दृश्च तेषामितरेतरयोगद्वन्द्वे अज्झनग्रहदृशस्तेषामज्झनग्रहदृशाम्। अङ्गस्य इत्यधिक्रियते। उपदेशे इत्यंशस्य अच् इत्यंशेन सह सम्बन्धः। अधिकृतस्य अङ्गस्य विशेषणं भवति अच् इति। अतः येन विधिस्तदन्तस्य इत्यनेन तदन्तविधौ उपदेशे योऽच् तदन्तानाम् अङ्गानामित्यर्थो भवति। तच्च अङ्गं धातुरेव भवति। एवञ्च सूत्रार्थस्तावत्– भावकर्मणोः विषये स्य–सिच्–सीयुट्–तास् इत्येतेषु परेषु सत्सु उपदेशे यो धातुः अच् तदन्तस्य धातोः स्थाने तथा हन्–ग्रह्–दृश्धातूनां स्थाने चिण्वत् अङ्गकार्यं विकल्पेन भवति किञ्च स्यादीनाम् इडागमो भवति।

उदाहरणम् – भाविता, भविता।

सूत्रार्थसमन्वयः – तथा च भूधातोः लुटि तप्रत्यये तासि भू तास् त इति जाते भूधातोः उपदेशे अजन्तत्वात् किञ्च अस्मात् भूधातोः उत्तरस्य तासः विद्यमानत्वात् प्रकृतसूत्रेण चिण्वद्भावे इडागमे च भू इतास् त इति जायते। ततः चिण्वद्भावात् अचो ञ्णिति इत्यनेन ऊकारस्य वृद्धौ औकारे आवादेशे भाव् इतास् त इति जाते तप्रत्ययस्य स्थाने डादेशे डित्त्वात् अभस्यापि टेः लोपे भाविता इति रूपं सिध्यति। चिण्वद्भावाभावपक्षे इडागमाभावपक्षे च तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन तासः वलादिलक्षणे इडागमे सार्वधातुकार्धधातुकयोः इत्यनेन भू इत्यस्य ऊकारस्य गुणे अवादेशे भव् इतास् ति इति जाते लुटः प्रथमस्य डारौरसः इत्यनेन तिपः स्थाने डादेशे अनुबन्धलोपे भवितास् इत्यत्र आस् इत्यस्य टिसंज्ञा भवति। ततः डित्त्वविधानसामर्थ्यात् अभस्यापि टेः लोपो भवति इति हेतोः आसः लोपे भविता इति रूपं जायते इति रूपद्वयं सिध्यति।

चिणि परे सति यानि कार्याणि भवन्ति तानि तावत्–

- अचो ञ्णिति, अत उपधाया चेति सूत्राभ्यां वृद्धिः।
- आतो युक् चिण्कृतोः इत्यनेन युगागमः।
- हो हन्तेर्ञ्णिन्नेषु इति योगेन हनः कुत्वम्।
- चिण्णमुलोर्दीर्घोऽन्यतरस्याम् इत्यनेन उपधाया वैकल्पिको वृद्धिः।

विशेषः – सूत्रेऽस्मिन् गृहीता धातवः – अजन्तधातुः, हन्, ग्रह्, दृश् च। सूत्रस्यास्य प्रवृत्तौ निमित्तानि– स्य, सिच्, सीयुट्, तासि। सूत्रस्य कार्यम्–चिण्वद्भावः, इडागमश्च। यस्मिन्पक्षे चिण्वद्भावः तस्मिन्पक्षे एव इडागमो भवति। चिण्वद्भावस्याभिप्रायः– प्रायः चत्वारि अङ्गकार्याणि चिणि परे सति भवन्ति–

I. वृद्धिः – अचो ञ्णिति अथवा अत उपधायाः इति णिन्निमित्तकवृद्धिः। स स्यादिषु परेष्वपि भवति। यथा– भू इट् स्य ते–भौ इ स्य ते –भाविष्यते। ग्रह् इट् स्य ते – ग्राहिष्यते।

II. युगागमः – आतो युक् चिण्कृतोः इति आदन्तधातोः युगागमो भवति। स स्यादिष्वपि भवति। यथा– दा इट् स्य ते–दा युक् इट् स्यते–दायिष्यते।

III. हन्तेर्घत्वम् – हो हन्तेर्ञ्णिन्नेषु इति हन्धातोः हकारस्य घकारो भवति । तच्च स्यादिष्वपि भवति। यथा– हन् इट् स्य ते–घन् इ स्य ते– घान् इ स्य ते–घानिष्यते।

IV. दीर्घः–चिण्णमुलोर्दीर्घोऽन्यतरस्याम् इति मित्–अङ्गस्य वैकल्पिको दीर्घो भवति। तच्च स्यादिष्वपि भवति। यथा–शम् इ स्यते–शामिष्यते/शमिष्यते। चिण्वद्भावप्रयोजनविषये शालिनीछन्दोनिर्मितो महाभाष्यस्थः रमणीयः श्लोकः–

चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति।

इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती।।

(महाभाष्यम्-६.४.६२)

उदाहरणानि अग्रिमसूत्रेषु दर्शयिष्यन्ते।

भूधातोः भावे लुङि च्लौ अडागमे तप्रत्यये अभू च्लि त इति स्थिते च्लेः सिच् इति सिचि प्राप्ते सूत्रमिदमारभ्यते–

[२७.४] चिण्भावकर्मणोः॥ (३.१.६६)

सूत्रार्थः – च्लेः चिण् स्यात् भावकर्मवाचिनि तशब्दे परे।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। चिण् (१/१), भावकर्मणोः (७/२) इति सूत्रगतपदच्छेदः। भावः च कर्म च तयोः इतरेतरयोगद्वन्द्वे भावकर्मणी, तयोर्भावकर्मणोः। च्लेः सिच् इत्यतः च्लेः इत्यनुवर्तते। चिण् ते पदः इत्यस्मात् ते इत्यस्यानुवृत्तिर्भवति। भावकर्मवाचिनि तशब्दे परे च्लेः स्थाने चिण्–आदेशो भवति इति सूत्रार्थः। चिणः णित्करणं वृद्ध्यर्थम्।

उदाहरणम् – अभावि त्वया मया अन्यैश्च इति भावे अर्थे उदाहरणम्।

सूत्रार्थसमन्वयः – अत्र भूधातोः भावेऽर्थे लुङि अ भू त इति स्थिते च्लि लुङि इत्यनेन च्लिप्रत्यये ततः च्लेः स्थाने च्लेः सिच् इत्यनेन सिचि प्राप्ते तं बाधित्वा प्रकृतसूत्रेण चिण्–आदेशो विधीयते। ततः चिणः णित्करणात् अचो ञ्णिति इत्यनेन वृद्धौ अ भाव् इत इति जाते चिणो लुक् इत्यनेन तप्रत्ययस्य लुकि अभावि इति रूपं सिध्यति।

सम्प्रति भूधातोः भाववाच्ये प्रत्येकं लकारेषु रूपाणि कथं भवन्ति इति सवाक्यम् अधः प्रदर्श्यते –

लट्	भूयते त्वया मया अन्यैश्च ।
लिट्	बभूवे त्वया मया अन्यैश्च।
लुट्	भाविता, भविता त्वया मया अन्यैश्च।
लृट्	भाविष्यते, भविष्यते त्वया मया अन्यैश्च।

लोट्	भूयताम् त्वया मया अन्यैश्च।
लङ्	अभूयत त्वया मया अन्यैश्च।
विधिलिङ्	भूयेत त्वया मया अन्यैश्च।
आशीर्लिङ्	भाविषीष्ट, भविषीष्ट त्वया मया अन्यैश्च।
लुङ्	अभावि त्वया मया अन्यैश्च।
लृङ्	अभाविष्यत, अभविष्यत त्वया मया अन्यैश्च।

अत्र ध्येयम् – अकर्मकधातुः कदाचित् उपसर्गवशात् सकर्मको भवति। यथा भूधातुः अकर्मकः किन्तु अनु इत्युपसर्गयोगेन अनुभवार्थः प्रतीयते। यथा देवदत्तः आनन्दम् अनुभवति इत्यत्र अनुपूर्वकभूधातुः सकर्मकतां लभते। अतः अस्य वाक्यस्य कर्मवाच्ये प्रयोगपरिवर्तनं क्रियते चेत् देवदत्तेन आनन्दः अनुभूयते इति प्रयोगो भविष्यति। अतः देवदत्तेन आनन्दः **अनुभूयते** इत्यत्र अनुभूयते इति **कर्मार्थे** उदाहरणम्। अत्र कर्मणि लकारः। तस्मात् कर्म तिङा उक्तमिति हेतोः आनन्दः इत्यत्र नैव कर्मणि द्वितीयाविभक्तिः, अपि तु प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इत्यनेन प्रातिपदिकार्थे प्रथमाविभक्तिः। कर्म उक्तमस्ति इति हेतोः अन्येषां सर्वेषामनुक्तत्वात् कर्ता अनुक्तो भवति। तस्मादेव कर्तृकरणयोस्तृतीया इत्यनेन अनुक्तकर्तरि तृतीया विभक्तिर्जायते अतः देवदत्तेन इत्यत्र तृतीयाविभक्तिः। भाववाच्ये प्रथमपुरुषैकवचनमात्रम् भवति किन्तु सकर्मकस्थले कर्मवाच्ये सर्वे पुरुषाः सर्वाणि च वचनानि भवन्ति इति सम्यक् स्मर्तव्यम्। किञ्च कर्मणो वचनानुसारं तङि वचनं भवति, अतः अनुभूयते इत्यत्र एकवचनं भवति। एतदतिरिक्तानि उदाहरणानि अत्र प्रदर्श्यन्ते तान् च प्रयोगान् कृपया पश्यत–

- प्रथमपुरुषः कर्ता–चैत्रेण चैत्रमैत्राभ्याम् चैत्रमैत्रगौपालैः आनन्दः अनुभूयते, आनन्दौ अनुभूयेते, आनन्दा अनुभूयन्ते।
- मध्यमपुरुषः कर्ता–त्वया युवाभ्याम् युष्माभिः आनन्दः अनुभूयते, आनन्दौ अनुभूयेते, आनन्दा अनुभूयन्ते।
- उत्तमपुरुषः कर्ता–मया आवाभ्याम् अस्माभिः आनन्दः अनुभूयते, आनन्दौ अनुभूयेते, आनन्दा अनुभूयन्ते।

  किञ्च युष्मदर्थः यदि कर्म भवति तदा युष्मदर्थस्य क्रियायाम् मध्यमपुरुषो भवति–
- प्रथमपुरुषः कर्ता–चैत्रेण चैत्रमैत्राभ्याम् चैत्रमैत्रगौपालैः त्वम् अनुभूयसे, युवाम् अनुभूयेथे, यूयम् अनुभूयध्वे।
- उत्तमपुरुषः कर्ता–मया आवाभ्याम् अस्माभिः त्वम् अनुभूयसे, युवाम् अनुभूयेथे, यूयम् अनुभूयध्वे।

  यदि अस्मदर्थः कर्म भवति तदास्मदर्थस्य क्रियायाम् उत्तमपुरुषो भवति–

- प्रथमपुरुषः कर्ता– चैत्रेण चैत्रमैत्राभ्याम् चैत्रमैत्रगौपालैः अहम् अनुभूये, आवाम् अनुभूयावहे, वयम् अनुभूयामहे।
- मध्यमपुरुषः कर्ता– त्वया युवाभ्याम् युष्माभिः अहम् अनुभूये, आवाम् अनुभूयावहे, वयम् अनुभूयामहे। एवम् अन्यत्रापि चिन्त्यताम्।

पाठगतप्रश्नाः-१

२३. अकर्मकेभ्यो धातुभ्यः कस्मिन्नर्थे लकारो भवति।

२४. सकर्मकेभ्यो धातुभ्यः कस्मिन्नर्थे लकारो भवति।

२५. भावे कर्मणि च को लकारो भवति।

२६. भावकर्मणोः आत्मनेपदविधायकसूत्रं किम्।

२७. चिण्भावकर्मणोः इति सूत्रार्थं लिखत।

२८. भूधातोः भावे लुङि च किं रूपम्।

२९. चिणि परे सति कति अङ्गकार्याणि भवन्ति।

३०. भावे सर्वे वचनपुरुषाः भवन्ति। किमिदंसाधु असाधु वा।

३१. कर्मणि सर्वे वचनपुरुषाः भवन्ति। किमिदं साधु असाधु वा।

३२. भावे कीदृशा वचनपुरुषाः भवन्ति।

३३. अनुभूयते इति किं सकर्मकः।

३४. स्यसिच्-आदिसूत्रं पूरयत।

लभ्धातोः लुङि प्रथमपुरुषैकचने च्लेः चिण्–आदेशे अलभ् इ त इति स्थिते सूत्रमिदमारभ्यते –

[२७.५] विभाषा चिण्णमुलोः॥ (७.१.६९)

सूत्रार्थः – लभेः नुमागमो वा स्यात् चिण्णमुलोः परयोः।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। विभाषा (१/१), चिण्णमुलोः (७/२) इति सूत्रगतपदच्छेदः। चिण् च णमुल् च तयोरितरेतरयोगद्वन्द्वे चिण्णमुलौ, तयोः चिण्णमुलोः। लभेश्च इत्यतः लभेः इत्यस्य किञ्च इदितो नुम् धातोः इत्यस्मात् नुम् इत्यस्य चानुवृत्तिर्भवति। एवञ्च चिणि परतः अथवा णमुलि परतः लभ्धातोः विकल्पेन नुम्–आगमो भवति इति सूत्रार्थः।

विशेषः– सूत्रेऽस्मिन् व्यवस्थितविभाषा आश्रीयते। अतः उपसर्गरहितात् धातोः विकल्पेन नुमागमो भवति। सोपसर्गलभ्धातोः तु नित्यमेव नुमागमो भवति। अतः उपालम्भि इति रूपं भवति न तु उपालाभि।

उदाहरणम् – अलम्भि, अलाभि।

सूत्रार्थसमन्वयः – तथा च लभ्धातोः लुङि तप्रत्यये चिणि अलभ् इ त इति जायते। तत्र च चिण् परोऽस्ति इति हेतोः प्रकृतसूत्रेण विकल्पेन नुमागमो भवति। ततः नकारस्य अनुस्वारे अनुस्वारस्य च परसवर्णे चिणो लुक् इत्यनेन तप्रत्ययस्य लुकि अलम्भि इति रूपं सिध्यति। यदा तु न नुम् तदा चिणः णित्त्वात् उपधावृद्धौ अलाभि इति रूपं सिध्यति।

भञ्ज आमर्दने इति धातोः कर्मवाच्ये लुङि प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये यकि च्लेः चिणि अभन्ज् इ त इति स्थिते सूत्रमिदमारभ्यते–

[२७.६] भञ्जेश्चिणि ॥ (६.४.३३)

सूत्रार्थः – भञ्जेः चिणि नलोपो वा स्यात्।

सूत्रव्याख्या – सूत्रमिदं पदद्वयात्मकमस्ति। भञ्जेः (६/१), चिणि (७/१) इति सूत्रगतपदच्छेदः। श्नान्नलोपः इत्यतः नलोपः इति पदस्यानुवृत्तिर्भवति। अपि च जान्तनशां विभाषा इत्यतः विभाषा इत्यस्यानुवृत्तिर्भवति। तथा च चिणि परतः भन्ज्–धातोः नकारस्य विकल्पेन लोपो भवति इति सूत्रार्थः।

उदाहरणम् – अभाजि, अभञ्जि।

सूत्रार्थसमन्वयः – अत्र भन्ज्–धातोः लुङि अभन्ज् इत इति स्थिते प्रकृतसूत्रेण नकारस्य लोपो भवति। यतो हि अत्र भन्ज्धातोः परं चिण्प्रत्ययोऽस्ति। ततः अत उपधायाः इत्यनेन उपधावृद्धौ अभाज् इत इति जाते चिणो लुक् इत्यनेन तकारस्य लोपे अभाजि इति सिद्धं भवति। यदा तु नकारस्य लोपो न भवति तदा उपधायाम् अकारो न भवति तस्मात् वृद्धिरपि न भवति अतः अभञ्जि इति रूपमपि सिध्यति।

तनु विस्तारे इति सकर्मकधातोः कर्मणि लटि तादेशे यक्–विकरणे तन् य त इति स्थिते सूत्रमिदमारभ्यते –

[२७.७] तनोतर्यकि॥ (६.४.४४)

सूत्रार्थः – तनोतेः आकारः अन्तादेशो वा स्यात् यकि।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। तनोतेः (६/१), यकि (७/१) इति सूत्रगतपतच्छेदः। विड्वनोरनुनासिकस्यात् इत्यतः आत् इत्यस्यानुवृत्तिर्भवति। ये विभाषा इत्यस्मात् विभाषा इत्यस्य च अनुवृत्तिर्भवति। ततः तन्धातोः स्थाने विकल्पेन आकारः अन्तादेशो भवति यकि परतः इति सूत्रार्थः। अलोन्त्यस्य इति परिभाषया (अन्त्यस्य) नकारस्यैव अयमादेशो भवति।

उदाहरणम् – तायते, तन्यते।

सूत्रार्थसमन्वयः – एवञ्च तन् य त इति स्थिते प्रकृतसूत्रेण नकारस्य स्थाने आकारादेशो भवति। यतो हि अत्र तनः यक् विहितोऽस्ति। ततः सवर्णदीर्घे च तायत इति जाते टेः एत्त्वे तायते इति रूपं सिध्यति। आत्त्वाभावदशायां तु तन्यते इति रूपं भवति इति रूपद्वयं सिध्यति।

तप्धातोः लुङि प्रथमपुरुषैकवचने च्लौ अ तप् च्लि त इति स्थिते चिण्भावकर्मणोः इत्यनेन च्लेः चिणि प्राप्ते सूत्रमिदमारभ्यते –

[२७.८] तपोऽनुतापे च॥ (३.१.६५)

सूत्रार्थः – तपः च्लेः चिण् न स्यात् कर्मकर्तरि अनुतापे च।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। तपः (५/१), अनुतापे (७/१) च इति सूत्रगतपदच्छेदः। च्लेः सिच् इत्यतः च्लेः इत्यस्य, चिण् ते पदः इत्यतः चिण् इत्यस्य, न रुधः इत्यतः न इत्यस्य, अचः कर्मकर्तरि इत्यतः कर्मकर्तरि इत्यस्य चानुवृत्तिर्भवति। एवञ्च तप्धातोः उत्तरस्य च्लेः स्थाने चिण्–आदेशो न भवति कर्मकर्तरि अनुतापे चार्थे।

अत्र विशेषः – कर्मकर्तुः उदाहरणं काशिकायाम् अथवा वैयाकरणसिद्धान्तकौमुद्याः कर्मकर्तृप्रकरणे पश्यत। अत्र तु प्रकरणवशात् भावकर्मप्रक्रियायाम् अनुतापेऽर्थे उदाहरणं प्रदर्श्यते।

उदाहरणम् – अन्वतप्त पापेन।

सूत्रार्थसमन्वयः – अत्र भावे अथवा कर्मणि अनु–उपसर्गपूर्वकात् तप्धातोः लुङि च्लौ तप्रत्यये अनु अ तप् च्लि त इति दशायाम् अनुतापार्थस्य सत्त्वात् प्रकृतसूत्रेण चिण्–निषेधो भवति। ततः च्लेः सिच् इत्यनेन सिजादेशे अनुबन्धलोपे अनु अ तप् स् त इति जाते झलो झलि इत्यनेन सकारस्य लोपे इको यणचि इत्यनेन यणि वकारे अन्वतप्त इति रूपं सिध्यति। यदा तु अनुतापार्थो न भवति तदा चिण् भवत्येव यथा उदतापि सुवर्ण सुवर्णकारेण।

शम्धातोः लुङि प्रथमपुरुषैकवचने अ शम् इ त इति स्थिते उपधावृद्धौ प्राप्तायां सूत्रमिदमारभ्यते–

[२७.९] नोदात्तोपदेशस्य मान्तस्यानाचमेः॥ (७.३.३४)

सूत्रार्थः – उपदेशावस्थायाम् उदात्तमकारान्तधातोः उपधायाः वृद्धिः न भवति चिणि ञिति णिति कृति च परतः, आपूर्वकचम्धातुं विहाय।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् चत्वारि पदानि सन्ति। न (अव्ययम्), उदात्तोपदेशस्य (६/१), मान्तस्य (६/१), अनाचमेः (६/१) इति सूत्रगतपदच्छेदः। उदात्त उपदेशो यस्य स उदात्तोपदेशः, बहुव्रीहिः। मोऽन्ते यस्य स मान्तः तस्य मान्तस्य, बहुव्रीहिः। न आचमिः अनाचमिः तस्य अनाचमेः। मृजेर्वृद्धिः इत्यतः वृद्धिः इत्यस्य, अत उपधायाः इत्यतः उपधायाः, अचो ञ्णिति इत्यतः

ञ्णिति इत्यस्य, आतो युक् चिण्कृतोः इत्यतः चिण्कृतोः इत्यस्य च अनुवृत्तिर्भवति। तेन पूर्वोक्तसूत्रार्थः सिध्यति।

उदाहरणम् – अशमि।

सूत्रार्थसमन्वयः – एवञ्च शम्धातोः लुङि तप्रत्यये च्लौ च्लेः स्थाने सिचि सिचः स्थाने चिण्भावकर्मणोः इति प्रकृतसूत्रेण चिणादेशे अ शम् इ त इति स्थिते उपधावृद्धौ प्राप्तायां प्रकृतसूत्रेण अत्र वृद्धेर्निषेधो भवति। यतो हि अत्र शम् इति मान्तात् परं चिण् अस्ति। ततः चिणो लुक् इत्यनेन चिणो लुकि सति अशमि इति रूपं सिध्यति। एवमेव अदमि इत्यादि सिध्यति।

दाधातुः अनिट् अस्ति। अतः वलादिलक्षणस्य इटः निषेधः प्राप्तः। किन्तु उपदेशावस्थायाम् अजन्तत्वात् स्यसिच्सीयुडादिसूत्रेण पाक्षिके चिण्वदिटि सति सूत्रमिदं प्रवर्तते–

[२७.१०] आतो युक्चिण्कृतोः॥ (७.३.३३)

सूत्रार्थः – आदन्तानां युगागमः स्यात् चिणि ञिति कृति च।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। आतः (६/१), युक् (१/१), चिण्कतोः (७/२) इति सूत्रगतपदच्छेदः। अङ्गस्य इत्यधिक्रियते। आतः इत्यङ्गस्य विशेषणमस्ति । विशेषणत्वात् तदन्तविधौ आदन्तात् अङ्गात् इत्यर्थो भवति। चिण् च कृत् च तयोरितरेतरयोगद्वन्द्वे चिण्कृतौ, तयोः चिण्कृतोः। अचो ञ्णिति इत्यतः ञ्णिति इत्यस्यानुवृत्तिर्भवति। ञ्णिति इत्यस्य चिण्कृतोः इत्यत्रत्यकृदंशेन सह सम्बन्धः। युगागमस्य कित्त्वात् आद्यन्तौ टकितौ इति परिभाषया अन्त्यावयवो भवति। एवञ्च सूत्रस्यार्थः – आदन्ताङ्गस्य युगागमो भवति चिणि परे अथवा ञित्णितोः कृत्प्रत्यययोः परयोः। युकः ककारः इत्संज्ञकः, उकार उच्चारणार्थः। अतः य्–मात्रमेव शिष्यते इति ध्येयम्।

उदाहरणम् – दायिता,दाता।

सूत्रार्थसमन्वयः – प्रसङ्गवशात् चिण उदाहरणमेवात्र प्रस्तूयते। शिष्टयोरुदाहरणं कृदन्तप्रकरणे प्राप्यते। दाधातोः भावकर्मणोः लुटि प्रथमपुरुषैकवचने तप्रत्यये तासि स्यसिच्सीयुडादिसूत्रेण पाक्षिके चिण्वदिटि दा इतास् त इति स्थिते तासः चिण्वद्भावत्वात् चिण् परमेवास्ति। किञ्च दा इति आदन्तम् अङ्गमपि अस्ति। अतः प्रकृतसूत्रेण युगागमे लुटः स्थाने डादेशे टिलोपे च दाय् इ त् आ इति जाते सर्ववर्णसम्मेलने च दायिता इति रूपं सिध्यति, चिण्वदिडभावे दाता इति रूपं सिध्यति इति आहत्य रूपद्वयं सिध्यति।

ण्यन्तात् शम्–धातोः हेतुमण्णिचि लुटि तप्रत्यये तासि शमि इ तास् त इति जायते। ततः अयं धातुः णिजन्तः अस्ति इति हेतोः धातोः अजन्तत्वात् चिण्वद्भावे इटि च शम् इ इ इतास् त इति जाते णेरनिटि इति सूत्रेण प्रथमद्वितीययोः उभयोः णिचोः लोपे शम् इ तास् त इति जाते सूत्रमिदमारब्धम्–

[२७.११] चिण्णमुलोर्दीर्घोऽन्यतरस्याम्॥ (६.४.९३)

सूत्रार्थः – चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात्।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पदत्रयमस्ति। चिणण्णमुलोः (७/२), दीर्घः (१/१), अन्यतरस्याम् (सप्तमीविभक्तिप्रतिरूपकमव्ययम्) इति सूत्रगतपदच्छेदः। चिण् च णमुल् च तयोरितरेतरयोगद्वन्द्वे चिण्णमुलौ तयोः चिण्णमुलोः। दोषो णौ इत्यतः णौ इत्यस्य, ऊदुपधायाः गोहः इत्यस्मात् उपधायाः इत्यस्य, मितां ह्रस्वः इत्यतः मिताम् इत्यस्य चानुवृत्तिर्भवति। तथा च सूत्रार्थः– चिण्परके णमुल्परके च णिचि परतः मित्संज्ञकधातोः उपधाया विकल्पेन दीर्घः स्यात्।

उदाहरणम् – शामिता, शमिता, शमयिता।

सूत्रार्थसमन्वयः – एवञ्च शम् इ तास् त इति जाते उपधाभूतस्य अकारस्य चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति योगेन विकल्पेन दीर्घे शाम् इ तास् त इति जाते तप्रत्ययस्य डादेशे डित्त्वसामर्थ्यात् अभस्यापि टेः आसः लोपे शामिता इति रूपं सिध्यति, दीर्घाभावपक्षे शमिता इति रूपं सिध्यति। किञ्च चिण्वद्भावो विकल्पेन भवतीति हेतोः यदा चिण्वद्भावो न भवति तदा णेः इकारस्य गुणे एकारे तस्य अयादेशे सर्ववर्णसम्मेलने च शमयिता इति रूपं सिध्यति इति आहत्य रूपत्रयं भवति।

द्विकर्मकधातुस्थले प्रयोगपरिवर्तनप्रकारः।

लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण कर्मणि लकारो भवति इति भवन्तः पूर्वं ज्ञातवन्तः। किन्तु तत्र प्रश्न उदेति यत् द्विकर्मकधातुस्थले अर्थात् यस्मिन् धातौ कर्मद्वयं भवति, तयोः कस्मिन् कर्मणि लकारो भवति इति। तदुत्तराय वयं कारकप्रकरणस्थसूत्राणि पश्यामः। तत्र अकथितञ्च इत्यनेन अपादानादिकारकैः अविवक्षितस्य कारकस्य कर्मसंज्ञा भवति। तत् अप्रधानं, गौणं वा कर्म इत्युच्यते। कर्तुरीप्सिततमं कर्म इत्यादिसूत्रेण यस्य कर्मसंज्ञा विधीयते, तत् प्रधानं मुख्यं वा कर्म इत्युच्यते इति कर्मणो भेदद्वयं सम्यक् जानीत। तत्र मुख्ये कर्मणि लकारो भवति अथवा गौणे कर्मणि लकारो भवति इति पृच्छायाम् उच्यते–

गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्। इति

दुह्– याच्–पच्–दण्ड्–रुध्–प्रच्छ्–चि–ब्रू–शास्–जि–मथ्–मुष्धातुभ्यः द्वादशभ्यः गौणे कर्मणि लकारो भवति। नी–हृ–कृष्–वह्धातुभ्यः चतुर्भ्यः प्रधाने कर्मणि प्रत्ययो भवति।

यथा– गां दोग्धि पयः गोपः इति कर्तृवाच्यस्य कर्मवाच्ये परिवर्तनं क्रियते चेत्– गौः दुह्यते पयः गोपेन इति वाक्यं भवति। अत्र दुह्–धातुः द्विकर्मकोऽस्ति। पयः इति प्रधानं कर्म तस्य च कर्मसंज्ञा कर्तुरीप्सिततमं कर्म इत्येनन भवति, गाम् इत्यप्रधानं कर्म तस्य च कर्मसंज्ञा अकथितं च इत्यनेन। पूर्वोक्तश्लोकानुसारम् अत्र अप्रधाने कर्मणि लकारो भवति। अप्रधाने कर्मणि लकारो भवति इति हेतोः अप्रधानं कर्म एव उक्तं भवति। प्रधानं च कर्म पयः इति तच्च अनुक्तम्। यतो हि तत्र लकारो विहितो नास्ति। कर्मणि द्वितीया इत्येनन तु अनुक्तकर्मणि द्वितीया विभक्तिः भवति न तु उक्तकर्मणि। अतः पयः इत्यत्र द्वितीयाविभक्तिः, पयः इति प्रथमान्तमस्ति इति चिन्तयित्वा भ्रान्तो मा भव।

भवतां सौकर्याय अधः स्तम्भनिर्माणेन उदाहरणानि आलोच्यन्ते। आदौ अकथितं च इति सूत्रस्थदुह्यादिधातूनाम् उदाहरणानि प्रदर्श्यन्ते–

कर्तरि प्रयोगः	कर्मणि प्रयोगः	अप्रधानं कर्म	प्रधानं कर्म
गां दोग्धि पयः	गौः दुह्यते पयः	गौः	पयः
बलिं याचते वसुधाम्	बलिः याच्यते वसुधाम्	बलिः	वसुधा
अविनीतं विनयं याचते	अविनीतो विनयं याच्यते	अविनीतः	विनयः
तण्डुलान् ओदनं पचति	तण्डुलाः ओदनं पच्यन्ते	तण्डुलाः	ओदनः
गर्गान् शतं दण्डयति	गर्गाः शतं दण्ड्यन्ते	गर्गाः	शतम्
व्रजम् अवरुणद्धि गाम्	व्रजः अवरुध्यन्ते गाम्	व्रजः	गौः
माणवकं पन्थानं पृच्छति	माणवकः पन्थानं पृच्छ्यते	माणवकः	पन्थाः
वृक्षम् अवचिनोति फलानि	वृक्षः अवचीयते फलानि	वृक्षः	फलानि
माणवकं धर्मं ब्रूते	माणवको धर्मं उच्यते	माणवकः	धर्मः
माणवकं धर्मं शास्ति	माणवको धर्मं शिष्यते	माणवकः	धर्मः
शतं जयति देवदत्तम्	शतं जीयते देवदत्तः	देवदत्तः	शतम्
सुधां क्षीरनिधिं मथ्नाति	सुधां क्षीरनिधिः मथ्यते	क्षीरनिधिः	सुधा
देवदत्तं शतं मुष्णाति	देवदत्तः शतं मुष्यते	देवदत्तः	शतम्

अधुना नी–आदिधातूनाम् उदाहरणानि प्रदर्श्यन्ते–

कर्तृवाच्यम्	कर्मवाच्यम्	अप्रधानं कर्म	प्रधानं कर्म
अजां ग्रामं नयति	अजा ग्रामं नीयते	अजा	ग्रामः
अजां ग्रामं हरति	अजा ग्रामं ह्रियते	अजा	ग्रामः
अजां ग्रामं कर्षति	अजा ग्रामं कृष्यते	अजा	ग्रामः
अजां ग्रामं वहति	अजा ग्रामं उह्यते	अजा	ग्रामः

ततः–

बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया।।

प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ इत्येनन येषां कर्मसंज्ञा भवति तेषु बुद्ध्यर्थकधातोः भक्षणार्थकधातोः शब्दकर्मकधातोः च वक्ता स्वेच्छानुसारं प्रधाने अप्रधाने वा कर्मणि

लकारं विधातुं शक्नोति। अर्थात् तत्र प्रागुक्तादिनियमो नास्ति। गत्यर्थकादिधातूनां कृते तु यस्य कर्मसंज्ञा भवति तादृशकर्मणि प्रयोज्यकर्मणि च लकारादिप्रत्ययो भवति। बोध्यते माणवकं धर्मः माणवको धर्ममिति वा इति वाक्ये प्रधानं कर्म धर्मः, अप्रधानं च माणवकः। अतः तत्र स्वेच्छानुसारं कर्मणि लकारो भवति इति हेतोः प्रधानकर्मणि लकारो भवति चेत् उक्तप्रधानकर्मणि प्रथमां विधाय गुरुणा बोध्यते माणवकं धर्मः इति वाक्यं भवति। यदा तु अप्रधानकर्मणि लकारो भवति तदा उक्तप्रधानकर्मणि प्रथमां विधाय गुरुणा माणवको धर्मं बोध्यते इति वाक्यं भवति। अनुक्तकर्मणि द्वितीया भवति कर्मणि द्वितीया इत्येनन योगेन इति तु भवन्तो जानन्ति एव इति एतावता बुद्ध्यर्थकधातोरुदाहरणमालोचितम्। मात्रा भोज्यते माणवकम् ओदनः, माणवक ओदनं वा भोज्यते इति प्रत्यवसानार्थकस्य उदाहरणम्।

यज्ञदत्तेन देवदत्तो ग्रामं गम्यते। अत्र प्रयोज्यकर्म देवदत्तः। प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः इत्यनेन प्रयोज्यकर्मणि एव लकारो भवति, येन प्रयोज्यकर्मणः देवदत्तादेः उक्तत्वात् प्रथमाविभक्तिः भवति। तेन देवदत्तो ग्रामं गम्यते इत्यादिवाक्यं सिध्यति। प्रयोज्यकर्मणः भिन्नात् ईप्सिततमकर्मणः ग्रामशब्दात् तु द्वितीया भवत्येव। गम्यते इत्यत्र हेतुमण्णिजन्तगम्धातोः प्रयोज्यकर्मणि लकारो भवति।

केषाञ्चित् धातूनां कर्मवाच्ये भाववाच्ये च लटि प्रथमपुरुषैकवचने रूपाणि अधः प्रदर्श्यन्ते येन भवन्तः तानि रूपाणि व्यवहर्तुं शक्नुयुः।

मूलधातुः	कर्तृवाच्यम्	भावकर्मरूपम्	अर्थः (हिन्दीभाषया)
अर्च्	अर्चति	अर्च्यते	(किसी से) पूजा जाता है।
अस्	अस्ति	भूयते	हुआ जाता है।
आप्	आप्नोति	आप्यते	पाया जाता है।
इङ्	अधीते	अधीयते	पढा जाता है।
इष्	इच्छति	इष्यते	चाहा जाता है।
कथ्	कथयति	कथ्यते	कहा जाता है।
कृ	करोति	क्रियते	किया जाता है।
कृष्	कर्षति	कृष्यते	जोता जाता है।
क्री	क्रीणाति	क्रीयते	खरीदा जाता है।
क्षिप्	क्षिपति	क्षिप्यते	फेंका जाता है।
खाद्	खादति	खाद्यते	खाया जाता है।
गण्	गणयति	गण्यते	गिना जाता है।
गम्	गच्छति	गम्यते	जाया जाता है।

गै	गायति	गीयते	गाया जाता है।
ग्रह्	गृह्णाति	गृह्यते	ग्रहण किया जाता है।
चिन्त्	चिन्तयति	चिन्त्यते	सोचा जाता है।
चुर्	चोरयति	चोर्यते	चुराया जाता है।
ज्ञा	जानाति	ज्ञायते	जाना जाता है।
तृ	तरति	तीर्यते	पार किया जाता है।
त्यज्	त्यजति	त्यज्यते	छोडा जाता है।
दह्	दहति	दह्यते	जलाया जाता है।
दा	ददाति	दीयते	दिया जाता है।
दुह्	दोग्धि	दुह्यते	दुहा जाता है।
दृश्	पश्यति	दृश्यते	देखा जाता है।
ध्यै	ध्यायति	ध्यायते	ध्यान किया जाता है।
नम्	नमति	नम्यते	नमस्कार किया जाता है।
नी	नयति	नीयते	ले जाया जाता है।
पच्	पचति	पच्यते	पकाया जाता है।
पठ्	पठति	पठ्यते	पढा जाता है।
पा	पिबति	पीयते	पिया जाता है।
पाल्	पालयति	पाल्यते	पाला जाता है।
पूज्	पूजयति	पूज्यते	पूजा किया जाता है।
प्रच्छ्	पृच्छति	पृच्छ्यते	पूछा जाता है।
बन्ध्	बध्नाति	बध्यते	बाँधा जाता है।
ब्रू	ब्रवीति	उच्यते	कहा जाता है।
भाष्	भाषते	भाष्यते	कहा जाता है।
याच्	याचते	याच्यते	माँगा जाता है।

विवक्षातः कारकाणि भवन्ति। अतः किमपि वाक्यं कर्तृवाच्ये कर्मवाच्ये भाववाच्ये वा वक्ता प्रयोक्तुं पारयति। अधः तस्मिन् वाच्यत्रये केषांञ्चित् वाक्यानां प्रयोगः प्रदर्श्यते–

कर्तृवाच्यम्	**भाववाच्यम्**
सः भवति।	तेन भूयते।
त्वं भवसि।	त्वया भूयते।
अहं भवामि।	मया भूयते।
प्रसिद्धः पुरुषो भवेत्।	प्रसिद्धेन पुरुषेण भूयेत।
कर्तृवाच्यम्	**कर्मवाच्यम्**
रामः विद्यालयं गच्छति।	रामेण विद्यालयः गम्यते।
रामः ओदनं खादति।	रामेण ओदनः खाद्यते।
त्वं घटं कुरु।	त्वया घटः क्रियताम्।
त्वं पुस्तकं पठ।	त्वया पुस्तकं पठ्यताम्।
अहं जलं न पास्यामि।	मया जलं न पास्यते।
बालाः पुष्पाणि चिन्वन्ति।	बालैः पुष्पाणि चीयन्ते।
भवान् ग्रामं गच्छतु।	भवता ग्रामः गम्यताम्।
यूयं कार्यम् अकार्ष्ट।	युष्माभिः कार्यम् अकारि।
ते देवान् यजेयुः।	तैः देवाः इज्येरन्।
वयं युवां द्रक्ष्यामः।	अस्माभिः युवां द्रक्ष्येथे।
आवां युष्मान् रक्षेव।	आवाभ्यां यूयं रक्षेध्वम्।
त्वं मां परिचिनु	त्वया अहं परिचीयै।
भवन्तः आवाम् अजानन्।	भवद्भिः आवाम् अज्ञायावहि।
तौ अस्मान् अस्तौष्टाम्।	ताभ्यां वयम् अस्ताविष्महि।

पाठगतप्रश्नाः-२

३५. विभाषा चिण्णमुलोः इति सूत्रस्य कोऽर्थः।

३६. णिजन्तस्य शम्धातोः लुटि प्रथमपुरुषैकवचने कति रूपाणि भवन्ति कानि च तानि।

३७. आतो युक्चिण्कृतोः इत्यनेन किं विधीयते।

३८. दाधातोः लुटि प्रथमपुरुषैकवचने कति रूपाणि भवन्ति कानि च तानि।

३९. नोदात्तोपदेशस्य मान्तस्यानाचामेः इत्यनेन किं क्रियते।

४०. तपोऽनुतापे च इत्यस्योदाहरणं किम्।

४१. तन्धातोः कर्मणि लटि प्रथमपुरुषैकवचने कति रूपाणि भवन्ति कानि च तानि।

४२. भञ्ज् धातोः कर्मणि लुङि प्रथमपुरुषैकवचने कति रूपाणि कानि च तानि।

पाठसारः

लः कर्मणि च भावे चाकर्मकेभ्यः इत्यनेन कर्ता, कर्म,भावश्चेति लकारार्थाः त्रय इत्युक्तम्। अत्र तु विशेषो यत् अकर्मकेभ्यो धातुभ्यः कर्तरि भावे लकारा भवन्ति। सकर्मकेभ्यस्तु कर्तरि कर्मणि च। भावः क्रिया, व्यापारः, भावना, उत्पादना इति पर्यायशब्दाः। वस्तुतः भावः धातोरेव अर्थः अतः लकारेण अनुवादमात्रं क्रियते। भावः अमूर्तपदार्थः। अतः तस्मिन् लिङ्गसंख्यान्वयो न भवति इति हेतोः पदसाधुत्वार्थमेव एकवचनमुत्सर्गतः करिष्यते इति न्यायेन प्रथपुरुषैकवचनान्तं रूपमेव प्रत्यकं लकारे भवति इति सम्यक् अवधार्यताम्। कर्मणि लकारे तु सर्वे पुरुषाः सर्वाणि च वचनानि भवन्ति इत्येतावान् विशेषः। उपान्ते च द्विकर्मकधातुविषये चर्चा विहिता। द्विकर्मकधातुस्थले कथं वाच्यपरिवर्तनं भवति, एतद्विषये बहूनि उदाहरणानि प्रदर्शितानि सन्ति। द्विकर्मकधातुस्थले कथं वाच्यपरिवर्तनं भवति इत्यपि सोदाहरणं प्रदर्शिता। किञ्च अन्ते अनेकेषां वाक्यानां भावे कर्मणि वा वाच्यपरिवर्तनं दर्शितमस्ति। तानि अभ्यसनीयानि।

पाठान्तप्रश्नाः

१. भावकर्मणोः इति सूत्रं व्याख्यात।

२. भावे लकारे कीदृशा वचनपुरुषा भवन्ति इति व्याख्यात।

३. कर्मणि लकारे कीदृशा वचनपुरुषा भवन्ति इति व्याख्यात।

४. चिण्णमुलोर्दीर्घोऽन्यतरस्याम् इति सूत्रं सोदाहरणं व्याख्यात।

५. भूयते इति रूपं साधयत।

६. स्यसिच्सीयुट्–आदिसूत्रं प्रपूर्य व्याख्यात।

७. भावार्थकलकारतः कर्मार्थकलकारतः विशेषः क इति विव्रियताम्।

८. भूयते इत्यत्र किमर्थं प्रथमपुरुषैकवचनमेव भवति इति स्पष्टीक्रियताम्।

पाठगतप्रश्नोत्तराणि

उत्तराणि–१

१. भावे कर्तरि च।

२. कर्मणि कर्तरि च।

३. आत्मनेपदम्।

४. भावकर्मणोः।

५. भावकर्मवाचिनि तशब्दे परे च्लेः स्थाने चिण्–आदेशो भवति।

६. अभावि।

७. चत्वारि।

८. असाधु।

९. साधु।

१०. प्रथमपुरुषैकवचनमेव भवति।

११. आम्, सकर्मकः।

१२. स्यासिच्सीयुट्तासिषु भावकर्मणोरुपदेशेज्झनग्रहदृशां वा चिण्वदिट् च।

उत्तराणि-२

१३. चिणि परे सति अथवा णमुलि परे सति लभ्धातोः विकल्पेन नुम्–आगमो भवति।

१४. रूपत्रयम्। शामिता, शमिता, शमयिता।

१५. युगागमो भवति।

१६. रूपद्वयम्। दाता, दायिता।

१७. उपधावृद्धिनिषेधः।

१८. अन्वतप्त पापेन।

१९. रूपद्वयम्। तायते, तन्यते।

२०. रूपद्वयम्। अभाजि, अभञ्जि।

॥ इति सप्तविंशः पाठः॥

346sk28

२८

अथ अपत्याधिकारप्रकरणम्

प्रस्तावना

तद्धिताः इत्यधिकारे ये प्रत्ययाः समायान्ति, तस्य प्रत्ययस्य तद्धित इति नाम्ना प्रख्यातं भवति। एवञ्च हितभवादिविविधेषु अर्थेषु तद्धितप्रत्ययाः प्रयुज्यन्ते। इदानीम् अपत्यार्थे विद्यमानानां तद्धितप्रत्ययानां विवरणं कुर्मः। अत एव अपत्याधिकारप्रकरणम् इति नाम अस्य प्रकरणस्य। अस्मिन् प्रकरणे न केवलं अपत्यार्थे प्रत्ययाः विधीयन्ते अपि तु हितभवाद्यर्थे अपि प्रत्ययाः भवन्ति। अस्मिन् प्रकरणे अधिकतया अपत्यार्थे तद्धितप्रत्ययानां विधानात् अपत्याधिकारप्रकरणम् इति नाम। अत्र तद्धिताः, समर्थानां प्रथमाद्वा, प्रत्ययः, परश्च इति एते अधिकाराः प्रत्ययविधायके सूत्रे आगच्छन्ति। अपत्यार्थे विद्यमानस्य तद्धितप्रत्ययस्य उदाहरणं हि गर्गस्य अपत्यं पुमान् इति लौकिकविग्रहे अपत्यार्थे यञ्प्रत्यये प्रक्रियाकार्ये गार्ग्यः इति रूपम्। एवञ्च पुंसु भवः इति लौकिकविग्रहे अपत्यभिन्ने भवार्थे स्नञ्प्रत्यये कृते प्रक्रियाकार्ये पौंस्नः इति रूपम्। अपत्यार्थे विहिताः अण्, अञ्, इञ्, ठक्, फक् इति एते प्रत्ययाः तद्धिताः इति अधिकारे पतन्ति। पुनश्च अपत्ये अर्थे प्रत्ययाः भवन्ति इति हेतोः अपत्यार्थकाः प्रत्ययाः इति वदन्ति।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- अपत्यार्थे विद्यमानान् प्रत्ययान् ज्ञातुं शक्यो भविष्यति।
- अपत्यार्थभिन्ने भवहिताद्यर्थे अपि विद्यमानान् प्रत्ययान् ज्ञातुं शक्यो भविष्यति।
- अपत्याधिकारे विद्यमानानि सूत्राणि ज्ञातुं शक्यो भविष्यति।
- लौकिकविग्रहम् अलौकिकविग्रहञ्च ज्ञातुं योग्यो भविष्यति।
- अपत्याधिकारे विद्यमानानां सूत्राणाम् उदाहरणानि ज्ञातुं प्रभवेत्।
- तद्धितप्रत्ययस्य प्रयोगविषयकं ज्ञातुं शक्नुयात्।
- अनुवृत्तिमाध्यमेन कथं सूत्रार्थः भवति इति तु स्पष्टं ज्ञानं प्राप्तुं शक्नुयात्।

[२८.१] स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्॥ (४.१.८७)

सूत्रार्थः - धान्यानां भवने क्षेत्रे खञ् इत्यतः प्राग् अर्थेषु स्त्रीपुंसाभ्यां क्रमाद् तद्धितसंज्ञकौ नञ्स्नञौ प्रत्ययौ स्याताम् इति सूत्रस्य सामान्यार्थः।

सूत्रव्याख्या -अधिकारसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। स्त्री च पुमान् च स्त्रीपुंसौ, ताभ्यां स्त्रीपुंसाभ्याम् इति इतरेतरद्वन्द्वः। स्त्रीपुंसाभ्याम् इति पञ्चमीद्विवचने रूपम्। नञ् च स्नञ् च इति नञ्स्नञौ इति इतरेतरद्वन्द्वः। स्त्रीपुंसाभ्याम् इति प्रथमाद्विवचनान्तं पदम्। भवनात् इति पञ्चम्येकवचनान्तं पदम्।

प्राग्दीव्यतोऽण् इत्यस्मात् प्राग् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। एतत् अधिकारसूत्रम् अस्ति। अतः भवनात् इति पदं तु अवधित्वेन स्वीक्रियते। अतः सूत्रार्थो भवति - धान्यानां भवने क्षेत्रे खञ् इत्यतः प्राग् अर्थेषु स्त्रीपुंसाभ्यां क्रमाद् तद्धितसंज्ञकौ नञ्स्नञौ प्रत्ययौ स्याताम् इति सूत्रस्य सामान्यार्थः।

उदाहरणम्- स्त्रीषु भवः, स्त्रिया अपत्यम्, स्त्रीणां समूहः, स्त्रीभ्य आगतः, स्त्रीभ्यो हितः इति लौकिकविग्रहे स्त्री ङस् इति अलौकिकविग्रहः। तत्र भवहितापत्यादिषु अर्थेषु स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् इति अधिकारसूत्रेण तस्यापत्यम् इत्यादिना तत्तत्सूत्रेण नञ्प्रत्यये अनुबन्धलोपे स्त्री ङस् न इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः सुपो धातुप्रातिपदिकयोः इति सूत्रेण सुपः लोपे स्त्री न इति स्थितिः भवति। ततः तद्धितेष्वचामादेः इति सूत्रेण स्त्रीशब्दस्य आदेः अचः ईकारस्य वृद्धौ ऐकारे स्त्रै न भवति। एतदनन्तरम् अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णत्वं भवति। ततः एकदेशविकृतमनन्यवत् इति सूत्रेण प्रातिपदिकसंज्ञा अस्ति। ततः विभक्तिकार्ये स्त्रैणः इति रूपम्।

एवमेव पुंसोऽपत्यम्, पुंसु भवः, पुंसां समूहः, पुंभ्यः आगतः, पुम्भ्यो हितः इति विग्रहे भवहितापत्यादिषु अर्थेषु स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् इति अधिकारसूत्रेण तस्यापत्यम् इत्यादिना तत्तत्सूत्रेण स्नञ्प्रत्यये पुंस् ङस् स्न भवति। स्नञ्प्रत्ययः तद्धितान्तत्वात् प्रातिपदिकसंज्ञा भवति। ततः सुब्लोपे आदिवृद्धौ च पौंस् स्न इति स्थितिः। ततः स्वादिष्वसर्वनामस्थाने इति सूत्रेण पदसंज्ञा भवति। ततः संयोगान्तस्य लोपः इति पदान्तस्य सकारस्य लोपे पौं स्न इति स्थितिः। ततः विभक्तिकार्ये निमित्तापाये नैमित्तिकस्याप्यपायः इति परिभाषया अनुस्वारस्य मकारः भवति। ततः नश्चापदान्तस्य झलि इति सूत्रेण पुनः मकारस्य अनुस्वारे विभक्तिकार्ये पौंस्नः इति रूपम्।

[२८.२] तस्याऽपत्यम्॥ (४.१.९२)

सूत्रार्थः - षष्ठ्यन्तात् कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। तस्य इति पञ्चम्यन्तं पदम्। तस्य इत्यत्र षष्ठ्यन्तात् तच्छब्दात् पञ्चमी आगता। तस्याः पञ्चम्याः सूत्रत्वात् अदर्शनं भवति। अपत्यम् इति सप्तम्यन्तं पदम्। अत्रापि अपत्यम् इति शब्दात् सप्तमी आगता। तस्याः अपि सप्तम्याः सूत्रवशात् अदर्शनं भवति। अर्थात् सूत्रे विभक्तीनाम् अदर्शनं विपरिणामश्च जायेते। अतः प्रकृतसूत्रे सौत्रत्वात् पञ्चम्याः सप्तम्याः च लुक् इति इतरग्रन्थेषु।

तद्धितोत्पत्तिः सुबन्तात् भवति। अतः समर्थः पदविधिः इति परिभाषया समर्थात् इति पदम् उपलभ्यते। प्राग्दीव्यतोऽण् इत्यस्मात् अण् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः,

समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। पुनश्च प्रकृतसूत्रे तस्य, अपत्यम् इति पदं स्वरूपबोधकम् नास्ति। अपि तु अर्थबोधकम् अस्ति। अतः सूत्रार्थो भवति - षष्ठ्यन्तात् कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः।

उदाहरणम् - उपगोः अपत्यम् इति लौकिकविग्रहः। उपगु ङस् इति अलौकिकविग्रहः। तस्यापत्यम् इति सूत्रेण अपत्यार्थे प्राग्दीव्यतोऽण् इति सूत्रेण अण्-प्रत्ययः विधीयते। अनुबन्धलोपे कृते उपगु ङस् अ इति स्थितिः जायते। अयं समुदायः तद्धितान्तः। अतः तस्य प्रातिपदिकसंज्ञा भवति। सुब्लोपे उपगु अ इति स्थिते तद्धितेष्वचामादेः इति सूत्रेण आदिवृद्धिः भवति। तदा औपगु+अ इति स्थितिः भवति। तदा -

[२८.३] ओर्गुणः॥ (६.४.१४६)

सूत्रार्थः - उवर्णान्तस्य भस्य अङ्गस्य गुणः स्यात् तद्धिते परे।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। ओः इति षष्ठ्यन्तं पदम्। गुणः इति प्रथमान्तं पदम्।

भस्य, अङ्गस्य इति एतौ अधिकारौ आगच्छतः। नस्तद्धिते इति सूत्रात् तद्धिते इति अनुवर्तते। ओः इति उवर्णस्य षष्ठ्येकवचने रूपम्। ओः इति भस्य अङ्गस्य च विशेषणत्वात् येन विधिस्तदन्तस्य इति सूत्रेण विशेषणस्य उवर्णस्य तदन्तविधौ उवर्णान्तस्य इति अर्थः उपलभ्यते। अतः सूत्रार्थो भवति - उवर्णान्तस्य भस्य अङ्गस्य गुणः स्यात् तद्धिते परे।

उदाहरणम् - औपगु + अ इति स्थिते यचि भम् इति सूत्रेण औपगु इत्यस्य भसंज्ञा अस्ति। पुनश्च उपगुशब्दात् प्रत्ययविधानात् उपगु इति अस्य अङ्गसंज्ञापि वर्तते। एवञ्च अण् इति प्रत्ययः तद्धिताः इति अधिकारे वर्तमानात् अणः तद्धितसंज्ञा अस्ति। अतः ओर्गुणः इति सूत्रेण औपगु

अ इत्यत्र तद्धितसंज्ञाविशिष्टे अण्प्रत्यये परे अङ्गसंज्ञाविशिष्टस्य भसंज्ञकस्य उवर्णान्तस्य गुणः ओकारः भवति। तदा औपगो अ इति स्थितिः। ततः एचोऽयवायावः इति सूत्रेण ओकारस्य अवादेशे प्रक्रियाकार्ये औपगवः इति रूपम्।

[२८.४] अपत्यं पौत्रप्रभृति गोत्रम्॥ (४.१.१६२)

सूत्रार्थः - अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्।

सूत्रव्याख्या - संज्ञासूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। सर्वाणि पदानि प्रथमान्तानि।

अस्य सूत्रस्य अर्थो भवति - अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। तस्याऽपत्यम् इति अस्मात् अपत्यमिति अनुवर्तमाने पुनः अपत्यग्रहणं पौत्रादीनाम् अपत्यविवक्षायाम् एव गोत्रत्वबोधनार्थम्। यदि पौत्रादीनां पौत्रत्वादिनाम् एव विवक्षा तदा न भवति गौत्रसंज्ञा इति बोध्यम्। अर्थात् यदि पौत्रप्रपौत्रादीनाम् अपत्यरूपेण विवक्षा वर्तते तर्हि पौत्रप्रपौत्रादीनां गोत्रसंज्ञा भवति।

[२८.५] एको गोत्रे॥ (४.१.९३)

सूत्रार्थः - गोत्रे एक एवापत्यप्रत्ययः स्यात्।

सूत्रव्याख्या - नियमसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। एकः इति प्रथमान्तं पदम्। गोत्रे इति सप्तम्यन्तं पदम्।

अपत्याधिकारस्य प्रत्ययाधिकारस्य च सामर्थ्यात् अपत्यप्रत्ययः इति आगच्छति। ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च इति एते अधिकाराः आगच्छन्ति। अत्र एकः इति कथनात् इतरसंख्यायाः व्यवच्छेदात् एक एव इति नियमः उपलभ्यते। अतः सूत्रार्थो भवति - गोत्रे एक एवापत्यप्रत्ययः स्यात्

उदाहरणम् - उपगोः अपत्यम् औपगवः, तस्य औपगवस्य अपि अपत्यम् औपगवः, तस्य अपि अपत्यम् औपगवः इति एवम् अग्रे अपि। अर्थात् मूलपुरुषात् क्रियमाणः अपत्यप्रत्ययः गोत्रत्वेन विवक्षितानां सर्वेषां पौत्रप्रपौत्रादीनां बोधकः। प्रति वंशं तु नवीनः प्रत्ययः न भवति। एवञ्च यथा उपगोः अपत्यम् औपगवः, तथा औपगवस्यापि अपत्यम् औपगवः एव।

पाठगतप्रश्नाः-१

२१. नञ्स्नञ्प्रत्ययविधायकं सूत्रं किम् अस्ति।

२२. स्त्रीपुंसाभ्याम् इत्यत्र कः समासः।

२३. तस्यापत्यम् इति सूत्रस्य अर्थः कः।

२४. गोत्रसंज्ञाविधायकं सूत्रं किम् अस्ति।

२५. ओर्गुणः इति सूत्रेण किम् विधीयते।

२६. एको गोत्रे इत्यस्य सूत्रस्य अर्थः कः।

[२८.६] गर्गादिभ्यो यञ्॥ (४.१.१०५)

सूत्रार्थः - गर्गादिगणे पठितेभ्यः शब्देभ्यः गोत्रापत्ये तद्धितसंज्ञकः यञ्प्रत्ययः स्यात्।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। गर्गशब्दः आदिर्येषां ते गर्गादयः, तेभ्यः गर्गादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिः। गर्गादिभ्यः इति पञ्चम्यन्तं पदम्। यञ् इति प्रथमान्तम्।

गोत्रे कुञ्जादिभ्यश्चफञ् इत्यतः गोत्रे इति अनुवर्तते। तस्यापत्यम् इत्यतः अपत्यम् इति अनुवर्तते। तस्य विभक्तिविपरिणामेन अपत्ये इति उपलभ्यते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्,

तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थो भवति - गर्गादिगणे पठितेभ्यः शब्देभ्यः गोत्रापत्ये तद्धितसंज्ञकः यञ्प्रत्ययः स्यात्।

उदाहरणम् - गर्गस्य गोत्रापत्यमिति लौकिकविग्रहे गर्ग+ङस् इति अलौकिकविग्रहः। गर्गशब्दः गर्गादिगणे पठितः। अतः गर्गादिभ्यो यञ् इति सूत्रेण यञ्-प्रत्ययः विधीयते। ततः अनुबन्धलोपे गर्ग ङस् य इति स्थितिः। अयं समुदायः तद्धितान्तः। अतः कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः सुपो धातुप्रातिपदिकयोः इति सूत्रेण सुपः लोपः भवति। ततः तद्धितेष्वचामादेः इति सूत्रेण गर्ग इति समुदायस्य आदेः अकारस्य वृद्धौ गार्ग य इति स्थितिः। ततः यस्येति च इति सूत्रेण गकारोत्तरवर्तिनः अकारस्य लोपे विभक्तिकार्ये गार्ग्यः इति रूपम्। एवमेव वत्सस्य गोत्रापत्यं वात्स्यः इत्यादिकम्।

[२८.७] यञञोश्च॥ (२.४.६४)

सूत्रार्थः - गोत्रे यद् यञन्तम् अञन्तम् च तदवयवयोर्लुक् स्यात्, तत्कृते बहुत्वे, न तु स्त्रियाम्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। यञ् च अञ् च यञञौ, तयोः यञञोः इति इतरेतरद्वन्द्वः। यञञोः इति षष्ठ्यन्तम्। चेति अव्ययपदम्।

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः इत्यतः लुक्, यस्कादिभ्यो गोत्रे इत्यतः गोत्रे, तद्राजस्य बहुषु तेनैवाऽस्त्रियाम् इत्यतः बहुषु, तेन, एव, अस्त्रियाम् इति पदानि अनुवर्तन्ते। अतः सूत्रार्थः भवति - गोत्रे यद् यञन्तम् अञन्तम् च तदवयवयोर्लुक् स्यात्, तत्कृते बहुत्वे, न तु स्त्रियाम्।

उदाहरणम् - गर्गस्य गोत्रापत्यानि इति विग्रहः। ततः प्रकृतसूत्रेण यञि प्रत्यये कृते गर्ग+यञ् इति स्थितिः। एतच्च यञन्तम्, बहुत्वविशिष्टम्, स्त्रीलिङ्गभिन्नम् अस्ति। अत गोत्रे यद् यञन्तम् तदवयवस्य लुकि सति प्रक्रियाकार्ये गर्गाः इति रूपम्।

[२८.८] जीवति तु वंश्ये युवा॥ (४.१.१६३)

सूत्रार्थः - वंशे पित्रादौ जीवति सति पौत्रादेर्यदपत्यं चतुर्थादि तद् युवसंज्ञं स्यात्।

सूत्रव्याख्या -संज्ञासूत्रम् इदम् अस्ति। अस्मिन् सूत्रे तु पदचतुष्टयम् अस्ति। जीवति इति सप्तम्येकवचनान्तम्। तु इति अव्ययपदम्। वंश्ये इति सप्तम्येकवचनान्तम्। युवा इति प्रथमान्तम्।

अपत्यं पौत्रप्रभृति गोत्रम् इत्यतः पौत्रप्रभृति, तस्याऽपत्यम् इत्यतः अपत्यम् इति पदद्वयम् अनुवर्तते। वंशे भवः वंश्यः नाम पितृपितामहादिः। अतः सूत्रार्थः भवति - वंशे पित्रादौ जीवति सति पौत्रादेर्यदपत्यं चतुर्थादि तद् युवसंज्ञं स्यात्।

उदाहरणम् - मूलपुरुषः वंशप्रवर्तकः प्रथमः। मूलपुरुषस्य पुत्रः द्वितीयः, मूलपुरुषस्य पौत्रः तृतीयः, मूलपुरुषस्य प्रपौत्रः चतुर्थः। यदि पितरि पितामहे प्रपितामहे च जीवति सति चतुर्थादीनां युवसंज्ञा भवति। इयं संज्ञा गोत्रसंज्ञायाः अपवादिका।

[२८.९] गोत्राद्यून्यस्त्रियाम्॥ (४.१.९४)

सूत्रार्थः - यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात्, स्त्रियां न तु युवसंज्ञा।

सूत्रव्याख्या -नियमसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। गोत्रात् इति पञ्चम्येकवचनान्तम्। यूनि इति सप्तम्येकवचनान्तम्। अस्त्रियाम् इति सप्तम्येकवचनान्तम्।

युवापत्यार्थे प्रत्ययः भवति चेद् गोत्रप्रत्ययान्तादेव भवति, न तु मूलप्रकृतितः। अतः सूत्रार्थः भवति - यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात्, स्त्रियां न तु युवसंज्ञा।

उदाहरणम् -उपगोः अपत्यम् इत्यत्र तस्यापत्यम् इति सूत्रेण औत्सर्गिके अण्प्रत्यये औपगवः इति। ततः युवापत्यार्थे अत इञ् इति शास्त्रेण इञि प्रत्यये अनुबन्धलोपे प्रक्रियाकार्ये च औपगविः इति रूपम्।

[२८.१०] यञिञोश्च॥ (४.१.१०१)

सूत्रार्थः - गोत्रे यौ यञिञौ, तदन्तात् युवापत्यार्थे फक् स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। यञ् च इञ् च यञिञौ, तयोः यञिञोः इति इतरेतरद्वन्द्वः। यञिञोः इति षष्ठ्यन्तं पदम्। चेति अव्ययपदम्।

अस्मिन् सूत्रे गोत्रे कुञ्जादिभ्यश्च्फञ् इत्यतः गोत्रे इति अनुवर्तते। नडादिभ्यः फक् इत्यतः फक् इति अनुवर्तते। यञ् इञ् च प्रत्ययौ। अतः प्रत्ययग्रहणे तदन्तग्रहणम् इति परिभाषया तदन्तविधिवशात् यञन्तम् इञन्तम् च लभ्यते। अत्र षष्ठ्याः पञ्चमीत्वेन विपरिणामः भवति। पुनश्च गोत्रप्रत्ययान्तात् गोत्रप्रत्ययः न भवति, एको गोत्रे इति नियमात्। अतः युवापत्ये एतौ प्रत्ययौ भवतः। अतः सूत्रार्थः भवति - गोत्रे यौ यञिञौ, तदन्तात् युवापत्यार्थे फक् स्यात्।

उदाहरणम् - गर्गस्य गोत्रापत्यम् इति लौकिकविग्रहः। ततः गर्ग ङस् इति स्थिते प्रथमतया गर्गादिभ्यो यञ् इति सूत्रेण गोत्रापत्ये यञि प्रत्यये गार्ग्यः इति। ततः गोत्राद् यून्यस्त्रियाम् इति नियमेन युवापत्ये अर्थे यञिञोश्च इति सूत्रेण फक्प्रत्ययः विधीयते। ततः अनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लोपे सति आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रेण फकारस्य स्थाने आयनादेशः भवति। ततः गार्ग्य + आयन इति स्थिते यस्येति च इति अकारलोपे अट्कुप् इत्यादिना णत्वे विभक्तिकार्ये गार्ग्यायणः इति रूपम्।

[२८.११] अत इञ्॥ (४.१.९५)

सूत्रार्थः - अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यन्तात् इञ् स्यात् अपत्ये अर्थे।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। अतः इति पञ्चम्यन्तं पदम्। इञ् इति प्रथमान्तं पदम्।

तस्याऽपत्यम् इति सम्पूर्णं सूत्रम् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। अतः इति प्रातिपदिकस्य विशेषणम्। अतः

विशेषणस्य येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधेः अदन्तात् इति लभ्यते। अतः सूत्रार्थः - अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यन्तात् इञ् स्यात् अपत्ये अर्थे।

उदाहरणम्- दक्षस्य अपत्यं पुमान् इति लौकिकविग्रहः। दक्ष ङस् इति स्थिते दक्ष इति अदन्तम् प्रातिपदिकम्। अतः अपत्ये अर्थे अत इञ् इति सूत्रेण इञ्- प्रत्ययः भवति। ततः अनुबन्धलोपे तद्धितत्वात् प्रातिपदिकसंज्ञायां सुब्लोपे दक्ष+इ इति स्थितिः जायते। ततः दक्ष इत्यत्र दकारोत्तरस्य अकारस्य आदिवृद्धिः षकारोत्तरस्य अकारस्य लोपः च भवति। ततः विभक्तिकार्ये दाक्षिः इति रूपम्।

[२८.१२] बाह्वादिभ्यश्च॥ (४.१.९६)

सूत्रार्थः - बाह्वादिगणपठितेभ्यः शब्देभ्यः अपत्ये अर्थे इञ्प्रत्ययो भवति।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। बाहुशब्दः आदिः येषां ते बाह्वादयः, तेभ्यः बाह्वादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिः। बाह्वादिभ्यः इति पञ्चम्यन्तम्। चेति अव्ययपदम्।

अत इञ् इत्यतः इञ् इति अनुवर्तते। तस्याऽपत्यम् इति सम्पूर्णं सूत्रम् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति - बाह्वादिगणपठितेभ्यः शब्देभ्यः अपत्ये अर्थे इञ्प्रत्ययो भवति।

उदाहरणम् - बाहोः अपत्यम् इति लौकिकविग्रहः। ततः बाहु ङस् इति स्थिते बाहुशब्दस्य बाह्वादिगणे पाठः अस्ति। अतः अपत्ये अर्थे बाह्वादिभ्यश्च इति सूत्रेण इञ्-प्रत्यये अनुबन्धलोपे बाहु ङस् इ इति स्थितिः जायते। अयं समुदायः तद्धितान्तः। ततः प्रातिपदिकसंज्ञायां सुपः लोपे बाहु+इ इति स्थितिः भवति। ततः बाहु इत्यत्र बकारोत्तरस्य आकारस्य आदिवृद्धिः भवति। ततः ओर्गुणः इति सूत्रेण उकारस्य गुणः ओकारः भवति। ततः एचोऽयवायावः इति सूत्रेण अवादेशे विभक्तिकार्ये बाहविः इति रूपम्। एवम् औडुलोमिः इत्यत्रापि इञ्-प्रत्यये प्रक्रियाकार्ये रूपाणि भवन्ति।

पाठगतप्रश्नाः-१

२७. गर्गादिभ्यः कः प्रत्ययः भवति।

२८. यञञोश्च इति सूत्रस्य अर्थः कः।

२९. युवसंज्ञाविधायकं सूत्रं किम् अस्ति।

३०. फक्-प्रत्ययविधायकं सूत्रं किम् अस्ति।

३१. दाक्षिः इत्यत्र कः प्रत्ययः।

३२. बाह्वादिभ्यः कः प्रत्ययो भवति।

[२८.१३] शिवादिभ्योऽण्॥ (४.१.११२)

सूत्रार्थः - शिवादिगणे पठितेभ्यः प्रातिपदिकेभ्यः अपत्ये अर्थे अण् प्रत्ययः स्यात्।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। शिवशब्दः आदिर्येषां ते शिवादयः, तेभ्यः शिवादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिः। शिवादिभ्यः इति पञ्चम्यन्तम्। अण् इति प्रथमान्तं पदम्।

तस्याऽपत्यम् इत्यतः अपत्यम् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति- शिवादिगणे पठितेभ्यः प्रातिपदिकेभ्यः अपत्ये अर्थे अण् प्रत्ययः स्यात्।

उदाहरणम्- शिवस्य अपत्यमिति लौकिकविग्रहः। शिव ङस् इति स्थिते शिव इत्यस्य शिवादिगणे पाठः अस्ति। अतः अपत्ये अर्थे शिवादिभ्योऽण् इति सूत्रेण अण्- प्रत्यये अनुबन्धलोपे शिव ङस् अ इति स्थितिः जायते। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञायां सुब्लोपे शिव+अ इति स्थितिः जायते। ततः शिव इत्यत्र शकारोत्तरस्य इकारस्य वृद्धिः वकारोत्तरस्य अकारस्य लोपश्च भवति। तदा शैव् अ इति स्थिते ततः विभक्तिकार्ये शैवः इति रूपम्। एवम् एव गाङ्गः इत्यत्र अपि।

[२८.१४] ऋष्यन्धकवृष्णिकुरुभ्यश्च॥ (४.१.११४)

सूत्रार्थः - ऋषिभ्यः अन्धकेभ्यः वृष्णिभ्यः कुरुभ्यश्च अपत्ये अण् प्रत्ययः स्यात्।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। ऋषयश्च अन्धकाश्च वृष्णश्च कुरवश्च ऋष्यन्धकवृष्णिकुरवः, तेभ्यः ऋष्यन्धकवृष्णिकुरुभ्यः इति इतरेतरद्वन्द्वः। ऋष्यन्धकवृष्णिकुरुभ्यः इति पञ्चम्यन्तम्। चेति अव्ययपदम्।

तस्याऽपत्यम् इति सम्पूर्णं सूत्रम् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति- ऋषिभ्यः अन्धकेभ्यः वृष्णिभ्यः कुरुभ्यश्च अपत्ये अण् तद्धितः प्रत्ययः स्यात्।

उदाहरणम्- वसिष्ठस्य अपत्यम् इति लौकिकविग्रहः। वसिष्ठ ङस् इति स्थिते वसिष्ठ इति प्रातिपदिकम् ऋषिवाचकम्। अतः अपत्ये अर्थे ऋष्यन्धकवृष्णिकुरुभ्यश्च इति सूत्रेण अण्-प्रत्यये अनुबन्धलोपे वसिष्ठ ङस् अ इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः समुदायस्य प्रातिपदिकसंज्ञायां सुब्लोपे वसिष्ठ+अ इति स्थितिः जायते। ततः वसिष्ठ इत्यत्र वकारोत्तरस्य अकारस्य वृद्धौ आकारः भवति। ततः वासिष्ठ इत्यत्र ठकारोत्तस्य अकारस्य लोपे विभक्तिकार्ये वर्णमेलनेन वासिष्ठः इति रूपम्। एवमेव अनेन सूत्रेण अन्धकवंशे श्वफल्कस्य वृष्णिवंशे वासुदेवस्य कुरुवंशे नकुलस्य च अन्तर्भावः भवति। अत एतेभ्यः प्रातिपदिकेभ्यः अपत्ये अर्थे ऋष्यन्धकवृष्णिकुरुभ्यश्च इति सूत्रेण अण्-प्रत्ययः भवति। ततः प्रक्रियाकार्ये श्वाफल्कः, वासुदेवः, नाकुलः इत्यादीनि रूपाणि सिद्ध्यन्ति।

[२८.१५] स्त्रीभ्यो ढक्॥ (४.१.१२०)

सूत्रार्थः - स्त्रीप्रत्ययान्तेभ्यः अपत्ये अर्थे ढक् प्रत्ययः स्यात्।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। स्त्रीभ्यः इति पञ्चम्यन्तं पदम्। ढक् इति प्रथमान्तं पदम्।

तस्याऽपत्यम् इत्यतः अपत्यम् इति अनुवर्तते। तस्य विभक्तिविपरिणामेन अपत्ये इति रूपम्। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। स्त्रीभ्यः इत्यनेन टाप्, ङीप् इत्यादीनां ग्रहणम् इष्टम्। प्रत्ययग्रहणे तदन्ताः ग्राह्याः इति परिभाषया स्त्रीप्रत्ययान्तेभ्यः इति लभ्यते। अतः सूत्रार्थः भवति- स्त्रीप्रत्ययान्तेभ्यः अपत्ये अर्थे ढक् प्रत्ययः स्यात्।

उदाहरणम्- विनतायाः अपत्यम् इति लौकिकविग्रहः। विनता ङस् इति स्थिते विनता इति टाप्प्रत्ययान्तः। अतः अपत्ये अर्थे स्त्रीभ्यो ढक् इति सूत्रेण ढक्-प्रत्ययः भवति। ततः अनुबन्धलोपे कृते प्रातिपदिकसंज्ञा सुब्लोपश्च भवति। तदा वसिष्ठ ढ इति स्थिते किति च इति सूत्रेण आदिवृद्धिः। ततः आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रेण ढकारस्य एयादेशः भवति। ततः यस्येति च इति सूत्रेण आकारलोपे ततः विभक्तिकार्ये वैनतेयः इति रूपम्।

[२८.१६] कन्यायाः कनीन च॥ (४.१.११६)

सूत्रार्थः - कन्याशब्दस्य अपत्ये अर्थे कनीनादेशः प्रकृतितः अण् प्रत्ययश्च स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। कन्यायाः इति षष्ठ्यन्तम्। कनीन इति लुप्तप्रथमान्तम्। चेति अव्ययपदम्।

अस्मिन् सूत्रे शिवादिभ्योऽण् इत्यतः अण् इति अनुवर्तते। तस्याऽपत्यम् इति सम्पूर्णं सूत्रम् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रस्य अर्थः भवति- कन्याशब्दस्य अपत्ये अर्थे कनीनादेशः प्रकृतितः अण् प्रत्ययश्च स्यात्।

उदाहरणम्- कन्यायाः अपत्यम् इति लौकिकविग्रहः। कन्या ङस् इति स्थिते अपत्ये अर्थे कन्यायाः कनीन च इति सूत्रेण कन्या इति प्रकृतेः कनीनादेशः अण्-प्रत्ययः च भवति। ततः अनुबन्धलोपे कनीन +अ इति स्थितिः जायते। समुदायः अयं तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुपः लोपश्च भवति। ततः आदिवृद्धौ अकारलोपे ततः विभक्तिकार्ये कानीनः इति रूपम्।

[२८.१७] राजश्वशुराद्यत्॥ (४.१.१३७)

सूत्रार्थः - राजन्, श्वशुर चेति प्रातिपदिकात् अपत्ये अर्थे यत् प्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। राजा च श्वशुरश्च राजश्वशुरम्, तस्मात् राजश्वशुरात् इति समाहारद्वन्द्वः। राजश्वशुरात् इति पञ्चम्यन्तं पदम्। यत् इति प्रथमान्तं पदम्।

तस्याऽपत्यम् इति सम्पूर्णं सूत्रम् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति - राजन्, श्वशुर चेति प्रातिपदिकात् अपत्ये अर्थे यत् प्रत्ययः स्यात्। अत्र राज्ञो जातावेवेति वाच्यम् इति वार्तिकम् अस्ति। अर्थात् राजन् इति प्रातिपदिकात् जातौ वाच्यायाम् एव यत् भवति।

[२८.१८] ये चाऽभावकर्मणः॥ (६.४.१३८)

सूत्रार्थः - यादौ तद्धिते परे अन् प्रकृत्या स्यात्, न तु भावकर्मणोः।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। ये इति सप्तम्यन्तम् पदम्। चेति अव्ययपदम्। भावश्च कर्म च भावकर्मणी, तयोः भावकर्मणोः, न भावकर्मणोः इति द्वन्द्वगर्भनञ्तत्पुरुषः। अभावकर्मणोः इति सप्तम्यन्तं पदम्।

अन् इति सम्पूर्णं सूत्रम्, आपत्यस्य च तद्धितेऽनाति इत्यतः तद्धिते, प्रकृत्यैकाच् इत्यतः प्रकृत्या चेति अनुवर्तते। अङ्गस्य इति अधिकारे पठितः। अतः प्रत्यये इति पदम् उपलभ्यते। ये इति प्रत्यये इत्यस्य विशेषणम्। अतः तदादिविधिना यादौ प्रत्यये इति अर्थः लभ्यते। अतः सूत्रार्थः भवति - यादौ तद्धिते परे अन् प्रकृत्या स्यात्, न तु भावकर्मणोः।

उदाहरणम्- राज्ञः अपत्यम् जातिः इति लौकिकविग्रहः। राजन् ङस् इति स्थिते अपत्ये अर्थे क्षत्रियजातौ वाच्यायां सत्यां राजश्वशुराद्यत् इति सूत्रेण यत्प्रत्ययः भवति। ततः अनुबन्धलोपे कृते अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञायां सुपः लोपे राजन्+य इति स्थितिः भवति। ततः यचि भम् इति भसंज्ञा भवति। ततः नस्तद्धिते इति सूत्रेण अनः लोपः प्राप्नोति। तदा ये चाऽभावकर्मणोः इति सूत्रेण यादौ तद्धित परे अनः प्रकृतिभावात् लोपः न भवति। ततः वर्णमेलनेन विभक्तिकार्ये राजन्यः इति रूपम्।

[२८.१९] क्षत्त्राद् घः॥ (४.१.१२८)

सूत्रार्थः - क्षत्त्रात् प्रातिपदिकात् अपत्ये अर्थे तद्धितसंज्ञकः घः प्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। क्षत्त्रात् इति पञ्चम्यन्तं पदम्। घः इति प्रथमान्तं पदम्।

तस्याऽपत्यम् इत्यतः अपत्यम् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति - क्षत्त्रात् प्रातिपदिकात् अपत्ये अर्थे तद्धितसंज्ञकः घः प्रत्ययः स्यात्। अत्रापि क्षत्त्रप्रातिपदिकात् जात्यां वाच्यायां सत्याम् एव घः प्रत्ययः भवति, न अन्यथा।

उदाहरणम् - क्षत्त्रस्य अपत्यं जातिः इति लौकिकविग्रहः। क्षत्त्र ङस् इति स्थिते क्षत्त्रप्रातिपदिकस्य जातौ गम्यमानायाम् अपत्ये अर्थे क्षत्त्रात् घः इति सूत्रेण घप्रत्ययः भवति। ततः क्षत्त्र ङस् घ इति स्थिते तद्धितान्तत्वात् प्रातिपदिकसंज्ञा सुपः लोपः च भवति। ततः आयनेयीनीयियः

फढखछघां प्रत्ययादीनाम् इति सूत्रेण घकारस्य इयादेशे क्षत्त्र इय इति स्थितिः। ततः क्षत्त्र इत्यस्य ककारोत्तरस्य अकारस्य च लोपः भवति। ततः विभक्तिकार्ये क्षत्त्रियः इति रूपम्।

पाठगतप्रश्नाः-२

३३. शैवः इत्यत्र कः प्रत्ययः।

३४. वासिष्ठः इत्यत्र केन सूत्रेण कः प्रत्ययः।

३५. स्त्रिभ्यः कः प्रत्ययः भवति।

३६. कन्यायाः कः आदेशः कश्च प्रत्ययः भवति।

३७. क्षत्त्रात् कः प्रत्ययः भवति।

३८. ये चाभावकर्मणोः इति सूत्रस्य अर्थः कः।

[२८.२०] रेवत्यादिभ्यष्ठक्॥ (४.१.१४६)

सूत्रार्थः - रेवत्यादिगणेभ्यः पठितेभ्यः प्रातिपदिकेभ्यः अपत्ये अर्थे ठक् प्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। रेवतीशब्दः आदिः येषां ते रेवत्यादयः, तेभ्यः रेवत्यादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिः। रेवत्यादिभ्यः इति पञ्चम्यन्तम्। ठक् इति प्रथमान्तम्।

तस्याऽपत्यम् इति सम्पूर्णं सूत्रम् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति - रेवत्यादिगणेभ्यः पठितेभ्यः प्रातिपदिकेभ्यः अपत्ये अर्थे ठक् प्रत्ययः स्यात्।

उदाहरणम्- रेवत्याः अपत्यम् इति लौकिकविग्रहः। ततः रेवती ङस् इति स्थिते रेवती इत्यस्य रेवत्यादिगणे पाठः अस्ति। अतः अपत्ये अर्थे रेवत्यादिभ्यष्ठक् इति सूत्रेण ठक्-प्रत्यये अनुबन्धलोपे रेवती ङस् ठ् इति स्थितिः जायते। ततः प्रातिपदिकसंज्ञायां सुब्लोपे च रेवती+ठ् इति स्थितिः जायते। तदा-

[२८.२१] ठस्येकः॥ (७.३.५०)

सूत्रार्थः - अङ्गात् परस्य ठस्य इकादेशः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। ठस्य इति षष्ठ्यन्तं पदम्। इकः इति प्रथमान्तं पदम्।

अत्र अङ्गस्य इति अधिकारः अस्ति। अतः सूत्रार्थः भवति - अङ्गात् परस्य ठस्य इकादेशः स्यात्। इक इति आदेशः अदन्तः।

उदाहरणम्- रेवती ठ् इति स्थिते ठस्येकः इति सूत्रेण ठस्य इकादेशः भवति। ततः रेवती+इक इति स्थिते किति च इत्येनन आदिवृद्धिः भवति। ततः रेवती इत्यत्र तकारोत्तस्य ईकारस्य लोपे ततः विभक्तिकार्ये रैवरिकः इति रूपम्।

[२८.२२] जनपदशब्दात् क्षत्रियादञ्॥ (४.१.१६८)

सूत्रार्थः - जनपदक्षत्रियवाचकात् शब्दात् अपत्ये अर्थे अञ् स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। जनपदवाचकः शब्दः जनपदशब्दः, तस्मात् जनपदशब्दात् इति पञ्चम्यन्तम्। क्षत्रियात् इत्यपि पञ्चम्यन्तम्। अञ् इति प्रथमान्तम् पदम्।

तस्याऽपत्यम् इत्यतः अपत्यम् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति - जनपदक्षत्रियवाचकात् शब्दात् अपत्ये अर्थे अञ् स्यात्।

उदाहरणम् - पञ्चालस्य अपत्यम् इति लौकिकविग्रहः। पञ्चाल ङस् इति स्थिते अपत्ये अर्थे जनपदशब्दात् क्षत्रियादञ् इति सूत्रेण अञ्-प्रत्ययः अनुबन्धलोपश्च भवति। ततः पञ्चाल ङस् अ इति स्थिते प्रातिपदिकसंज्ञा सुब्लोपश्च भवति। ततः पञ्चाल अ इति स्थिते आदिवृद्धिः अकारलोपश्च भवति। ततः विभक्तिकार्ये पाञ्चालः इति रूपम्।

[२८.२३] कुरुनादिभ्यो ण्यः॥ (४.१.१७२)

सूत्रार्थः - जनपदक्षत्रियवाचकेभ्यः कुरुशब्देभ्यः नकारादिशब्देभ्यश्च अपत्ये अर्थे ण्यः प्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। नकारः आदिर्येषां ते नादयः इति बहुव्रीहिसमासः, कुरुश्च नादयश्च कुरुनादयः, तेभ्यः कुरुनादिभ्यः इति इतरेतरद्वन्द्वः। कुरुनादिभ्यः इति पञ्चम्यन्तम्। ण्यः इति प्रथमान्तम् पदम्।

तस्याऽपत्यम् इति सम्पूर्णं सूत्रम् अनुवर्तते। जनपदशब्दात् क्षत्रियादञ् इत्यतः जनपदशब्दात् क्षत्रियात् इति पदम् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति - जनपदक्षत्रियवाचकेभ्यः कुरुशब्देभ्यः नकारादिशब्देभ्यश्च अपत्ये अर्थे ण्यः प्रत्ययः स्यात्।

उदाहरणम्- कुरोः अपत्यम् इति लौकिकविग्रहः। कुरु ङस् इति स्थिते कुरुशब्दः जनपदविशेषस्य क्षत्रियस्य वाचकः। अतः कुरुनादिभ्यो ण्यः इति सूत्रे अपत्ये अर्थे ण्य-प्रत्ययः भवति। ततः अनुबन्धलोपे सति प्रातिपदिकसंज्ञा सुब्लोपश्च भवति। ततः कुरु+अ इति स्थिते ओर्गुणः इति उकारस्य गुणः ओकारः भवति। ततः वान्तो यि प्रत्यये इति सूत्रेण ओकारस्य अवादेशः भवति। ततः आदिवृद्धौ विभक्तिकार्ये च कौरव्यः इति रूपम्। एवमेव नैषध्यः इत्यादिषु तथैव भविष्यति।

[२८.२४] ते तद्राजाः॥ (४.१.१७४)

सूत्रार्थः - जनपदशब्दात् क्षत्त्रियादञ् इति सूत्रेण विहिताः अञादयः प्रत्ययाः तद्राजासंज्ञाः स्युः।

सूत्रव्याख्या -संज्ञासूत्रम् इदम् अस्ति। अत्र पदद्वयम् अस्ति। ते इति प्रथमान्तं पदम्। तद्राजाः इति प्रथमान्तं पदम्।

सूत्रार्थः- तच्छब्देन पूर्वस्य परामर्शः भवति। अतः सूत्रार्थः भवति - जनपदशब्दात् क्षत्त्रियादञ् इति सूत्रेण विहिताः अञादयः प्रत्ययाः तद्राजासंज्ञाः स्युः। प्रायः अञ्, अण्, ञ्यण्, ण्य इति चत्वारः तद्राजसंज्ञकाः। अष्टाध्याय्यादिषु इतोऽपि तद्राजप्रत्ययः प्राप्यते।

[२८.२५] तद्राजस्य बहुषु तेनैवास्त्रियाम्॥ (२.४.६२)

सूत्रार्थः - बहुषु अर्थेषु तद्राजस्य लुक् तदर्थकृते बहुत्वे, न तु स्त्रियाम्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अत्र पञ्च पदानि सन्ति। तद्राजस्य इति षष्ठ्यन्तम्। बहुषु इति सप्तम्यन्तम्। तेन इति तृतीयान्तम्। एव इति अव्ययपदम्। न स्त्री अस्त्री, तस्याम् अस्त्रियाम् इति सप्तम्यन्तम्।

ण्यक्षत्त्रियार्षञितो यूनि लुगणिञोः इत्यतः लुग् इति अनुवर्तते। अतः सूत्रार्थः भवति - बहुषु अर्थेषु तद्राजस्य लुक् तदर्थकृते बहुत्वे, न तु स्त्रियाम्।

उदाहरणम् - पञ्चालस्य अपत्यानि, पञ्चालानां जनपदानां राजानो वेति लौकिकविग्रहः। पञ्चाल ङस् इति स्थिते जनपदशब्दात् क्षत्त्रियादञ् इति सूत्रेण अञ्-प्रत्यये प्रक्रियाकार्ये पाञ्चालः इति रूपम्। अत्र पाञ्चालशब्दस्तु अञ्प्रत्ययान्तः। अतः पाञ्चालशब्दस्य बहुत्वविवक्षायां जस्प्रत्ययः भवति। ते तद्राजाः इति सूत्रेण तद्राजसंज्ञा भवति। अत्र तद्राजस्य बहुत्वविवक्षा अस्ति। अतः तद्राजस्य बहुषु तेनैवास्त्रियाम् इति सूत्रेण तद्राजप्रत्ययस्य लुक् भवति। ततः निमित्तापाये नैमित्तिकस्याप्यपायः इति आदिवृद्ध्यादिकस्य अभावः अस्ति। ततः प्रथमयोः पूर्वसवर्णः इति सवर्णदीर्घे प्रक्रियाकार्ये पञ्चालाः इति रूपम्।

पाठगतप्रश्नाः-३

३९. ठक्-प्रत्ययविधायकं सूत्रं किम्।

४०. ठस्य कः आदेशः भवति।

४१. पाञ्चालः इत्यत्र केन सूत्रेण कः प्रत्ययः।

४२. कुरुनादिभ्यः कः प्रत्ययः भवति।

४३. तद्राजसंज्ञाविधायकं सूत्रं किम्।

४४. पञ्चालाः इत्यत्र तद्राजस्य लुक् केन सूत्रेण भवति।

पाठसारः

अस्मिन् पाठे अपत्ये अर्थे प्रत्ययः विधीयते। यथा उपगोः अपत्यम् इति विग्रहे तस्यापत्यम् इति सूत्रेण अण्-प्रत्ययः विधीयते। तेन औपगवः इति रूपम्। अर्थात् तद्धितवृत्त्या उपगुसम्बन्धि-अपत्यम् इति अर्थः समायाति। एवञ्च पाठे अस्मिन् अपत्ये अर्थे अञ्, ठक्,अण्, फक्, इञ् च इति एते प्रत्ययाः विधीयन्ते। एवञ्च गोत्रापत्यम् युवापत्यम् इत्यादिसंज्ञा अपि अस्मिन् प्रकरणे विराजते। गोत्रापत्ये युवापत्ये अर्थे प्रत्ययाः विधीयन्ते। एवञ्च तद्राजसंज्ञकस्य प्रत्ययस्य बहुत्वे गम्यमाने सति लुक् भवति। एवञ्च अस्मिन् प्रकरणे न केवलम् अपत्यार्थे तद्धितप्रत्ययाः विधीयन्ते अपि तु अपत्यभिन्नार्थे भवहिताद्यर्थे अपि तद्धितप्रत्ययाः भवन्ति। यथा पुंसु भवः इति विग्रहे भवार्थे स्नञ्-प्रत्यये प्रक्रियाकार्ये पौंस्नः इति रूपम्। परन्तु अपत्यार्थे अधिकाः प्रत्ययाः भवन्ति। अतः अपत्याधिकारप्रकरणम् इति नाम भवति।

विशेषशब्दावली

१. **आदिवृद्धिः** - तद्धितेष्वचामादेः, किति च इत्यादिसूत्रेण ञिति णिति किति च परे आदेः अचः वृद्धिः भवति। यथा उपगोः अपत्यम् इत्यत्र अण्-प्रत्ययः भवति। णित्प्रत्ययः अस्ति। अतः उपगु इति शब्दस्य आदिः अच् उकारः। अत एव तस्य एव आदेः अचः उकारस्य वृद्धिः भवति।

२. **सौत्रत्वात् लुक्** - छन्दोवत् सूत्राणि भवन्ति इति महाभाष्यकारवचनम्। अतः छन्दसः मेलनाय कुत्रचित् विभक्तेः अदर्शनं भवति। यथा प्रकृते प्रकरणे तस्यापत्यम् इति सूत्रे तस्य इति शब्दात् पञ्चमी आगता। परन्तु सूत्रे समागतायाः पञ्चम्याः अदर्शनं भवति। अतः शास्त्रे उच्यते - सौत्रत्वात् लुक् भवति।

३. **विभक्तिविपरिणामः** - लोके यथा विभक्तीनां प्रयोगः भवति तथा शास्त्रे कदाचित् अन्यथा अपि भवति। गर्गादिभ्यो यञ् इति अस्मिन् सूत्रे तस्याऽपत्यम् इत्यतः अपत्यम् इति प्रथमान्तं पदम् अनुवर्तते। परन्तु सूत्रे प्रथमान्तस्य अपत्यशब्दस्य तु सप्तमीत्वेन परिवर्तनम् भवति। अयम् एव विभक्तिविपरिणामः।

पाठान्तप्रश्नाः

१. तस्यापत्यम् इति सूत्रस्य व्याख्यां करोतु।

२. अपत्यं पौत्रप्रभृति गोत्रम् इति सूत्रस्य व्याख्यां करोतु।

३. एको गोत्रे इति सूत्रं व्याख्यात।

४. गार्ग्यः इति रूपं साधयत।

५. जीवति तु वंश्ये युवा इति सूत्रस्य व्याख्यां करोतु।

६. गार्ग्यायणः इति रूपं साधयत।

७. दाक्षिः इति रूपं साधयत।

८. जनपदशब्दात्क्षत्रियादञ् इति सूत्रं व्याख्यात।

९. राजन्यः इति रूपं साधयत।

१०. तद्राजस्य बहुषु तेनैवास्त्रियाम् इति सूत्रं व्याख्यात।

११. बाहविः इति रूपं साधयत।

१२. गाङ्गः इति रूपं साधयत।

१३. ऋष्यन्धकवृष्णिकुरुभ्यश्च इति सूत्रं व्याख्यात।

१४. ये चाऽभावकर्मणोः इति सूत्रं व्याख्यात।

१५. पाञ्चालः इति रूपं साधयत।

पाठगतप्रश्नानाम् उत्तराणि

अत्र उपरि प्रदत्तानां प्रश्नानाम् उत्तराणि प्रदीयन्ते।

उत्तराणि-१

१. स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् इति सूत्रम्।

२. स्त्रीपुंसाभ्याम् इत्यत्र इतरेतरद्वन्द्वः।

३. षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्ययाः वा स्युः इति अर्थः।

४. अपत्यं पौत्रप्रभृति गोत्रम् इति सूत्रम्।

५. गुणः।

६. गोत्रे एक एवापत्यप्रत्ययः स्यात् इति अर्थः।

उत्तराणि-२

७. यञ-प्रत्ययः।

८. गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियाम्।

९. जीवति तु वंश्ये युवा इति सूत्रम्।

१०. यञिञोश्च इति सूत्रम्।

११. इञ्-प्रत्ययः।

१२. इञ्-प्रत्ययः।

उत्तराणि-३

१३. अण्-प्रत्ययः।

१४. ऋष्यन्धकवृष्णिकुरुभ्यश्च

१५. ढक्-प्रत्ययः।

१६. कनीन इति आदेशः अण्-प्रत्ययः।

१७. घ-प्रत्ययः।

१८. यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः।

उत्तराणि-४

१९. रेवत्यादिभ्यष्ठक्।

२०. इकादेशः।

२१. जनपदशब्दात्क्षत्रियादञ् इत्यनेन सूत्रेण अञ्-प्रत्ययः।

२२. ण्य-प्रत्ययः।

२३. ते तद्राजाः इति सूत्रम्।

२४. तद्राजस्य बहुषु तेनैवास्त्रियाम्।

॥ इति अष्टाविंशः पाठः ॥

346sk29

२९

अथ मत्वर्थीयप्रकरणम्

प्रस्तावना

तद्धितप्रत्ययेषु मतुबपि कश्चित् तद्धितप्रत्ययः विद्यते। तदस्यास्त्यस्मिन्निति मतुप् (५.२.९४) इति सूत्रात् आरभ्य मतुबर्थीयप्रकरणम् आरभ्यते। तदस्य अस्ति उत तदस्मिन् अस्ति इत्यस्मिन् अर्थे मतुब्प्रत्ययः भवति। यथा – बुद्धिः अस्य अस्मिन् वा अस्ति इत्यर्थे मतुब्प्रत्ययो भवति। बुद्धिमान्, धनवान्, ज्ञानवान् इत्यादीनि रूपाणि भवन्ति। न केवलं मतुब्प्रत्ययस्य मतुबर्थीयप्रकरणे अन्तर्भावः अस्ति। अपि तु तदस्यास्त्यस्मिन्निति अर्थे विद्यमानाः अपि प्रत्ययाः मतुबर्थप्रकरणे अन्तर्भवन्ति। यथा– तदस्यास्त्यस्मिन्नित्यर्थे विन्, लच्, इन्, अण् इत्यादयः अपि अनेके प्रत्ययाः भवन्ति। यथा– माया अस्य अस्ति इत्यर्थे इन्प्रत्ययः, तपः अस्य अस्ति इत्यर्थे विन् इत्यादयः प्रत्ययाः भवन्ति। एतेषामपि प्रत्ययानां मतुबर्थीयप्रकरणे अन्तर्भावो विद्यते।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् –

- मतुबर्थीयप्रत्ययान् ज्ञातुं समर्थो भवेत्।
- मतुब्प्रत्ययाः कस्मिन् अर्थे भवन्ति इति ज्ञातुं शक्नुयात्।
- मतुप्प्रत्ययविधायकसूत्राणाम् उदाहरणानि ज्ञातुं शक्नुयात्।
- मतुप्प्रत्ययेन निर्मितानां शब्दानाम् अर्थम् अवगन्तुं शक्नुयात्।
- मतुप्प्रत्ययेन शब्दस्य निर्माणं कर्तुं योग्यो भवेत्।
- वृत्त्या महद्वाक्यं कथं लघुतया प्रयुङ्क्ते इति तद्विषये सम्यक् ज्ञातुं शक्नुयात्
- सूत्रात् कथम् अर्थनिर्णयः भवति इति ज्ञातुं शक्यो भवेत्।
- अनुवृत्तिः अधिकारश्च इति एतान् ज्ञातुं शक्नुयात्।

[२९.१] तदस्यास्त्यस्मिन्निति मतुप्॥ (५.२.९४)

सूत्रार्थः - प्रथमान्ताद् प्रातिपदिकात् अस्य अस्ति इत्यर्थे अस्मिन् अस्ति इत्यर्थे वा तद्धितसंज्ञकः मतुब्प्रत्ययः परः भवति।

सूत्रव्याख्या -विधिसूत्रम् इदं भवति। अस्मिन् सूत्रे षट् पदानि सन्ति। तद् इति प्रथमान्तम्। अत्र पञ्चम्यर्थे प्रथमा भवति। अस्य इति षष्ठ्यन्तम्। अस्ति इति क्रियापदम्। अस्मिन् इति सप्तम्यन्तं पदम्। इति अव्ययपदम्। मतुप् इति प्रथमान्तम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। अतः सूत्रार्थः भवति - प्रथमान्ताद् प्रातिपदिकात् अस्य अस्ति इत्यर्थे अस्मिन् अस्ति इत्यर्थे वा तद्धितसञ्ज्ञकः मतुब्प्रत्ययः परः भवति।

यथा- गावः अस्य अस्मिन् वा सन्ति इत्यर्थे प्रकृतसूत्रेण मतुब्प्रत्ययो भवति। मतुपः पकारस्य हलन्त्यम् इत्यनेन उकारस्य उपदेशेऽजनुनासिक इत् इत्यनेन च इत्संज्ञायां मत् इत्येतत् मात्रम् अवशिष्यते। अर्थात् तदस्य अस्ति, तद् अस्मिन् अस्ति वा इति अर्थे मतुब्प्रत्ययः भवति। प्रकृतसूत्रे इतिशब्दस्य सन्निधानात् तत् अस्य अस्ति तत् अस्मिन् अस्ति वा इति प्रसिद्धार्थेन साकं अन्यस्मिन् अर्थे अपि मतुपः प्रयोगो भवति। महाभाष्यकारेण एकेन श्लोकेन प्रोक्तम्-

"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।

संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः। । " इति

अर्थात् अस्तिविवक्षायां बहुत्वे, प्रशंसायाम्, नित्ययोगे, अतिशायने, सम्बन्धे च मतुबादयः प्रत्ययाः भवन्ति। यथा बह्व्यो गावः सन्ति अस्य इति गोमान् इति तु अस्तिविवक्षायां बहुत्वादिषु उदाहरणम्।

पुनश्च प्रकृतसूत्रे अस्ति इत्यत्र यद्यपि एकवचनं प्रयुक्तं तथापि एकवचनं विवक्षितं नास्ति। तस्मात् एकत्वे द्वित्वे बहुत्वे च मतुबादयः भवन्ति। तस्मादेव गावः सन्ति अस्य इत्यत्र बहुत्वे अपि मतुप् भवति। एवमेव अस्य इत्यत्रापि एकवचनं विवक्षितं नास्ति। तस्मादेव धनानि सन्ति एषाम् इत्यत्र बहुत्वे अपि मतुब्प्रत्ययः भवति।

परन्तु अस्ति इत्यत्र तु वर्तमानकालः विवक्षितः भवति। तस्मात् भूतार्थे भविष्यदर्थे च मतुब्प्रत्ययः न भवति। तस्मात् धनम् आसीत् अस्य उत धनं भविष्यति अस्य इत्यर्थे मतुब्प्रत्ययः न भवति। अर्थात् अस्ति इत्यत्र संख्यायाः अभावे अपि कालस्य तु विवक्षा अस्ति।

उदाहरणम्- गावः सन्ति अस्य इति लौकिकविग्रहे वर्तमानकालः तद् अस्य अस्ति इति अर्थश्च वर्तते। अतः गो जस् इति स्थिते प्रकृतसूत्रेण प्रथमान्तात् गो इति प्रातिपदिकात् मतुप् भवति। मतुपः उकारस्य पकारस्य च लोपे गो जस् मत् इति स्थितिः भवति। अयं समुदायः तद्धितान्तः अस्ति। अतः कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः सुपो धातुप्रातिपदिकयोः इत्यनेन सुपः लोपो भवति। तदा गो मत् इति स्थिते एकदेशविकृतमनन्यवत् इति न्यायेन ततः प्रातिपदिकसंज्ञा भवति। ततः स्वौजस् इत्यादिना सूत्रेण विभक्तिकार्ये सौ अनुबन्धलोपे गोमत् स् इति स्थितिः भवति। ततः अत्वसन्तस्य चाधातोः इत्यनेन उपधायां स्थितस्य अकारस्य दीर्घे गोमात् स् इति स्थितिः भवति। तदा उगिदचां सर्वस्थानेऽधातोः इत्यनेन नुमि कृते अनुबन्धलोपे च गोमान् त् स् इति स्थितिः भवति। ततः

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इत्यनेन अपृक्तस्य सकारस्य लोपः भवति। तदा गोमान् त् इति स्थिते संयोगान्तस्य लोपः इत्यनेन संयोगान्तस्य तकारस्य लोपे वर्णमेलनेन गोमान् इति रूपम्।

[२९.२] रसादिभ्यश्च॥ (५.२.९५)

सूत्रार्थः - तद् अस्य अस्ति इत्यर्थे तद् अस्मिन् अस्ति इत्यर्थे वा रसादिगणे पठितात् प्रातिपदिकात् मतुब्प्रत्ययः भवति।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे द्वे पदे स्तः। रस आदिः येषां ते रसादयः। तेभ्यः रसादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिः। रसादिभ्यः इति पञ्चम्यन्तं पदम्। चेति अव्ययपदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सम्पूर्णं सूत्रम् अनुवर्तते। अतः सूत्रार्थः भवति - तद् अस्य अस्ति इत्यर्थे तद् अस्मिन् अस्ति इत्यर्थे वा रसादिगणे पठितात् प्रातिपदिकात् मतुब्प्रत्ययः भवति। रसः, रूपम्, वर्णः, गन्धः, स्पर्शः, शब्दः, स्नेहः, भावः चेति एते शब्दाः रसादिगणे पठिताः। तस्मात् तदस्य अस्ति उत तद् अस्मिन् इति अर्थे एतेभ्यः शब्देभ्यः परं मतुप् प्रत्ययः भवति।

शङ्का - तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रेण तद् अस्य अस्ति तद् अस्मिन् अस्ति वा इति अर्थे रसादिगणे पठितेभ्यः प्रातिपदिकेभ्यः मतुब्प्रत्ययविधानं सम्भवति। अतः शङ्का जायते यत् रसादिभ्यश्च इति सूत्रेण पुनः मतुब्प्रत्ययविधानं किमर्थम्।

समाधानम् - अत्र समाधानं प्रदीयते - रसादिगणे पठितानि प्रातिपदिकानि अदन्तानि। अतः अदन्तस्य प्रातिपदिकस्य अत इनिठनौ इति सूत्रेण तद् अस्य अस्ति तद् अस्मिन् अस्ति वेति अर्थे इन्प्रत्ययः ठन्प्रत्ययश्च प्राप्नोति। ठन्प्रत्ययं इन्प्रत्ययं च बाधित्वा पुनः मतुब्प्रत्ययविधानाय रसादिभ्यश्च इति सूत्रम् आवश्यकम्।

उदाहरणम् - रसः अस्य अस्मिन् वा अस्ति इति लौकिकविग्रहः। रसशब्दः रसादिगणे पठितः। अतः रसादिभ्यश्च इति सूत्रेण तद् अस्य अस्मिन् वा अस्ति इति अर्थे मतुब्प्रत्ययः भवति। तदा नुबन्धलोपे कृते रस स् मत् इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः सुपो धातुप्रातिपदिकयोः इति सूत्रेण सूत्रेण सुपः लोपः भवति। तदा रस मत् इति स्थितिः जायते। तदा मादुपधायाश्च मतोर्वोऽयवादिभ्यः इति मकारस्य वकारादेशः भवति। ततः एकदेशविकृतमनन्यवत् इति न्यायेन विभक्तिकार्ये सु-प्रत्ययः। ततः रस वत् स् इति स्थिते उपधादीर्घे नुमागमे च रस वान् स् इति स्थितिः। तदा हल्ङ्याब्भ्यः इत्यादिना सूत्रेण सुलोपे संयोगान्तस्य तकारस्य लोपे च वर्णमेलनेन रसवान् इति रूपम्।

प्रकृते मकारस्य स्थाने वकारादेशः विधीयते। तदर्थम् सूत्रम् -

[२९.३] मादुपधायाश्च मतोर्वोऽयवादिभ्यः॥ (८.२.९)

सूत्रार्थः - मवर्णावर्णान्ताद् मवर्णावर्णोपधाच्च यवादिवर्जितात् परस्य मतोः मस्य वः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। म् च अश्च अनयोः समाहारः इति मम्, तस्मात् मात् इति समहारद्वन्द्वः। मात् इति पञ्चम्यन्तं पदम्। यवः आदिर्येषां ते यवादयः, न यवादयः अयवादयः, तेभ्यः अयवादिभ्यः इति पञ्चम्यन्तं पदम्। उपधायाः इति पञ्चम्यन्तं पदम्। च इति अव्ययपदम्। मतोः इति षष्ठ्यन्तं पदम्।

पदस्य इति अधिकारः अस्ति। उपधायाः इत्यस्य विशेषणं मात् इति तस्मात् येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिना मकारान्तः अवर्णान्तः च इति लभ्यते। माद् इति अस्य द्विवारं ग्रहणं भवति। माद् इति उपधायाः विशेषणं भवति। तेन मकारोपधाद् अवर्णोपधाच्च प्रातिपदिकात् इत्यपि लभ्यते। सूत्रे चकारग्रहणस्य सामर्थ्यात् अर्थद्वयं समायाति। मात् परस्य मतोर्वो स्यादिति एकः अर्थः। उपधायाश्च मात् परस्य मतोर्वो भवतीत्यपरः अर्थः। अर्थद्वयं मिलित्वा कश्चन एकः अर्थः प्रतिपादितः। स तावत् - मवर्णावर्णान्ताद् मवर्णावर्णोपधाच्च यवादिवर्जितात् परस्य मतोर्मस्य वः स्यात्। अर्थात् मकारस्य वकारादेशः भवति। तत्र निमित्तानि भवन्ति-

१. मकारान्तं प्रातिपदिकम् ,अवर्णान्तं प्रातिपदिकम् ,मवर्णोपधं प्रातिपदिकम् , अवर्णोपधं प्रातिपदिकं वा इत्येतेषु किमपि स्यात्।

२. तच्च प्रातिपदिकं यवादिगणपठितं न स्यात् इति।

एतेन मकारान्तं प्रातिपदिकम् ,अवर्णान्तं प्रातिपदिकम् , मवर्णोपधं प्रातिपदिकम् , अवर्णोपधं प्रातिपदिकं वा तच्च यवादिगणपठितप्रातिपदिकभिन्नम् इत्येतेभ्यः परस्य मतोः मकारस्य स्थाने वकारः स्यात् इति फलितार्थः भवति।

उदाहरणम् - १. यवादिगणपठितप्रातिपदिकभिन्नस्य मकारान्तप्रातिपदिकस्य उदाहरणं भवति किंवान् इति। किम् +वान् इति यवादिगणे किम्- शब्दस्य पाठो नास्ति। पुनश्च मकारान्तं प्रातिपदिकम् अस्ति। अतः मतोः मकारस्य वकारे प्रक्रियाकार्ये च किंवान् इति रूपम् अस्ति।

२. यवादिगणपठितप्रातिपदिकभिन्नस्य अवर्णान्तप्रातिपदिकस्य उदाहरणं भवति रसवान् इति। रस इति अदन्तं प्रातिपदिकम् अस्ति। पुनश्च रस इति प्रातिपदिकं यवादिगणे पठितं नास्ति। अतः रस इति अदन्तप्रातिपदिकात् परस्य मतोः मस्य वकारादेशे प्रक्रियाकार्ये च रसवान् इति रूपम्।

३. यवादिगणपठितप्रातिपदिकभिन्नस्य मवर्णोपधप्रातिपदिकस्य उदाहरणं भवति लक्ष्मीवान् इति। लक्ष्मी+ मत् इत्यत्र मकारोपधं प्रातिपदिकं लक्ष्मी इति। तच्च प्रातिपदिकं यवादिगणे अपि पठितं नास्ति। अतः लक्ष्मी इति मवर्णोपधात् परस्य मतोः मकारस्य वकारे प्रक्रियाकार्ये च लक्ष्मीवान् इति रूपम्।

४. यवादिगणपठितप्रातिपदिकभिन्नस्य अवर्णोपधप्रातिपदिकस्य उदाहरणं भवति यशस्वान् इति। यशस् + मत् इति स्थिते यशस् इति प्रातिपदिकम् अवर्णोपधम् अस्ति। तच्च यवादिगणे पठितम् अपि नास्ति। अतः यशस् इति अवर्णोपधात् प्रातिपदिकात् परस्य मतोः मकारस्य वकारे प्रक्रियाकार्ये च यशस्वान् इति रूपम् अस्ति।

[२९.४] तसौ मत्वर्थे॥ (१.४.१९)

सूत्रार्थः - तान्तौ सान्तौ भंसज्ञकौ स्तः मत्वर्थे प्रत्यये परे।

सूत्रव्याख्या - इदम् संज्ञासूत्रम् अस्ति। अस्मिन् सूत्रे द्वे पदे स्तः। मतोः अर्थः मत्वर्थः, तस्मिन् मत्वर्थे इति षष्ठीतत्पुरुषः। मत्वर्थे इति सप्तम्यन्तं पदम्। तश्च स च तसौ इति इतरेतरद्वन्द्वः। तसौ इति प्रथमान्तं पदम्।

यचि भम् इत्यतः भम् इति अनुवर्तते। मतुप् प्रत्ययः अस्ति। अतः मतुब्प्रत्ययेन प्रातिपदिकस्य आक्षेपः भवति। प्रातिपदिकस्य विशेषणम् तसौ इति। अतः विशेषणत्वात् येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिना तान्तं सान्तञ्च लभ्यते। अतः सूत्रार्थः भवति- तान्तौ सान्तौ भसज्ञकौ स्तः मत्वर्थे प्रत्यये परे।

सूत्रम् इदं स्वादिष्वसर्वनामस्थाने इति सूत्रस्य अपवादशास्त्रम्। प्रकृतस्थले स्वादिष्वसर्वनामस्थाने इति सूत्रेण पदसंज्ञा भवति। तसौ मत्वर्थे इत्यनेन भसंज्ञा भवति। परन्तु आ कडारादेका संज्ञा इत्यधिकारसामर्थ्यात् एकस्याः संज्ञायाः ग्रहणं भवति। तदा या संज्ञा परा अनवकाशा च भवति, तस्य ग्रहणं भवति। तस्मात् भसंज्ञा पदसंज्ञां बाधते।

उदाहरणम्- गुरुतौ स्तः अस्य इति विग्रहे तदस्यास्त्यस्मिन्निति मतुप् इति शास्त्रेण मतुप् भवति। ततः अनुबन्धलोपे प्रातिपदिकसंज्ञा भवति। तदा गुरुत् औ मत् इति स्थिते स्वादिष्वसर्वनामस्थाने इति सूत्रेण गुरुत् इत्यस्य पदसंज्ञा प्राप्ता। गुरुत् इति तान्तम् प्रातिपदिकम् अस्ति। अतः प्रकृतसूत्रेण तान्तस्य प्रातिपदिकस्य भसंज्ञा भवति। अतः पदसंज्ञां प्रबाध्य भसंज्ञा विधीयते, परत्वात् अनवकाशत्वाच्च। अतः पदसंज्ञायाः अभावात् तकारस्य झलां जशोऽन्ते इति शास्त्रेण दकारः न भवति। ततः विभक्तिकार्ये सौ उपधादीर्घे सुलोपे संयोगान्तस्य च लोपे प्रक्रियाकार्ये गुरुत्मान् इति रूपम्।

[२९.५] गुणवचनेभ्यो मतुपो लुगिष्टः॥ (वा)

अर्थः– गुणवचनात् प्रातिपदिकात् परस्य मतोः लुग् स्यात्।

व्याख्या- वार्तिकम् इदम् अस्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रभाष्ये प्रकृतवार्तिकम् इदम् अस्ति। प्रकृतवार्तिकेन मतुब्प्रत्ययस्य लुक् विधीयते। तस्मात् विधिशास्त्रम् अस्ति। अत्र चत्वारि पदानि सन्ति। गुणवचनेभ्यः इति पञ्चम्यन्तं पदम्। मतुपः इति षष्ठ्यन्तं पदम्। लुग् इष्टिः च इति पदद्वयम् प्रथमान्तम्। गुणम् उक्तवन्तः इति गुणवचनाः। अर्थात् आदौ गुणम् उक्त्वा पश्चात् गुणयुक्तं द्रव्यम् एव अभिन्नरूपेण कथयति, तत् गुणवचनं भवति। यथा शुक्लः इत्यादयः प्रथमतया गुणम् उक्त्वापि पश्चात् अभिन्नरूपेण गुणयुक्तं द्रव्यं कथयति। अतः शुक्लशब्दः गुणवचनः। अतः सूत्रार्थ भवति– गुणवचनात् प्रातिपदिकात् परस्य मतोः लुग् स्यात्।

उदाहरणम्- शुक्लः (गुणः) अस्य अस्ति इति विग्रहे तदस्यास्त्यस्मिन्निति मतुप् इति शास्त्रेण मतुब्प्रत्ययः भवति। ततः अनुबन्धलोपे शुक्ल + मत् इति स्थितिः जायते। प्रकृते शुक्लशब्दः

समानरूपेण गुणं गुणिनं च कथयति। अतः शुक्लशब्दः गुणवचनः। तस्मात् शुक्ल इति गुणवचनात् प्रातिपदिकात् परस्य मतोः प्रकृतवार्तिकेन लुक् भवति। ततः विभक्तिकार्ये शुक्लः इति रूपम्।

पाठगतप्रश्नाः-१

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते।

१. मतुब्प्रत्ययः केन सूत्रेण विधीयते।

२. गोमान् इत्यत्र केन सूत्रेण कः प्रत्ययः।

३. अस्ति इत्यत्र कालविवक्षा अस्ति न वा।

४. रसादिभ्यश्च इत्यस्य अर्थः कः।

५. मादुपधायाश्च मतोर्वोऽयवादिभ्यः इति सूत्रेण किं विधीयते।

६. तसौ मत्वर्थे इत्यनेन का संज्ञा विधीयते।

[२९.६] प्राणिस्थादातो लजन्यतरस्याम्॥ (५.२.९६)

सूत्रार्थः - प्राणिस्थवाचकात् प्रथमान्तात् आदन्तात् प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे विकल्पेन तद्धितसंज्ञकः लच् प्रत्ययः परः भवति।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। प्राणिषु तिष्ठति इति प्राणिस्थम्, तस्मात् प्राणिस्थात् इति पञ्चम्येकवचनान्तं पदम्। आतः इत्यपि पञ्चम्येकवचनान्तं पदम्। लच् इति प्रथमैकवचनान्तं पदम्। अन्यतरस्याम् इति अव्ययपदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इत्यतः तदस्यास्त्यस्मिन्निति इति अनुवर्तते। प्राणिस्थात् इत्यनेन प्राणिस्थवाचकात् इति बोध्यम्। आतः इति प्रातिपदिकस्य विशेषणत्वात् आदन्तादिति अर्थः लभ्यते। अतः सूत्रार्थः भवति - प्राणिस्थवाचकात् प्रथमान्तात् आदन्तात् प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे विकल्पेन तद्धितसंज्ञकः लच् प्रत्ययः परः भवति। अर्थात् अस्य सूत्रस्य प्रवृत्तौ निमित्तानि -

१. प्राणिस्थवाचकं प्रातिपदिकम् आवश्यकम्।

२.तच्च प्रातिपदिकम् आदन्तं स्यात्।

३. तच्च अदन्तं प्रातिपदिकं प्रथमाविभक्त्यन्तं स्यात्।

उदाहरणम्- चूडालः, चूडावान् च प्रकृतसूत्रस्य उदाहरणम् अस्ति। चूडा इति प्रातिपदिकं प्राणिस्थवाचकम् अस्ति। यतो हि प्राणिनि स्थितस्य केशसमूहस्य वाचकं चूडापदम्। पुनश्च तच्च आदन्तं प्रातिपदिकम् अस्ति। पुनश्च प्रथमान्तं पदमपि अस्ति। अतः चूडा अस्य अस्ति इति विग्रहे

प्रकृतशास्त्रेण विकल्पेन लच्प्रत्ययः विधीयते। ततः अनुबन्धलोपे तद्धितान्तस्य प्रातिपदिकसंज्ञा भवति। ततः सुब्लोपे चूडा +ल इति स्थितिः जायते। ततः एकदेशविकृतमनन्यवत् इति न्यायेन ततः प्रातिपदिकसंज्ञायां विभक्तिकार्ये चूडालः इति रूपम्। लचः अभावपक्षे तदस्यास्त्यस्मिन्निति मतुप् इति शास्त्रेण मतुब्प्रत्ययः भवति। ततः अनुबन्धलोपे मकारस्य वकारादेशे सति प्रक्रियाकार्ये वर्णमेलनेन चूडावान् इति रूपम्।

[२९.७] लोमादिपामादिपिच्छादिभ्यः शनेलचः॥ (५.२.१००)

सूत्रार्थः - तदस्यास्त्यस्मिन्निति अर्थे लोमादिपामादिपिच्छादिगणे पठितेभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः विकल्पेन तद्धितसंज्ञकः शनेलचः प्रत्ययाः स्युः।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् शास्त्रे द्वे पदे स्तः। लोमन् शब्दः आदिर्येषां ते लोमादयः, पामन् शब्दः आदिर्येषां ते पामादयः, पिच्छशब्दः आदिर्येषां ते पिच्छादयः। उभयत्र तु तद्गुणसंविज्ञानबहुव्रीहिः। लोमादयश्च पामादयश्च पिच्छादयश्च लोमादिपामादिपिच्छादयः, तेभ्यः लोमादिपामादिपिच्छादिभ्यः इति इतरेतरद्वन्द्वः। लोमादिपामादिपिच्छादिभ्यः इति पञ्चम्यन्तं पदम्। श च न च इलच्च इति शनेलचः इति इतरेतरद्वन्द्वः। शनेलचः इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन्, इति पदम् अनुवर्तते। प्राणिस्थादातो लजन्यतरस्याम् इत्यस्मात् अन्यतरस्याम् इति पदम् अनुवर्तते। अतः सूत्रार्थः भवति - तदस्यास्त्यस्मिन्निति अर्थे लोमादिपामादिपिच्छादिगणे पठितेभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः विकल्पेन तद्धितसंज्ञकाः शनेलचः प्रत्ययाः स्युः। यथासंख्यमनुदेशः समानाम् इति परिभाषया लोमादिगणपठितप्रातिपदिकेभ्यः विकल्पेन शप्रत्ययः, पामादिगणपठितप्रातिपदिकेभ्यः विकल्पेन नप्रत्ययः, पिच्छादिगणपठितप्रातिपदिकेभ्यः विकल्पेन इलच् प्रत्ययो भवति। अपरस्मिन् पक्षे तु मतुब्प्रत्ययो भवति।

उदाहरणम्- लोमानि अस्य सन्ति इति विग्रहे लोमन् - शब्दस्य लोमादिगणे पाठः अस्ति। अतः लोमादिपामादिपिच्छादिभ्यः शनेलचः इति सूत्रेण शप्रत्ययः भवति। अयं समुदायः तद्धितान्तः। अतः तद्धितान्तस्य प्रातिपदिकसंज्ञायां सुपः लोपे लोमन् + श इति स्थितिः भवति। स्वादिष्वसर्वनामस्थाने इति शास्त्रेण लोमनः पदसंज्ञा भवति। ततः न लोपः प्रातिपदिकान्तस्य इति शास्त्रेण नकारलोपः भवति। ततः विभक्तिकार्ये लोमशः इति रूपम्। शप्रत्ययस्य अभावपक्षे तदस्यास्त्यस्मिन्निति मतुप् इति शास्त्रेण मतुब्प्रत्ययः भवति। ततः अनुबन्धलोपे मकारस्य वकारादेशे सति विभक्तिकार्ये वर्णमेलनेन लोमवान् इति रूपम्।

पाम अस्य अस्ति इति विग्रहे पामन् - शब्दस्य पामादिगणे पाठः अस्ति। अतः लोमादिपामादिपिच्छादिभ्यः शनेलचः इति शास्त्रेण नप्रत्ययः भवति। अयं समुदायः तद्धितान्तः। अतः तद्धितान्तस्य प्रातिपदिकसंज्ञायां सुपः लोपे पामन् + न इति स्थितिः जायते। स्वादिष्वसर्वनामस्थाने इति शास्त्रेण पामनः पदसंज्ञा अस्ति। न लोपः प्रातिपदिकान्तस्य इति शास्त्रेण नकारलोपे विभक्तिकार्ये

पामनः इति रूपम्। नप्रत्ययस्य अभावपक्षे तदस्यास्त्यस्मिन्निति मतुप् इति शास्त्रेण मतुब्प्रत्ययः भवति। ततः अनुबन्धलोपे मकारस्य वकारादेशे सति विभक्तिकार्ये वर्णमेलनेन पामवान् इति रूपम्।

पिच्छम् अस्य अस्ति इति विग्रहे पिच्छ - शब्दस्य पिच्छादिगणे पाठः अस्ति। अतः लोमादिपामादिपिच्छादिभ्यः शनेलचः इति शास्त्रेण इलच् - प्रत्ययः भवति। ततः अनुबन्धलोपे तद्धितान्तस्य अस्य समुदायस्य प्रातिपदिकसंज्ञायां सुपः लोपे पिच्छ + इल इति स्थितिः भवति। यचि भम् इति शास्त्रेण पिच्छशब्दस्य भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण छकारोत्तरस्य अकारस्य लोपः भवति। ततः विभक्तिकार्ये वर्णमेलनेन पिच्छिलः इति रूपम्। इलच् - प्रत्ययस्य अभावपक्षे तदस्यास्त्यस्मिन्निति मतुप् इति शास्त्रेण मतुब्प्रत्ययः भवति। ततः अनुबन्धलोपे मकारस्य वकारादेशे सति विभक्तिकार्ये पिच्छवान् इति रूपम्।

[२९.८] प्रज्ञाश्रद्धार्चाभ्यो णः॥ (५.२.१०१)

सूत्रार्थः - प्रज्ञाश्रद्धार्चाभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्निति इत्यर्थे विकल्पेन तद्धितसंज्ञकः णप्रत्ययो भवति।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् शास्त्रे द्वे पदे स्तः। प्रज्ञा च श्रद्धा च अर्चा च प्रज्ञाश्रद्धार्चाः, ताभ्यः प्रज्ञाश्रद्धार्चाभ्यः इति इतरेतरद्वन्द्वः। प्रज्ञाश्रद्धार्चाभ्यः इति पञ्चम्यन्तं पदम्। णः इति तु प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। प्राणिस्थादातो लजन्यतरस्याम् इत्यस्मात् अन्यतरस्याम् इति पदम् अनुवर्तते। अतः सूत्रार्थः भवति - प्रज्ञाश्रद्धार्चाभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्निति इत्यर्थे विकल्पेन तद्धितसंज्ञकः णप्रत्ययो भवति। णप्रत्ययाभावपक्षे तु मतुप् भवति।

उदाहरणम् - प्रज्ञा अस्मिन् अस्ति इति विग्रहे प्रज्ञाश्रद्धार्चाभ्यो णः इति णप्रत्ययः भवति। ततः अनुबन्धलोपे सति प्राज्ञ+अ इति स्थितिः। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः तद्धितेष्वचामादेः इति शास्त्रेण आदिवृद्धिः भवति। ततः प्राज्ञ+अ इति स्थिते यस्येति च इति अकारलोपे विभक्तिकार्ये प्राज्ञः इति। णप्रत्ययाभावपक्षे तु मतुपि सति प्रज्ञावान् इति रूपम् अस्ति।

श्रद्धा अस्मिन् अस्ति इति विग्रहे प्रज्ञाश्रद्धार्चाभ्यो णः इति णप्रत्ययः अनुबन्धलोपः आदिवृद्धिश्च भवति। ततः श्राद्ध+अ इति स्थितिः जायते। ततः प्रक्रियाकार्ये वर्णमेलनेन श्राद्धः इति। णप्रत्ययाभावपक्षे तु मतुपि सति श्रद्धावान् इति रूपम् अस्ति।

अर्चा अस्मिन् अस्ति इति विग्रहे प्रज्ञाश्रद्धार्चाभ्यो णः इति णप्रत्ययः अनुबन्धलोपः आदिवृद्धिश्च भवति। ततः आर्चा+अ इति स्थिते यस्येति च इति आकारलोपे विभक्तिकार्ये आर्चः इति। णप्रत्ययाभावपक्षे तु मतुपि सति अर्चावान् इति रूपम् अस्ति।

[२९.९] दन्त उन्नत उरच्॥ (५.२.१०६)

सूत्रार्थः - उन्नते दन्ते गम्यमाने सति प्रथमान्तात् दन्तप्रातिपदिकात् तदस्यास्त्यस्मिन्निति इत्यर्थे तद्धितसंज्ञकः उरच् प्रत्ययः भवति।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। दन्ते इति सप्तम्यन्तं पदम्। उन्नते इति सप्तम्यन्तं पदम्। उरच् इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। प्रकृते दन्तपदस्य आवृत्तिः क्रियते। तच्च पञ्चम्यन्तं पदम् अस्ति। अतः सूत्रस्य सामान्यार्थः - उन्नते दन्ते गम्यमाने सति प्रथमान्तात् दन्तप्रातिपदिकात् तदस्यास्त्यस्मिन्निति इत्यर्थे तद्धितसंज्ञकः उरच् प्रत्ययः भवति।

उदाहरणम्- उन्नताः दन्ताः अस्य सन्ति इत्यर्थे दन्त उन्नत उरच् इति शास्त्रेण उरच्- प्रत्ययः भवति। ततः अनुबन्धलोपे सति दन्त जस् उर इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा भवति। ततः सुपः लोपे दन्त + उर इति स्थितिः भवति। ततः यस्येति च इति तकारोत्तरवर्तिनः अकारस्य लोपे विभक्तिकार्ये वर्णमेलनेन च दन्तुरः इति रूपम्।

पाठगतप्रश्नाः-२

७. प्राणिस्थादातो लजन्यतरस्याम् इति सूत्रार्थं लिखत।

८. प्राणिस्थादातो लजन्यतरस्याम् इति कीदृशं सूत्रम्।

९. लोमादिपामादिपिच्छादिभ्यः के प्रत्ययाः।

१०. प्राज्ञः इत्यत्र केन सूत्रेण कः प्रत्ययः भवति।

११. उन्नते दन्ते गम्यमाने कः प्रत्ययः भवति।

१२. प्रज्ञाश्राद्धार्चाभ्यः इत्यत्र कः समासः।

[२९.१०] ऊषसुषिमुष्कमधोः रः॥ (५.२.१०७)

सूत्रार्थः - ऊषसुषिमुष्कमधुभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तद्धितसंज्ञकः रप्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। ऊषश्च सुषिश्च मुष्कश्च मधु च इति ऊषसुषिमुष्कमधु, तस्मात् ऊषसुषिमुष्कमधोः इति समाहारद्वन्द्वः। ऊषसुषिमुष्कमधोः इति पञ्चम्यन्तं पदम्। रः इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। अतः सूत्रार्थः भवति - ऊषसुषिमुष्कमधुभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तद्धितसंज्ञकः रप्रत्ययः स्यात्।

उदाहरणम् - ऊषः अस्य अस्ति इति विग्रहे ऊषसुषिमुष्कमधोः रः इति शास्त्रेण रप्रत्ययः भवति। अयं समुदायः तद्धितान्तः। अतः तद्धितान्तत्वात् प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः विभक्तिकार्ये वर्णमेलनेन ऊषरः इति रूपम्।

सुषिः अस्य अस्ति इति विग्रहे ऊषसुषिमुष्कमधोः रः इति शास्त्रेण रप्रत्यये प्रातिपदिकसंज्ञायां सुलोपे विभक्तिकार्ये सुषिरः इति रूपम्।

मुष्कः अस्य अस्ति इति विग्रहे ऊषसुषिमुष्कमधोः रः इति शास्त्रेण रप्रत्यये प्रातिपदिकसंज्ञायां सुलोपे विभक्तिकार्ये मुष्करः इति रूपम्।

मधु अस्य अस्ति इति विग्रहे ऊषसुषिमुष्कमधोः रः इति शास्त्रेण रप्रत्यये प्रातिपदिकसंज्ञायां सुलोपे विभक्तिकार्ये मधुरः इति रूपम्।

[२९.११] केशाद्वोऽन्यतरस्याम्॥ (५.२.१०९)

सूत्रार्थः - प्रथमान्तात् केशप्रातिपदिकात् तदस्यास्त्यस्मिन्निति अर्थे विकल्पेन तद्धितसंज्ञकः वप्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। केशात् इति पञ्चम्यन्तं पदम्। वः इति प्रथमान्तं पदम्। अन्यतरस्याम् इति अव्ययपदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। अतः सूत्रार्थः भवति - प्रथमान्तात् केशप्रातिपदिकात् तदस्यास्त्यस्मिन्निति अर्थे विकल्पेन तद्धितसंज्ञकः वप्रत्ययः स्यात्।

शङ्का - प्राणिस्थादातो लजन्यतरस्याम् इत्यतः अन्यतरस्याम् इति पदस्य अनुवृत्तिः सम्भवति। तथापि प्रकृतसूत्रे अन्यतरस्याम् इति पदं किमर्थम्।

समाधानम् - प्रकृतसूत्रे अन्यतरस्याम् इति पदं न दीयते चेत् वप्रत्ययस्य अभावपक्षे केवलं मतुब्प्रत्ययो भवति। परन्तु वप्रत्ययस्य अभावपक्षे अपि मतुब्प्रत्ययेन साकम् अत इनिठनौ इति सूत्रेण प्राप्तयोः इनिठनोः संग्रहणाय अन्यतरस्याम् इति।

उदाहरणम् - केशाः अस्य सन्ति इति विग्रहे केशाद्वोऽन्यतरस्याम् इति शास्त्रेण वप्रत्ययः भवति। अयं समुदायः तद्धितान्तः। अतः तद्धितान्तत्वात् प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः केश + व इति स्थिते विभक्तिकार्ये केशवः इति। वप्रत्ययस्य अभावपक्षे तु तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रेण मतुब्प्रत्यये विभक्तिकार्ये केशवान् इति। पुनश्च वप्रत्ययस्य अभावपक्षे अत इनिठनौ इति सूत्रेण इन्-

प्रत्ययः ठन्- प्रत्ययः च भवतः। ततः अनुबन्धलोपे विभक्तिकार्ये वर्णमेलनेन च केशी केशिकः इति रूपाणि भवन्ति।

[२९.१२] अत इनिठनौ॥ (५.२.११५)

सूत्रार्थः - अदन्तात् प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे विकल्पेन तद्धितसंज्ञकः इनिठनौ प्रत्ययौ भवतः।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। अत इति पञ्चम्यन्तं पदम्। इनिश्च ठन् च इति इनिठनौ इति इतरेतरद्वन्द्वः। इनिठनौ इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। प्राणिस्थादातो लजन्यतरस्याम् इत्यस्मात् अन्यतरस्याम् इति पदम् अनुवर्तते। अतः इति प्रातिपदिकस्य विशेषणम् अस्ति। अतः येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधौ अदन्तात् प्रातिपदिकात् इति अर्थः समागच्छति। अतः सूत्रार्थः भवति- अदन्तात् प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे विकल्पेन तद्धितसंज्ञकः इनिठनौ प्रत्ययौ भवतः। विकल्पग्रहणात् इनिठनोः अभावे मतुब्प्रत्ययो भवति।

उदाहरणम् - दण्डः अस्य अस्ति इति विग्रहे दण्ड इति अदन्तप्रातिपदिकत्वात् अत इनिठनौ इति इनिप्रत्ययः भवति। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः दण्ड+इन् इति स्थिते यस्येति च इति डकारोत्तरवर्तिनः अकारस्य लोपे दण्डिन् इति स्थितिः भवति। ततः विभक्तिकार्ये सौ च इति उपधादीर्घे सुलोपे पदान्तस्य नकारस्य लोपे दण्डी इति रूपम्।

दण्डः अस्य अस्ति इति विग्रहे दण्ड इति अदन्तप्रातिपदिकम्। अत इनिठनौ इति ठन्प्रत्ययः भवति। ततः अनुबन्धलोपे कृते दण्ड+ठ इति स्थितिः भवति। ततः अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः दण्ड+ठ इति स्थिते ठस्येकः इति सूत्रेण इकादेशे दण्ड +इक इति स्थितिः। ततः यस्येति च इति डकारोत्तरवर्तिनः अकारस्य लोपे विभक्तिकार्ये दण्डिकः इति।

अत इनिठनौ इति सूत्रेण विकल्पेन इनिठनोः विधानात् इनिठन्प्रत्ययस्य अभावपक्षे मतुब्प्रत्ययः भवति। तदा दण्डवान् इति रूपम् अस्ति। दण्ड इति अदन्तप्रातिपदिकात् दण्डी, दण्डिकः, दण्डवान् इति रूपत्रयम् अस्ति। अतः अदन्तेभ्यः प्रातिपदिकेभ्यः मतुप्, इन्, ठन् प्रत्ययत्रयं भवति।

[२९.१३] रूपादाहतप्रशंसयोर्यप्॥ (५.२.१२०)

सूत्रार्थः - आहतार्थे प्रशंसार्थे च वर्तमानात् प्रथमान्तात् रूपप्रातिपदिकात् तदस्यास्त्यस्मिन्निति इत्यर्थे तद्धितसज्ञकः यप् प्रत्ययः भवति।

सूत्रव्याख्या -इदम् अस्ति विधिसूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। रूपादिति पञ्चम्यन्तं पदम्। आहतं च प्रशंसा च इति आहतप्रशंसे, तयोः आहतप्रशंसयोः इति इतरेतरद्वन्द्वः। आहतप्रशंसयोः इति सप्तम्यन्तं पदम्। यप् इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। अतः सूत्रार्थः भवति - आहतार्थे प्रशंसार्थे च वर्तमानात् प्रथमान्तात् रूपप्रातिपदिकात् तदस्यास्त्यस्मिन्निति इत्यर्थे तद्धितसञ्ज्ञकः यप् प्रत्ययः भवति।

उदाहरणम् - आहतं रूपमस्य अस्तीति विग्रहे आहतार्थे विद्यमानात् रूप इति प्रथमान्तात् प्रातिपदिकात् मत्वर्थे रूपादाहतप्रशंसयोर्यप् इति सूत्रेण यप्-प्रत्ययः अनुबन्धलोपश्च भवतः। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुपः लोपश्च भवतः। ततः रूप+य इति स्थिते यस्येति च अकारस्य लोपे पुनः एकदेशविकृतमनन्यवत् इति न्यायेन विभक्तिकार्ये रूप्यम् इति रूपम्। आहतं रूपमस्य अस्तीति रूप्यः कार्षायणः।

प्रशस्तं रूपमस्य अस्तीति विग्रहे प्रशंसार्थे विद्यमानात् रूप इति प्रथमान्तात् प्रातिपदिकात् मत्वर्थे रूपादाहतप्रशंसयोर्यप् इति सूत्रेण यपि अनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपः लोपे रूप+य इति स्थिते यस्येति च अकारस्य लोपे पुनः एकदेशविकृतमनन्यवत् इति न्यायेन विभक्तिकार्ये रूप्यम् इति रूपम्। प्रशस्तं रूपमस्य अस्तीति रूप्यो गौः।

[२९.१४] व्रीह्यादिभ्यश्च॥ (५.२.११६)

सूत्रार्थः - व्रीह्यादिभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन् इत्यर्थे इनिठनौ प्रत्ययौ विकल्पेन भवतः।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयं तिष्ठति। व्रीहिः आदिर्येषां ते व्रीह्यादयः, तेभ्यः व्रीह्यादिभ्यः इति बहुव्रीहिसमासान्तं पदम्। च इति अव्ययपदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। प्राणिस्थादातो लजन्यतरस्याम् इत्यस्मात् अन्यतरस्याम् इति पदम् अनुवर्तते। व्रीह्यादिभ्यः इत्यनेन साकं प्रथमान्तस्य प्रातिपदिकस्य च सम्बन्धवशात् वचनपरिवर्तनेन प्रथमान्तेभ्यः प्रातिपदिकेभ्यः इति अर्थः आयाति। अतः सूत्रार्थः भवति - व्रीह्यादिभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन् इत्यर्थे इनिठनौ प्रत्ययौ विकल्पेन भवतः। अपरस्मिन् पक्षे मतुब्प्रत्ययो विधीयते। चकारेण मतुब्प्रत्ययस्य संग्रहणं क्रियते।

उदाहरणम् - व्रीहयः सन्त्यस्मिन्निति विग्रहे व्रीहिप्रातिपदिकात् व्रीह्यादिभ्यश्च इति सूत्रेण इनिप्रत्ययः ठन्प्रत्ययः च भवति। इनिप्रत्ययपक्षे अनुबन्धलोपे इनिप्रत्ययस्य तद्धितान्तत्वात् प्रातिपदिकसंज्ञा सुलोपश्च भवति। यस्येति च इकारस्य लोपे विभक्तिकार्ये व्रीही इति रूपम्।

ठन्प्रत्ययपक्षे तु व्रीहिप्रातिपदिकात् प्रकृतशास्त्रेण ठन्प्रत्ययः भवति। ततः अनुबन्धलोपे प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः ठस्येकः इति शास्त्रेण ठकारस्य इकादेशः भवति। ततः यस्येति

च इति शास्त्रेण इकारलोपे व्रीहिकः इति रूपम्। चकारेण मतुब्प्रत्ययस्य संग्रहणात् मतुपि व्रीहिमान् इति रूपम्।

पाठगतप्रश्नाः-३

१३. ऊषसुषिमुष्कमधोः कः प्रत्ययः भवति।

१४. मधुरः इत्यत्र लौकिकविग्रहः कः।

१५. केशवः इत्यत्र केन सूत्रेण कः प्रत्ययः।

१६. अदन्तात् प्रातिपदिकात् कः प्रत्ययः भवति।

१७. आहतप्रशंसयोः इत्यत्र का विभक्तिः।

१८. व्रीह्यादिभ्यः के प्रत्ययाः भवन्ति।

[२९.१५] अस्मायामेधास्रजो विनिः॥ (५.२.१२१)

सूत्रार्थः - असन्ताद् माया–मेधा–स्रज् इत्येतेभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः विनिः प्रत्ययः विकल्पेन भवति।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। अस् च माया च मेधा च स्रक् च इति अस्मायामेधास्रज्, तस्मात् अस्मायामेधास्रजः इति समाहारद्वन्द्वः। अस्मायामेधास्रजः इति पञ्चम्यन्तं पदम्। विनिः इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य,अस्ति, अस्मिन् इति पदम् अनुवर्तते। प्राणिस्थादातो लजन्यतरस्याम् इत्यस्मात् अन्यतरस्याम् इति पदम् अनुवर्तते। अस् इति प्रातिपदिकस्य विशेषणम्। अत येन विधिस्तदन्तस्य इति सूत्रेण असन्तं प्रातिपदिकम् इति लभ्यते। अतः सूत्रार्थः भवति - असन्ताद् माया-मेधा-स्रज् इत्येतेभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः विनिः प्रत्ययः विकल्पेन भवति। अन्यतरस्याम् इति पदस्य ग्रहणात् विनिप्रत्ययाभावपक्षे मतुब्प्रत्ययो भवति।

उदाहरणम् - यशः अस्य अस्ति इति विग्रहे यशस् इति असन्तप्रातिपदिकम्। अतः अस्मायामेधास्रजो विनिः इति शास्त्रेण विनिप्रत्ययः भवति। ततः अनुबन्धलोपे यशस्+विन् इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः यशस्विन् इति जाते एकदेशविकृतमनन्यवत् इति न्यायेन प्रातिपदिकसंज्ञा भवति। ततः सुप्रत्ययः भवति। ततः सौ च इति शास्त्रेण उपधादीर्घः भवति। ततः अपृक्तस्य सकारस्य पदान्तस्य नकारस्य लोपे च वर्णमेलनेन यशस्वी इति। विनिप्रत्ययस्य अभावपक्षे मतुब्प्रत्यये जाते यशस्वान् इति रूपम्। एवमेव मायामेधास्रज् इति

प्रातिपदिकेभ्यः विनिप्रत्यये कृते मायावी, मेधावी, स्रग्वी इति रूपाणि। विनिप्रत्ययस्य अभावपक्षे तु मतुब्प्रत्यये सति मायावान्, मेधावान्, स्रग्वान् इति।

[२९.१६] वाचो ग्मिनिः॥ (५.२.१२४)

सूत्रार्थः - प्रथमान्ताद् वाच् इति प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः ग्मिनिः प्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। वाचः इति पञ्चम्यन्तं पदम्। ग्मिनिः इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। अतः सूत्रार्थः भवति – प्रथमान्ताद् वाच् इति प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः ग्मिनिः प्रत्ययः स्यात्।

उदाहरणम् - प्रशस्ता वाग् अस्य अस्ति इति विग्रहे प्रथमान्तात् वाच् इति प्रातिपदिकात् तदस्य अस्ति इत्यर्थे वाचो ग्मिनि इति सूत्रेण ग्मिनिप्रत्ययः भवति। ततः अनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपः लोपे वाच् + ग्मिन् इति स्थितिः भवति। ततः स्वादिष्वसर्वनामस्थाने इति सूत्रेण पदसंज्ञा भवति। ततः चोः कुः इति पदान्तस्य चकारस्य ककारः भवति। ततः झलां जशोऽन्ते इति सूत्रेण ककारस्य गकारः भवति। ततः प्रातिपदिकसंज्ञायां विभक्तिकार्ये वर्णमेलनेन वाग्ग्मी इति रूपम्।

[२९.१७] आलजाटचौ बहुभाषिणि॥ (५.२.१२५)

सूत्रार्थः - बहुभाषिणि अर्थे प्रथमान्ताद् वाच् इति प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकौ आलजाटचौ प्रत्ययौ स्तः।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदे द्वे स्तः। आलच् च् आटच् च इति आलजाटचौ इति इतरेतरद्वन्द्वः। आलजाटचौ इति प्रथमान्तं पदम्। बहुभाषिणि इति सप्तम्यन्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। वाचो ग्मिनिः इत्यस्मात् सूत्रात् वाचः इति पदम् अनुवर्तते। अतः सूत्रार्थो भवति – बहुभाषिणि अर्थे प्रथमान्ताद् वाच् इति प्रातिपदिकात् तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकौ आलजाटचौ प्रत्ययौ स्तः। वार्तिककारस्य मतेन कुत्सिते इति वक्तव्यम्। तेन यः जनः कुत्सितं बहु भाषते तस्य कृते वाचालः, वाचाटः इति प्रयोगो भवति। यस्तु बहु भाषते किन्तु सम्यग् भाषते। तस्य कृते वाग्ग्मी इति प्रयोगः भवति।

उदाहरणम् - कुत्सितं बहु भाषते इति विग्रहे प्रथमान्तात् वाच् इति प्रातिपदिकात् मत्वर्थे बहुभाषिणि अर्थे च आलजाटचौ बहुभाषिणि इति सूत्रेण आलजाटचौ भवतः। आलच्प्रत्ययपक्षे

अनुबन्धलोपे वाच्+आल इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुपः लोपश्च भवति। ततः प्रातिपदिकसंज्ञायां विभक्तिकार्ये वर्णमेलनेन वाचालः इति रूपम्

आटच्प्रत्ययपक्षे अनुबन्धलोपे वाच्+आट इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुपः लोपश्च भवति। ततः प्रातिपदिकसंज्ञायां विभक्तिकार्ये वर्णमेलनेन विभक्तिकार्ये वाचाटः इति रूपम्।

[२९.१८] अर्शआदिभ्योऽच्॥ (५.२.१२७)

सूत्रार्थः - अर्शआदिभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः अच्प्रत्ययो भवति।

सूत्रव्याख्या -अनेन सूत्रेण अच् विधीयते। तस्मात् विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। अर्शस् आदिर्येषां ते अर्शादयस्तेभ्यः अर्शादिभ्यः इति बहुव्रीहिसमासः। अर्शआदिभ्यः इति पञ्चम्यन्तं पदम् अस्ति। अच् इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। अतः सूत्रार्थः भवति- अर्शआदिभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः अच्प्रत्ययो भवति। आकृतिगणः अयम्। अर्थात् येषां शब्दानां अर्शआदिगणे पाठो नास्ति, तथापि अर्शादिगणे पठितशब्दवत् रूपं दृश्यते। अतः अर्शआदिगणः आकृतिगणः इति स्वीकारात् प्रकृतसूत्रेण अच् प्रत्ययो भवति।

उदाहरणम् - अर्शांसि विद्यन्ते यस्य इति विग्रहे अर्शआदिगणे पठितस्य अर्शस् इति शब्दस्य अर्शआदिभ्योऽच् इति सूत्रेण अच्-प्रत्ययः भवति। ततः अनुबन्धलोपे तद्धितान्तस्य प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः अर्शस् + अ इति स्थिते एकदेशविकृतमनन्यवत् इति न्यायेन ततः प्रातिपदिकसंज्ञायां विभक्तिकार्ये वर्णमेलनेन अर्शसः इति रूपं भवति।

[२९.१९] सुखादिभ्यश्च॥ (५.२.१३१)

सूत्रार्थः - सुखादिगणपठितेभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः इनिः प्रत्ययो भवति इति।

सूत्रव्याख्या -प्रकृतसूत्रेण इनिः प्रत्ययः विधीयते। तस्मात् विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। सुखम् आदिर्येषां ते सुखादयः, तेभ्यः सुखादिभ्यः इति बहुव्रीहिसमासान्तं पदम्। सुखादिभ्यः इति पञ्चम्यन्तं पदम्। च इति अव्ययपदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः इति सूत्रात् इनिः अनुवर्तते। अतः सूत्रार्थः भवति-

सुखादिगणपठितेभ्यः प्रथमान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः इनिः प्रत्ययो भवति इति।

शङ्का- सुखादिप्रातिपदिकम् अदन्तम् अस्ति। अतः अदन्तत्वात् अत इनिठनौ इति सूत्रेण इनिप्रत्ययः सम्भवति। तर्हि सुखादिभ्यश्च इति शास्त्रम् किमर्थम् कृतम् वर्तते।

समाधानम् - अत इनिठनौ इति सूत्रेण अदन्तात् प्रातिपदिकात् इनिप्रत्ययः ठन्प्रत्ययश्च विधीयते। सुखादिप्रातिपदिकेभ्यः केवलम् इनिप्रत्ययः भवतु इति चिन्तयित्वा प्रकृतशास्त्रमिदम्। एतेन अदन्तप्रातिपदिकेभ्यः इनिप्रत्यये ठन्प्रत्यये च प्राप्ते सुखादिभ्यः इति सूत्रेण केवलम् इनिप्रत्ययो भवति न तु ठन्प्रत्ययः।

उदाहरणम् - सुखम् अस्य अस्ति इति विग्रहे सुखादिगणे पठितं सुख इति प्रातिपदिकम्। अतः सुखादिभ्यश्च इति सूत्रेण इनिप्रत्ययः भवति। ततः अनुबन्धलोपे च जाते तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपः लोपे सुख + इन् इति स्थितिः जायते। एकदेशविकृतमनन्यवत् इति न्यायेन ततः प्रातिपदिकसंज्ञायां विभक्तिकार्ये सुखी इति रूपम्।

[२९.२०] धर्मशीलवर्णान्ताच्च॥ (५.२.१३२)

सूत्रार्थः - प्रथमान्तेभ्यः धर्मशीलवर्णान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः इनिप्रत्ययः स्यात्।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। धर्मश्च शीलञ्च वर्णश्च धर्मशीलवर्णास्ते अन्ते यस्य स धर्मशीलवर्णान्तः, तस्मात् धर्मशीलवर्णान्तात् इति द्वन्द्वगर्भबहुव्रीहिसमासान्तं पदम्। धर्मशीलवर्णान्तात् इति पञ्चम्यन्तं पदम्। चेति अव्ययपदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः इति सूत्रात् इनिः अनुवर्तते। अतः सूत्रार्थः भवति - प्रथमान्तेभ्यः धर्मशीलवर्णान्तेभ्यः प्रातिपदिकेभ्यः तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः इनिप्रत्ययः स्यात्।

उदाहरणम् - ब्राह्मणधर्मः अस्य अस्ति इति विग्रहे ब्राह्मणधर्म इति प्रातिपदिकं धर्मशब्दान्तम् अस्ति। अतः धर्मशीलवर्णान्ताच्च इति शास्त्रेण इनिप्रत्ययः भवति। ततः अनुबन्धलोपे तद्धितान्तस्य प्रातिपदिकसंज्ञायां सुलोपे ब्राह्मणधर्म + इन् इति स्थितिः जायते। ततः यस्येति च इति मकारोत्तरस्य अकारस्य लोपे विभक्तिकार्ये ब्राह्मणधर्मी इति रूपम्। एवमेव शीलान्तशब्दानां वर्णान्तशब्दानां धर्मशीलवर्णान्ताच्च इति सूत्रेण इनिप्रत्यये जाते ब्राह्मणशीली, ब्राह्मणधर्मी इत्यादीनि रूपाणि।

[२९.२१] अहंशुभमोर्युस्॥ (५.२.१४०)

सूत्रार्थः - अहम्, शुभम् इत्येताभ्यामव्ययाभ्यां तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः युस्प्रत्ययो भवति।

सूत्रव्याख्या -विधिसूत्रम् इदम् अस्ति। अहं च शुभं च इति अहंशुभमौ, तयोः अहंशुभयोः इति इतरेतरद्वन्द्वः। अहंशुभयोः इति षष्ठ्यन्तं पदम्। परन्तु अस्मिन् सूत्रे पञ्चम्यर्थे षष्ठीप्रयोगः भवति। युस् इति प्रथमान्तं पदम्।

तद्धिताः, प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, समर्थानां प्रथमाद्वा इति एते अधिकाराः आगच्छन्ति। तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रात् तद्, अस्य, अस्ति, अस्मिन् इति पदम् अनुवर्तते। अहंशुभम् इत्येतद्द्वयं विभक्तिप्रतिरूपम् अव्ययम् अस्ति। अतः सूत्रार्थः भवति - अहम्, शुभम् इत्येताभ्यामव्ययाभ्यां तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः युस्प्रत्ययो भवति।

उदाहरणम् - अहम् अस्य अस्ति इति विग्रहे अहम् इति मकारान्तम् अव्ययम्। अतः अहंशुभमोर्युस् इति सूत्रेण युस्-प्रत्ययः भवति। ततः अनुबन्धलोपे जाते अहम् + यु इति स्थितिः भवति। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः यचि भम् इति सूत्रेण भसंज्ञा प्राप्नोति। ततः सिति च इति सूत्रेण भसंज्ञां प्रबाध्य पदसंज्ञा विधीयते। अहम् इत्यस्य मकारस्य पदान्तत्वात् मोऽनुस्वारः इति सूत्रेण अनुस्वारे वा पदान्तस्य इति शास्त्रेण अनुस्वारस्य वैकल्पिकपरसवर्णे जाते अहँय्युः, अहंयुः इति रूपद्वयम् भवति।

एवमेव शुभम् अस्य अस्ति इति विग्रहे शुभम् इति मकारान्तम् अव्ययत्वम्। अतः अहंशुभमोर्युस् इति सूत्रेण युस्-प्रत्ययः भवति। ततः अनुबन्धलोपे जाते शुभम् + यु इति स्थितिः जायते। अयं समुदायः तद्धितान्तः। अतः प्रातिपदिकसंज्ञा सुलोपश्च भवति। ततः यचि भम् इति सूत्रेण भसंज्ञा प्राप्नोति। ततः सिति च इति सूत्रेण भसंज्ञां प्रबाध्य पदसंज्ञा विधीयते। शुभम् इत्यस्य मकारस्य पदान्तत्वात् मोऽनुस्वारः इति सूत्रेण अनुस्वारे वा पदान्तस्य इति शास्त्रेण अनुस्वारस्य वैकल्पिकपरसवर्णे जाते शुभँय्युः, शुभंयुः इति रूपद्वयम् भवति।

पाठगतप्रश्नाः-४

१९. विनिप्रत्ययविधायकं सूत्रं किम्।

२०. वाग्मी इत्यत्र केन सूत्रेण कः प्रत्ययः।

२१. वाचालः नाम कः।

२२. अर्शादिभ्यः कः प्रत्ययः भवति।

२३. सुखी इत्यत्र केन सूत्रेण कः प्रत्ययः।

२४. अहंशुभमोर्युस् इत्यस्य सूत्रार्थः कः।

पाठसारः

तद्धिताः इत्यधिकारे बहवः प्रत्ययाः विधीयन्ते। तेषु मतुब्प्रत्ययोऽपि कश्चित् तद्धितप्रत्ययः भवति। प्रायः तद् अस्य अस्ति उत तद् अस्मिन् अस्ति इत्यर्थे मतुब्प्रत्ययाः विधीयन्ते। अस्मिन् अर्थे एव मतुप्, इनि, ठन्, यप्, विनि, अच्, आटच्, आलच्, युस् एते प्रत्ययाः विधीयन्ते। यथा– रसः अस्य अस्मिन् वा अस्ति इत्यर्थे रसवान् इति रूपम् भवति। एवञ्च तद् अस्य अस्मिन् वा अस्ति इत्यर्थे न केवलं मतुब्प्रत्ययो भवति अपि तु लच्, अच्, इनि,ठन् इति एते प्रत्ययाः अपि भवन्ति। परन्तु मतुब्प्रत्ययस्य आधिक्येन प्राथम्येन च प्रयोगात् मतुबर्थीयप्रकरणम् इति। अस्मिन् प्रकरणे गुणवचनेभ्यः प्रातिपदिकेभ्यः तदस्य अस्मिन् वा अस्ति इति अर्थे ये मतुब्प्रत्ययाः विधीयन्ते। तेषां गुणवचनेभ्यो मतुबो लुगिष्ट इति मतुब्प्रत्ययानां लुग् भवति। यथा शुक्लः इति। पुनश्च ग्मिनि, आलच्, आटच् इत्यादयः अपि प्रत्ययाः सम्भवन्ति। यथा वाक् अस्य अस्ति इत्यर्थे ग्मिनि–प्रत्यये वाग्मी इति रूपम्। कुत्सितं बहु भाषते इति विग्रहे आलच्–प्रत्यये आटच्–प्रत्यये च वाचालः, वाचाटः इत्यादीनि रूपाणि भवन्ति। एवञ्च अहं शुभं इति एताभ्याम् अव्ययाभ्यां युस्–प्रत्ययः भवति। एतान् सर्वान् प्रत्ययान् स्वीकृत्य मतुबर्थीयप्रकरणम् इति।

पाठान्तप्रश्नाः

१. तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रं व्याख्यात।

२. गोमान् इति रूपं साधयत।

३. प्राणिस्थादातो लजन्यतरस्याम् इति सूत्रं व्याख्यात।

४. लोमशः इति रूपं साधयत।

५. लोमादिपामादिपिच्छादिभ्यः शनेलचः इति सूत्रं व्याख्यात।

६. अत इनिठनौ इति सूत्रं व्याख्यात।

७. दण्डी इति रूपं साधयत।

८. वाचो ग्मिनिः इति सूत्रं व्याख्यात।

९. सुखी इति रूपं साधयत।

१०. आलजाटचौ बहुभाषिणि इति सूत्रं व्याख्यात।

११. सुखादिभ्यश्च इति सूत्रं व्याख्यात।

१२. अहंशुभमोर्युस् इति सूत्रं व्याख्यात।

१३. अस्मायामेधास्रजो विनिः इति सूत्रं व्याख्यात।

१४. मादुपधायाश्च मतोर्वोऽयवादिभ्यः इति सूत्रं व्याख्यात।

१५. तसौ मत्वर्थे इति सूत्रं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

उपरि विद्यमानानां पाठगतप्रश्नानाम् उत्तराणि प्रदीयन्ते।

उत्तराणि-१

१. तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रम्।

२. तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रेण मतुब्प्रत्ययः।

३. कालविवक्षा अस्ति।

४. तद् अस्य अस्ति इत्यर्थे तद् अस्मिन् अस्ति इत्यर्थे वा रसादिगणे पठितात् प्रातिपदिकात् मतुब्प्रत्ययः भवति।

५. मकारस्य वकारविधानम्।

६. भसंज्ञा भवति।

उत्तराणि-२

७. प्राणिस्थवाचकात् प्रथमान्तात् अदन्तात् प्रातिपदिकात् तदस्यास्त्यस्मिन्निति अर्थे विकल्पेन तद्धितसंज्ञकः लच्-प्रत्ययः भवति।

८. विधिसूत्रम्।

९. शनेलचः।

१०. प्रज्ञाश्राद्धार्चाभ्यः णः इति सूत्रेण णप्रत्ययः।

११. उरच्-प्रत्ययः।

१२. इतरेतरद्वन्द्वः।

उत्तराणि-३

१३. रप्रत्ययः।

१४. मधु अस्य अस्ति इति विग्रहः।

१५. केशाद्वोऽन्यतरस्याम् इति सूत्रेण वप्रत्ययः।

१६. इनिठनौ।

१७. सप्तमी विभक्तिः।

१८. इनिठनौ मतुप् च।

उत्तराणि-४

१९. अस्मायामेधास्रजो विनिः।

२०. वाचो ग्मिनिः इति सूत्रेण ग्मिनि-प्रत्ययः।

२१. कुत्सितं बहु भाषते यः।

२२. अच्-प्रत्ययः।

२३. सुखादिभ्यश्च इति सूत्रेण इनि-प्रत्ययः।

२४. अहम्, शुभम् इत्येताभ्यामव्ययाभ्यां तदस्यास्त्यस्मिन्नित्यर्थे तद्धितसंज्ञकः युस्प्रत्ययो भवति।

॥इति नवविंशः पाठः ॥

346sk30

३०

अथ रक्ताद्यर्थकप्रकरणम्

प्रस्तावना

तद्धिताधिकारे बहुविधानि सूत्राणि पठितानि सन्ति इति भवन्तः पूर्वं ज्ञातवन्तः। तेषाञ्च सूत्राणां नानाविधप्रकरणेषु व्याख्यानमस्ति। तद् भवन्तः लघुसिद्धान्तकौमुद्यादिग्रन्थेषु द्रष्टुम् अर्हन्ति। अत्र तु तेषां व्याख्यानार्थं पाठचतुष्टयं परिकल्पितमस्ति। पूर्वतनपाठद्वये अपत्याधिकारप्रकरणस्थानां मत्वर्थीयप्रकरणस्थानां च सूत्राणां परिचयं प्राप्तवन्तः। अवशिष्टप्रकरणस्थसूत्राणां कृते पाठद्वयं कल्पितम् अस्ति। तयोरादिमे रक्ताद्यर्थकप्रकरणाख्यपाठे अर्थात् अस्मिन् (तृतीये) पाठे रक्ताद्यर्थकप्रकरणतः यदधिकारप्रकरणं यावत् आलोचना विद्यते। तद्धिताः, समर्थानां प्रथमाद्वा, प्रत्ययः, परश्च इति एते तद्धितप्रत्ययविधायकसूत्रेषु अधिक्रियन्ते।

उद्देश्यानि

अमुं पाठं पठित्वा भवताम्/भवतीनाम् –

- सरलतया रक्ताद्यर्थकप्रत्ययानां ज्ञानं भविष्यति।
- रक्ताद्यर्थकप्रकरणादीनां सूत्राणाम् अर्थज्ञानं भविष्यति।
- लौकिकालौकिकविग्रहाणां परिचयो भविष्यति।
- रक्ताद्यर्थकप्रकरणादीनां सूत्राणाम् उदाहरणानां ज्ञानं भविष्यति।
- तद्धितप्रत्ययस्य प्रयोगविषये सहजतया ज्ञानं भविष्यति।
- सर्वोपरि तद्धितान्तपदस्य प्रयोगः क्व कथञ्च कर्तव्य इति विवेको भविष्यति।

[३०.१] तेन रक्तं रागात्॥ (४.२.१)

सूत्रार्थः – रज्यते अनेन इत्यर्थे तृतीयान्तात् रङ्गवाचकात् समर्थप्रातिपदिकात् तद्धितसंज्ञकः अण्प्रत्ययः परो भवति।

सूत्रव्याख्या – विधिसूत्रमिदमस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तेन इति तृतीयान्तानुकरणं लुप्तपञ्चम्यन्तम्। अर्थात् कषायेण युक्तम् इत्यादौ कषायेण इत्यादेः अनुकरणं तेन इत्यनेन क्रियते। रक्तमिति प्रथमैकवचनान्तम्, रागात् इति पञ्चम्येकवचनान्तम्। प्राग्दीव्यतोऽण् इत्यस्मात् प्राग् इति अनुवर्तते। सूत्रेऽस्मिन् प्रथमोच्चारितं सुबन्तं पदं तेन इति तृतीयान्तम्। अतः समर्थपदेषु यत् तृतीयान्तं पदं भवति तदेव अस्मिन्नर्थे विधीयमानस्य प्रत्ययस्य प्रकृतिः भविष्यति। रागात् इति प्रातिपदिकात् इत्यस्य विशेष्यस्य विशेषणमस्ति। रज्यते अनेन इति रागः अर्थात् येन द्रव्येण रञ्जनं भवति

स राग इत्युच्यते। यथा नीलपीतकषायादि रञ्जकद्रव्यं राग इत्युच्यते। एवं च सूत्रार्थस्तावत्–समर्थानां मध्ये यत् प्रथमं तृतीयान्तसमर्थं रागवाचि प्रातिपदिकं तस्मात् रक्तम् इत्येतस्मिन्नर्थे अणादयः स्युः इति सूत्रार्थः सिध्यति।

विशेषः – भवन्तः पूर्वम् अपत्याधिकारप्रकरणे समर्थविभक्तिः षष्ठी अस्ति इति दृष्टवन्तः। रक्तार्थे तृतीयाविभक्तिः समर्था भवति इति तु अधुना ज्ञातवन्तः। समर्थविभक्तीनां निर्देशार्थं सूत्रकारः प्रायः तत्तत्सूत्रेषु तद्–शब्दं प्रयुङ्क्ते। यथा प्रथमार्थं सः, सा, तद्। द्वितायार्थं तम्। तृतीयार्थं तेन। चतुर्थ्यर्थं तस्मै। पञ्चम्यर्थं तस्मात्। षष्ठ्यर्थं तस्य। सप्तम्यर्थं तस्मिन्। सूत्रनिर्दिष्टं विभक्त्यनुसारं प्रातिपदिकेऽपि तत्तद्विभक्तिः अर्थात् सु–अम्–टा–ङे–ङसि–ङस्–ङि इति विभक्तिः भवति। किञ्च आवश्यके सति द्विवचनं बहुवचनं वा प्रातिपदिकात् प्रयुज्य लौकिकालौकिकविग्रहादिः करणीयः। ततः प्रातिपदिकात् तद्धितप्रत्यये विहिते सति कृत्तद्धितसमासाश्च इत्यनेन प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोः इत्येनन अन्तर्वर्तिनीविभक्तेः लुक् भवति। ततः आदिवृद्धिः प्राप्तास्ति चेत् भवति। ततः भसंज्ञकवर्णस्य लोपः। पुनः एकेदशविकृतन्यायेन पूर्वकृतं प्रातिपदिकत्वम् अक्षुण्णं भवति इति मत्वा स्वादिविभक्तिर्भवति। ततः एकवचनविवक्षायां सुप्रत्यये प्रथमान्तरूपं दर्शितमस्ति। प्रत्ययेषु प्रायः कश्चित् अनुबन्धः भवति। तस्य च आदिवृद्ध्यादिप्रयोजनमपि भवति। पुनः प्रत्ययस्य स्थाने कदाचित् आदेशोऽपि विधीयते इति सर्वं ध्येयम्।

उदाहरणम् – कषायेण रक्तं वस्त्रं काषायणम्। कषायेण रक्तम् इत्यर्थे कषाय टा इति रागवाचकतृतीयान्तात् सुबन्तात् प्रकृतसूत्रेण अण्प्रत्यये अनुबन्धलोपे च कषाय टा अ इति जाते समुदायस्य तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोः इत्यनेन सुपः (टा–विभक्तेः) लुकि कषाय अ इति जाते अणः णित्त्वात् तद्धितेष्वचामादेः इत्यनेन आदिवृद्धौ काषाय अ इति जायते। ततः यचि भम् इत्यनेन भसंज्ञकत्वात् यस्येति च इत्यनेन तस्य लोपे काषाय् अ इति जाते एकदेशविकृतन्यायेन प्रातिपदिकत्वात् सु–विभक्तौ (वस्त्रम् इति विशेष्यानुसारं) नपुंसकलिङ्गकत्वात् सोरमादेशे पूर्वरूपैकादेशे अकारे काषायम् इति रूपं सिध्यति। पुंल्लिङ्गे काषायः, स्त्रीलिङ्गे काषायी इति रूपं भवति। एवमेव माञ्जिष्ठम्,माञ्जिष्ठः, माञ्जिष्ठी इत्यादीनि रूपाणि सिध्यन्ति।

[३०.२] नक्षत्रेण युक्तः कालः॥ (४.२.३)

सूत्रार्थः – नक्षत्रवाचकात् तृतीयान्तात् समर्थप्रातिपदिकात् तेन युक्तमित्यर्थे तद्धितसंज्ञकः अण्प्रत्ययो भवति नक्षत्रयुक्तकालार्थे गम्यमाने।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदत्रयम् अस्ति। नक्षत्रेण इति तृतीयान्तानुकरणं लुप्तपञ्चम्यन्तम्। अर्थात् पुष्येण युक्तः इत्यादौ पुष्येण इत्यादेः अनुकरणं नक्षत्रेण इत्यनेन क्रियते। युक्तः, कालः इत्युभौ अपि प्रथमैकवचनान्तम्। प्राग्दीव्यतोऽण् इत्यस्मात् अण् इति अनुवर्तते। तेन रक्तं रागात् इत्यतः तेन इति पदमनुवर्तते, तच्च लुप्तपञ्चम्यन्तं तृतीयान्तानुकरणम्। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। प्रत्ययः इत्यस्य विशेषणमस्ति तद्धितः, परः इति। अतः सूत्रेण यः प्रत्ययो विधीयते स तद्धितसंज्ञकः परश्च

भवति। तद्धितप्रत्ययः प्रातिपदिकात् विधीयते इति स्मर्तव्यम्। प्रातिपदिकस्य विशेषणमस्ति समर्थम् इति। सूत्रे नक्षत्रशब्देन नक्षत्रयुक्तचन्द्रमसः बोधो भवति। एवञ्च नक्षत्रवाचकात् तृतीयान्तात् समर्थप्रातिपदिकात् तेन युक्तमित्यर्थे तद्धितसंज्ञकः अण्प्रत्ययः परो भवति नक्षत्रयुक्तकालार्थे गम्यमाने इति सूत्रार्थः सिध्यति।

उदाहरणम् – पुष्येण युक्तम् अहः, पौषम् अहः। पुष्येण युक्तः कालः इत्यर्थे पुष्य टा इति तृतीयान्तनक्षत्रवाचिसुबन्तात् प्रकृतसूत्रेण अणि प्रातिपदिकसंज्ञायां सुपः लुकि आदिवृद्धौ भसंज्ञायां यस्येति च इत्यनेन अकारलोपे पौष्य् अ इति जाते तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् इत्यनेन यकारलोपे अहः इति विशेष्यानुसारं नपुंसकलिङ्गे स्वादिकार्ये पौषम् इति रूपं सिध्यति। स्त्रीलिङ्गे पौषी रात्रिः इति प्रयोगः।

[३०.३] दृष्टं साम॥ (४.२.७)

सूत्रार्थः – दृष्टं साम अर्थात् ज्ञानरूपतया प्राप्तं साम इत्यर्थे तृतीयान्तात् समर्थप्रातिपदिकात् तद्धितसंज्ञकः अण्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। दृष्टं साम इत्युभयमपि प्रथमैकवचनान्तं पदम्। तेन रक्तं रागात् इत्यतः तेन इति पदमनुवर्तते। तच्च तृतीयान्तानुकरणं लुप्तपञ्चम्यन्तम्। प्राग्दीव्यतोऽण् इत्यस्मात् अण् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। तेन पूर्वोक्तः सूत्रार्थः सिध्यति।

उदाहरणम्– वसिष्ठेन दृष्टं साम वासिष्ठं साम। वसिष्ठेन दृष्टमिति लौकिकविग्रहे वसिष्ठ टा इति तृतीयान्तात् सुबन्तात् दृष्टं साम इति प्रकृतसूत्रेण अणि तद्धितान्तप्रयुक्तप्रातिपदिकसंज्ञायां सुब्लुकि, आदिवृद्धौ भसंज्ञक–अकारस्य लोपे वासिष्ठ इति जाते एकदेशविकृतन्यायेन प्रातिपदिकत्वात् स्वादिकार्ये वासिष्ठम् इति सिध्यति। साम इति विशेष्यानुसारं नपुंसकलिङ्गे अयं प्रयोगः। एवमेव विश्वामित्रेण दृष्टं वैश्वामित्रं साम इत्यादिरूपं सिध्यति।

[३०.४] सास्य देवता॥ (४.२.२४)

सूत्रार्थः – देवताविशेषवाचिनः प्रथमान्तात् समर्थात् प्रातिपदिकात् अस्येत्यर्थे तद्धितोऽण् प्रत्ययः स्यात्।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। सा इति प्रथमान्तानुकरणं लुप्तपञ्चम्यन्तम्, अस्य इति षष्ठ्येकवचनान्तम्, देवता इति प्रथमैकवचनान्तम्। प्राग्दीव्यतोऽण् इत्यस्मात् अण् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। यज्ञादौ यमुद्दिश्य हविः प्रदीयते सा देवता। अथवा मन्त्रादौ यस्य स्तुतिः प्रतिपादनं वा भवति सा देवता इति कथ्यते। एवञ्च सा अस्य देवता इत्यर्थे देवतावाचकात् प्रथमान्तात् समर्थप्रातिपदिकात् अण्प्रत्ययो भवति।

उदाहरणम्– इन्द्रो देवता अस्येति ऐन्द्रं हविः। इन्द्रो देवता अस्य इति लौकिकविग्रहे इन्द्र सु इति प्रथमान्तात् सुबन्तात् सास्य देवता इति योगेन अणि सुब्लुकि आदिवृद्धौ ऐकारादेशे भसंज्ञक–अकारस्य लोपे ऐन्द्र् अ इति जाते वर्णसम्मेलने ऐन्द्र इति जायते। ततः हविः इति विशेष्यस्य नपुंसकलिङ्गानुसारम् अत्रापि नपुंसकलिङ्गकत्वात् सुप्रत्यये सोरमादेशे पूर्वरूपैकादेशे ऐन्द्रमिति नपुंसकपदप्रयोगः।

एवमेव पशुपतिः देवता अस्य इत्यर्थे पाशुपतम् इत्यादिपदप्रयोगः।

[३०.५] ग्रामजनबन्धुभ्यस्तल्॥ (४.२.४३)

सूत्रार्थः – षष्ठ्यन्तात् समर्थात् ग्रामप्रातिपदिकात् जनप्रातिपदिकात्, बन्धुप्रातिपदिकात् च समूहार्थे तद्धितसंज्ञकः तल्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। ग्रामजनबन्धुभ्यः इति पञ्चमीबहुवचनान्तं, तल् इति प्रथमैकवचनान्तं विधीयमानम्। ग्रामश्च जनश्च बन्धुश्च तेषामितरेतरयोगद्वन्द्वो ग्रामजनबन्धवः तेभ्यः ग्रामजनबन्धुभ्यः। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। तस्य समूहः इत्यस्यानुवर्तनं भवति। एवञ्च पूर्वोक्तः सूत्रार्थः सिध्यति। तलः लकार इत्संज्ञकः अतः तमात्रं शिष्यते। लिङ्गानुशासनात् तलन्तं स्त्रियाम् इति सूत्रेण तल्प्रत्ययान्तशब्दस्य स्त्रीलिङ्गे प्रयोगः भवति। अतः तल्प्रत्ययात् परं स्त्रीबोधकः टाप्प्रत्ययो भवति इति अवधेयम्।

उदाहरणम् – जनानां समूहः जनता। जनानां समूहः इति लौकिकविग्रहे जन आम् इति षष्ठयन्तसुबन्तात् प्रकृतसूत्रेण तल्प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लुकि जनत इति स्थिते तलन्तत्वात् स्त्रीलिङ्गे अजाद्यतष्टाप् इत्यनेन टापि अनुबन्धलोपे सवर्णदीर्घे जनता इति जायते। ततः सुप्रत्यये सोः हल्ङ्यादिलोपे जनता इति रूपं सिध्यति। एवमेव ग्रामाणां समूहः इति ग्रामता, बन्धूनां समूहः बन्धुता इत्यादयः सिध्यन्ति।

पाठगतप्रश्नाः-१

१. तेन रक्तं रागात् इत्यस्य कोऽर्थः।
२. काषायी इत्यत्र कः तद्धितप्रत्ययः।
३. वासिष्ठम्शब्दस्य कोऽर्थः।
४. पौषम् इत्यत्र कः तद्धितप्रत्ययः।
५. जनता इत्यत्र कः तद्धितप्रत्ययः।
६. जनताशब्दस्य कोऽर्थः।
७. ऐन्द्रमित्यत्र अण्प्रत्ययः केन भवति।

[३०.६] तदधीते तद्वेद॥ (४.२.५९)

सूत्रार्थः – तद् अधीते अथवा तद् जानाति इत्यर्थे द्वितीयान्तात् समर्थप्रातिपदिकात् अण्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदचतुष्टयम् अस्ति। तद् इति द्वितीयान्तानुकरणं लुप्तपञ्चम्यन्तम्, अधीते इति तिङन्तं क्रियापदम्। तद् इति द्वितीयान्तानुकरणं लुप्तपञ्चम्यन्तं, वेद इति तिङन्तं क्रियापदम्। प्राग्दीव्यतोऽण् इत्यस्मात् अण् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। प्रातिपदिकात् इति विशेष्यमस्ति अतः तेन सह अन्वयार्थं द्वितीयान्त–तद्शब्दस्य पञ्चम्यन्ततया विपरिणामः क्रियते। तद्शब्दात् समर्थविभक्तिद्वितीयाया बोधो भवति। एवञ्च पूर्वोक्तः सूत्रार्थः सिध्यति। अत्र य एव अध्येता स एव ज्ञाता अपि स्यात् इति नियमो नास्ति अन्यथा तदधीते वेद इति सूत्रस्वरूपं स्यात्। सूत्रस्याशयस्तावत्–यत् पठति अथवा यत् जानाति तादृशकर्मीभूतशब्दात् प्रत्ययो भवति। ततः पठितुः ज्ञातुः वा बोधो भवति।

उदाहरणम् – व्याक्रियन्ते व्युत्पाद्यन्ते अनेन शब्दा इति व्याकरणम्। व्याकरणम् अधीते वेद वा इति लौकिकविग्रहे व्याकरण अम् इति द्वितीयान्तात् सुबन्तात् प्रकृतसूत्रेण अणि प्रातिपदिकसंज्ञायां सुब्लुकि व्याकरण अ इति जायते। ततः तद्धितेष्वचामादेः इत्यनेन वृद्धौ प्राप्तायां न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् इत्यनेन निषेधे सति यकारात् पूर्वं ऐकारागमे व् ऐ याकरण अ इति जाते भसंज्ञक–अकारस्य लोपे वर्णसम्मेलने वैयाकरण इति जायते। ततः सुप्रत्ययरुत्वविसर्गादिकार्ये सति वैयाकरणः इति रूपं सिध्यति। एवमेव छन्दोऽधीते वेद वा छान्दसः इत्यादि रूपं सिध्यति।

[३०.७] क्रमादिभ्यो वुन्॥ (४.२.६१)

सूत्रार्थः – क्रमादिगणपठितेभ्यः द्वितीयान्तसमर्थप्रातिपदिकेभ्यः अधीते अथवा जानाति इत्यर्थे तद्धितसंज्ञको वुन्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। क्रमः आदिर्येषां ते क्रमादयः इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः क्रमादिभ्यः इति पञ्चमीबहुवचनान्तं, वुन् इति प्रथमैकवचनान्तं विधीयमानम्। प्राग्दीव्यतोऽण् इत्यस्मात् अण् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। तदधीते तद्वेद इति सूत्रमपि अनुवर्तते। एवञ्च उक्तार्थः सम्पद्यते। वुनः नकार इत्संज्ञकः, तेन वु इत्येव शिष्यते। नितः प्रयोजनं ञ्नित्यादिर्नित्यम् इत्यनेन आद्युदात्तविधानम्। युवोरनाकौ इत्यनेन वु इत्यस्य अक–इत्यादेशो भवति। क्रमादिगणे क्रम, पद, शिक्षा, मीमांसा इति शब्दाः पठिताः।

उदाहरणम् – क्रमकः। क्रमम् अधीते क्रमं वेद वा इति लौकिकविग्रहे क्रम अम् इति द्वितीयान्तात् सुबन्तात् क्रमादिभ्यो वुन् इत्यनेन वुन्प्रत्यये अनुबन्धलोपे तस्य स्थाने युवोरनाकौ इत्यनेन अकादेशे क्रम अक इति जाते भसंज्ञायां यस्येति च इत्यनेन मकारोत्तरवर्तिनः अकारलोपे वर्णसम्मेलने स्वादिकार्ये क्रमकः इति सिध्यति। एवमेव पदम् अधीते पदं वेद वा इत्यर्थे पदकः, शिक्षाम् अधीते शिक्षां वेद वा इत्यर्थे शिक्षकः, मीमांसाम् अधीते मीमांसां वेद वा इत्यर्थे मीमांसकः इति रूपं सिध्यति।

[३०.८] तदस्मिन्नस्तीति देशे तन्नाम्नि॥ (४.२.६७)

सूत्रार्थः – प्रकृतिप्रत्ययाभ्यां यदि देशस्य नाम सम्पद्यते तर्हि स अस्मिन् देशे अस्ति इत्यर्थे प्रथमान्तात् समर्थप्रातिपदिकात् अण्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रमिदमस्ति। तस्य नाम तन्नाम, तस्मिन् तन्नाम्नि इति सप्तम्येकवचनान्तम्। तद् प्रथमान्तानुकरणं लुप्तपञ्चम्यन्तम्। अस्मिन् , देशे इत्युभयमपि सप्तम्येकवचनान्तम्, अस्ति क्रियापदम्, इति अव्ययपदम् इति अनेकपदमिदं सूत्रम्। प्राग्दीव्यतोऽण् इत्यस्मात् अण् इति अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। तथा च प्रागुक्तार्थः सिध्यति एव। प्रथमतत्पदं प्रथमाविभक्तेः सूचकः। द्वितीयं तत्पदं प्रत्ययान्तस्य सूचकः। इतिशब्दः विवक्षार्थकः। सूत्रस्य तात्पर्यं तावत् यस्मात् शब्दात् अण्प्रत्ययो भवति सः अण्प्रत्ययान्तशब्दः कस्यापि देशस्य संज्ञा स्यात्। एवञ्च स अस्मिन् देशे अस्ति इत्यर्थे प्रथमान्तात् समर्थप्रातिपदिकात् तद्धितसंज्ञकः अण्प्रत्ययो भवति यदि स प्रत्ययान्तशब्दः कस्यापि प्रसिद्धदेशस्य नाम भवति। सूत्रमिदं मतुप्प्रत्ययस्य अपवादभूतम्।

उदाहरणम् – उदुम्बराः सन्ति अस्मिन् देशे इति लौकिकविग्रहे उदुम्बर जस् इति प्रथमान्तसमर्थसुबन्तात् तदस्मिन्नस्तीति देशे तन्नाम्नि इत्यनेन अण्प्रत्यये प्रातिपदिकसंज्ञायां सुब्लुकि तद्धितेष्वचामादेः इत्यनेन आद्यचः वृद्धौ औकारादेशे भसंज्ञकाकारस्य लोपे च औदुम्बर् अ इति जाते स्वादिकार्ये वर्णसम्मेलने च औदुम्बरः इति सिध्यति। अयं शब्दः स्थानविशेषस्य संज्ञा। एवमेव पर्वताः सन्ति अस्मिन् देशे इति पार्वतः देशः इत्यादि रूपं सिध्यति।

अत्र विशेषः – प्रागुक्तं सूत्रं चातुरार्थिकप्रकरणस्थम्। चत्वारः अर्थाः सन्ति इति हेतोः चातुरार्थिकप्रकरणमित्युच्यते। के च ते इति चेत्–

१. सः अस्मिन् अस्ति इत्येवं देशः– अस्य विषये तु उक्तमेवास्ति।

२. तेन निर्मितमित्येवं नगरी– तेन निर्वृत्तम् (४.२.६८) इति सूत्रम्। अस्योदाहरणम्– कुशुम्बेन निर्वृत्ता कौशाम्बी।

३. तस्य वासः इत्येवं देशः– तस्य निवासः (४.२.६९) इति योगः। अस्योदाहरणम्– शिबीनां निवासो देशः शैबः।

४. यः तस्मात् दूरे नास्ति इत्येवं देशः– अदूरभवश्च (४.२.७०)इति शास्त्रम्। अस्योदाहरणम्– विदिशाया अदूरभवं नगरं वैदिशम्।

[३०.९] लुपि युक्तवद्व्यक्तिवचने॥ (१.२.५१)

सूत्रार्थः – प्रत्यये लुप्ते सति शब्दस्य प्रकृतिवद् लिङ्गवचने स्याताम्।

सूत्रव्याख्या – सूत्रमिदमतिदेशसूत्रम्। युक्तेन तुल्यं युक्तवत्। व्यक्तिश्च वचनं च तयोरितरेतरयोगद्वन्द्वः व्यक्तिवचने। लुपि सप्तम्येकवचनान्तं, युक्तवत् इति अव्ययं, व्यक्तिवचने प्रथमान्तमिति त्रिपदमिदं सूत्रम्। सूत्रेऽस्मिन् युक्तशब्दस्य प्रकृतिरर्थः, व्यक्तिशब्दस्य लिङ्गमित्यर्थः, वचनशब्दस्य संख्यार्थः। सूत्रस्याशयस्तावत्– यस्याः प्रकृतेः प्रत्ययो विहितो भवति, तस्य प्रत्ययस्य लोपेऽपि तस्याः प्रकृतेरनुसारं लिङ्गवचने भवतः न तु तस्य विशेष्यानुसारं।

उदाहरणम् – पञ्चालानां निवासो जनपदः पञ्चालाः। अत्र विशेष्यमस्ति जनपदः , प्रकृतिरस्ति पञ्चालाः इति प्रथमाबहुवचनान्तः पुंल्लिङ्गकश्च। पञ्चाल आम् इत्यलौकिकविग्रहे निवासार्थे जनपदार्थे च अण्प्रत्ययस्य विधाने सति जनपदे लुप् इत्यनेन तस्य लोपे प्रातिपदिकसंज्ञायां सुब्लुकि प्रकृतसूत्रेण युक्तवद्भावः अर्थात् प्रकृतिवद्भावो भवति। तस्मात् जनपदः इति विशेष्यानुसारं न लिङ्गवचने भवतः अपि तु पञ्चाल इति प्रकृत्यनुसारम्। तस्मादेव पञ्चालाः इति रूपं सिध्यति। एवमेव कुरवः, अङ्गाः, वङ्गाः कलिङ्गाः इत्यादयः सिध्यन्ति।

[३०.१०] राष्ट्रावारपाराद्घखौ॥ (४.२.९३)

सूत्रार्थः – अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषः, तदर्थे अर्थात् जाताद्यर्थे राष्ट्रशब्दात् अवारपारशब्दात् क्रमशः घप्रत्ययः खप्रत्ययश्च भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। राष्ट्रञ्च अवारपारञ्च तयोः समाहारद्वन्द्वः राष्ट्रावारपारम्, तस्मात् राष्ट्रावारपारात् इति पञ्चम्येकवचनान्तम्। घश्च खश्च तयोरितरेतरयोगद्वन्द्वो घखौ इति प्रथमद्विवचनान्तम्। शेषे इत्यस्याधिकारः अस्ति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। यथासंख्यमनुदेशः समानाम् इति परिभाषया क्रमशः राष्टशब्दात् घप्रत्ययः, अवारपारशब्दात् च खप्रत्ययो भवति। अत्र ध्यातव्यं यत् शैषिकप्रकरणस्थसूत्रैः कुत्रचित् प्रकृतेः प्रत्ययस्य वा विधानं भवति न तु कस्यापि अर्थस्य विधानं भवति। यथा राष्ट्रावारपाराद्घखौ इत्यत्र प्रकृतिप्रत्ययौ उक्तौ, अर्थस्तु अनुक्तः। क्वचित् अर्थ एव उक्तः, न तु प्रकृतिप्रत्ययौ। यथा तत्र भवः, तत्र जातः, तत आगतः इत्यादौ अर्थ एव उक्तः न तु प्रकृतिप्रत्ययौ। अतः तत्र द्वयोः सूत्रयोः मेलनेनैव एकवाक्यता सम्पद्यते तेन प्रकृति–प्रत्यय–अर्थानां बोधो भवति एवञ्च तत्र जातः इति अर्थविधायकसूत्रेण सह राष्ट्रावारपाराद्घखौ इति प्रत्ययविधायकसूत्रस्य एकवाक्यतायां सप्तम्यन्तराष्ट्रशब्दात् सप्तम्यन्त–अवारपारशब्दात् च जातार्थे क्रमशः तद्धितसंज्ञकघप्रत्ययः तद्धितसंज्ञकखप्रत्ययश्च भवति।

उदाहरणम् – राष्ट्रे जातादिः इति लौकिकविग्रहे, राष्ट्र ङि इति सप्तम्यन्तप्रातिपदिकात् प्रकृतसूत्रेण घप्रत्यये प्रातिपदिकसंज्ञायां सुब्लुकि राष्ट्र घ इति जायते। ततः आयनेयीनीयियः फढखछघां

प्रत्ययादीनाम् इत्यनेन घ् इत्यस्य स्थाने इयादेशे भसंज्ञक-अकारस्य लोपे राष्ट्र इय इति जाते वर्णसम्मेलने राष्ट्रिय इति शब्दात् स्वादिकार्ये सति राष्ट्रियः इति रूपं सिध्यति।

अवारं च पारं च अवारपारम् इति समाहारद्वन्द्वः। अवारपारे जातादिः इत्यर्थे अवारपार ङि इत्यलौकिकविग्रहे प्रकृतसूत्रेण खप्रत्यये प्रातिपदिकसंज्ञायां सुब्लुकि आयनेयादिसूत्रेण ईनादेशे णत्वे स्वादिकार्ये अवारपारीणः इति रूपं सिध्यति।

पाठगतप्रश्नाः-२

८. राष्ट्रियः इत्यत्र कः तद्धितप्रत्ययः।

९. वैयाकरणः इति शब्दस्य कोऽर्थः।

१०. लुपि युक्तवद्व्यक्तिवचने इति सूत्रं किमतिदेशसूत्रं विधिसूत्रं वा।

११. शिक्षकशब्दस्य कोऽर्थः।

१२. मीमांसकशब्दस्य कोऽर्थः।

१३. तदस्मिन्नस्तीति देशे तन्नाम्नि इति सूत्रेण कः तद्धितप्रत्ययो विधीयते।

१४. वङ्गाः इत्यस्य कोऽर्थः।

[३०.११] वृद्धाच्छः॥ (४.२.११४)

सूत्रार्थः – वृद्धसंज्ञकात् समर्थप्रातिपदिकात् शैषिकार्थे तद्धितः छप्रत्ययः परो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। वृद्धात् इति पञ्चम्येकवचनान्तम्, छः इति प्रथमैकवचनान्तं विधीयमानम्। कस्य वृद्धसंज्ञा भवति इति पृच्छायामुच्यते-वृद्धिर्यस्याचामादिस्तद्वृद्धम् इति सूत्रेण यस्मिन् शब्दे अचां मध्ये आद्यः अच् वृद्धिसंज्ञको (आ,ऐ,औ) भवति स शब्दः वृद्धिसंज्ञको भवति। एवञ्च अनुवृत्त्यादिकार्ये पूर्वोक्तः सूत्रार्थः सिध्यति।

उदाहरणम् – शालायां भव इति लौकिकविग्रहे शाला ङि इत्यलौकिकविग्रहे वृद्धिर्यस्याचामादिस्तद्वृद्धम् इत्यनेन शालायाः आद्याचो वृद्धिसंज्ञकत्वात् वृद्धसंज्ञा भवति। ततः तत्र भवः, तत्र जातः इत्यादिशैषिकार्थेषु शाला ङि इति सप्तम्यन्ताद् समर्थप्रातिपदिकात् वृद्धाच्छ इति योगेन छप्रत्यये आयनेयादिसूत्रेण छ् इत्यस्य स्थाने ईय्-आदेशे भसंज्ञकत्वात् आकारस्य लोपे वर्णसम्मेलने स्वादिकार्ये च शालीयः इति सिध्यति। एवमेव मालायां जातादि इत्यर्थे मालीयः इत्यादि सिध्यति।

[३०.१२] युष्मदस्मदोरन्यतरस्यां खञ्च॥ (४.३.१)

सूत्रार्थः – युष्मद्-अस्मद्शब्दाभ्यां विकल्पेन खञ्प्रत्ययः छप्रत्ययः अण्प्रत्ययश्च भवति।

सूत्रव्याख्या –विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदत्रयमस्ति। युष्मत् च अस्मत् च तयोरितरेतरयोगद्वन्द्वे युष्मदस्मदौ, तयोः युष्मदस्मदोः इति पञ्चम्यर्थे षष्ठी, अन्यतरस्यामिति सप्तम्येकवचनान्तं, खञ् प्रथमैकवचनान्तम्। चेति अव्ययपदम्। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा, शेषे इति एते अधिक्रियन्ते। चकारेण गर्तोत्तरपदाच्छः इति छः प्रत्ययः समुच्चीयते। सूत्रे अन्यतरस्यांग्रहणेन प्राग्दीव्यतीयः सामान्यतया प्राप्तोऽण् संगृह्यते। अत्र अस्मद्–युष्मद् इति प्रकृतिद्वयम् अस्ति, किञ्च खञ्, छः, अण् इति प्रत्ययत्रयमस्ति। एवञ्च द्वाभ्यां प्रकृतिभ्यां प्रत्ययत्रयं विधीयते। अतः अत्र यथासंख्यमनुदेशः समानाम् इति परिभाषा न प्रवर्तते इति स्मर्तव्यम्।

उदाहरणम् – युवयोः युष्माकं वा अयं इति लौकिकविग्रहे युष्मद् ओस् अथवा युष्मद् आम् इति अलौकिकविग्रहे युष्मदस्मदोरन्यतरस्यां खञ् च इति योगेन छप्रत्यये ईयादेशे प्रातिपदिकसंज्ञायां सुब्लुकि स्वादिकार्ये युष्मदीयः सिध्यति।

छप्रत्ययाभावे खञ्प्रत्यये च आयनेयादिसूत्रेण ईनादेशे युष्मद् ईन इति जाते तस्मिन्नणि च युष्माकास्माकौ इत्यनेन युष्मद् इत्यस्य स्थाने युष्माक इत्यादेशे तद्धितेष्वचामादेः इत्यनेन आदिवृद्धौ यौष्माक ईन इति जायते। ततः भसंज्ञकस्य अकारस्य लोपे अट्कुप्वाङ्नुम्व्यवायेऽपि इति योगेन नकारस्य णत्वे स्वादिकार्ये यौष्माकीणः इति रूपं सिध्यति।

पुनः खञ्प्रत्ययाभावे शेषे इति योगेन अण्प्रत्यये युष्मद् अ इति जाते तस्मिन्नणि च युष्माकास्माकौ इति शास्त्रेण युष्मद् इत्यस्य स्थाने युष्माक इत्यादेशे आदिवृद्धौ भसंज्ञकस्य अकारस्य लोपे स्वादिकार्ये यौष्माकः इति रूपं सिध्यति। एवञ्च वयमत्र रूपत्रयं प्राप्नुमः–

१. युष्मदीयः।

२. यौष्माकीणः।

३. यौष्माकः।

एवमेव आवयोः अयम् अथवा अस्माकम् अयम् इत्येतदर्थे छप्रत्यये अस्मदीयः इति रूपम्, खञ्प्रत्यये च अस्मद् इत्यस्य स्थाने अस्माक इत्यादेशे आदिवृद्धौ आस्माकीनः इति रूपम्, छ–खञ्प्रत्ययातिरिक्तस्थले अणि अस्माकादेशे आस्माकः इति रूपम् इत्याहत्य रूपत्रयं सिध्यति।

सम्प्रति अणि खञि च परतः एकत्वविशिष्टयोः अस्मद्–युष्मद्–शब्दयोः स्थाने आदेशं विधातुमिदं सूत्रमारभ्यते–

[३०.१३] तवकममकावेकवचने॥ (४.३.६२)

सूत्रार्थः – एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकस्ति। तवकममकौ एकवचने इति सूत्रगतपदच्छेदः। तवकममकौ इति प्रथमाद्विवचनान्तम्। एकवचने इति प्रथमैकवचनान्तम्। तस्मिन्नणि च युष्माकास्माकौ इत्यतः अणि , तस्मिन् इत्यनयोरनुवृत्तिर्भवति। तस्मिन् इत्यनेन युष्मदस्मदोरन्यतरस्यां खञ्च इति पूर्वसूत्रात् खञ् इत्यस्य परामर्शो भवति। युष्मदस्मदोरन्यतरस्यां खञ्च इत्यतः युष्मदस्मदोः अनुवृत्तिरपि

भवति। एकस्य वचनम् (उक्तिः) इति षष्ठीतत्पुरुषे एकवचनम्, तस्मिन् एकवचने। तवकश्च ममकश्च तवकममकौ इति इतरेतरयोद्वन्द्वः। एवञ्च तस्मिन् अर्थात् खञ्प्रत्यये परे तथा अण्प्रत्यये परे एकत्वसंख्याकथने प्रयुक्तयोः युष्मद्-अस्मद्-शब्दयोः स्थाने यथासंख्यं तवक-ममक-आदेशौ भवतः इति सूत्रार्थः।

विशेषः – तवक-ममकौ आदेशौ अनेकालौ स्तः। अतः अनेकाल्शित्सर्वस्य इत्यनेन तौ सर्वादेशौ भवतः।

उदाहरणम् – खञि **उदाहरणम्** – तव अयम् इति तावकीनः। युष्मद् ङस् इत्यलौकिकविग्रहे युष्मदस्मदोरन्यतरस्यां खञ्च इति सूत्रेण तस्येदम् इति शैषिकार्थे खञि प्रातिपदिकसंज्ञायां सुब्लुकि प्रकृतसूत्रेण युष्मद्-शब्दस्य स्थाने तवक इति सर्वादेशे तवक ख इति जायते। ततः आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इत्यनेन खस्य स्थाने ईनादेशे आदिवृद्धौ भसंज्ञकस्य अकारस्य लोपे स्वादिकार्ये च तावकीनः इति रूपं सिध्यति।

खञभावपक्षे तु शेषे इति अणि तवकममकावेकवचने इत्यनेन तवकादेशे आदिवृद्धौ भसंज्ञकाकारस्य लोपे स्वादिकार्ये च तावकः इति रूपं सिध्यति।

एवमेव मम अयम् इति विग्रहे मामकीनः, मामकः इत्यत्र प्रक्रिया ज्ञेया।

एकार्थवाचि-युष्मद्शब्दात् एकार्थवाचि-अस्मद्शब्दात् च तवकममकावेकवचने इति प्रकृतसूत्रेण पक्षे छप्रत्यये छस्य स्थाने ईयादेशे युष्मद् ईय इति जाते सूत्रमिदमारभ्यते-

[३०.१४] प्रत्ययोत्तरपदयोश्च॥ (७.२.९८)

सूत्रार्थः – मपर्यन्तयोः एकार्थयोः युष्मदस्मद्शब्दयोः त्वमौ स्तः प्रत्यये उत्तरपदे च।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पदद्वयं वर्तते। प्रत्ययोत्तरपदयोः च इति सूत्रगतपदच्छेदः। प्रत्ययश्च उत्तरपदं च तयोः इतरेतरयोगद्वन्द्वे प्रत्ययोत्तरपदे, तयोः प्रत्ययोत्तरपदयोः इति सप्तमीद्विवचनान्तम्। चेति अव्ययम्। सूत्रेऽस्मिन् त्वमावेकवचने इत्यतः त्वमौ एकवचने इत्यनयोः, युष्मदस्मदोरनादेशे इत्यतः युष्मदस्मदोः इत्यस्य च अनुवृत्तिर्भवति। मपर्यन्तस्य इत्यधिक्रियते। समासस्य चरम् अर्थात् अन्तिमं पदम् उत्तरपदम् इत्युच्यते। एवञ्च सूत्रार्थस्तावत्- एकवचनविषयकयोः युष्मदस्मद्शब्दयोः मपर्यन्तस्य स्थाने त्वमौ आदेशौ भवतः प्रत्यये उत्तरपदे वा परतः। यथासंख्यमनुदेशः समानाम् इति परिभाषायोगेन युष्मद्शब्दस्य मपर्यन्तस्य स्थाने अर्थात् युष्म् इति स्थाने त्व इत्यादेशो भवति, अस्मद्शब्दस्य मपर्यन्तस्य स्थाने अर्थात् अस्म इति स्थाने म इत्यादेशो भवति इति सूत्रस्य तात्पर्यम्।

उदाहरणम् – त्वदीयः, युष्मदीयः। उत्तरपदे तु त्वत्पुत्रः, मत्पुत्रः।

सूत्रार्थसमन्वयः – तव अयम् इति लौकिकविग्रहे युष्मद् ङस् इत्यलौकिकविग्रहे च युष्मदस्मदोरन्यतरस्यां खञ्च इत्यनेन पाक्षिक-छप्रत्यये छस्य स्थाने ईयादेशः। ततः प्रत्ययः परः अस्ति इति हेतोः प्रत्ययोत्तरपदयोश्च इत्यनेन युष्मद्शब्दस्य मपर्यन्तस्य स्थाने अर्थात् युष्म् इत्यत्र त्वादेशे त्व

अद् ईय इति जायते। ततः अतो गुणे इति पररूपैकादेशे वर्णसम्मेलने स्वादिकार्ये च त्वदीयः इति रूपं सिध्यति। एवमेव मम अयम् इति विग्रहे मदीयः इति रूपं सिध्यति। एवञ्च तव अयम् इति विग्रहे युष्मदीयः, यौष्माकीणः, यौष्माकः, तावकीनः, तावकः, त्वदीयः इति षट् रूपाणि भवन्ति। मम अयम् इति विग्रहेऽपि षट् रूपाणि भवन्ति। तानि च अस्मदीयः, आस्माकीनः, आस्माकः, मामकीनः, मामकः, मदीयः इति।

एतद्विषये तालिकां पश्यत–

खञ्प्रत्यये	**अण्प्रत्यये**	**छप्रत्यये**
एकवचने-	**एकवचने-**	**एकवचने-**
तवायं तावकीनः।	तवायं तावकः।	तवायं त्वदीयः।
ममायं मामकीनः।	ममायं मामकः।	ममायं मदीयः।
द्विवचने-	**द्विवचने-**	**द्विवचने-**
युवयोरयम् यौष्माकीणः।	युवयोरयम् यौष्माकः।	युवयोरयम् युष्मदीयः।
आवयोरयम् आस्माकीनः।	आवयोरयम् आस्माकः।	आवयोरयम् अस्मदीयः।
बहुवचने-	**बहुवचने-**	**बहुवचने-**
युष्माकमयं यौष्माकीणः।	युष्माकमयं यौष्माकः।	युष्माकमयं युष्मदीयः।
अस्माकमयम् आस्माकीनः।	अस्माकमयम् आस्माकः।	अस्माकमयम् अस्मदीयः।

तव पुत्रः इत्यर्थे युष्मद् ङस् पुत्र सु इत्यलौकिकविग्रहे षष्ठी इत्येनन तत्पुरुषसमासे कृत्तद्धितसमासाश्च इत्यनेन समासप्रयुक्तप्रातिपदिकसंज्ञायां सुब्लुकि युष्मद् पुत्र इति जायते। ततः पुत्रशब्दः उत्तरपदम् अस्ति इति हेतोः प्रत्ययोत्तरपदयोश्च इति प्रकृतसूत्रेण युष्म् इत्यस्य स्थाने त्वादेशे त्व अद् इति जाते अतो गुणे इति पररूपैकादेशे दकारस्य खरि च इत्येनन चर्त्वे स्वादिकार्ये त्वत्पुत्रः इति रूपं सिध्यति। एवमेव मम पुत्रः इत्यर्थे मत्पुत्रः इति रूपं जायते।

[३०.१५] ग्रामाद्यखञौ॥ (४.२.९४)

सूत्रार्थः – ग्रामशब्दात् शेषार्थे तद्धितौ यखञौ प्रत्ययौ परौ स्तः।

सूत्रव्याख्या – ग्रामात् (५/१), घखौ (१/२) इति सूत्रगतपदच्छेदः। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। एवञ्च समर्थग्रामप्रातिपदिकात् शैषिकार्थे तद्धितसंज्ञकौ यखञौ प्रत्ययौ परौ भवतः इति सूत्रार्थः। खञः ञकार इत्संज्ञकः। तेन खमात्रं शिष्यते।

उदाहरणम् – ग्राम्यः, ग्रामीणः।

सूत्रार्थसमन्वयः – ग्रामे जातो भवो वा इति लौकिकविग्रहे ग्राम ङि इत्यलौकिकविग्रहे प्रकृतसूत्रेण यप्रत्यये प्रातिपदिकसंज्ञायां सुब्लुकि ग्राम य इति जायते। ततः भसंज्ञायाम् अकारलोपे स्वादिकार्ये च ग्राम्यम् इति रूपं भवति।

खञ्प्रत्यये तु अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लुकि ग्राम ख इति जायते आयनेयादिसूत्रेण खकारस्य स्थाने ईनादेशे भसंज्ञादिकार्ये ग्रामीणः इति रूपमपि भवति इति रूपद्वयं सिध्यति।

[३०.१६] आत्मन्विश्वजन भोगोत्तरपदात्खः॥ (५.१.९)

सूत्रार्थः – आत्मन्शब्दात् विश्वजनशब्दात् भोगोत्तरपदशब्दात् च हितार्थे खप्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पदद्वयमस्ति। आत्मन्विश्वजन भोगोत्तरपदात् खः इति सूत्रगतपदच्छेदः। विश्वे जनाः विश्वजनाः (कर्मधारयः), भोगः उत्तरपदं यस्य स भोगोत्तरपदः। आत्मा च विश्वजनाश्च भोगोत्तरपदञ्च तेषां समाहारद्वन्द्वः– आत्मन्विश्वजनभोगोत्तरपदम्, तस्मात्। आत्मन्विश्वजनभोगोत्तरपदात् इति पञ्चम्येकवचनान्तम्। खः इति प्रथमैकवचनान्तम्। तस्मै हितम् इत्यस्यानुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा, इति एते अधिक्रियन्ते। एवञ्च तस्मै=चतुर्थ्यन्तात् आत्मन्–विश्वजन–भोगोत्तरपदप्रातिपदिकात् हितम् इत्यर्थे तद्धितसंज्ञकः खप्रत्ययो भवति इति सूत्रार्थः। सूत्रमिदम् औत्सर्गिकस्य छप्रत्ययस्य अपवादभूतमस्ति।

उदाहरणम् – आत्मनीनम्, विश्वजनीनम्, मातृभोगीणः।

सूत्रार्थसमन्वयः – एवञ्च आत्मने हितम् इत्यर्थे आत्मन् ङे इति चतुर्थ्यन्तात् प्रातिपदिकात् प्रकृतसूत्रेण खप्रत्यये प्रातिपदिकंसज्ञायां सुब्लुकि आत्मन् ख इति जायते। ततः खकारस्य स्थाने ईनादेशे आत्मन् ईन् इति जाते नस्तद्धिते इत्येनन टिसंज्ञकस्य अनः लोपे प्राप्ते आत्माध्वानौ खे इति सूत्रेण प्रकृतिभावे लोपो न भवति। ततः स्वादिकार्ये आत्मनीनम् इति रूपं सिध्यति।

एवमेव विश्वजनीनम् इति रूपं सिध्यति।

मातृभोगाय हितम् इत्यत्र तु मातृशब्दात् परं भोशब्दोऽस्ति। अतः मातृभोगशब्दः भोगोत्तरशब्दः अस्ति। तस्मादेव मातृभोग ङे इत्यलौकिकविग्रहे प्रकृतसूत्रेण खप्रत्यये प्रातिपदिकसंज्ञायां सुब्लुकि खकारस्य ईनादेशे भसंज्ञकाकारस्य लोपे नकारस्य णत्वे स्वादिकार्ये च मातृभोगीणः इति रूपं सिध्यति।

[३०.१७] सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च॥ (४.३.२३)

सूत्रार्थः – सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् चत्वारि पदानि सन्ति। सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यः (५/३), ट्युट्युलौ (१/२) तुट् (१/१) च इति सूत्रगतपदच्छेदः। सायञ्च चिरञ्च प्राह्णे च प्रगे च अव्ययञ्च तेषाम् इतरेतरयोगद्वन्द्वे सायञ्चिरम्प्राह्णेप्रगेऽव्ययानि, तेभ्यः सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यः। ट्युश्च ट्युल् च तयोः इतरेतरयोगद्वन्द्वे ट्युट्युलौ। तुट् इति प्रथमैकवचनान्तम्। च इत्यव्ययम्। सू त्रेऽस्मिन् कालाट्ठञ् इत्यतः

वचनविपरणामेन कालेभ्यः इत्यस्यानुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा, शेषे इति एते अधिक्रियन्ते। एवञ्च सूत्रार्थस्तावत् – सायम्, चिरम्, प्राह्णे, प्रगे इत्येतेभ्यः कालवाचकशब्देभ्यः, तथा कालवाचकाव्ययेभ्यश्च तद्धितसंज्ञकौ ट्यट्युलौ प्रत्ययौ भवतः, तयोः प्रत्ययोः तुडागमोऽपि भवति। अत्र सायम्, चिरम्, प्राह्णे, प्रगे इत्येते न अव्ययानि अन्यथा अव्ययत्वादेव सिद्धे पुनः पृथक् उल्लेखः व्यर्थः स्यात्। तयोः प्रत्ययोः टकारलकारौ इतौ स्तः। अतः यु इति शिष्यते इति उभयोः प्रत्ययोः समानरूपता भाति तथापि स्वरे भेदोऽस्ति इति अवधेयम्। तुडागमे च उकारटकारौ इतौ स्तः, त्–इत्येव शिष्यते। यु इत्यस्य स्थाने युवोरनाकौ इत्यनेन अन–इत्यादेशो भवति। टित्करणस्य प्रयोजनम्–स्त्रीत्वविवक्षायां टिड्ढाणञित्यादिसूत्रेण ङीप्प्रसक्तिः। तेन सायन्तनं कृत्यम्, सायन्तनी वेला। अत्र अवधेयम्– प्रकृतसूत्रेण साय–चिरशब्दयोः मान्तत्वं किञ्च प्राह्ण–प्रगशब्दयोः एदन्तत्वम् निपात्यते।

उदाहरणम्– सायन्तम्। चिरन्तनम्। प्राह्णेतनम्। प्रगेतनम्।

सूत्रार्थसमन्वयः – साये भवः इत्यर्थे सप्तम्यन्ताद् घञन्तात् सायशब्दात् तत्र भवः इति शैषिकार्थे प्रकृतसूत्रेण ट्युप्रत्यये ट्युल्प्रत्यये वा प्रातिपदिकसंज्ञायां सुब्लुकि यु इत्यस्य स्थाने अनादेशे तुडागमे सायशब्दस्य मान्तत्वनिपातने स्वादिष्वसर्वनामस्थाने इति सूत्रेण पदसंज्ञायां मकारस्य अनुस्वारे अनुस्वारस्य वैकल्पिकपरसवर्णे स्वादिकार्ये च सायन्तनः, सायंतनः इति रूपद्वयं सिध्यति।

चिरे भवः इत्यर्थे चिरन्तनम्। अस्मिन्नेवार्थे तु चिरपरुत्परारिभ्यस्त्नो वक्तव्यः इति वार्तिकेन त्न–प्रत्यये स्वादिकार्ये च चिरत्नम् इति रूपं भवति।

प्राह्णे भवो जातो वा इत्यर्थे प्राह्णेतनम् इति रूपं भवति।

प्रगे भवो जातो वा इत्यर्थे प्रगेतनः इति रूपम्। प्रगेतनो विहारः (Morning walk) इति प्रयोगः।

कालवाचकस्य उदाहरणम्–

दोषा भवं दोषातनम्। अत्र रात्रिवाचकदोषाशब्दात् तत्र भवः इति शैषिकार्थे प्रकृतसूत्रेण ट्युप्रत्यये ट्युल्प्रत्यये वा दोषातनम् इति रूपं सिध्यति।

एवमेव–

१. दिवा भवं दिवातनम् (दिन में होने वाला)।

२. श्वो भवं श्वस्तनम् (आगामी कल में होने वाला)।

३. ह्यो भवं ह्यस्तनम् (गतकल में होने वाला)।

४. अद्यो भवम् अद्यतनम् (आज होने वाला)।

५. पुरा भवं पुरातनम् (पूर्वकाल में होने वाला)।

६. सदा भवः सदातनः (हमेशा होने वाला)।

७. सना भवः सनातनः (सदा होने वाला)।

८. अधुना भवः अधुनातनः (अब होने वाला)।

९. इदानीं भवः इदानीन्तनः (अब होने वाला)।

१०. प्राग्भवः प्राक्तनः (पहले होने वाला)।

११. प्रातर्भवः प्रातस्तनः (प्रातः होने वाला)।

१२. ऐषमो भवम् ऐषमस्तनम् (इस वर्ष होने वाला)।

[३०.१८] जिह्वामूलाङ्गुलेश्छः॥ (४.३.६२)

सूत्रार्थः – जिह्वामूलशब्दात् अङ्गुलशब्दात् च तत्र भवः इत्यर्थे छप्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। जिह्वाया मूलं जिह्वामूलम्, जिह्वामूलञ्च अङ्गुलिश्च तयोः समाहारद्वन्द्वो जिह्वामूलाङ्गुलिः, सौत्रं पुंस्त्वं तस्माद् जिह्वामूलाङ्गुलेः इति पञ्चम्येकवचनान्तम्। छः इति प्रथमैकवचनान्तं विधीयमानम्। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा, शेषे इति एते अधिक्रियन्ते। ततः पूर्वोक्तार्थः सिध्यति। जिह्वामूलम् अङ्गुलिः चेति उभौ शब्दौ अवयववाचकौ इति हेतोः शरीरावयवाच्च इत्यनेन यत्प्रत्यये प्राप्ते तं बाधित्वा छप्रत्ययो भवति।

उदाहरणम् – जिह्वामूले भवम् इति लौकिकविग्रहे जिह्वामूल ङि इत्यलौकिकविग्रहे प्रकृतसूत्रेण छप्रत्यये आयनेयादिसूत्रेण ईयादेशे प्रातिपदिकसंज्ञायां सुब्लुकि भसंज्ञायाम् अकारलोपे स्वादिकार्ये जिह्वामूलीयम् इति रूपं सिध्यति। एवमेव पूर्वप्रक्रियानुसारम् अङ्गुलीयम् इति रूपं सिध्यति।

[३०.१९] गोश्च पुरीषे॥ (४.३.१४५)

सूत्रार्थः – पुरीषार्थे अर्थात् मलार्थे गोप्रातिपदिकात् मयट्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। त्रिपदं सूत्रमस्ति। गोः पञ्चम्येकवचनान्तं चेत्यव्ययपदं पुरीषे इति सप्तम्येकवचनान्तम। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा, शेषे इति एते अधिक्रियन्ते। तस्य विकार इति सम्पूर्णं सूत्रमनुवर्तते। मयड् वैतयोर्भाषायामभक्ष्याच्छादनयोः इत्यतः मयट् अनुवर्तते। एवञ्च उक्तसूत्रार्थः सिध्यति। सूत्रमिदं गोपयसोर्यत् इति सूत्रस्य बाधकमस्ति। यद्यपि गोमलं न गोः अवयवो न वा तस्य विकारः तथापि सम्बन्धसामान्यमादाय तथोक्तम्।

उदाहरणम् – गोः पुरीषं गोमयम्। गोः विकारः इति लौकिकविग्रहे गो ङस् इत्यलौकिकविग्रहे प्रकृतसूत्रेण मयट्प्रत्यये अनुबन्धलोपे गो मय इति स्थिते प्रातिपदिकसंज्ञादिकार्ये गोमयम् इति रूपं सिध्यति।

[३०.२०] रक्षति (४.४.३३)॥

सूत्रार्थः – रक्षति इत्यर्थे द्वितीयान्तात् समर्थप्रातिपदिकात् तद्धितः औत्सर्गिकठक्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। एकपदं सूत्रमस्ति। रक्षति इति अर्थबोधकं क्रियापदम्। तत् प्रत्यनुपूर्वमीपलोमकूलम् इत्यतः तत् इति द्वितीयान्तपदस्यानुवृत्तिर्भवति। प्राग्वहतेष्ठक् इत्यतः ठक्प्रत्ययः अनुवर्तते। प्रत्ययः परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा, इति एते अधिक्रियन्ते। तेन पूर्वोक्तः सूत्रार्थः सिध्यति।

उदाहरणम् – समाजं रक्षति इति सामाजिकः। समाजं रक्षति इति लौकिकविग्रहे समाज अम् इत्यलौकिकविग्रहे रक्षति इति सूत्रेण ठक्प्रत्यये अनुबन्धलोपे ठस्येकः इत्यनेन ठ इत्यस्य स्थाने इक इत्यादेशे समाज इक इति जाते ठकः कित्त्वात् किति च इत्यनेन आदिवृद्धौ भसंज्ञकाकारस्य लोपे स्वादिकार्ये सामाजिकः इति रूपं सिध्यति।

[३०.२१] नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्या नाम्यसमसमितसम्मितेषु॥ (४.४.९१)

सूत्रार्थः – नौ, वयस्, धर्म, विष, मूल, मूल, सीता, तुला इत्येतेभ्यः शब्देभ्यः परं क्रमशः योग्य–तुल्य–प्राप्य–वध्य–प्राप्यलाभ–सम–एकीकरण–तोलनार्थेषु यत्प्रत्ययो भवति।

सूत्रव्याख्या – विधिसूत्रम् इदम् अस्ति। द्विपदं सूत्रमस्ति। नौश्च वयश्च धर्मश्च विषञ्च मूलञ्च मूलञ्च सीता च तुला च तेषामितरेतरयोगद्वन्द्वो नौवयोधर्मविषमूलमूलसीतातुलास्ताभ्यः नौवयोधर्मविषमूलमूलसीतातुलाभ्यः इति पञ्चमीबहुवचनान्तम्। तार्यञ्च तुल्यञ्च प्राप्यञ्च वध्यञ्च आनाम्यञ्च समश्च समितञ्च सम्मितञ्च तेषामितरेतरयोगद्वन्द्वः तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितानि तेषु तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु सप्तमीबहुवचनान्तम्। प्राग्धिताद्यत् इत्यतः यत् अनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। एवञ्च पूर्वोक्तः सूत्रार्थः सिध्यति।

उदाहरणम् – सम्प्रति क्रमश उदाहरणानि आलोच्यन्ते–

१. नाव्यम्– नावा तार्यम् इति लौकिकविग्रहे नौ टा इत्यलौकिकविग्रहे च प्रकृतसूत्रेण तार्यार्थे यत्प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लुकि नौ य इति जाते वान्तो यि प्रत्यये आव्–आदेशे विभक्त्यादिकार्ये नाव्यम् इति रूपं सिध्यति।

२. वयस्यः– वयसा तुल्यम् इत्यर्थे वयस् टा इत्यलौकिकविग्रहे प्रकृतसूत्रेण यत्प्रत्यये प्रातिपदिकसंज्ञादिकार्ये वयस्यः इति रूपं सिध्यति।

३. धर्म्यम्– धर्मेण प्राप्यम् धर्म्यम्।

४. विष्यः– विषेण वध्यः।

५. मूल्यम्–मूलेन (पूँजी) आनाम्यम्।

६. मूल्यः–मूलेन समः मूल्यः।

७. सीत्यम्–सीतया समितं सीत्यम्।

८. तुल्यम्–तुलया सम्मितं तुल्यम्

इत्येवं सूत्रस्यास्य अष्टौ उदाहरणानि प्रदर्शितानि।

पाठगतप्रश्नाः-३

१५.नौवयोधर्मादिसूत्रं पूरयत।

१६.सामाजिकशब्दस्य कोऽर्थः।

१७.गोः पुरीषमित्यर्थे किं रूपं भवति।

१८.जिह्वामूलीयम् इत्यत्र कः प्रत्ययः केन च।

१९.युवयोः युष्माकं वा अयम् इत्यर्थे कति रूपाणि भवन्ति तानि च कानि।

२०.वृद्धसंज्ञा केन भवति।

२१.वृद्धसंज्ञाया एकं फलं लिखत।

२२.शालीयः इत्यत्र कः तद्धितप्रत्ययः।

पाठसारः

तद्धितप्रकरणस्य अस्मिन् तृतीयपाठे अण्–तल्–वुन्–घः–खः–छः–खञ्–मयट्–यत् इत्यादितद्धितप्रत्यया आलोचिताः सन्ति। एतेषु कदाचित् एक एव प्रत्ययः भिन्नार्थेषु स्यात् यथा अण्प्रत्ययः कदाचित् तेन युक्तमित्यर्थे, कदाचित् च तेन दृष्टमित्यर्थे कदाचित् वा प्रकृतिप्रत्ययाभ्यां देशस्य नाम्नि गम्यमाने भवति। किञ्च क्वचित् तद्धितपदस्य लुप्तस्थले प्रकृतिवद् वचनं क्रियते , यथा लुपि युक्तवद्व्यक्तिवचने इत्यतिदेशसूत्रमपि आलोचितमस्ति। सर्वोपरि लोकव्यवहारोपयोगिनः शब्दाः आलोचिताः सन्ति यथा भवन्तः तान् व्यवहर्तुं शक्नुयुः।

पाठान्तप्रश्नाः

१. नौवयोधर्मादिसूत्रं प्रपूर्य व्याख्यात।

२. जिह्वामूलाङ्गुलेश्छः इति सूत्रं सोदाहरणं व्याख्यात।

३. युष्मदस्मदोरन्यतरस्यां खञ्च इति सूत्रं सोदाहरणं व्याख्यात।

४. युवयोः युष्माकं वा अयम् इत्यर्थे तद्धितप्रत्ययप्रयोगे कति रूपाणि भवन्ति तानि च प्रक्रियासहयोगेन निरूप्यन्ताम्।

५. लुपि युक्तवद्व्यक्तिवचने इत्यतिदेशसूत्रं सोदाहरणं व्याख्यात।

६. तदस्मिन्नस्तीति देशे तन्नाम्नि सूत्रं सोदाहरणं व्याख्यात।

७. क्रमादिभ्यो वुन् सूत्रं सोदाहरणं व्याख्यात।

८. तदधीते तद्वेद सूत्रं सोदाहरणं व्याख्यात।

९. ग्रामजनबन्धुभ्यस्तल् सूत्रं सोदाहरणं व्याख्यात।

पाठगतप्रश्नोत्तराणि

उत्तराणि– १

१. रज्यते अनेन इत्यर्थे तृतीयान्तात् रङ्गवाचकात् समर्थप्रातिपदिकात् अण्प्रत्ययो भवति।

२. अण्।

३. वसिष्ठेन दृष्टम्।

४. अण्।

५. तल्।

६. जनानां समूहः।

७. सास्य देवता।

उत्तराणि-२

८. घप्रत्ययः।

९. व्याकरणम् अधीते वेद वा।

१०. अतिदेशसूत्रम्।

११. शिक्षाम् अधीते शिक्षां वेद वा।

१२. मीमांसाम् अधीते मीमांसां वेद वा।

१३. अण्।

१४. वङ्गानां निवासो जनपदः वङ्गाः।

उत्तराणि-३

१५. नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु।

१६. रूपत्रयम्। युष्मदीयः, यौष्माकीनः, यौष्माकः।

१७. वृद्धिर्यस्याचामादिस्तद्वृद्धम् इत्यनेन।

१८. समाजं रक्षति।

१९. गोमयम्।

२०. छप्रत्ययः, जिह्वामूलाङ्गुलेश्छः इति योगेन।

२१. वृद्धाच्छः इत्यनेन छप्रत्ययविधानम्।

२२. छप्रत्ययो विधीयते।

॥इति त्रिंशः पाठः ॥

346sk31

३१

अथ ठञधिकारादिप्रकरणम्

प्रस्तावना

समग्रतद्धितप्रकरणमादाय ये तावत् चत्वारः पाठाः कल्पिताः सन्ति। सम्प्रति तेषु अन्तिमपाठः अत्र प्रस्तूयते। अस्मिन् चतुर्थे पाठे ठञधिकारप्रकरणतः स्वार्थिकप्रकरणं यावद् आलोच्यते। अस्मिन् तुर्ये पाठे ये तावत् अस्मद्व्यवहृताः शब्दा वर्तन्ते ते एव मुख्यतया आलोच्यन्ते यथा संस्कृतभाषया अस्माकं लोकव्यवहारः सुष्ठु स्यात्। तत्र तत्र प्रसिद्धानि तद्धितान्तरूपाणि प्रदर्शितानि सन्ति। यथा - च्विप्रत्ययान्तरूपं, तयप्प्रत्ययान्तरूपं, वतुप्प्रत्ययान्तरूपं, तरप्प्रत्ययान्तरूपं, तमप्प्रत्ययान्तरूपमित्येवं विविधानि रूपाणि। एवञ्च अणञौ, त्वतलौ, इमनिच्, ष्यञ्, वतुप्, तयप्, तमप्, तरप्, च्वि इत्यादयः प्रत्यया मुख्यतया अत्र आलोच्यन्ते। अग्रे एतेषां स्पष्टम् आलोचनं भविष्यति। तद्धितप्रत्ययः प्रातिपदिकात् भवति इति भवन्तः पूर्वं ज्ञातवन्तः। किन्तु कदाचित् तिङन्तादपि भवति यथा पचतितमाम्। तद्धितप्रत्ययविधायकसूत्रेषु प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इत्येते अधिक्रियन्ते इति स्मर्तव्यम्।

उद्देश्यानि

अमुं पाठं पठित्वा भवताम्/भवतीनाम्

- सरलतया ठञादिप्रत्ययानां प्रयोगज्ञानं भविष्यति।
- ठञधिकारप्रकरणादीनां सूत्राणाम् अर्थज्ञानं भविष्यति।
- लौकिकालौकिकविग्रहाणां परिचयो भविष्यति।
- ठञधिकारप्रकरणादीनां सूत्राणाम् उदाहरणानां ज्ञानं भविष्यति।
- तद्धितप्रत्ययस्य प्रयोगविषये सहजतया ज्ञानं भविष्यति।
- सर्वोपरि तद्धितान्तपदस्य प्रयोगः क्व कथञ्च कर्तव्य इति विवेको भविष्यति।

[३१.१] तस्येश्वरः॥ (५.१.४२)

सूत्रार्थः - सर्वभूमिपृथिवीभ्याम् अणञौ स्तः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। तस्य (५/२), ईश्वरः (१/१) इति सूत्रगतपदच्छेदः। सूत्रे तस्य इति षष्ठ्यन्तानुकरणं लुप्तपञ्चमीकम्। सर्वभूमिपृथिवीभ्यामणञौ इति सूत्रमनुवर्तते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इत्येते अधिक्रियन्ते। सर्वा भूमिः सर्वभूमिः, कर्मधारये पूर्वपदस्य पुंवद्भावः, सर्वभूमिश्च पृथिवी च सर्वभूमिपृथिव्यौ, ताभ्यां

सर्वभूमिपृथिवीभ्याम्, इतरेतरयोगद्वन्द्वः। यथासंख्यमनुदेशः समानाम् इति परिभाषा प्रवर्तते। एवञ्च तस्य=षष्ठ्यन्ताभ्यां सर्वभूमिपृथिवीभ्यां प्रातिपदिकाभ्याम् ईश्वरार्थे (स्वाम्यर्थे) यथासंख्यं तद्धितसंज्ञकौ अणञौ प्रत्ययौ परौ स्तः इति सूत्रार्थः सिध्यति। एवञ्च सर्वभूमिशब्दात् अण्, पृथिवीशब्दात् च अञ् भवति इति विज्ञेयम्। अणः णकारः, अञः ञकारश्च इत् भवति। तेन उभयत्रापि अकार एव शिष्यते। तयोस्तु स्वरे भेदः। यथा णितः फलम् अन्तोदात्तस्वरविधानम्। ञितः फलं तु उदात्तादिस्वरविधानम्।

उदाहरणम् - सार्वभौमः। सर्वभूमेः ईश्वरः इति लौकिकविग्रहे सर्वभूमि ङस् इति षष्ठ्यन्तात् प्रातिपदिकात् तस्येश्वर इति योगेन अणि तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोः इति योगेन सुब्लुकि तद्धितेष्वचामादेः इत्यनेन इत्यनेन आदिवृद्धौ प्राप्तायाम् अनुशतिकादिषु सर्वभूमिशब्दस्य पाठात् तां वृद्धिं बाधित्वा अनुशतिकादीनाञ्च इति सूत्रेण उभयपदवृद्धौ सार्वभौम अ इति जाते यचि भम् इत्यनेन मकारोत्तरवर्तिनः अकारस्य भसंज्ञायां यस्येति च इत्यनेन तस्य अकारस्य लोपे सार्वभौम् अ इति जाते एकदेशविकृतन्यायेन प्रातिपदिकत्वात् स्वादिकार्ये सार्वभौमः इति रूपं सिध्यति।

एवमेव पृथिव्याः ईश्वरः इत्यर्थे प्रकृतसूत्रेण अञि तद्धितेष्वचामादेः इत्यनेन आदिवृद्धौ स्वादिकार्ये पार्थिवः इति रूपं सिध्यति।

किञ्च तत्र विदित इति च इति योगेन तत्र विदित इत्यर्थे सर्वभूमिपृथिवीशब्दाभ्याम् अणञौ भवत इत्युच्यते तेन सर्वभूमौ विदित इत्यर्थे तेन सूत्रेण अणि सार्वभौमः इति रूपं सिध्यति। पृथिव्यां विदित इत्यर्थे अञि पार्थिवः इति रूपं सिध्यति।

[३१.२] तस्य भावस्त्वतलौ॥ (४.१.११९)

सूत्रार्थः - षष्ठ्यन्तसमर्थप्रातिपदिकात् भावार्थे त्वतलौ तद्धितसंज्ञकौ प्रत्ययौ परौ स्याताम्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। अस्मिन् सूत्रे तस्य (५/१), भावः (१/१), त्वतलौ (१/२) इति सूत्रगतपदच्छेदः। **सूत्रे तस्य इति षष्ठ्यन्तानुकरणं लुप्तपञ्चमीकम्।** त्वश्च तल् च तयोरितरेतरयोगद्वन्द्वस्त्वतलौ। भावः प्रथमैकवचनान्तम्। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। प्रकृतिजन्यबोधे प्रकारः भाव इत्युच्यते। अर्थात् प्रकृतौ यद्विशेषणतया भासते तदेव भाव इति शब्देनोच्यते। यथा गोरूपप्रकृतौ गोत्वरूपविशेषणं भासते, स एव भाव इत्युच्यते। एवञ्च सामान्यतया वयं वक्तुं शक्नुमो यत् कस्यापि शब्दस्य प्रवृत्तिनिमित्तमेव भाव इत्युच्यते। यथा घटे घटत्वम्, पुस्तके पुस्तकत्वम्। भावविषये अधिकं ज्ञातुं लघुसिद्धान्तकौमुदीस्थम् इदं सूत्रं पश्यतु।

उदाहरणम् - गोर्भावः इति लौकिकविग्रहे गो ङस् इति षष्ठ्यन्तात् प्रातिपदिकात् तस्य भावस्त्वतलौ इति शास्त्रेण त्वप्रत्यये प्रातिपदिकसंज्ञायां सुब्लुकि गोत्व इति जाते सुविभक्तौ त्वान्तं नपुंसकम् इति योगेन त्वप्रत्ययान्तस्य नपुंसकत्वमस्तीति हेतोः सोरमादेशे पूर्वरूपैकादेशे गोत्वम् इति रूपं सिध्यति। यदा तु तल् प्रत्ययो विधीयते तदा तु लकारस्य इत्संज्ञात्वात् तलन्तं स्त्रियाम् इति योगेन तलन्तस्य स्त्रीलिङ्गकत्वात् अजाद्यतष्टाप् इत्यनेन टापि अनुबन्धलोपे अकः सवर्णे दीर्घः इति सवर्णदीर्घे

सोः हल्ङ्यादिलोपे च गोता इति रमावद् रूपं सिध्यति तेन गोता इति रूपं सिध्यति। एवं गोत्वं गोता इति रूपद्वयं भवति।

[३१.३] पृथ्वादिभ्य इमनिज्वा॥ (५.१.१२२)

सूत्रार्थः - पृथ्वादिगणपठितेभ्यः षष्ठ्यन्तसमर्थप्रातिपदिकेभ्यः भावार्थे तद्धितसंज्ञकः इमनिच्प्रत्ययो परो विकल्पेन भवति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। पृथ्वादिभ्यः (५/३), इमनिच् (१/१) वा (अव्ययम्) इति सूत्रगतपदच्छेदः। पृथुः आदिर्येषां ते पृथ्वादयः तेभ्यः पृथ्वादिभ्यः इति तद्गुणसंविज्ञानबहुव्रीहिः। पृथ्वादिः एको गणः। स च गणपाठस्थः। तस्य भावस्त्वतलौ इत्यतः तस्य (५/३), भावः इत्यनयोरनुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। एवञ्च तस्य=षष्ठ्यन्तेभ्यः पृथ्वादिप्रातिपदिकेभ्यः भावार्थे तद्धितसंज्ञकः इमनिच् प्रत्ययो विकल्पेन भवति इति सूत्रार्थः। सूत्रे वा-वचनम् अणादिसमावेशार्थम्। इमनिचः द्वितीयः इकारः चकारश्च इतौ स्तः। अतः इमन्-मात्रं शिष्यते। चकारानुबन्धः स्वरार्थम्। इमनिच्प्रत्ययान्तशब्दः संस्कृते पुंलिङ्गको भवति।

उदाहरणम् - पृथोर्भावः इति लौकिकविग्रहे, पृथु ङस् इति षष्ठ्यन्तात् प्रातिपदिकात् पृथ्वादिभ्य इमनिज्वा इत्यनेन विकल्पेन इमनिच्प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लुकि पृथु इमन् इति स्थिते र ऋतो हलादेर्लघोः इत्यनेन ऋकारस्य स्थाने र-इत्यादेशे प् र इमन् इति जाते टेः इत्यनेन टिसंज्ञकस्य उकारस्य लोपे प्रथ् इमन् इति जाते सुप्रत्यये उपधादीर्घे हल्ङ्यादिलोपे नकारस्य लोपे च प्रथिमा इति रूपं सिध्यति। एवञ्च राजन्शब्दवत् रूपाणि भवन्ति - प्रथिमानौ प्रथिमानः इति। यदा तु इमनिच् न भवति तदा इगन्ताच्च लघुपूर्वात् इत्यनेन अण्प्रत्यये पृथु अ इति जाते ओर्गुणः इत्यनेन गुणे ओकारे तत्स्थाने अवादेशे स्वादिकार्ये पार्थवम् इति रूपं सिध्यति। किञ्च आ च त्वात् इत्यतः त्वतलोरधिकृतत्वात् तौ अपि भवतः तेन पृथुत्वम्, पृथुता इति रूपद्वयं भवति। एवञ्च प्रथिमा, पार्थवं, पृथुता, पृथुत्वम् इति रूपचतुष्टयं सिध्यति।

[३१.४] गुणवचनब्राह्मणादिभ्यः कर्मणि च॥ (५.१.१२४)

सूत्रार्थः- षष्ठ्यन्तसमर्थगुणवाचकप्रातिपदिकात् ब्राह्मणादिगणपठितषष्ठ्यन्त-समर्थप्रातिपदिकात् च भावार्थे कर्मार्थे च तद्धितसंज्ञकः ष्यञ्प्रत्ययः परो भवति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। गुणवचनब्राह्मणादिभ्यः (५/३), कर्मणि (७/१) च इति सूत्रगतपदच्छेदः। गुणं प्रोक्तवन्तः इति गुणवचनाः। ब्राह्मणः आदिर्येषां ते ब्राह्मणादयः इति तद्गुणसंविज्ञानबहुव्रीहिसमासः। गुणवचनाश्च ब्राह्मणादयश्च तेषामितरेतरयोगद्वन्द्वो गुणवचनब्राह्मणादयः तेभ्यः गुणवचनब्राह्मणादिभ्यः। तस्य भावस्त्वतलौ इत्यतः तस्य , भावः इत्यनयोः पदयोः, किञ्च वर्णदृढादिभ्यः ष्यञ् इत्यतः ष्यञ् इति पदस्य चानुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। एवञ्च तस्य=षष्ठ्यन्तेभ्यः

गुणवचनब्राह्मणादिप्रातिपदिकेभ्यः कर्मणि भावे च तद्धितसंज्ञकः ष्यञ्प्रत्ययः परो भवति इति सूत्रार्थः सिध्यति। ष्यञः षकारस्य षः प्रत्ययस्य इत्यनेन इत्संज्ञा भवति इत्यवधेयम्। चकाराद् भावेऽपि ष्यञ् भवति इति चकारपदप्रयोजनम्। ब्राह्मणादिगणः आकृतिगणः। कर्मपदेन कार्यक्रिययोर्बोधो भवति। गुणवचनशब्दः स एव भवति य आदौ गुणार्थे प्रवृत्तो भवति। ततः गुणगुणिनोः अभेदोपचारात् मतुब्लुकः वा तद्गुणयुक्तद्रव्यस्य वाचको भवति। पूर्वतनसूत्रैः भावार्थे एव प्रत्ययस्य विधानं कृतमस्ति अत्र तु कर्मार्थे अपि प्रत्ययविधानार्थं योगोऽयमारब्धः।

उदाहरणम्- जडस्य भावः कर्म वा इति लौकिकविग्रहे जड ङस् इति षष्ठ्यन्तात् गुणवचनप्रातिपदिकात् गुणवचनब्राह्मणादिभ्यः कर्मणि च इत्यनेन ष्यञ्प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लुकि आदिवृद्धौ भसंज्ञकाकारलोपे स्वादिकार्ये जाड्यम् इति रूपं सिध्यति। ततः त्वतलयोः प्रत्ययोः कृतयोः जडत्वम्, जडता। किञ्च केवले भावार्थे दृढादित्वात् इमनिचि जडिमा इति रूपं सिध्यति।

एवं ब्राह्मणस्य भावः कर्म वा ब्राह्मण्यम्, ब्राह्मणत्वम्, ब्राह्मणता।

चोरस्य भावः कर्म वा चौर्यम्, चौर्यत्वम्, चौर्यता इत्यादीनि रूपाणि सिध्यन्ति।

[३१.५] तेन वित्तश्चुञ्चुप्चणपौ॥ (५.२.२६)

सूत्रार्थः - तृतीयान्तसमर्थप्रातिपदिकात् वित्तार्थे चुञ्चुप्-चणपौ प्रत्ययौ परौ भवतः।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदत्रयमस्ति। तेन, वित्तः, चुञ्चुप्चणपौ इति सूत्रगतपदच्छेदः। चुञ्चुप् च चणप् च तयोरितरेतरयोगद्वन्द्वः चुञ्चुप्चणपौ इति प्रथमाद्विवचनान्तं विधीयमानम्। तेन इति तृतीयैकवचनान्तम्। वित्तः इति सप्तम्यर्थे प्रथमान्तः। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। ननु तयोः चुञ्चुप्चणपोः प्रत्यययोः आद्यचकारस्य चुटू इति इत्संज्ञाप्राप्तिः इति पृच्छायामुच्यते भाष्यकारः अत्र य्चुञ्चुप्-य्चणपौ इति यकारप्रश्लेषपाठं पठति। अतः आद्यचकाराभावान्न दोषः। चुञ्चुप् -चणप् इत्युभयत्र पकारस्य इत्संज्ञा भवति। एवञ्च तृतीयान्तसमर्थप्रातिपदिकात् प्रतीत-ज्ञात-प्रसिद्धार्थेषु चुञ्चुप्-चणपौ प्रत्ययौ परौ भवतः इति सूत्रार्थः।

उदाहरणम् - विद्याचुञ्चुः , विद्याचणः। विद्यया वित्तो इति लौकिकविग्रहे विद्या टा इत्यलौकिकविग्रहे प्रकृतसूत्रेण चुञ्चुप्प्रत्यये अनुबन्धलोपे प्रातिपदिकादिकार्ये विद्याचुञ्चुः इति रूपं सिध्यति। चणप्प्रत्ययपक्षे तु विद्याचणः इति रूपं सिध्यति।

[३१.६] किमिदम्भ्यां वो घः॥ (४.२.४०)

सूत्रार्थः - परिमाणार्थे वर्तमानाभ्यां समर्थाभ्यां किम्-इदम्प्रातिपदिकाभ्यां प्रथमान्ताभ्यां तदस्य परिमाणमस्तीत्यर्थे वतुप्प्रत्ययो भवति वतुपः वकारस्य स्थाने च घकारादेशो भवति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयम् अस्ति। किमिदम्भ्याम् (५/२), वः (६/१), घः (१/१) इति सूत्रगतपदच्छेदः। किम् च इदं च तयोरितरेतरयोगद्वन्द्वे किमिदमौ ताभ्याम् किमिदम्भ्याम्। यत्तदेतेभ्यः परिमाणे वतुप् इत्यतः परिमाणे वतुप् इत्यनयोः, तदस्य सञ्जातं तारकादिभ्य इतच् इत्यतः तदस्य इत्यस्य चानुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः, समर्थानां प्रथमाद्वा इति एते अधिक्रियन्ते। तथा च उक्तार्थः सिध्यति एव।

उदाहरणम् - किं परिमाणमस्य इति लौकिकविग्रहे किम् सु इत्यलौकिकविग्रहे किमिदम्भ्यां वो घः इत्यनेन वतुप्प्रत्यये वकारस्य स्थाने घ्-आदेशे प्रातिपदिकसंज्ञायां सुब्लुकि किम् घ् अत् इति जाते घ् इत्यस्य स्थाने आयनेयादिसूत्रेण इयादेशे किम् इयत् इति जाते इदंकिमोरीश्की इत्यनेन किम् इत्यस्य स्थाने कि - इत्यादेशो भवति। तेन कि इयत् इति जाते सुविभक्त्युपधादीर्घ-नुमागमहलङ्यादिलोप-संयोगान्तलोपेषु कृतेषु कियान् इति रूपं सिध्यति।

पाठगतप्रश्नाः -१

१. सर्वभूमेः निमित्तमित्यर्थे निष्पन्नस्य सार्वभौमः इति पदे कः प्रत्ययोऽस्ति।

२. कियान् इत्यत्र कः प्रत्ययः।

३. गोर्भावः इत्यर्थे कति रूपाणि भवन्ति कानि च तानि।

४. विद्याचुञ्चुः इत्यत्र कः प्रत्ययः।

५. विद्याचणः इत्यत्र चणप्प्रत्ययविधायकसूत्रं किम्।

६. जाड्यम् इत्यत्र कः प्रत्ययः।

७. गुणवचनब्राह्मणादिभ्यः कर्मणि च इत्यनेन किं विधीयते।

८. पृथ्वादिभ्य इमनिज्वा इत्येनन कः प्रत्ययो विधीयते।

९. पृथोर्भावः इति विग्रहे किं पदं भवति।

१०. तलन्तस्य स्त्रीलिङ्गकत्वं केन भवति।

[३१.७] किमोऽत्॥ (५.३.१२)

सूत्रार्थः - सप्तम्यन्तात् किम्शब्दात् विकल्पेन अत्प्रत्ययो भवति, पक्षे त्रल् अपि भवति।

सूत्रव्याख्या - विधिसूत्रमिदमस्ति। किमः पञ्चम्येकवचनान्तम्, अत् इति प्रथमैकवचनान्तं विधीयमानम्। सप्तम्यास्त्रल् इत्यतः सप्तम्याः इत्यस्य अनुवृत्तिर्भवति। तच्च प्रातिपदिकात् इत्यस्य विशेषणमस्ति। अतः तदन्तविधौ सप्तम्यन्तात् इत्यर्थो लभ्यते। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिक्रियन्ते। तथा च सप्तम्यन्तात् किम्-प्रातिपदिकात् स्वार्थे तद्धितसंज्ञकः अत्प्रत्ययो विकल्पेन भवति इति सूत्रार्थः सम्पद्यते। वा ह छन्दसि इत्यतः वापदस्यानुकर्षणं भवति। अतः तकारः

इत् भवति। तस्मात् अ इत्येव शिष्यते। तित्स्वरितम् इत्यनेन स्वरितस्वरार्थं तकारानुबन्धः कृतः इति ज्ञेयम्।

उदाहरणम् - क्व, कुत्र। कस्मिन् इति लौकिकविग्रहे किम् ङि इति सप्तम्यन्तात् प्रातिपदिकात् सप्तम्यास्त्रल् इति योगेन त्रलि प्राप्ते तं बाधित्वा किमोऽत् इति शास्त्रेण अत्प्रत्यये अनुबन्धलोपे किम् अ इति स्थिते क्वाति इति योगेन किम्शब्दस्य स्थाने क्व इत्यादेशे क्व अ इति जाते भसंज्ञकाकारस्य लोपे क्व् अ इति जाते सुप्रत्यये च अव्ययत्वात् विभक्तेः लुकि क्व इति रूपं सिध्यति।

[३१.८] यत्तदेतेभ्यः परिमाणे वतुप्॥ (५.२.३९)

सूत्रार्थः - तत्परिमाणमस्य इत्यर्थे परिमाणे वर्तमानेभ्यः प्रथमान्तेभ्यो यत्तदेतेभ्यस्तद्धितसंज्ञो वतुप्प्रत्ययः स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। यत्तदेतेभ्यः (५/३), परिमाणे (७/१), वतुप् (१/१) इति सूत्रगतपदच्छेदः। यत् च तत् च एतत् च इति एतेषाम् इतरेतरयोगद्वन्द्वे यत्तदेतदः, तेभ्यः यत्तदेतेभ्यः। तदस्य सञ्जातं तारकादिभ्य इतच् (५.२.३६) इत्यतः तदस्य इति पदद्वयस्यानुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिक्रियन्ते। तेन तत्=प्रथमान्तेभ्यः यत्तदेतेभ्यः प्रातिपदिकेभ्यः तत्परिमाणमस्य इत्यर्थे तद्धितसंज्ञकः वतुप्-प्रत्ययः परो भवति इति सूत्रार्थः सिध्यति। वतुपः पकारः इत्संज्ञकः उकारश्च उच्चारणार्थः, अतः वत्मात्रं शिष्यते। इदं ध्येयं यत् वतिप्रत्ययान्तशब्दः वत्प्रत्ययान्तशब्दात् भिन्नोऽस्ति। वतिप्रत्ययान्तशब्दः अव्ययं भवति। किन्तु वतुप्प्रत्ययान्तशब्दः त्रिषु लिङ्गेषु अपि भवति इति।

उदाहरणम् - यावान्, तावान्, एतावान्।

सूत्रार्थसमन्वयः - यत् परिमाणम् अस्य इति लौकिकविग्रहे यत् सु इति प्रथमान्तात् यत्प्रातिपदिकात् प्रकृतसूत्रेण वतुप्-प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लकि यत् वत् इति जायते। ततः आ सर्वनाम्नः इत्येनन तकारस्य स्थाने आकारादेशे सवर्णदीर्घे सुप्रत्यये च यावत् स् इति स्थितिः उत्पन्ना। ततः उगित्त्वात् उगिदचां सर्वनामस्थानेऽधातोः इत्यनेन नुमागमे अत्वसन्तस्य चाधातोः इत्येनन उपधायाः दीर्घे यावान् त् स् इति जाते सकारस्य हल्ङ्यादिलोपे तकारस्य संयोगान्तलोपे यावान् इति रूपं सिध्यति। स्त्रीत्वविवक्षायां तु उगिदचाम् इति ङीप्प्रत्यये यावती इति, नपुसंकलिङ्गे तु स्वमोर्नपुंसकात् इत्येनन सोः लुकि यावत् इति रूपत्रयं भवति। एवमेव तत् परिमाणमस्य इत्यर्थे तावान्, तावती, तावत् इत्यत्र, एतत् परिमाणमस्य इत्यर्थे एतावान्, एतावती, एतावत् इत्यत्र च समानैव प्रक्रिया ज्ञेया।

ततः परं अस्मिन्नेवार्थे किम्-इदम्-शब्दाभ्यां प्रकारान्तरेण वतुप्प्रत्ययो भवति इति दर्शयितुं सूत्रमिदमारभ्यते-

[३१.९] किमिदम्भ्यां वो घः॥ (५.२.४४)

सूत्रार्थः - किमिदम्भ्यां वतुप्, वकारस्य घश्च।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। किमिदम्भ्याम् (५/२), वः (६/१), घः (१/१) इति सूत्रगतपदच्छेदः। यत्तदेतेभ्यः परिमाणे वतुप् (५.२.३९) इत्यतः परिमाणे, वतुप् इत्यनयोः पदयोः अनुवृत्तिर्भवति। तदस्य सञ्जातं तारकादिभ्य इतच् (५.२.३६) इत्यतः तदस्य इति पदद्वयस्यानुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिक्रियन्ते। तथा च तत्परिमाणमस्य अस्ति इत्यर्थे परिमाणे विद्यमानाभ्यां प्रथमान्ताभ्यां किम्-इदम्-प्रातिपदिकाभ्यां तद्धितसंज्ञो वतुप्प्रत्ययो भवति, किञ्च वकारस्य स्थाने घादेशो भवति इति सूत्रार्थः फलति।

उदाहरणम् - कियान्। इयान्।

सूत्रार्थसमन्वयः - किम् परिमाणम् अस्य – कियान् (क्या है परिमाण इसका अर्थात् कितना, how much)। अत्र परिमाणार्थे वर्तमानात् किम् सु इति प्रथमान्तात् प्रकृतसूत्रेण तत् परिमाणम् अस्य अस्तीत्यर्थे वतुप्प्रत्यये अनुबन्धलोपे वतुपः वकारस्य घादेशे च किम् घत् इति जायते। ततः आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इत्यनेन घकारस्य स्थाने इय्-आदेशे किम् इय् अत् इति जाते अग्रिमसूत्रमारभ्यते-

[३१.१०] इदंकिमोरीश्की॥ (६.३.८९)

सूत्रार्थः - दृग्दृशवतुषु इदम ईश्, किमः की स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। इदंकिमोः (६/२), ईश्की (लुप्तप्रथमाद्विवचनान्तम्) इति सूत्रगतपदच्छेदः। दृग्दृशवतुषु (६.३.८९) इति सूत्रमनुवर्तते। ईश् च की च ईश्की, इतरेतरयोगद्वन्द्वे सौत्रत्वाद्विभक्तेर्लुक्। अथवा ईश् की इत्येवं द्वे पदे बोध्ये। यथासंख्यमनुदेशः समानाम् इति परिभाषा उपस्थिता भवति। ईशः शकारः शित् अस्ति। अतः शित्त्वात् अनेकाल्शित्सर्वस्य इति परिभाषया इदमः स्थाने ईश् इति सर्वादेशो भवति। एवमेव की इति अनेकाल् अस्ति। तस्मात् तयैव परिभाषया किमः स्थाने की इति सर्वादेशो भवति। तथा च सूत्रार्थस्तावत्- दृग्दृशवतुषु परेषु इदम्-शब्दस्य स्थाने ईश्-आदेशः स्यात्, किम्-शब्दस्य स्थाने च की-आदेशः स्यात् इति।

उदाहरणम् - कियान्।

सूत्रार्थसमन्वयः - एवञ्च किम् इयत् इति जाते एकदेशविकृतमनन्यवत् इति न्यायेन वतुप्प्रत्यये परतः इदंकिमोरीश्की इति योगेन किमः स्थाने की इति सर्वादेशे की इयत् इति जायते। ततः यस्येति च इत्यनेन भसंज्ञकस्य ईकारस्य लोपे कियत् इति निष्पद्यते। ततः पुंस्त्वविवक्षायां सुप्रत्यये उपधादीर्घे नुमागमे हल्ङ्यादिलोपे संयोगान्तलोपे च कियान् इति रूपं सिध्यति। स्त्रीत्वविवक्षायां तु उगितश्च इति ङीपि कियती इति रूपं, नपुंसकलिङ्गे तु स्वमोर्नपुंसकात् इति सोर्लुकि कियत् इति रूपं च सिध्यति।

एवमेव इदं परिमाणमस्य इत्यर्थे इयान् (पुं), इयती (स्त्री.), इयत् (नपुं.)। अत्रायं विशेषः ज्ञेयः - प्रकृतसूत्रेण इदम्-शब्दस्य स्थाने ईश्-आदेशे ई इयत् इति जाते यस्येति च इत्यनेन भसंज्ञकस्य ईकारस्य लोपे प्रत्ययमात्रमेव शिष्यते। तस्मात् इयान् इत्यादौ प्रकृतिलेशो नास्ति एव।

इदानीम् अवयवपरकात् संख्यावाचकशब्दात् अवयविनः बोधाय तयप्-प्रत्ययं विधातुं सूत्रमिदमारभ्यते-

[३१.११] संख्याया अवयवे तयप्॥ (५.२.४२)

सूत्रार्थः - अवयवे वर्त्तमानात् संख्यावाचकात् प्रथमान्तात् प्रातिपदिकात् अस्य इत्यर्थे तद्धितः तयप्-प्रत्ययो भवति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदत्रयमस्ति। संख्यायाः (५/१), अवयवे (७/१), तयप् (१/१) इति सूत्रगतपदच्छेदः। तदस्य सञ्जातं तारकादिभ्य इतच् (५.२.३६) इत्यतः तदस्य इति पदद्वयस्यानुवृत्तिर्भवति। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिक्रियन्ते। एवञ्च अवयवे वर्तमानात् प्रथमान्तात् संख्यावाचकात् प्रातिपदिकात् अवयवः अस्य अस्ति इत्यर्थे तद्धितसंज्ञकः तयप्-प्रत्ययः परो भवति इति सूत्रार्थः। तयपः पकारः इत्संज्ञकः अस्ति। अतः तय-मात्रं शिष्यते। अनुदात्तौ सुप्पितौ इत्यनेन अनुदात्तस्वरार्थं तयपि पित्करणमस्ति।

उदाहरणम् - पञ्चतयम्।

सूत्रार्थसमन्वयः - पञ्च अवयवा अस्य सन्ति - पञ्चतयम् (पांच अवयव हैं इस के, अर्थात् पाञ्च अवयवों वाला अवयवी)। अत्र अवयवे वर्तमानात् पञ्चन् जस् इति संख्यावाचकात् प्रथमान्तात् प्रातिपदिकात् अयवयवाः सन्ति अस्य इत्यर्थे प्रकृतसूत्रेण तयपि अनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि पञ्चन् तय इति जायते। ततः स्वादिष्वसर्वनामस्थाने इत्येनन पदसंज्ञायां न लोपः प्रातिपदिकान्तस्य इत्यनेन नकारस्य लोपे नपुंसकलिङ्गे विभक्तिकार्ये पञ्चतयम् इति रूपं सिध्यति। स्त्रीत्वविवक्षायां तु टिड्ढाणञ् इत्यादिसूत्रेण ङीपि भसंज्ञकस्य अकारस्य लोपे पञ्चतयी इति रूपं सिध्यति। तयप्प्रत्ययान्तशब्दस्य धर्मप्रधाननिर्देशे साधारणतः नपुंसकलिङ्गे स्त्रीलिङ्गे च प्रयोगो भवति। यथा- वृत्तीनां पञ्चतयम्, वृत्तीनां पञ्चतयी। धर्मीप्रधाननिर्देशे तु विशेष्यानुसारं लिङ्गं भवति। तेन लिङ्गत्रयं भवति। यथा त्रयाः त्रये वा लोकाः, त्रय्यः स्थितयः, त्रयाणि जगन्ति।

एवमेव चत्वारः अवयवाः अस्य - चतुष्टयम्।

षट् अवयवाः अस्य - षट्तयम्।

सप्त अवयवाः अस्य - सप्ततयम्।

अष्टौ अवयवाः अस्य - अष्टतयम्।

नव अवयवाः अस्य - नवतयम्।

तत्र द्वि-त्रिशब्दाभ्यां विहितस्य तयपः स्थाने विकल्पेन अयच्-विधानार्थं सूत्रमिदमारभ्यते-

[३१.१२] द्वित्रिभ्यां तयस्यायज्वा॥ (५.२.४३)

सूत्रार्थः - द्वित्रिभ्यां परस्य तयस्य अयच् इत्यादेशो वा स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् चत्वारि पदानि सन्ति। द्वित्रिभ्याम् (५/२), तयस्य (६/१), अयच् (१/१) वा (अव्ययम्) इति सूत्रगतपदच्छेदः। द्विश्च त्रिश्च तयोः इतरेतरयोगद्वन्द्वे द्वित्रौ, ताभ्यां द्वित्रिभ्याम्। एवञ्च द्वि-त्रिभ्यां प्रातिपदिकाभ्यां विहितस्य तयपः स्थाने विकल्पेन अयजादेशो भवति इति सूत्रार्थः सिध्यति। अयचः चकार इत्संज्ञकः। अयचः चित्करणं चितः (६.१.१५७) इति योगेन अन्तोदात्तस्वरार्थमिति ज्ञेयम्। अयच् इति अनेकाल् अस्ति। अतः अनेकाल्शित्सर्वस्य इति योगेन तय इति सम्पूर्णस्थाने अयच् इति सर्वादेशो भवति।

उदाहरणम् - द्वयम्, द्वितयम्। त्रयम्, त्रितयम्।

सूत्रार्थसमन्वयः - द्वौ अवयवौ अस्य – द्वयं द्वितयं वा (दो अवयव हैं इस के अर्थात् दो अवयवों वाला अवयवी)। अत्र द्वि औ इति प्रथमान्तात् प्रातिपदिकात् अवयवाः अस्य सन्ति इत्यर्थे संख्याया अवयवे तयप् इति तयप्प्रत्यये इति तयपि अनुबन्धलोपे सुपो धातुप्रातिपदिकयोः इत्यनेन सुब्लुकि द्वि तय इति जायते। ततः द्वित्रिभ्यां तयस्यायज्वा इति प्रकृतसूत्रेण तयस्य स्थाने विकल्पेन अयजादेशे अनुबन्धलोपे द्वि अय इति जाते भसंज्ञकस्य अकारस्य लोपे द्व् अय इति जायते। ततः विभक्तिकार्ये द्वयम् इति रूपं भवति। अयचः अभावे तयपि तु द्वितयम् इति रूपं भवति।

एवमेव त्रयः अवयवाः अस्य इत्यर्थे त्रयं त्रितयं वा इति रूपं भवति।

कदाचित् तयपः स्थाने नित्यम् अयच्-आदेशो भवति। यथा उभौ अवयवौ अस्य इत्यर्थे उभयम् इति रूपं भवति। अत्र तु उभादुदात्तो नित्यम् इत्यनेन तयपः स्थाने नित्यमेव अयजादेशो भवति।

[३१.१३] अतिशायने तमबिष्ठनौ॥ (५.३.५५)

सूत्रार्थः - अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः।

सूत्रव्याख्या - विधिसूत्रमिदम्। द्विपदं सूत्रमस्ति। तमप् च इष्ठन् च तमबिष्ठनौ इति प्रथमैकवचनान्तौ विधीयमानौ प्रत्ययौ। अतिशायने इति सप्तम्येकवचनान्तम्। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिक्रियन्ते। अतिशायनशब्दस्य प्रकर्षः इत्यर्थः, तमपः पकारः इष्ठनः नकारश्च इत्संज्ञकौ भवतः। अतः तम, इष्ठ इत्येव शिष्यते। तमपः पकारानुबन्धः अनुदात्तौ सुप्पितौ इत्यनुदात्तस्वरार्थम्। इष्ठनः नकारानुबन्धः ञ्नित्यादिर्नित्यम् इत्युदात्तस्वरार्थम्। एवञ्च प्रकर्षविशिष्टार्थे वर्तमानात् प्रातिपदिकात् तद्धितसंज्ञकौ तमबिष्ठनौ प्रत्ययौ परौ भवतः इति सूत्रार्थः। तमप्प्रत्ययः प्रत्येकं प्रातिपदिकात् भवति किन्तु इष्ठन्प्रत्ययो गुणवाचकादेव भवति इति पार्थक्यं सम्यक् विज्ञेयम्।

उदाहरणम् - अयम् एषाम् अतिशयने लघुः इति लौकिकविग्रहे अतिशयविशिष्टार्थे वर्तमानात् लघु सु इति प्रथमान्तात् प्रातिपदिकात् अतिशायने तमबिष्ठनौ इति योगेन तमप्प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञादिकार्ये लघुतमः इति रूपं सिध्यति। इष्ठन्प्रत्यये तु लघु इष्ठ इति जाते टेः इति सूत्रेण टिसंज्ञकस्य उकारस्य लोपे लघ् इष्ठ इति जाते वर्णसम्मेलने प्रातिपदिकादिकार्ये लघिष्ठः इति रूपं सिध्यति। तमप्प्रत्यये तु लघुतमः इति रूपं भवति।

अयम् एषाम् अतिशयेन आढ्यः इत्यत्र तु आढ्यशब्दः लघुशब्दवत् गुणवाचको नास्ति। अतः न इष्ठन्प्रत्ययः, अपि तु तमप्प्रत्यय एव भवति। तस्मात् आढ्यतमः इत्येव रूपं भवति इति जानीत। बहुषु एकस्य अतिशयबोधनार्थमिदं सूत्रमारब्धम्। द्वयोः एकस्य अतिशयबोधनार्थं तु अग्रिमसूत्रमारभ्यते-

[३१.१४] द्विवचनविभज्योपपदे तरबीयसुनौ॥ (५.३.५७)

सूत्रार्थः - द्वयोरेकस्य अतिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। उच्यते इति वचनं, द्वयोर्वचनं द्विवचनम्। विभक्तुं योग्यं विभज्यं, द्विवचनं च विभज्यं च तयोः समाहारद्वन्द्वो द्विवचनविभज्यम्। द्विवचनविभज्यं च तद् उपपदम्- द्विवचनविभज्योपपदमिति कर्मधारयः, तस्मिन् इति द्विवचनविभज्योपपदे इति सप्तम्येकवचनान्तम्। तरप् च ईयसुन् च इति तयोरितरेयोगद्वन्द्वो तरबियसुनौ इति प्रथमाद्विवचनान्तौ विधीयमानौ प्रत्ययौ। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिक्रियन्ते। अत्र द्विवचनमिति न पारिभाषिकशब्दः, अपि तु पदार्थद्वयस्य प्रतिपादकम् इत्यर्थः। एवञ्च द्विवचने विभक्तव्ये वा उपपदे सति उत्कर्षविशिष्टार्थे वर्तमानाभ्यां सुबन्ततिङन्ताभ्यां तरप्-ईयसुनौ प्रत्ययौ भवतः इति सूत्रार्थः। तरपः पकारानुबन्धः अनुदात्तौ सुप्पितौ इति अनुदात्तस्वरार्थम्। अत्र सुबन्तं तिङन्तञ्चेति प्रकृतिद्वयम्। द्विवचनं विभज्यं चेति उपपदद्वयम्। तथा तरप् ईयसुन् चेति प्रत्ययद्वयम्। अत्र पारिभाषिकमुपपदं नास्ति अपि तु समीपे उच्चारितं पदम् उपपदमित्यन्वर्थत्वमेव स्वीक्रियते। सूत्रमिदम् अतिशायने तमबिष्ठनौ तिङश्च इति सूत्रयोरपवादभूतमस्ति। अजादी गुणवचनादेव इति नियमानुसारम् ईयसुन्प्रत्ययः गुणवाचकात् प्रातिपदिकादेव भवति न तु तिङन्तात् इति नियमः ध्येयः।

उदाहरणम् - द्विवचने उपपदे सुबन्तस्य उदाहरणम्- अयम् अनयोः लघुः-लघुतरः, लघीयान्।

अयम् अनयोः अतिशयेन लघुः इति लौकिकविग्रहः। अत्र अनयोः इति पदार्थद्वयस्य प्रतिपादकम् पदं समीपे उच्चारितमस्ति। ततः अतिशयविशिष्टार्थे वर्तमानात् लघु सु इत्यस्मात् सुबन्तात् स्वार्थे द्विवचनविभज्योपपदे तरबीयसुनौ इत्यनेन तरप्प्रत्यये अनुबन्धलोपे प्रातिपदिकंज्ञादिकार्ये लघुतरः इति रूपं सिध्यति। यदा तु ईयसुन्प्रत्ययस्तदा अनुबन्धलोपे टेः इत्यनेन टिसंज्ञकस्य उकारस्य लोपे लघीयस् इति जाते ततः सुप्रत्यये उगिदचां सर्वनामस्थानेऽधातोः इति योगेन नुमागमे लघीयन्स् स् इति जाते सान्महतः संयोगस्य इत्यनेन दीर्घे लघीयान्स् स् इति जाते सोः सकारस्य हल्ङ्यादिलोपे प्रकृतेः सकारस्य संयोगान्तस्य इत्यनेन लोपे लघीयान् इति रूपं सिध्यति। अनया रीत्या पटुतराः इत्यादिरूमपि सिध्यति।

द्विवचने उपपदे तिङन्तस्य उदाहरणम्- इयम् अनयोः अतिशयेन पचति इति पचतितराम्।

विभक्तव्ये उपपदे सुबन्तस्य उदाहरणम्- माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः। अत्र पाटलिपुत्रकेभ्यः इति विभज्योपपदम्।

[३१.१५] प्रकृत्यैकाच्॥ (६.४.१६३)

सूत्रार्थः - इष्ठादिषु एकाच् प्रकृत्या स्यात्।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयम् अस्ति। प्रकृत्या इति तृतीयैकवचनान्तम्। एकः अच् यस्य तद् एकाच् , बहुव्रीहिसमासः। एकाच् इति प्रथमैकवचनान्तम्। तुरिष्ठेमेयःसु इत्यतः इष्ठेमेयस्सु इत्यस्यानुवृत्तिर्भवति। भस्य, अङ्गस्य इत्युभयम् अधिक्रियते। तथा च विभक्तिविपरिणामेन अङ्गं भम् इत्यर्थो भवति। एवञ्च एकाच् भसंज्ञकम् अङ्गं प्रकृत्या स्यात् इष्ठन्-इमनिच्-ईयसुन्प्रत्ययेषु परेषु सत्सु। स्वेन रूपेण अवस्थानमेव प्रकृतिभाव इत्युच्यते। टेः इति सूत्रेण टिलोपे प्राप्ते तदभावं बोधयितुमस्य प्रवृत्तिर्भवति।

उदाहरणम्- श्रेष्ठः, श्रेयान्। अयमेषाम् अतिशयेन प्रशस्य इति लौकिकविग्रहे प्रशस्य सु इत्यलौकिकविग्रहे च अतिशायने तमबिष्ठनौ इति योगेन इष्ठन्प्रत्यये प्रातिपदिकसंज्ञायां सुब्लुकि प्रशस्य इष्ठ इति जाते प्रशस्य श्रः इति योगेन प्रशस्यशब्दस्य स्थाने श्र इत्यादेशे श्र इष्ठ इति जायते। ततः प्रकृतेः एकाच्त्वात् टेः इति योगेन टिलोपे प्राप्ते तं बाधित्वा प्रकृत्यैकाच् इति सूत्रेण प्रकृतिभावे आद्गुणः इत्यनेन गुणैकादेशे श्रेष्ठ इति जायते। ततः स्वादिकार्ये श्रेष्ठः इति रूपं भवति। पुनः द्विवचनविभज्योपपदे तरबीयसुनौ इत्यनेन ईयसुन्प्रत्यये प्रशस्य श्रः इत्यनेन श्रादेशे प्रकृतिवद्भावे गुणैकादेशे स्वादिकार्ये श्रेयान् इति रूपमपि भवति।

अयम् एषाम् अतिशयेन प्रशस्यः इत्यर्थे प्रशस्य सु इति अलौकिकविग्रहे अतिशायने तमबिष्ठनौ इत्यनेन इष्ठन्प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लकि प्रशस्य इष्ठ इति स्थिते सूत्रमिदमारभ्यते-

[३१.१६] ज्य च॥ (५.३.६१)

सूत्रार्थः- प्रशस्यस्य ज्यादेशः स्यात् इष्ठेयसोः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। ज्य इति लुप्तप्रथमाकं पदम्। चेति अव्ययपदम्। प्रशस्यस्य श्रः इत्यतः प्रशस्यस्य इत्यस्य, अजादी गुणवचनादेव इत्यतः विभक्तिविपरिणामेन अजादौ इत्यस्यानुवृत्तिर्भवति। प्रत्ययः इत्यस्य अधिकारः अस्ति। तस्य च विभक्तिवचनविपरिणामेन प्रत्ययोः इत्यर्थः। एवञ्च अजाद्योः प्रत्ययोः परतः अर्थात् इष्ठनि ईयसुनि च प्रत्यये परतः प्रशस्यस्य स्थाने ज्य इत्यादेशो भवति इति सूत्रार्थः।

उदाहरणम् - ज्येष्ठः।

सूत्रार्थसमन्वयः - एवञ्च अयम् एषाम् अतिशयेन प्रशस्यः इत्यर्थे प्रशस्य इष्ठ इति जाते अजादिः इष्ठन्प्रत्ययः परोऽस्ति इति हेतोः प्रकृतसूत्रेण ज्यादेशे भसंज्ञकस्य अकारस्य लोपे प्राप्ते प्रकृत्यैकाच् इत्यनेन प्रकृतिभावे स्वादिकार्ये च ज्येष्ठः इति रूपं भवति।

अयम् एषाम् अतिशयने प्रशस्यः इत्यर्थे तु द्विवचनविभज्योपपदे तरबीयसुनौ इत्यनेन पक्षे ईयसुनि अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लुकि प्रशस्य ईयस् इति जायते। ततः ज्य च इत्यनेन ज्यादेशे ज्य ईयस् इति जाते भसंज्ञकस्य आकारस्य लोपे प्राप्ते तं बाधित्वा प्रकृत्यैकाच् इत्यनेन प्रकृतिभावे लोपो न भवति। ततः ज्यादादीयसः इत्यनेन ईकारस्य स्थाने आकारादेशे ज्या आयस् इति जाते अकः सवर्णे दीर्घः इत्यनेन दीर्घे ज्यायस् इति जायते। ततः स्वादिकार्ये ज्येयान् इति रूपं भवति।

[३१.१७] कु तिहोः॥ (७.२.१०४)

सूत्रार्थः - तकारादिप्रत्ययहकारादिप्रत्ययोः परयोः किम्शब्दस्य स्थाने कु इति सर्वादेशो भवति। ।

सूत्रव्याख्या - तिश्च ह् च तयोरितरेतरयोगद्वन्द्वस्तिहौ तयोः इति तिहोः इति सप्तमीद्विवचनान्तौ। विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदद्वयमस्ति। अष्टन आ विभक्तौ इत्यतः विभक्तौ, किमः कः इत्यतः किमः इत्यस्यानुवृत्तिर्भवति। यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधिना तकारादि-थकारादि इत्येवमर्थः भवति। सूत्रमिदं किमः कः इत्यस्यापवादभूतम्। एवं सूत्रार्थः सिध्यति।

उदाहरणम्- कुतः, कस्मात्। कस्मात् इति लौकिकविग्रहे किम् ङसि इत्यलौकिकविग्रहे पञ्चम्यास्तसिल् इत्यनेन तसिल्प्रत्यये अनुबन्धलोपे प्रातिपदिकसंज्ञायां सुब्लुकि किम् तस् इति जाते प्राग्दिशो विभक्तिः इत्यनेन विभक्तिसंज्ञायां किमः कः इत्यनेन कादेशे प्राप्ते तं बाधित्वा कु तिहोः इत्यनेन कु इति सर्वादेशे कुतस् इति जायते। ततः सुविभक्तौ अव्ययत्वात् च अव्ययादाप्सुप इत्यनेन सोर्लुकि शिष्टस्य सकारस्य रुत्वविसर्गयोः कृतयोः कुतः इति सिध्यति। 'तसिल्' विकल्पेन भवति अतः पक्षे कस्मात् इत्यपि साधु। एवमेव यतः,यस्मात्। ततः, तस्मात्। इतः, अस्मात्। अतः, अस्मात्। अमुतः, अमुष्मात्। बहुतः, बहुभ्यः इत्यादीनि रूपाणि सिध्यन्ति।

[३१.१८] कृभ्वस्तियोगे संपद्यकर्तरि च्विः॥ (५.४.५०)

सूत्रार्थः - विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद् विकारशब्दात् स्वार्थे च्विर्वा स्यात् करोत्यादिभिर्योगे।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। अस्मिन् सूत्रे पदत्रयम् अस्ति। कृश्च भूश्च अस्तिश्च तेषामितरेतरयोगद्वन्द्वः कृभ्वस्तयः। तेषां कृभ्वस्तीनाम्, तेषां योगः कृभ्वस्तियोगः तस्मिन्, कृभ्वस्तियोगे इति सप्तम्येकवचनान्तम्। सम्पदनं सम्पद्यः तस्य कर्ता, सम्पद्यकर्ता, तस्मिन् सम्पद्यकर्तरि इत्यपि सप्तम्येकवचनान्तम्, च्विः इति प्रथमैकवचनान्तो विधीयमानः प्रत्ययः। प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्, तद्धिताः इति एते अधिक्रियन्ते। अभूततद्भावे वक्तव्यमिति वार्तिकमत्र आश्रीयते। अभूतस्य=कार्यरूपेण अपरिणतस्य तद्भावः -तेन कार्यरूपेण भावः अभूततद्भावः इत्युच्यते। एवञ्च अभूततद्भावे गम्ये सम्पद्यतेः (बनता है) कर्तृरूपं यत् प्रातिपदिकं तस्मात् प्रातिपदिकात् स्वार्थे विकल्पेन च्विप्रत्ययो भवति यदि कृ, अस्, भू इत्येतेषु केनचित् एकेन सह तस्य प्रातिपदिकस्य योगः भवति। च्वि

इत्यत्र चकारः चुटू इत्यनेन इत्संज्ञकः, वकारश्च वेरपृक्तस्य इत्यनेन इत्संज्ञकः, इकारः उपदेशेऽजनुनासिक इत् इत्यनेन इत्संज्ञकः। अतः च्वि इत्यत्र किमपि नावशिष्यते। अतोऽयं सर्वापहारलोप इत्युच्यते। च्विप्रत्ययान्तस्य ऊर्यादिच्विडाचश्च इत्यनेन निपातसंज्ञायां सत्यां स्वरादिनिपातमव्ययम् इत्यनेन अव्ययसंज्ञको भवतीति मनसि सम्यक् अवधार्यताम्।

उदाहरणम्- अकृष्णः कृष्णः सम्पद्यते, तं करोति इति कृष्णीकरोति। अत्र अभूततद्भावः स्पष्ट एवास्ति। सम्पद्यते इत्यस्य कर्तृद्वयमस्ति- अकृष्णः, कृष्णश्च। अत्र विकारवाचककृष्णशब्दं वक्ता प्रामुख्येन कर्तृत्वरूपेण वक्तुमिच्छति। किञ्च तस्य कृधातुना सह योगोऽपि अस्ति, यतो हि इदं कृधातोः कर्मापि अस्ति। अत्र अकृष्णशब्दः प्रकृतिः, कृष्णशब्दश्च विकारः। कार्यकारणे अभेदविवक्षायां कृष्णशब्दः प्रकृतौ अकृष्णे वर्तमानः अस्ति। एवञ्च विकारवाचकात् कृष्ण अम् इति प्रातिपदिकात् अभूततद्भावे इति वक्तव्यमिति वार्तिकसहयोगेन कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इत्यनेन च्वौ तस्य सर्वापहारलोपे प्रातिपदिकसंज्ञायां सुब्लुकि कृष्ण करोति इति स्थिते अग्रिमसूत्रमिदमारभ्यते-

[३१.१९] अस्य च्वौ॥ (७.४.३२)

सूत्रार्थः - अवर्णस्य ईत्स्यात्च्वौ।

सूत्रव्याख्या - विधिसूत्रम् इदम् अस्ति। द्विपदं सूत्रमस्ति। अस्य इति षष्ठ्येकवचनान्तम्। च्वौ इति सप्तम्येकवचनान्तम्। ई घ्राध्मोः इत्यतः ई इत्यनुवर्तते। अङ्गस्य इत्यधिक्रियते। तस्य च विशेषणम् अस्य इति। ततः विशेषणत्वात् तदन्तविधौ अवर्णान्तस्य अङ्गस्य इत्यर्थो भवति। एवञ्च च्विप्रत्यये परतः अवर्णान्तस्य स्थाने ईकारादेशो भवति इति सूत्रार्थः। अलोऽन्त्यस्य इति परिभाषाया उपस्थितिरस्ति। तेन अन्त्यस्य अलः स्थाने अर्थात् अवर्णस्य स्थाने एव ईकारादेशो भवति। च्विप्रत्ययस्य लोपेऽपि प्रत्ययलोपे प्रत्ययलक्षणमिति परिभाषया ईकारादेशः सिध्यति एव।

उदाहरणम् - एवञ्च कृष्ण करोति इति जाते अस्य च्वौ इति सूत्रेण णकारोत्तरवर्तिनः अकारस्य स्थाने ईकारादेशे कृष्णी इति रूपं सिध्यति। भवतियोगे तु कृष्णीभवति इति रूपं सिध्यति। एवमेव अब्रह्म ब्रह्म भवति इत्यर्थे ब्रह्मीभवति इति रूपं भवति।

अशुचिः शुचिर्भवति इत्यर्थे तु कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इति योगेन च्विप्रत्यये तस्य लोपे प्रातिपदिकसंज्ञायां सुब्लुकि शुचि भवति इति जाते अग्रिमसूत्रमारभ्यते-

[३१.२०] च्वौ च॥ (७.४.२६)

सूत्रार्थः - च्वौ च परे पूर्वस्य दीर्घो भवति।

सूत्रव्याख्या - विधिसूत्रमस्ति। द्विपदं सूत्रमस्ति। च्वौ इति सप्तम्येकवचनान्तम्, च इत्यव्ययपदम्। अङ्गस्य इत्यधिक्रियते। अचः इति अङ्गस्य इति विशेष्यस्य विशेषणमस्ति। तस्मात् येन विधिस्तदन्तस्य इत्यनेन तदन्तविधौ अजन्तस्य अङ्गस्य इत्यर्थो भवति। अकृत्सार्वधातुकयोर्दीर्घः इत्यतः

दीर्घः इत्यस्यानुवृत्तिर्भवति। तथा च सूत्रार्थः - च्विप्रत्यये परतः अजन्ताङ्गस्य स्थाने दीर्घादेशो भवति। अलोऽन्त्यस्य इति परिभाषया अन्त्यस्यैव अलः=अचः स्थाने दीर्घादेशो भवति।

उदाहरणम् - एवञ्च शुचि भवति इति स्थिते च्वौ च इति सूत्रेण दीर्घे इकारस्य ईकारे शुचीभवति इति रूपं सिध्यति।

पाठगतप्रश्नाः-२

११. अशुचिः शुचिर्भवति इति लौकिकविग्रहे च्विप्रत्यये च किं रूपं भवति।

१२. कृष्णीकरोति इत्यत्र अकारस्य ईत्त्वं केन भवति।

१३. शुचीभवति इत्यत्र दीर्घः केन भवति।

१४. च्विप्रत्ययविधायकसूत्रं किम्।

१५. कस्मात् इत्यर्थे तद्धितान्तशब्दः कः।

१६. किम्शब्दस्य स्थाने कु इत्यादेशः केन भवति।

१७. अयमेषाम् अतिशयेन प्रशस्य इति लौकिकविग्रहे तद्धितान्तशब्दः कः

१८. प्रकृत्यैकाच् इति सूत्रं किं विधिसूत्रम् उत अतिदेशसूत्रम्।

१९. तरप्प्रत्ययविधायकसूत्रं लिखत।

२०. तमप्प्रत्ययविधायकसूत्रं लिखत।

पाठसारः

तद्धितप्रत्ययसम्बन्धिनि अस्मिन् अन्तिमपाठे प्रायः अस्मद्व्यवहृतानां शब्दानाम् आलोचना विद्यते यथा अस्माकं लोकव्यवहारकाले इमे शब्दाः प्रयोक्तुं शक्याः। अण्-अञ्-त्व-तल्-इमनिच्-ष्यञ्-चुञ्चुप्-चणप्-तरप्-तमप्-ईयसुन्-च्विप्रत्ययानां मुख्यानां विषये अत्र आलोचनं विहितम्। पृथोर्भावः इत्यर्थे कति रूपाणि भवन्ति इति विषये स्पष्टं व्याख्यानं कृतम् इत्येवं विशेषरूपाणि तत्र तत्र ससूत्रं प्रदर्शितानि सन्ति। कृभ्वस्तियोगे संपद्यकर्तरि च्विः इति च्विप्रत्ययविधायकसूत्रं सोदाहरणं व्याख्यातमस्ति। तत्र च अकृष्णः कृष्णः सम्पद्यते इत्यर्थे कृष्णीभवति रूपं सिध्यति, तद्विषये अत्र सम्यक् व्याख्यातमस्ति येन अन्यद्रूपमपि साधयितुं शक्यमस्ति। तरप्तमप्प्रत्यययोः विषये विस्पष्टं व्याख्यानमस्ति येन तादृशप्रत्ययान्तम् अन्यद्रूपमपि साधयितुं शक्नुयात्। एवं तद्धितप्रकरणस्य अयम् अन्तिमः पाठः समाप्तः।

पाठान्तप्रश्नाः

१. सार्वभौमशब्दस्य रूपसिद्धिः कार्या।

२. तस्य भावस्त्वतलौ इति सूत्रं सोदाहरणं व्याख्यात।

३. पृथोर्भावः इत्यर्थे कति रूपाणि भवन्ति तेषाञ्च रूपसिद्धिः कार्या।

४. तरप्तमप्प्रत्यययोः विषये टिप्पणी लेख्या।

५. कृभ्वस्तियोगे संपद्यकर्तरि च्विः इति सूत्रं सोदाहरणं व्याख्यात

६. गुणवचनब्राह्मणादिभ्यः कर्मणि च इति सूत्रं सोदाहरणं व्याख्यात।

७. सर्वभूमिपृथिवीभ्यामणञौ इति सूत्रं सोदाहरणं व्याख्यात।

८. तस्येश्वरः इति सूत्रं सोदाहरणं व्याख्यात।

पाठगतप्रश्नोत्तराणि

उत्तराणि-१

१. अण्।

२. वतुप्।

३. गोता, गोत्वम् इति रूपद्वयम्।

४. चुञ्चुप्।

५. तेन वित्तश्चुञ्चुप्चणपौ।

६. ष्यञ्।

७. ष्यञ्प्रत्ययः।

८. इमनिच्।

९. प्रथिमा।

१०. तलन्तं स्त्रियाम्।

उत्तराणि-२

११. शुचीभवति।

१२. अस्य च्वौ।

१३. च्वौ च।

१४. कृभ्वस्तियोगे संपद्यकर्तरि च्विः।

१५. कुतः।

१६. कु तिहोः।

१७. श्रेष्ठः, श्रेयान्।

१८. विधिसूत्रम्।

१९. द्विवचनविभज्योपपदे तरबीयसुनौ।

२०. अतिशायने तमबिष्ठनौ।

॥इति एकत्रिंशः पाठः॥